volume I & II
1-246 & I-267

No. 1. ॥ श्रीरस्तु ॥ सञ्चिका नं—१.

॥ श्रीहस्तिशैलशिखरोज्ज्वलपारिजाताय नमः ॥

श्रीमद्विशिष्टाद्वैतसिद्धान्तप्रवर्तनधुरंधर - कवितार्किकसिंह
सर्वतन्त्रस्वतन्त्र - श्रीमद्वेदान्ताचार्य विरचित
सकलग्रन्थबृन्द प्रकाशनी

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

(प्रतिमाससमवतरन्ती मासिकी सञ्चिका ।)

परिष्कारकः पर्यवेक्षकश्च
श्रीकाञ्ची. वेदवेदान्तवैजयन्ती विद्यालयाध्यक्षः
प्रतिवादिभयङ्कर - अण्णङ्गराचार्यः ।

Sri Vedanta Desika Granthamala

[ISSUED IN PARTS EVERY MONTH]

GENERAL EDITOR:

SRI KANCHI. P. B. ANNANGARACHARYA

प्रकाशनादि सर्वाधिकारी
विद्वान् ति. अ. संपत्कुमाराचार्यः, एम्. ए., कञ्जीवरम्.
प्रत्येक सञ्चिकामूल्यम्—एकरूप्यमात्रम् । प्रापणव्ययः पृथक् ।

Price Re. 1/-] JULY—1940 [Postage Extra

G. C. PRESS, WASHERMENPET, MADRAS.

Copies can be had of:

1. Vidwan T. A. Sampathkumaracharya, M. A.,
   29, South Mada St., L. Conjeeveram.
2. P. R. Aravamuthu Iyengar,
   176, Mint St., Madras.
3. Sri Ganeshram Muralidhar,
   Sri Ramanuja Buildings, Sholapur.
4. Sri Mahant Garudadhvajacharya,
   Sri Ramanuja Koot, Ramghat, Ujjain, Via Ratlam.

अस्याः प्राप्तिस्थानानि :—

१. विद्वान् ति. अ. संपत्कुमाराचार्यः, एम्. ए.
   २९, दक्षिण माड वीदि, चिन्न कंजीवरम्.

२. पि. आर. आरावमुदु अय्यंगार्,
   १७६. तङ्कशाल वीदि, मदरास्.

३. श्री गणेशराम् मुरलीधर्,
   श्रीरामानुज मन्दिर्, सोलापूर्.

४. श्री महन्त् गरुडध्वजाचार्यजी,
   श्रीरामानुजकोट्ट, रामघाट्ट, उज्जयिनी, व्या रट्टलम्.

Rates of subscription :—

1.	Patrons	Rs. 100—0—0	(in advance) for the whole series.
2.	Donors	Rs. 50—0—0	” ”
3.	Sympathisers	Rs. 30—0—0	” ”
4.	Ordinary Subscribers	Re. 1—0—0	per Sanchigai.

Re. 1—2—0 per Sanchigai per book-post payable in advance.
Re. 1—8—0 ” ” per V. P. P.

(The names of patrons, donors, and sympathisers will be published from time to time.)

॥ श्रीरस्तु ॥

श्रीमते रामानुजाय नमः ।

श्रीमन्निगमान्तमहादेशिकाय नमः ।

श्रीमद्वेदान्तदेशिकग्रन्थमालायाम्

॥ वेदान्तविभागः ॥

॥ अधिकरणसारावली ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

-(शास्त्रावतारः)-

स्वस्ति श्रीरङ्गभर्तुः किमपि दधदहं शासनं तत्प्रसत्त्यै सत्यैकालम्बि भाष्यं यतिपतिकथितं शश्वदध्याप्य युक्तान् ।
विश्वस्मिन्नामरूपाण्यनुविहितवता तेन देवेन दत्तां वेदान्ताचार्यसंज्ञामवहितबहुवित्सार्थमन्वर्थयामि ॥१॥

श्रीमद्भ्यां स्यादसावित्यनुपधि वरदाचार्यरामानुजाभ्यां सम्यग्दृष्टेन सर्वंसहनिशितधिया वेङ्कटेशेन क्लृप्तः।
सेव्योऽसौ शान्तचित्तैः श्रवणरसनया शान्तिलाभार्थिभिर्वा सिद्धश्शारीरकार्थे सहजबहुगुणः स्रग्धरादुग्धराशिः ॥२॥

त्वयन्तस्वान्त (वे)वादिन्यधिकरणगणे पौनरुक्त्योक्तबाधौ मन्दत्वासङ्गतत्वे विशयमफलतां मानबाधं च मन्तॄन् ।
दिङ्मोहक्षोभदोनान् दिनकरकिरणश्रेणिकेवोज्जिहाना हृद्या पद्यावलीयं हृदयमधिगता सावधानान्धिनोतु ॥३॥

गम्भीरे ब्रह्मभागे गणयितुमखिलं कः प्रवीणः प्रमेयं ? दिङ्मात्रं दर्शयन्नप्यहमिह निपुणैः प्राध्वमध्यक्षणीयः ।
मा भून्निश्शेषसिद्धिस्तदपि गुणविदः स्फीतनिस्सीमरत्ने मध्येहारं निधेयं महति जहति किं मौक्तिकं लब्धमब्धौ?॥

वेदार्थे न्यायचिन्त्ये प्रथममधिगतः कर्मवर्गः प्रमाणैः भेदैरङ्गैः प्रयुक्त्या क्रमविरचनयाऽथाधिकृत्याऽतिदिष्ट्या ।
तत्राशेषैर्विशेषैस्तदनु तदनुवर्त्यूहतः प्राप्तबाधैः तन्त्रेणाथ प्रसक्त्या तत उपरि चतुर्लक्षणी देवतार्था ॥५॥

प्राग्धर्मेऽल्पास्थिरार्थे प्रशमितविशये तादृशाराध्ययुक्तेऽथातश्शारीरकांशे बहुविधमहिम ब्रह्म मीमांसितव्यम् ।
कृत्स्नस्वाद्ध्यायसाङ्गाध्ययनसमुदितापातबुद्ध्यैव कर्म त्यक्त्वाऽऽदौ ब्रह्मचिन्तां किमिति नकुरुतां तन्न तुल्योक्त्यबाधात् ॥

प्रावण्यं प्राक्त्रिवर्गे सफलयतनतोपासनाङ्गत्वतोऽपि व्याख्यारूपेऽत्र शास्त्रे क्रमनियतिरतः स्याच्च मुख्यक्रमेण ।
मानत्वादिर्विचार्यः पुरत इह तथा वाक्यवेद्यात्पदार्थो दृष्टान्तश्चोपमेयाद्यदि मधु सविधे यातु चाद्रिं किमर्थ(म):॥

व्याचख्युः केऽपि तापत्रयहतिमितरे साधनानां चतुष्कं काण्डेऽस्मिन् पूर्ववृत्तं कथयति निगमः कर्मचिन्ताफलं तत्।
साङ्गाधीतिर्हि सूते विशयमवसरः क्वात्र तन्त्रान्तरादेरौचित्यस्थापितोऽयं क्रम इह न पुनश्चोदनासंप्रयुक्तः ॥८॥

नित्यप्राप्तस्य कण्ठस्थितकनकनयान्निर्विशेषस्य लब्धिर्मिथ्याभूतं निवर्त्यं श्रुतिशकलभुवः प्रेक्षणात्तन्निवृत्तिः ।
कर्मैवं क्वोपयुक्तं प्रतिभटमपि तद्वृत्ततोक्तिर्मदुक्ते प्राप्ताऽत्रेति प्रलापे प्रतिवचनगतिर्भाषिता विस्तरेण ॥९॥

मीमांसायाः कबन्धं कतिचन जगृहू राहुकल्पं शिरोऽन्ये किंतैरन्तर्विरोधप्रमुषितमतिभिर्बाह्यकल्पैर्भ्रमद्भिः ।
स्वाध्यायाध्यायकार्त्स्न्ये स्वविधिपरविधिप्रेरणा तावदास्तां. कृत्स्नापातप्रतीतौ किमिति कृतधियः कृत्स्नचिन्तां नकुर्युः?॥

प्राधीतस्यैकरूपप्रयतननियतादेकरूपोपकाराद्विद्यास्थानैक्यसिद्धौ क्रमनियतियुताकाङ्क्ष्यैकप्रबन्ध्यम् ।
अध्यायादिष्विवावान्तरविषयफलाद्यन्यताऽत्राप्यभेत्त्री तत्तुल्यः कर्तृभेदः कलिबलकलुषैः कल्पितोऽर्थे विरोधः ॥११॥

तत्तद्वैशिष्ट्यभेदाद्यदगणि भिदुरा देवता पूर्वभागे संज्ञावैषम्यमात्रादपि कथमियताऽधीतयष्टव्यभङ्गः ? ।
उद्देश्याकारभेदोऽस्त्ययमिति हविषामुक्तिभिन्ने प्रयोगे दौर्बल्यं त्वक्षवेद्यान्मितिचरमतया द्रव्यतो देवतायाः ॥१२॥

जैमिन्युक्तं विरुद्धं यदिह बहुविधं दर्शितं सूत्रकारैस्तस्मादत्रैकशास्त्र्यं हठकृतमिति न ब्रह्मसंवाददार्ढ्यात् ।
तन्नस्तात्पर्यभेदैर्विहतिपरिहृतिः काण्डवत्काण्डयोस्स्यात् बाह्याक्षेपार्थगूढाशयवचनभवद्भ्रान्तिशान्त्यादिसिद्धेः ॥१३॥

आक्षिप्य स्थापनीयाः कतिचिदिह नयाः पूर्वकाण्डप्रणीताः केचिद्व्युत्पादनीयाः क्वचिदपवदनं ख्याप्यमौत्सर्गिकस्य ।
इत्थं सर्वत्र चिन्ताक्रम इति समतां वीक्ष्य मध्यस्थदृष्ट्या शास्त्रैक्ये पौनरुक्त्यप्रभृतिपरिहृतिस्सावधानैर्विभाव्या ॥

वृत्तिग्रन्थे तु जैमिन्युपरचिततया षोडशाध्याय्युपात्ता सङ्कर्षः काशकृत्स्नप्रभव इति कथं तत्त्वरत्नाकरोक्तिः ।
अत्र ब्रूमस्सदुक्तौ न वयमिह मुधा बाधितुं किञ्चिदर्हाः निर्वाहस्तूपचारात् क्वचिदिति घटते ह्येकतात्पर्ययोगः ॥१५॥

सौत्री सङ्ख्या शुभाशोरधिकृतिगणना चिन्मयी ब्रह्मकाण्डे तादर्थ्येऽनन्तरत्वेऽप्यधिकरणभिदा नाल्पसारैः प्रकल्प्या ।
अक्षोर्म्याशाहिकाष्ठाद्विरदमुनिवसूर्म्यद्रितत्त्वातिशक्वर्यक्षैरक्षैः प्रयाजैरिह भवति रसैः पादनीतिप्रबन्धः ॥१६॥

शास्त्रं त्वेतत्समन्वित्यविहतिकरणप्राप्तिचिन्ताप्रधानैःअध्यायैष्षोडशाङ्घ्रिर्द्विकयुगभिदुरं षट्कभेदादिनीत्या ।
तत्राद्यं वक्ति सिद्धं विषयमपि परं तत्प्रतिद्वन्द्वियुग्मं स्वप्राप्तेस्साधनं च स्वयमिति हि परं ब्रह्म तत्रापि चिन्त्यम् ॥१७॥

तत्राद्येऽत्यन्तगूढाविशदविशदसुस्पष्टजीवादिवाचः पश्चात्स्मृत्यादिकैरक्षतिरहितहतिः कार्यताभ्रेन्द्रियादेः ।
दोषादोषौ तृतीये भवभृदितरयोर्भक्तिरङ्गानि चाथोपासारोहप्रभावोत्क्रमसरणिफलान्यन्तिमे चिन्तितानि ॥१८॥

स्रष्टा देही स्वनिष्ठो निरवधिमहिमापास्तबाधश्रिताप्तः स्वात्मादेरिन्द्रियादेरुचितजननकृत्संसृतौ तन्त्रवाही ।
निर्दोषत्वादिरम्यो बहुभजनपदं स्वार्हकर्मप्रसाद्यः पापच्छिद्ब्रह्मनाडीगतिकृदतिवहन् साम्यदश्चात्र वेद्यः ॥१९॥

विध्युक्त्याऽधीत्य वेदान्विधिबलविरतावन्यजादेव रागात् कृत्स्नं मीमांसमानाः क्रमत इति परब्रह्मचिन्तां तरन्ति ।
प्राप्ते तुर्ये युगेऽस्मिन् परिमितबलधीप्राणतद्विघ्नदृष्ट्या कालक्षेपाक्षमत्वात् कतिचन कृतिनश्शीघ्रमन्ते रमन्ते ॥२०॥

रागान्मीमांसते चेत् स्वयमिह यततां किं गुरूक्त्येति चेन्न ब्रह्म ज्ञानाप्तये गुर्वभिगमनविधेस्तेन तत्त्वोपदेशात् ।
सद्विद्याचार्यवत्त्वे प्रथयति च परब्रह्मवित्तिं तथान्याप्याचार्यादित्यधीते नियमविधिरसौ निश्चितो नीतिविद्भिः ॥२१॥

सिद्धे व्युत्पत्तिराद्या न भवति न च धीर्लक्षणाद्युज्यतेऽस्मिन् किं शास्त्रेणान्यसिद्धे न च निशमयितुस्सिद्धबोधे फलं स्यात् ।
ब्रह्मण्येवं न मानान्युपनिषद इति स्तम्भिते तद्विचारे शास्त्रारम्भं चतुस्सूत्र्यघटयदुचितैर्न्यायभेदैश्चतुर्भिः ॥२२॥

सिद्धे व्युत्पत्त्यभावे स्वरिव फलतया लक्ष्मभङ्गे च लभ्यं ब्रह्मान्योक्त्याऽनुमानप्रमितमपि भवत्वंशतश्शास्त्रवेद्यम् ।
विध्यर्थत्वेऽप्यबाधात्परविषयवचस्स्वार्थमानं भवेदित्यन्वारुह्योक्तिर्दैन्यं न हि सहत ऋजुस्सूत्रकृद्वावदूकः ॥२३॥

द्वाभ्यामादौ प्रतीतिप्रजननमुदितं सिद्धरूपे परस्मिन् द्वाभ्यां वैफल्यशङ्का तदनु परिहृता शास्त्रतज्जन्यबुद्ध्योः ।
औचित्यानेकभाष्यस्वरसगतिमती प्राक्तनी वर्तनीयं शास्त्रारम्भार्थमेकं त्रितयमपि परं शास्त्रमित्याहुरेके ॥२४॥

यत्तत्सेनेश्वरार्यैरगणि वकुलभृत्किङ्करै रङ्गचकारि व्यासार्यैर्न्यासि च द्विश्श्रुतमिति विशदं विष्णुचित्तैर्विवव्रे ।
अश्रौषं शेषकल्पादहमपि विदुषो वादिहंसाम्बुवाहात् अद्धा निर्द्धार्यतेऽतश्चतुरधिकरणी ब्रह्मचिन्तोद्यमार्था ॥२५॥

व्युत्क्रम्यात्राद्यतुर्याविभिदधति नयौ केचिदप्राप्तमेतत् बोधासिद्धौ कथ तत्फलमिह विमृशेत् सिद्धवत्कारमान्द्यात् ।
मध्यौ द्वौ रूपनामप्रजननविषयौ यद्विदुस्तच्च मन्दं सत्युक्तेऽपेक्षितेऽर्थे विफलविभजनं नोचितं नीतिसूत्रे ॥२६॥

इति शास्त्रावतारः ॥

–(अथ जिज्ञासाधिकरणम् ॥ १ ॥)– सू० अथातो ब्रह्मजिज्ञासा । १.१.१.

कार्ये व्युत्पत्तिराद्या नियतमिति गिरस्तत्परा एव सर्वा नान्या वेदेऽपि नीतिस्तत उपनिषदामूषरप्रायतैव ।
नातस्तद्वेद्यमीमांसनमुचितमिति प्रत्यवस्थीयमाने सिद्धे व्युत्पत्तिमाद्यां बहुमुखमवयन् ब्रह्म जिज्ञास्यमाह॥२७॥

अङ्गुल्या निर्दिशन्तः किमपिकिमपि तद्वाचकांशैः प्रयुक्तैः बालान् व्युत्पादयन्ति क्रमभवमिलितज्ञापकत्वं विदन्तः ।
सङ्घातास्ते पदानां विदधति च धियं क्वापि सिद्धे विशिष्टे कर्तव्ये क्वापि चेति क्वचिदिह नियतिश्शब्दशक्तेर्न कल्प्या॥

संसारेऽनादिसिद्धे मुहुरनुभवतस्सञ्चितास्संस्क्रियास्स्युस्संस्कारोद्बोधकाश्च स्वयमुपनिपतन्त्यप्रकम्प्यात्प्रवाहात् ।
तत्तज्जातीयभेदग्रहणसमुचिता वृत्तयस्तन्निदानाः तद्वत्स्याच्छिक्षकादिव्यवहृतिषु शिशोरैदमर्थ्यादिबोधः ॥२९॥

दक्षैराधोरणाद्यैरनुमितविविधस्वप्रयासोपयोगैः शिक्षाभेदा विचित्रा गजविहगमुखान् ग्राहयद्भिः प्रयुक्ताः ।
तस्मात्सार्थो मनुष्यप्रभृतिषु च तथाभूतशिक्षाविशेषः कल्पो भाष्योदितोऽयं न यदि कथमसौ कल्पतेऽन्योऽपि मार्गः॥

कस्मैचित्सिद्धमर्थं कमपि कथयितुं चेष्टया चोद्यमानः तस्मै तं वक्ति तद्धीसमविषयतया शिक्षते तद्वचोऽन्यः ।
आदिष्टो बोधनार्थं यदिह वितनुते तत्तदर्थं हि युक्तं तद्वाक्यात्सिद्धवेदी प्रयतत इति चेदस्त्वनादेशिकं तत् ॥

पुत्रस्तेऽभून्न सर्पोऽयमिति वचनतः प्रीत्यभीत्यादिलिङ्गैः तद्योग्यार्थं तदूह्यं विषयनियतिरासक्तिपूर्वैः क्वचित्स्यात् ।
आवापोद्वापभेदात् प्रतिपदनियता शक्तिरप्यत्र सिद्ध्येत् भूयोदृष्ट्यादिसाहायकमिह वचसः कार्यपक्षाविशिष्टम् ॥

कार्ये व्युत्पत्तिराद्या भवतु तदपि किं शक्तितात्पर्यसिद्धेः प्राग्व्युत्पत्तिः क्रियायां नृवचसि निगमे त्वन्यथेत्यभ्युपैषि ।
स्थाप्याऽतोऽनन्यथासिध्यनुगमनियतैस्सत्प्रयोगैर्हि शक्तिः कोऽसौ पाञ्चाल इत्याद्युचितविरतिकं सिद्धमात्रेऽपि वाक्यम्॥

दुःखासंभिन्नदेशप्रभृतिफलतया चोदनास्वेव सिद्धं श्रौतत्वादार्थवादिक्यपि भवति फलं रात्रिसत्रे प्रतिष्ठा।
अङ्गीकुर्मा निषेधानुगुणमिति तथाऽनर्थकृत्त्वं निषेद्ध्ये विद्ध्यर्थैरप्यतस्स्यादवितथविषया ब्रह्मधीरर्थवादैः ॥३४॥

–(इति जिज्ञासाधिकरणम् ॥ १ ॥)–

–(अथ जन्माद्यधिकरणम् ॥ २ ॥)–सू० जन्माद्यस्य यतः ॥ १.१.२.

जन्माद्यैश्चेद्विशेष्यं भवति बहुलताऽथोपलक्ष्यं ब्रवोषि ज्ञाताज्ञातादिदौःस्थ्यं व्यतिषजति न चालक्षिते स्यात्परीक्षा ।
उद्दिष्टब्रह्मचिन्ता तत इह कथमित्यत्र हेतुत्वलक्ष्यः पुंसूक्तादिप्रसिद्धो गुणनिधिरघजिद्ब्रह्मशब्दार्थ उक्तः ॥३५॥

नाना चेल्लक्षणानि स्वरसभिदुरता ब्रह्मणि स्याद्विशेष्ये खण्डो मुण्डश्च गौरित्यभिलपनसमा धर्मिशब्दैकताऽत्र ।
तेष्वेकं चेद्यथाऽन्यत्समुदितमफलं स्याद्व्यवच्छेद्यहानेः खण्डत्वादिक्रमाच्चेत्यसदविहतितः खण्डतादेर्विशेषात् ॥ ३६॥

तत्तत्स्वप्रत्यनीकव्युदसननियतं भेदकं नान्यबाधि व्याघातः कालभेदान्न भवति जननस्थापनध्वंसनानाम् ।
प्रत्येकं लक्षणत्वं सुवचमिह बहूदाहृतिर्धीमहिम्ने संभूयाप्याहुरेके फलमपि च तदाशङ्कितार्थव्युदासः ॥३७॥

ज्ञातं चेन्नोपलक्ष्यंनच यदि नतरां लक्ष्मयोगाप्रतीतेः ज्ञाताज्ञातांशभेदस्त्विह दुरभिलपो लक्षणेनैव वेद्ये।
ब्रह्मत्वं ब्रह्मशब्दान्वितिरपि विदिते त्वत्र नोचेन्न शङ्का मैवं नानागमोद्यद्विशयशमनतः श्रीमति ब्रह्मतोक्तेः॥ ३८॥

यावल्लक्ष्यावबोधं यदवगतिरतो लक्षणात्तद्विशेष्यं यस्याबोधेऽपि पश्चाद्यदवगतिरिदं स्यात्तु ते नोपलक्ष्यम् ।
तस्माद्द्वेधाऽपि भाष्येऽनुमतिरनुचितेत्याशयाज्ञस्य चोद्यं मोक्षार्थोपास्यभेदे ह्युभयमपि समन्वेति विद्याविकल्पात्॥३९॥

चन्द्रे शाखेव शान्ते महसि तटगतं लक्षणं कारणत्वं सत्यज्ञानादिवाक्यैरपमृदितगुणं तद्विभातीति डिम्भाः ।
एकत्रार्थो विशेष्ये प्रतिपदनियतावर्ज्यतत्तन्निमित्तद्वारावृत्तिं पदानामिह विदुररुणाद्युक्तिवन्न्यायवृद्धाः ॥४०॥

–(अथ शास्त्रयोन्यधिकरणम् ॥ ३ ॥)– सू० शास्त्रयोनित्वात् ॥ १.१.३.

वीतावीतप्रयोगक्रमनियतिमती कार्यता विश्वमेतत् सर्वज्ञेन प्रक्लृप्तं गमयति विफलस्त्वत्र शास्त्रैर्विचारः ।
इत्युन्नीतौ लघुत्वादनुमितिवशतः कर्मजैश्वर्ययुक्तो विश्वामित्रादिनोत्या स्फुरति विभुमिहासूत्रयच्छास्त्रवेद्यम् ॥ ४१॥

क्षित्याद्यं कार्यताद्यैः कटकमकुटवत् कर्तृपूर्वं स कर्ता सिद्ध्येदत्नाण्वदृष्टप्रभृतिजनकदृक् सर्वशक्तिश्च मैवम् ।
श्रोत्राद्यैस्सौरभादिग्रहणरुचिरियं तादृशव्याप्त्यभावात् सर्वं हेतुं न पश्येत् घटकृदिह न चाकर्तृता तावताऽस्य॥४२॥

कार्यत्वात् स्याद्विवादास्पदमिदमखिलं सर्ववित्कर्तृपूर्वं यन्नैवं तद्धि नैवं पुरुषवदिति नानन्यथासिद्ध्यभावात् ।
हेतावेतादृशात्मन्यविदुरभिदुरं व्याप्त्यसिद्ध्यादिदौःस्थ्यं तद्भङ्गे लक्षणानामगणि गमनिका तत्त्वमुक्ताकलापे ॥ ४३॥

यद्यप्यात्मान्तरादेरनुमितिरनघा लिङ्गभेदैस्तथाऽपि प्रत्यक्षव्याप्तिशैली न खलु शिथिलिता कुत्रचित्पक्षभेदे ।
आम्नाये त्वद्भुतोक्तिर्न भवति वितथा तादृशाप्तोक्तनीत्या बाधाभावादिसाम्याद्विहतिमति भवेल्लोकवद्द्र् गौणतादिः ॥

नन्वाम्नायप्रधानाः क्वचिदनुकथयन्त्यस्मदादेरशक्यैः कार्यैः कर्ताऽनुमेयः पर इति तदभिप्रैतु जन्मादिवाक्यम् ।
तस्मादीशानुमानत्यजनमनुचितं वैदिकस्येति चेन्न क्वाप्यौचित्योपदेशाद्यत इति च सदायुक्तिसिद्धानुवादात् ॥४५॥

–(अथ समन्वयाधिकरणम् ॥ ४ ॥)– सू० तत्तु समन्वयात्॥१.१.४.

कर्तव्ये ह्यर्थ उक्ते निशमयितृफलं सिद्धरूपे तु न स्यात् प्रीत्या साफल्यक्लृप्तौ वितथमपि वचः किन्न दृष्टं तदर्थम् ।
विद्यार्थत्वेऽन्यदृष्टेर्विषयवदनृतं तत् परोक्ष्यं न भावीत्याक्षेपेऽनन्यशेषं निरवधिकसुखे शास्त्रतात्पर्यमाह ॥४६॥

तात्पर्यं ब्रह्मतत्वेऽप्यविहतविधिनाऽप्येकवाक्यत्वपक्षे भेदेऽपि स्यादसिद्धेर्न भवति बलिभुग्दन्तसङ्ख्योक्तिसाम्यम्।
स्वादार्थत्वं मृषात्वक्षममिति न मृषेत्यूहने प्रीत्ययोगाद्बालोपच्छन्दनादिष्वपि विषयतथाभावबुद्ध्यैव हर्षः ॥४७॥

यत्प्रीत्यर्थं वचस्तन्निखिलमनृतमित्यर्भकप्रायवाक्यं सत्योक्त्यानन्ददृष्टेर्न च विहतिरिहाध्यक्षतश्शास्त्रतो वा।
तेनानन्यार्थसिद्धोक्त्यनृतविषयताशङ्कनस्तम्भनेन त्रय्यन्तास्सत्यनित्याद्भुतपरमपरब्रह्मनिष्ठाः प्रमाणम् ॥४८॥

ब्रह्मैके निष्प्रपञ्चीकरणविधिपदं ध्यानविध्यर्थमन्ये निर्धर्माद्वैतवाक्योपचरितमितरे सिध्यतीति ब्रुवन्ति ।
तेषामेषां स्वपक्षस्ववचनविहतिव्याकुलानेकजल्पः कल्पोऽयं बाह्यकल्पः कृतमतिपरिषत्पीठमर्दैरमर्दि ॥४९॥

अन्यार्थो ह्यर्थवादस्स्तुतिमुखमुखतः स्थापितः प्रागिदानीं स्वातन्त्र्येण प्रमाणीक्रियत इति ततः काण्डयोस्स्याद्विरोधः।
न स्यात्सामान्यतो हि प्रथममभिदधे मानतास्थापनार्थं केषांचित्स्वार्थतोक्ता स्वत इह सुभगे बोधमात्रात्पुमर्थे ॥५०॥

त्रेधा सर्वत्र वेदे नियतविभजने चोदनाद्यंशभेदैश्चत्वारोऽप्यर्थवादा मुनिभिरभिहिता ब्राह्मणांशस्य शेषाः।
अत्रातच्छेषतोक्तौ स्मृतिहतिरिति चेद्विद्धि दत्तोत्तरं तत् सामान्योक्तिर्हि सेयं तत उपरि यथामन्त्रविध्यन्यतोक्तिः॥

आम्नातैरैहिकार्थैरविगुणसफलैश्शाकुनज्यौतिषाद्यैः पारत्रिक्या प्रवृत्त्याऽप्यतिनिपुणधियामागमाश्वाससिद्धौ ।
शब्दे तस्माच्च बोधे सति परविषये दोषबाधव्यपेते मानं तत्र स्वतोऽसौ न कथमितरथा नैगमाध्वापलापः ॥५२॥

शास्त्रारम्भोपपत्त्यै चतुरधिकरणीपेटिकेयं प्रवृत्ता लक्ष्यस्योक्तं विशेषद्वयमिह घटते वक्ष्यमाणोपजीवि ।
सद्ब्रह्माद्युक्तिवेद्यः पर इति हि वदेत्कारणत्वाधिकारे वक्ष्यत्यस्य द्विलिङ्गाद्यधिकृतिषु पुनस्तादृशानन्दतादीन् ॥५३॥

॥ इति शास्त्रारम्भपेटिका ॥

आत्मन्येवं परस्मिन्न कृत इति मिते विश्वहेतुत्वलक्ष्ये शास्त्रैकस्थापनीये निरुपधिपरमप्रेमयोग्ये प्रसक्ते ।
ईदृक्त्वं स्याद्यथार्हं प्रकृतिपुरुषयोर्नानुमानाद्ययोग्यौ दुःखास्पृष्टौ च तावित्यथ परकथनं दोधवीति क्रमेण ॥५४॥

—(अथेक्षत्यधिकरणम् ॥ ५ ॥)—सू० ईक्षतेर्नाशब्दम् ॥ १.१.५.

गौणेक्षासाहचर्यान्न तु बहुभवनप्रेक्षणं नैव मुख्यं दृष्टान्ताद्यैरिहाभात्यनुमितिरचितस्तादृशाज्जन्म युक्तम्।
सच्छब्दस्तेन मूलप्रकृतिमविकृतिं व्याहरेदित्ययुक्तं श्रुत्याऽन्येषां निरोधात्त्वदभिमततिरस्कारिलिङ्गादिभिश्च ॥५५॥

ज्ञाते ह्येकत्र सर्वं विदितमिति भवत्यैक्यसिद्ध्यै प्रतिज्ञा मृत्तत्कार्यादयश्च त्रय इह कथितास्तस्य दृष्टान्तभेदाः ।
तेनाव्यक्तानुमानं कथितमिति वृथोत्कण्ठितं हेत्वनुक्तेस्सारूप्यादेश्च हेतोरुपरि परिहृतेरत्र संभावनोक्तेः ॥५६॥

आदेशात्मस्वशब्दैरनितरशरणैस्त्वं तदैक्योपदेशाज्जीवेन स्वेन साहंकरणमनहमोऽचिद्गणस्य प्रवेशात् ।
एकज्ञानेन सर्वं विदितमिति गिरा सर्वतादात्म्यवाचा शाखाविद्यान्तरादेरपि बहुभविता विश्वविद्विश्वमूर्तिः ॥५७॥

—(अथानन्दमयाधिकरणम् ॥ ६ ॥)—सू० आनन्दमयोऽभ्यासात् ॥ १.१.१२.

मुख्येक्षा यद्यभीष्टा भवतु तदुचिते सा पुनर्जीवतत्त्वे सद्विद्यायां हि शब्दैस्त्रिभिरुपरि सतस्तस्य जीवैक्यमुक्तम् ।
इत्यूहादुज्जिहानं प्रशमयितुमथ प्रस्तुतो विश्वकर्ता जीवस्याप्यन्तरात्मा निरुपधिकमहानन्दथुस्स्थाप्यतेऽत्र ॥५८॥

दृष्टः पूर्वं विकारे मयडिति चरमेऽप्येवमस्त्वित्ययुक्तं मध्ये तद्भङ्गदृष्टेः प्रचुरमिह वदेत् प्रत्ययोऽन्यस्य बाधात् ।
आनन्दप्राचुरी च प्रकृतपरसुखाल्पत्वलब्धावधित्वात्दुःखाल्पत्वानपेक्षा परदुरितभिदश्शासितुस्तद्विरोधात् ॥ ५९॥

आत्मा तस्यैष एवेत्युदितमनितरात्मत्वमस्यैव वक्तुं शारीरोक्तिश्च तस्मिन्निखिलतनुतया स्यादसङ्कोचवृत्तिः ।
शोध्यत्वं तत्तदर्थानुगुणमिति विभोस्तत्प्रसाद्यत्वमात्रं प्राप्येऽस्मिन्प्राप्तिरूपा परविद उपसंक्रान्तिरानन्दसिन्धौ ॥६०॥

निर्देहेऽस्मिन्निरंशे न हि भवति शिरःपक्षपुच्छादि किञ्चित् तस्मात्पुच्छं प्रतिष्ठेत्युदितमिह परं ब्रह्म भातीति चेन्न ।
सोढा पुच्छत्वक्लृप्तिर्यदि कथमितरन्नानुमन्येत कल्प्यं ब्रह्मण्यात्मप्रतिष्ठावचनमनितराधारताख्यापनाय ॥६१॥

—(अथ अन्तरधिकरणम् ॥ ७ ॥)— सू० अन्तस्तद्धर्मोपदेशात् ॥ १.१.२१.

भूयिष्ठानन्तपुण्योपचयबलसमुद्बुद्धपूर्वोक्तभूम्नां शक्रादिन्यायतस्स्यात् त्रिगुणतनुभृतामीश्वराणां प्रवाहः ।
तन्नाकर्मोत्थदिव्याकृतिजनिमहिमा शासिता सर्वपुंसां नित्यश्रीर्ब्रध्नबिम्बे श्रुत इति स य इत्युक्त एवैष एकः ॥६२॥

सर्वेभ्यः कल्मषेभ्यो ह्युदित इति वदत्यन्तरादित्यविद्या तस्माच्छेषाभ्यनुज्ञानयत इति विभोः पुण्ययोगोऽस्तु मैवम् ।
आम्नातोऽनन्यशास्यस्स्ववशपरफलस्साधुना नैष भूयान् स्यात्पुण्ये लक्ष्मयोगादपि न सुकृतमित्यादिना पाप्मशब्दः ॥

प्रख्यातं शुद्धसत्त्वं किमपि तदनघं द्रव्यमव्यक्ततोऽन्यत् तद्रूपं रूपमैशं दिवि कनति तथा शेषशेषाशनादेः ।
नित्यं तत्सूरिसेव्यं परतरमजहत्स्वस्वभावस्स देवः पुंसां संसारशान्त्यै विपरिणमयति व्यूहपूर्वैर्विभागैः ॥६४॥

देहत्वात् सप्तधातुत्रिमलमघभवं दुःखक्लृप्ताशयुक्तं सांशत्वादेश्च हेतोरिति यदि तदसद्धर्मिमानेन बाधात् ।
बाधश्शास्त्रैकवेद्ये क्वचिदपि न भवेदन्यथाऽतिप्रसङ्गात् यत्तु स्वेच्छावतारेष्वभिनयति तदप्यासुरोपप्लवार्थम् ॥६५॥

इत्थं विद्यात्रयेण स्थिरचरचिदचिद्देहिनस्सर्वहेतोरव्यक्ताज्जीवतत्त्वादपि समधिकता यद्यपि स्यात्तथाऽपि ।
उत्थानद्वारभेदात् क्रमत इह मृदूपक्रमान् क्रूरनिष्ठान् अध्यायेऽस्मिन्निरुन्धन्नधिकरणगुणैस्तद्गुणानुद्गृणाति ॥६६॥

शब्दैस्सद्ब्रह्ममुख्यैश्श्रुतिशिरसि मितं कारणं किञ्चिदेकं सङ्कल्पाभ्यासरूपैरतदननुगुणैश्चिन्तितरश्चिद्विशेषः ।
भूताकाशादिशङ्काजननसमुचितैर्नामभिः कारणस्थैः क्षिप्त्वा तत्पादशेषे श्रुतिसमुदयनासम्भवोक्त्या भुनक्ति ॥६७॥

आकाशप्राणशब्दावनितरगतिकौ रूढिभङ्गेन नेयौ ज्योतिश्शब्दस्तु रूढ्या प्रथयति पुरुषं दिव्यतेजोविशिष्टम् ।
प्रख्यातेन्द्रादिशब्दस्तदनु नियमितस्तद्विशिष्टप्रवृत्त्येत्येवं स्यात् पेटिकैषा द्विकयुगलवती शब्दवृत्तिक्रमेण ॥६८॥

—(अथ आकाशाधिकरणम् ॥ ८ ॥)— सू० आकाशस्तल्लिङ्गात् ॥ १.१.२३.

अत्राकाशस्त्वशेषप्रभवविलयभूस्साक्षि दृष्टस्स्वनाम्ना निर्दिष्टस्तैत्तिरीयेऽस्त्यनितरजनितस्वात्मनस्सम्भवोक्त्या ।
मैवं सिद्धानुवादो ह्ययमथ च परप्राप्यतादिर्न तस्मिंस्तत्कर्तात्मा विपश्चिच्छ्रुत इति विहता स्वात्मनस्तत्प्रसूतिः ॥

—(अथ प्राणाधिकरणम् ॥ ९ ॥)— सू० अत एव प्राणः ॥ १.१.२४.

प्राणायत्तं हि देहादिकमिह विदितं तेन तत्कारणत्वं श्रुत्युक्तं रूढिशक्त्या सुदृढमिति न तद्व्योमवत् बाधनीयम् ।
तन्न प्राणस्य काष्ठादिषु महिमहतेः पूर्ववच्चानुवादात् आकाशोक्तेरिवोक्ते भगवति निखिलप्राणनस्यापि दृष्टेः ॥७०॥

नोक्तिं व्याहन्ति लिङ्गं किमपि भवति तु ख्याततत्त्वानुकूलं शब्दश्चानन्यनिष्ठश्श्रुत इति न परो ज्योतिराद्युक्तिवेद्यः ।
विश्वोत्पत्त्युक्त्यभावेऽप्यवगतमिह तल्लिङ्गमित्याक्षिपन्तं रुन्धेऽथाधिक्रियाभ्यां तदुचितचिदचिद्वर्गवैशिष्ट्ययुक्त्या ॥

–(अथ ज्योतिरधिकरणम् ॥ १० ॥)– सू० ज्योतिश्चरणाभिधानात्. १.१.२५.

कौक्षेयज्योतिषैक्यं कथितमिह परज्योतिषस्तस्य विश्वोपादानत्वं च विद्यान्तरविदितमतः कारणं वह्निरस्तु ।
मैवं पुंसूक्तवाक्योदितपरपुरुषप्रत्यभिज्ञप्तग्रबाधात् गायत्र्युक्तिस्तु साम्यादपि च निगदितास्तस्य भूतादिपादाः ॥७२॥

उत्थानं ज्योतिरादावधिकरणयुगे कारणव्याप्तलिङ्गादित्याभाष्यान्यलिङ्गं स्ववचसि विहितं नेति भाष्यं कथं स्यात् ।
इत्थं विश्वादिलिङ्गं सदिह न तु पराभीष्टलिङ्गं समस्तीत्युत्पश्यन् पूर्वपक्षी व्यवहरति तथा व्याहतिस्तत्र शङ्क्या॥

–(अथ प्रतर्दनाधिकरणम् ॥ ११ ॥)–सू० प्राणस्तथाऽनुगमात् ॥ १.१.२९.

विद्या प्रातर्दनी सा वदति हिततमोपास्तिकर्मेन्द्रमेव ख्यातप्राणेन्द्रचिह्नान्वितमपि तदसौ विश्वकर्तेति चेन्न ।
ब्रह्म त्रेधा ह्युपास्यं बहुविधचिदचित्कञ्चुकं स्वात्मना च प्राणेन्द्रप्रक्रमोऽपि प्रबलतरमहावाक्यवैघटग्रभग्नः ॥७४॥

यल्लिङ्गं कारणैकस्थितमिति कथितं ज्योतिषीन्द्रे च तत्तु प्रख्यातान्यैकनिष्ठं प्रथममितमतस्तन्मुखोत्थित्ययोगः ।
अप्राप्ते तद्विमर्शे प्रकृतशिथिलता नेति चेत्सत्यमेतत् विष्णूत्पत्त्युक्तिनीतिक्रमत इह पुरोवादमुत्प्रेक्ष्य शङ्का ॥७५॥

ज्योतिःप्राणेन्द्रशब्दाः परतरविषयाः कारणव्याप्तधर्मादित्येतत्साध्वमीषां बहुविहतिमती ख्यातमात्रे तु वृत्तिः ।
तत्कौक्षेयानलात्मा कथित इह तथा ध्यानतस्तत्फलाप्त्यै मुख्यप्राणादिलिङ्गं तदुपहितपरोपासनान्मोक्षणाय ॥७६॥

कार्यं यत्कर्मवश्यं यदपि दृढमितं तन्निरूढैस्तु शब्दैः निर्दिष्टे ब्रह्मणि स्यात्क्वचिदगतिहता रूढिरैन्द्रीनयेन ।
तल्लिङ्गानन्यथासिद्ध्यधिगमनबलात्तद्विशिष्टे विवक्षा स्यादीशे ज्योतिरिन्द्राद्यभिलपनपदेऽहंत्वमादीरिते च ॥७७॥

स्वेच्छातस्सर्वहेतुश्शुभगुणविभवानन्तनिस्सीमहर्षश्शुद्धाकर्मोत्थनित्याकृतिरनुपधिकाकाशनादिस्वभावः ।
सप्राणाप्राणभेदव्यतिभिदुरजगत्प्राणनो दिव्यदीप्तिः प्राणेन्द्राद्यन्तरात्मा प्रभुरधिकरणैस्सप्तभिः प्रत्यपादि ॥७८॥

इति प्रथमस्याध्यायस्य प्रथमः पादः ॥

–(॥ अथ प्रथमस्याध्यायस्य द्वितीयः पादः ॥)–

अत्रायोगान्ययोगव्यपनयननयैर्ब्रह्मपादत्रिपादीभागारूढैर्मृदूपक्रमकठिनपरैः प्राय आद्ये प्रसाध्यम् ।
कृत्स्नाक्षेपोपशान्त्यै प्रथम इह ततः पाद उक्तस्त्रिपादी क्वाचित्काक्षेपपूर्वाखिलकलहसमुन्मूलनाय प्रणीता ॥७९॥

अस्पष्टस्पष्टरूपस्फुटतरचिदचिल्लिङ्गवद्वाक्यचिन्ता भाष्ये दीपावतारेऽप्यगणि नयगणैस्सम्प्रवृत्ता त्रिपाद्याम् ।
अत्यन्तास्पष्टलिङ्गान्वितविषयमुशन्त्याद्यपादं तु केचित् तत्रेदं तारतम्यं नियतनिजबलैः कर्मतार्तीयमानैः ॥८०॥

पूर्वत्वासिद्धरूपैस्स्वमतिविरचितोन्नीतिभिः पूर्वपक्षस्सिद्धैस्साधारणैरप्युपधिनियमितैः प्रत्यवस्था द्वितीये ।
स्पष्टासाधारणत्वैरुपरि परमतानूक्तिकल्पैरथेतिन्यायैकत्रिंशदत्र प्रतिचरणविभक्त्यन्विताऽन्वेषणीया ॥८१॥

विश्वं पादे द्वितीये वपुरिति कथयंश्चिन्त्यते वाक्यवर्गो विश्वाधारस्स आत्मेत्यभिलपनपरस्तर्कणीयस्तृतीये ।
तुर्ये साङ्ख्यादिपक्षोदितपरिपठनभ्रान्तिरुन्मूलनीयेत्येवं केचित्त्रिपादीं जगदुरयमपि श्रोतृबुद्धेस्समाधिः ॥८२॥

–(अथ सर्वत्रप्रसिद्ध्यधिकरणम् ॥ १२ ॥)–सू० सर्वत्र प्रसिद्धोपदेशात्. १.२.१.

यस्य प्राणश्शरीरं स खलु हिततमोपास्तिकर्मप्रसक्तस्तस्मिञ्जीवत्वशङ्कां जगदुपजनके सौति शाण्डिल्यविद्या ।
पूर्वन्यायाच्च युक्तं दमनमिह महावाक्यतः प्रक्रमस्येत्युत्थाने प्रक्रमोक्तानुगुणमिति महावाक्यमेकीकरोति ॥८३॥

अन्वारुह्यात्र भेदं प्रथममधिकृतिर्भाषिता किंनिमित्तं विध्यैकत्वेऽनुवादः पर इह गुणविध्यर्थमेवेति युक्तम् ।
सत्यं ब्रह्मानुमत्य क्वचिदुपनिषदि क्वापि कल्प्ये विवादे चिन्तैषोदाहृतिस्स्यात्परमतरचितेत्यर्थसिद्धिस्तु बोद्ध्या ॥

सर्वत्वं कर्मभिस्स्वैर्जनिमति घटते ब्रह्मशब्दोऽत्र चैवेत्यल्पस्थानोऽल्पमानस्सुखतदितरभुग्जीव एवेति चेन्न ।
तज्जत्वादेरनूक्तेर्विविधगुणभिदादर्शनात्सर्वतादेस्स्वारस्यादप्यणुत्वं ह्युपधिकृतमिहोपास्तये ज्यायसि स्यात् ॥८५

--(अथ अत्त्रधिकरणम् ॥ १३ ॥)--सू० अत्ता चराचरग्रहणात् ॥ १.२.९.

अत्ता खल्वोदनादेर्भवभुगिति कठश्रुत्यधीतोऽप्यसौ स्यान्न स्यान्मृत्यूपसिक्तस्थिरचरनिखिलग्रासतस्तद्द्वयोक्तेः ।
जीवव्यावर्तनं च प्रकरणविदितं भोक्तृतोक्तिर्द्वयोस्तु प्रेर्यत्वप्रेरकत्वप्रतिनियतरसाच्छत्रिनीत्याऽथवा स्यात् ॥८६॥

सत्त्वं स्वाद्वत्त्यनश्नन् ज्ञ इति विभजनात्पैङ्ग्यधीतं तु सत्त्वं बुद्धिः प्राणोऽथवेति त्वृतमिह पिबतोर्जीव एकस्तयोश्चेत् ।
मैवं जन्तौ तु सत्त्वश्रुतिरियमुचिता कर्मभुङ्नाप्यनश्नन् तत्प्रश्नप्रक्रमोऽन्याशय इदमपि चाभाषि पूर्वापराद्यैः ॥८७॥

–(अथ अन्तराधिकरणम् ॥ १४ ॥)–सू० अन्तर उपपत्तेः ॥ १.२.१३.

यद्वृत्तादेर्य एषोऽक्षिणि पुरुष इति श्रूयमाणोऽस्तु जीवो यद्वाऽक्ष्णो देवताऽर्कः प्रतिकृतिरथवा तत्र दृश्येति चेन्न ।
एतद्ब्रह्मैतदेवामृतमभयमिदं कं खमित्याद्यधीते स्संयद्वामत्वमुख्यैस्स्थितिनियतिबलादर्चिराद्युक्तितश्च ॥८८॥

स्वातन्त्र्योत्तंसितासु श्रुतिषु न फलदस्यैव वेद्यत्ववादः कल्याणालोकनादेरिव विधिबलतो वेदनस्यार्थवत्त्वात् ।
तस्मादक्ष्यन्तरस्थः प्रतिकृतिपुरुषो युज्यते पूर्वपक्षे सेयं पूर्वापरास्वप्यधिकृतिषु यथासम्भवं नीतिरूह्या ॥८९॥

पूर्वन्यायेऽग्निविद्या पुरत उपनता मध्यतस्त्वत्र तस्मात्तद्वन्न ब्रह्मविद्यानुगतिरिति भवेदक्षिविद्या ततोऽन्या।
मैवं विच्छित्तिरङ्गैर्न हि भवति मिता चाङ्गताऽनेकधाऽस्याः प्रोक्तं च ब्रह्मविद्यानुगुणमिह फलं प्राक्तु न ब्रह्मदृष्टिः॥

–(अथ अन्तर्याम्यधिकरणम् ॥ १५ ॥)– सू० अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात् ॥ १.२.१९.

अन्तर्यामी स जीवो बहुविधकरणायत्तधीवृत्त्यनुक्तेर्नान्यो द्रष्टेति चोक्तेरिति यदि न नियन्त्रन्तरस्य व्युदासात् ।
द्रष्टृत्वाद्यं च तत्तद्विषयघटितधीरूपमीशे हि मुख्यं तद्धर्माः काण्वमाध्यन्दिनपठितिगतास्तस्य चात्मा शरीरम् ॥९१

स्थानैक्यादत्र शाखाद्वयपरिपठितावात्मविज्ञानशब्दा वेकार्थावित्यकम्प्यं तदपि कथयतो बुद्धिमेवेत्यपार्थम् ।
लोकाम्नायप्रसिद्धयोरनुगमत इमौ चेतने ह्येकतानौ बाधः केनापि नास्मिन्भवति च सत इत्यादिभिस्सामरस्यम् ॥

–(अथादृश्यत्वादिगुणकाधिकरणम् ॥ १६ ॥)–सू० अदृश्यत्वादिगुणको धर्मोक्तेः ॥ १.२.२२.

दृश्यत्वादेर्निषेधो विकृतिमति भवत्यक्षरे सन्निकर्षात् पञ्चम्युक्ताक्षरं तत्तदवधिकपरः पञ्चविंशोऽस्तु मा भूत् ।
सर्वज्ञत्वादिदृष्टेः प्रथमसमुदितं त्वक्षरं ब्रह्म शुद्धं पश्चादुक्तं तु जीवादिकमवधितया भेदतस्तत्परोक्तेः ॥९३॥

--(अथ वैश्वानराधिकरणम् ॥ १७ ॥)--सू० वैश्वानरस्साधारणशब्दविशेषात् ॥ १.२.२९.

स्वर्लोकादित्यवाताम्बरसलिलमहीरूपमूर्द्धादिकॢप्त्या ध्येयो वैश्वानरात्मा स्थिरबहुविशयश्शब्दलिङ्गादिसाम्यात् ।
मैवं ब्रह्मेत्यधीतेर्भुवनतनुतया योगतस्त्वग्निशब्दो वैशिष्ट्याद्वा क्रियाङ्गं स्ववपुषि परधीर्गार्हपत्यादिधीश्च ॥
अन्यस्मिन्नन्यदृष्ट्या न भवति विदुषां क्वापि निश्श्रेयसाप्तिस्तस्माद्वैश्वानरोऽसौ न पर इति फलं त्वन्न सिद्ध्यादि मैवम्।
ब्रह्मैव ह्यन्यदृष्ट्यन्वितघटितमिह ब्रह्मशब्दाद्यबाधात् सर्वाघध्वंस उक्तः फलमपि परमं ब्रह्म च व्याप्तमन्नम् ॥
त्रिष्वत्रोपासितॄणां मितहृदयगुहास्वन्तरश्चिन्त्य उक्तो विश्वान्तर्यामितादेर्विपुलपरिमितिश्चिन्तनीयस्त्रयेऽथ ।
षट्सु ब्रह्मात्मशब्दौ पुरुषपदमपि क्षेत्रतज्ज्ञप्रपञ्चव्यावृत्ते विश्वहेतौ प्रकरणनियमान्नामवृत्त्या नमन्ति ॥९६॥
तज्जत्वादेर्हि सर्वं जगदभिगदितं ब्रह्मभावेन पूर्वं सर्वान्तर्यामिता च प्रभवितुरुदिता सर्वतद्देहता च।
तस्माद्विश्वैक्यबाधप्रभृतिबहुविधापार्थबम्भ्रम्यमाणक्षुद्रक्षीबोक्तिजालं निखिलमिह नयैस्सूत्रकारो निरास ॥९७॥
स्वाधीनाशेषसत्तास्थितियतनतया सर्वभावेन तिष्ठन् ग्रस्ताशेषोऽक्षिनित्यस्थितिरखिलतनुः कल्पिताग्न्यादिगात्रः ।
स्वर्लोकाद्यङ्गवैश्वानरपदविषयो लक्षणस्यादिमस्य प्रोक्तः पादे द्वितीये श्रुतिनिकरशिरश्शेखरः श्रीनिवासः ॥९८॥

इति प्रथमस्याध्यायस्य द्वितीयः पादः ॥ २ ॥ अथ प्रथमस्याध्यायस्य तृतीयः पादः ॥३॥

- (द्युभ्वाद्यधिकरणम् ॥ १ ॥)–सू० द्युभ्वाद्यायतनं स्वशब्दात् ॥ १.३.१.

स्पष्टैर्जीवादिलिङ्गैर्युतमिह हि वचस्साध्यते ब्रह्मनिष्ठं मध्येऽत्राधिक्रियोक्तिस्त्रिषु किमिति न तत्तत्प्रसङ्गात्तदुक्तेः।
किञ्चास्यामर्थलोकायतिकनिरसनं प्रस्तुतार्थोपयुक्तं ब्रह्मोत्कर्षश्च सिद्ध्येद्गलति दिविषदां कारणैक्यभ्रमश्च ॥९९॥
न्यायास्सन्त्येव साक्षात् परविषयतया संघटन्तेऽत्र पादे सर्वाधारस्स आत्मा स्वमहिमनिलयस्तत्र तात्पर्यभूमिः ।
तत्सिद्ध्यै शासनाद्यं कथितमिह मिथस्स्यूतमालोचनीयं सर्वेशत्वं च षष्ठप्रमितनयमितं पश्चिमन्यायरक्ष्यम् ॥१००॥
सिद्धं प्रागेव मुण्डोपनिषदि परमं ब्रह्म तद्धर्मभेदैर्भेदोक्तेश्चेत्यकाण्डे किमिति पुनरिमां पिष्टपेषं पिनष्टि।
सत्यं क्षेत्रज्ञधर्मैः पटुभिरुपनता प्रक्रियाभेदशङ्का प्रख्याप्य प्रत्यभिज्ञामपुनरुदयमुन्मूल्यते शब्दपूर्वैः ॥१०१॥
यस्मिन्नोतं मनोऽन्यैस्सहकरणगणैर्जायते यश्च नाना नाड्याधारश्च योऽन्तश्चरति स करणी कर्मभोक्तेति चेन्न।
विश्वाधारात्मभावादमृतवितरणान्मुक्तसृप्यत्ववादात् प्रागुक्तप्रक्रियैक्यादनशनसहितात् काशनाच्चान्यसिद्धेः ॥१०२
व्याप्ते तत्राक्षमोतं यदि किमिह ततो जन्म चास्येच्छयोक्तं नाडीचक्रस्य नाभिर्भवति च स परो हार्दरूपेण तिष्ठन्।
निष्कम्पव्यापिनोऽन्तश्चरणमपि शुभैर्विग्रहैरस्ति लोके सौबालाम्नातवद्वा चरणमिदमपि स्यादधिष्ठानमात्रम् ॥१०३॥

–(अथ भूमाधिकरणम् ॥ २ ॥)–सू० भूमा संप्रसादादध्युपदेशात् ॥ १.३.७.

आत्मज्ञानाभिलाषादनुपरतशुचे नारदाय प्रयुक्तं प्राणे सानत्कुमारं विरमति वचनं हिंसनार्हस्स जीवः ।
अल्पप्रत्यर्थिभूमा निरवधिकसुखोऽप्येष एवेति चेन्न प्राणाख्यात्सत्यशब्दोदितमधिकतयोपास्यमत्र ह्युपात्तम् ॥१०४

नामाद्याशान्तवेद्ये प्रतिवचनवशात् प्रश्नतश्चाधिकोक्तेः प्राणे विश्रान्तिदृष्ट्या भवतु तदवधिः प्रस्तुतात्मोपदेशः ।
मैवं जातो हि नामादिवदिह परमादात्मनः प्राण उक्तः स्वस्मादित्यत्र तत्स्यादिति न विघटनात् स्वारसिक्या विभक्तेः॥

प्राणद्रष्टाऽतिवादी तदनुवदनतश्चोदितस्सत्यवादस्तस्मात्सर्वाहमर्थस्सकलजनयिता प्राण एवेति चेन्न ।
एष त्वित्यन्यतोक्तेरतिवदनकृतः प्राक्तनादस्य तद्वन्न त्वन्योऽस्त्यग्निहोत्री स्वमहिमनिलये ह्यत्र धर्मोपपत्तिः॥ १०६

नामादौ वाक्च तस्योपरि तदनु मनश्चाथ सङ्कल्पनामा चित्तं ध्यानं च तस्माद्बलमपि च ततस्याच्च विज्ञानपूर्वम् ।
अन्नं तोयं च तेजो गगनमपि ततो मन्मथस्स्यात्तथाऽऽशा प्राणस्सत्यः परात्मा सकलनियमिता गम्यते भूमवाक्ये ॥

–(अथाक्षराधिकरणम् ॥ ३ ॥)–सू० अक्षरमम्बरान्तधृतेः ॥ १.३.९.

प्रख्याताकाशपूर्वस्वविकृतिवहनादक्षराख्यं प्रधानं तस्याप्याकाशतोक्तौ धृतनिखिलजगत् क्षेत्रितत्त्वं तु तत्स्यात् ।
मैवं द्रष्टृत्वपूर्वैरनितरनियतैश्शासनायत्तधृत्या किञ्च द्रष्ट्रन्तरस्य व्युदसनमिह तत्तुल्यतद्द्रष्ट्रपोहः ॥१०८॥

–(अथेक्षतिकर्माधिकरणम् ॥ ४ ॥)–सू० ईक्षतिकर्मव्यपदेशात्सः ॥ १.३. २१.

लक्ष्मीभूतोऽयमेकः खलु पुरुष इह ध्यायतेरीक्षतेश्च क्षेत्रज्ञस्सोऽयमण्डाधिप इतरपरात्स्वान्यजीवात्परोऽसौ ।
नो चेद्ब्रौमादिभोगप्रकरणविहतिर्बोभवीतीत्ययुक्तं तस्मिन् शान्तामृतत्वप्रभृतिपरगुणख्यात्यनूक्त्योरयोगात् ॥१०९॥

नन्वत्रोङ्कारमात्रात्रयफलगणनारूढभूम्यन्तरिक्षप्रत्यासत्त्या निवासस्सरसिजवसतेर्ब्रह्मलोकोऽस्तु मैवम् ।
पापोन्मुक्तेन लभ्यो ह्ययमिह कथितस्सूर्यसम्पत्तिपूर्वं सोढव्यो मध्यलोकैर्व्यवधिरिति समस्तत्समाधानमार्गः॥११०॥

–(अथ दहराधिकरणम् ॥ ५ ॥)–सू० दहर उत्तरेभ्यः ॥ १.३.१३.

दहं हृत्पुण्डरीके गगनमभिहितं तैत्तिरीयश्रुतौ यच्छन्दोगैस्तत्र गीतं यदपि च दहराकाश इत्येतदेकम् ।
भूताद्यं तत् प्रसिद्धेर्महिमत इति न प्रत्यनीकैरनेकैः श्रौती च स्यात् प्रसिद्धिर्भगवति बलिनी लिङ्गवर्गैस्सनाथा ॥

बाह्याकाशश्च यावानयमपि हि तथेत्येतदक्लिष्टमीशे सत्यात्मब्रह्मशब्दा नभसि न कथमप्यन्वयं प्राप्नुवन्ति ।
कामाधारश्च योऽसौ समगणि दहराकाशवाचाऽत्र नित्यस्तस्यैव ह्येष आत्मेत्यनुवदनमतस्तद्गुणाश्चिन्त्यकामाः ॥

सर्वेशाधारतोक्त्या भवतु च हृदयव्योम तद्वाज्यधीतं छान्दोग्यस्थो निषादस्थपतिनयपदं ब्रह्मलोकादिशब्दः ।
आपस्तम्बश्च वैभाजनपुरमवदद्ब्रह्म सर्वात्मभूतं पूस्तस्य प्राणिनस्स्युस्तदपि तदपि हि स्यात् पुरं सर्ववासात् ॥११३॥
जीवस्तर्ह्येष आत्मा गुणगणघटनात्तत्परामर्शदृष्टेरल्पत्वाद्युक्तितश्चेत्यसदनुपधिकात्सत्यसङ्कल्पतादेः ।
विश्वैकाधारतादेरपि स खलु परो दहतौपाधिकी स्यात् प्राजापत्यात्तु वाक्यात्परसमदशया तद्गुणोक्तिर्विमुक्ते॥११४॥

दह्राकाशोऽपवर्गप्रद इति गदितुं संप्रसादोक्तिरत्र प्राजापत्ये तु वाक्ये परपरिपठनं प्राप्यनिष्कर्षणार्थम् ।
आकाङ्क्षाद्यैस्तदेवं परतदितरयोरन्विते वाक्ययुग्मे युक्तं नान्योन्यबाधप्रभृतिकमिति तत्सामरस्यं हि सौत्रम् ॥११५॥

–(अथ प्रमिताधिकरणम् ॥ ६ ॥)–सू० शब्दादेव प्रमितः ॥ १.३.२३.

प्राणेशोऽङ्गुष्ठमात्रः क्वचिदनुकथितस्सञ्चरन् कर्मभिः स्वैरन्यत्राङ्गुष्ठमात्रं पुरुषमपि यमो निश्चकर्षेति दृष्टम् ।
तस्मादेतत्प्रमाणप्रमितमुपनिषज्जीवमाहेत्ययुक्तं वाक्यस्थेशानतादेर्नरहृदयपरिच्छित्तितस्तद्धि मानम्॥११६॥
न ह्यङ्गुष्ठप्रमाणं हृदयमखिलजन्त्वाश्रयं तत् परस्मिन्व्याप्ते तन्मानतोक्तिः क्वचिदिति मनुजाधिक्रियोक्तिप्रसङ्गे ।
सूत्रद्वन्द्वद्वयान्तस्त्रिभिरधिकरणैश्चिन्त्यते तद्विशेषस्तार्तीयैस्स्थापनीया त्ववजिगमिषिता नेतिकर्तव्यताऽत्र ॥११७॥

–(अथैतद्गर्भे देवताधिकरणम् ॥ ७ ॥)–सू० तदुपर्यपि बादरायणस्सम्भवात् ॥ १.३.२६.

शब्दात्मा लौकिकार्थाकृतिरियमथवा देवतातो न तस्या ब्रह्मोपासेत्यनार्षं श्रुतपरिहरणं कल्पनं चाश्रु तस्य ।
विश्वस्रष्टा च मा भूदनुमितिविषयस्तत्परैस्त्वेष शास्त्रैर्निर्बाधैस्स्थापितः प्राक् स्वयमपि विभुना नैव शक्यापलापः ॥
सामर्थ्यं देवतानामुचिततनुभृतामर्थिता तापभाजां सम्पद्येतेति तासामपि भवति परोपास्तिवर्गाधिकारः ।
ख्यातं मन्त्रार्थवादप्रभृतिषु निखिलं बाधदोषाद्यभावे मिथ्येत्युद्घोषयन्तस्स्वत इह कथितां मानतां प्रस्मरन्ति ॥११९॥
द्वेधा वृत्तिः स्तुतौ स्यात् स्वपरगुणमुखी प्राक्तनी तावदर्थ्या निर्धार्यः पश्चिमायामपि निपुणधिया मुख्यधर्मैकदेशः।
रुच्यर्थायां च तस्यामनृतकथनतो रोचना न ह्यमुग्धे भूतार्थे का स्तुतिस्स्यादिति मुनिगदितं गौणतादेर्निवृत्त्यै ॥१२०
नानादेहाप्तिशक्ताः कथमिह युगपत्कर्मसन्निध्यनर्हास्तत्तद्वृत्तान्तसत्त्वे श्रुतिषु भवति नानित्ययोगः प्रवाहात् ।
काण्डादौ कर्तृवादः प्रवचननियता वेदनित्यत्वसिद्धेरीशः प्राचीनकल्पक्रमत उपदिशेद्वर्णसर्गेऽपि वेदान् ॥१२१॥
वेदानामीशबुद्ध्या क्रमनियमहतिः कल्पभेदे यदीष्टा मन्त्रांशानां तथा स्यान्न खलु तदुचितं व्रीहिसोमादिसाम्यात्
इत्थं विध्यर्थवादक्रम इति नियते पाक्षिके वा तथात्वे पक्षोऽसावाक्षपादः परमतपरिषत्कोटिमाटीकतां नः ॥१२२॥
सौक्ष्म्यात्तुल्याभिघारात् सहकृदपगमाच्छादकादान्यपर्यादत्यासत्त्याऽतिदूराद्बलवदभिभवानुद्भवाक्षोपघातैः ।
नेक्ष्यन्ते वर्तमानान्यपि हि सुरगणस्तद्वदन्तर्द्धिशक्तेः प्रख्यातास्सिद्धिभेदा अपि जननतपोयोगमन्त्रौषधीभ्यः ॥

(अथैतद्गर्भे मध्वधिकरणम् ॥ ८ ॥) सू० मध्वादिष्वसंभवादनधिकारं जैमिनिः ॥ १.३.३०.

स्यादेवं देवमात्रे मनुज इव परोपास्तिमात्रं तथाऽपि स्वस्यैवाराध्यभावस्स्वपदमपि फलं यत्र नात्राधिकारः ।
मैवं सर्वान्तरात्मा स्वतनुभृदिति चोपासते मुक्तिकामाः कामादावर्तते तु स्वपदमपि फलं कल्पमन्वन्तरादौ ॥१२४॥

अथैतद्गर्भे अपशूद्राधिकरणम् ॥ ९ ॥ सू० शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥ १.३.३३.

जैमिन्युक्तापशूद्राधिकरणसरणेर्नास्ति विद्याप्तिलब्धिः शूद्रादीनां तथाऽपि स्मृतपरभजनाधिक्रिया जाघटीति ।
श्रोतृत्वाद्धारतादेस्स्वजनिसमुचितैः कर्मभिश्चेत्ययुक्तं प्राप्ते ब्रह्मोपदेशे ह्युपनयनपरामर्शनादि प्रसिद्धम् ॥१२५॥

शूद्राणां भारतादेश्श्रवणमनुमतं पापशान्त्यादिसिद्ध्यै वेदार्थापातबुद्धिर्यदनधिकरणा नोपबृंह्येत तैस्सः ।
विद्यास्थानानि शूद्रैर्मुरभिदकथयत् पाण्डवाय द्विसप्ताप्यस्प्रष्टव्यानि तस्मान्न हि विकलधियां स्यादुपास्याधिकारः ॥
गीतं शूद्रादिकानामपि परभजनं केवलं स्वार्हधर्मैर्धर्मव्याधस्तुलाधृद्विदुर इति च ते प्राग्भवाभ्याससिद्धाः ।
वक्ता शूद्रेति जानश्रुतिमभिमुखयन् शोकमस्य व्यनक्ति क्षत्तृप्रैषादिलिङ्गैस्स्फुटतरविदितं क्षत्रियत्वं हि तस्य॥१२७

—(अथ अर्थान्तरत्वादिव्यपदेशाधिकरणम् ॥ १०॥)—सू० आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥१.३.४२.

धूत्वेति प्राच्यवाक्यप्रकृत इह भवेन्मुक्त आकाशनामा बन्धेऽसौ नामरूपे वहति तदनु च ब्रह्मभावे जहाति ।
इत्यन्याय्यं पुरोक्तः पुनरयमभिसम्भाव्य एव ह्युपात्तो ब्रह्मत्वं न ह्यवस्था श्रुतिषु च युगपज्ज्ञाज्ञतादिर्विभक्तः॥१२८॥
विश्वात्माऽनन्तभूमा नियमनधृतिकृन्मुक्तभोग्यस्वभावो दह्रस्वाधारसर्वो हृदयपरिमितावस्थया सर्वयन्ता ।
देवादीनामुपास्यो वसुमुखविबुधैस्स्वात्मभावेन सेव्यश्शूद्राद्योपास्त्यनर्हः प्रभुरिह बुबुधे नामरूपैककर्ता ॥१२९॥

इति प्रथमस्याध्यायस्य तृतीयः पादः ॥ ३ ॥ अथ प्रथमस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

—(आनुमानिकाधिकरणम्॥१॥)—सू० आनुमानिकमप्येकेषामितिचेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयतिच॥१.४.१.

निर्णीतं वाक्यजातं परविषयतया स्पष्टजीवादिलिङ्गं तत्तच्छायानुसारि प्रथयति तु वचस्तत्परं तुर्यपादे ।
षड्भिर्द्वाभ्यां च तत्र प्रशमयति नयैस्साङ्ख्ययोगोक्तशङ्कां घट्टौ जाघट्ट इत्थं कथितनिगमनं त्वष्टमं केचिदाहुः ॥
द्वाभ्यां क्षेप्यं प्रधानं कपिलमतमथ त्वेकतोऽन्योक्तसङ्ख्या तुर्येणाव्याकृतोक्तेरपि विभुरवधिस्स्थाप्यते द्वारवृत्त्या ।
शुद्धाशुद्धौ च जीवावधिकरणयुगेऽनन्तरं वारणीयौ शेषं तन्त्रान्तरोक्तेश्वरनिरसनकृत्तुर्यपादाष्टकेऽस्मिन् ॥१३१॥
अक्षाद्यव्यक्तनिष्ठं जडमथ पुरुषं तत्त्वकाष्ठां विविच्य ब्रूते वल्ली कठानां परमतपठितां प्रक्रियामित्ययुक्तम् ।
तत्रस्थानेकवाक्योदितविविधवशीकार्यमुख्यक्रमोक्तेश्शान्तात्मा विष्णुरुक्तः पर इह पुरुषः प्रत्यभिज्ञाप्यते च ॥१३२॥
न ह्यर्था इन्द्रियाणां प्रकृतिरथ मनोहेतुरेषां न चेष्टं बुद्धिश्चैतन्न सूते नच महति महाञ्जायते बुद्धिसंज्ञः ।
भोक्तुर्युक्तं महत्त्वं महति नहि भवेदात्मता पारिशेष्यादव्यक्तोक्तिश्शरीरे तदिह न कपिलप्रक्रियाप्रत्यभिज्ञा॥१३३॥

—(अथ चमसाधिकरणम् ॥ २ ॥)—सू० चमसवदविशेषात् ॥ १.४.८.

स्वातन्त्र्येण ह्यजाया निखिलजनकता सूच्यते क्वापि वाक्ये बद्धोऽजस्तत्र शेते त्यजति पुनरिमां भुक्तभोगामजोऽन्यः।
इत्युक्तेस्तान्त्रिकी सा त्वियमिति यदि नाजात्वमात्राभिधानादस्वातन्त्र्यप्रसिद्धेस्सृजतिरपि परप्रेर्यतां नोपरुन्ध्यात् ॥

—(अथ संख्योपसंग्रहाधिकरणम् ॥ ३ ॥)—सू० न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥१.४.११.

यस्मिन् पञ्चेति वाक्ये परपरिगणिता विंशतिः पञ्चयुक्ता प्रोक्ता सप्तम्यधीतस्त्विह पुरुषगणोऽनन्यनिष्ठोऽस्तु मैवम् ।
आकाशस्य स्वनाम्ना पृथगनुकथनात् सप्तमीशक्यबाधात् षड्विंशो ह्यत्र सर्वाश्रय इति विदितोऽनूद्यते ब्रह्मताद्यैः ॥
संज्ञोपाधिस्समासो ह्ययमिह निगमे सप्तसप्तर्षिनीत्या प्राणाद्यं तन्मनोन्तं प्रकरणनियतं पञ्चकं धीन्द्रियाख्यम् ।
ज्योतिश्शब्देन शाखान्तरविदितमिदं न्यूनवादस्तु पूर्वो घ्राणं वक्त्यन्नशब्दो रसनमपि सह प्राणशब्दस्त्वगर्थः ॥

--(अथ कारणत्वाधिकरणम् ॥ ४ ॥)--सू० कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १.४.१४.

विश्वोपादानवक्त्री श्रुतिषु सदसदव्याकृतोक्तिः परोक्ते ह्यव्यक्तेऽन्वेति तस्मात्तदितरदखिलं नेयमत्रेति चेन्न।
यत्रासत्त्वादि दृष्टं प्रकरणविदितं तत्र सर्वज्ञताद्यं लिङ्गं स्यामित्यधीतं स्थिरमपि तदिहाबाध्य आत्मादिशब्दः॥१३७॥

आसीदग्रे त्वसद्वा इदमिति विलयावस्थतामात्रमुक्तं नैवासीत् किञ्चिदित्याद्यपि विलयपरं शून्यतादेर्निषेधात् ।
सर्वस्याव्याकृतत्वं विभजनविरहात्तादृशावस्थतत्तद्द्रव्यस्तोमान्तरात्मा तदिह सदसदव्याकृताद्युक्तिवाच्यः ॥१३८॥

-(अथ जगद्वाचित्वाधिकरणम् ॥ ५ ॥)-सू० जगद्वाचित्वात् ॥ १.४. १६.

यस्यैतत्कर्म वेद्यस्स इति वचनतः कर्मवश्यप्रतीतेः कर्ता पुंसां स एव स्वकृतपरिणतेरित्युपक्रान्तिभग्नम् ।
बालाक्यज्ञाततत्त्वान्तरमुपदिशतः स्यादिहाजातशत्रोस्तज्ज्ञातोक्तिर्निरर्था जगति कृततया कर्मशब्दोऽत्र मुख्यः ॥

एवं जीवातिरिक्ते प्रकरणनियते तत्र यज्जीवमुख्यप्राणाख्यानं न तेन क्षतिरिह हि तथा तद्विशिष्टेऽप्युपासा।
प्राणस्य प्राणभाजोऽप्यधिकरणतया वाजिवाक्योक्तनीत्या ब्रह्मज्ञप्त्यै तदन्यप्रकथनमिति हि स्थापना सार्वभौमी ॥

—(अथ वाक्यान्वयाधिकरणम् ॥ ६ ॥)—सू० वाक्यान्वयात् ॥ १.४.१९.

पत्यादीनां प्रियत्वं श्रुतिरनुवदति ह्यात्मनः कामसिद्ध्यै तेनासौ पुण्यपापोदितफलभुगिति प्रक्रमादिप्रतीपम् ।
तत्तद्भोगप्रदातुः प्रथयति हि विभोः कामतस्तत्प्रियत्वं द्रष्टव्यश्चैष मुक्त्यै श्रुतिनिकरमितः प्रत्यभिज्ञाप्यतेऽत्र॥१४१
व्युत्पत्त्या ह्यात्मशब्दः प्रथयति परमं ब्रह्म यद्वा समानात् सार्थोऽयं जीवशब्दो वदति च परमं द्वारवृत्त्येतिपक्षाः।
व्यक्त्यैक्यादाश्मरथ्यो निरुपधिकदशाद्वैततस्त्वौडुलोमिस्तत्स्थत्वात्काशकृत्स्नः परविषयतया जीवशब्दं जगाद ॥

भेदोपाधिव्यपाये भवभृदयमियाद्ब्रह्मतामित्ययुक्तं नित्यं तद्भेददृष्टेरतिपतितभवे साम्यसाधर्म्यशब्दात् ।
मृत्तत्कार्यक्रमश्च श्रुतिशतविहतस्तेन जीवोक्तिमीशे तत्स्थत्वात्काशकृत्स्नो यदिह निरवहद्व्याससिद्धान्त एषः॥

--(अथ प्रकृत्यधिकरणम् ॥ ७ ॥)—सू० प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ १.४.२३.

मृत्पिण्डादेः कुलालप्रभृतिरिह पृथक्तद्वदेवादिकर्ता नोपादानं विकारैर्विरहत इति न द्वारमात्रे विकारात् ।
मृद्दृष्टान्तादिमात्रान्नच विकृतिरसौ स्यात् परस्य स्वरूपे देहद्वारोर्णनाभिप्रभृतिविकृतिवद्व्याप्तेर्दर्शितत्वात्॥१४४॥
स्वज्ञानाद्यं स्वजन्यं भवति सृजति च स्वान्यसंयोगमीशस्संयोगे मूर्तनिष्ठे प्रकृतिरपि हि तत्स्यान्निमित्तं क्रियातः ।
एकस्यादौ बहु स्यामिति बहुभवनं सौभरिन्यायसिद्धं भेदाभेदश्रुतीनामविहतिरिह च स्याद्विशिष्टैक्ययोगात् ॥१४५
कार्यैक्ये हि प्रतिज्ञा तदनुगुण उदाहारि दृष्टान्तवर्गः स्रष्टुस्स्यामित्यभिध्यां श्रुतिरिह वनतां वृक्षतादिं च वक्ति ।
आत्मानं चैष एव स्वयमकुरुत तद्भूतयोनित्वमुक्तं तस्मात्कर्ताऽपि देवः प्रकृतिरपि भवेत् सर्वतत्त्वान्तरात्मा ॥१४६॥
नोपादानं निमित्तं किमपि तदितरत्कारणं तद्धि विद्मो यद्वा सिद्धं निमित्तं न भजति तदुपादानतामित्ययुक्तम् ।
इष्टादाकारभेदादुभयघटनतो लोकवेदानुरोधे सिद्धे स्वच्छन्दलक्ष्मप्रणयनकुसृतिः पाकचिन्ताविपाकः ॥१४७॥

उक्त्वा तत्त्वान्तराणां विलयमथ तमस्येकतामात्रमुक्तं प्रोक्तं चानादितादिप्रकृतिपुरुषयोर्वदतद्वेदिवाक्यैः ।
लीयेते तौ परस्मिन्निति तु लयवचस्स्यादयस्तोयनीत्या तेनासौ भोक्तृभोग्यप्रभृतिकवचिताद्विश्वसृष्टिस्समीची॥१४८

—(अथ सर्वव्याख्यानाधिकरणम् ॥ ८ ॥)—सू० एतेन सर्वे व्याख्याता व्याख्याताः ॥१.४.२९.

अग्रे संवर्तनं भात्यवितथवचसि क्वापि हैरण्यगर्भे ग्रस्ताशेषस्वकार्ये तमसि च शिव एवेति केचित्पठन्ति ।
एतादृग्वाक्यवर्गस्स्फुटभवदधिकाशङ्कनस्तम्भनाथ प्रागुक्तान्नीतिभेदानतिदिशति परं शिष्यशिक्षैकचित्तः ॥१४९॥
विश्वेशश्श्रीपतिश्चेद्भवति कथमसौ त्राणमात्राधिकारी दूरं गत्वाऽपि दुःख्यद्विधिशिवतुलया घट्टकुट्यां प्रभातम् ।
मैवं मत्स्यादिभावेष्विव निजविभवानुक्रियानाट्यमेतद्ब्रह्मेशस्रष्टरि स्यान्निरवधिकबृहत्पौरुषे पूरुषे नः ॥१५०॥
साङ्ख्योक्तप्रक्रियोक्तेस्तदभिमतसृजेस्तत्प्रसङ्ख्यानक्लृप्तेस्तत्प्रोक्ताव्याकृतैक्यात्स्ववृजिनवचनात्तत्फलावद्ययोगात् ।
भेदात्कर्तृप्रकृत्योर्द्रुहिणशिवमुखानेकहेतुश्रुतेश्च क्षिप्तं पादत्रयोक्तं श्रुतिहृदयसमुद्घाटनादन्वरक्षत् ॥१५१॥
जिज्ञास्यत्वेन सिद्धे स्थिरचरचिदचिद्देहिनि ब्रह्मतत्त्वे श्रुत्यार्थैरेव सूक्ता स्वरसगतिरियं कारणाम्नायवाचाम् ।
बाधं रोधं च बाह्यान्तरमिह बहुधा वर्णयन्तो मुसल्या निष्काल्यैरन्परस्तान्निषदुपनिषदां निश्चलत्वप्रसिद्ध्यै ॥१५२॥
आदौ जिज्ञास्यताऽऽस्तां बहुविहतिहता सह्यतां लक्षणोक्तिः मृष्यामश्शास्त्रयोनिप्रलपितमिह च स्तात्समन्वित्यपोक्तिः।
सूत्रैरेतैस्स्फुटार्थैस्सविषयवचनैर्निर्विशेषैक्यपक्षे मुख्येक्षाद्यैस्स्वधर्मैः प्रकृतिपुरुषतो भेदवादः कथं स्यात् ॥१५३॥

॥ समाप्तः प्रथमाध्यायः ॥

अथ द्वितीयाध्यस्यायस्य प्रथमपादः १.

—(स्मृत्यधिकरणम् ॥१॥)-सू० स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ २.१.१.

तत्तादृक्तर्कतन्त्रक्रमनिपुणमहाबुद्धिसन्तोषसिद्धिर्यद्यप्युक्तेन लभ्या तदपि मृदुधियां हैतुकास्कन्दशङ्की ।
स्थूणाखातक्रमेण स्थिरयति कथितं ब्रह्मणः कारणत्वं कार्यत्वं यस्य यादृक्छ्रुतिभिरवगतं तस्य तत्तादृशं च ॥१५४॥
पादद्वन्द्वं द्वितीये परिहरति परे कारणे बाह्यपीडां कार्यद्वारेण पादान्तरयुगमुदयत्यान्तरक्षोभशान्त्यै ।
हेतुत्वायोगभङ्गः प्रथममिह विभोस्तस्य सार्वत्रिकत्वायोगक्षेपः परस्तात् फलति स च भवेच्छ्रौतनित्यं विहाय ॥१५५॥
तन्त्रच्छायानिदाने स्वयमुपनिषदामान्यपर्ये निरुद्धे तन्त्रेभ्यो दुर्बलत्वात्तदनुसरणमित्युज्जिहीते परोऽद्य ।
इत्थं सत्यत्र तत्तत्स्मृतिनयकलितातिक्रमं तत्तदर्हैः प्रत्यस्त्रैर्वारयित्वा द्रढयति चलितं पादतः प्राच्यमर्थम् ॥१५६॥
निर्णीतं कर्मकाण्डे स्मृतिनयविहतौ निश्चलत्वं श्रुतीनां चर्चा तत्सिद्धयेऽसौ पुनरिति विफलः स्याद्द्वितीयाद्यपादः।
मैवं गम्भीरनानाश्रुतिशिखरपरिच्छेद्यदुर्बोधतायामाप्तोक्त्या तर्कतश्च क्षममनुसरणं पश्यता ह्यत्र भङ्गः ॥१५७॥

द्वाभ्यां स्मृत्या विरोधं परिहरति ततस्त्वष्टभिस्तर्कबाधं तेनोपादानभावं दृढयति तु विभोः कर्तृतां तद्द्वयं च ।
तत्तत्क्षेपात्तुलाग्रद्वितयनतिसमुन्नामनीत्या प्रवृत्ते शङ्कावर्गे परीक्षासमनिहितमतिः पक्षपातं रुणद्धि ॥१९८॥

स्मर्ता श्रुत्यैव गीतः कपिलऋषिरसौ वासुदेवांशभूतः ख्यातो रामायणादौ प्रणिधिनिपुणधीर्वक्ति वेदान्ततत्त्वम् ।
तस्मादस्मद्विदूरे श्रुतिशिरसि तदुक्त्यैव निष्कर्षणं स्यान्न स्यादेकार्थमन्वाद्यनघबहुगिरा तत्र तत्त्वार्थसिद्धेः ॥१९९॥

–(अथ योगप्रत्युक्त्यधिकरणम् ॥ २ ॥)–सू० एतेन योगः प्रत्युक्तः॥ २.१.३.

वेदान् पूर्वं विधाताऽलभत भगवतस्सर्वविद्यानियुक्तो वागीशश्चैष तस्मात्तदुदितविहतौ कम्पनं वेदमूर्ध्नः ।
मैवं तस्यापि वेदापहृतिमुखविपद्दर्शनात् क्षेत्रिभावात् भ्रान्त्यादिस्सम्भवेदित्यगतिकविषये पूर्ववन्निर्वहामः ॥१६०॥

--(अथ विलक्षणत्वाधिकरणम् ॥ ३ ॥)--सू० न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ २.१.४.

विश्वं त्रैगुण्यवत् स्यात् त्रिगुणत उदितं नासमादित्ययुक्तं सर्वाकारेण साम्यं क्वचिदपि न भवेत् केनचित् साम्यमिष्टम्॥
भग्ना हेतुव्यवस्थोचितगुणसमता गोमयाद्वृश्चिकादौ स्थूलत्वं याति चेशः प्रकृतितनुरतस्सर्वचोद्योपमर्दः ॥१६१॥

ईक्षा तादृग्बहु स्यामिति सति पठिता तेजसोऽपां च दृष्टा सालक्षण्यं ततस्स्याज्जगत इति मृदुप्रज्ञपार्श्वस्थचोद्ये ।
तत्तन्मूर्तेः परस्येक्षणमिदमिति तद्वाक्यभावापलापी सामान्येनाभिमानिव्यवहरणमिह व्याहरत् पूर्वपक्षी ॥ १६२॥

--(अथ शिष्टापरिग्रहाधिकरणम् ॥ ४ ॥)--सू० एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ २.१.१२.

संवादादक्षपादक्षपणककणभुग्भिक्षुपक्षेष्वणूनां विश्वं तद्धेतुकं स्यादिति मृदुमतिभिश्श्वावराहक्रमोक्तौ ।
अन्योन्यव्याहतार्थस्थपुटितकुहनायुक्तिदोषापनुत्त्यै भाति त्र्य्यन्तसूर्यः प्रतिमततिमिरस्तोमकुक्षिंभरिर्नः ॥१६३॥

--(अथ भोक्त्रापत्त्यधिकरणम् ॥ ५ ॥)--भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥२.१.१४.

एको यस्यास्ति देहस्स भवति विविधानन्तदुःखैकभोक्ता विश्वं देहः प्रभोश्चेत् स कथमतिपतेद्विश्वदुःखानुभूतिम् ।
इत्थं जीवेशसीमामपलपितुमनाः कोशभाजा श्रुतीनां सम्राड्भृत्यादिनीत्या शममिह लभतां साम्यवैषम्यदर्शी ॥

–(अथारम्भणाधिकरणम् ॥ ६ ॥)–सू० तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ २.१.१५.-

कार्यं धर्मैर्विरुद्धैः कट इव शकटात् कारणद्रव्यतोऽन्यद्व्यापारः कारकाणां विफल इतरथेत्यर्धवैनाशिकोक्तौ ।
द्रव्यैक्येऽप्यस्तु सर्वं तदभिमतदशाभेदतोऽसच्छ्रुतिश्चेत्यध्यक्षाल्लाघवाच्च श्रुतिकथितजगद्ब्रह्मतादात्म्यमुक्तम् ॥१६५॥

मायोपाधिस्वशक्तिव्यतिकरितपरब्रह्ममूलः प्रपञ्चो येषां तेऽप्यद्वितीयश्रुतिमवितथयन्त्यत्र तत्तद्विशिष्टे ।
अप्राधान्यात्तथा नः प्रकृतिपुरुषयोरन्तरात्मप्रधाने वाक्येऽस्मिन् स्थूलसूक्ष्मान्वय इति जगतोऽनन्यभावोपपत्तिः ॥

विश्वारम्भे विवर्तं शकलपरिणतिं शक्तिशेषस्य सूतिं व्यक्त्युल्लासौ विसृष्टिं विकृतिमनियतां तत्त्वपङ्क्तौ च सृष्टिम्।
तत्तद्वाक्यैकदेशः स्वरस इति मुधा कल्पयन्तस्तु मुग्धास्सर्वश्रुत्यैकरस्यप्रणयिभिरधरीचक्रिरे तत्त्वविद्भिः॥१६७॥

--(अथेतरव्यपदेशाधिकरणम् ॥ ७ ॥)--सू० इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २.१.२१.

उक्तेऽनन्यत्वपक्षे चिदपि परिणतिर्ब्रह्मणस्स्यात्ततस्तज्जीवैक्यं तत्त्वमस्याद्यवगतमहतं दुःखसिन्धुश्च जीवः ।
अभ्रान्तस्तु स्वदुःखं न सृजति न च तत् क्रीडयाऽप्यस्य मैवं तात्स्थ्येनानन्यतोक्तेस्तदपि चिदचितोस्तच्छरीरत्वसिद्धेः॥

--(अथोपसंहारदर्शनाधिकरणम् ॥ ८ ॥)--सू० उपसंहारदर्शनान्नेतिचेन्न क्षीरवद्धि ॥ २.१.२४.

शक्तौ कर्तृप्रकृत्योरुपकरणगणोपस्थितौ कार्यकृत्त्वं तस्मादग्रे सदेकं किमुपकरणयेदित्यसच्छक्तिभेदात् ।
क्षीरायस्कान्तलूतात्रिदशमुनिमुखान्वीक्ष्य तोष्टव्यमस्मिन् संकल्पादेव जीवो नुदति निजवपुर्विश्वरूपस्तथेशः ॥१६९

--(अथ कृत्स्नप्रसक्त्यधिकरणम् ॥ ९ ॥)--सू० कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २.१.२६.

कृत्स्नं कार्यात्मना चेत् परिणमति परं नावशिष्येत किञ्चिद्यद्यंशान्निष्कलत्वश्रुतिविहतिरिदं स्याद्विशिष्टेऽपि तस्मिन्
ब्रह्मोपादानतैवं न घटत इति चेन्न स्वपक्षेषु साम्यात्तन्मानात्तद्गृहीतौ श्रुतिमितमपि तल्लोकवत् स्वीकुरुष्व ॥१७०॥
संयोगाख्यं हि कार्यं विभुतदितरयोस्स्यादणूनां मिथो वा कार्त्स्न्येनांशेन वा तद्विहतमिति वदन् शून्यवादे निमज्जेत्।
सांख्योऽपि प्राह विभ्वीं प्रकृतिमिति कथं न्यूनसृष्टिस्ततस्स्यान्मायादिष्वेवमूह्यं निगमनिगदिता त्वक्षता पद्धतिर्नः ॥

--(अथ प्रयोजनवत्त्वाधिकरणम् ॥ १० ॥)--सू० न प्रयोजनवत्त्वात् ॥ २.१.३२.

आत्मार्थं विश्वसृष्टिः कथमपि सततावाप्तकामस्य न स्यात् कारुण्याद्दुःखसृष्टिर्न भवति न च सा सर्वशक्तेश्चिकित्सा ।
सर्वज्ञस्स्वात्मतृप्तस्तदिह न जगतो हेतुरित्यन्धचोद्यं लीलाऽसौ लोकवत्स्यादभिमतिसमये सिद्धितस्स्वाप्तकामः ॥
विश्वं दुःखैकतानं विषममपि सदा निर्मिमाणस्य लीला संजायेतासमञ्जक्रमत इति भवेन्निर्दयत्वादिदोषः ।
मैवं बीजाङ्कुरादिक्रमविषमभवानादिकर्मौघभाजां जीवानां सौति तत्तत्फलमिति करुणासाम्ययोरप्रहाणात् ॥१७३॥
दृष्टन्यायेन विश्वप्रजनकचिदचित्तत्त्वभेदप्रक्लृप्तौ स्वेष्टप्रत्यर्थिधर्मोपनयननियतव्याप्तिर्वैयाकुली स्यात्।
अत्यन्तादृष्टमर्थं भणितुमधिकृताच्छास्त्रतस्सर्वकर्तुस्सिद्धौ बाधाद्यनर्हप्रमितिपरवती सर्वधर्मोपपत्तिः ॥१७४॥
सांख्यस्मृत्या विरोधाद्विधिमतविहतेः कार्यवैरूप्यतोऽस्मिन्नेकार्थानेकतन्त्रोदितविहततया देहभोगावियुक्त्या ।
कार्योपादानभेदात् स्वहितविहतितः कारकस्तोमहानेः कृत्स्नांशाद्यूहबाधात् कृतिविफलतयाऽप्युत्थितं प्रत्यविद्ध्यत्॥

इति द्वितीयस्याध्यायस्य प्रथमपादः ॥१॥ अथ द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ २॥

-(रचनानुपपत्त्यधिकरणम् ॥ १ ॥)- सू० रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च॥ २.२.१.

बाधाभावादकम्पे स्थितवति निगमैर्ब्रह्महेतुत्ववादे भूयः किं वीतरागो वदति परपरीवादमत्रेत्ययुक्तम् ।
प्रख्यातप्राच्यनैकप्रतिसमयभवन्मन्दसन्देहशान्त्यै तुल्यत्वभ्रान्तिसिद्धा प्रकरणसमता तर्कपादे हि वार्या ॥१७६॥
षड्विंशालम्बि सांख्यं स्फुटतरपठितं भारते योगतुल्यं तत्स्थत्वात् पञ्चविंशस्त्विति च निगदितस्सर्वतत्त्वान्तरात्मा।
तस्मात् सेशानतन्त्रं श्रुतिसमधिगतं स्थापयित्वाऽथ सूत्रैः पक्षं त्वीशानपेक्षं प्रतिवदति नयैरुत्कटप्रत्यवायम् ॥१७७॥

अव्यक्तादीन्पदार्थाननुमितिमुखतस्स्थापयन्तस्स्वबुद्ध्या षट्त्रिंशत्तत्त्ववादप्रभृतिषु न कथं सङ्गमिच्छन्ति सांख्याः ।
तुल्याक्षेपोपपत्तीश्श्रुतिनियतिमुचां कल्पनास्संमृशन्तो दृष्टं नापह्नुवीरन् लघुमनुमिनुयुश्शेषमिच्छन्ति शास्त्रात् ॥ १७८ ॥
कार्यं किंचित्कुविन्दप्रभृतिविरचितं दृश्यतेऽन्यच्च सर्वं कर्त्रायत्तं श्रुतं तत् क्वचिदपि न पराधीनताभङ्गदृष्टिः ।
पङ्ग्वन्धक्षीरपाथस्तृणजलदतटिद्राग्व्ययस्कान्तपूर्वैः दृष्टान्तैर्न त्वदिष्टं फलति तदखिलं चेतनाधिष्ठितं नः ॥ १७९ ॥
नन्वत्राचेतनानां स्वसमुचितविधौ कर्त्रधीनत्वमुक्तं शास्त्रारम्भे विधातुर्व्यनुददनुमितिं किंपरस्सूत्रकारः ।
पृच्छेयं नातितुच्छा शृणु तदवहितस्सर्वकृत्नानुमातुं नापह्नोतुं च शक्यस्तदुभयनियमादर्शनादित्यमंस्त ॥ १८० ॥
सत्त्वाद्यान् द्रव्यभेदांस्त्रिगुणमिति समाहारतः कल्पयन्तस्तेषां नित्यं विभुत्वे समविषमदशाद्यत्र कीदृग्वदेयुः ।
अन्योन्याध्यासक्लृप्तिः प्रकृतिपुरुषयोर्भोगमोक्षोपपत्त्यै च्छायापत्त्यादिनीत्या कथमियमुभयाचेतनत्वे घटेत ॥ १८१ ॥
पुंसां भोगापवर्गप्रभृतिफलमिदं तच्च सर्वं प्रधाने दृष्टत्वादेश्च क्लृप्तः पुरुष इह पृथग्द्रष्टृतादिश्च बुद्धौ ।
मुक्त्यै बद्धस्य शास्त्रं मुनिरकृत ततो नित्यमुक्तोऽस्मि चेत्याद्यन्योन्यव्याहतोक्तिं वृषलपरिणये जैनभक्ता जपन्तु ॥ १८२ ॥

(अथ महद्दीर्घाधिकरणम् ॥ २ ॥) सू०—महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ २. २. १०. ॥

कल्प्योपादानमेकं परममहदधिक्षिप्य नानाविधाणूपादानौघस्य दृष्टात् समधिकवपुषः कल्पनेऽनिष्टमाह ।
प्राज्ञाधिष्ठानशून्यप्रकृतिपरिणतिः प्राङ्निरस्ताऽथ सेशं सूक्ष्माणुद्रव्यमूलद्व्यणुकमुखजगत्सृष्टिपक्षं पिनष्टि ॥ १८३ ॥
प्रागेवारम्भणोक्तावपहतविषया प्रागसद्द्रव्यक्लृप्तिः काणादानामिदानीं क्षिपति बहुमुखं कारणप्रक्रियांशम् ।
त्रेधा हेतौ विभक्ते [ह्य]त्वनुमितिशरणैस्तत्तदंशैर्यथार्हं व्याघातादीन्विकल्पक्रमविविधगतीन् व्याहरत्यत्र सूत्रैः ॥ १८४ ॥
दृष्टस्याणोः प्रसूतिं द्व्यणुकमणुमपि स्थापयन्तोऽनुमित्या दृष्टाकारानुसारान्न निरवयवताद्यत्र वक्तुं क्षमेरन् ।
सर्वं सह्येत सूक्ष्मे प्रमितिपरवतां जालकालोकलक्ष्ये तद्भागान् ख्यापयेद्वा स्मृतिरफलतया त्वान्यपर्येण नेया ॥ १८५ ॥
विश्रान्तिर्न क्वचिच्चेदवयवनिवहानन्त्यतो मानसाम्यं माषक्षोणीभृतोस्स्यादिति यदि तदसत्तारतम्यादनन्ते ।
वैषम्यं पक्षमासप्रभृतिषु नियतं न ह्यनन्तेष्वनिष्टं पारावर्यं च जात्योर्न किमनुकथितं व्यक्त्यनन्तत्वसाम्ये ॥ १८६ ॥
नादृष्टं किंचिदन्यच्छ्रुतिसरणिजुषां देवतानुग्रहादेरन्यत्वे तस्य तज्ज्ञैरधिकयतनवत् क्लृप्तिरादौ व्युदस्ता ।
यत्ने यत्नानपेक्षां न किमनुमनुते स्याददृष्टेऽपि तद्वद्भूतस्थादृष्टवादे द्व्यणुकृदणुगतादृष्टकल्पोऽत्र लूनः ॥ १८७ ॥
नित्यं सम्बन्धमेके निजगदुरपृथक्सिद्धसर्वानुवृत्तं नित्यं नित्येष्वनित्येष्वपि कतिचिदिमं तावदायुष्कमाहुः ।
तत्तद्द्वन्द्वस्वभावप्रतिनियतिमुचां स्यान्न तेन व्यवस्था गुर्वी त्वन्यस्य क्लृप्तिः कथमधिकजुषां नानवस्था न दोषः ॥ १८८ ॥
निर्धूते सूत्रकारैरवयविपरमाण्वात्मके द्रव्यवर्गे विश्वं व्याप्त्येकलक्ष्यं परममहदसत् स्यादथाद्रव्यमेव ।
मैवं दृष्टाणुतत्संहतितदुभयसम्बन्धसिद्धेरबाधादागन्तुक्षोणिताद्यैः श्रुतिरपि जगदारम्भणं बम्भणीति ॥ १८९ ॥

(अथ समुदायाधिकरणम् ॥ ३ ॥) सू०—समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ २. २. १७. ॥

बाह्योक्ताचारभागश्श्रुतिविहितविशाज्जैमिनीये निरस्तस्तत्त्वांशं तर्कितं तैः प्रतिवदति गुरुर्जैमिनेरत्र पादे ।
निर्धूते तत्र पूर्वं निरुपधिकनयैर्वैनाशिकोक्ते पक्षान्वैनाशिकानां जिनगिरिशमतक्षेपतः प्राक् क्षिणोति ॥ १९० ॥

बुद्धोऽसौ स्वावतारैस्सह परिगणितः श्रीधरेण स्वशास्त्रे सर्वज्ञो नैव मुह्येन्न च निखिलसुहृद्विप्रलिप्सेत कंचित् ।
तस्माद्बुद्धोक्तभङ्गे भजति भिदुरतां सात्त्वतादीति चेन्न स्वाभीष्टप्रत्यनीकप्रमथनमनसा मोहनादिप्रवृत्तेः ॥ १९१ ॥
दुर्वारा मोहनेच्छा निखिलजनयितुः केन मोहोऽन्यथा नस्तस्मात्कर्मानुरूपं दिशति फलमसौ तत्त्वबोधं भ्रमं वा ।
स्वोक्त्यादेस्सिद्धमेतन्निरुपधि विषमो नैव तस्मात् समोक्तिः कारुण्याद्विप्रलिप्सा न यदि वृजिनजं नेशनिघ्नं फलं स्यात् ॥
कल्प्यो बोद्धेति सर्वे सुगतमतविदो बोध्यमध्यक्षमेके बुध्याकारानुमेयं कतिचन कतिचिद्बोध्यमिथ्यात्वमाहुः ।
तत्तुल्यन्यायतोऽन्ये धियमपि जगदुः संवृतेरेव सिद्धां तान् सर्वांस्तर्कमानैर्धयति दितिजगुरूनद्य वैभाषिकादीन् ॥ १९३ ॥
एकद्व्यादिस्वभावैर्यदणुभिरथवा तत्तदेकस्वभावैः क्षोणीदेहादिपुञ्जप्रसृतिरिति समाभाषि वैभाषिकेण ।
ज्ञानादानादि तत्र क्षणभिदुरतया बोध्यबुद्ध्योर्न सिद्ध्येन्निर्बाधा प्रत्यभिज्ञाऽप्यनुमितिमथनी शेषमन्यत्र सूक्तम् ॥ १९४ ॥
बोधेष्वाकारभेदं निजमुपरितनेष्वर्पयन् प्राक्तनोऽर्थस्तद्वैचित्र्यानुमेयः क्वचिदपि न तदाध्यक्षतेति प्रजल्पन् ।
प्राक् पश्चाच्च प्रवृत्तैर्विहतिबहुलतां गौरवं च ब्रुवाणैः शिक्षादक्षैस्सयूथ्यैर्दमित उपशमं यातु सौत्रान्तिकाख्यः ॥ १९५ ॥

(अथ उपलब्ध्यधिकरणम् ॥ ४ ॥) सू०—नाभाव उपलब्धेः ॥ २. २. २७. ॥

न ग्राह्यग्राहकौ स्तः क्वचिदपि विविधानादिसन्तानचित्रो बुद्ध्यात्मा त्र्यात्मकोऽद्य स्फुरति भवदशातिक्रमे स्वात्मनैव ।
योगाचारोक्तिरित्थं विषयविषयिणोर्बोधबाधौ समानौ मन्वानैर्वारणीया स्वपरविभजनाद्यत्र न क्वापि सिद्ध्येत् ॥ १९६ ॥
बुद्ध्यैक्यं बोध्यबोद्ध्रोर्न घटत इह ते सत्ययोरन्ययोर्वा भिन्नत्वे ग्राह्यलक्ष्मक्षतिमभिमनुषे नात्र चित्रैक्यमर्थ्यम् ।
चित्रं द्रव्यं गुणं वा किमपि नच विदुः केऽपि भिन्नैकरूपं तेनात्मख्यातिवादे स्थितिमिह भजतु स्वप्रकाशत्वमात्रे ॥

(अथ सर्वथानुपपत्त्यधिकरणम् ॥ ५ ॥) सू०—सर्वथाऽनुपपत्तेश्च ॥ २. २. ३०. ॥

सत्त्वेऽसत्त्वे द्वये च द्वितयपरिहृतावप्यनिष्टप्रसङ्गैस्सर्वं शून्यं चतुष्कोट्यतिगतमिति नामानतस्स्वेष्टवादात् ।
अक्षोभ्यं तत्प्रहाणे परमतमसती संवृतिर्नार्थसिद्ध्यै तस्मादित्थं निषेधो निरुपधिक इह क्वाप्यदृष्टो न कल्प्यः ॥ १९८ ॥
प्राक्पश्चात् सत्त्वहानेर्गगनकुसुमवत् स्यान्न मध्येऽपि कार्यं मैवं तत्रैव दृष्टेर्न यदि कथमसौ मध्यकार्यादिशब्दः ।
कार्यारम्भे निदानं विकृतिमदुत नेत्यादिचिन्ताऽपि वन्ध्या सामग्र्या कार्यसिद्धेर्भजति च गुणतां कारणस्थानवस्था ॥
साध्यं हेतुस्तदङ्गप्रभृति च यदि वस्संवृतेरेव सिध्येदस्मद्वाक्यानुरोधादिह न कथमसिद्ध्यादिदोषा भवेयुः ।
तत्र प्रामाण्यबुद्धिर्न यदि पठत तन्मानमित्यस्मदुक्तिं वस्तुस्थित्या न मानं तदिति यदि समं त्वन्मतस्थापकेऽपि ॥ २०० ॥
अख्यातिस्त्वन्यथाधीर्विषयरहितधीस्साऽनधिष्ठानबुद्धिर्बाह्यार्थाकारयोगस्सदसदितरधीश्शून्यधीरात्मधीश्च ।
भ्रान्तौ सर्वत्र तत्तत्परमतकथकैराहृताः पक्षभेदाः प्रायो बुद्धिर्यथार्था श्रुतिविदभिमता क्वापि भेदाग्रहादि ॥ २०१ ॥

(अथ एकस्मिन्नसंभवाधिकरणम् ॥ ६ ॥) सू०—नैकस्मिन्नसंभवात् ॥ २. २. ३१. ॥

संवादात् क्वापि भागे जिनमुनिवचसश्शेषमप्यस्तु मानं तस्मात्तेनोपरोध्योपनिषदिति कचोल्लुञ्छनानां दुराशा ।
वैषम्यस्यापि दृष्टेर्न यदि सुगतवागेवमेवास्तु सत्या तेनान्योन्यं निरोधात् पुरुषवचनयोरप्रकम्प्या श्रुतिर्नः ॥ २०२ ॥
सच्चासच्च द्वयं च द्वितयसमधिकं तच्च पूर्वैस्सहेति स्यादस्तीत्यादिवाचा परिहितगगनैर्गीयते सप्तभङ्गी ।
व्याघातस्तैर्यदीष्टस्स्वसमयविहितिर्यद्यनिष्टः परोक्तिस्तद्वाक्यैर्न क्षतिस्स्यान्न च निरुपधिकः काप्यसत्त्वादियोगः ॥ २०३ ॥

वृद्धिह्रासौ यथार्हं प्रतितनु भविनां देहभङ्गे विमानं मुक्तौ नित्योर्ध्वयानप्रभृति गुरुतया नित्यपातं क्षमादेः ।
धर्मादेर्व्यापकत्वं गगनवदथवा तादृशं पुद्गलत्वं दुस्तर्कैः कल्पयन्तश्श्रुतिनयकुशलैर्दूरमुत्सारणीयाः ॥ २०४ ॥

(अथ पशुपत्यधिकरणम् ॥ ७ ॥) सू० पत्युरसामञ्जस्यात् ॥ २. २. ३१. ॥

सर्वं जानाति रुद्रश्श्रुतिषु च महितस्सत्यवादी च दृष्टः प्रख्यातं तद्व्रतं च क्वचिदुपनिषदीत्यस्तु मानं तदुक्तिः ।
मैवं देवेन दैत्यप्रमथनरुचिना मोहशास्त्राणि कुर्वित्यादिष्टो ह्येष तन्त्रं निजमकृत ततस्तन्न शिष्टोपजीव्यम् ॥ २०५ ॥
प्राजापत्ये हि वाक्ये प्रकटमुपनिषत् प्राह देहात्मवादं चक्रे लोकायतं तत् सुरगुरुरभजन्मोहनत्वं मुकुन्दः ।
कण्वस्थाने च लौकायतिकपरिबृढा भारतेऽपि प्रगीताः कार्यार्थं विप्रलम्भस्तदिह पशुपतेस्तद्वदेवोपपन्नः ॥ २०६ ॥
शैवाद्याख्याविशेषैः पशुपतिसमयस्याश्चतुर्धाऽन्यथा वा श्रुत्याऽन्योन्यं च बाधस्स्फुट इह तदसौ शापदुष्टार्ह उक्तः ।
अग्राह्यान् वैदिकानामनुसृतनिगमास्ससरुस्तत्प्रविष्टान् तत्त्वेऽप्यत्रान्यथात्वं सुगतजिनमतानन्तरोक्तिः क्रमात्ता ॥ २०७ ॥
निष्ठा सर्वेषु नारायण इति वचनाद्धित्वहन्तव्यतोक्तेर्मानत्वोक्त्या च तन्त्रान्तरमपि महितं वेदवद्धारतादौ ।
नातो बौद्धादिवत्तन्निरसनमिति चेत् सत्यमंशे तु बाधस्स्यान्नासौ पञ्चरात्रे क्वचिदपि तदिह स्वीकृतिर्वेदतुल्या ॥ २०८ ॥
दृश्यन्ते संगृहीता जगति हि समयास्ते च राज्ञाऽनुपाल्यास्तस्मान्नः पक्षपातः क्वचिदनुचित इत्यर्भकप्रायचोद्यम् ।
मुग्धैरन्ये गृहीता भवतु समयसंरक्षणोक्तिश्च धर्म्ये निष्ठैक्योक्तिस्तदन्यग्रहविहतिपरा तद्विरुद्धोक्तिदृष्टेः ॥ २०९ ॥

(अथ उत्पत्त्यसंभवाधिकरणम् ॥ ८ ॥) सू० उत्पत्त्यसंभवात् ॥ २. २. ३९. ॥

प्रामाण्यं कर्मकाण्डस्मृतिनयवशतस्सात्त्वतस्यापि सिद्धं पादेऽस्मिन् संगतिश्च प्रतिमतदमने नास्त्यमुष्येति चेन्न ।
प्रत्यर्थित्वं विरोधभ्रममपनयता पञ्चरात्रस्य वार्यं दुस्तर्काद्युत्थितोक्त्या तदितरसमयेष्वित्यनुस्यूतसिद्धिः ॥ २१० ॥
दृष्टाऽस्मिन्वेदनिन्देत्यनभिमतमृषेस्सात्त्वते वैदिकत्वं मैवं वैशद्यमूलस्तुतिपरवचने वेदवैरस्यहानेः ।
संगृह्याम्नायसारं प्रणयति भगवांस्तद्धि भक्तानुकम्पी श्रौतस्मार्तादिवच्च व्यभजदिह विभुर्वैदिकं तान्त्रिकं च ॥ २११ ॥
वेदानां मानतोक्तेस्तदनुसरणतस्स्वस्य तन्मूलतोक्त्या व्यावृत्तिर्भाति बाह्यागमत इति न तत्तुल्यभावोक्तिरार्षी ।
का हानिः क्षुद्रविद्याशबलमिति यथा तादृशे वेदभागे मोक्षस्य प्रत्ययार्थं त्वगणिषत परं सात्त्वते सिद्धिभेदाः ॥ २१२ ॥
जीवस्योत्पत्तिमाह प्रथयति च मनो जीवतत्त्वप्रसूतं तच्चाहङ्कारहेतुं व्यपदिशति ततः पञ्चरात्रं न मानम् ।
मैवं जीवादिवाचो ह्यभिदधति विभोर्व्यूहभेदानिह त्रींस्तत्तत्तत्त्वाभिमानान्नियतिमधिगता तेषु तत्तत्समाख्या ॥ २१३ ॥
जीवोऽत्रानाद्यनन्तः कथित इ[ह]ति तदुत्पत्तिपक्षो न हीष्टश्शब्दस्संकर्षणादिर्न कथमपि समन्वेति जीवादिमात्रे ।
श्रौतस्सृष्टिक्रमश्च स्वयमनुपठितस्तद्विरुद्धं न कल्प्यं तस्माच्छ्रुत्या मिथो वा न विहतिरिह तत्तन्त्रतात्पर्यदृष्टेः ॥ २१४ ॥
सांख्या वैशेषिकाश्च श्रुतिपरिपठितं धर्मैच्छन्न तत्त्वं तत्त्वाचारौ तु बुद्धक्षपणकपशुपत्युक्तिषु श्रुत्यपेतौ ।
वेदोपस्कारिविष्णुस्मृतिवदवितथे पञ्चरात्राख्यतन्त्रे तत्त्वं त्र्य्यन्तसिद्धं चरणमपि समं गृह्यभेदादिनीत्या ॥ २१५ ॥
स्मर्यन्ते पञ्चयज्ञा मुनिभिरपि नमस्कारमन्त्रेण शूद्रे तत्राधीतं हविष्कृत्प्रभृतिपदमिहाप्यंशतोऽस्याधिकारः ।
योज्या दक्षोक्तकालक्रमगतिरभिगत्यादिभेदे तदुक्ते ग्राह्यं पश्चिष्टिसोमप्रभृतिवदखिलं युक्तितस्सङ्कलय्य ॥ २१६ ॥
जातावाचार्यशब्दः क्वचिदिति न तथाऽऽचार्यदेवो भवेत्याद्याम्नाते तत्प्रतीतिस्स्मृतिषु नियमिताल्लक्षणात्तत्प्रवृत्तेः ।

तद्वत् स्यात् सात्त्वतादावगतिकविषये रूढिभङ्गो न दोषो विप्रादेरत्र शास्त्रे स्थितिरपि बहुधा भारतादौ प्रसिद्धा ॥२१७॥
योगास्साङ्ख्यव्युदासात् कणचरदमनादक्षपादानुयाता बौद्धोन्माथेन लोकायतमुषितधियो जैनभङ्गात्तदुत्थाः ।
पत्युस्तन्त्रे पशूनां प्रकटितविहतौ तादृशापष्टुनिष्ठा ध्वस्तास्तत्तुल्यतर्कागमशरणतया साकमस्मिन् कुदृग्भिः ॥ २१८ ॥
पादेऽस्मिन् कापिलस्थैः कणभुगनुगतैर्वृद्धवैभाषिकाद्यैर्योगाचाराभिधानैस्सुगतमतरहश्शून्यवादप्रसक्तैः ।
अर्हत्सिद्धान्तभक्तैः पशुपतिसमयस्थायिभिश्चोपरोधं क्षिप्त्वाऽथो पञ्चरात्रे श्रुतिपथमवदत् पञ्चमाम्नायदर्शी ॥ २१९ ॥

॥ इति द्वितीयाध्यायस्य द्वितीयः पादः ॥ २ ॥ अथ द्वितीयाध्यायस्य तृतीयः पादः ॥ ३ ॥

सर्वं साङ्ख्यास्तु नित्यं क्षणिकमखिलमप्यत्र वैभाषिकाद्या नित्यानित्यं समस्तं जिनपरिपठितां सप्तभङ्गीं पठन्तः ।
नित्यानित्ये विभज्याप्यभिदधति विपर्यस्य वैशेषिकाद्याश्श्रुत्युत्थांस्तान् निरुन्धन् श्रुतिभिरथ वियत्प्राणपादौ युनक्ति ॥

(वियदधिकरणम् ॥ १ ॥) सू०—न वियदश्रुतेः ॥ २. ३. १. ॥

पूर्वत्राधिक्रियायां पुरुषजनिवचोनित्यतोक्त्या निरुद्धं व्योमोत्पत्तौ तथैव स्थितिरिति वचसोर्व्याहतौ वक्ति कश्चित् ।
सिद्धान्ती व्योमसृष्टिर्निगमशतमिता नान्यथासिद्धिरस्यां वायुव्योमामृतोक्तिर्जनिविधिविहतेत्युक्तिवैषम्यमाह ॥ २२१ ॥
तेजःप्राथम्यदृष्टेरमृतवचनतोऽनंशकद्रव्यभावाद्व्योमन्युत्पत्तिवाक् स्यादुपहितविषयैवात्मनीवेति चेन्न ।
प्राथम्यस्याश्रुतत्वात् प्रथमपठनतः कल्पनेऽन्येन बाधात् किंचामर्त्योक्तितुल्यं त्वमृतपदमिहानेकवाक्यैककण्ठ्यात् ॥
यौक्तस्सत्कार्यवादः श्रुतिभिर[भि]नुमतो नावयव्यस्ति सृज्यस्तत्तद्द्रव्येषु नामान्तरभजनसहावस्थया सृष्टिवादः ।
इष्टाश्शब्दाद्यवस्थास्तव निरवयवद्रव्यवर्गेऽपि तस्मात् व्योमन्युत्पत्तिरुक्ता श्रुतिषु तदितरोत्पत्तितुल्या न बाध्या ॥ २२३ ॥

(अथ तेजोधिकरणम् ॥ २ ॥) सू०—तेजोऽतस्तथा ह्याह ॥ २. ३. १०. ॥

कूटस्थाद्ब्रह्मणस्स्याज्जगदखिलमिदं पुत्रपौत्रादिनीतेरेतस्मात् प्राण इत्याद्यपि सुगममिहेत्यादिरूहोऽत्र मोहः ।
प्राणस्वान्तादिपाठक्रमत इतरसंक्षोभणेऽतिप्रसङ्गादीक्षानुस्यूतिदृष्टेः प्रथममिव परं सौति तत्तच्छरीरम् ॥ २२४ ॥

(अथ आत्माधिकरणम् ॥ ३ ॥) सू०—नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ॥ २. ३. १८. ॥

द्रव्यं सर्वं हि नित्यं कथितमवयविद्रव्यभङ्गेन पूर्वं नित्यत्वं सूत्रकारः पुनरपि पुरुषे किं विशिष्याभिधत्ते ।
सत्यं नामान्तरार्हामिह नुदति दशां चेतनस्यानुपाधेः प्रत्यक्त्वज्ञत्वधर्मौ तदिह नियमितौ शाश्वतौ क्षेत्रिणोऽपि ॥२२५॥
सच्छब्दार्थातिरिक्तं जनिमदखिलमित्यैतदात्म्यादिसिद्धं प्रोक्ता सृष्टिश्च जीवे निरवयवनयस्त्वम्बरादौ निरस्तः ।
जीवोत्पत्तिस्ततस्स्यादिति न सदकृताभ्यागमादिप्रसङ्गान्नित्यत्वाजत्वकण्ठोक्तिभिरपि जननं त्वस्य देहादियोगः ॥ २२६ ॥
देहात्मत्वे जनिस्स्यान्न तदिह घटते जातमात्रस्य रागात् ज्ञाने किण्वादिमेघोपलशबलपटप्रक्रियाऽप्यत्र दुःस्था ।
देहे गेहादितुल्या ममकृतिरनवा दोषतस्त्वैक्यमोहः क्षिप्तं चैक्यानुमानं बलवदनुमितेश्शास्त्रतस्तर्कतश्च ॥ २२७ ॥
देहे देहातिरेके तदवधिनियतप्राणबुद्ध्यक्षरूपं धीसन्तानं च नित्यं प्रलयविलयिनं स्थास्नुमप्यापवर्गात् ।
डिण्डीराभं सदब्धाववितथविकृतौ जीवमिच्छन्त इत्थं निर्धूता दूरमत्र श्रुतिभिरितरवद्बाधदोषोज्झिताभिः ॥ २२८ ॥

(अथ ज्ञाधिकरणम् ॥ ४ ॥) सू०—ज्ञोऽत एव ॥ २. ३. १९. ॥

कैश्चिज्ज्ञानत्वमात्रं कथितमुपधिजा ज्ञातृतैवात्मनोऽन्यैस्तत्राम्नायादिबाधं प्रथयति विविधं ज्ञोऽत इत्यादिसूत्रैः ।

पूर्वन्यायादमुष्मिञ्ज्ञनिलयरहिते नित्यबोधेऽत्र चोक्ते सङ्कोचार्हबुद्धेर्विकृतिवचनमप्यस्य सद्वारकं स्यात् ॥ २२९ ॥
ज्ञातृत्वं ज्ञानता च श्रुतिभिरभिदधे नात्र पक्षे पतामस्सर्वत्रात्मा न भायात् किमिति न निगमैर्देहिनोऽणुत्वसिद्धेः ।
स्वाभासैकस्वमूर्तेरविशदमहमस्सर्वदा भानमिष्टं धीसङ्कोचात् सुषुप्तिप्रभृतिषु विशदोल्लेखमात्रोपरोधः ॥ २३० ॥
धर्मस्थे त्वेवकारे त्रिविधमपि भवेत्तद्व्यवच्छेदकत्वं धर्मिण्यस्यान्वये स्यात्तदितरविषये तस्य धर्मस्य हानिः ।
जानात्येवेत्यबोद्धा न भवति जडता ज्ञानमात्रोक्तिवार्या ज्ञानालोपादिवाक्यानुगुणविषयतां यात्यसावेवकारः ॥ २३१ ॥
उत्क्रान्तिस्पन्दनाणूपमितिवचनतोऽणीयसश्शक्तिलाभे धीभूम्ना यौगपद्यं त्ववयवनयतोऽनेकमूर्तिग्रहेऽपि ।
यत्राम्नातं विभुत्वं परविषयमिदं भाति तात्पर्यलिङ्गैर्जीवे व्यापित्ववादो मतिमहिमपरस्स्वच्छताद्याशयो वा ॥ २३२ ॥

(अथ कर्त्रधिकरणम् ॥ ५ ॥) सू०—कर्ता शास्त्रार्थवत्त्वात् ॥ २. ३. ३३. ॥

ज्ञातृत्वं पुंस इत्थं भवतु तदपि नामुष्य कर्तृत्वसिद्धिश्श्रुत्याद्यैस्तन्निषेधाद्विकृतिविरहतश्चेत्यसद्दृष्टबाधात् ।
कर्तृत्वापह्नवोक्तेरविकृतिवचसोऽप्यान्यपर्यं हि गीतं कर्ता शास्त्रार्थवत्त्वात्तदयमिह न च स्यादबोद्धुर्नियोगः ॥ २३३ ॥
किंच स्वोक्त्यादिभग्नो निगदितुरहमः कर्तृताया निषेधो यद्यन्यस्याहमर्थात्तदिदमुपनिषद्वेदिनस्सिद्धसाध्यम् ।
भोक्तृत्वस्याप्यभावे प्रसजति वितथं बन्धमोक्षादिशास्त्रं प्राणादानाद्विहारात् प्रकृतिसमधिकोऽस्मीति योगाच्च कर्ता ॥
व्यापारज्ञानवाञ्छाप्रशकनयतनायोगयुक्तिस्तु मन्दा कार्ये सामग्र्यपेक्षे विधितदितरयोर्लोकसिद्धा प्रवृत्तिः ।
सार्थं शास्त्रं हितोक्त्या नियतिनियमिता शास्त्रयोग्या दशा सा ज्ञाता कर्ता च भोक्ता तदयमिह पुमान् भाति सर्वैः प्रमाणैः ॥

(अथ परायत्ताधिकणरम् ॥ ६ ॥) सू०—परात्तु तच्छ्रुतेः ॥ २. ३. ४०. ॥

कर्ता न ह्यन्यतन्त्रस्स्मरति खलु तथा पाणिनिश्चान्यथा चेत् आज्ञा कुर्यान्न कुर्यादिति तु निगलिते धावनादेशवत् स्यात् ।
मैवं कर्माक्षकालप्रकृतिपरवशे कर्तृतां तत्फलं च स्वीकृत्यात्मेशमात्रे श्रुतिशतविदिते द्वेष इत्थं दुरन्तः ॥ २३६ ॥
साधारण्येन हेतुस्सलिलमिव विभुस्सर्वकार्याङ्कुराणां वैषम्यं त्वाविरिञ्चात् प्रतिनियतफलैः प्राणिनां कर्मबीजैः ।
साम्यं स्वस्य स्वगीतं श्रुतमपि तदिहाधोनिनीषादिभेदस्तादृक्कर्मानुरूपं फलमिति नियतोऽनादिरेष प्रवाहः ॥ २३७ ॥
काले दुःखोपशान्तिं जनयति भगवान् व्याजमात्रावलम्बी या दुःखापाचिकीर्षा परहितमनसस्सैव तस्यानुकम्पा ।
दत्ते देहादियोगं दिशति च निगमं वक्ति वेदान्तसारं निस्सीमानन्दयोगं निरुपधि समये सौति पुंसां तयैव ॥ २३८ ॥
दोषस्यान्निग्रहांशो यमयितुरिति चेन्नोपमर्दासहत्वात् स्वानिष्टं नेश्वरे हि प्रसजति न परानिष्टमस्य प्रतीपम् ।
कारुण्यं सावकाशं क्वचिदिति कथितं साक्षितायं च सुस्थं दृष्टे चैतत्स्वभावे फलत इति धिया युज्यते तत्प्रपत्तिः ।।२३९ ॥
प्रत्यङ्ङात्माऽहमर्थः प्रमितिपरवतां कर्तृतादिश्च तस्मिन् स्वेच्छापूर्वप्रवृत्तेरयमचिदधिकस्तावदीशानतुल्यः ।
ईशस्तु स्वेच्छयैव प्रयतत इति तन्निघ्नमन्यत्समस्तं सारथ्यादिक्रमेण प्रतिनियतगतिस्स्यात् त्रयाणां प्रवृत्तिः ॥ २४० ॥
कर्तृत्वं स्यात्कदाचित् करणवति परप्रेरणानिर्व्यपेक्षं नोचेत्तन्निग्रहाद्यं कथमिति यदि न स्वेष्टपक्षेऽपि साम्यात् ।
स्वेनापथ्यप्रवृत्तं नहि पुनरपि तत् कारयेयुर्दयार्द्रास्तच्चेत्तस्य स्वभावादितरदपि न किं निष्फलोऽधीतभङ्गः ॥ २४१ ॥
क्षेत्रज्ञानां समानां विषमयतनता तादृशादृष्टभेदात्तादृष्टं त्वन्यदिष्टं नियमनभिदया शासितुस्तत्र भाव्यम् ।
साक्षित्वाद्यच्च नेतुस्समनिगममितं प्रेरकत्वं न रुन्धे भाष्यादिग्रन्थलेशोऽप्यवहितमनसामैदमर्थ्यं भजेत ॥ २४२ ॥

कर्ता देवः फलानां न तु करणभृतः प्रेरकश्चेत्ययुक्तं सर्वश्रुत्यादिकोपान्न भवति न फलं कर्मणः पापचर्या ।
कर्माधीनं तु चिन्ताद्यपि हि भवभृतो भाषितं भाष्यकारैर्जन्तूनां देवतानामपि करणगणाधिष्ठितं वक्ष्यतीत्थम् ॥ २४३ ॥

(अथ अंशाधिकरणम् ॥ ७ ॥) सू०—अंशो........दाशकितवादित्वमधीयत एके ॥ २. ३. ४२. ॥

जीवादत्यन्तभिन्नः पर इति बहुधा व्याहरत् सूत्रकारो भेदाभेदश्रुतीनां घटकनियमतश्शात्रवं च व्यपोढम् ।
उक्ताक्षेपे समाधावपि न समधिको हेतुरत्रास्ति सत्यं पादांशाद्युक्तिमुद्यद्बहुकुमतिमतक्षिप्तये त्वंशचिन्ता ॥ २४४ ॥
अंशत्वं रामकृष्णप्रभृतिषु घटतां विग्रहांशावताराज्जीवे ब्रह्मांशतोक्तिर्न तु निरवयवं ब्रह्म वक्तुर्घटेत ।
ब्रह्मातश्चित्समष्टिः प्रतिपुरुषमिह त्वंशता चेत्ययुक्तं विश्वस्रष्टुर्बहु स्यामिति बहुभवनध्यातुरेकत्वसिद्धेः ॥ २४५ ॥
व्योमैकं स्याद्घटाद्यैः पृथगुपधिगणैर्ब्रह्म बह्वंशमेवं तत्रोपाधिव्यपाये भवभृदयमियाद्ब्रह्मतामित्ययुक्तम् ।
स्वानर्थारम्भदौस्थ्यात् प्रतिनियतगुणप्रत्यभिज्ञाद्यदृष्टेश्छिन्नाच्छिन्नांशचिन्तोदितबहुविहतेस्साम्यशब्दाच्च मुक्तौ ॥ २४६ ॥
मायोदन्वत्यपारे प्रतिफलति मृषावीचिषु ब्रह्मचन्द्रच्छायांशास्तस्य जीवा इति कतिचिदुशन्त्येतदुन्मत्तगीतम् ।
न ब्रह्मद्रष्टृतैषामचिदपि हि तथा स्वेन कल्प्यो न जीवः क्लृप्तेः प्राक् स्वात्महानेस्त्रितयसमधिकः कल्पकस्तत्र मृग्यः ॥
सन्मात्रं ब्रह्म सर्वानुगतमिह पुनर्नित्यसिद्धाश्रयोंऽशा जीवेशाचित्प्रभेदादिति च कतिचनेदं च नोदञ्चनीयम् ।
सत्तामात्रानुवृत्तेस्तदधिकवपुषश्शासितुर्ब्रह्मतोक्तेर्ब्रह्मत्रैविध्यवाक्यं निरवयवतया निश्चितेऽन्याशयं स्यात् ॥ २४८ ॥
मेरोरंशः किरीटप्रभृतिरिति नयान्नित्यभिन्नेंऽशतोक्तिस्साजात्याल्पत्वमूला गमयितुमुचितेत्यागमासन्नपक्षे ।
अंशोक्तिस्स्यादमुख्या स हि निपुणधियामेकवस्त्वेकदेशस्तस्माज्जीवो विशिष्टे भगवति गुणवत्तत्प्रकारोंश उक्तः ॥ २४९ ॥
उक्तं नित्योपलब्धिप्रभृति परमते पूर्वमेव ह्यनिष्टं भूयस्तादृक्प्रसङ्गः प्रकथित इह किं भोगसङ्कीर्णतादेः ।
मैवं पूर्वं हि बाह्यप्रसृतिमशमयत्साम्प्रतं ब्रह्मवादव्याजोत्सिक्तान् कुदृष्टीन् परिहृतिरिति च स्याद्विपर्यन्मतेषु ॥ २५० ॥
मिथ्याज्ञानादिचक्रे मरुति भगणवद्घूर्णमानस्य जन्तोः प्रत्यक्तत्त्वप्रबोधाद्भवपरिहरणे सर्वतन्त्राविगीते ।
शुद्धात्मज्ञानगर्भां परभजनभिदामङ्गभेदांश्च वक्ष्यन्मीमांसारम्भसिध्यद्वपुषमपि पुनश्शोधयामास जीवम् ॥ २५१ ॥
क्लृप्तिर्व्योमादिकेऽपि क्रमभुवि च विभोः प्राच्यतत्त्वैर्विशिष्टाज्जीवस्यौपाधिकौ तु प्रजननविलयौ चिद्घनज्ञातृताऽस्य ।
कर्तृत्वं पारतन्त्र्यं गुणतनुयतो विश्वरूपांशता चेत्याम्नायान्योन्यबाधव्यपनयनवियत्पादसाध्यानि सप्त ॥ २५२ ॥

॥ इति द्वितीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ अथ द्वितीयाध्यायस्य चतुर्थः पादः ॥ ४ ॥

अक्षाद्युत्पत्त्यनूक्तौ न हि फलमधिकाशङ्कनं त्वत्र मन्दं तत्सङ्ख्यादेः परीक्षाऽप्यनुकृतबलिभुग्दन्तचिन्तेति चेन्न ।
एतेष्वब्रह्मकार्यं किमपि कथयतां बाधनेनार्थवत्त्वात्तत्साक्षात्सङ्गतिस्स्यात् प्रथमचरमयोर्मध्यमानां प्रसङ्गात् ॥ २५३ ॥
अष्टावत्राधिकाराः प्रथममिह वियन्नीतिरुक्तेन्द्रियाणां तेजोबन्नोक्तनीतिं द्रढयति चरमे व्यष्टिभेदस्य सृष्टौ ।
सङ्ख्यामानादिचिन्तास्वपि तदुपहितोपासनाद्यैः फलं स्यात् प्राणादिभ्यः प्रमाता पृथगिति विशदीकर्तुमप्येष पादः ॥ २५४ ॥

(अथ प्राणोत्पत्त्यधिकरणम् ॥ १ ॥) सू०—तथा प्राणाः ॥ २. ४. १. ॥

अग्रे सत्तामृषीणां श्रुतिरभिदधती प्राणतां वक्ति तेषां नात्र ब्रह्मैव वाच्यं बहुवचनहतेस्तेन नित्याक्षसिद्धिः ।
मैवं तत्सृष्टिदार्ढ्याद्बहुवचनमिदं पांशनीत्यैव नेयं प्राणर्षित्वे परात्मन्यपि हि सुघटिते तन्निरुक्त्यादिसाम्यात् ॥ २५५ ॥

(अथ सप्तगत्यधिकरणम् ॥ २ ॥) सू०—सप्तगतेर्विशेषितत्वाच्च ॥ २. ४. ४. ॥

सप्त प्राणाश्चरन्तीत्युदितमभिहितास्ते विशिष्यापि योगे तस्मात् सप्तेन्द्रियाणीत्यसदधिकवचोदृष्टितोऽत्रान्यपर्यात् ।
लक्ष्मैषां सात्त्विकाहंकरणपरिणतद्रव्यता चाविशिष्टा भेदेनोक्तिः प्रधाने मनसि फलवती कर्मबोधेन्द्रियेभ्यः ॥ २५६ ॥
देहव्याप्येकमक्षं कतिचिदकथयन् भागतो भिन्नकृत्यं केचित् कर्मेन्द्रियाणि श्रुतिपथविमुखास्तत्यजुः क्षुद्रतर्कैः ।
क्षेत्रज्ञस्याहुरेके सहकरणगणं बुद्ध्यहङ्कारचित्तैरन्ये तं चित्तवर्जं निजगदुरिति तानर्थतोऽत्र व्युदास ॥ २५७ ॥

(अथ प्राणाणुत्वाधिकरणम् ॥ ३ ॥) सू०—अणवश्च ॥ २. ४. ६. ॥

सर्वेष्वानन्त्यवादात् परिमितिनियमानुक्तितश्चेन्द्रियाणां व्याप्तिस्सिद्धेति चेन्न प्रथदखिलतनूत्क्रान्तिगत्यागतिभ्यः ।
वृत्त्या दूरस्थधीस्स्याद्भजनविधिपरेऽनन्ततोक्तिस्स्वकार्यैः कन्दस्थानां च तत्तत्तनुषु विकृतिमद्द्रव्यभावात् पृथुत्वम् ॥ २५८ ॥

(अथ वायुक्रियाधिकरणम् ॥ ४ ॥) सू—न वायुक्रिये पृथगुपदेशात् ॥ २. ४. ८. ॥

प्राणः प्रागुक्तनीत्या परजनित इति स्थापितो वायुमात्रं देहान्तस्तत्क्रिया वा स इति न पृथगुत्पत्तिवादात् सहास्य ।
द्रव्यत्वं द्रव्यवर्गे पठनत उचितं नैष तत्त्वान्तरं स्यात्तेजस्त्वे वाय्ववस्थात्यजनवदिह तत्त्यागहानेः कदाऽपि ॥ २५९ ॥

(अथ श्रेष्ठाणुत्वाधिकरणम् ॥ ५ ॥) सू०—अणुश्च ॥ २. ४. १२. ॥

उक्तः प्राणस्त्रिलोक्या सम इति स जगद्व्यापकोऽस्त्वित्ययुक्तं जीवाक्षन्यायतस्तत्सहपठिततदुत्क्रान्तिगत्याद्यबाधात् ।
स्तुत्यर्था सर्वसाम्यश्रुतिरिह करणक्षेत्रभृत्यादिहेतौ देहेऽनल्पोपकारस्स्फुरति च दशधा वृत्तिभेदैर्विभक्तः ॥ २६० ॥

(अथ ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६ ॥) सू०—ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवता शब्दात् ॥ २.४.१३. ॥

भोक्तॄणां देवतानामपि तनुकरणाधिष्ठितिर्नेशतन्त्रा तत्स्वातन्त्र्यप्रदानादिति न तनुभृतस्तच्छरीरं हि सर्वे ।
नित्ये तत्पारतन्त्र्ये क्वचिदपि न भवेद्राजसामन्तनीतिः प्राणन्यायात् प्रभुत्वं तदिह परवशं चेतनानां स्वशक्ये ॥ २६१ ॥

(अथ इन्द्रियाधिकरणम् ॥ ७ ॥) सू०—त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ २. ४. १५. ॥

प्राणोऽपि स्याद्धृषीकं भृशमुपकरणात्तेषु मुख्यत्ववादादुत्क्रान्त्यादौ च साह्यादिति यदि न पृथक्शब्द[नै]तस्तस्य भेदात् ।
कण्ठोक्तादिन्द्रियत्वान्मनसि तु घटते गोबलीवर्दनीतिर्न प्राणे सात्त्विकाहङ्करणविकृतिता शब्दसाम्यादि मन्दम् ॥ २६२ ॥

(अथ संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥) सू०—संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ २. ४. १७. ॥

मन्वाद्यैस्स्मर्यतेऽसौ सरसिजवसतिर्व्यष्टिनामादिकर्ता जीवेनानुप्रविश्येत्यपि कथितमतः प्रेष्यकृत्यक्रमोऽत्र ।
तत्रैको हि प्रवेष्टा त्रिवृतमकृत च व्याकरोदित्यधीतस्तत्तज्जीवान्तरात्मा सृजति स भगवांस्तादृशं कार्यजातम् ॥ २६३ ॥
या जीवेनात्मनेति श्रुतिरियमपि न ब्रह्मजीवैक्यमाह प्रागेवैकोऽन्तरात्मा वपुरितरदिति स्थायिभेदाभिधानात् ।
तेनेशस्तद्विशिष्टस्वकरणकतयाऽनुप्रवेशेऽपि कर्ता जीवे तत्कर्तृतायामिह न हि घटते त्वाश्रुतिः कर्तृभेदात् ॥ २६४ ॥
अग्न्यादावण्डमध्यस्थितिमति कथितं रूपभेदैस्त्रिवृत्त्वं तेजोबन्नाशितोक्तावपि विशदमिदं तेन वेधास्त्रिवृत्कृत् ।
मैवं ब्रह्माण्डसृष्टिर्भवतु कथमसावत्रिवृत्कारपूर्वा भुक्तेऽन्नादौ त्रिधोक्ता परिणतिरितरत् सन्निकृष्टैः प्रदृष्टिः ॥ २६५ ॥
अक्षाणां जन्मसंख्यापरिमितय इह प्राणवायोस्स्वरूपं तत्सौक्ष्म्यं देवतादेस्तदुभयविषयाधिष्ठितौ पारतन्त्र्यम् ।

प्राणस्यानिन्द्रियत्वं बहुविधचिदचिद्व्यष्टिनामादि चाद्यात्पञ्चीकर्तुः स्वनाभिप्रभवकवचितादूचिरे प्राणपादे ॥ २६६ ॥
नित्यत्वं व्योम्नि वाताद्यणुषु च पुरुषेऽप्यज्ञतादीनपार्थान् श्रोत्रादौ भूतताद्यं मनसि च विभुतां नित्यतत्त्वान्तरत्वम् ।
प्राणेष्वात्मादिभावं स्वपदनियमनस्वैरितां स्वर्गिवृन्दे वेधस्युन्मुक्तयन्त्रक्रममपि वदतां पादयुग्मेऽत्र भङ्गः ॥ २६७ ॥
तर्कैरापातसत्यैरविहतिकथने व्याहतिः स्थापिता स्यात् सम्यग्भिर्वस्तुगत्या तदिति यदि तदा स्वाभिमानोपरोधः ।
तेनाद्ध्यायो विरोधप्रशमनकृदसौ बौद्धबन्धोर्विरुद्धस्सौत्री तर्काप्रतिष्ठा श्रुतिपथविमुखस्वैरवादेषु योज्या ॥ २६८ ॥

॥ समाप्तः द्वितीयाध्यायः ॥

॥ अथ तृतीयाध्यायस्य प्रथमः पादः ॥ १ ॥

साध्या मुक्तिर्न चेत्स्यात्प्रसजति विफला साधनाध्यायक्लृप्तिस्साध्या चेन्नश्वरी स्यात् कथमिह पुनरावृत्तिशून्योऽपवर्गः ।
मैवं ब्रह्मानुभूतिः परभजनवता प्रागसिद्धैव साध्या धीसङ्कोचप्रणाशस्त्वियमिति च भवत्युत्तरावध्यतीता ॥ २६९ ॥
पादाभ्यामत्र पूर्वं जनयति भविनां ब्रह्मविद्याधिकारं पश्चात्तेषामुभाभ्यां वदति बहुविधां तामशेषैस्सहाङ्गैः ।
ऐश्वर्यादौ विरक्तिं निरवधिविभवे पूरुषे चाभिलाषं विद्याभेदावलम्बं तदुपकरणमप्याह पादैः क्रमेण ॥ २७० ॥
संसारोद्विग्नचेतास्तनुभृदधिकरोत्यत्र शारीरकांशे वैराग्यार्थस्तु पादः किमिति पुनरसौ सूत्रकारैर्निबद्धः ।
सत्यं प्राप्यान्तराणां निरयगणतुलारोपणं मुक्त्युपायप्रारम्भेऽभ्यर्हितं स्यात्त्वरत इह खलु स्पष्टदृष्टस्वबोधः ॥ २७१ ॥

(अथ तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥) सू०—तदन्तरप्रतिपत्तौ........प्रश्ननिरूपणाभ्याम् ॥ ३.१.१. ॥

देहाद्यं भोग्यनीत्या दिवि भुवि च गतौ तत्रतत्रैव लभ्यं प्राणाद्यैर्भूतसूक्ष्मैरपि किमिह मुधा पूर्वदेहाद्गृहीतैः ।
जीवस्याणोर्गतिं च स्वयमुपजनयेदीश्वरः प्राणनीत्या मैवं स्वच्छन्दकृत्ये श्रुतिमितनियतौ गौरवोक्तेरयुक्तेः ॥ २७२ ॥
नानाजातीयराशिं व्यपदिशति जनो भूयसोंऽशस्य नाम्ना प्राचुर्यादेवमापः पुरुषवचस इत्युच्यते भूतवर्गः ।
व्यष्टिं पञ्चीकृतैस्तैस्सृजति हि स विभुस्तारतम्यं पुनश्च श्रद्धाशब्दस्त्विहापः कथयति निगमे तत्समाख्यावदुक्तेः ॥
द्यौः पर्जन्योऽथ पृथ्वी तदनु च पुरुषो योषिदित्येवमेतान् पञ्चाग्नीन् कल्पयित्वा परिकरसहितांस्तेषु पञ्चाग्निविद्या ।
श्रद्धाख्यं भूतसूक्ष्मं क्रमपरिणतितस्सोमवर्षान्नरेतोरूपं हव्यं सजीवं तनुधरमरुतो जुह्वतीति ब्रवीति ॥ २७४ ॥

(अथ कृतात्ययाधिकरणम् ॥ २ ॥) सू०—कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ३. २. ८. ॥

इष्टापूर्तादिरूपं तनुभृदिह शुभं कर्म यत् किं च कुर्यात् भुक्त्वा कृत्स्नं तदन्ते पुनरवनिमियादित्यसद्दृष्टबाधात् ।
कार्त्स्न्येनैत्यश्रुतत्वात् सुकृतफलतया जातिभेदाद्यधीतेस्तस्मात् प्रारब्धशेषैस्तदितरसहितैरापतेत् स्वर्गपान्थः ॥ २७५ ॥
धूमं रात्रिं च पक्षं तिमिरकलुषितं दक्षिणावृत्तिमासान् पश्चाल्लोकं पितॄणां गगनमपि मृतश्चन्द्रमभ्येति कर्मी ।
प्रत्यावृत्तौ तु चन्द्राद्गगनसततगौ धूममभ्रं च मेघं व्रीह्यादीन्याति रेतस्सिचमथ जननीं यातनाचक्रवर्ती ॥ २७६ ॥
आचारांशस्य साध्यं चरणवचनतो जातिभोगादिकं स्यात् कर्माचारौ विभक्तौ श्रुतिति इति न सद्वृत्त्यभावात्तथोक्तेः ।
मुख्यं वृत्त्या हि कर्मण्यपि चरणवचो नैकदेशे निरोद्धव्यं जात्यादिः कर्मभेदप्रभव इति मिते चिन्त्यमाचारसाध्यम् ॥

प्राप्ताचारातिवृत्तौ प्रतिपदमृषयस्सस्मरुः प्रत्यवायान् प्राचीनांहःप्रणाशं तदनुसरणतः पुण्यकर्मार्हतां च ।
नातस्सत्कर्ममात्रात् त्रिदिव इति धिया तत्परित्यागशङ्का न ह्याचारप्रहीणे श्वदृतिजलसमश्शोधको वेदवर्गः ॥ २७८ ॥

(अथ अनिष्टादिकार्यधिकरणम् ॥ ३ ॥) सू०—अनिष्टादिकारिणामपि च श्रुतम् ॥ ३. १. १२. ॥

सर्वेषां देहपाते सति नियमवती चन्द्रमःप्राप्तिरुक्ता तस्मात् पापोत्तराणां निरयगतिपुरस्कारिणी सेति चेन्न ।
लोकस्संपूर्यते तैर्न पर इति गिरा संकुचेत् सर्वशब्दस्ते तत्तद्यातनान्ते तत इह सहसा कुत्सितां यान्ति योनिम् ॥
जन्मप्राप्तिर्जरायुप्रभृतिषु भविनां कर्मपाकैर्विचित्रा भूयिष्ठैः पुण्यपापैस्त्वपवदनवती पञ्चमाहुत्यपेक्षा ।
तद्वद्धूमादिमार्गः कति कति च शुभैरुत्कटैर्देहपाते दिव्यं रूपं विमानादिकमपि सपदि प्राप्य याताः प्रसिद्धाः ॥ २८० ॥

(अथ तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥) सू०—तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ ३. १. २२. ॥

आहुत्योर्देहवत्त्वं प्रथमचरमयोर्निर्विवादं तथा स्याज्जन्मैवाकाशवायुप्रभृतिषु भवतेरन्वयादित्यसारम् ।
रेतस्सिग्भावनीत्या पृथगभिलपनानर्हतामात्रमत्र द्युभ्वोः पुण्यप्रसाध्यं फलमिह पठितं नास्ति भोगश्च मध्ये ॥ २८१ ॥

(अथ नातिचिराधिकरणम् ॥ ५ ॥) सू०—नातिचिरेण विशेषात् ॥ ३. १. २३. ॥

व्योमादिस्थित्यवस्था चिरमचिरमिति व्यक्तनिर्देशहानेश्शुक्लावस्थानयात्स्यादनियतिरिति न स्वारसिक्याः प्रवृत्तेः ।
व्रीह्यादिभ्यो हि दुर्निष्प्रपतरमिति तु श्रूयते तेन पूर्वं शीघ्रं तत्तद्दशायास्त्यजनमिति परिज्ञायते वाक्यशक्त्या ॥ २८२ ॥

(अथ अन्याधिष्ठिताधिकरणम् ॥ ६ ॥) सू०—अन्याधिष्ठिते पूर्ववदभिलापात् ॥ ३. १. २४. ॥

जन्म व्रीह्यादिनाम्ना श्रुतमिह तदिदं देवमर्त्यत्ववत्स्यान्नैरात्म्यं स्थावराणां न च निगमविदस्स्थापयन्तीति चेन्न ।
पुण्यस्यैव प्रवृत्ते फलपरिगणने स्थावरत्वोक्त्ययोगाद्रेतस्सिग्वर्ष्मणीव ह्युपचरति जनिं स्थावरेऽप्यन्यदेहे ॥ २८३ ॥
हिंसायोगादशुद्धं श्रुतिविहितमपि न्याय्यमिष्टादिकं तत् पापांशं व्रीहिभावप्रभृतिषु सुकृती भुङ्क्त इत्यप्ययुक्तम् ।
उक्ता मन्त्रार्थवादैः पशुहितमिति सा तच्चिकित्सावदेषा ब्रूते यज्ञे वधोऽसाववध इति मनुस्तौति निन्दा त्विहान्यत् ॥
कर्तुर्दोषं दिशेत्संज्ञपनमिह पशोस्तत्कृतोश्चोपकुर्यात् तस्मादस्मिन्निषेधं क्षिपति न विधिरित्यब्रुवन् साङ्ख्यभक्ताः ।
निर्धूते पश्चनर्थे न खलु तदुचितं पिष्टपश्वादिकल्पस्ततत्कालाधिकारिप्रतिनियत इति क्वापि न स्याद्विरोधः ॥ २८५ ॥
किंचोत्सर्गापवादक्रममिह जहतः कीदृशी नित्यहिंसा शुद्धं न क्वापि सिध्येत्तव हि विधिपदं स्पष्टतत्तन्निषेधम् ।
यत्रासत्यादिवैधं तदनु च विहिता निष्कृतिस्तन्निमित्ता तत्रागत्या तथा स्यादितरवदथवा केवलं तन्निमित्तम् ॥ २८६ ॥
अश्लिष्टं विग्रहाद्यैर्नभ इव मुसलैः क्षेत्रिणं केचिदूचुः कर्माकर्तारमेवं फलमपि विविधोपाधिभेदैकनिष्ठम् ।
अव्यक्तस्यापवर्गं भवभुजमपि चानादिमुक्तस्वभावं तेषामित्थं मनीषां बहिरकृत नयैरेष वैराग्यपादः ॥ २८७ ॥
पादे त्वर्थाष्षडस्मिन्वपुरिह विजहद्भूतसूक्ष्मैस्सहेयात् भुक्तस्वर्गोऽवरोहेदनुशयसहितो मात्रया भिन्नमार्गः ।
चन्द्रप्राप्त्यादि न स्यान्निरयपथजुषामम्बरादौ सदृक्त्वं तस्माच्छीघ्रोऽवरोहः परवपुषि परं व्रीहिपूर्वेऽपि योगः ॥ २८८ ॥

॥ इति तृतीयाध्यायस्य प्रथमः पादः ॥ १ ॥ अथ तृतीयाध्यायस्य द्वितीयः पादः ॥

ब्रह्मैव स्वैस्स्वभावैर्बहुमुखमवदत् प्राक्तनाध्याययुग्मे तस्येहाकृष्य चिन्ता किमिति पुनरसौ साधनाध्यायमध्ये ।

मैवं विद्याः प्रभेत्तुं विशदयति परं तद्धि तद्रूपभेदास्सिद्धोपायादिभावं प्रथयति च विभोः प्राप्यतृष्णाप्रथिम्ने ॥ २८९ ॥
नैर्गुण्यं ब्रह्मणश्चेद्वितथ इह गुणैर्ब्रह्मविद्याविभागः सोऽस्त्वेतैः कल्पितैश्चेच्छ्रुतिमतविहतिर्नात्र दृष्टिक्रमोऽपि ।
निर्दोषत्वं च नित्यं यदि वदसि मुधा दोषशान्त्यर्थयत्नः कल्प्यं चेद्दुष्टता स्यात् प्रकृतिरिति परक्षितये चैष पादः ॥
किं चादौ चिन्त्यभावः प्रमितिविषयता स्वप्रभत्वं सुखत्वं विश्वाधिष्ठानता च स्वबहुभवनधीर्निर्विशेषे कथं स्यात् ।
सर्वश्रुत्यर्थहानिः स्ववचनविहतिस्सर्वमानैश्च बाधो मायवैयात्यभाजामिति सगुणदशोपास्तिवादश्च दुःस्थः ॥ २९१ ॥
त्यक्तं दोषैर्गुणाढ्यं यदि पुनरिह तद्ब्रह्म चिन्त्येत पादे जीवे स्वप्नाद्यवस्थामननमथ कथं जाघटीतीति चेन्न ।
स्वाप्नार्थस्रष्टृभावप्रभृतिबहुविधब्रह्ममाहात्म्यसिद्ध्यै जन्तोरस्य स्वमुक्तावतिपरवशताज्ञप्तये चैतदत्र ॥ २९२ ॥
पादस्यास्याद्यमर्धं कतिचिदधिजगुः पूर्वपादस्य शेषं पश्चादर्धं तु साक्षादनुघटितमुपास्त्यर्थतत्तद्गुणोक्तेः ।
एतन्नातीव हृद्यं शबलितकथने चातुरी वैपरीत्याद्ब्रह्मोक्तौ जीवदोषग्रह इह तु मुखं तत्प्रतिद्वन्द्विसिद्धेः ॥ २९३ ॥
स्वप्नेऽर्थाः सन्तु सृष्टास्तदपि बहुविधा दुस्त्यजा भ्रान्तिरत्र प्रध्वस्तानामिदानींतनवदनुभवात्स्थायितादिभ्रमाच्च ।
सत्यं श्रुत्यादिसिद्धे श्रुतपरिहरणायोगतस्सृष्टिमात्रं स्वीकृत्यांशे तु बाधक्रममपि हि यथाजागरं न क्षिपामः ॥ २९४ ॥
कश्चिद्योगप्रभावान्निजपरभवनस्वैरसञ्चारनीत्या निष्क्रान्तः पूर्वदेहाद्विशति परवपुः पूर्वमाप्नोति भूयः ।
इत्थं स्वप्नेऽप्युदन्तस्थितिरिति कतिचिच्छ्वासवृत्त्याऽन्यथाऽन्ये चित्तोद्यद्धीप्रसृत्येतरतनुभजने सौभरिन्यायसिद्धेः ॥ २९५॥

(अथ सन्ध्याधिकरणम् ॥ १ ॥) सू०—सन्ध्ये सृष्टिराह हि ॥ ३. २. १. ॥

उक्तं पत्या प्रजानां भविनि दहरवत् सत्यसङ्कल्पताद्यं पुत्रादेश्चैष कर्ता प्रकृत इह सृजेत् स्वाप्नमर्थं च मैवम् ।
मुक्तौ तादृग्गुणोक्तेरनभिमतसमुत्पादनादेरयोगात् स्वप्नानां सूचकत्वादपि निखिलजगत्कर्तुरेषा[हि]ऽपि सृष्टिः ॥ २९६ ॥
कामंकामं विधातेत्यपि णमुलुचितोऽनूद्यते चेश इत्थं सोऽयं सुप्तेषु जागर्त्यपि विशदमिदं संपरिष्वङ्गवाक्यात् ।
तत्तत्कालावसानाः कतिकति नियता जागरेऽप्यर्थभेदास्तत्तत्कर्मानुरूपं फलवितरणमित्येतदप्युक्तमाप्तैः ॥ २९७ ॥
मायामात्रोक्तिलाभाच्छ्रुतिसुखसुगता विश्वमिथ्यात्वमाहुश्शास्त्रारम्भे तदेभिः कथितमिह ततोऽसङ्गतत्वादिदुस्स्थम् ।
मायाशब्दो न मिथ्यावचन उपचरत्वत्र तत् किं ततस्स्यात् सत्येऽस्त्रादौ प्रयोगादुचितनियमने सोऽयमाश्चर्यतार्थः ॥

(अथ तदभावाधिकरणम् ॥ २ ॥) सू०—तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ३. २. ७. ॥

स्थानं जन्तोस्सुषुप्तौ श्रुतिरनियमतो वक्ति नाड्यः पुरीतद्धार्दं ब्रह्मेति तस्मादिह भवतु मिथो नैरपेक्ष्याद्विकल्पः ।
तन्न प्रासादखट्वाशयनवदुपकृत्यन्तरैर्योजितानां पक्षेपक्षे विकल्पः क्रमघटितचतुर्दोषयुक्तो न युक्तः ॥ २९९ ॥

(अथ कर्मानुस्मृतिशब्दविध्यधिकरणम् ॥ ३ ॥) सू०—स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ३. २. ९. ॥

मुक्तिर्ब्रह्मण्यपीतिर्जहदसुखगणा तादृशीयं सुषुप्तिश्श्रुत्यैव ख्याप्यतेऽतस्तदनु तनुभृद्बुध्यमानस्ततोऽन्यः ।
मैवं कर्मानुवृत्तेस्स्मरणनियमतः पूर्व एवेति शब्दान्मोक्षोपायादिशिष्टेस्स्वपदनुवदनात् प्राच्य एव प्रबुद्धः ॥ ३०० ॥
जीवानादित्वमूचे दृषदनुकरणं क्षेप्स्यते चापवर्गे स्वर्गाद्यर्थप्रवृत्तिः श्रुतिनयविदिता सौगताद्याश्च भग्नाः ।
कल्पान्तेऽप्येकतोक्तिर्नियमितविषया नामरूपप्रहाणात् भूयश्चिन्ता सुषुप्ते प्रलयसमदशासंजिहासादिसिद्ध्यै ॥ ३०१ ॥

(अथ मुग्धाधिकरणम् ॥ ४ ॥) सू०—मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ ३. २. १०. ॥

जाग्रत्स्वप्नौ न बाह्यावगमविरहितौ श्वासपूर्णा सुषुप्तिस्तस्मान्मुग्धिर्मृतिस्स्यात् प्रशमितकरणप्राणवर्गेति चेन्न ।
मृत्यादेर्हेतुभेदात् स्थितिमृतिविशयादुत्थितेश्चानियत्यान्मर्तुं प्रक्रम्य मध्ये विरमति विधिनेत्यत्र तुर्याद्धभावः ॥ ३०२ ॥
जन्तूनां जागरादिस्थितिषु भवति यद्वैशसं दर्शितं तत् तत्तत्स्थानादियोगेऽप्यनघशुभगुणं ब्रह्म संशोध्यतेऽ[त्र]त्र ।
संसर्गैक्यादिमूलान् परिहरति ततो दोषवर्गानुभाभ्यां हीनत्वौदार्यहानी परमपनयते नीतियुग्मेन नेतुः ॥ ३०३ ॥
नैर्गुण्यं निर्गुणोक्तेर्गुणवचनमिहाविद्यधर्मार्थवादो नैर्दोष्यं वस्तुवृत्त्या तदितरदखिलं स्वाम्भोगादितुल्यम् ।
इत्थं जीवेशभूमापहरणकुहनावादमोमुह्यमानान् क्षेप्तुं न स्थानतोऽपीत्यधिकरणमथारभ्यतेऽनेकश्रृङ्गम् ॥ ३०४ ॥

(अथ उभयलिङ्गाधिकरणम् ॥ ६ ॥) सू०—न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ३.२.११. ॥

हेयं वस्तु स्वतो यत् स्थितिरिह हि भवेद्दुःखकृत् स्वेच्छयाऽपि त्याज्यत्वं नान्यथा स्यादिति न निरुपधेर्हेयभावस्य हानेः ।
नित्यस्वातन्त्र्यभाजो भविन इव दशाभेदतो नाप्यवद्यं श्रुत्यैवैकत्र देहे परतदितरयोश्शुद्ध्यशुद्धी ह्यधीते ॥ ३०५ ॥
ब्रह्मक्षत्रादिदेहेष्वणुरिव विभुरप्यात्मभावेन तिष्ठंस्तत्तच्छब्दाभिलप्यस्तदिह स न कथं तत्तदादेशवश्यः ।
मैवं न ज्ञाप्यतेऽसावविदितविरहाच्छासितृत्वान्न शास्यः किंचिज्ज्ञो ह्यन्यतन्त्रो जगति हितविदा बोध्यते प्रेर्यते च ॥
उत्सर्गेणापवादं न खलु नयविदः क्षोभणीयं क्षमन्ते तस्माद्ब्राह्मे गुणादौ विधिविषयमतिक्रम्य तिष्ठेन्निषेधः ।
एवं शान्ते विरोधे न हि समविषयापच्छिदान्यायसिद्धिर्दृष्टो नित्यं निषेधः पर इह च ततस्स्यादुपक्रान्तिनीतिः ॥
सत्त्वं कार्यस्य गोपायति कथमसतस्सद्भवेदित्यधीतिर्द्रव्यान्यत्वं हि कार्ये व्यपनयति परं मृत्तिकेत्येवशब्दः ।
अन्तर्भावाद्विशिष्टे भगवति जगतां नेह नानेति युक्तं निर्दिष्टेयत्वशङ्कां प्रशमयति परे नेति नेतीति चोक्तिः ॥ ३०८ ॥
तत्तद्वस्तुप्रदेशे सकलगुणतया पूर्णदृश्यः परात्मा वृद्धिह्रासादिभेदोज्झित इति हि जलाधारसूर्योपमोक्तिः ।
अस्पर्शोदाहृतिश्चेन्न हि घटकरकाकाशदृष्टान्तयुक्तिस्तस्माद्ब्रह्म द्विलिङ्गं द्विविधविभवमित्येव वेदान्तपक्षः ॥ ३०९ ॥

(अथ अहिकुण्डलाधिकरणम् ॥ ६ ॥) सू०—उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ ३. २. २६. ॥

विश्वस्रष्टुस्स्वदुःखप्रजननमिह न स्वांशतोऽचित्त्वक्लृप्तौ मृत्तत्कार्यादिकं च स्वरसमिह बहूदाहृतं सप्रतिज्ञम् ।
तस्मादव्याकृतादिर्विहरणनियता विक्रियैवेति चेन्न स्वांशे मौढ्यं वितन्वन्विहरति भगवानित्यनर्थानपोहात् ॥ ३१० ॥
कश्चिन्नित्याचिदंशो विविधविकृतिमान्ब्रह्मणीत्याहुरेके फेनादिन्यायतोऽन्ये सति विकृतिवशाज्ज्ञाज्ञसर्वज्ञभागान् ।
चन्द्रज्योत्स्नादिनीत्या कतिचिदिह जगद्ब्रह्मणो रैकजात्यं सर्वे ते सर्ववेदस्वरसगतिहतेरत्र वित्रासनीयाः ॥ ३११ ॥

(अथ पराधिकरणम् ॥ ७ ॥) सू०—परमतस्सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ ३. २. ३०. ॥

सेतुं तीर्त्वेत्यधीतेर्मितमिति वचनात् प्राप्यसंबन्धितोक्तेरन्याधिक्यश्रुतेरप्यतिवहननयात् कारणं प्रापकं स्यात् ।
प्राप्यं त्वन्यद्भवेदित्यसदनवधिके कारणे प्राप्यतोक्तेस्सेतुत्वाद्युक्तिरस्मिन् बहुभिरविहतां वृत्तिमङ्गीकरोतु ॥ ३१२ ॥
सेतुत्वं सेतुतुल्याद्विधरणनियमाद्बन्धनाद्वाऽत्र युक्तं व्याप्तेऽप्यस्मिन्नुपाधेः परिमितिवचनं सार्थकं सूत्रितं प्राक् ।
चातुष्पद्यं च तत्तच्छ्रुतिभिरनुगुणं कल्प्यतेऽनन्तभूम्नस्स्वस्येत्येवामृतस्येत्यभिहितमथवा मुक्तिरेवामृतं स्यात् ॥ ३१३ ॥

अन्यस्याधिक्यवादे परमवधितया कारणं यत्र दृष्टं तत्र ह्यव्याकृतादिस्तदवधिरितरापेक्षयाऽसौ परश्च ।
यस्मादन्यत्परं नेत्यभिहितविषये तत्परोक्तेरयुक्तेरेवंत्वादित्यनूक्तिस्तत इति यदि वा व्याप्यमुक्तं तदस्तु ॥ ३१४ ॥

(अथ फलाधिकरणम् ॥ ८ ॥) सू०—फलमत उपपत्तेः ॥ ३. २. ३७. ॥

आराध्यः कर्मकाण्डस्थितनयनिवहस्थापितानां क्रियाणामध्यक्षो देवतानामनुपधिमहिमा मध्यकाण्डोदितानाम् ।
अत्राप्येतावतोक्तो भवभयचकितप्राप्त्युपास्त्येकलक्ष्यस्तत्तच्छास्त्रार्थयोग्यं दिशति फलमिति स्थाप्यतेऽथात्युदारः ॥ ३१५ ॥
कृष्यादेर्मर्दनादेरपि भवति फलं द्वारतो वाऽन्यथा वा धर्माणां साधनत्वं श्रुतिभिरवगतं दोषबाधोज्झिताभिः ।
तस्मादीशप्रसादात् फलमिति तु वचस्तत्प्रशंसेति चेन्न श्रौताराध्यप्रसादत्यजनकदनतोऽपूर्वक्लृप्तेरयोगात् ॥ ३१६ ॥
यद्यप्याराध्यमूलं फलमिति फलितं देवताधिक्रियायां कर्मापेक्षा तथोक्ता फलजननपरप्रेरणादौ तथाऽपि ।
साक्षित्वानादरत्वप्रभृतिपरगुणं प्रेक्ष्य तत्प्रीणनादौ शङ्कातङ्कैर्निरुद्धांस्त्वरयितुमधुना तादृशोदारतोक्तिः ॥ ३१७ ॥
सम्राजस्सानुकंपात् पितुरुचितविदस्साम्यभाजो वदान्यात् स्थाने विन्दन्ति पुत्रा नियतरुचिभिदायन्त्रितास्तंतमर्थम् ।
तत्र प्राप्यं स्वतो यद्विहतिरिह यतस्तत्प्रशान्तिश्च यस्माद्देयं यद्वा विशेषाद्गमनमपि यथालोकमत्रापि तत् स्यात् ॥ ३१८ ॥
शुद्धानन्दे तदित्थं शुभगुणजलधौ सत्यनित्यस्वदेहे देवीभूषायुधाद्यैरतिशयिनि कनद्भोगलीलाविभूतौ ।
शेषित्वाधारभावप्रभृतिबहुविधस्वास्तुसंबन्धदीप्ते दृष्टिस्स्वर्गापवर्गप्रसवितरि हरौ निर्निमेषा श्रुतिर्नः ॥ ३१९ ॥
पादे स्वप्नार्थहेतुस्तदयमिह सुषुप्त्याधृतिस्सुप्तगोप्ता मुग्धोद्बोधादिकर्ता त्वनघशुभगुणोऽचिद्भिरंशी स्वदेहैः ।
पारम्यस्यैकसीमा सकलफलद इत्युच्यते भक्तिभूम्ने सत्ये त्वेवं गुणादावथ परभजने रूपभेदादि चिन्त्यम् ॥ ३२० ॥

॥ इति तृतीयाध्यायस्य द्वितीयः पादः ॥ २ ॥ अथ तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥

तत्त्वज्ञानानुविद्धं हिततममनघं मोक्ष्यमाणस्य वक्तुं तत्त्वे निर्धूय तर्कज्वरजनितमहासन्निपातप्रलापान् ।
निष्पन्ने तत्त्वबोधे न किमपि विदुषा साध्यमित्युद्गृणद्भ्यो यावज्जीवानुवर्त्यं मुररिपुभजनं मुक्तिलाभाय वक्ति ॥
भीमाभ्यो यातनाभ्यः पितृपथगमनावर्तनादेश्च बिभ्यत्तृष्णां कृष्णामृताब्धौ परिणयति परां यावता तावदुक्तम् ।
इत्थं लब्धाधिकारः परमधिकुरुते साधने यत्र साङ्गे पादद्वन्द्वे परस्मिंस्तदिह बहुभिदाबर्बरं निर्ब्रवीति ॥ ३२२ ॥
एकस्मिन्नेव पादे निपुणनयकृता न द्वयोस्तर्कणं स्यात् भेदोऽभेदश्च नैको विषय इह भवेदन्यहानप्रसङ्गात् ।
तस्मादस्मिन्प्रकीर्णा नयविततिरिति प्रेक्षितग्रन्थचोद्ये वेद्यावच्छिन्नविद्यानियमकृदयमित्यैदमर्थ्यं समर्थ्यम् ॥ ३२३ ॥
आख्यावन्तं गुणानां निजगदुरुपसंहारतः पादमेतं विद्यैक्यार्थे तदस्मिन्नवदनतया भेदचिन्ता प्रसक्ता ।
इत्थं शुश्रूषुशङ्कामिह शिथिलयितुं भावितं भाष्यकारैस्तद्भेदाभेदमीमांसनमिति विषयस्तत्र चोक्तोऽनुवृत्तः ॥ ३२४ ॥
निस्सीमानन्दनाडिन्धमनिरुपधिकानन्दसम्पद्गुणौघे विद्याभेदैर्विभज्य प्रणिधिरिह यदि प्राप्तिरप्यंशतस्स्यात् ।
मैवं तैरेव धर्मैस्तदितरसहितैः पूर्णकामस्य पूर्णं प्राप्यं ब्रह्मैव नान्यत् किमपि फलमतस्तत्क्रतुन्यायसिद्धिः ॥ ३२५ ॥

(अथ सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥) सू०—सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ ३. ३. १. ॥

भेदश्शब्दान्तराद्यैर्विधिषु नियमितः कर्मकाण्डे द्वितीये संयोगाद्यैक्यतोऽन्यस्समुदयनियतात् सैव विद्यासु नीतिः ।

आदौ तेनैव शाखान्तरनयमुदितं चोदनादेरभेदाच्छ्रुत्यैवाक्षिप्य भूयः प्रतिसमधिततं भेदकान्यार्थतोक्त्या ॥ ३२६ ॥
शाखासु प्रक्रियाऽन्या श्रवणमपि पुनर्दृष्टमत्राविशेषं विद्याभेदस्ततस्स्यादिति न तदुभयं युक्तमध्येतृभेदात् ।
तेषामेवेति वाक्यात् क्वचिदुपजनिता भेदशङ्का त्वयुक्ता स्वाध्याये ब्रह्मविद्यापदमिह हि भवेत्तद्व्रतेनान्वयोक्तेः ॥ ३२७ ॥
रूपैक्यादैक्यसिद्धौ किमितरदुपसंहार्यमन्यो गुणश्चेद्भेदो न स्याद्विकल्प्यं तदिह किमफला तेन चिन्तेति चेन्न ।
वेद्याकारैक्यमैक्यं दिशति तदधिकं किंचिदाकृष्यतेऽङ्गं कर्मण्यप्येवमेव ह्युपहृतिविषयो भेदकांशातिरिक्तः ॥ ३२८ ॥

(अथ अन्यथात्वाधिकरणम् ॥ २ ॥) सू०—अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ३. ३. ६. ॥

प्राग्वच्छाखाविभेदेऽप्युपशमितभिदा तादृगुद्गीथविद्या स्यादेका चोदनाद्यैस्तदसदुभयधा रूपभेदोपलब्धेः ।
गाता गेयं च गेये सकलमसकलं चेति वैषम्यसिद्धौ शेषाभेदोऽप्यभेदं न गमयति भिदा त्वेकभेदेऽपि सिद्ध्येत् ॥
छन्दोगोद्गीथशब्दस्तदवयवपरः प्रक्रमादिप्रसिद्धेः कृत्स्नोद्गीथाभिधायी प्रकरणनियमाभावतो वाजिनां स्यात् ।
उद्गीथोक्तिश्च नैषामुपचरणवती गातरि प्रक्रमस्था तत्कर्त्रा साधनीये द्विषदुपशमने तत्फलत्वोक्त्यबाधात् ॥ ३३० ॥
यद्यप्यब्रह्मविद्या परपरिभवनाद्यैहिकार्थप्रयुक्ता न ग्राह्या मोक्षशास्त्रे तदपि समतया तत्परीक्षेति केचित् ।
काम्या विद्याऽप्यनिष्टव्यपनयनमुखैर्ब्रह्मविद्योपयुक्तैस्तत्तत्साध्यप्रभेदैर्भवति समुचितालोचनेत्याहुरन्ये ॥ ३३१ ॥
अज्ञातब्रह्मतत्त्वः कथमिव विमृशेत् कुत्रचिद्ब्रह्मदृष्टिं तस्मात्तत्तादृशीनां समुचितमगतेरत्र मीमांसनं स्यात् ।
आदध्युः कर्मणां च स्वफलवितरणे वीर्यवत्त्वातिरेकं ब्रह्मध्यानार्थकर्मातिशयजननतः प्रस्तुतापेक्षितं तत् ॥ ३३२ ॥

(अथ सर्वाभेदाधिकरणम् ॥ ३ ॥) सू०—सर्वाभेदादन्यत्रेमे ॥ ३. ३. १०. ॥

ज्यैष्ठ्यश्रैष्ठ्यादिसाम्ये क्वचन समधिकं भाति वासिष्ठ्यपूर्वं तेनेत्थं रूपभेदाद्बहुनिगमगता भिद्यतां प्राणविद्या ।
मैवं वागादितत्तद्गुणपरवशतावर्णनस्याविशेषाद्वागाद्यैस्स्वस्वधर्मोपचरणमकृतं तावता स्यान्न भेदः ॥ ३३३ ॥

(अथ आनन्दाद्यधिकरणम् ॥ ४ ॥) सू०—आनन्दादयः प्रधानस्य ॥ ३. ३. ११. ॥

नानाशब्दादिभेदादिति खलु भिदुरां वक्ष्यति ब्रह्मविद्यां रूपं विद्यान्तरस्य प्रकरणपठितान्नान्यदन्यत्र योज्यम् ।
तस्मात् सत्यत्वपूर्वास्तदितरगुणवत् स्युर्व्यवस्थापनीया मैवं ब्रह्मस्वरूपावगतिरिह यतस्तद्धि सर्वास्वपेक्ष्यम् ॥ ३३४ ॥
सत्यत्वं विश्वहेतौ बहुविधचिदचिद्विक्रियाजालहानेः ज्ञानत्वं ज्ञातृभावात् स्वरबहुलतया स्वप्रकाशत्वतश्च ।
त्रिध्येकाभिस्तु सर्वं प्रमितमिह परिच्छित्तिभिर्ब्रह्मणोऽन्यत्तस्यानन्त्यं वियोगात्तिसृभिरपि सदा निर्मलानन्दधाम्नः ॥ ३३५ ॥
उक्तं जन्मादिसूत्रे ननु निखिलजगद्धेतुता ब्रह्मलक्ष्म स्यात्तेनैव स्वरूपावगतिरिह मुधा सत्यतादीति चेन्न ।
हेतोरीशस्य हेत्वन्तरगतविविधावद्यवर्गप्रसङ्गे शङ्कारूढे क्रमेणेतरविभजनतस्तस्य साफल्यसिद्धेः ॥ ३३६ ॥
नन्वाध्यानं प्रियाद्यैरपि भवति शिरःपक्षपुच्छादिरूपैर्बाढं तत्र प्रियाद्यैस्तदवगतिरतस्ते तु सर्वानुवृत्ताः ।
पुच्छाद्यंशो निरंशे न भवति न च तद्दृष्टिरुत्कृष्टतत्त्वे तस्माच्चित्याग्निरूपक्रमवदिह कृतं रूपणं ब्रह्मणि स्यात् ॥ ३३७ ॥
आनन्दत्वप्रधानं कतिचिदिह विदुस्सौत्रमानन्दशब्दं धर्मानन्दाभिधानं तदुभयवचनं वेति पश्यन्ति केचित् ।
ज्ञानोक्तौ चैवमेतत्तदितरसमता यावता स्यान्न शङ्क्या तावद्धर्मानुवृत्तिर्बहुभजनपदे ब्रह्मणि स्थाप्यतेऽत्र ॥ ३३८ ॥

(अथ कार्याख्यानाधिकरणम् ॥ ५ ॥) सू०—कार्याख्यानादपूर्वम् ॥ ३. ३. १८. ॥

आचामेदित्यपूर्वाचमनमिह विधेः प्राणविद्यावतस्स्यान्मैवं स्मृत्यादिसिद्धे परमनुविहिता प्राणवासस्त्वदृष्टिः ।
भुञ्जीतेत्यादिनीत्या विधिरपि घटते प्राप्तधात्वर्थनिष्ठः प्रागुक्ता प्राणविद्या तदिदमवसरे चिन्तितं त्वङ्गमस्याः ॥ ३३९ ॥

आदावन्ते च वासःपरिधिरभिहितो मन्यतिश्चात्र दृष्ट्यै सा चाराध्यप्रियार्था स्तुतिरिह न भवेद्धत्यभावाभिनन्द्या ।
युक्तश्चापूर्वभावात् परिदधतिगिरा तद्विधानाभिसन्धिः प्राणश्चाराधनीयः परिहितवसनो युज्यते सद्भिरद्भिः ॥ ३४० ॥

(अथ समानाधिकरणम् ॥ ६ ॥) सू०—समान एवं चाभेदात् ॥ ३. ३. १९. ॥

शाखैक्येऽध्येतृभेदो न भवति न गुणः कश्चिदन्यो विधेयस्तस्मादुक्ताविशेषश्रवणमिह पुनः किं न विद्यां विभिन्द्यात् ।
मैवं यद्यप्यनूक्तिर्नतु गुणविधये कल्पते स्यात्तथाऽपि व्यक्त्यै सौकर्यतश्च व्यसनसमसनन्यायतस्त्वैक्यसिद्धेः ॥ ३४१ ॥

छन्दोगैर्वाजिभिश्च स्फुटमनुपठिता भाति शाण्डिल्यविद्या भेदाभेदावमर्शस्त्विह*किमिति न सन्दर्शितो भाष्यकारैः ।
तद्ब्रूमो यत्रयत्राधिकपरिपठनं तत्रतत्राधिकानामन्तर्भावादियुक्तावनधिकमधिकं वेति साधारणोक्तेः ॥ ३४२ ॥

स्थानद्वन्द्वे वशित्वप्रभृतिविरहिता वाजिभिस्तद्युता चाधीता शाण्डिल्यविद्या तदिह भिदुरता कल्पनीयेति चेन्न ।
आरण्योक्तं वशित्वाद्यपि खलु विततिस्सत्यसङ्कल्पतायाः साधीताग्ने रहस्येऽप्यधिकविरहतो नात्र विद्यैक्यबाधः ॥ ३४३ ॥

(अथ संबन्धाधिकरणम् ॥ ७ ॥) सू०—संबन्धादेवमन्यत्रापि ॥ ३. ३. २०. ॥

अक्ष्यादित्योपलक्ष्ये भगवति भजनं चोदनादेरभेदादेकं स्यात्तेन नाम्नोरनियतिरिति न स्थानतो रूपभेदात् ।
स्थानं तत्स्थत्वबुद्ध्यै ह्युपदिशति न चेत् स्यान्न रूपातिदेशस्तस्मादर्काक्षियोगादहरहमिति तन्नामनी स्थापनीये ॥ ३४४ ॥

(अथ संभृत्यधिकरणम् ॥ ८ ॥) सू०—संभृतिद्युव्याप्त्यपि चातः ॥ ३. ३. २३. ॥

संभृत्यादिर्गुणौघः प्रकरणपठनाभावतस्सर्वविद्यास्वन्वीयेतेति चेन्न क्वचिदगतिकतो लिङ्गतस्स्थापितत्वात् ।
अल्पस्थानासु विद्यास्वघटितवपुषस्स्वोचितस्थानवृत्तेर्द्युव्याप्तेरेकमन्त्रे सहपठनवशात् तत्समस्थानिनोऽन्ये ॥ ३४५ ॥

(अथ पुरुषविद्याधिकरणम् ॥ ९ ॥) सू०—पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॥ ३. ३. २४. ॥

आख्याद्यैक्यादभेदः पुरुषविषययोर्विद्ययोरित्ययुक्तं यज्ञाद्याकारक्लृप्तेरिह विषमतया रूपभेदप्रसिद्धेः ।
तादर्थ्यात्तैत्तिरीये परभजनफलं मुक्तिरत्राप्यनुक्ताच्छान्दोग्ये पूर्णमायुः फलमिति तु तयोर्भाति संयोगभेदः ॥ ३४६ ॥

स्पष्टे रूपादिभेदे हठसमुपनतो नामसाम्यादिमात्रात् पुंविद्यापूर्वपक्षो मृदुरिति विफलाऽधिक्रियैषेति चेन्न ।
अन्यैव न्यासविद्या प्रकरणपठिता तद्विधानप्रधानेत्यस्वातन्त्र्यादिसिद्ध्यै विभजनमनयोरित्यतीवार्थवत्त्वात् ॥ ३४७ ॥

यद्येवं यज्ञदृष्टिः परविदि पुरुषे चोद्यते सानुबन्धे यज्ञस्थानङ्गभूतं कथमिह विविधं कल्प्यते तत्रतत्र ।
तस्मात् प्रक्रान्तविद्यास्तुतिरियमुचितेत्याहुरेकेऽन्यथाऽन्ये तिष्ठत्वेतद्विधाऽपि प्रकृतसुघटता संप्रदायस्तु चिन्त्यः ॥ ३४८ ॥

(अथ वेधाद्यधिकरणम् ॥ १० ॥) सू०—वेधाद्यर्थभेदात् ॥ ३. ३. २५. ॥

युञ्येरन् ब्रह्मविद्यापरिसरपठिताः शं न इत्यादिमन्त्राः तादर्थ्यात् सर्वविद्यास्विति न तदुदिताधीतिशेषत्वलिङ्गात् ।
नो चेदन्येऽपि तद्वत् सविधपठनतस्सन्तु शुक्रं प्रविध्येत्येवंप्रायास्तदर्था न च घटत इदं लिङ्गतो दुर्बलत्वात् ॥ ३४९

(अथ हान्यधिकरणम् ॥ ११ ॥) सू०—हानौ तूपायन........गानवत्तदुक्तम् ॥ ३. ३. २६. ॥

शाखे द्वे मुक्तिभाजः क्वचन कथयतः पुण्यपापप्रहाणं ब्रूतेऽन्या तत्प्रवेशं प्रियतदितरयोर्दायसंक्रान्तिकाले ।
हानं चोपायनं च क्वचिदिति पृथगाम्नातसंपर्कसिद्धिर्वाक्यं शाखान्तरस्थं भवति हि विविधाकाङ्क्षया वाक्यशेषः ॥ ३५० ॥
इत्थं ब्रह्मज्ञकर्मत्यजनमितरसङ्क्रान्तिसंपृक्तमस्तु स्याच्चिन्तायां व्यवस्था पृथगनुपठनादित्यसत् क्लृप्तिदौस्स्थ्यात् ।
सर्वेषां मुक्तिभाजां द्वितयमपि यथोपास्ति साध्यं समानं तच्चिन्ताऽसौ तथा तन्महिमविद इति स्थापनीयोभयत्र ॥३५१॥
कर्त्रा तेनैव भोग्यं शुभमितरदिति स्थापितं कर्मकाण्डे तस्माद्ब्रह्मज्ञकर्म द्विषति सुहृदि वा नापतेदित्ययुक्तम् ।
विद्यामाहात्म्यतो यद्विगलति विदुषः कर्म तत्साध्यतुल्यं विद्वत्प्रद्वेषभक्त्योः फलमिति कथने वाक्यतात्पर्यसिद्धेः ॥

(अथ साम्परायाधिकरणम् ॥ १२ ॥) सू०—साम्पराये तर्तव्याभावात्तथा ह्यन्ये ॥ ३. ३. २७. ॥

कर्मोद्धूतिर्मुमुक्षोः क्वचिदुपनिषदि श्रूयते साम्पराये मार्गेऽन्यस्यां द्विधैवं शकलश इह तच्चिन्तनं चास्तु मा भूत् ।
न ह्युक्तं कर्मसाध्यं पथि फलमथ गत्यर्थदेहानुवृत्तिं मुक्त्यै विद्येव कुर्यादघहतिवचने पाठतोऽर्थो बली च ॥ ३५३ ॥
निश्शेषं कर्म नश्येदिह यदि विदुषस्स्थूलदेहान्तमात्रे विश्राम्येत्तस्य तावच्चिरमिति हि वचो नार्थवत्त्वं गतेस्स्यात् ।
गत्वा सम्पद्य चाविर्भवनमिति न संबोभवीतीत्ययुक्तं स्याद्धीसङ्कोचमात्रस्थितिकृदनुगतस्सूक्ष्मसंस्कारयोगः ॥ ३५४ ॥

(अथ अनियमाधिकरणम् ॥ १३ ॥) सू०—अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम् ॥ ३. ३. ३२. ॥

पन्थास्स्यादर्चिरादिः फलमिह निखिलब्रह्मविद्यासु मा वा प्रारभ्याधीतियोगात् प्रकरणनियता तस्य चिन्तेति चेन्न ।
सर्वासां तद्य इत्थं विदुरिति वचसाऽथात्र ये चेति चोक्त्या मार्गे साधारणेऽस्मिंस्तदनुसरणतस्तद्वदेवास्य चिन्ता ॥३५५॥
हेयोपादेयमार्गद्वितयमुपदिशन्मुक्तिदाता मुमुक्षोर्योगी यः कश्चनैतत्सरणियुगलविन्मुह्यते नेत्यगायत् ।
तस्मादस्मादृशाधीत्यविशदविशदीकर्तृवाक्यावमर्शात् ब्रह्मप्राप्त्यर्हकृत्स्नप्रणिहितघटितं मार्गचिन्ताविधानम् ॥ ३५६ ॥
हानादेरर्चिरादेरपि किमभिहितं चिन्तनं सूत्रकारैर्विद्याङ्गत्वादिसिद्ध्यै यदि भवतु तदाऽनन्तरे पाद एतत् ।
मैवं विद्याङ्गतायामपि भजनमिवेदं च धीत्वाविशेषात् कर्मादिभ्यो विभक्तं कथयितुमिह तत्सूत्रणं स्थानपाति ॥ ३५७ ॥

(अथ अक्षरध्यधिकरणम् ॥ १४ ॥) सू—अक्षरधियां........मौपसदवत्तदुक्तम् ॥ ३. ३. ३३. ॥

यस्यामस्थूलतादिः प्रपठित उचितं चिन्तनं तस्य तस्यां नान्यस्यां मानहानेर्न यदि नियमनं कस्य कुत्रेति चेन्न ।
हेतुत्वोन्नेयदोषव्यपनयनमिह ब्रह्मविद्यासु सर्वास्वानन्दाधिक्रियोक्तक्रमनियमितमित्यस्य सार्वत्रिकत्वात् ॥ ३५८ ॥
सत्यत्वाद्यैस्स्वरूपावगतिरभिहिता सर्वविद्यानुवृत्त्या भूयस्तत्तुल्यधर्मेष्वधिकरणमिदं स्याद्वृथैवेति चेन्न ।
कैश्चिज्ज्ञानस्वरूपे क्वचिदितरगतं किंचिदन्यन्निषेध्यं व्यावृत्त्या न स्वरूपावगतिरत इति प्रेक्षणस्यात्र रोधात् ॥ ३५९ ॥
व्यावर्त्यानन्त्यतस्तद्व्युदसनमपि हि स्यादनन्तं ततस्तच्चिन्ता किंचिज्ज्ञसाध्या जलधितरणवन्नोपदिश्येत मैवम् ।
तत्तत्सामान्यधर्मानुगमकबलिताशेषभेदोपदेशे तादृक्चिन्तोपपत्तेरनवममिति वा गृह्यतां संगृहीतिः ॥ ३६० ॥

(अथ अन्तरत्वाधिकरणम् ॥ १५ ॥) सू०—अन्तराभूत........ चेन्नोपदेशवत् ॥ ३. ३. ३५. ॥

सूत्रस्वारस्यलाभात् प्रथममसुभृतः पूर्वपक्षे निवेशः सिद्धान्ते ब्रह्मणश्चेत्यधिकरणगतिस्तोकशङ्कापनुत्त्यै ।

साक्षाद्ब्रह्मेति वाक्यद्वयमवमृशतामन्यशङ्कैव न स्यादित्यालोच्याथ भाष्ये परविषयतया पूर्वपक्षोऽप्युपात्तः ॥ ३६१ ॥
यत् साक्षादित्यमुष्मिन् श्रुतिशिरसि परं ब्रह्म वेद्यं यदेवेत्येतस्मिंश्चास्त्वथापि प्रतिवचनभिदा तत्र रूपं भिनत्ति ।
विद्याभित्प्रष्टृभेदोऽप्ययमिति यदि नानूद्य भूयोऽनुयोगात् पश्चादुक्तश्च दोषात्यय इह न भिदां सौति साधारणत्वात् ॥
सद्विद्यायां यदा हि प्रतिवचनभिदा प्रश्नभेदानुसाराद्विद्यैकत्वे विशिष्य प्रकटयति परां देवतामेव तत्र ।
तेनोष[स्ति]स्तः कहोलश्रुतमपि स च तत्संश्रुतं सङ्कलय्य ध्यायेतां ब्रह्म सर्वान्तरमिति फलवत्तत्र सब्रह्मचर्यम् ॥ ३६३ ॥

(अथ कामाद्यधिकरणम् ॥ १६ ॥) सू०—कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३. ३. ३८. ॥

आकाशं ताण्डिनस्तच्छयितमधिजगुर्वाजिनस्तेन विद्या भिद्येतात्रेति चेन्न द्विविध इह यतो ब्रह्मनिर्देश एषः ।
सर्वाधारत्वपूर्वैः परतरविषयस्सामगाकाशशब्दो विश्वेशाधारतोक्त्या सुषिरविषयताऽन्यत्र रूपं तु नान्यत् ॥ ३६४ ॥
छन्दोगानामुपास्यं प्रथितमिह गुणैरष्टभिर्ब्रह्म जुष्टं तच्चान्येषां वशित्वप्रभृतिघटितमित्यस्तु रूपस्य भेदः ।
मैवं यत्तद्वशित्वाद्यपि तदिह भिदा सत्यसङ्कल्पतायाः इत्यैकार्थ्यं निरूढं परमपि दहरोपासनं तद्वदूह्यम् ॥ ३६५ ॥
नन्वाकाशो गुणाद्यैः पर इति दहराधिक्रियायां पुरोक्तं तस्मान्नान्यार्थशङ्केत्यधिकरणमिदं नोज्जिहीतेति चेन्न ।
व्योमातीतं निमित्तं दहरमिदमुपादानमित्युद्गृणन्तः पूर्वं क्षिताः प्रसङ्गात् पुनरपि गमिताश्छिन्नमूलत्वमत्र ॥ ३६६ ॥

(अथ तन्निर्धारणानियमाधिकरणम् ॥ १७ ॥) सू०—तन्निर्धारणा........प्रतिबन्धः फलम् ॥ ३.३.४१. ॥

उद्गीथादौ क्रियाङ्गे भजनमपि भवेत् पर्णताद्युक्तनीत्या कर्माङ्गं तत्फलोक्तिस्त्विह नुतिरिति गोदोहनन्यायभग्नम् ।
स्वर्गादीनां फलत्वं क्रतुषु तदधिको ह्यत्र वीर्यातिरेकः पर्णत्वादौ न वाक्यं वदति करणतां कर्म चाहानुपास्तौ ॥ ३६७ ॥
उद्गीथे प्राणदृष्टौ क्रतुघटितफलादन्यदुक्तं फलं तत् स्वीकृत्य प्राग्विचारः स्थित इति विहतः पूर्वपक्षोऽत्र मैवम् ।
अत्रत्येऽनङ्गभावे स्थिरनिहितधियस्तत्र विद्यैक्यशङ्का त्यक्त्वाऽङ्गानङ्गभावौ पृथगपृथगिति स्याच्च पूर्वत्र चिन्ता ॥ ३६८ ॥

(अथ प्रदानाधिकरणम् ॥ १८ ॥) सू०—प्रदानवदेव तदुक्तम् ॥ ३. ३. ४२. ॥

कामानेतांश्च सत्यानिति वचनबलाद्धर्म्युपास्तेर्विभक्ता धर्मोपास्तिस्तदर्थं गुणिपरिगणनं तन्त्रतोऽस्त्वित्ययुक्तम् ।
तत्तद्वैशिष्ट्यभेदात् प्रतिविधिगुणिनश्चिन्तनावृत्तिरर्थ्या राजत्वाद्यैः पृथक्त्वाद्भवति हि हविषो दानमावृत्तमिन्द्रे ॥ ३६९ ॥
तत्तद्भोगप्रतीतेर्गुणघटितपरोपासना भोगहेतुर्मुक्तिश्च स्यात् क्रमादित्यसदगुणवचस्यान्यपर्याभिधानात् ।
शास्त्रेऽस्मिन्नासमाप्तेः क्व फलमभिहितं निर्गुणोपास्तिसाध्यं नोच्छास्त्रं च प्रकल्प्यं गुणनियमनतः ख्यातिमांश्चैष पादः ॥
प्रत्येकं मेलनाद्वा दहरगुणगणेऽप्यत्र संचिन्त्यमाने गुण्यावृत्त्यर्थलब्धेः कथमिह तदनावृत्तिशङ्केति चेन्न ।
बुद्ध्यारोहे गुणानां यदवधि गुणिनो रूपमर्थ्यं ततोऽन्यत् विद्यैकान्तं तदावृत्त्यनुघटिततदावृत्तिचिन्ताप्रवृत्तेः ॥ ३७१ ॥

(अथ लिङ्गभूयस्त्वाधिकरणम् ॥ १९ ॥) सू०—लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ३. ३. ४३. ॥

प्रक्रान्ता दह्रविद्या प्रकटमुपरि च ज्ञायते तैत्तिरीये तस्मादूर्ध्वानुवाकः प्रकृतविषयनिर्धारणार्थोऽस्तु मैवम् ।
तत्तद्विद्योदितैस्तैः परमिह पुरुषं प्रत्यभिज्ञाप्य शब्दैस्तस्मिन्नारायणत्वं वददधिकबलं प्रक्रियातो हि वाक्यम् ॥ ३७२ ॥
वाक्यैस्सर्वार्थितायां दहरभजनमप्यत्र भागीति सार्थस्तल्लिङ्गोपेतभागो न च बहुभिरलं योद्धुमेकं कृतार्थम् ।

नैकस्यास्योपकुर्यात् प्रकरणमलसं किंच सर्वोपजीव्ये तत्त्वे तात्पर्यमत्र स्फुटमिति वितथा तत्परित्यागक्लृप्तिः ॥ ३७३ ॥

आत्मैक्यं देवतैक्यं त्रिकसमधिकता तुल्यतैक्यं त्रयाणामन्यत्रैश्वर्यमित्याद्यनिपुणफणितीरान्द्रियन्ते न सन्तः ।
त्रय्यन्तैरेककण्ठैस्तदनुगुणमनुव्यासमुख्योक्तिभिश्च श्रीमन्नारायणो नः पतिरखिलतनुर्मुक्तिदो मुक्तभोग्यः ॥ ३७४ ॥

(अथ पूर्वविकल्पाधिकरणम् ॥ २० ॥ सू०—पूर्वविकल्पः........मानसवत् ॥ ३. ३. ४४. ॥

अङ्गं पूर्वप्रसक्तेष्टकचितसमुपस्थापितस्य क्रतोस्स्यात् बुद्ध्यात्माऽग्निर्मनश्चित्प्रभृतिरपि यथा मानसं द्वादशाहे ।
तत्कार्यस्यातिदेशादिति न सदुदितो ह्यत्र विद्यात्मकोऽङ्गी श्रुत्याद्यैरेव तस्मिन्नुपकृतिसमताबोधनार्थोऽतिदेशः ॥ ३७५ ॥

कल्प्यो ह्यत्र क्रियात्मा क्रतुरपि तदपि प्रागुपात्ताङ्गशक्त्या वाक्यस्थैश्चानुबन्धैरिह समुपनतो भाति विद्यामयस्तु ।
दूरस्थाकृष्टयोगात् स्ववचनपठिताकृष्टयोगो बलीयानप्राप्तेऽर्थे विधित्वं ह्यनुवदनसमेऽप्याश्रितं तद्वदत्र ॥ ३७६ ॥

(अथ शरीरेभावाधिकरणम् ॥ २१ ॥) सू०—एक आत्मनः शरीरे भावात् ॥ ३. ३. ५१. ॥

तत्कालाकारिणस्स्यादहमिति भजने कञ्चुकस्यात्मनो धीरासक्तेर्मामुपास्स्वेत्युदितवदिति चेन्नान्यथा संनिकर्षात् ।
शुद्धो ह्यात्माऽत्र साध्यः फलमतिरविनाभाविनी बोद्धृकृत्ये बुद्ध्यासन्नेऽन्तरङ्गे सति विधिनियता तत्क्रतुन्यायसिद्धिः ॥
कर्तुर्भोक्तृत्वमात्रं गणयितुमुचितं दृष्टभोगार्थयत्ने स्वर्गाद्यर्थेऽन्यदेहानुगतिरपि परं स्वाधिकारानुविद्धा ।
मुक्त्यर्थे प्राप्त्यवस्थाप्रणिधिकथनतस्तत्क्रतुन्यायवाचा चिन्त्यस्य प्राप्यतार्थो गमित इति कुतोऽतिप्रसङ्गादिशङ्का ॥ ३७८ ॥
विद्याभेदेषु वेद्याकृतिविषमतया यावदुक्ते विचिन्त्ये प्राप्यं सर्वोपपन्नं तत इह कथमप्राप्यचिन्तानिषेधः ।
तस्माद्बद्धस्य चिन्ताऽस्त्विति न कलुषितो नह्यहंशब्दमुख्यः प्राजापत्यात्तु वाक्यादकलुषदशया भावनीयत्वसिद्धिः ॥

(अथ अङ्गावबद्धाधिकरणम् ॥ २२ ॥) सू०—अङ्गावबद्धास्तु........प्रतिवेदम् ॥ ३. ३. ५३. ॥

उद्गीथादेर्विशेषे भजनविधिरसौ स्यात् स्वसान्निध्यगीतेर्मैवं सर्वाङ्गिभूतक्रतुमुखत इहाशेषसांनिध्यसिद्धेः ।
सामान्यं व्यक्त्यपेक्षक्रियमपि नियमादर्शने व्रीहितावच्छब्दश्चोद्गीथमात्रं वदति न तु भिदां छागनीतिस्तु नात्र ॥३८०॥

(अथ भूमज्यायस्त्वाधिकरणम् ॥ २३ ॥) सू०—भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ३. ३. ५५. ॥

व्यस्तो वैश्वानरात्मा प्रतिनियतफलोदाहृतेश्चिन्तनीयः कृत्स्नोपास्तौ फलोक्तिस्स्तुतिरिह यदि वा कृत्स्नरूपोऽप्युपास्यः ।
मैवं व्यस्तेषु दोषः पृथगनुकथितस्तत्फलोक्तिस्स्तुतिस्स्याद्दृष्टं ह्यष्टाकपालप्रभृतिषु च तथा तेन चिन्त्यस्समस्तः ॥ ३८१ ॥
सामस्त्यस्यैव योगे द्रढिमवति महावाक्यतात्पर्यवृत्त्या व्यस्तेष्वंशाननूद्य स्तुतिनियतनयादान्यपर्यं फलोक्तेः ।
नामादीनामुपास्तौ फलमवधितयाऽपेक्षितं भूमवाक्ये नाप्येवं प्रत्यवायश्श्रुत इति विषमोदाहृतिर्नार्थसिद्ध्यै ॥ ३८२ ॥

(अथ शब्दादिभेदाधिकरणम् ॥ २४ ॥) सू०—नानाशब्दादिभेदात् ॥ ३. ३. ५६. ॥

सर्वासु ब्रह्म वेद्यं फलमपि खलु तद्ब्रह्मविद्येति चाख्या ध्यानाद्युक्त्येकलक्ष्ये विधिरपि भजनं सर्वविद्यैक्यमित्थम् ।
तन्नाख्यारूपभेदात्तदुपहितविधौ तेन वैशिष्ट्यसिद्धेर्मिश्रं मध्वादिविद्याफलमिह च पृथक्काम्यविद्यासु चैवम् ॥ ३८३ ॥
नानाशब्दादिभेदादिति कथमवदत् सूत्रकृच्छब्दसाम्ये न ह्येते यागदानादय इव भिदुरा भक्तिविश्रान्तिसिद्धेः ।
सत्यं शब्दस्य भेदस्त्वयमुपचरितो रूपभेदद्रढिम्ना ज्ञानं यच्चाविधेयं करणमिह जगुस्तन्निरासेऽभिसन्धिः ॥ ३८४ ॥

यद्वा शब्दादिभेदादिति तु कथयता सूत्रकारेण सम्यङ् न्यासोपासे विभक्ते यजनहवनवच्छब्दभेदादभाक्तात् ।
आख्यारूपादिभेदश्श्रुत इतरसमः किंच भिन्नोऽधिकारश्शीघ्रप्राप्त्यादिभिस्स्याज्जगुरिति च मधूपासनादौ व्यवस्थाम् ॥

(अथ विकल्पाधिकरणम् ॥ २५ ॥) सू०—विकल्पोऽविशिष्टफलत्वात् ॥ ३. ३. ५७. ॥

ज्योतिष्टोमाग्निहोत्रप्रभृतिवदधिकानन्दसिद्ध्यै समुच्चित्यैतास्स्युर्ब्रह्मविद्या न च भजनविधिः कश्चिदेकं प्रति स्यात् ।
कर्तुं ताः कालभेदे क्षममिति न मिथो वासनास्थैर्यबाधात् संपूर्णब्रह्मलब्ध्यै पृथगिह च विधिः प्रायणान्ते समाधौ ॥
रूपादीनां विशेषैर्ननु परभजनं नैकरूपं विभक्तं सामग्रीभेदतस्तत्फलमपि विषमं सम्मतं न्यायतस्स्यात् ।
न स्यात् सर्वासु विद्यास्वपि हि फलतया वक्ष्यते भोगसाम्यं प्राप्यैक्यं च प्रसिद्धं बहुसरणिजुषां लोकतो वेदतश्च ॥

(अथ यथाश्रयभावाधिकरणम् ॥ २६ ॥) सू०—अङ्गेषु यथाश्रयभावः ॥ ३. ३. ५९. ॥

तत्तद्विद्यासु तादृक्फलतरतमतां वारयित्वा प्रसङ्गात् प्रागुक्तोद्गीथविद्याफलमथ पुनराक्षिप्य गाढीकरोति ।
माभूदुक्तं स्ववाक्ये फलमिह तु न सा पर्णमय्यादिनीतिः स्पष्टा खल्वत्र विद्याफलकरणतया वर्तमानोक्तितोऽपि ॥
तादर्थ्यं नात्र कर्मश्रुतिरवगमयेदाश्रयालम्बमात्राद्विद्याहानौ च युक्तं प्रतिविधिवचनं तत्फलार्थप्रसङ्गे ।
तारे सोपासनेऽस्तु स्तवनमनुगमात्तावता सा तु नाङ्गं प्राग्वक्तव्यस्य हित्वा वच इदमुपरि स्थापनीयप्रसक्त्यै ॥ ३८९ ॥
विद्यैक्योद्गीथविद्याद्वितयविभजनप्राणविद्यैकभावास्सर्वास्वानन्दतादेर्गुणिवदनुगतिः प्राणवासस्त्वदृष्टिः ।
शाण्डिल्यैक्यं विभज्य स्थितिरहरहमोस्संभृतेस्स्थानसीमा पुंविद्याया विभेदोऽध्ययननियतता शं न इत्यादिकानाम् ॥
हानाद्यन्योन्ययोगस्तदुचितसमयो देवयानादिसाम्यं सर्वत्रास्थूलतादिव्यतिहरणमथानेकशिष्यश्रुतानाम् ।
दह्रोपास्त्येकभावो गुणफलविधिरुद्गीथमाश्रित्य दृष्टौ गुण्यावृत्तिर्गुणार्था निखिलपरतरोपास्तिवेद्यावसायः ॥ ३९१ ॥
विद्यारूपा मनश्चित्प्रभृतय उचितज्ञानरूपक्रतुस्थाः क्षेत्री शुद्धोऽनुचिन्त्यः क्रतुगुणसकलोद्गीथपूर्वेषु दृष्टिः ।
सामस्त्येनैव वैश्वानरभजनमथानेकविद्योपपत्तिर्मोक्षार्थानां विकल्पः पुनरनियतिरुद्गीथदृष्टेरिहोचे ॥ ३९२ ॥

॥ इति तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ अथ तृतीयाध्यायस्य चतुर्थः पादः ॥ ४ ॥

कर्म प्राक्चिन्तयित्वा ननु परममथ ब्रह्म जिज्ञास्यमुक्तं पादं विद्याङ्गतोक्तिः पुनरिह वितथाऽनेकधा त्याज्यतोक्तेः ।
मैवं कर्मैव तत्तद्गुणयुतविनियुक्त्यन्यभावेन भिन्नं विद्यानिष्पत्तिहेतुः किमपि च सुकृतं स्यान्निवृत्तैकसंज्ञम् ॥ ३९३ ॥
त्यागः काम्यक्रियाणां क्वचन परविदः क्वाप्यनर्हः क्रियाणां स्वैकाधीनत्वबुद्धेः क्वचिदनुपधिकस्वार्थबुद्धेश्च गीतः ।
अत्राहिंसादिकानामघविहतिकृतां सर्वसाधारणानां ब्रूते वर्णाश्रमादिप्रतिनियतिमतामप्युपास्त्यङ्गभावम् ॥ ३९४ ॥

(अथ पुरुषार्थाधिकरणम् ॥ १ ॥) सू०—पुरुषार्थोऽतश्शब्दादिति बादरायणः ॥ ३. ४. १. ॥

कर्ताऽऽत्मा कर्मणां यस्तदधिकमिह न ब्रह्म तस्मान्मखादौ तद्बुद्ध्यैवोपयुक्तास्स्युरुपनिषद इत्यर्धमीमांसकोक्तौ ।
जीवान्यब्रह्मचिन्तात्मकभजनविधौ कर्मणामङ्गभावं प्राह क्षिप्तान्यलिङ्गः कलुषशमनतस्सत्त्वसंवर्धकानाम् ॥ ३९५ ॥
पादैरत्रैवमेकादशभिरपि परं ब्रह्म वेद्यं निरूढं भूयः किं क्षुद्रलिङ्गैर्गगनलिपिनिभैः क्षोभ्यते ब्रह्मविद्या ।
सत्यं तत्तादृगल्पश्रुतमतिकलहत्रासितच्छात्रडिम्भस्तोमक्षेमाय जैमिन्यहृदयकथितं पक्षमुत्क्षिप्य हन्ति ॥ ३९६ ॥
कुर्वन्नेवेति वाक्यं परविदि नियताचारतोक्तिस्सहत्वेऽन्वारम्भो धीक्रियाभ्यामपि न नियमयेदङ्गतामङ्गितां वा ।

विद्यापूर्वं क्रियाणां करणमनुवदद्वाक्यमन्यार्थमुक्तं न ह्येतद्ब्रह्मविद्यामनुवदति न चोद्गीथविद्याक्रियाङ्गम् ॥ ३९७ ॥
स्वाध्यायप्राप्तये ह्यध्ययनमुदितमाधानवन्नोत्तराङ्गं विद्याङ्गं चार्थबोधो भवतु यदधिका सा स्वरूपैः फलैश्च ।
नित्यात्मज्ञानमात्रं क्रतुषु नियमतोऽपेक्षितं नान्यविद्या काम्यत्यागस्सविद्ये कथमिह भविता साऽपि यद्यङ्गमेषाम् ॥ ३९८ ॥
नाङ्गं विद्या मखादेर्न हि तदधिकृतेष्वेव तामामनामः स्यात्तत्कर्मणां सेत्यपि न बहुविधाद्वैपरीत्योपदेशात् ।
जाबालैरूर्ध्वरेतोविधिरपि पठितोऽनूद्यतेऽन्यैश्च तस्मात् प्राप्तिर्ग्राह्याऽन्यथाऽपि स्वयमिह तु विधिस्तन्निषेधस्सरागे ॥

(अथ स्तुतिमात्राधिकरणम् ॥ २ ॥) सू०—स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ ३. ४. २१. ॥

जुह्वादिस्तोत्रनीत्या भजतु रसतमाद्युक्तिरङ्गस्तुतित्वं मैवं तत्तद्विधानप्रकरणरहितापूर्वनिर्देशयुक्तेः ।
तत्तद्दृष्टेर्विधानं विविधमिह समालक्षि चैतत्समीपे तेनानन्यार्थशिष्टे फलवति च विधिर्युज्यते कल्प्यमानः ॥ ४०० ॥
किंच प्राप्तेरभावान्न तदनुवदनं नाधिरोप्य स्तुतिर्वा युक्ता विध्येकवाक्ये गतिरियमगतेस्साऽत्र नासक्तिहानेः ।
उत्कर्षः कल्प्यते चेदगतिकविषये तत् प्रसह्य प्रसह्यं मध्ये विद्याविधीनां वचनमिदमिति स्यात्तु विध्यर्थमेतत् ॥
विध्यर्थत्वेऽपि युक्ता स्तुतिरियमसतः कीर्तनादित्ययुक्तं दृष्ट्युद्देशेऽतिचारादथ च विशयनं स्यादिति त्वर्भकोक्तिः ।
नित्येऽस्मिन्नप्रमाणं प्रसजति निगमो युक्तिवार्यत्वपक्षे त्वित्थंभावे बुभुत्स्ये वच इह फलवद्दृष्टिविध्यर्थमेव ॥ ४०२ ॥

(अथ पारिप्लवार्थाधिकरणम् ॥ ३ ॥) सू०—पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ ३. ४. २३. ॥

विद्यास्वाख्यानभेदा विधिमहिमभृतास्सन्तु पारिप्लवार्था न स्युर्विद्याविधानैः प्रकरणपठितैरेकवाक्यत्वदृष्टेः ।
मन्वाद्याख्यानमात्रं भवति च कथितं तत्र पारिप्लवार्थं तेनाकाङ्क्षानिवृत्तौ न तदधिकपराख्यानतादर्थ्यक्लृप्तिः ॥ ४०३ ॥

(अथ अग्नीन्धनाद्यधिकरणम् ॥ ४ ॥) सू०—अत एव चाग्नीन्धनाद्यनपेक्षा ॥ ३. ४. २५. ॥

यज्ञादेरङ्गभावान्न तदनधिकृतेष्वङ्गिनोऽधिक्रिया स्याद्धिचैवं नोर्ध्वरेतस्स्विति न बहुविधस्वाश्रमाङ्गार्हतोक्तेः ।
विद्यायोगश्चतुर्णां विधिरपि च समश्श्रूयते स्मर्यते च प्रायेणौचित्यभूम्ना मुनिभिरभिहितं क्वापि मोक्षाश्रमत्वम् ॥ ४०४ ॥

(अथ सर्वापेक्षाधिकरणम् ॥ ५ ॥) सू०—सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ ३. ४. २६. ॥

त्यक्ते यज्ञादिधर्मे परभजनविधेरूर्ध्वरेतस्सु द[ष्ट्या]ष्टा विद्या तेनानपेक्षा गृहवति च भवेदित्यनालोचितोक्तिः ।
यज्ञेनेत्यादिकाभिश्श्रुतिभिरवगता ह्यस्य सा तत्प्रसाध्या जिज्ञासार्थत्ववादो जिगमिषति पदेत्यादिनीत्या निवर्त्यः ॥ ४०५ ॥
नन्विच्छार्थत्वहानिर्जिगमिषति पदेत्यादिके गत्यभावाच्छ्रुत्युक्तेऽस्मिंस्तथा नेत्यसदिह च यतो गत्यभावस्समानः ।
इच्छा स्याद्धीविशेषात्तदनुपजनने कर्मभिस्सा न साध्या जिज्ञासां प्राप्तुमिच्छोर्न च न भवति तज्ज्ञानमिष्टं पुरैव ॥
नन्वत्रेच्छानुवृत्तिं प्रति विहितमिदं कर्म योज्यं ततः किं नेच्छार्थं धीविशेषप्रजननमुदितं तावता वारितं स्यात् ।
ज्ञानार्थं कर्मविध्यन्तरमपि विविधं नापलापक्षमं ते निद्ध्यानन्यायतोऽतस्त्वनुवदति विदेरिष्टतां सन्प्रयोगः ॥ ४०७ ॥

(अथ शमदमाद्यधिकरणम् ॥ ६ ॥) सू०—शमदमाद्युपेतः........अवश्यानुष्ठेयत्वात् ॥ ३. ४. २७. ॥

यज्ञादिव्यापृतत्वादनिभृतकरणे सर्वकालं गृहस्थे शान्त्यादीनामयोगात्तदितरनियतास्ते गुणा इत्ययुक्तम् ।
प्रव्रज्यादिस्थितानामपि तदुपधिकानेकधर्मप्रवृत्तेस्तत्सर्वं सह्यते चेत् सह तदपि फलाद्युज्झनं चात्र तुल्यम् ॥ ४०८ ॥

प्रज्ञातस्वापराधाः प्रभुमनुतपने लोकसिद्धैरुपायैरात्मार्हैरर्चयन्तः क्रमशमितरुषस्तस्य सेवां लभन्ते ।
इत्थं नः शास्त्रसिद्धैरिदमनिदमिति स्वाधिकारे विभक्तैर्निष्प्रत्यूहः प्रसादो निरुपधिसुहृदः श्रीधरस्याधिगम्यः ॥ ४०९ ॥

(अथ सर्वान्नानुमत्यधिकरणम् ॥ ७ ॥) सू०—सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ ३. ४. २८. ॥

आहारस्य व्यवस्था न भवति वचनात् प्राणविद्याधिकर्तुः सामान्यस्थो निषेधो बलवति हि विधौ संकुचेदित्ययुक्तम् ।
अङ्गत्वेनाविधेस्स्यादनुमतिवचनं प्राणभङ्गप्रसङ्गे पश्यैतत्प्राणनिष्ठादधिकमहिमनि ब्रह्मनिष्ठेऽप्युपस्तौ ॥ ४१० ॥

(अथ विहितत्वाधिकरणम् ॥ ८ ॥) सू०—विहितत्वाच्चाश्रमकर्मापि ॥ ३. ४. ३२. ॥

यज्ञादेः कर्मणो हि श्रुतिभिरभिदधे ब्रह्मविद्याङ्गभावस्तस्मादब्रह्मनिष्ठे तदननुसरणात् स्वैरितैवास्तु मैवम् ।
नित्यत्वस्यापि सिद्धेस्तदुचितविनियुक्त्यन्यभावानुसारात्तन्त्रं काम्याग्निहोत्रादिवदिह परविन्नित्यवर्गेऽपि योज्यम् ॥ ४११ ॥

(अथ विधुराधिकरणम् ॥ ९ ॥) सू०—अन्तरा चापि तु तद्दृष्टेः ॥ ३. ४. ३६. ॥

दारालाभे विरक्तेर्मृदिमनि च भवेदन्तरेणाश्रमान्यस्तस्मिन्निश्शेषधर्मत्यजि भवतु कथं ब्रह्मविद्येति चेन्न ।
सामान्यैर्वर्णधर्मैर्गुणनियतियुतैस्सा हि तत्रापि साङ्गा भीष्मादौ दृष्टमेतद्भवति तु वृषले गत्यभावादभावः ॥ ४१२ ॥

(अथ तद्भूताधिकरणम् ॥ १० ॥) सू०—तद्भूतस्य तु........तद्रूपाभावेभ्यः ॥ ३. ४. ४०. ॥

आरूढो नैष्ठिकादित्रयमथ पतितस्तत्परावर्तनायस्तत्रापि ब्रह्मविद्या भवतु सहकृता त[दृशा] त्तदर्हैस्स्वधर्मैः ।
मैवं यद्यप्यभीच्छन्त्युपपतनमिदं शोधनं चास्त्यनेकं सर्वार्हं कीर्तनाद्यं तदपि तदुचितो नैष तादृङ्निषेधात् ॥ ४१३ ॥
प्रायश्चित्तं वदन्ति ह्युपपतनमहापातयोर्ब्रह्मयोगं प्राप्ते पाते प्रमादाद्विदधति मुनयो योगिनां योगमेव ।
तस्मादारूढपातेऽप्यधिकृतिरिति नाचोदनीयं हि शास्त्रं यावज्जीवं तु तन्निष्कृतिरिति नियमस्सूत्रकाराद्यभीष्टः ॥ ४१४ ॥
यो बालं हन्ति यः स्त्रीं शरणमुपगतं यश्च यो वा कृतघ्नः प्रायश्चित्तैर्विशुद्धान्यपि जगदुरिमान् साधुसंस्पृष्टयनर्हान् ।
स्मृत्याचारानुसारादिह च गतिरियं दर्शिता सूत्रकारैः शास्त्रं नश्शासनीयं यदि भवति तदा संप्लुतो धर्मसेतुः ॥
ब्रह्मांशत्वे समाने गुणविषमतया शुद्ध्यशुद्धिस्वभावैर्देहैर्योगादनुज्ञापरिहरणमपि प्रेक्षणस्पर्शनादेः ।
इत्येवं सूत्रितं प्राक् पुनरिह विविधालेपकक्षोभशान्त्यै सम्यग्ज्ञातात्मनोऽपि स्वतनुसमुचिताचारतः प्रत्यबोधि ॥ ४१६ ॥

(अथ स्वाम्यधिकरणम् ॥ ११ ॥) सू०—स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ३. ४. ४४. ॥

उद्गीथादावुपास्तिर्भवति हि फलिना यज्वनैवात्र शक्या तस्मात्तत्कर्तृकाऽसाविति यदि न परिक्रीतकर्माश्रयत्वात् ।
ऋत्विक्साध्या यथाऽन्ये गुणफलविधयोऽनूद्यते चैवमेषा शक्यत्वं नाप्युपाधिर्विधिबलनियतेः स्वामिभृत्यक्रमोऽत्र ॥

(अथ सहकार्यन्तरविध्यधिकरणम् ॥ १२ ॥) सू०—सहकार्यन्तरविधिः........विध्यादिवत् ॥ ३. ४. ४६. ॥

मन्तव्यत्वे श्रुते सत्यथ मुनिरिति वागस्तु तस्यानुवादः कश्चिन्न ह्यत्र दृष्टो विधिरिति न पुरा[रः] पण्डितत्वस्य लब्धेः ।
ऊहापोहार्हता हि श्रवणमननतोऽनन्तरं पण्डितत्वं मौनख्यातिः प्रकृष्टे मनन इति विभौ धारणाद्युक्तिरेषा ॥ ४१८ ॥

(अथ अनाविष्काराधिकरणम् ॥ १३ ॥) सू०—अनाविष्कुर्वन्नन्वयात् ॥ ३. ४. ४९. ॥

शिष्टं बाल्येन तिष्ठासनमपि विदुषो बालकृत्यं तदस्तु प्राप्तुं बालस्य भावो न तु सुशक इति स्वैरिताऽस्येति चेन्न ।
दुश्चारित्रादमुं नाविरत इति वचस्सन्निरुन्धे ह्यतोऽस्मिन्माहात्म्यं स्वं निगूहेदिति मुनिविहिते बाल्यविध्याशयस्स्यात् ॥

(अथ ऐहिकाधिकरणम् ॥ १४ ॥) सू०—ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ३. ४. ५०. ॥
भोगार्थोपासनानां स्वजनकसुकृतैस्तत्क्षणादुद्भवस्स्यात् स्वर्गादिस्तत्र देहे न घटत इह तु स्वान्तशुद्ध्योपपत्तिः ।
स्नानप्रायत्यनीतिस्तत इति न पुरा विघ्नसम्भावनोक्तेः कारीर्यादौ तदर्हैस्सगुणविरचितेऽप्यस्ति विघ्नः कदाचित् ॥ ४२० ॥

(अथ मुक्तिफलाधिकरणम् ॥ १५ ॥) सू०—एवं मुक्तिफलानियमः........धृतेः ॥ ३. ४. ५१. ॥
अस्त्वन्यत्रान्तरायः प्रबलतममिदं सात्त्विकत्यागयुक्तं कर्म प्रोक्तं निवृत्त्याह्वयमिति सपदि ब्रह्मविद्यां विदध्यात् ।
मैवं तस्माद्बलीयान्यदि भवति परब्रह्मभक्तापराधस्तच्छान्तौ तत्प्रसूतिस्स यदि न झटिति स्यात् परोपास्तिलाभः ॥ ४२१ ॥
विद्यार्थत्वं क्रियाणां व्यभिचरणवशान्नेति शङ्कापनुत्यै प्रत्यूहानां च तूर्णं प्रशमनमुचितं सर्वदेति प्रसिद्ध्यै ।
निष्प्रत्यूहस्य सद्यः फलमिति च सतां तोषहेतोरमुष्मिन्पादान्ते न्यासिषातामनियमविषयौ शास्त्रकर्त्राऽधिकारौ ॥ ४२२ ॥
प्रत्यूहस्य प्रसङ्गः क्षम इति परवित्कर्मणां तद्विधूत्यै भोगार्थोपास्तिहेतुष्वयमनुकथितः किं मुधाऽत्रेति चेन्न ।
काम्ये निर्विघ्नबुद्ध्या पतति मतिरतस्तत्र वैराग्यभूम्ने तत्प्रत्यूहप्रसक्तिर्भवति फलवती स्याच्च विद्यार्थकाम्यम् ॥ ४२३ ॥
विद्या कर्माङ्गिका स्याद्रसतममुखधीश्चोदिता प्राप्त्यभावादाख्यानानां च विद्याविधिसविधजुषां तद्विधानार्थतैव ।
विद्या साङ्गोर्ध्वरेतस्स्वपि गृहवति सा यज्ञदानाद्यपेक्षा शान्त्याद्यर्हो गृहस्थोऽप्यविपदि विदुषोऽप्यन्नशुद्ध्यैव सिद्धिः ॥
एकं विद्याश्रमार्थं विधुरमवि[पि]युतं विद्ययाऽऽहुरच्युतं न ऋत्वङ्गे दृष्टिऋत्विक्कृतिरथ मुनिता चोदिता ध्यानसिद्ध्यै ।
बाल्यं शक्त्यादिगुप्तिर्बलवदभिहतैः कर्मभिर्नान्यविद्या तद्वन्मुक्त्यर्थविद्या स्वजनकसुकृतैरित्युवाचात्र पादे ॥ ४२५ ॥
वाक्यार्थज्ञानमात्रं कतिचन कुदृशो मुक्त्युपायं गृणन्ति ज्ञानं कर्मेति युग्मं करणमिति समुच्चित्य मन्यन्त एके ।
कर्मप्राधान्यमन्ये निजगदुरपरे मुक्तिमिच्छन्त्यसाध्यां सर्वे तेऽप्यत्र कर्माङ्गकभजनविधिस्थापनोक्त्या निरस्ताः ॥ ४२६ ॥
यद्दुःखं वर्तते तत्क्षणभिदुरतया न स्वयत्नोपरोध्यं नातीतार्थं च यत्नो न च सुपरिहरं भाविहेतौ समग्रे ।
दुःखात्यन्तोपरोधे करणविधिरतो व्यर्थ इत्यर्धरम्यं प्रायश्चित्त्या कृतानां परमकरणतो दुःखसामग्र्यपोहात् ॥ ४२७ ॥
राजद्विष्टादि सर्पाद्यपि परिहरसि च्छत्रपूर्वं बिभर्षि प्रायश्चित्ताप्रवृत्तौ फलति दुरितमित्येवमीहामिहेच्छ ।
उत्प्रेक्षारूढभाव्यापजयशमनतः स्वोक्तिसाफल्यमिच्छन् पश्यंश्चाबालतिर्यग्भयचकितगतिं जोषमित्थं जुषस्व ॥ ४२८ ॥
साध्यं वा साधनं वा स्वविहतविपथैर्दुर्निरूपं वदन्तस्तद्वादे किं प्रवृत्ताः किमिति च विदधत्यन्वहं भोजनादीन् ।
मुक्तेर्नित्यत्वसिद्ध्या भजनमफलमित्यप्यसत् प्रागसिद्धेः साङ्ख्यास्तत्रानुयोज्यास्सकरणदशया नित्यमुक्तिं गृणन्तः ॥
मोक्षाभावे मुधा स्यात् सपरिकरमिदं साधनं चिन्त्यमानं मुक्तिश्चेद्भ्रान्तिसिद्धा श्रम इह भविता यावदात्मस्वरूपम् ।
क्षेत्रज्ञं नित्यमुक्तं कथयितुरफलः साधनाध्याय इत्थं प्रध्वंसात्मा हि मुक्तिर्नयविदभिमता सा तु भावात्मिका नः ॥
सन्तत्यात्मा कपालप्रभृतिबहुविधावस्थयाऽन्यत्र नाशो धीसङ्कोचप्रणाशो विकसनमतथाभूतमात्रागमात्स्यात् ।
मन्यन्तेऽन्ये तु धारावहनमतिनयात् सन्ततिर्मुक्तबुद्धेस्सामग्री चेश्वरेच्छाप्रभृतिसमुदयस्स्यादनावृत्तिरेवम् ॥ ४३१ ॥

॥ समाप्तस्तृतीयाध्यायः ॥ ३ ॥

———

॥ अथ चतुर्थाध्यायस्य प्रथमः पादः ॥ १ ॥

इत्युत्पत्तिक्रमेण प्रथममभिहितो मुक्त्युपायस्सहाङ्गैस्तत्साध्यं सूत्रकारः फलमथ विदुषः पर्वभेदैर्व्यनक्ति ।
स्थूले देहेऽस्य सिद्ध्येद्यदिह वदति तत् पादयुग्मेन पूर्वं निष्क्रान्तस्याथ यत्स्यात् परिगणयति तत् पादयुग्मान्तरेण ॥
सूक्ता प्रागेव विद्या किमिति पुनरिमां वक्ति यद्यस्ति शेषं ब्रूतामेतच्च पूर्वं न हि तदिह फले सङ्घटेतेति चेन्न ।
मुक्तेरन्यैरसिद्धिं प्रकृततदविनाभावमासन्नसिद्धिं मुक्तावस्थासमं च स्थिरभजनरसं व्यङ्क्तुमत्रानुबन्धः ॥ ४३३ ॥

(अथ आवृत्त्यधिकरणम् ॥ १ ॥) सू०—आवृत्तिरसकृदुपदेशात् ॥ ४. १. १. ॥

शुद्धैरुत्कृष्टधर्मैस्सदनपचरणे ब्रह्मविद्या भवित्रीत्युक्तं पूर्वाधिकारे विमृशति तु परं तत्स्वरूपं यथावत् ।
प्रत्यक्षं वा स्मृतिर्वा सकृदिदमसकृद्वेति नोक्तं पुरस्ताद्यावज्जीवानुवृत्तिप्रभृति च तदिहापौनरुक्त्यं सुबोधम् ॥ ४३४ ॥
ज्ञानं मुक्तेरुपायः श्रुतिभिरभिहितं तस्य सङ्ख्या त्वनुक्ता सौकर्यं स्यात्सकृत्त्वे स्वत इह च भवेच्चारितार्थ्यं विधीनाम् ।
सम्यक्त्वात्तद् ध्रुवत्वं न पुनरनुगमात् प्रोक्तमित्यप्यसारं सामान्योक्तेर्विशेषे सति पशुनयतस्तत्र विश्रान्तिसिद्धेः ॥ ४३५ ॥
किं चाग्नेय्यादिनीत्या विदिरिह वदति ध्यानशब्दार्थमेव ध्याने चोपासनोक्तिः परभजनतया वक्ति सेवात्मकत्वम् ।
ऐकार्थ्यं विद्युपास्योर्व्यतिकरिततया श्रूयते च प्रयोगः कार्ये हेतौ च भक्तेः क्वचिदुपचरितो भक्तिभेदत्ववादः ॥
योगोद्युक्तेषु यस्स्यात् स्ववरणविषयस्तेन लभ्यः परात्मा ग्राह्यत्वं च प्रियत्वात्तदपि हि गुणतो भक्तिरेवं श्रुतैव ।
सा च प्रीत्यात्मिका धीः क्वचिदतिशयिते स्मृत्यबाधोऽप्यतस्स्यात् प्रोक्ता चैषा ध्रुवानुस्मृतिरनुवहनात्तैलधाराक्रमेण ॥
रागादादौ प्रवृत्तिश्श्रवणमननयोर्ध्यानमेकं विधेयं तत्र द्रष्टव्यशब्दो विशदतमतया वक्ति वैशिष्ट्यमात्रम् ।
शब्दोत्थं दर्शनं ये विषयमकथयन् वेदनोक्तेरमीषां व्याघातादिप्रपञ्चस्स्वयमिह निपुणैस्सूक्ष्ममन्वीक्षणीयः ॥ ४३८ ॥
ध्याने वैशद्यमात्रादुपचरणमिदं-दृष्टिशब्दप्रवृत्तिस्तुल्यं तत्त्वन्मतेऽपि ह्यभिलपति धियं चाक्षुषीं दृष्टिशब्दः ।
घ्रातृस्प्रष्ट्रादिवद्दृष्ट्यभिवदनमिदं चक्षुषा भानशून्ये गौणं तत्तुल्यभावे सति बहुनयवानस्मदीयस्तु पक्षः ॥ ४३९ ॥
न द्वारद्वारिक्लृप्तिः कथमपि घटते विश्रमश्चेद्विशेषे सामान्यात्मा विशेषैर्लघु च न गुरुभिः कर्तुरैक्ये विकल्पम् ।
अर्थैक्ये दर्शनोक्त्या स्मृतिरुपचरिता युज्यते स्पष्ट्यसिद्ध्यै स्मृत्युक्त्या दर्शनस्योपचरणमसदित्यन्यदेतत्फलान्नः ॥ ४४० ॥
कृच्छ्रादौ शक्तिहीनो दृढपरितपनस्संयमार्हश्च कुर्यात् सर्वार्थो केशवानुस्मृतिमिति घटते तद्विकल्पो यथार्हम् ।
सामान्यात् सर्वदोषेष्वियमुपकुरुते सर्वनैमित्तिकानां मुक्तेरप्यत्र मूलं मुनिरमनुत तां तादृशध्यानरूपाम् ॥ ४४१ ॥
नन्वेवं ये मुकुन्दं शरणमुपगता वर्जिता ध्यानयोगैस्ते चातिक्रम्य मृत्युं यमिन इव परं धाम यान्तीत्युशन्ति ।
सत्यं तेऽपीति शब्दान्नियतविषययोर्गौरवे लाघवे च प्राप्तार्थं ध्यानशास्त्रं प्रणिधिसहदशायोगिभिर्योगविद्भिः ॥ ४४२ ॥
धर्मो वर्णादियोग्यः कलुषशमनतस्सत्त्ववृद्ध्योपकारी भक्तेस्तद्वत् प्रपत्तिस्त्वगतिकसमयेष्वन्तरायापहन्त्री ।
सानुक्रोशे हि शक्ते शरणवरणतस्सर्वसाध्यं सुसाधं मोक्षाकाङ्क्षी प्रपद्ये शरणमहमिति क्वापि मन्त्रे श्रुतं च ॥ ४४३ ॥

(अथ आत्मत्वोपासनाधिकरणम् ॥ २ ॥) सू०—आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ४. १. ३. ॥

जीवादत्यन्तभिन्नस्स विभुरभिदधे लक्षणैस्साधनान्तैर्मुक्त्यर्थोपासनेऽस्मिन्मुषिततमसि न ब्रह्मदृष्ट्यादियुक्तिः ।
तत्त्वज्ञे वीतरागे तदिह न घटते सोऽहमस्मीत्युपास्तिस्तन्न स्वात्मान्तरात्मन्यहमिति वचसोऽप्यत्र मुख्यप्रवृत्तेः ॥ ४४४ ॥

वस्विन्द्रादेरुपास्तौ प्रकृतिशबलितस्वान्वितेक्षा पुरोक्ता शुद्धस्स्वात्मा च चिन्त्यः क्वचिदिह तु विभुस्तादृशा स्वेन युक्तः ।
व्यक्तिर्जीवेशभेदे व्यधिकरणपदैर्भावने स्यात्तथाऽपि ब्रह्मायत्तस्वरूपप्रमितिसुदृढतासिद्धयेऽहंग्रहोक्तिः ॥ ४४५ ॥
ऐक्योपास्तावहं त्वं त्वमहमिति मतिर्निर्विशेषे कथं स्यात् भेदाभेदाभिलापः करकमणिकतद्व्योमनीत्या न मुख्यः ।
मत्तुल्यस्त्वं त्वयाऽहं सम इति वदतां नोपचारोऽपि युक्तस्तस्मात् सर्वान्तरात्मन्ययमहमिति धीराकृतिन्यायसिद्धा ॥
अद्वैतं द्वैतहानौ न भवति सुवचं तत्प्रतिद्वन्द्विकत्वाद्वैतं चाद्वैतगर्भं द्वितयमपि हि तत्स्वस्वरूपादभिन्नम् ।
द्वैताद्वैतं च तादृक्तदुभयनियमानुज्झनादेव सिध्येत् सर्वं स्थाने स्थितं स्यात् प्रमितिपरवतां नेतरेषां तु किंचित् ॥
नन्वद्वैते निषेध्यो गगनकुसुमवद्भ्रान्तिसिद्धोऽस्तु भेदो मैवं सत्यादभिन्नः स खलु न यदि तद्भ्रान्तिसिद्धत्वसिद्धिः ।
भिन्नत्वं चास्य तस्माद्यदि भवति मृषा विद्धि दत्तोत्तरं तत् सत्यं चेत्सत्यभेदोपगतिरिति मुधा दूरतो धावनं वः ॥

(अथ प्रतीकाधिकरणम् ॥ ३ ॥) सू०—न प्रतीके न हि सः ॥ ४. १. ४. ॥

नामादिब्रह्मनिष्ठावपि तदहमिति प्रत्ययः पूर्ववत् स्यात् ब्रह्मध्यानत्वसाम्यादिति यदि न न खल्वन्तरात्मा प्रतीकः ।
न ब्रह्मण्यन्यदृष्टिः कथमपि घटते तस्य सर्वाधिकत्वादन्यस्मिन् ब्रह्मदृष्टौ परमिह नियतैर्लक्षणैस्तद्ग्रहोऽर्थ्यः ॥ ४४९ ॥
आत्मन्यब्रह्मभूते भवतु फलवती कुत्रचिद्ब्रह्मदृष्टिर्नैषा वस्तुव्यवस्थां शिथिलयति नरे वैनतेयत्वधीवत् ।
एतावन्मात्रमोहादिदमहमिति तु स्थापयन् क्षिप्रमृच्छेदिन्द्रत्वारोपदर्पोद्धतनहुषमहाभोगिसंस्थामवस्थाम् ॥ ४५० ॥

(अथ आदित्यादिमत्यधिकरणम् ॥ ४ ॥) सू०—आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ४. १. ६. ॥

तादर्थ्याद्देवतानां फलकरणतया कर्मणश्चोदितत्वादादित्यादौ निकृष्टात्मनि भवतु समुत्कृष्टकर्माङ्गदृष्टिः ।
मैवं कर्म प्रधानं विहितमपि यतस्तत्समाराधनं तत् तत्प्रीता देवतैव प्रदिशति फलमित्यर्थतस्सा प्रधानम् ॥ ४५१ ॥
अन्यस्मिन्नन्यदृष्टेर्विधिरिह घटतामन्यथाख्यातिपक्षे याथार्थ्यं सर्वबोधानुगतमिति मते युज्यते नान्यदृष्टिः ।
तन्नात्राद्ये हि न स्याद्विमतिरविमता भ्रान्तिनीतिः परस्मिन् तादृग्भेदाग्रहोपप्लुतमतियुगलस्थापनायां नियोगात् ॥ ४५२ ॥
दृष्टव्यापह्नवे न भ्रमदनुघटिता दृष्टिरद्वैतमोहस्स्यादुत्कृष्टापराधस्तत इह [विहिता] घटिता तादृशत्वस्य दृष्टिः ।
तादृग्दृष्टौ न दोषस्तत इह कतिचित्तार्क्ष्यदृष्टादिनीत्या द्वेधाऽन्यत्रान्यदृष्टिर्न किमनधिगता व्यक्तितो जातितश्च ॥ ४५३ ॥
मुख्यं ब्रह्मैकमेवेत्यवहितमनसां ब्रह्मदृष्टिः कथं स्यादेकत्वेनेति केचिन्न हि बलिनि विधौ शङ्कनीयो विरोधः ।
स्वेच्छापूर्वं द्विचन्द्रभ्रमवदिह भिदाकल्पनामाहुरन्ये बंभ्रम्यन्ते यथा च श्रुतिषु बहुविधं ब्रह्म भातीति बालाः ॥ ४५४॥

(अथ आसीनाधिकरणम् ॥ ५ ॥) सू०—आसीनस्संभवात् ॥ ४. १. ७. ॥

आसीनस्यैव योगश्श्रुतिषु न ददृशे ध्यानमाहुस्सदेति न्यासश्चेलाजिनादेर्नियमविधिकृतः पाक्षिकासीनतायाम् ।
तस्मादेतद्घटेत स्थितिगतिशयनेष्वप्रकम्प्येन्द्रियस्येत्यप्राप्तं यत्नविद्रान्वयिनि कथमविच्छिन्नधीसन्ततिस्स्यात् ॥ ४५५ ॥
चित्तैकाग्र्योपपत्त्यै विदधति नियतिं देशकालासनादेस्सच्छिद्रं त्वन्यदाऽपि क्षममिति सततं चिन्तनं संस्मरन्ति ।
प्रत्यक्संस्कारभूम्ना परनिहितधियस्तादधीन्यादिबुद्ध्या जुष्टं व्यासक्तनीत्या भवति हि समये योगिनः कर्म सर्वम् ॥
कर्मोपास्त्यङ्गभूतं यदिह नियमितं तत्परे पूर्वपादे योगेन ब्रह्मदृष्टिर्यदपि च परमो धर्म इत्युक्तमाप्तैः ।
तेन प्राधान्यसिद्धावितरदनुगुणं तस्य योज्यं तथा च प्रायः प्रक्रान्तयोगे पटिमलघुतया कल्पितः कालयोगः ॥ ४५७ ॥

विद्याङ्गं पूर्वमुक्तं किमिह पुनरसावासनाद्यङ्गचिन्ता दृष्टार्थांशं विभज्य प्रथयितुमपि न प्राक्शमाद्यङ्गवादात् ।
सत्यं ध्यानाख्यधारावहनमतिदशा त्वन्वहं साधनीया चित्तैकाग्र्येण सर्वप्रयतनविरहे स्यादितीदं प्रकाश्यम् ॥ ४५८ ॥

(अथ आप्रयाणाधिकरणम् ॥ ६ ॥) सू०—आप्रयाणात्तत्रापि हि दृष्टम् ॥ ४. १. १२. ॥

एकस्मिन्नेव घस्रे यदि भवति परध्यानरूपा तु भक्तिस्तद्विश्रान्तौ विधिस्स्यादुपरि तु विफला ब्रह्मचिन्तेत्ययुक्तम् ।
छान्दोग्ये यावदायुस्सुचरितमुदितं ब्रह्मलोकाप्तिहेतोस्तद्धि ध्यानस्य वृद्ध्यै तदपि च विहितं कुत्रचित् प्रायणान्तम् ॥

(अथ तदधिगमाधिकरणम् ॥ ७ ॥) सू०—तदधिगम........तद्व्यपदेशात् ॥ ४. १. १३. ॥

नाभुक्तं कल्पवृन्दैरपि सुपरिहरं कर्म गीतं मुनीन्द्रैः पापाश्लेषप्रणाशश्रुतिरपि परविद्वैभवोक्तिस्ततस्स्यात् ।
मैवं नाभुक्तमित्याद्यपि फलजनने कर्मणो दार्ढ्यमाह प्रायश्चित्तक्रमेण त्विह परभजनं चोदितं कर्मशान्त्यै ॥ ४६० ॥
निष्कृत्यात्मत्वमस्योदितदुरितसमुन्मूलनस्योपपन्नं नात्र स्वर्गादिनीतिः प्रतिहतिविगमे धीविकासस्स्वतो हि ।
पापालेपः प्रमादोदितसहनमिति स्थाप्यमाज्ञानुवृत्त्यै नो चेन्न स्यात् गतिर्नाविरत इति गिरो योगिनां च प्रवृत्तेः ॥
अश्लेषः कर्मशक्तेरनुदय उदये तन्निवृत्तिर्विनाशश्शक्तिस्सा च प्रणेतुस्तदुचितफलकृन्निग्रहानुग्रहात्मा ।
प्रायश्चित्तं निमित्ते कथमनुदित इत्यत्र नैवानुयोज्यं नाधर्मस्तस्य तत् स्यादिति खलु हृदयं ग्राह्यमश्लेषवाचः ॥ ४६२ ॥
धीपूर्वं तूत्तराघं न सृजति परवित् सर्वदा सावधानो जातं नैमित्तिकैश्च क्षिपति समुचितैराशु भुञ्जीत वा तत् ।
वृत्रादौ दृष्टमेतन्नियतिविभवतश्चेदिराजादिसिद्धिर्युक्ताऽवैदान्यदा वा मुनिरिह मनुते ब्रह्मनिष्ठस्य मुक्तिम् ॥ ४६३ ॥

(अथ इतराधिकरणम् ॥ ८ ॥) सू०—इतरस्याप्येवमसंश्लेषः पाते तु ॥ ४. १. १४. ॥

धर्मस्याश्लेषनाशौ न हि परभजनानुग्रहेणोपपन्नौ तस्याघत्वप्रसङ्गाच्छ्रुतिरिह च परं पापनिर्मुक्तिमाह ।
भोगैस्स्यात् पुण्यनाशोऽस्त्विति यदि न यतः काम्यमप्यस्य पापं तस्मिंस्तल्लक्ष्मसिद्धेर्न सुकृतमिति च श्रूयते पापताऽस्य ॥
पुण्यं विद्यानुकूलं यदिह सफलता तस्य विद्याप्रदत्वात् तस्यां यन्नोपयुक्तं तदपि दुरितवद्बन्धकत्वेन वार्यम् ।
कारागारोपरुद्धे निगलयुगलतस्सार्वभौमस्य भृत्ये हैमं कार्ष्णायसं च प्रसदनसमये भञ्जनीयं सहैव ॥ ४६५ ॥
काम्यं नेच्छेद्विरक्तो यदि किल कुरुते रागयोगात् फलेत्तत् नाधीपूर्वं च काम्यं किमपि न च दिशेद्भ्रम्मज्ञातधर्मः ।
विद्यार्थैर्लिप्यतेऽतः किमितरदिति चेन्नाधिकैस्सान्तरायैरन्यार्थैर्मोहजैः क्वाप्यनुतपनवतो बन्धुजैश्चास्त्वलेपः ॥ ४६६ ॥

(अथ अनारब्धकार्याधिकरणम् ॥ ९ ॥) सू०—अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ ४. १. १५. ॥

नश्यत्वारब्धकार्यं परविदि दुरितं न ह्यधीतो विशेषस्सर्वे पाप्मान इत्यप्यभिहितमिति चेन्नोपलम्भादिबाधात् ।
सद्विद्या तस्य तावच्चिरमिति च वदत्यस्मरंश्चागमज्ञा जीवन्मुक्त्यादिशब्दोऽप्युपचरणपरो मोहितास्तेन मन्दाः ॥ ४६७ ॥
रोगाद्यारम्भकाणां प्रशमनविधयस्सन्ति दानार्चनाद्याः प्रत्येतुस्स्वावताराद्यपि विभुरपुनर्जन्मतामप्यगायत् ।
तस्मादारब्धकार्ये फलनियतिवचो दुर्घटं भाति मैवं प्रायश्चित्तोज्झितानां ननु फलनियतिस्सूत्रकाराद्यभीष्टा ॥ ४६८ ॥

(अथ अग्निहोत्राद्यधिकरणम् ॥ १० ॥) सू०—अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ ४. १. १६. ॥

श्लेषश्चेदस्य पुण्यैस्स तु भवति तदा बन्ध इत्यभ्युपेत्यं यद्यश्लेषो भवेत्तैः परविदि विफला पुण्यनिष्ठा परस्तात् ।

तस्माद्धर्मोऽप्यधर्मक्रमत इह परित्याज्य एवेत्ययुक्तं न स्याद्धन्धाय विद्याङ्कुरमुपचिनुते ह्यग्निहोत्रादिधर्मः ॥ ४६९ ॥
सर्वापेक्षेत्यवोचन्ननु परभजने कर्मणामङ्गभावं भूयो वक्त्यग्निहोत्रेत्यपि तदिति मुधा ह्येकमत्रेति चेन्न ।
विद्याया नैरपेक्ष्यात्तदपरिकरता शङ्किता प्रागपास्ता श्लेषाभावप्रसक्ता त्विह पुनरिति तन्नीतिवैषम्यसिद्धेः ॥ ४७० ॥

(अथ इतरक्षपणाधिकरणम् ॥ ११ ॥) सू०—भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते ॥ ४. १. १९. ॥

निर्दिष्टाऽस्माच्छरीरादिति नियतिरतो यावदित्यादिशब्दः कर्मप्रारब्धकार्यं कथयतु विदुषस्तच्छरीरान्तमेव ।
मैवं प्रारब्धचैत्र्यान्न तदवधिविधौ व्याप्रियेतान्यपर्यात् भूयो देहस्मृतेश्चान्तिमवपुषि दृढोद्यत्समाधेस्तु मोक्षः ॥ ४७१ ॥
नन्वत्रास्मादितीदं वितथमिह पदं स्याच्छरीरे न तु स्यात् कारागारोपमत्वप्रथनपरतया तस्य साफल्यसिद्धेः ।
त्याज्यत्वव्यक्तये हि प्रभुरसुखमिमं लोकमित्यप्यगायत् भूतावासं विशिंषन्निममिति च मनुर्हेयभावं व्यनक्ति ॥ ४७२ ॥
सर्वे जीवास्समानास्स्वत इह विविधं कर्म चानादि तुल्यं वैषम्यादिश्च दोषो न भवति भगवत्यन्यथा शास्त्रभङ्गः ।
मुक्तौ नातो विलम्बप्रभृति घटत इत्यल्पसारोऽनुयोगश्चित्रे कर्मप्रवाहे फलसमयभिदा ह्याश्रिता सर्वतन्त्रैः ॥ ४७३ ॥
आवृत्ता ब्रह्मविद्या त्वसकृदहमिति स्याच्च न स्यात् प्रतीके कर्माङ्गेऽर्कादिदृष्टिः प्रणिधिरपि भवेत् सासनः प्रत्यहं च ।
पापे पुण्ये च नाशादिकमथ तु तयोर्भोग्यताऽऽरब्धकार्ये कार्यत्वं स्वार्हवृत्तेरिति कथितमिहारब्धशान्तौ च मोक्षः ॥

॥ इति चतुर्थाध्यायस्य प्रथमः पादः ॥ १ ॥ अथ चतुर्थाध्यायस्य द्वितीयः पादः ॥ २ ॥

नित्यत्वज्ञत्वपूर्वैर्निपुणमभिहितं जीवतत्त्वं द्वितीये जागर्यादौ च खेदो जगदटविमहाजाङ्गिकस्याथ गीतः ।
विद्यारम्भावसानावधि यदपि परध्यातुरर्थ्यं तदुक्तं प्रारब्धस्यावसाने वपुरिह जहतो गत्युपक्रान्तिमाह ॥ ४७५ ॥
वर्ण्यो वैराग्यपादे तनुकरणगणक्षोभ ईदृक्तथाऽपि ब्रह्मज्ञस्यापि काले भवति मृतिरिति ज्ञप्तयेऽत्रानुबन्धः ।
तस्योत्क्रान्तौ विशेषं कथयितुमुचिता चात्र साधारणोक्तिर्मध्ये विद्याफलानां मरणमपि वदंस्तत्प्रियं चिन्त्यमाह ॥ ४७६ ॥
वृत्तिर्वागादिकं वा क्वचन भजतु सम्पत्तिमन्यक्रमां वा श्रुत्यैवोक्तक्रमां वा न हि फलमिह तच्चिन्तनस्येति चेन्न ।
सम्पत्त्याम्नानमीदृक्क्रमनियतियुतं युज्यते न ह्यपार्थं तस्मात्तच्चिन्तनं क्वाप्युपकुरुत इति स्थाप्यते तद्यथार्हम् ॥ ४७७ ॥
जीवं ये नित्यमुक्तं निजगदुरथवा जीवतो मुक्तिमाहुस्तत्तज्जल्पोपजापप्रचलितनिगमग्रामसंक्षोभशान्त्यै ।
उक्त्वा प्रारब्धकार्यं विदुषि च फलवत् प्रायणं चात्र तुल्यं नाडीभेदप्रवेशप्रभृति समधिकं वक्ष्यति ब्रह्मगत्यै ॥ ४७८ ॥
आयुस्सीमामनिष्टैरिह बहुभिरसावात्मनः प्रेक्ष्य योगी यत्कुर्याद्यच्च पुत्रप्रभृतिषु न हि तत् तर्क्यमत्रेत्यनुक्तिः ।
गीतादिष्वन्त्यकाले यदगणि तदपि प्राच्ययोगप्रकारे तत्तत्प्राप्यानुरूपे नियतमिति यथापूर्वधीरत्र भाव्या ॥ ४७९ ॥

(अथ वागधिकरणम् ॥ १ ॥) सू०—वाङ्मनसि दर्शनाच्छब्दाच्च ॥ ४. २. १. ॥

कर्मज्ञानाक्षवर्गो मनसि न विलयं यात्यतत्सम्भवत्वात्तद्वृत्तेस्तादधीन्यात्तदुपरतिमिह प्राह सम्पत्तिशब्दः ।
इत्येतन्नोपपन्नं तदुभयविलये चोद्यनिस्तारसाम्यात्संपत्तिः श्लेषमात्रं करणविषयवाक्च्छब्दमुख्यत्वसिद्ध्यै ॥ ४८० ॥

(अथ मनोधिकरणम् ॥ २ ॥) सू०—तन्मनः प्राण उत्तरात् ॥ ४. २. ३. ॥

अन्नस्योक्तं विकारो मन इति मनसः प्राणसम्पत्तिवाक्ये प्राणस्याम्भोमयत्वात् प्रकृतिविकृतितासम्भवात्तल्लयोऽस्तु ।

मैवं तत्तन्मयत्वश्रुतिरभिमनुते तत्तदाप्यायनं तैः प्राग्वत् संश्लेषमात्रं तत इह हि मनः प्राण इत्यामनन्ति ॥ ४८१ ॥

(अथ अध्यक्षाधिकरणम् ॥ ३ ॥) सू०—सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४. २. ४. ॥

प्राणस्सैकादशाक्षस्तदनु निविशते तेजसीत्थं श्रुतत्वान्मध्येऽन्यप्राप्तिक्लृप्तौ श्रुतिहतिरिति चेन्नात्मयोगस्य चोक्तेः ।
प्राणस्य स्वाप्तजीवे मिलति निजतनोरुद्धृतैर्भूतसूक्ष्मैस्तेजःप्राप्तिश्च गङ्गानिपतितयमुनासागरप्राप्तिवत् स्यात् ॥ ४८२ ॥

(अथ भूताधिकरणम् ॥ ४ ॥) सू०—भूतेषु तच्छ्रुतेः ॥ ४. २. ५. ॥

तेजस्येवास्तु युक्तः श्रिततनुभृदनस्तेजसीत्याद्यबाधाच्छत्रिन्यायोऽपि नास्मिन्निति यदि न तथाऽन्यत्र भूतान्तरोक्तेः ।
विश्वारम्भाय देवस्त्रिवृतमकृत च प्रागिमं भूतवर्गं प्राचुर्यात्तत्तदेकव्यवहृतिरिति चासूत्रयत्पूर्वमेव ॥ ४८३ ॥

(अथ आसृत्युपक्रमाधिकरणम् ॥ ५ ॥) सू०—समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ४. २. ७. ॥

अत्रैव ब्रह्म विन्दत्यमृत इह भवत्यागमाद्ब्रह्मनिष्ठो नोत्क्रान्तिस्तस्य युक्तेत्यसदुपनिषदो ह्यस्य गत्याद्युशन्ति ।
नान्यप्राप्त्यर्थमेतत् सगुणसमधिके कुत्रचिन्मानहानेस्तस्मादत्रामृतत्वप्रभृतिवचनतस्तादृशी तद्दशोक्ता ॥ ४८४ ॥
निश्शेषं भोगहेतौ गलति परविदः कर्मणि प्रायणेऽथो गत्यर्थं सूक्ष्मदेहानुगतिरणुतया निश्चितस्याफला स्यात् ।
मार्गे संवादवादस्तदुचितवपुषा त्वस्त्वितीवानुयोगे कृत्स्नाविद्यानिवृत्तिः परपदगमनापेक्षिणीत्यादि वाच्यम् ॥ ४८५ ॥
कल्पादौ भूतसूक्ष्मप्रभृतिभिरुदितं वर्ष्म कल्पान्तनाश्यं प्रत्येकं प्राणिभेदे नियतमनियतस्थूलदेहानुयायि ।
लिङ्गाख्यं भस्त्रिकान्तःपरुवकवदवस्थायि साङ्ख्यैः प्रतीतं सूक्ष्मांशः पूर्वमूर्तैरुपरितनतनोर्बीजमत्रेष्यते तत् ॥ ४८६ ॥
तत्त्वज्ञानेन बन्धः किल गलति पुरा नोत्क्रमेणेत्यसारं माता वन्ध्येतिवद्धि स्ववचनविहतिर्जीवतो मुक्तिवादे ।
मुक्तश्चेत्तत्त्वबोधात्तनुभृदिह तदा तत्परं नैष दुःख्येत् मिथ्या दुःखं तदा चेत् कथय तव कदा तस्य सत्यत्वमिष्टम् ॥
यंयं भावं स्मरन्तो जहति वपुरिदं देहिनो यान्ति तंतं तस्मादुत्क्रान्तिसाम्यं न घटत इति चेत्तन्न तन्मात्रसाम्यात् ।
विद्याभेदादिनीत्या भवति विषमता ह्यन्तिमप्रत्ययादौ किञ्चित् साधर्म्यवादे न च नियतिमती सर्वथा साम्यसिद्धिः ॥

(अथ परसम्पत्त्यधिकरणम् ॥ ६ ॥) सू०—तानि परे तथा ह्याह ॥ ४. २. १४. ॥

जीवोत्क्रान्त्युक्तिकाले विदुषि तु घटते तत्प्रतिक्षेपभङ्गो भूतोत्क्रान्तेस्तु पश्चात्तदुपनिपतने सङ्गतिस्स्यात् कथञ्चित् ।
तस्मात् साधारणोऽपि ह्ययमुपरि ततस्स्थाप्यते हार्दयोगस्तुल्येऽप्यस्मिन्न तुल्यास्सरणिमुखतया प्राप्यभेदेन नाड्यः ॥
प्राप्तुं भोगापवर्गौ प्रयति तनुभृति प्राप्तसूक्ष्मस्वदेहे सम्पत्त्या किं परस्यां श्रितहृदयसुखौ लभ्यते देवतायाम् ।
आतस्तेजः परस्यामिति चिरघटितेऽप्यस्तु सिद्धानुवादो मैवं मानानुसारात् फलमिति परमे सङ्क्रमश्श्रान्तिशान्त्यै ॥ ४९० ॥

(अथ अविभागाधिकरणम् ॥ ७ ॥) सू०—अविभागो वचनात् ॥ ४. २. १५. ॥

सम्पत्तिर्देवतायां भवतु लय इयं सा हि सर्वस्य योनिर्भूयस्स्रष्टुं क्षमा चेत्यसदनुषजतो वाच्यवैरूप्यदोषात् ।
विश्लेषो भूतसूक्ष्मैरिह न च घटते सृष्टिक्लृप्तिस्तु गुर्वी प्रोक्ता धूमादिमार्गे गतिरपि भविनस्तत्परिष्वङ्गनेन ॥ ४९१ ॥

(अथ तदोकोऽधिकरणम् ॥ ८ ॥) सू०—तदोकोऽग्रज्वलनं........हार्दानुगृहीतश्शताधिकया ॥ ४. २. १६. ॥

नाडीजालेऽन्तिसूक्ष्मे न भवति सुशका मुक्तिनाडी विवेक्तुं तस्मान्मूर्धन्यनाडीगतिरनियमतो मुच्यमानस्य पुंसः ।

वाक्यं गन्तुस्तयोर्ध्वं प्रवददमृततां सम्भवादस्तु मैवं विद्यासंप्रीतहार्द्रप्रसदनमहसा स्वार्हनाडीप्रवेशात् ॥ ४९२ ॥
स्वाधीनो हार्दसंज्ञस्स्वयमविकलया संपदा साकमेकः स्थित्वा हृत्पद्ममध्ये स्थगितनिजतनुस्सप्तलोकीगृहस्थः ।
नाडीचक्रे सुषुम्नां निखिलधृतिकरीं नाभिमूर्धान्तरूपां भित्त्वा तन्मध्यरन्ध्रप्रहितमिषुमिवोत्क्षिप्य नेता मुमुक्षुम् ॥

(अथ रश्म्यनुसाराधिकरणम् ॥ ९ ॥) सू०—रश्म्यनुसारी ॥ ४. २. १७. ॥

एतैरेवेति वाक्ये दिनकरकिरणालम्बनेनोर्ध्वयानं यत्प्रोक्तं योगिनस्तद्दिनमृतिनियतं निश्चयुक्त्येति चेन्न ।
अह्नि च्छायासु रात्रिष्वपि च लघुतरा रश्मयस्सन्ति लिङ्गैस्तापो वर्षादिरात्रौ न यदि हिमदिनन्यायतो नेयमेतत् ॥

(अथ निशाधिकरणम् ॥ १० ॥) सू०—निशि नेति........यावद्देहभावित्वाद्दर्शयति च ॥ ४. २. १८. ॥

सर्वेषामप्रशस्तं रजनि मरणमित्यह्नि योगी म्रियेत प्रेयाद्येष रात्रौ न चरममरणं तद्भवेदित्ययुक्तम् ।
कर्म प्रारब्धकार्यं ह्यनियतसमयं क्षीयते तावदेवेत्युक्तश्चास्मिन्विलम्बोऽहनि निशि च परं विद्यया सोऽश्नुतेऽतः ॥
यत्रैकस्यापवर्गः प्रतिनियततया गण्यते जातकज्ञैः तत्स्यादन्त्यं शरीरं नतु भवति ततोऽप्यन्ययोगव्युदासः ।
न ह्यत्राप्यन्तकाले दिनरजनिभिदा देशभेदादि चैवं शक्यं कुर्वन्ति तस्मिन् यदुच यदुच नेत्यादि चैवं विभाव्यम् ॥

(अथ दक्षिणायनाधिकरणम् ॥ ११ ॥) सू०—अतश्चायनेऽपि दक्षिणे ॥ ४. २. १९. ॥

देहं योगीश्वरोऽपि त्यजति यदि रवेर्दक्षिणावृत्तिकाले विन्देत्सायुज्यमिन्दोरिह भवति पुनस्तच्छ्रुतेस्तत्स्मृतेश्च ।
मैवं पूर्वोक्तनीतिस्त्विह नहि विहता तस्य सायुज्यमिन्दौ विश्रान्त्यै सूर्यनीत्या जगदुपकृतये भीष्मकालप्रतीक्षा ॥ ४९७ ॥
किञ्च प्रारब्धकर्मप्रतिनियतमिदं जाह्नवीसम्भवस्य स्वेच्छा येनैवमासीत् स च वसुरभवन्नैष साक्षाद्विमुक्तः ।
तस्माद्विन्देत मुक्तिं नरपितृदिविषद्रात्रिकालेऽपि योगी स्यातां प्राशस्त्यनिन्दे तदितरविषये गीतयोक्तौ तु मार्गौ ॥ ४९८ ॥
सम्पद्येतान्यदक्षं मनसि तदपि तत्संयुतं प्राणवायौ सोऽध्यक्षे तैस्समेतस्स च तदखिलवान् भूतवर्गे तु सूक्ष्मे ।
उत्क्रान्तिस्स्यात् समाना युतिरथ च परे सा च संश्लेषमात्रं निर्गच्छेद्ब्रह्मनाड्या घृणिभिरथ निशादेवरात्र्योश्च मोक्षी ॥

॥ इति चतुर्थाध्यायस्य द्वितीयः पादः ॥ २ ॥ अथ चतुर्थाध्यायस्य तृतीयः पादः ॥ ३ ॥

निर्गत्य ब्रह्मरन्ध्रात् तपनकरमथालम्ब्य नाडीनिबद्धं प्रत्युद्यद्देववृन्दप्रहितबलिरसौ येन योगी प्रयाति ।
मौकुन्दस्स्थाप्यतेऽसौ परमिह मुनिना पञ्चभिर्नीतिभेदैर्मोहाकूपारपारं पुरमभिगमयन्मुक्तिघण्टापथो नः ॥ ५०० ॥

(अथ अर्चिराद्यधिकरणम् ॥ १ ॥) सू०—अर्चिरादिना तत्प्रथितेः ॥ ४. ३. १. ॥

शाखाभेदेषु भिन्नां गतिमुपनिषदोऽधीयते तन्मुमुक्षोर्विद्यावैषम्यनीत्या स्मृतिरपि विषमा न व्यवस्थाऽर्चिरादेः ।
नैतत् सर्वत्र तैस्तैरिह तदिदमिति प्रत्यभिज्ञानसिद्धौ भाव्यं न्यूनाधिकत्वप्रभृति निखिलमप्यत्र सिद्धाविरुद्धम् ॥ ५०१ ॥
चैद्यादीनामयोध्यास्थिरचरजनुषां पुण्डरीकादिकानां भीष्मादीनामुपास्तिक्रमभवविभवव्यूहलोकस्थितानाम् ।
धातॄणां तत्सुतानामधिकृतिविगमे ब्रह्म संप्राप्स्यतामप्यन्येषां प्रस्थितिस्सा शितपृथुमतिभिश्चिन्तनीया यथार्हम् ॥ ५०२ ॥

(अथ वाय्वधिकरणम् ॥ २ ॥) सू०—वायुमब्दादविशेषविशेषाभ्याम् ॥ ४. ३. २. ॥

संप्राप्तौ देवलोको मरुदपि च समं वत्सरादित्यमध्ये नैकत्वं रूढिभेदात्तत इह तु तयोस्तुल्यभावाद्विकल्पः ।

मैवं योऽयं प्रसिद्धः पवत इति मरुद्देवतानां गृहत्वं तस्योक्तं धारकत्वादत उचितमिदं निर्विकल्पं तदैक्यम् ॥ ५०३ ॥

(अथ वरुणाधिकरणम् ॥ ३ ॥) सू०—तटितोऽधि वरुणस्संबन्धात् ॥ ४. ३. ३. ॥

कौषीतक्यागमोक्तौ वरुणशतमखौ सोऽपि नाथः प्रजानां क्वापि स्थाप्या निपीड्य श्रुतिमपि विफला ह्यन्यथा तच्छ्रुतिस्स्यात् ।
तस्मात्ते वायुलोकात् परमनुपठनात् तत्र सन्त्वित्ययुक्तं स्यादर्थाद्विद्युतोऽन्वग्वरुण इति परौ पाठतस्तत्परौ स्तः ॥ ५०४ ॥

यत्त्वस्यामानवस्य श्रुतमिह परसंप्रापकत्वं भवेत्तत् सद्वारत्वेऽप्यबाधं तदपि सहकृतौ तैश्श्रुतौचित्यभूमा ।
यश्चोक्तो मानसाख्यस्तटित उपरि तु ब्रह्मलोकाप्तिहेतुस्तस्मान्नेता स नान्यो विदुरतिवहनं वैद्युतेनैव तस्मात् ॥ ५०५ ॥

(अथ आतिवाहिकाधिकरणम् ॥ ४ ॥) आतिवाहिकास्तल्लिङ्गात् ॥ ४. ३. ४. ॥

भोगस्थानान्यमूनि ज्वलनदिनमुखान्यध्वचिह्नानि वा स्युर्लोकोक्तिच्छाययैवं स्थितमिदमिति नासंभवात् कालशब्दे ।
स्पष्टे नेतृत्वपुंस्त्वे क्वचिदतिवहनं तद्वदन्यैश्च कार्यं सन्दिग्धे वाक्यशेषाद्गतिरिति जगुरन्यादिवाचाऽभिमन्तॄन् ॥ ५०६ ॥

यां श्रुत्वा धर्मसूनुर्न्यपतदभिपतेत्तामसौ तामसौघो वर्गस्त्रैवर्गिकाणां पितृसरणिघटीयन्त्रचक्रे विघूर्णेत् ।
वर्तन्येषाऽर्चिरादिश्श्रुतिभिरपुनरावर्तिनां संविभक्ता तत्र ब्रूतेऽतिवोढॄंस्तदितरवदहःपक्षमासादिशब्दः ॥ ५०७ ॥

पूर्वं धूमादिमार्गे सुकृतिषु कथिता चन्द्रमःप्राप्तिरन्या सायुज्यं न्यासविद्याप्रकरणपठितं चान्द्रमन्यादृगुक्तम् ।
अत्रान्यार्चिर्मुखानामतिवहनकृतामष्टमस्याप्तिरिन्दोरित्थं सुस्था व्यवस्था प्रणिहितहृदयैरेवमन्यच्च सूह्यम् ॥ ५०८ ॥

भूलोकेशाग्निपूर्वान् कतिचन भविनः केऽपि मन्यन्त एताञ्छब्दैक्येऽप्यत्र गुर्वी भवति तदभिमन्त्रन्तराणां प्रक्लृप्तिः ।
अन्ये चामानवस्य स्वपदगतपरब्रह्मनेतृत्वदृष्ट्या नित्यत्वं तद्वदन्यान्निजगदुरखिलान्नित्यवैकुण्ठभृत्यान् ॥ ५०९ ॥

(अथ कार्याधिकरणम् ॥ ५ ॥) सू०—कार्यं बादरिरस्य गत्युपपत्तेः ॥ ४. ३. ६. ॥

वैधात्रस्थाननेतॄन् समकथयदिमान् बादरिस्तादृशानां गत्यौचित्यं तदा स्यान्न खलु विभुजुषामत्र वेद्यं न लभ्यम् ।
सामीप्याद्ब्रह्म चोक्तस्सरसिजवसतिस्तेन सार्द्धं च मुक्तिर्युक्तेत्येतन्न नानाश्रुतिपठितपरस्थानगत्याद्यबाधात् ॥ ५१० ॥

मार्गोऽसावर्चिरादिर्गमयति परमं धाम गत्यादियोगाद्ब्रह्मोक्तेर्मुख्यभावादिति तु निरणयज्जैमिनिस्सत्यमेतत् ।
वक्तव्यं त्वत्र किंचिन्नयति परविदस्स्वान्वितब्रह्मनिष्ठांस्तद्देहस्वात्मनिष्ठानपि मुखभिदयाऽमी च संपूर्णनिष्ठाः ॥ ५११ ॥

ध्यायेयुर्ये च जीवान् प्रकृतिशबलितान् केवलान्वा यथेष्टं द्वेधाऽपि ब्रह्मदृष्ट्या जडनिवहमपि स्वेन यद्वाऽन्यदृष्ट्या ।
ते सर्वेऽपि प्रतीकप्रणिहितमनसो नार्चिराद्यध्वयोग्या ब्रह्मोपास्तेश्च लिङ्गं गतिरियमनघा सूत्रिता पूर्वमेव ॥ ५१२ ॥

प्रत्यापत्तिप्रकारः प्रतिनियतिमती कर्मयोगादिनिष्ठा विद्याभेदाधिकारः परभजनबलान्मुक्तिविघ्नोपशान्तिः ।
अन्त्यावस्थाव्यवस्था पृथगयनगतौ विश्रमाप्तिर्विभक्ता साक्षान्मुक्तिः क्रमाद्वेत्यखिलमगतिकैरप्रणोद्यं परैश्च ॥ ५१३ ॥

पन्थानं देवयानं तमिममधिगतः पश्चिमे देहपाते तत्त्वस्तोमांस्तमोन्तानतिपतति तरत्यापगां तत्र दिव्याम् ।
दिव्यं देहादि लब्ध्वा जनिलयरहितं याति विष्णोः पदं तत् पर्यङ्कारोहणान्तां भजति बहुमतिं ब्रह्मसंवादधन्यः ॥ ५१४ ॥

सङ्घाते नित्यता न क्वचिदपि न पृथिव्यादिभावस्तथात्वे पर्यङ्काद्यैर्न साध्यं किमपि भगवतः पूर्णनिस्सीमशक्तेः ।
व्याप्तप्राप्त्यर्थमूर्ध्वं गतिरपि विफलेत्यादिकान् हैतुकानां क्षोदिष्ठक्षीबजल्पान् श्रुतिरुपशमयेदद्भुतार्था स्वतन्त्रा ॥ ५१५ ॥

भावोऽभावश्च यत्रानुपधि समुदितौ तत्र भावी विरोधः प्रज्ञातव्याप्तिरोधेऽप्यधिकनिजबलान्मानतस्स्वार्थसिद्धिः ।
दृष्टं सर्वेष्टमेतन्न यदि न हि भवेन्मानमध्यक्षतोऽन्यत् बाधोऽध्यक्षे मिथो वा वटदलशयनाद्यद्भुतं चैवमूह्यम् ॥ ५१६ ॥
एकत्वं ब्रह्मविद्यापरिषदि सुपथोऽधीयमानस्य तस्मिन्वायौ स्याद्देवलोकश्रुतिरपि वरुणाद्यन्वयो विद्युतोऽधि ।
नेतारोऽमानवान्ताः परपदगमने तद्विदां सोऽयमध्वा तुर्याध्यायस्य पादे स्तुतिरधिकरणैरित्थमुक्ता तृतीये ॥ ५१७ ॥

॥ इति चतुर्थाध्यायस्य तृतीयः पादः ॥ ३ ॥ अथ चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥

उक्तं पादैरघानामिति पृथुवपुषस्सूक्ष्ममूर्तेश्च हानं निर्धूतोपाधिराशेर्निरुपधिकमहानन्दमन्त्येन वक्ति ।
स्वाविर्भावोऽत्र चिन्त्यस्त्रिभिरधिकरणैश्छन्दवृत्तिस्त्रिभिश्चेत्येवं द्वे पेटिके स्तस्स्वत उभयमिदं नोपधेरीशनिघ्नम् ॥ ५१८ ॥

(अथ सम्पद्याविर्भावाधिकरणम् ॥ १ ॥) सू०—सम्पद्याविर्भावस्स्वेन शब्दात् ॥ ४. ४. १. ॥

अश्रान्तस्वप्रकाशं यदिदमहमिति प्रत्यगात्मस्वरूपं तस्याविर्भावसिद्धौ न तु किमपि फलं स्यात् सुषुप्ताविशेषात् ।
तस्मान्मुक्तस्स्वमन्यद्व्रजति वपुरसौ देववद्रूपशब्दान्मैवं स्वेनेति शब्दो ह्यफल इह भवेद्रूपवाचाऽर्थसिद्धेः ॥ ५१९ ॥
नित्यस्वात्मस्वरूपस्थितिरियमभिनिष्पत्तिरित्यूचिवांसस्तन्मात्रं स्यान्न विद्याफलमिति न विदुर्नित्यसिद्धं क्व साध्यम् ।
सिद्धं साध्यानुवेधाद्भवति फलमतस्सा त्वविद्याविभङ्गो यद्वा सिद्धस्य वित्तिस्तदिह न वितथं मुक्त इत्यादिसूत्रम् ॥ ५२० ॥
स्वाकारान्नित्यभातादधिकसुखतया भाति जीवस्तदानीं सिद्धाविर्भावमात्रेऽप्यनुविदुरभिनिष्पत्तिवाचः प्रयोगम् ।
सङ्कोचात्यन्तहानिर्धिय इयमभिनिष्पत्तिरागन्तुरुक्ता निष्प्रत्यूहं स्वरूपोपधिकमपि तदा स्वेनशब्दः प्रवक्ति ॥ ५२१ ॥
प्रायस्स्वस्मिन्स्वदेहिन्यनघगुणनिधौ तद्विभूतिद्वये वा दृष्टं यत्स्यात् समाधौ भवति पृषतवत्तद्धि मुक्तानुभूतेः ।
कृत्स्नं तच्छर्करौघव्यतिकरितसुधासिन्धुवत् स्वादुभूतं तस्मात् स्वात्मप्रकाशे न फलमिति वदन् कूपकूर्मो घृणार्हः ॥
मल्ली शुद्धं प्रसूनं जनयति समये रुन्नकोपाधिमुक्ते तद्वन्नाथानुकम्पा फलमुपशमितावग्रहं सूरितुल्यम् ।
तस्मादागन्तुकेऽपि प्रतिहतिविरहात् तादृशे धीविकासे प्रत्यापन्नस्वदायक्रम इह कथितः प्राप्तसिद्धेः प्रतीचः ॥ ५२३ ॥
अर्वाञ्चो मुक्तिभेदं कतिचिदगणयन् स्वात्ममात्रानुभूतिं तत्र ब्रह्मानुभूतेर्विहतिरुपधितस्स्यात् स्वतो वेति चिन्त्यम् ।
सन्ति द्वेधाऽपि दोषास्तत उपचरणान्मुक्तिशब्दोऽत्र युक्तः सालोक्यादिप्रभेदेष्वपि सरणिरियं सावधानैर्विभाव्या ॥ ५२४ ॥

(अथ अविभागेन दृष्टत्वाधिकरणम् ॥ २ ॥) सू०—अविभागेन दृष्टत्वात् ॥ ४. ४. ४. ॥

जीवेशौ नित्यभिन्नौ श्रुतिरिह च सहेत्याह मुक्तस्य भोगं साम्ये पारम्यमुक्तं स्मृतमपि स पृथग्भातु तस्मात् परस्मात् ।
मैवं तत्त्वं हि मुक्तौ स्फुरति तदनघो भेदभानांश इष्टस्सिद्धे देहात्मभावे त्विह न हि घटते तत्स्वनिष्ठत्वबुद्धिः ॥
मन्त्रोक्तं भोक्तृभावे यदि सहभवनं ब्रह्म न स्यात् प्रधानं तस्मात्तद्भोग्यभावे भवतु तदुचितं ब्राह्मणव्याकृतेश्च ।
द्वेधाऽपि ब्रह्म तत्त्वात् पृथगितर इह स्यादितीदं च वार्तं सिद्धे भेदे स्वनिष्ठस्थितिपरिहरणं ह्यत्र सूत्रोपपाद्यम् ॥ ५२६ ॥
पारम्यं यच्च साम्ये श्रुतमिह न हि तत् सर्वथेत्यप्यधीतं ग्राव्णो हेम्नश्च यद्वत् समधरणधृतौ स्यात्तदुक्तिस्तथाऽत्र ।
एवं तद्देहभावे स्थितवति विविधाबाधिताम्नायभूम्ना ब्रह्मैवेत्यादिवाक्यं प्रथयति समतां तादृगित्यप्यधीतेः ॥ ५२७ ॥

(अथ ब्राह्माधिकरणम् ॥ ३ ॥) सू०—ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ४. ४. ५. ॥

ज्ञानत्वे किं फलं स्यादिति मिषतु गुणैस्तादृशं ब्रह्मसाम्यं किं तैरन्यैस्स्वरूपात्तदिह भवतु चिन्मात्ररूपप्रकाशः ।
इत्थं चात्रोक्तपक्षद्वयमुभयविधश्रुत्युपात्ताविरोधान्निर्धूयाथ द्विधाऽऽविर्भवनमघटयत् सिद्धतत्त्वप्रकाशात् ॥ ५२८ ॥
पर्यायौ नामपाठेष्वनुपरिपठितौ मुक्तिकैवल्यशब्दौ कैवल्यं चान्ययोगत्यजनमिति कथं धर्मिधर्मान्वयोऽस्य ।
मैवं ब्रह्मस्वरूपादपरमिह न खल्वस्ति किंचित् स्वनिष्ठं न द्रव्यं चागुणं स्यादधिकरणयुगं तन्निरातङ्कमेतत् ॥ ५२९ ॥

(अथ सङ्कल्पाधिकरणम् ॥ ४ ॥) सू०—सङ्कल्पादेव तच्छ्रुतेः ॥ ४. ४. ८. ॥

धात्रादेरप्यपेक्ष्यो ह्युपकरणगणस्सत्यसङ्कल्पवृत्तेर्मुक्तस्याप्येवमेवास्त्विति यदि वितथं तद्विकल्पासहत्वात् ।
इष्टा द्रव्याद्यपेक्षा सुकृततदितरापेक्षणं तत्र दुःस्थं न स्यादिच्छाविघातस्त्वनुपधिकतया देववाञ्छैकरस्यात् ॥ ५३० ॥
विश्वस्यैतस्य जन्मस्थितिलयरचना विश्वकर्तुर्यथा स्यादिच्छासन्तानभेदान्नियतिरिह तथा नित्यमुक्तक्रियाणाम् ।
तस्यानुच्छेदवृत्त्या प्रतिकलभिदुरास्ताश्च तादृक्प्रवाहास्तद्बुद्धेरापरोक्ष्यं त्वनिशमभिदुरं वर्तते ब्रह्मधीवत् ॥ ५३१ ॥
प्रत्यूहार्हाः प्रदेशप्रभृतिसुकृतिनस्सत्यसङ्कल्पभावे मर्त्यारम्भस्पृहादौ तदितरविविधप्राणिसृष्ट्यादिदृष्टेः ।
तेनेच्छासन्ततीनां सकलविफलते पुण्यपापैरमीषां मुक्तस्योक्ता चिकीर्षा त्वविहतविषया तारतम्यं त्वदोषः ॥ ५३२ ॥
सूत्रे मुक्तोऽप्यनन्याधिपतिरभिहितस्तेन कस्तस्य शेषी श्रुत्यैवोक्तस्स्वराडित्यपि विहतिरतः प्राक्प्रतिष्ठापितानाम् ।
मैवं नाथेतरान्प्रत्यघविहित इह क्षिप्यते शेषभावो विश्वस्यात्मेश्वरो यः पतिरिति पठितस्तत्पतित्वं त्वबाध्यम् ॥ ५३३ ॥

(अथ अभावाधिकरणम् ॥ ५ ॥) सू०—अभावं बादरिराह ह्येवम् ॥ ४. ४. १०. ॥

मुक्तः प्रोक्तोऽशरीरः क्वचिदथ बहुधा सम्भवः क्वाप्यधीतो गानक्रीडादि चोक्तं तदनुगुणमतद्वन्द्वमार्षं निरस्यन् ।
स्वच्छन्दस्योभयं तत् क्षममिति वदति स्वं मतं सूत्रकारस्स्याच्चाकर्मोद्भवं तन्निखिलमपि परब्रह्मवत्तत्समस्य ॥ ५३४ ॥
मोक्षे पुण्याद्यभावात्तदुपधिकवपुर्वर्जितत्वं न दूष्यं तस्मिन्दुःखार्हदेहत्यजि च शुभवपुस्सत्त्वपक्षोऽप्यबाध्यः।
इत्थं सत्यत्र मुक्तस्थितिरिह मुनिना कीदृशी सूत्रिता स्यान्मैवं स्वच्छन्ददेहग्रहतदनियमस्थापनेऽत्राभिसन्धेः ॥ ५३५ ॥
नानादेहा यदि स्युर्युगपदधिगतब्रह्मसाम्यस्य पुंसस्तेषां व्याप्तस्वरूपान्वय उचित इति प्राक्तनाणुत्वहानम् ।
नैतद्धीव्याप्तिसिद्धेर्भवति च जगदावेशवाक्तन्निदाना सौभर्यादौ प्रक्लृप्तां गतिमपवदितुं न क्षमं ब्रह्मसाम्यम् ॥ ५३६ ॥
देहानां यौगपद्ये बहुषु कथमणुर्धारकोऽस्त्वेष मुक्तश्चैतन्यद्वारतश्चेत् सकलमपि तदा धारयेद्व्याप्तबोधः ।
मैवं मुक्तस्य शक्तिर्नियमितविषया त्विच्छया सर्वशक्तेः प्राक्तादृग्योगशक्त्या बहुतनुभजने कर्मबन्धोऽप्यपेक्ष्यः॥ ५३७ ॥
शक्तिः क्षेत्रज्ञसंज्ञा मुनिभिरभिदधे वेष्टिता कर्मभिस्स्वैः पुंसोऽनंशापि बुद्धिर्बहुविधविकृतिस्वीकृतैवं स चास्तु ।
वालाग्रेत्यादिवाक्यात्तदयमणुरपि स्यादनन्तोऽपि मुक्तौ न स्याज्जैनादिभङ्गे परिहृतविकृतेरैकरूप्यानपायात् ॥ ५३८ ॥
जीवस्यैकैकशो हि त्यजनत उदितो वृक्षशाखासु शोषस्तस्मादद्वारकं स्यादपगतवरणे मुख्यमानन्त्यमस्मिन् ।
मैवं शाखासु भोगाश्रयनियतिकरोपाधिनाशः प्रहाणं क्षेत्रादिन्यायतोऽसावभिमतिविरहात् स्यादधीतो जहातिः ॥ ५३९ ॥
एकोऽनेकः परस्मात् पृथगपृथगपि स्वस्वरूपेण मुक्तस्स्वाभीष्टाशेषभोक्ता स्वयमिति पृथुकक्षीबवद्ये भ्रमन्ति ।
तेऽन्वीक्ष्य स्वोक्तिबाधं श्रुतिशतविहतिं तत्तदुक्त्यान्यपर्यं जैनावष्टम्भदृप्यन्मतिकलहमुचः सत्पथं संश्रयन्तु ॥ ५४० ॥

सर्वं सङ्कल्पमात्राल्लभत इति समाम्नायते सूत्रितं च स्वेच्छातो देहयोगाद्यनियतिकथनं स्यात्ततः पिष्टपेषः ।
तन्नान्योन्योपरुद्धश्रुतिगतिनियतिः कामतोऽनेकदेहस्वीकारप्रक्रियेत्याद्यनियतिकथने सूत्रकाराभिसन्धेः ॥ ५४१ ॥

(अथ जगद्व्यापारवर्जाधिकरणम् ॥ ६ ॥) सू०—जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ ४. ४. १७. ॥

यद्यप्युक्तो विमुक्तः परतनुरपृथक्सिद्ध इत्यत्र पूर्वं व्यापारांशे तथाऽपि श्रुतमिह परमं साम्यमक्षोभणीयम् ।
सङ्कल्पादेव सर्वोत्थितिरिति हि ततस्स्यादिति प्रत्यवस्थां कृन्तत्यन्त्येऽधिकारे कृतिमदितरयोस्स्थापयन् भोगसाम्यम् ॥
सायुज्यं भोगसाम्यं समगणि निपुणैश्शब्दशक्त्याद्यबाधात्तच्च व्यापारसाम्ये त्वसति न घटते स्वक्रियास्वादहानेः ।
तस्मान्मुक्तस्य सृष्टिप्रभृतिरपि जगद्व्याप्रतिर्ब्रह्मतुल्या मैवं तल्लक्षणं सा कथमनुगमतस्तस्य चान्यस्य च स्यात् ॥ ५४३ ॥
कथ्यन्ते सृष्टिवाक्यैः क्वचिदपि न जगत्कारणत्वेन मुक्ताः प्राधीतः कामचारो भवतु न जगदारम्भकत्वं ततस्स्यात् ।
सर्वाकारोपभोग्येश्वरविषयधियः साम्यतो भोगसाम्यं युज्येतानन्दवल्ल्यामगणि च विभुनाऽऽनन्दमात्रे समत्वम् ॥ ५४४ ॥
निष्कामश्रोत्रियस्याप्यतिदिशति सुखं मानुषानन्दतुल्यं साऽऽनन्दान्वक्तुकामा शतगुणमधिकानाविरिञ्चं क्रमेण ।
तत्तद्भोगात्त्वदिष्टं कथमिदमवरं कष्टमिष्टं हि मुक्ते सत्यं तत् स्यान्मुकुन्दप्रियजनसदृशे ह्येकदेशानुवादः ॥ ५४५ ॥
आनन्दानन्त्यमाह श्रुतिरिह हि यतो वाच इत्यादिका स्याद्विश्रान्तिः श्रान्तिमात्रादिति च निगदितं यामुनाचार्यवर्यैः ।
न ह्यानन्दो मितस्स्याद्विधिशतवचनेऽप्यस्य यष्ट्या नभोवत्तच्चोक्तं भूभृदण्वोरुदधिपतितयोर्मज्जने को विशेषः ॥ ५४६ ॥
विश्वं मुक्तस्य देहो न खलु तदपृथक्सिद्ध्यभावोपलम्भान्नोपादानं ततोऽसौ कथयितुमुचितस्सर्वशक्तित्वहानेः ।
नात्माशक्यं चिकीर्षेत्तदितरविषये निर्विघाता तदिच्छा व्यापारे भिद्यमानेऽप्यविषमरसता दृश्यते क्वापि लोके ॥ ५४७ ॥
तत्तत्सेवाविशेषस्थिरपरिणमितस्सार्वभौमप्रसादस्सूते भृत्यस्य साम्यं स्वयमनभिमतस्वामिचिह्नैकवर्जम् ।
एवं देवं दयालुं शरणमुपगतैर्लभ्यतेऽनन्यलभ्या निर्धूतावृत्तिशङ्का निरुपधिकरसा संव्यवस्था त्ववस्था ॥ ५४८ ॥
अत्राहुस्सूत्रमन्त्यं पृथगधिकरणं केचिदाञ्जस्यलाभादस्त्यावर्ते निषेध्ये त्विममिति च पदं तेन शङ्कोत्थितेति ।
भाष्यादौ तन्न दृष्टं भवति च सुगमं पूर्वशेषत्वमस्य स्यादावृत्तिप्रसङ्गादपि निखिलजगन्निर्मितौ साम्यशङ्का ॥ ५४९ ॥
सर्गाद्यावर्तलीलारससहचरिते दण्डरासे नियुक्तं जीवं देवो विमुच्य क्रमत इह सयुग्भावधन्यं भुनक्ति ।
कर्मात्यन्तोपशान्तेरिह न च पुनरावर्तयत्येनमित्यप्याम्नाते कर्ममूलाक्षयफलकथनाद्युत्थशङ्कोपशान्तिः ॥ ५५० ॥
स्वाविर्भावोऽपवर्गे निरुपधिनियतस्वप्रकार्यन्तदृष्टिश्चिद्रूपस्यैव तद्वच्छ्रुतिमकुटमितैः स्वप्रकारैस्सहेक्षा ।
सङ्कल्पादेव सिद्धिस्तनुषु च नियमोन्मुक्तता ब्रह्मसाम्यप्राप्तौ तल्लक्षणांशोज्झनमिति चरमाध्यायतुर्याङ्घ्रिसारः ॥ ५५१ ॥
ध्यानादिं तत्प्रभावं करणभृत इतो देहकाराकुटीरान्निष्क्रान्तिं ब्रह्मनाड्या गतिमपि सुपथा स्वप्रकाशं च साध्यम् ।
इच्छातस्स्वेष्टसृष्टिं परममपि परब्रह्मणा भोगमात्रे साम्यं मायामतस्थः कथमिव घटयेदन्तिमाध्यायसाध्यम् ॥ ५५२ ॥
मानामानप्रभेदप्रभृतिविभजनादादिमे कर्मभागे नाना वा देवतेत्याद्यनुपरिपठनान्मध्यमे देवतांशे ।
भागेऽस्मिन् भेदधर्मप्रभृतिकथनतस्सौगतादेश्च भङ्गात् मीमांसायां त्रिकाण्ड्यां क्वचिदपि न मृषावादगन्धावकाशः ॥ -
त्रय्यन्तोदन्वदन्तस्स्तुतिरियमुदिता देशिकैः कर्णधारैः मुक्त्यर्थज्ञानपारं गमयति विशदं त्वन्यदीक्ष्यं विमुक्तौ ।

कर्तव्ये कल्पकारैः क्वचिदभिदधिरे कृत्यसन्देहभेदास्तत्त्वेऽप्येवं क्वचित् स्यात् तदपि न वितथः स्वोपयुक्तांशबोधः ॥
श्रुत्यन्तैकान्ततर्कक्रमगरिमगतौ तूलवच्छैलवर्गस्तत्सिद्धब्रह्मबोधद्युमणिरुचितमस्तोमकल्पोऽन्यजल्पः ।
मोक्षोपायैकराज्ये तदितरविधयः किङ्करत्वं भजन्ते मुक्तानन्दामृतैकोदधिपृषतकणस्पर्धिनोऽन्ये पुमर्थाः ॥ ५५५ ॥

पारावर्यं विविच्य प्रथममवितथैरागमैस्तत्त्ववर्गे संसारे तीव्रभीतिः परसमधिगमे तीव्रनिष्पन्नरागः ।
कश्चिद्विद्याविशेषं सपरिकरमधिष्ठाय शान्तान्तरायस्संपद्य ब्रह्म भुङ्क्ते निरुपधिकमनावृत्तिरित्थं श्रुतार्थः ॥ ५५६ ॥

साऽसौ सासूयतत्तत्कुमतिमतसमुन्मूलनी मूलनीतिश्रेणी निश्रेणिकल्पा त्रियुगपथरथारोहसूतं सुवीत ।
सन्तस्सन्तापवर्गप्रशमनपटुना तत्त्वबोधेन सन्तं सन्तोषं ब्रह्मसूत्राधिकरणचरणाध्यायसारावलिर्वः ॥ ५५७ ॥

षट्पञ्चाशच्छतं चेत्यधिकरणगणैर्व्यक्तसीमाविभागे काण्डेऽस्मिन्नस्सदुक्तं कतिचिदनुविदुः क्षेपधन्यैः किमन्यैः ।
पश्यन्तो विश्वमेतत् त्रिगुणगुणनिकायन्त्रितस्वान्तनिघ्नं नाथे नस्साक्षिभूते न वयमिह मुधा कुर्महे नर्मलीलाम् ॥ ५५८ ॥

विश्वं द्रव्यादिभेदाद्विशदमभिहितं *तत्त्वमुक्ताकलापे* व्यूढं शारीरकस्य त्विह दृढघटितं रूपमापादचूडम् ।
तस्मादस्मच्छ्रुताब्धेरमृतमिव समुद्रान्तमश्रान्तबद्धश्रद्धैरन्योन्यहस्तप्रदमिदमुभयं धार्यमाचार्यवद्भिः ॥ ५५९ ॥

इत्थं शारीरकोक्ते पथि समुपनतास्स्रग्धराश्श्रद्दधानं पारे मायापयोधेः प्रहितमभिमुखैः सूरिभिश्शुद्धभावैः ।
ब्रह्मालङ्कारकल्पैर्बहुभिरुपनिषत्सूत्रतात्पर्यशिल्पैर्देवार्हत्वाय दिव्याप्सरस इव परिष्कृत्य सम्भावयन्ति ॥ ५६० ॥

प्रज्ञाधम्मिल्लमल्लीपरिमलमिलितप्राज्ञसेवासमुद्यच्छुद्धालोकोज्ज्वलं मां श्रुतिपरिषदुपस्कारसौभाग्यवद्भिः ।
पद्यैरेतैस्स्वहृद्यैः प्रणवमहिमवत्पाञ्चजन्यक्रमेण स्वाध्मातं रङ्गनाथः स्वयमिति मुखरीकृत्य सम्मोदते स्म ॥५६१ ॥

पाराशर्यः प्रभूतादुपनिषदमृतोदन्वतस्सारभूतं निर्मथ्यादत्त सूत्रैरवितथनिगमाचार्यनामा मुनीन्द्रः ।
यत्तन्निष्कृष्टमित्थं यतिपतिहृदयारूढमारूढतार्क्ष्यस्तद्भक्ता वाजिवक्त्रः सह मम गुरुभिर्वादिहंसांबुवाहैः ॥ ५६२ ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु

अधिकरणसारावल्यां चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥

॥ समाप्तः चतुर्थाध्यायः ॥

॥ अधिकरणसारावली समाप्ता ॥ १ ॥

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेदान्ताचार्यविरचिता

॥ शतदूषणी ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि

॥ ब्रह्मशब्दवृत्त्यनुपपत्तिवादः प्रथमः ॥ १ ॥

समाहारस्साम्नां प्रतिपदमृचां धाम यजुषां लयः प्रत्यूहानां लहरिविततिर्बोधजलधेः ।
कथादर्पक्षुभ्यत्कलिकथककोलाहलभवं हरत्वन्तर्ध्वान्तं हयवदनहेषाहलहलः ॥ १ ॥

इदंप्रथमसम्भवत्कुमतिजालकूलङ्कषा मृषामतविषानलज्वलितजीवजीवातवः ।
क्षरन्त्यमृतमक्षरं यतिपुरन्दरस्योक्तयश्चिरन्तनसरस्वतीचिकुरबन्धसैरन्ध्रिकाः ॥ २ ॥

प्राचीमुपेत्य पदवीं यतिराजदृष्टां तत्सन्निकृष्टमपि वा मतमाश्रयन्तः ।
प्राज्ञा यथोदितमिदं शुकवत्पठन्तः प्रच्छन्नबौद्धविजये परितो यतध्वम् ॥ ३ ॥

वादाहवेषु निर्भेत्तुं वेदमार्गविदूषकान् । प्रयुज्यतां शरश्रेणी निशिता शतदूषणी ॥ ४ ॥

तत्र तावच्छास्त्रारम्भे—

विचारविषयत्वेन सूत्रकृद्यदसूत्रयत् । परोक्ता ब्रह्मशब्दस्य वृत्तिरत्र निरस्यते ॥

निर्विशेषब्रह्मवादे ब्रह्मशब्दस्य क्वचिन्मुख्यवृत्तत्वमस्ति न वा ? न चेत्, असाधुत्वापत्तिः । साधुत्वस्य मिथ्यात्वमभ्युपगच्छतामसाधुत्वमिष्टमिति चेत्, हन्त तर्हि सर्वशब्दासाधुत्वम् । साध्वसाधुविवेकाभावे च कृतं साङ्गोपाङ्गैर्वेदैः । मुख्यार्थशून्यस्य तन्मूलवृत्त्यन्तरे लिङ्गत्वे चासम्भवति कथं क्वचिद्बोधकत्वमपि ? नच साङ्केतिकोऽयमपभ्रंशो वा, येन वाचकत्वाभिमानाद्बोधकत्वं स्यात् । यस्यायमपभ्रंशश्शङ्क्येत, सोऽपि तथा वृत्तिविकल्पेन निर्धूयेत ।

ननु ब्रह्मशब्दस्यायं महिमा—यन्मुख्यार्थविरहेऽपि नित्यं लक्षणया ब्रह्म बोधयतीति, तदिदं वन्ध्यायाः पौत्रदर्शनम्। मुख्यार्थसम्बन्धिन्यमुख्ये वृत्तिर्हि लक्षणा, तदभावेऽपि तद्वृत्तिं भवानेव भाषेत। किंचैवं मुख्यार्थशून्यास्सर्वे शब्दास्तंतमर्थं लक्षयन्तीति स्वीक्रियेत महामीमांसकेन। को हि त्वदुक्तन्यायवित्कुत्रापि शक्तिक्लृप्तिगौरवं मृष्येत्, मुख्यार्थशून्येन ब्रह्म लक्ष्यमिति वदता तदपि मुखान्तरेण संवृतिमुखे निक्षिप्तम्। अवाच्यवादाश्च वाच्यवादेन निरसिष्यन्ते। अस्ति चेत्किमन्यस्मिन्? विचारविषये वा? नाद्यः; निर्निमित्तत्वे पुनरसाधुत्वापातात्। यदृच्छाशब्दोऽपि हि स्वरूपनिमित्तकश्शास्त्रज्ञैश्शिक्षितः। नचायं सः; मानाभावात्, निरुक्तिविरोधाच्च। सनिमित्तत्वे च यः प्रकृत्यादिष्वस्य प्रयोगः, स ब्रह्मगुणलेशयोगादौपचारिक इत्यभाषि, अनुवृत्तस्याकृतिरूपस्य निमित्तस्यासिद्धेः, बृहत्त्वबृंहणत्वमात्रस्य बृहदादिशब्दवदतिप्रसङ्गित्वात्, अनेकशक्तिकल्पने गौरवात्, लोकोत्तरबृहत्त्वादिमात्रस्य तु भगवच्छब्दनयादुपचारद्वारत्वात्। अन्यथा गौणवृत्तिर्लुप्येत। * यत्साक्षादपरोक्षाद्ब्रह्मेति विशेषणं चान्यत्रामुख्यतां व्यनक्ति, * तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने इति च स्मर्यते। * द्वे ब्रह्मणी वेदितव्ये इत्यादिकमपि, * त्रीणि तेजांसि न स्पृशेत् इत्यादिवन्मुख्यामुख्यसमुच्चयाभिप्रायम्। न द्वितीयः; शुद्धोपहितविकल्पासहत्वात्; न हि निर्विशेषतयाऽभिमते शुद्धे * बृहति बृंहयतीति श्रुत्युक्तनिमित्तमस्ति। अधिष्ठानत्वेन सर्वविवर्तमूलतया च तत्स्यादिति चेन्न; तत्र तदुभयानभ्युपगमात्; अन्यथा मुक्तावपि तद्योगात् मुक्तेरेव मुक्तेः। उपलक्षणार्थं निर्वचनमिति चेन्न; विशेषणार्थत्वे बाधाभावात्, * तस्मादुच्यते परं ब्रह्मेति प्रवृत्तिनिमित्ततयैव बृहत्त्वादिश्रुतेः, * बृहत्त्वाद्बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयत इति स्मृतेश्च; गोत्वाभिसम्बन्धाद्गौरितिवत्।

अस्तु व्यावहारिकं तद्वैशिष्ट्यम्; कथं तर्हि शुद्धे वृत्तिः? तदपि तद्द्वारा गम्यत इति चेत्; तर्हि तन्न मुख्यम्। उपहितं मुख्यमिति पक्षस्तु श्रुतिसिद्धस्वाभाविकसार्वज्ञ्याद्युपहितत्वविवक्षायां स्वमतविरोधादपास्तः। स्वाभिमताज्ञानादिदोषोपहितत्वं त्वनाक्षमलैङ्गमश्रौतमस्मार्तमसौत्रं चेति स्थापयिष्यते। तत्र च शुद्धे परे ब्रह्मणि निर्दोषभव्यगुणविशिष्टविषयभगवच्छब्दमुख्यवृत्तिनिरुक्तिविरोधः, * परं ब्रह्म परं धाम पवित्रं परमं भवानिति स्तुत्यनुपपत्तिः, * पवित्रं परममित्यादिसमभिव्याहारवैयर्थ्यं च। निर्विशेषलक्षणायां तु स्तुतिर्न कथंचिदपि सम्भवति; गुण्यवच्छिन्नगुणाभिधानरूपत्वात्तस्या इति। पूर्वापरादिविसंवादाच्च न कुत्रापि निर्गुणसिद्धिः। अपिच अविद्यानिवृत्त्यर्थमिह ज्ञातव्यमुपहितं निरुपाधिकं वा; आद्ये तत्त्वावेदकतटस्थस्वरूपलक्षणादिभिरपि तद्ग्रहादविशिष्टब्रह्मणि वृत्त्यसिद्ध्याऽस्मदिष्टसिद्धिस्स्यात्। स्याच्चातत्त्वज्ञानादेव मोक्षसिद्धिः, तस्य मिथ्यात्वेनैव युष्माभिरङ्गीकारात्। द्वितीये तु अतद्व्युत्पन्नेन तदुक्त्ययोग एव। तल्लक्षितं तज्जिज्ञास्यते लक्ष्यते शोध्यते चेति चेत्; तत एव निर्विशेषलक्षकब्रह्मशब्दात् ज्ञातत्वलक्षितत्वशोधितत्वसिद्ध्या जिज्ञासाद्यनपेक्षा स्यात्। नच जिज्ञासादौ विधिः, अदृष्टार्थत्वाभावात्; येन पिष्टपेषणं सहेम। निरुपाधिके ब्रह्मशब्दवृत्तिमविदुषः प्रतिबोधनेन सर्वं सार्थमिति चेत्; किं मुख्याममुख्यां वा? पूर्वत्र प्रस्तुतव्याघातः, सर्वस्योपहितमुख्यवृत्तिविषयबोधनोपक्षीणत्वात्, अनुपहिते हि लक्षणामेव वदसि, अभिधानाङ्गीकारे वा किं सार्वज्ञ्यादिविशिष्टपरब्रह्माभिधानप्रद्वेषेण? उत्तरत्र * अधीहीत्यादिवैयर्थ्यम्; ब्रह्मशब्दस्य मुख्यार्थमधीहीत्युक्ते लक्ष्यार्थलक्षणोपदेशस्यासंगतेः। लक्ष्यार्थमधीहीति तु निरुत्थानम्, कारणाभावात्; मुख्यार्थबाधादिनिश्चयपूर्वकत्वादमुख्यवृत्तिविज्ञप्तेः तन्निश्चयस्य चात्र ततः प्रागसिद्धेः, तत्सिद्धौ वा निर्विशेषावगमे किं प्रश्नेन प्रत्युक्त्या वा? मुख्यार्थबाधो निश्चितः,

लक्ष्यार्थविशेषश्च न विदितः । अस्मिन्नवसरे प्रश्नाद्यस्तु । माभूत् । किं प्रत्यक्षेण बाधः? किं वाऽनुमानेन? अथ तर्केण? अथवा तादृशेनागमेन? नाद्यः, अतीन्द्रिये प्रत्यक्षबाधायोगात् । न द्वितीयतृतीयौ, अनुमानस्य तर्कमात्रस्य च नित्यागमैः स्पर्धितुमशक्तेः । न चतुर्थः, न बृहति न बृंहयतीति च वाक्यान्तराभावात् । निर्गुणादिवाक्यैस्तत्सिद्धिरिति चेत् तथाऽपि निर्मूलः प्रश्नः, तैरेव बुभुत्सितबोधात् । नच तैरपि तत्सिद्धिर्न्याय्या, अविरुद्धविषयसिद्ध्या तेषामप्यान्यपर्यस्य वक्ष्यमाणत्वात् । आपातविदितार्थश्रुतिविप्रतिपत्त्या सन्दिहानः कीदृग्भूतं ब्रह्मशब्दविवक्षितमिति पृच्छतीतिचेत्, नैवम्; तटस्थस्वरूपलक्षणाभ्यामपि कारणत्ववैलक्षण्यविषयाभ्यां सन्देहस्यैव स्थापनप्रसङ्गात् । नच निर्विशेषं सविशेषं वेति विमृशतो जगत्कारणत्वोक्त्या निर्विशेषत्वनिश्चयस्सिध्येत् । अपि तु सर्वकारणत्वाक्षिप्तं सर्वज्ञसर्वविदादिशब्दकण्ठोक्तं च सर्वज्ञत्वादिकं बृहत्त्वमेव निर्धार्येत ।

नन्वविदितमुख्यलक्षकविभागः शिष्यो मुमुक्षुभिर्जिज्ञास्यं ब्रह्मेति सामान्यत उपश्रुत्य तल्लक्षणं पृच्छति । आचार्यस्तु कृत्स्नविद्ब्रह्मशब्दलक्ष्यनिर्विशेषवस्तुलक्षणमुपदिशतु । तदपि न, मुमुक्षुभिर्जिज्ञास्यं निर्विशेषमित्यस्यैव निर्मूलत्वात्; प्रत्युत *तमेवं विद्वानित्यादिभिर्विभूतिगुणविग्रहव्यापारविशिष्टमहापुरुषवेदनस्यैवामृतत्वप्राप्त्युपायत्वश्रवणादबाधाच्च । अतो यथाश्रुत एव ब्रह्मशब्दार्थः । निर्वक्ति च *यास्कः*—*ब्रह्म परिवृढं सर्वत इति । इदं सर्वमभिप्रेत्याभाष्यत—*ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयत इति । अभिधीयते—मुख्यया वृत्त्या बोध्यते । अनेवंनामकमनेवंविधं च किमपि ब्रह्मेति वदतां सर्वेषामप्यत्र निरासो भाव्यः । विशेषणद्वयेन च ब्रह्मपुरुषोत्तमशब्दयोः निरुक्तिरपि व्यज्यते ॥

॥ इति शतदूषण्यां ब्रह्मशब्दवृत्त्यनुपपत्तिवादः प्रथमः ॥ १ ॥

॥ अथ जिज्ञासानुपपत्तिवादो द्वितीयः ॥ २ ॥

अथ स्वात्मैकभासस्य निर्विशेषस्य दुष्यतः । विशुद्धस्यापि जिज्ञासा परेष्टा प्रतिषिध्यते ॥

यदाहुः—ब्रह्मशब्दनिर्दिष्टं विचार्यम्, अनुदितानस्तमितस्वरूपैकप्रकाशमशेषविशेषशून्यमनाद्यविद्यान्धकारितं नित्यशुद्धं चेति । तत्र विचित्रो व्याघातः । यद्धि न वित्तिकर्म, कथं तत्र जिज्ञासा? सामान्यतो विदिते विशेषतश्च वेदितव्ये तत्प्रवृत्तेः । अन्यथा हेतुप्रयोजनविरहे तदयोगात् । नच ब्रह्मणि तथाविधवेदनद्वयविषयत्वं परैरिष्यते । जिज्ञासापूर्वकं परीक्षणमत्र प्रक्रम्यते । तच्च तत्र प्रमाणोपक्षेपेण । प्रमाणं च निर्विषयं न निरूप्यम् । सविषयत्वे तु तद्विषयत्वाद्दृश्यत्वमिथ्यात्वजडत्वादिस्वोक्तानिष्टापत्तिः । स्वरूपप्रकाश एव हेतुः फलं च जिज्ञासाया इति चेन्न; तस्यास्तदुभयसामानाधिकरण्यनियमदृष्टेः । स्वरूपप्रकाशस्य च तदेकाधारताभावात् । अनादेः प्रकाशस्य च निरपेक्षहेतुत्वे जिज्ञासानादित्वप्रसक्तेः । सापेक्षत्वे यथादर्शनं स्वविषयवेदनापेक्षणात् । प्रागसिद्धस्य तुच्छत्वकार्यत्वयोरन्यतरप्रसङ्गात् प्राक्सिद्धस्य फलत्वायोगात् । फलत्वे चानादित्वभङ्गात् । उपहितरूपेण वेदनद्वयविषयत्वाज्जिज्ञासा स्यादिति चेन्न; हेतोरुपहितविषयत्वाभ्युपगमेऽपि फलस्य तथात्वे भ्रान्तित्वापातात् । भ्रान्तेश्चासंपाद्यत्वान्न तदर्थं प्रेक्षावतां प्रारम्भः । भ्रान्तिमेव प्रमितिं मन्यमानैस्सा संपाद्येति चेन्न; परीक्षकेभ्योऽपि प्राथमिकभ्रान्तिप्रमात्वव्यवसायिनामेव प्रागल्भ्यप्रसङ्गात् ।

स्वरूपव्यतिरिक्तं कृत्स्नं मिथ्येति प्रयोजकशिक्षणविरोधाच्च । नित्यभूतेऽपि समाधिवत् स्वमात्रसाक्षित्वं वैशद्यमात्रं वा साध्यमिति चेन्न ; तयोरपि तत्स्वरूपत्वे सिद्धत्वात् । धर्मत्वे सत्यत्वमिथ्यात्वविकल्पक्षोभात् । अतिरिक्ताकारप्रकाश एव चेद्वैशद्यम्, तस्मिन्नप्याकारे स एव विकल्पः । नित्यस्वसाक्षिणि निरंशे निर्विशेषे च क इदानीं प्रकाश्य आकारः ? कथं च जिज्ञासा ? इदं किमिति वा कथमिति वा सा स्यात्, सर्वत्र यथायथं विदिताविदिताकारभेदो दुस्त्यजः, कृत्स्नावगत्यनवगत्योर्नैष्फल्यनिर्हेतुकत्वाभ्यां तदयोगात्, किं कथमित्यत्र का गतिरितिचेत्, न ; तत्रापि सामान्यतः प्रतीतसमुदायान्तर्गतविशेषनिर्धारणार्थत्वात्किमादेः । एतेषु किं कथमित्येव हि तत्राकाङ्क्षा ।

यः पुनर्ज्ञाताज्ञातांशविकल्पेन जिज्ञासास्वरूपमेव खण्डयेत् स ब्रह्मजिज्ञासामपि जिघांसतीति कः प्रकृतोपयोगः ? इष्टा च सा यथालोकमिहापि, अन्यथाऽनारम्भेण शास्त्रोच्छित्तेः । अस्त्विहापि सामान्यतः स्वरूपज्ञप्तिः ; अध्यासविरोधिरूपेण विशेषतश्च जिज्ञासा । मैवम्, निर्विशेषे सामान्यासिद्धेः निस्सामान्ये च विशेषायोगात् । कल्पनया तदुपपत्तिरिति चेन्न, सामान्यरूपस्य कल्पितत्वे स्वरूपोच्छित्तेः विशेषासम्भवाच्च । न ह्यकिंचिद्भूतो विशेषतः कश्चित् स्यात्; न खलु खरशृङ्गे कुण्ठत्वादिः । नच * अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति श्रावयन्ती श्रुतिः ब्रह्मणस्सामान्यधीबाधं सहेत । अत एव कल्पितास्तित्वरूपसामान्याकारभ्रमाद्विशेषबुभुत्सेति प्रत्युक्तम्, अपसिद्धान्ताच्च । विशेषस्य तु कल्पितत्वे तज्जिज्ञासावैफल्यम् । न हि ब्रह्मण्यसदपूर्वाकारकल्पनार्थं पूर्वकल्पितमिथ्याकारप्रतीत्यर्थं वा शारीरकमित्यवेदबाह्यः कश्चिदपि क्षमते । कल्पिताकारमिथ्यात्वबोधनार्थमिति तु स्यात्, न तर्हि ब्रह्म जिज्ञास्यम्, अपि त्वयमाकारस्सत्यो मिथ्या वेति । ततः किमिति चेत्, श्रुतिसूत्रस्वरसार्थभङ्गस्तावत् । ब्रह्मात्मैक्यं शास्त्रवेद्यमिति स्वमतव्याहतिश्च । कल्पितभेदमिथ्यात्वधीरेव तद्धीरिति चेत्, न ; माध्यमिकमतेऽपि तद्भावेन त्वदिष्टैक्यलाभे तद्विवादविलयापातात् । यच्च मन्यसे—कल्पिताकारमिथ्यात्वबुद्ध्याऽपि ब्रह्मणस्तच्छून्यत्वमवसेयमिति तज्जिज्ञासाद्युपपत्तिरिति, तदपि यदि सामान्यबुद्धिक्रोडीकृतं तदा न जिज्ञास्यम्; बहिष्ठस्य तु सत्यत्वे सद्वितीयता । मिथ्यात्वे प्रतियोगिसाहित्यसत्यता । साहित्यराहित्ययोस्सहजसङ्घर्षात् । परस्परविरोधे च प्रकारान्तरस्थित्ययोगात् । यदि राहित्यमपि कल्पितं कथं तदा कल्पिताकारराहित्यनिवृत्तिः ? यत्किञ्चिन्निवृत्तिमात्रं तु प्रागपि सुलभमिति कृतं तदर्थविचारव्यसनेन । अतस्स्वीकुरु वा सतस्सत्याकारद्वयवैशिष्ट्यम्, परिहर वा तज्जिज्ञासामिति । किंच यद्यशुद्धं ब्रह्म जिज्ञासोर्वेदितव्यं तर्हि दुस्त्यजं नैष्फल्यम्, तथा प्रकाशस्य संसारभेषजत्वानभ्युपगमात् । अन्यथा प्रागेव मुक्तिसिद्धौ किमर्था जिज्ञासा ? कथंच अशुद्धतत्त्वोपदेशिनश्शास्त्रस्य तत्त्वावेदकत्वम् ? कथंतरामतत्त्वज्ञानेन भ्रान्तिविलयः ? ननु भूरन्ध्रभ्रमेण दामदर्वीकरभ्रमनिवृत्तिवत्स्यात्, न स्यात् तद्वदेव भ्रान्त्यन्तरस्थितावात्यन्तिकत्वासिद्धेः । तद्विलापकतत्त्वज्ञानादेरुक्तक्रमेणात्रासंभवात् । अहेतुकविनाशादेश्च निरसिष्यमाणत्वात् । शुद्धं तर्हि जिज्ञास्यमपि न ते स्यात् ज्ञप्त्या तत्स्वरूपस्पर्शानभ्युपगमात् । शाखाचन्द्रन्यायेन स्वरूपस्पर्श इवेति मतमिति चेत्, कथं तदधीनबोधविषयतामन्तरेण दृष्टान्तदार्ष्टान्तिकयोस्तदुपलक्ष्यत्वम् ? तद्विषयत्वे च कथं तत्प्रयुक्तदोषातिक्रमः ? सोऽपि बोधः स्ववेद्यताया भ्रान्तिरसत्यश्चेत्यदोष इति चेत्, विलीनं तत्त्वावेदकवाक्यैः । वेद्यमिथ्यात्वमन्तरेण भ्रान्तित्वायोगात् । उपलक्षणपर्यालम्बननैष्फल्याच्च । शुद्धिश्चास्य नित्याऽनित्या वा ? आद्ये किमर्था जिज्ञासा, अन्ततस्तस्यास्तादर्थ्यात् । शुद्धताध्यवसायार्थं सा स्यात्; न तु शुद्ध्यर्थमिति चेत् न ; तदध्यवसायेनापि तत्सिद्ध्यर्थेन भवितव्यम्, अन्यथा

नैष्फल्यात् । आरोपिताशुद्धिनिरसनात्साफल्यमिति चेन्न, आरोपसंभवे नित्यशुद्धचयोगात् । उपरक्तेऽपि स्फटिके शुभ्रत्ववत्तत्सम्भव इति चेन्न, भावानभिज्ञानात् । नहि वयमारोप्यदोषत्वेनाशुद्धिं प्रसञ्जयामः, ब्रह्मण्येव कुदृष्टिकल्पितविविधदोषदृष्टेरभ्युपगमात्, किंतु भ्रमाद्याधारतया । न तथा स्फटिकस्स्वयं स्वात्मनि रागमध्यस्यति । नच तत्कर्तृकोऽन्यकर्तृको वा रक्तताध्यासस्तच्छैत्वतिमाख्यशुद्धिविरोधी । इह तु स्वदोषेण ब्रह्मणि स्वयमेव बंभ्रम्यमाणे कथं भ्रान्त्यादिप्रत्यनीकतामयी शुद्धिः ? नित्या भ्रान्तिरपि स्फटिकरागादिवत्तत्त्वतो नास्तीति निस्तार इति चेत्, स्थितं तर्हि विचारनैष्फल्यम् । असत्येव भ्रान्तिस्सतीव भातीति तन्निवर्तनं फलमिति चेत् न ; तत्सत्त्वभ्रमसत्यत्वमिथ्यात्वविकल्पे सद्वितीयत्वानवस्थयोरन्यतरापातात् । स्वरूपेण ब्रह्म न भ्राम्यति, किन्तु जीवेश्वररूपाभ्यामिति चेत्, हन्त एकां व्याहतिं परिहर्तुमनेकामुपादत्से, कथमभ्रान्तस्य तस्य तद्भावः ? कथं सर्वज्ञोऽपि भ्राम्यतीति विवक्षाऽप्युत्तिष्ठेत् ? कथंचैक आत्मा युगपत्सर्वज्ञमज्ञं चात्मानमनुसंदधीत ? प्रपञ्चयिष्यते चैतत् । उत्तरत्र तु नित्यशुद्धत्वश्रुत्यादिविरोधः । किंचोभयावधिमत्तया तदनित्यत्वम् उत्तरैकावधिमत्तया वा ? पूर्वैकावधिमत्तया वा ? नाद्यः, त्रिवर्गापवर्गयोरैकराश्यप्रसङ्गात् ; वैराग्योपदेशादिवैयर्थ्यात् ; अपुनरावृत्तिश्रुत्यादिविरोधाच्च । अत एव न द्वितीयः—बन्धमोक्षयोर्व्युत्क्रमताप्रसङ्गात्, शुद्धेरसाध्यत्वेन विचारादिनैष्फल्याच्च । तृतीयस्तु न शुद्धेर्नित्यस्वरूपैक्ये स्यात् । निरवधित्वसावधित्वयोर्नित्यवैरात् । अतिरेके च स एव सत्यासत्यविकल्पावतार इति । यद्यप्यस्मन्मते नित्यशुद्ध ईश्वरः, साध्यशुद्धिः क्षेत्रज्ञश्च जिज्ञास्येते ; तथाऽपि न प्रतिबन्दी, ईश्वरशुद्धेरसाध्यत्वात् । जीवशुद्धेस्साध्याया अपि स्वरूपान्यत्वात्सत्यत्वाच्च । उदारगुणसागरः परमपुरुषः स्वाराधनात्मकशास्त्रार्थसंप्रीतस्त्रिवर्गमपवर्गं च प्रयच्छतीति हि प्राची मर्यादा । स यदि स्वयमेव भ्राम्येत् स्वाश्रितत्राणौपयिकगुणहीनो वा, न तर्हि जिज्ञास्यः, * स्वरक्षणेऽप्यशक्तस्येति न्यायात् । कल्पितसार्वज्ञ्यादियोगात् तदभावेऽपि तीर्थादिवद्वा तस्य भजनं स्यादिति चेन्न, कल्पितस्य सार्वज्ञ्यादेर्जिनादिष्वपि सिद्धेः तदुपसत्तिप्रसङ्गात् । सर्वैस्तेषु न तत्क्लप्तिरिति चेन्न, अविशेषात् । महाजनपरिग्रहाद्विशेष इति चेन्न, सर्वेषां सर्वतस्संरूढत्वमिच्छतां क्वचिदपि प्रामाणिकत्वादिलक्षणमहत्त्वस्यासिद्धेः, प्राचुर्यस्य विगानादप्रयोजकत्वाच्च । यत्तु तीर्थादिवदिति तत्तदा सह्येत, यदि तत्सेवयेव तदुपसत्त्या प्रसाद्योऽन्यः । न हि क्रियातच्छक्त्यपूर्वाण्येव फलन्तीति नैगमः पन्थाः । उक्तन्यायेन जैनगन्धिवेदान्तिमतेऽपि जिज्ञासानुपपत्तिर्द्रष्टव्या । तदेतदखिलमन्तर्निधाय ब्रह्मशब्दाभिधेयमुभयलिङ्गं सर्वेश्वरं प्रस्तुत्य तस्यैवारम्भसूत्रे विवक्षिततत्वमाह—* तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्य इति ॥

॥ इति शतदूषण्यां जिज्ञासानुपपत्तिवादो द्वितीयः ॥ २ ॥

———

॥ अथ ऐकशास्त्र्यसमर्थनवादस्तृतीयः ॥ ३ ॥

त्रय्यन्ताः कर्मभागेन सौहार्दं समधिश्रिताः । मुक्तिं यद्भजनादाहुस्तमनन्तमुपास्महे ॥

स्थितं तावदध्ययनविधिनाऽध्यापनविधिना वा प्रयुक्तमध्ययनं साङ्गसशिरस्ककृत्स्नस्वाध्यायविषयमिति । रागतो विधितो वा प्रयुक्तस्तदर्थविचारोऽपि कृत्स्नगोचरः, तयोस्संकोचकाभावात् । ननु विधिप्रयुक्तौ माभूत्सङ्कोचः,

रागप्रयुक्तौ तु स्यात्, यावद्रागं प्रवृत्त्युपपत्तेः; मैवम्; विकल्पासहत्वात्। किं ब्रह्मणि विचारसङ्कोचः? किं वा कर्मणि? नाद्यः; पुरुषस्य चतुर्ष्वपि पुरुषार्थेषु रागसम्भवात्, क्रमेण भोगसम्भवे विरोधाभावाच्च। सन्ति ह्युभयभावनास्तथाविधाः। यस्य तु काचित्को रागः, तस्यैकदेशविचारे का विचिकित्सेति चेन्न, यस्य लोकायतोपप्लुतमतेर्द्विवर्गमात्रनिष्ठस्य वेदोदितेषु चतुर्ष्वप्यनास्था, यस्य चाशक्तिरापद्वा तस्य केति प्रसङ्गात्। अस्त्वनर्हस्यानधिकारः, त्वर्हं प्रति प्रवृत्ता मीमांसेति चेत्, तुल्यं त्रिकाण्ड्यामपि। तिष्ठतु पुरुषार्थरागः, कृत्स्नप्रवचनादिरागादपि कृत्स्नविचारस्समस्ति, तेन न ब्रह्ममात्रे विचारसङ्कोचः। कर्ममात्रे च विचारं सङ्कोचयन् कबन्धमीमांसकस्तु राहुमीमांसकैरपि प्रतिवक्तव्यः, सिद्धेऽपि व्युत्पत्तिसम्भवात्। अप्राप्ते स्वतः पुमर्थे च विषये प्रवृत्त्यनङ्गत्वेऽपि, श्रवणादियोगादर्थज्ञानस्य स्वतन्त्रत्वे उपायानुष्ठानशेषत्वेऽपि, तदुपयोगिसिद्धार्थबाधायोगाच्चेति। कर्मशेषभूतस्यात्मनः शास्त्रान्तराद्विचार इति वदताऽपि शारीरकं शास्त्रैकदेश इति स्वीकर्तव्यम्, अन्यतस्तदयोगात्। तेनैव दन्तिभुक्तकपित्थन्यायेन निस्सार एव वेदान्त इति नास्तिकानां वचनमवधूयते। अस्तु तर्हि ब्रह्मैकविषयतया विचारसङ्कोचः, अतिशयितपुरुषार्थप्रतीतौ * स्थितेऽरविन्दे इति न्यायावतारादिति चेन्न, कर्मविचारस्य कैश्चिदप्यननुष्ठानप्रसङ्गात्। अस्त्विति चेन्न, प्रत्यक्षविरोधात्। अतिशयितपुरुषार्थप्रतीत्यभावात्कस्यचिदुपपत्तिरिति चेन्न; तदभावस्तस्य त्रय्यन्तभागानध्ययनाद्वा तत्सहकारिविरहाद्वा? नाद्यः, विधेः कृत्स्नविषयत्वस्थापनात्। न द्वितीयः, साङ्गाध्ययनादेव तत्रापि तत्सिद्धेः। न हि साङ्गाध्ययनविधेस्तत्रैव सर्पमारः, अन्यत्रापि तत्प्रसङ्गात्। तथात्वे वा क शास्त्रारम्भः? तत्सिद्धावप्यनादिदुर्वासनादार्ढ्यादपथे प्रवर्तन्ते कर्ममीमांसका इति चेन्न, त्वयाऽपि विविदिषासाधनाधिकारे कर्मणां सत्पथत्वस्वीकारात्। तथाऽपि तद्विचारश्शारीरकशेष इति चेत्, सिद्धं शास्त्रैक्यम्। कर्मस्वरूपादिविचारमन्तरेण विविदिषार्थविनियोगायोगात्। वेदनार्थविचारपक्षेऽपि किं पुनः। भवान्तरीयसुकृतविशेषमृदितकषायस्य कस्यचिदयत्नेन विविदिषोत्पत्तौ किं तदर्थकर्मविचारेणेति चेन्न, तथैव कस्यचिदत्यन्तमृदितकषायस्य जातिस्मरणादिवत्सिद्धज्ञानतया शारीरकेऽप्यनारम्भात्। तदर्हस्य तदारम्भ इति चेत्, एवमुभयार्हस्य उभयारम्भ इति तुल्यम्। न ह्यनधिकारिणं विधिरधिकुरुते; रागोऽपि तथा; * न ह्यशकनीयमर्थं वेदोऽपि विदधातीति न्यायात्। यदा च यावज्जीवमनुष्ठेयं ज्ञानमपवर्गोपाय इति सेत्स्यति, तदा तदुपचयार्थं तदर्थविविदिषानुवृत्त्यर्थं वा सत्कर्मणां नित्यानुष्ठेयत्वेन विचारोऽवश्यंभावी। न च जन्मान्तरकर्मबलाद्यावज्जीवं विविदिषा स्यादिति निश्चेतुं शक्यम्, प्राक्तनैरद्यतनैर्वा प्रबलैर्विरोधिकर्मभिः तत्प्रतिबन्धशङ्कयाऽपि नित्यं सत्कर्मणां संग्राह्यत्वात्। अन्यथा प्राक्तनैरेव कर्मभिर्वृष्टिस्स्यादिति कारीर्यादिकं नानुष्ठीयेत।

नच नित्यनैमित्तिकविधिः विविदिषोत्पत्त्या निवर्तते, वर्णाश्रमादिनिबन्धनत्वात्तस्य। वर्णाश्रमाद्यभिमाननिवृत्त्या तन्निवृत्तिरिति चेत्, केयमभिमाननिवृत्तिः? किं तद्भ्रमस्य निवृत्तिः? उत स्वसमवेतत्वभ्रमस्य निवृत्तिः? किंवा देहात्मतादात्म्यभ्रमस्य निवृत्तिः? अथवा वर्णाश्रमाद्याश्रयपिण्डसम्बन्धभ्रान्तिनिवृत्तिः? अथवा पिण्डस्यैव निवृत्तिः? नाद्यः, असिद्धेः। न द्वितीयः, कर्ममीमांसकानामपि पारलौकिकात्मविदां वर्णादेस्स्वसमवेतत्वभ्रमाभावेन कर्मणामधिकार्यभावप्रसङ्गात्। नहि देहात्मभ्रमवन्तं प्रति धर्मोपदेशः। न तृतीयः, भ्रमनिवृत्तिर्हि देहातिरिक्तात्मविस्रम्भौपयिकतया पारलौकिककर्मानुष्ठानयोग्यतामेवावहेदिति कथं तया सा निवर्तते? न चतुर्थः, तत्संबन्धस्य सत्यत्वेन भ्रमत्वासिद्धेः। न पञ्चमः, ब्रह्मविचारस्याप्यनारम्भप्रसङ्गात् प्रत्यक्षादिविरोधाच्च। वास्तवनिवृत्तिमात्रविवक्षाया-

मविरोध इति चेन्न, तस्य कर्माधिकारदशायामपि भवता स्वीकारात्। किंच यावता कर्माधिकारो निवर्तत इति मनुषे, तावता वेदान्तश्रवणाद्यधिकारोऽपि निवर्तत इति ब्रह्ममीमांसैव न स्यात्। नचायमिष्टप्रसङ्गः, तत्त्वज्ञानोदयात्पूर्वं तदनभ्युपगमात्। ननु कर्ममीमांसाया वेदान्तविचारानुपयुक्तत्वान्न तया सहास्यैकशास्त्र्यमितिचेन्न, अनुपयोगासिद्धेः। कोऽसावुपयोग इति चेत्, न्यायोपजीवनं तावत्। तथाहि—बाह्यान्तरनिमित्ताप्रामाण्यनिराकरणेन प्रमाणलक्षणं तावत्कृत्स्नोपयुक्तम्। भेदलक्षणोपजीवी च गुणोपसंहारपादः। तार्तीयाश्च श्रुतिलिङ्गादयस्सार्वत्रिकाः। प्रयुक्तिश्च वर्णाश्रमादिधर्माणां विद्याप्रयुक्तत्वाश्रमप्रयुक्तत्वादिविमर्शे निविशते। गतिचिन्तायां च पाञ्चमिकः क्रमः। कर्ता विद्याधिकारिचिन्तने विशेष्यते। अतिदेशादयश्च * तदेव रूपं यदमुष्य रूपम् इत्यादिषु। अतः कर्ममीमांसानिरूपितस्वरूपैस्तत्तन्न्यायैरेव हि वेदान्तार्थो विचार्यते। अपूर्वास्तत्र कतिपये न्यायाः। विद्याङ्गभूतयज्ञादिस्वरूपशिक्षणं च। अन्यथा * यज्ञेनेत्यादिवाक्यार्थानवबोधप्रसङ्गात्। न ह्यविदितपदार्थविशेषो वाक्यार्थावसायी स्यात्। यज्ञादिकल्पनं च तत्रतत्र क्रियते ; तदपि यज्ञादिस्वरूपनिरूपणसापेक्षम्।

यच्चातिशयितपुरुषार्थप्रतीत्या तदर्थी वेदान्तभाग एव प्रवर्ततामिति, तत्रेयं प्रतीतिः किमापातसम्भवा? उत निर्णयात्मिका? न प्रथमः * अपाम सोमममृता अभूम * अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवति इति कर्मभागेऽप्यक्षयफलापातोपलम्भात्, ब्रह्मभागेऽपि * न प्रेत्य संज्ञाऽस्तीत्यादिभिरपुरुषार्थापातोपलम्भात्। ननु पूर्वापरवाक्यानुगुण्यात्तेषां स्तुतिमात्रपरत्वम्, अस्य तु वाक्यस्य तस्मादेव परमपुरुषार्थ एव तात्पर्यमिति वैषम्यमस्तीति चेत्; किं तेन, अप्रमितत्वेन विचारनियमं प्रत्यनुपकारकत्वात्। न द्वितीयः, मीमांसया विना तदसिद्धेः। तत्त्वविदुपदेशात्तत्सिद्धिस्संभवतीति चेत्, तर्हि ब्रह्ममीमांसाया अप्यनारम्भस्स्यात्; तदुपदेशत एव ब्रह्मस्वरूपसिद्धेः, तत एव भ्रमनिवृत्तेश्च। अत एकस्यैव पुरुषस्य वेदोदितसर्वपुरुषार्थयोग्यतामाश्रित्य एकव्याख्येयव्याख्यानात्मना विंशतिलक्षणमेकं शास्त्रमिति। एतेनार्थप्रयोजनाधिकारिभेदाच्छास्त्रभेद इति निरस्तम्, सामान्यतो वेदार्थपुरुषार्थतदर्थित्वरूपेण तेषां भेदासिद्धेः, अवान्तरार्थभेदादेश्शास्त्रैक्येऽप्यविरोधात्। अन्यथा षट्काध्यायादिभेदेऽपि भिन्नशास्त्रत्वप्रसङ्गात्। नचैवं वेदार्थानुबन्धित्वाविशेषाद्विद्यास्थानभेदविलयप्रसङ्ग इति वाच्यम्, उपकारभेदेन तद्भेदव्यवस्थापनात्। अत एव हीतिहासपुराणयोरदूरविप्रकर्षादेकविद्यास्थानत्वनियमः। नच धर्मशास्त्रस्येवात्र महर्षिभिः पृथक्परिसङ्ख्यानम्। तथाऽपि भिन्नकर्तृकयोः कथमेकप्रबन्धत्वमिति चेन्न ; एकेनापि कर्त्राऽनेककार्यारम्भदर्शनात्, अनेकैरप्येकरथगोपुरप्राकारादिनिर्माणदर्शनाच्च। निबन्धनेष्वयं विशेष इति चेन्न ; तत्राप्येकेन विदुषाऽनेकप्रबन्धकरणदर्शनात्, पाणिनीयवृत्तिकादम्बरीप्रभृतिषु चानेककर्तृकत्वेऽप्येकप्रबन्धत्वसंप्रतिपत्तेश्च। तत्र कर्तृभेदे किं प्रमाणमिति चेत्, कर्मब्रह्ममीमांसयोरपि वा किम्? उपदेशपारम्पर्यमिति चेत्, तुल्यम्। अस्तु तर्ह्यर्थविरोधाद्भेद इति चेत्; कोऽसौ विरोधः? द्वैताद्वैतगोचरत्वमिति चेन्न, तयोरेकनिष्ठत्वासिद्धेः। न हि कर्मकाण्डनिरूपितफलकरणेतिकर्तव्यतादीनामैक्यं ब्रह्मैक्यादिविषयेषु वेदान्तेष्वभिधीयते। तत्सत्यत्वमिथ्यात्वप्रतिपादनाद्विरोध इति चेन्न, वेदान्तभागस्य प्रपञ्चमिथ्यात्वतात्पर्याभ्युपगमे कर्मभागस्य तत्सत्यत्वप्रतिपादनतात्पर्यासिद्धेः। सत्यत्वाभावेऽपि हि त्वदुक्तव्यावहारिकमर्यादया फलकरणभावादिकं निरूपयितुं शक्यते। अन्यथा वेदान्तविचारस्यापि प्रमाणतर्कादिभेदसापेक्षत्वेन स्वव्याघातप्रसङ्गः। सगुणब्रह्मोपासनतत्फलादिचिन्तनमपि शास्त्रान्तरसाध्यं स्यात्।

यदा त्वस्मदुक्तन्यायेन सकलकर्मसमाराध्यमनन्तगुणविभूतिकं ब्रह्म वेदान्तवेद्यम्, तदा तु न विरोधगन्धोऽपि। निरीश्वरत्वसेश्वरत्वाभ्यां विरोध इति चेन्न; *जैमिनिसूत्रे*ष्वीश्वरप्रतिक्षेपादर्शनात्, अर्वाचीनव्याख्यातृजल्पितानां तु अनादरणीयत्वात्। अत एव सेश्वरमीमांसापक्षोऽपि नातीव विच्छिन्नः; परैरनूद्यते च। देवताकाण्डं च कर्मकाण्डशेषतया भाष्यकारैः परिगृहीतम्। * तदुक्तं संकर्ष इति तत्रत्यसूत्राणि चोदाहरन्ति। तस्य च काण्डस्योपसंहारे * अन्ते हरौ तद्दर्शनात् इति देवताकाष्ठां प्रदर्श्य * स विष्णुराह हि इति सर्वदेवताराधनानां तत्पर्यवसानाय तस्य सर्वान्तरात्मत्वेन व्याप्तिं प्रतिपाद्य * तं ब्रह्मेत्याचक्षते तं ब्रह्मेत्याचक्षते इति तस्यैव वेदान्तवेद्यपरब्रह्मत्वोपक्षेपेणोपसंहारात्, सामान्यतोऽपि विशेषतश्चेश्वरः प्रस्तुत इति तत्त्वविदां संप्रदायः। अत एव कर्मकाण्डदेवताधिकरणमपि कर्मप्राशस्त्यमात्रपरम्; किमलौकिकदेवताविग्रहादिसमर्थनप्रयासेन? यथाश्रुतकर्मण एव फलप्रदत्वशक्तिरित्येतावतैवोक्तेन परप्रतिक्षेपात्, अश्रुतवेदान्तानां प्ररोचनासिद्धेश्च, सहसा च गुह्यार्थानामवचनीयत्वात्। एवं सति ब्रह्मकाण्डदेवताधिकरणैकरस्यसिद्धेः। द्रव्यदेवतयोर्द्रव्यबलीयस्त्ववर्णनमपि न देवताविग्रहाद्यपारमार्थ्यलिङ्गम्, प्रतीतिसन्निकर्षविप्रकर्षाभ्यामेव प्राबल्यदौर्बल्यसिद्धेः।

यद्यपि द्रव्यस्यापि धर्मत्वं परोक्षम्, अथापि स्वरूपतः प्रत्यक्षतया विशेषोऽस्त्येव। एवं सर्वत्राविरोधः *सेश्वरमीमांसाया*मनुसन्धातव्यः। तथाऽपि *मध्वादिष्वसम्भवादनधिकारं जैमिनिः, *धर्मं जैमिनिरत एव, *शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः, * परामर्शं जैमिनिरचोदनाच्चापवदति हि, * परं जैमिनिर्मुख्यत्वात्, * ब्राह्मेण जैमिनिरुपन्यासादिभ्यः, * भावं जैमिनिर्विकल्पामननात् इति सूत्रेषु जैमिनिमतस्य पूर्वपक्षत्वेनोपपादनाद्विरोधस्सिद्ध इति चेन्न; अत्यल्पतराप्रधानार्थविवादस्य प्रधानभेदकत्वाभावात्। अत एव हि शास्त्रेषु वार्तिकावतारः। किं पूर्वकृतप्रासादखण्डविषमांशापनयने शेषनिर्माणे तदैक्यं नास्ति? अतः प्रतिसंस्कारेणात्रापि सन्धानम्। यद्वा वैभवोक्तेषु तत्त्वभ्रमो मन्दधियां माभूदिति तदनुवादप्रतिक्षेपौ। तदुक्तं तदुक्तमिति जैमिनिपरिग्रह एव बहुशो दृश्यते। विशेषतश्च *साक्षादप्यविरोधं जैमिनिः, *सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति, * अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके, * तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः इति सूत्रेषु भगवता बादरायणेन स्वाभिमतार्थस्थापनाय जैमिनिस्स्वनाम्नैवोपात्तः। स च भगवान् जैमिनिः * औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशो व्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् इति स्वोक्तार्थसंप्रतिपत्तये स्वाचार्यं बादरायणमेव पुरस्करोति। *जैमिनेर्बादरायणशिष्यत्वं च महाभारतादिषु प्रसिद्धम्*—* सुमन्तुं जैमिनिं पैल्वं वैशम्पायनमेव च इत्यादिना। नन्वत्र व्यासशिष्यो जैमिनिरित्युक्तम्, सत्यं व्यास एवात्र *बादरायणः*—* द्वीपे बदरिकामिश्रे बादरायणमच्युतम्। पराशरात्सत्यवती पुत्रं लेभे परन्तपम्॥ इति हि स्मर्यते। व्यासव्यतिरिक्तेऽपि बादरायणसंज्ञा प्रयुक्तेतिचेत्, तथाऽपि * तपोविशिष्टादपि वै वसिष्ठान्मुनिसत्तमात्। मन्ये ज्येष्ठतमं त्वाऽद्य रहस्यज्ञानवेदने॥ इति रहस्यतमार्थज्ञापकत्वेन प्रसिद्धिप्रकर्षादिः संप्रदायादत्र व्यास एव स्वीक्रियते। अत एव हि युष्मद्भूमिकामाश्रिताः **वाचस्पति**प्रभृतयोऽपि व्यासमेव ब्रह्मसूत्रकृतमाचख्युः। येषु च सूत्रेषु पूर्वपक्षतया जैमिनिमतमुक्तं शारीरके तेष्वपि देवतासद्भावः परब्रह्मसद्भावो मुक्तस्य परब्रह्मसाम्यापत्तिर्विग्रहादिसद्भावश्च प्रतीयते, तदपि च तत्प्रणीतकर्मकाण्डदेवताधिकरणादेरन्यपरत्वं स्थिरीकरोति। नह्यर्वाचीनवज्जैमिनिहृदयानभिज्ञस्तदाचार्यो बादरायणः, अतः परस्परसम्मत्या कार्यान्तरेष्विवात्रापि

यथांशकरणमपि युक्तम् । तदेतदखिलमभिप्रेत्योक्तं भगवता *बोधायनेन*—* संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिः इति । तदेतदुपादाय व्यस्तृणीत च भाष्यकारः । नन्वेतावताऽपि कर्मब्रह्ममीमांसयोरैकशास्त्र्ये प्रबन्धैक्ये वा किं प्रमाणमुपन्यस्तमिति चेत्, किं वा कर्मकाण्डद्वादशाध्याय्यादौ शारीरकचतुरध्याय्यां च प्रत्येकमैकशास्त्र्ये त्वया निर्णीतम् ? क्रमविशेषनियामकसंगतिविशेषविशिष्टाविरुद्धावान्तरार्थशास्त्रान्तरव्यावृत्तासाधारणोपकारार्हसप्रकारैकप्रधानार्थत्वमिति चेत् इदं तु किंप्रमाणमिति निपुणो भूत्वा त्वमेव निरूपय, त्यज वा सर्वत्रैक्यम् । तस्मात् * अथातो धर्मजिज्ञासा इत्यारभ्य * अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् इत्येवमन्तं कर्मदेवतापरदेवतागोचरतया विभक्तकाण्डत्रयं विंशतिलक्षणमेकं शास्त्रमिति तदिदं—* मीमांसाशास्त्रमित्यादिना भाष्येण दर्शितमिति ॥

॥ इति शतदूषण्यामैकशास्त्र्यसमर्थनवादस्तृतीयः ॥ ३ ॥

॥ अथ अविधेयज्ञानभङ्गवादश्चतुर्थः ॥ ४ ॥

विधित्रस्तैर्यत्तत्कथितमविधेयश्रुतिपथैर्विधत्ते दुःखाब्धेर्विलयमविधेया मतिरिति ।
तदुद्धूयोपायं भगवदुपसत्तिं प्रथयते नमस्यामस्यामो यतिपरिवृढाय प्रतिकलम् ॥

यदेतद्भ्रान्तजनजल्पितम्; समूलस्य संसारस्य संविन्मात्रे परस्मिन्ब्रह्मण्यारोपितत्वादलीककलधौतादेरिवाधिष्ठानयाथात्म्याध्यवसायादेव विलयः; नपुनः कर्मणोपासनेन वा विहितेनादृष्टद्वारा । आहुश्च—* मणिमन्त्रौषधादिभ्यो दण्डघातादिनाऽपि वा । क्रियते नैव केनापि मायाकुण्डलिखण्डनम् ॥ इति । यत्पुनरुन्मत्तान्प्रति भिषज्यते; तदपि तत्रानारोपितत्वाभिमतदोषविशेषमोक्षणायैव, न पुनस्तदधीनधीविशेषमात्रसिद्धमिथ्यापदार्थनिवर्तनाय । दोषे तु शममुपेयुषि स्वरसवाहितत्त्वज्ञानादेव तन्निवृत्तिः । अत्राप्याहुः—* भ्रान्तभेषजनिर्माणं न भ्रान्तेरुपशान्तये । किन्तु भ्रान्तिनिदानस्य दोषस्यैवोपशान्तये ॥ इति । नचात्रापि दोषनिवारणाय वैधापेक्षानुप्रवेशः; दोषस्याप्यत्र दृङ्मात्राधीनसिद्धितया मिथ्यात्वाविशेषेण एकहेलयैव तत्त्वज्ञानेन निवार्यत्वात् । ततश्च—

विश्वमिथ्यात्वविज्ञानकुक्षिनिक्षेपभक्षितः । नापेक्षते पुनर्दोषः कर्मायत्तात्मबाधकम् ॥

लौकिकस्य तु दोषस्य व्यावहारिकव्यवस्थानतिक्रमाद्भेपजाद्यवकाशः । यद्यप्यविद्यायामपि सा समाना; तथाऽपि तथाविधत्वप्रबोधनाय प्रवृत्तत्वाद्वाक्यस्य तावतैव तन्निवृत्त्युपपत्तिः । नच ज्ञानं स्वरूपेण विधातुं शक्यम्, अत एव * द्रष्टव्य इत्यपि फलानुवाद इति निरणैषुः । तदर्थतया च न श्रवणादिविधिनैरर्थक्यम् । तादर्थ्यं च प्रतिबन्धकभेदवासनानिरसनद्वारेण । तस्याश्च प्रतिबन्धकत्वमसम्भावनाविपरीतसम्भावनाख्यचित्तविक्षेपहेतुत्वात् । * ब्रह्म वेद इत्यादौ च ज्ञानमात्रस्यैव मोक्षहेतुत्वं श्रूयते । नचास्य वाक्यतस्सिद्धस्यैव ज्ञानस्य विधेयत्वसम्भवः, * अप्राप्ते शास्त्रमर्थवदिति हि न्यायविदः । यत्तु नायं सर्प इति बुध्यस्वेत्यादौ भ्रमनिवृत्त्यर्थं ज्ञानविधिवद्दृश्यते; तत्रापि नायं सर्प इत्येतावतैव सिद्धं ज्ञानं विस्रम्भमभिसन्धाय विधेयवदनूद्यते । यदिच नायं सर्प इत्येतावता भ्रमो न निवर्तेत, तदा जानीहीति परश्शतविधानेऽपि कथं तन्निवृत्तिः ? अतः * तत्त्वमसि इत्याद्युपदेशात् * सोऽहमित्यादिरूपेण विवर्तमानया धियैव विशुद्धा-

धिष्ठाननिष्ठया समूलभेदभ्रमोन्मूलनमिति ॥ अत्र ब्रूमः—

सिद्धे विश्वस्य मिथ्यात्वे धीमात्रात्तन्निवर्तनम् । तदेव न घटेतेति यथावदभिधास्यते ॥

यत्तु लौकिकदोषस्याविद्यायाश्च मिथ्यात्वाविशेषेऽपि व्यावहारिकव्यवस्थया वैषम्यमुक्तं, तदपि न ; मिथ्या-भूतानामपि काचकामलादिदोषाणां ज्ञानेतरनिवर्त्यत्वे दृष्टे सत्यविद्यायामपि तदविरोधात् । अस्त्वविरोधः, तथाऽपि प्रयोजकोपदेशजन्यज्ञानादेव तन्निवृत्त्युपपत्तेः । हेत्वन्तरपरिग्रहे कल्पनागौरवमिति चेन्न, श्रुते तदभावात्, तत्परिग्रह एव तत्प्रसङ्गाच्च । नहि श्रुतहानं न्याय्यम्, येच ब्रह्मव्यतिरिक्तं सर्वं मिथ्येति प्रयोजकज्ञानवन्तः, तेऽपि चक्षुरादिगततिमिरादि-दोषनाशाय प्रतिभटभङ्गाय च भेषजशस्त्रादीन् प्रयुञ्जाना दृश्यन्ते, नपुनर्मिथ्यात्वाध्यवसायमहाभेषजं प्रमाणयन्तो जोष-मासते । आहुश्च—* मायावादिमतस्थाश्च महारोगेण [दूषि] पीडिताः । मञ्चे शयाना दृश्यन्ते किंच भेषजकाङ्क्षिणः ॥ इति । तस्मादविद्यायामपि मिथ्यात्वाध्यवसायस्य प्रयोजकोपदेशवशात्सिद्धावपि दोषान्तरवदेव ज्ञानेतरहेतुनिवर्त्यत्वाविरोधात् तदर्थं कर्माङ्गकोपासनविधानं नानुपपन्नम् । उक्तं च ***वरदराजाचार्यैः***—* यथा हरीतकीखादः क्रियते दोषशान्तये । तद्वद्दुरितशान्त्यर्थं क्रियतां हरिकीर्तनम् ॥ इति ।

यत्तूक्तं न ज्ञानं स्वरूपेण विधातुं शक्यमिति, तत्किं ज्ञानस्याभाव्यरूपतया, उताभावार्थतया, यद्वा साक्षात्प्रयत्नविषयत्वाभावात्, अथवा साक्षात्पुरुषव्यापारत्वाभावात्, उत सांशभावनानुप्रवेशविरहात्, अन्यस्माद्वा कुत-श्चिदिति । न प्रथमः, भवत्पक्षे वृत्तिरूपस्य परपक्षे त्वात्मविशेषगुणस्य अस्मत्पक्षे तु तदवस्थाविशेषरूपस्य करणाधीनतया भाव्यत्वसिद्धेः । आहुश्च—* कादाचित्कस्वभावस्य भाव्यत्वं केन वार्यते । तस्याकारणजन्यत्वे चार्वाकमतचर्वणम् ॥ इति । न द्वितीयः, * ज्ञा अवबोधने इति भावार्थतयैव पाणिनीयस्मरणात्, आत्मस्वरूपभूतज्ञानस्य तु विधानप्रसङ्गा-भावात् । न तृतीयः, प्रयत्नस्याविधेयत्वप्रसङ्गात् ; लोके हि स्वाभिमतकार्यार्थं प्रयतेतेति प्रयत्नविषयविधानदर्शनात् । न चतुर्थः, भावार्थान्तराणामप्यविधेयत्वप्रसङ्गात् । न पञ्चमः, यष्टव्य इत्यादौ यागादेरिव द्रष्टव्य इत्यादौ दर्शनादेरपि तदनुप्रवेशे विरोधाभावात् । नापि षष्ठः, ज्ञानविधिविरोधिनः कस्यचिदन्यस्यापि कुतश्चित्सिद्ध्यभावात् । किञ्च यदि ज्ञानं न विधेयम्, कथं तर्हि यागादिविधिरपि न भज्येत? यागोऽपि हि देवतोद्देशेन द्रव्यत्यागात्मा बुद्धिविशेष एव । एवञ्च द्वादशाहे अविवाक्ये दशमेऽहनि बुद्धिविशेषरूपस्य मानसग्रहादेः कथं विधेयतेष्यते? कथं वा मनश्चिताद्यग्नीनां दृष्टि-रूपाणां तत्त्वविषयाणां चोपासनानां विधेयत्वमिष्यते? कथञ्च दर्शनार्थतयाऽपि श्रवणमनननिदिध्यासनानि विधेयानीच्छसि? तान्यपि ज्ञानविशेषरूपाण्येव । ननु न तानि ज्ञानरूपाणि, अपि तु तदर्थव्यापाररूपाणीति चेत् तन्न ; तदर्थत्वे सत्यपि तेषामपि स्वरूपस्य ज्ञानरूपत्वात् । श्रवणं हि नाम तत्त्वदर्शिन आचार्यान्न्याययुक्तार्थग्रहणम् ; मननमपि तथा एवमेवैत-दिति युक्तितः प्रतिष्ठापनरूपो व्यवसायः ; निदिध्यासनमपि अनवरतभावनात्मकस्मृतिसन्तानः । तदेवमेषां ज्ञानभूतानामेव यदि विधेयत्वमिष्येत, कथं द्रष्टव्य इत्यत्र दर्शनस्य विधेयत्वं नेष्यते । तथाच—

विष्णुर्यष्टव्य इत्यादौ विधिबाधनदर्शनात् । सर्वत्र स्याच्च तद्बाधोऽदर्शने वा न बाधनम् ॥

अथ च ध्यानफलतया दर्शनमनूद्यत इति मन्यसे, तदा मननध्यानयोरपि पूर्वपूर्वफलतयाऽनुवाद इति किं न कल्पयसि? अस्त्वेवमिति चेन्न ; फलोपकार्यङ्गतया श्रवणादित्रयविधिरिति युष्माभिः प्रतिपादनात् । तथा चैकत्रैव

विधेयत्वमनुवाद्यत्वं चेति विरोधः; नहि विरुद्धत्रिकद्वयापत्तिरनुमन्यते तान्त्रिकैः । उक्तं हि—* उद्देशेनानुवादेन प्राधान्येन समन्वितम् । उपादानं विधानं वा गुणत्वं नैव दृश्यते ॥ इति । * उपस्थितेऽतस्तद्वचनात् इति सूत्रोक्तन्यायेनोपासनस्य सांसारिकफलोत्तीर्णे प्राकरणिकस्वरूपाविर्भावपूर्वकनिरतिशयानन्दब्रह्मानुभवाख्यफले सति * द्रष्टव्य इत्यत्र निष्कारण-विधिभङ्गप्रयासेन दर्शनस्य फलत्वं किमर्थं कल्प्यते? नियोगसाध्यत्वे मोक्षस्यानित्यत्वप्रसङ्गादिति चेन्न, मोक्षशब्देन दुःखध्वंसविवक्षायां साध्यत्वेऽपि नित्यत्वोपपत्तेः, प्रायश्चित्तधर्मसाध्यपापध्वंसवच्च । नच दुःखप्रध्वंसो मोक्षः, किन्तु दुःखहेतुसर्वकर्मध्वंसः, दुःखस्य क्षणिकत्वेन स्वयमेव विनाशात् । पुनर्दुःखानुत्पत्तिविवक्षायां तस्यास्साध्यत्वाभावेन प्रसञ्जकाभावः । ब्रह्मस्वरूपविवक्षायामपि तेनैव दत्तोत्तरत्वम् । नह्यनादिसिद्धं ब्रह्म उपायसाध्यमित्यनुन्मत्तो ब्रवीति । स्वरूपाविर्भावविवक्षायामपि नियोगविशेषादत्यन्तवृत्ते प्रतिबन्धे स्वरूपमात्राधीनस्य स्वरूपाविर्भावस्य स्वरूपवन्नित्यत्वा-त्पुनः प्रतिबन्धाभावाच्चानिवर्त्यत्वमुपपद्यते । ननु यद्युपासनविधेः फलतया मोक्षः स्वीक्रियते, तर्हि श्रवणमननदर्शन-विधीनां किं फलमिति चेन्न, * श्रोतव्यो मन्तव्य इत्यनयोर्विधित्वाभावात्, * द्रष्टव्य इत्यस्य तु पृथग्विधित्वाभावात्, निदिध्यासनापरपर्यायमुपासनमेव दर्शनरूपं तस्मिन्विधेयम् । तथा हि—श्रवणं तावत् साङ्गसशिरस्कस्वाध्यायाध्ययन-जनितापातप्रतीतिविदितपुरुषार्थतत्साधननिर्णयार्थिनः पुरुषस्य रागत एव सिद्धमिति न तत्र विध्यपेक्षा । श्रवण-प्रतिष्ठार्थत्वान्मननस्य तदपि तत एव सिद्धमिति न तत्रापि । अतो यथावस्थितवाक्यार्थाध्यवसायस्य ध्यानोप-कारकत्वात् तज्जनकयोश्श्रवणमननयोरिहानुवाद एव । ध्यानं त्वप्राप्तत्वाद्विधेयमेव । यद्यपि चात्र विषयस्यानुकूलत्वा-त्तच्चिन्तनेऽपि रागस्सम्भवति, तथाऽपि तत्तद्गुणविशेषविशिष्टस्याहरहरनुवर्तनीयस्य साङ्गस्य तस्य फलसाधनत्वधिय-मन्तरेण तथाविधविशिष्टानुष्ठानस्य रागप्राप्तत्वं न संभवति, सा च धीश्चोदनयैव, तन्मूलश्च रागो यागादिष्वपि समानो विधेरपेक्षितश्चेति न दोषः ।

ननु यदि ध्यानोपकारकतया श्रवणमननयोरनुवादस्तर्हि * द्रष्टव्य इत्येव विधिरस्तु, ध्यानं तु तदुपकारकत्वेन सिद्धत्वाच्छ्रवणादिवदनूद्यत इति कल्प्यमिति चेन्न; ध्यानस्य दर्शनोपकारकत्वं किमदृष्टद्वारा? उत दृष्टद्वारा? न पूर्वः, तस्य चोदनामन्तरेणासिद्धेः । उत्तरत्रापि दर्शनशब्देन किं चाक्षुषं ज्ञानं विवक्षितम्? उत प्रत्यक्षमात्रम्? यद्वा प्रत्यक्षसमानाकारमिति? आद्ये, * न चक्षुषा गृह्यते नापि वाचा, * मनसा तु विशुद्धेन इत्यादिश्रुतिविरोधः । द्वितीयेऽपि किं लौकिकं प्रत्यक्षम्? उत योगिप्रत्यक्षम्? पूर्वत्र ध्यानस्य लौकिकप्रत्यक्षजनकतायामन्वयव्यतिरेकाद्यभावेन अदृष्टद्वारा तत्सिद्धौ तत्रापि चित्रपशुफलत्वादाविव विध्यपेक्षैव । भावनाबलजं तु प्रत्यक्षं नाभ्युपगच्छामः । तस्यच * वृक्षेवृक्षे च पश्यामीतिवद्भ्रान्तौ स्मृतिवैशद्यमात्रे वा पर्यवसानात् । न भ्रान्तिः, अनङ्गीकारात् । नापि स्मृतिवैशद्यम्, असत्पक्षा-ङ्गीकारप्रसङ्गात् । इतरत्र तु योगिप्रत्यक्षस्य प्रकृष्टादृष्टजन्यत्वात्तन्मूलविध्यपेक्षायां * निदिध्यासितव्य इत्ययमेवात्र विधि-रङ्गीकार्यः । तृतीये तु * द्रष्टव्य इत्यनेन ध्यानस्यैव वैशद्यलक्षणविशेषविधानमिति तदेव सामान्यतो * निदिध्यासितव्य इत्युच्यत इति वैशद्यविशिष्टध्यानसिद्धौ ध्यानदर्शनयोस्साध्यसाधनभावाभावात् कथं दर्शनार्थतया ध्यानानुवादः? नन्वेवमस्तु ध्यानस्य विधेयता, दर्शनं तु योगिप्रत्यक्षात्मकं पृथग्विधेयमिति किं नाङ्गीक्रियते, पृथक्फलनिर्देशाभावादिति न वक्तव्यम्; मोक्षार्थतया विधेयस्य दर्शनस्य प्रधानत्वे तन्निर्वर्तकतया ध्यानस्यापि विधाने पृथक्फलनैरपेक्ष्यात्प्रधानवाक्यार्थैक्योप-पत्तेश्च, अन्यथा दर्शनशब्दस्य मुख्यार्थभङ्गश्चेतिचेन्मैवम्, * ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः इति क्वचिद्

ध्रुवानुस्मृतेः साक्षात्सर्वग्रन्थिविप्रमोक्षहेतुत्वं श्रूयते स्मृतिलम्भ इति सप्तम्या। क्वचित्तु * भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥ इति दर्शनस्य तथैव फलसाधनत्वं श्रूयते। अनयोर्न तावदेकफलसाधनयोर्विकल्पः; गुरुलघुविकल्पायोगात्। अधिकारिभेदेन व्यवस्थितविकल्पकल्पनायामतिगौरवम्, विकल्पकल्पनतद्व्यवस्थाकल्पना चेति।

किञ्च विकल्पस्य प्रयोगत्रयेण प्रामाण्यत्यागाप्रामाण्यस्वीकारत्यक्तप्रामाण्यस्वीकारस्वीकृताप्रामाण्यपरित्यागावृत्तिरूपाष्टदोषदुष्टत्वादन्याय्यत्वमेव। नापि समुच्चयः, यौगपद्यस्याशक्यत्वात्। क्रमेऽप्युपकार्योपकारकयोरुपकार्यस्य फलहेतोरङ्गिनः स्वाङ्गेन सह समुच्चयायोगात्। नच क्रमिकयोरपि दर्शपूर्णमासयोरिव ध्रुवानुस्मृतिदर्शनयोरेकं करणत्वम्, तदुपस्थापकश्रुत्याद्यभावात्। नच अङ्गभूतायां ध्रुवानुस्मृतावङ्गिनो दर्शनस्यैव फलं कीर्त्यत इति न विरोध इति वाच्यम्, अङ्गाङ्गिभावस्याद्याप्यनिश्चितत्वात्, दृष्टद्वारस्यासिद्धेः, अदृष्टद्वारकल्पने गौरवात्। स्वतः प्रतीयमानार्थभङ्गे च श्रुतहानिदोषात्। न चात्र प्रजापतिवाक्यनयः, भूयसांन्यायविरोधात्, * द्वैधे बहूनां वचनमिति तान्त्रिकाः। भूयांसि हि वाक्यानि ध्यानोपासनादिशब्दैर्ध्रुवानुस्मृतिमेव मोक्षसाधनमभिदधति। न केवलं श्रुतिरेव, स्मृतीतिहासपुराणसर्वेतरतन्त्रयोगसांख्यशास्त्राण्यपि। दर्शनं त्वल्पवाक्यावसितम्। एवमीश्वरोपासनस्यैव भूयोभिर्वाक्यैर्मोक्षसाधनत्वावसायात् तदन्यनिषेधश्रुतिसामर्थ्यात् क्वचित्कजीवोपासनानां मोक्षसाधनतया श्रुतानां यथालिङ्गं जीवविशिष्टपरमात्मविषयतया अङ्गतया वा निर्वाहः, अत्र तु न तथेति विशेषः। अतः परिशेषाद् ध्रुवानुस्मृनिदर्शनयो रैक्य एव पर्यवसानम्। विस्तृतं चैतद्भाष्य एव—छागपशुन्यायेन वेदनध्यानादिशब्दानामुत्तरोत्तरं विश्रान्तिप्रतिपादनात्। एवं स्थिते स्मृतिदर्शनशब्दयोर्मुख्यैकार्थासम्भवे कस्यचिदौपचारिकत्वमवश्याश्रयणीयमिति चावधारिते स्मृतिशब्देन प्रत्यक्षज्ञानोपचारे अतिशयासिद्धेः; दर्शनशब्देन तु स्मृतेरुपचारे प्रत्यक्षसमानाकारतारूपवैशद्यातिशयलक्षणविशेषसिद्धेश्च दर्शनशब्देन विशदतमा ध्रुवानुस्मृतिरेव विवक्षितेत्यङ्गीक्रियते। अतोऽत्रापि * निदिध्यासितव्य इति ध्रुवानुस्मृतिविधानात् * द्रष्टव्य इत्येतदपि तद्विशेषसमर्पकमिति। तेन * स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः, * तस्मिन्दृष्टे परावरे इत्यत्र छागपशुन्यायनिर्णीतोऽर्थः एकस्मिन्नपि वाक्ये * निदिध्यासितव्यः, * द्रष्टव्य इत्यनयोरप्याश्रीयत इति न विरोधः। नच तव्यप्रत्ययद्वयविरोधः, * अग्नये पथिकृत इत्यादिषु एकविधेयत्वेऽपि चतुर्थीद्वयवदविरोधात्। एवं स्थिते यदि वाक्यार्थज्ञानस्य मोक्षोपायता तदोपासनादिविधिनैरर्थक्यं दुष्परिग्रहम्, शब्दजन्यप्रत्यक्षवादस्तु परिहरिष्यते।

यत्तु वाक्यार्थज्ञानोत्पत्तौ प्रतिबन्धकभेदवासनानिरासद्वारेण श्रवणमनननिदिध्यासनानामुपकारकत्वमुक्तम्, तदपि हास्यं, वाक्यस्याकाङ्क्षायोग्यतासन्निधिपरामर्शमन्तरेणापेक्षणीयान्तराभावात्। सत्यां तु सामग्र्यां वाक्यार्थज्ञानानुत्पत्त्यनुपपत्तेः। नच प्रतिबन्धकमपि सामग्रीवैकल्यपर्यवसितम्, यथाऽऽहुः—* प्रतिबन्धोऽपि सामग्रीतद्धेतुप्रतिबन्धक इति। विपरीतवासनायाः प्रतिबन्धकत्वस्यैवासिद्धेः, सत्यामपि विपरीतसर्पादिवासनायामाप्तोपदेशलिङ्गादिभिः सर्पादिबाधकं तत्त्वज्ञानमुत्पद्यते। अत एवासम्भावनाविपरीतसम्भावनाख्यचित्तविक्षेपद्वारा भेदवासनायाः प्रतिबन्धकत्वमित्येतदपि निरस्तम्। यदिच भेदवासनानिरसनद्वारेणाद्वैतवाक्यार्थज्ञानोत्पत्तिरिष्यते, तदा न कदाचिदपि तदुत्पत्तिस्सेत्स्यति; उक्तं हि—* यावच्छरीरपातं हि किं न वर्तेत वासना। तन्निवृत्तौ कथं पुंसामुन्मीलननिमीलने॥ इति।

किञ्च अनादिकालोपचितानां पटुतरप्रत्ययाभ्यासादृढतरनिरूढानामपरिमितानां भेदवासनानां कतिपयकालसाध्याविशदप्रत्ययादिमूलाल्पीयस्तमाद्वैतवासनया निरसितुमशक्यत्वात्। किञ्च तत्त्वज्ञाने सति तद्विषयभावनया तद्विपरीतवासनानिरासः तन्निरासे च तत्त्वज्ञानमिति मिथस्संश्रयस्स्यात्। तदप्याहुः—*उत्पन्ने सति विज्ञाने वासना तु निरस्यते। निरस्तवासनस्यैव विज्ञानमिति दुर्भणम्॥ इति। अनुत्पन्न एव तत्त्वज्ञाने श्रवणमनननिदिध्यासनैः क्रमात्तन्निरास इति चेत्, किं तानि तत्त्वगोचराणि? उतातत्त्वगोचराणि? पूर्वत्र विपरीतवासनायां सत्यां तेषामप्यनुत्पत्तिरेव। उत्तरत्रातत्त्ववासनया कथं तत्त्वज्ञानोत्पत्तिप्रतिबन्धकवासनानिरासः? तथाच—* सागरं गन्तुकामस्य हिमवद्गमनोपममिति न्यायः। किञ्च अभेदज्ञाने सिद्धे भेदवासनानिरासस्य किमर्थमपेक्षा? तदसिद्धौ तु तत्प्रतिपक्षवासनानिरासाभिलाषानुत्थानम्। नह्यभेदज्ञानप्रतीतिरभेदप्रतीतिमन्तरेण स्यात्। नच प्रतीतौ तु वैशद्यावैशद्यादिवैषम्यं त्वया वक्तुं शक्यम्, अभेदस्य ब्रह्मस्वरूपायमाणस्य सर्वदैकरूपत्वात्, विशेषग्रहे च भेदप्रतीतित्वप्रसङ्गात्। नच व्यावहारिकभेदोऽत्रास्तीति वाच्यम्, भेदवासनानिरासद्वारेणाभेदग्रहस्य परमार्थविषयत्वात्। अतो न भेदवासनानिरासद्वारेण श्रवणादित्रयस्य दर्शनोपकारकत्वमिति।

यत्पुनरुक्तम्, *ब्रह्म वेद ब्रह्मैव भवति इत्यादौ ज्ञानमात्रस्यैव मोक्षहेतुत्वं श्रूयते; नहि प्रतिपन्नेऽर्थे नास्तिकत्वं न्याय्यम्; अत एवोच्यते * नैषा तर्केण मतिरापनेया इतीति, तदप्यसत्; सामान्यशब्दानां विशेषे पर्यवसानस्य पश्वधिकरणादिन्यायसिद्धत्वात्। न्यायानपेक्षत्वे किं शारीरकशास्त्रेणापि। ध्यानोपासनशब्दयोश्च ज्ञानविशेषविषयतया ज्ञानसामान्यविषयवेदनादिशब्दानां तस्मिन् विशेषशब्दार्थ एव पर्यवसानं युक्तम्, विकल्पसमुच्चयफलान्तरार्थाद्यसम्भवस्योक्तत्वात्; तदुक्तम्—*अष्टदोषा विकल्पे स्युर्गौरवं च व्यवस्थितौ। समुच्चयेऽनपेक्षा स्यादङ्गाङ्गित्वं न मीयते॥ इति। तथा विद्युपास्योर्व्यतिकरेणोपक्रमोपसंहारदर्शनाच्च तयोरैकार्थ्यं सिद्धम्। * मनो ब्रह्मेत्युपासीत इति विहितमेव ह्युपासनम्, *भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद इति फलविधानार्थमनूद्यते। नह्यफलं विधायान्यत्सफलमनुवदितुं युक्तम्; एवं, * यस्तद्वेद यत्स वेद इति वेदनशब्दमात्रश्रावी *जानश्रुतिः* तदर्थम् * यां देवतामुपास्से इत्युपासिनाऽनुवदति। एवमन्यत्रापि। तथा *तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते, *नाहं वेदैर्न तपसा इत्यादिश्रुतिस्मृत्योर्वेदनभक्तिशब्दाभ्यां मोक्षोपायमभिधाय तदपरोपायनिषेधपरयोः परस्परार्थप्रतिक्षेपानुपपत्तेः वेदनशब्देनापि तैलधारावदविच्छिन्नभक्तिरूपज्ञानविशेष एव विवक्षित इति स्वीकर्तव्यम्। एवं ध्यानोपासनभक्तिशब्दसमानार्थतया वेदनादिशब्दानां विशेषविषयत्वे निश्चिते सति सामान्यमात्राश्रयणं न्यायानभिज्ञतानिबन्धनम्। तदुक्तम्—* पशोश्छागत्वनिर्णीतौ निपुणन्यायपूर्वकम्। गर्दभादिषु तुल्यत्वं गर्दभप्रायकल्पितम्॥ इति। यत्पुनर्वाक्यतस्सिद्धस्यैव ज्ञानस्य विधेयत्वं न सम्भवतीति तदस्माकमिष्टमेव, ततोऽन्यस्यैव विधानोपपादनात्। प्रत्यक्षविरुद्धश्चायमविधेयज्ञानाधीनमोक्षवादः, वाक्यार्थज्ञानमात्रेणाविद्यानिवृत्त्यदर्शनात्; आहुश्च—* तत्त्वमस्यादिवाक्यस्य शतशश्श्रवणेऽपि हि। दृश्यते त्वमहंपूर्वो विवादो ब्रह्मवादिनाम्॥ इति। ननु येषां वाक्यार्थज्ञानं जातं तेषां तन्निवृत्तिरस्त्येव, येषां तु सा नास्ति तेषां तदपि न जातमित्यविरोध इति चेत् तन्न, तज्ज्ञानाभावे तत्प्रवचनाद्यसंभवात्, तदसंभवे च शिष्याणां श्रवणादेरप्यसिद्धिप्रसङ्गात्। एवमाचार्यस्यापि।

अथ वाक्यार्थज्ञानेन निवृत्ताविद्या एवाविद्यावतां श्रावका इति चेन्न ; तेषां श्रावकत्वादिव्यापारस्य तत्करण-शरीरेन्द्रियादेस्तत्प्रयोजनस्यच ख्यातिलाभपूजापरानुग्रहादेस्तत्तत्प्रतिभासस्य चाविद्यामन्तरेणासम्भवात् । अविद्यानिवृत्तावपि बाधितानुवृत्त्या भेदप्रतिभासात् प्रत्यक्षाद्यविरोधः प्रवचनाद्युपपत्तिश्चेति चेत् तन्न, भवत्पक्षे बाधितानुवृत्त्यसम्भवस्य वक्ष्य-माणत्वात् । तथाऽप्यविशदप्रतिपत्तिमात्रादविद्याविशेषवशादेव वा प्रवचनाद्युपपत्तिरिति चेन्न ; विशदप्रतीतिपरामर्शरूप-प्रत्यक्षसिद्धान्तयोर्विरोधात् । विशदाध्यक्षितसमस्ततत्त्वार्थाश्च वासुदेवादयोऽर्जुनादिभ्य उपदिशन्तीति हि स्वीकृतं युष्माभिः । नचाद्वैतसिद्धान्तश्रावकास्स्वात्मनां तदनभिज्ञतामनुमन्यन्ते । तथा सत्यविवादश्च । किञ्च प्रतिवादिनः प्रबलाविद्याः कथं भवत्पक्षं प्रतिक्षिपन्ति ? न तावदविदित्वैव, निराश्रयवादायोगात् । विदित्वा चेत् कथं तर्हि प्रतिवादिना विदिते भवत्पक्षे भवतां ज्ञानानुत्पत्तिः ? नहि स्वोक्तं परे जानन्ति वयं तु न विद्म इति स्वस्थैरभिधेयम् । यत्तदविद्यानिवर्तकं विशदमद्वैत-ज्ञानमुदेष्यति, यच्चेदानीं श्रवणादविशदमुत्पन्नम्, तदुभयं भिन्नविषयमेकविषयं वा ? भिन्नविषयत्वे तस्यान्यसिद्धान्त-ज्ञानवत्तदनुपकारकत्वम् । एकविषयत्वेऽप्यन्यूनानतिरिक्तविषयं वा प्रकारविशेषविशेषितविषयं वा ? आद्ये पश्चात्तनस्या-प्यनिवर्तकत्वम्, इदानीन्तनस्यैव वा निवर्तकत्वं स्यात् ; अविशेषात् । द्वितीये ब्रह्मणस्सविशेषत्वं स्यात् । सविशेष-मिदानीं गृहीतं पश्चात्तु निर्विशेषं प्रकाशिष्यत इति वैषम्यमिति चेत् ; कथमिदं त्वयाऽवगतम् ? श्रुतेरितिचेत् ; तर्हि श्रुतेरेव निर्विशेषज्ञानमिदानीमेव जातमिति कः पश्चात्तनस्य विशेषः ? ज्ञानमिदानीं जातं व्यवसायस्तु पश्चाद्भविष्यतीति विशेष इतिचेन्न ; वेदप्रामाण्यनिश्चये तदानीमेव व्यवसायोदयात्, तदनिश्चयेतु पश्चादपि तदसिद्धेः । प्रमाणत्वाभ्युप-गमे वा तदर्थविशेषे सन्देह इति चेत् ; तर्हि विशदप्रवचनप्रवीणेभ्य आचार्येभ्यो न्यायपूर्वं द्विस्त्रिश्शतशो वा श्रोतव्यम्, नपुनश्श्रवणदशायामेव सन्दिहानेन भवता पश्चादनवरतध्यानेनापि ज्ञातुं शक्यम् । मननवदाहार्यसन्देहनिराकारणाय पश्चात्तनं ज्ञानमिति चेन्न ; मननेनैव संभावितनिष्कम्पत्वे पुनरन्यावकाशाभावात् ; अन्यथाऽतिप्रसङ्गात् । अस्तु तर्हि पारोक्ष्यापारोक्ष्यलक्षणं वैषम्यमितिचेत् ; विषयातिरेकाभावेनैव प्रागुक्तेन तदसिद्धेः ; सिद्धावपि बाधकत्वमबाधकत्वं च प्रत्यकिञ्चित्करत्वात् । परोक्षेणापि शास्त्रानुमानजन्यज्ञानेनापरोक्षभ्रमबाधस्याभ्युपगमात्, प्रत्यक्षेणापि देहात्मभ्रमादिना शास्त्रबाधानभ्युपगमाच्च । उत्पन्ना भ्रान्तिरनित्यत्वात्स्वयमेव निवर्तते, भ्रान्त्यनुवृत्तिनिवृत्तिस्तु कारणानुवृत्तिनिवृत्त्या भवति, तदनुवृत्तौ तु बाधकस्य प्रत्यक्षत्वेऽपि भ्रान्त्यनुवृत्तिर्भवत्येव, चन्द्रैकत्वे प्रत्यक्षेऽपि अङ्गुल्यवष्टम्भादिना भ्रान्त्यनु-वृत्तिवत् । वाक्यजन्यज्ञानमपरोक्षमिति च सर्वलोकविरुद्धम् ; पृथक्चैतत्प्रपञ्चयिष्यामः । तदेतदखिलं मुखान्तरेण प्रपञ्चितं भाष्ये—* न तावद्वाक्यार्थज्ञानमित्यादिना विस्तरेण ॥

॥ इति शतदूषण्याम् अविधेयज्ञानभङ्गवादश्चतुर्थः ॥ ४ ॥

॥ अथ बाधितानुवृत्तिभङ्गवादः पञ्चमः ॥ ५ ॥

नानुवर्तेत संसारो यत्प्रसादैकबाधितः । प्रसीदतु स मे देवः प्रथमाञ्जलिकिङ्करः ॥

यदुच्यते * तत्त्वमस्यादिवाक्यात्तत्त्वज्ञाने जातेऽपि ब्रह्मविदां बाधितानुवृत्त्या भेदप्रतिभासादेराशरीरमनु-वृत्तिः, तदनुवृत्तावपि छिन्नमूलतया दग्धपटादिवदबन्धकत्वं चेति ; तत्र पृच्छामः, बाधितत्वे कथमनुवृत्तिर्भवता वक्तव्या ?

तस्यां वा तत्कथम्? प्रमाणबलान्मिथ्यात्वाध्यवसायेऽपि द्विचन्द्रादिष्विव दोषमहिम्ना प्रतिभासानुवृत्तिरिति न विरोध इति चेत्, समस्तद्वैतकुक्षिम्भरिणाऽप्यद्वैतज्ञानेनाबाधितः कोऽसौ दोषः? अविद्यैवेति चेत्, कथं तर्ह्यविद्यानिवृत्तिः? नहि तन्निवृत्तावपर्यवसितः कश्चिद्बाधो नाम । तन्निवृत्तावपि तन्मूलवासनाऽस्तीति चेत्; सा किं ब्रह्मवत्सत्यत्वात्तत्त्वज्ञानेनाबाधिता, उत मिथ्यात्वेऽपि तदविषयत्वात्? न प्रथमः, द्वैतापसिद्धान्तादिदोषप्रसङ्गात् । न च सा ब्रह्मस्वरूपानुप्रवेशिनी, भेदप्रतिभासानुवृत्तेरनिर्मोक्षप्रसङ्गात्, ब्रह्मणस्सावद्यत्वादिदोषप्रसङ्गाच्च । नचासत्याविद्योपात्ता वासना सत्येति संपद्यते । नचोपादानध्वंसे कार्यानुवृत्तिमुन्मत्तोऽप्यनुसन्धत्ते । नापि द्वितीयः, वासनाया अपि श्रवणसमयसमधिगतब्रह्मव्यतिरेकलक्षणैकोपाधिक्रोडीकारात्, अन्यथा त्वविद्याया अपि बाधकज्ञानाविषयत्वप्रसङ्गात् । * नेह नानास्ति इत्यादेरविशेषात्तद्विषयत्वमिति चेत्; तुल्यम् । यदि च वाक्यार्थज्ञानाद्वासना न निवर्तते, कुतस्तर्हि तन्निवृत्तिः? न तावददृष्टादेः, तथा सति ज्ञानबाध्यत्वाभावेन सत्यत्वप्रसङ्गात् । अत एव न स्वतः, व्याघाताच्च । नहि वध्यघातकयोस्तादात्म्यं दृष्टम् । नच सहकार्यन्तरमन्तरेण घटादिष्वपि स्वप्रध्वंसहेतुता । अहेतुकविनाशवादे तु सौगतचार्वाकादिसौहार्दोद्गारप्रसङ्गः । अविद्यायाश्च तद्वदेवाहेतुकनिवृत्त्यविरोधस्स्यात् । नच दहनान्त्यशब्दचरमसंस्कारादिवदिति वाच्यम्, तत्रापि तत्तदवस्थान्तरकालविशेषादिसामग्रीसहितपरमेश्वरसङ्कल्परूपस्य कारणस्यास्माभिरभ्युपगमात् । द्विचन्द्रादौ तु अङ्गुल्यवष्टम्भतिमिरादिदोषस्य चन्द्रैकत्वज्ञानाविषयत्वात् । तदुभयविषयैकज्ञानोदयेऽपि पार्श्वस्थतारकाप्रकाशस्येव दोषप्रकाशांशस्य चन्द्रैकत्वप्रकाशेन विरोधाभावात्, दोषो मिथ्येति तु ज्ञानस्य लौकिकानामनुदयात्, यौक्तिकमिथ्यात्वज्ञानस्यैव भ्रान्तित्वेन तत्सत्यत्वाच्चाबाध इति तन्मूलभ्रमपरम्परानुवृत्तिर्घटते, तद्विषयान्यथात्वाध्यवसायेन भयविस्मयादिकार्यनिवृत्तिश्च । तव तु न तथा, कारणभूताविद्यावत्कार्यभूतशोकादिवच्च, मध्यगतभेदवासनाभेदज्ञानयोरप्येकहेलयैव निवार्यत्वात्, अनुवृत्तावपि बाध्यबाधकयोराविद्यत्वेन वास्तवप्रामाण्याभावात् विशेषेण बाधकबलासम्भवाच्चेति । तदेतत्सर्वमभिप्रेत्य * सत्यपि वाक्यार्थज्ञाने इत्यादि, * भयादिकार्यं तु निवर्तते इत्यन्तं भाषितम् ॥

॥ इति शतदूषण्यां बाधितानुवृत्तिभङ्गवादः पञ्चमः ॥ ५ ॥

———

॥ अथ विविदिषासाधनत्वभङ्गवादः षष्ठः ॥ ६ ॥

दृष्टानुश्रविकार्थजातविमुखान् पुंसोऽधिकृत्य श्रुतौ यज्ञादिर्यदुपास्तिसाधनतया साक्षाद्विधिं प्राप्नुते ।
लीलाभोगविभूतियुग्मभरितस्वात्मप्रदानोन्मुखः श्रीमानस्तु स मे समस्तदुरितोत्ताराय नारायणः ॥

यदुच्यते, * तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन इत्यत्र यज्ञादिकं विविदिषासाधनत्वेन विधीयते, नतु वेदनसाधनत्वेन, वस्तुविरोधात् श्रुत्यक्षरपर्यालोचनाच्च, * विविदिषन्तीति हि श्रूयते न पुनर्विदन्तीति । तत्र ब्रूमः—कोऽसौ वस्तुविरोधस्तावत्, किं ज्ञानस्य यज्ञादिभिस्साधयितुमशक्यत्वम्? उत तेषां ज्ञानाङ्गभूतशमादिप्रत्यनीकात्मत्वम्? यद्वा तत्त्वज्ञानफलापवर्गप्रत्यनीकत्रिवर्गसाधकत्वम्? यद्वा आश्रमाङ्गतया विहितानां विद्याङ्गत्वे नित्यानित्यसंयोगविरोधः? अन्यो वा कश्चिदिति । न प्रथमः, सहि यज्ञादिकमन्तरेण उत्पत्तिदर्शनाद्वा? यज्ञादिसन्निधावप्यनुत्पत्तिदर्शनाद्वा? आद्ये त्वसिद्धिः, प्राचीनेष्वर्वाचीनेषु वाऽधिकारिष्वननुष्ठितशुद्धधर्मेषु विद्योत्पत्ते-

रसिद्धत्वात् । द्वितीये त्वप्रयोजकता, सामग्र्यैव हि कार्योत्पत्तिः न पुनर्हेतुमात्रात्; सम्भवति च प्रायशः कर्मकर्तृसाधनवैगुण्यम्, अन्यथा चित्रापशुफलत्वादावपि कस्ते समाश्वासः ? तस्यास्तत्साधनत्वं विदधाति श्रुतिरिति चेत्, अत्रापि यदि श्रुतिर्विदधाति, तदा तद्वदेव समाश्वसिहि । अन्यथा विविदिषासाधनत्वेऽपि त्वया न समाश्वसितव्यम्; तत्रापि साध्यसाधनभावस्य श्रुत्येकावसेयत्वात् । * कुर्वद्वाऽयमकुर्वद्वेत्यादिचार्वाकदुर्वादस्य त्वयाऽप्यस्मर्तव्यत्वात्, व्यभिचारस्य च समत्वात् । एतेन—वाक्यजन्यप्रमितिरूपस्य संस्कारजन्यस्मृतिसन्ततिरूपस्य वा वेदनस्य किं कर्मापेक्षयेति निरस्तम्; इच्छाया अप्यनुकूलताबोधाधीनोत्पत्तेः किं कर्मापेक्षयेति समत्वात् । अन्तःकरणनैर्मल्यद्वारेणेति चेत्, तुल्यम्; *यत्रोभयोस्समो दोष इत्यभियुक्तवचनं किमर्थमित्थं विस्मरसि । * कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते इत्यादिवाचनिकार्थातिलङ्घनं तवाधिकम् । नापि द्वितीयः, शमादेरविहिताप्रतिषिद्धनिषिद्धविषयत्वेन विद्याङ्गतया विहितेभ्यः कर्मभ्यो व्यतिरिक्तविषयत्वात् । विहितस्य च * धर्मेण पापमपनुदति, * कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः इत्यादिभिर्विद्योपकारकत्वस्यैव श्रुतत्वात् । न च तृतीयः, फलाभिसन्धिविरहादेव त्रिवर्गानारम्भात्, अनेकफलसाधनस्यापि ज्योतिष्टोमादेरभिसन्धिविशेषेण फलं प्रति नियमस्य सर्वैरभ्युपगन्तव्यत्वात् । अत एव न चतुर्थः, तत्रापि विनियोगपृथक्त्वेन नित्यानित्यसंयोगविरोधाभावात् । तदेतत्सर्वं सूत्रकारैरेव विस्पष्टमुक्तम्—* सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्, * शमदमाद्युपेतस्स्यात्तथाऽपि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात्, * विहितत्वाच्चाश्रमकर्मापि, * सहकारित्वेन च, *अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् इत्यादिभिः । या च ते श्रुत्यक्षरपर्यालोचना सोऽपि हस्तसमालोचः; * सोऽन्वेष्टव्यः, * स विजिज्ञासितव्यः, * तद्विजिज्ञासितव्यम्, * श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिश्रुतिशीलापरामर्शात्; न हि तेषु सन्प्रत्ययार्थविधिपरत्वं भवताऽपि स्वीकृतम् । विधिबलावसितपुरुषार्थसाधनत्वार्थसिद्धेच्छानुवादरूपत्वात्प्रत्ययस्य ध्यायीतेत्यादिविध्यन्तरैकार्थ्यात् । तत्र शाब्दं प्रत्ययार्थप्राधान्यमनादृत्येच्छाया इष्यमाणप्रधानत्वादार्थं प्रकृत्यर्थप्राधान्यं स्वीक्रियत इति चेत्; तर्हि * क्रियावानेष ब्रह्मविदां वरिष्ठः, * कर्मणैव हि संसिद्धिम् * कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते इत्यादि प्रमाणसहस्रैकार्थ्यादत्रापि वेदनपरत्वमङ्गीकुरुष्व ।

लोके च, असिना जिघांसति, अश्वेन जिगमिषति इत्यादिषु प्रकृत्यर्थे करणान्वयो बहुलमुपलभ्यते । अत्रासेरश्वस्य वा हननगमनेच्छासाधनत्वायोगात् हननादिसाधनत्वस्यान्वयव्यतिरेकसिद्धत्वाच्च अगत्या प्रकृत्यर्थसाधनत्वाश्रयणम्, इह तु न तथा, अन्तःकरणनैर्मल्यद्वारेण सत्त्वविवृद्ध्योपकारकत्वस्य ज्ञानतदिच्छयोरविशेषादिति चेन्न; अनन्यपरत्वस्योपपादितत्वात्, अयोगस्य चात्राप्यविशेषात् । तथा हि; योऽयं विविदिषाकामो यज्ञादिष्वधिकरोति स किं तदानीं वेदनमिच्छति उत न? आद्ये विविदिषा सिद्धैवेति न तस्या यज्ञादिसाध्यत्वम्, तथा च चक्रकम्—वेदनेच्छायां जातायामेव विविदिषेच्छा जायते, तस्यां जातायां कर्मानुष्ठानम्, ततो विविदिषेति । अत्रैकैकोभयपर्वसङ्कोचेनात्माश्रयान्योन्याश्रयावप्यन्तर्भाव्यौ । द्वितीयेऽपि वेदनस्यानिष्टत्वे विविदिषाऽप्यनिष्टैव स्यात्, तद्विषयत्वात्तस्याः; विविदिषा हि वेदनं साधयेत्; तच्चापवर्गादिकमिति मत्वैव हि तस्यामभिलाषसम्भवः । ननु वेदनौन्मुख्यलक्षणविविदिषा पूर्वं संवृत्ता । तदर्थप्रवृत्तिपर्यन्ता तु साध्यतयाऽभिमतेति चेन्न; तादृशतीव्रेच्छाया एव उत्पत्त्यनुत्पत्तिविकल्पे प्रागुक्तदोषानतिलङ्घनात् । नहि वेदने तीव्रेच्छायामसम्भवन्त्यां तादृशीमपि तामिच्छेत्, तदुपायवर्गानुष्ठानक्लेशं वा सहेत । ननु दृष्टमेतत् यद्बुभुक्षापिपासादिकामनया भेषजमुपदिश्यते; तत्रापि भोजनादेरिष्टत्वानिष्टत्वविकल्पेन प्रागुक्तप्रसङ्गो दुर्वारः । तत्र यः परिहारस्ते

स नोऽत्रापि भविष्यतीतिचेत् तन्न; भोजनादेस्सामान्यतोऽनुकूलत्वज्ञानादेवेष्टत्वसिद्धेः। तथाऽपि दोषवशात्तदाननमनारोग्यात्मकं प्रातिकूल्यमपनेतव्यमिति तावन्मात्रार्थं भेषजोपदेशः, न पुनरिच्छास्वरूपनिष्पत्तये। अत्रापि तर्हि तथाऽस्तु; सामान्यतो वेदनस्येष्टत्वेऽपि तादात्विकतत्प्रातिकूल्यापादकरजस्तमोनिर्बर्हणेन अन्तःकरणशुद्ध्यर्थं कर्मणां विनियोग इति चेत्; तर्हि विविदिषासाधनत्वश्रुतिः परित्यक्तैव। अवान्तरव्यापारत्वादविरोध इति चेत्; तर्हि वेदनसाधनत्वमप्यनुमन्यताम्, तत्पूर्वभाविनस्सर्वस्यापि यज्ञादिकर्मावान्तरव्यापारत्वोपपत्तेः। एवं च सति * क्रियावानेष ब्रह्मविदां वरिष्ठः, * कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते, * पुण्यं प्रज्ञां वर्धयति क्रियमाणं पुनः पुनः इत्यादिभिरैकार्थ्यं च। अतो यज्ञादिकर्म वेदनसाधनमेव॥

ननु विविदिषासाधनत्वे यच्चोद्यं यज्ञादेः तद्भक्तिसाधनत्वेऽपि समानम्। तथा हि। किं भगवति भक्तिमान्भक्तिं कामयते उत तद्विधुरः? न प्रथमः, भक्तेर्निष्पन्नत्वेन साध्यत्वायोगात्। न द्वितीयः, भगवद्भक्तिविधुरस्य तद्भक्तावपि नैरपेक्ष्यात्; भक्त्यवस्थाभेदान्निर्वाहेऽपि प्राग्वदेव दोष इति। तन्न; प्रीतिरूपज्ञानविशेषो हि भक्तिः; प्रीतिश्च तारतम्यवती विषयस्वभावविशेषाभिमानाभ्यासभेषजादिभिः प्रेमवृद्धिः कामशास्त्रादिष्वपि सम्मता; पुरुषस्य तत्कामना सम्भवति न वेत्येतावदेव चिन्तनीयम्। तत्र यदि सञ्जातमात्रादतिशयितस्य प्रेम्णः फलान्तरं प्रमाणतस्सिद्ध्येत्, तदा तथाविधं तस्यातिशयमभिवाञ्छेदेव। न च तावता तथाविधस्यातिशयस्यापि निष्पन्नत्वप्रसङ्गः; ज्ञानवदुपपत्तेः; सामान्यतोऽवगते हि विशेषतो ज्ञानाय व्याप्रियते, अन्यथा जिज्ञासैव सर्वत्र न स्यात्। नन्वेवं विविदिषायामप्येवमस्त्विति चेन्न; विशेषेच्छाया एव प्रागेवोदयात्; न हि पूर्वं सामान्यतो ज्ञानमिच्छति पश्चाद्विशेषत इति सम्भवति। नच विषयविशेषावच्छेदमन्तरेण इच्छाजातिविशेषः कश्चित्सम्भवति। भक्तौ तु भोग्याकाराविर्भावतारतम्यवशात्तारतम्यमुक्तमिति। इहापि तत एव तारतम्यमिति चेत्; अस्तु तत्, तथाऽपि काम्यत्वं दुर्वचम्; तथाविधविषयविशेषितस्य वेदनस्य काम्यत्वमन्तरेण तदसिद्धेः, तत्काम्यतायाश्च सिद्धौ सिद्धा तथाविधवेदनेच्छेति कथं सा काम्या? अतस्सिद्धं यज्ञादिकर्मविविदिषासाधनत्वेन न विहितमिति। तदेतत्सर्वमभिसन्धायाह—* एवंरूपाया ध्रुवानुस्मृतेस्साधनानि यज्ञादीनि कर्माणीति * यज्ञादिश्रुतेरश्ववदित्यभिधास्यते इति॥

॥ इति शतदूषण्यां विविदिषासाधनत्वभङ्गवादः षष्ठः ॥ ६ ॥

॥ अथ शब्दजन्यप्रत्यक्षभङ्गवादः सप्तमः ॥ ७ ॥

विभूत्यंशो यस्य स्फुरति जगतामक्षमखिलं श्रुतिर्जात्यन्धानामुपदिशति यं रूपमिव नः।
निजाध्यक्षप्रेक्षाचुलकितसमस्तस्स्वयमसौ हृषीकेशो दिव्यं दिशतु मम चक्षुस्स्वविषयम्॥

यदूचिरे—यद्यपि * तत्त्वमस्यादिवाक्यश्रवणसमयसम्भवं परोक्षं ज्ञानमविद्यां न निवर्तयति, तथाऽपि श्रवणादिभिर्निरस्तसमस्तभेदवासनामूलासम्भावनाविपरीतसम्भावनाख्यचित्तविक्षेपलक्षणप्रतिबन्धस्य तदेव वाक्यमविद्यानिवर्तकमपरोक्षं ज्ञानं जनयति। न च—शब्दस्य कथमपरोक्षधीहेतुत्वमिति वाच्यम्, इन्द्रियस्यापि कथमिति प्रसङ्गात्। दर्शनादिति चेत्, तुल्यम्। क तद्दर्शनमिति चेत्; संवित्स्वप्रकाशा दशमस्त्वमसीत्यादिषु। न ह्यत्र संविद्विषयः स्वविषयो वा प्रकाशो

नास्ति, सन्नपि वा परोक्षः, स्वधीविरोधात्, प्रत्यक्षे च विषये परोक्षप्रकाशव्याघातात्, अन्यथा शुक्तितत्त्वप्रकाशेऽपि रजतावभासाविरोधप्रसङ्गात्। न चायं प्रकाश इन्द्रियजन्यः, वाक्यस्य तदानीमबोधकत्वप्रसङ्गात्; वाक्यमन्तरेणापि तत्प्रसङ्गाच्च। न च रत्नतत्त्वाधिगमवत् शब्दसंभिन्नेन्द्रियजन्यः, अन्यतरेण तदुत्पत्त्युपपत्तौ कल्पनागौरवात्, अन्वय-व्यतिरेकाविशेषे सतीन्द्रियसहकृतशब्दजन्य इति विपरिवर्तप्रसङ्गाच्च। किंनामेन्द्रियं तत्सहकारि स्यादिति चेत्, मनसः सर्वज्ञानकरणसाधारणसहकारित्वं किं न जानासि? तथाऽपि विनिगमनायां को हेतुरिति चेत्, न, अन्धस्या-न्धतमसि स्थितस्य वा वाक्यश्रवणाद्दशमोऽस्मीति प्रत्यक्षप्रत्ययात्। न चात्रापरोक्षत्वमारोपितम्, बाधकाभावात्। न च सम्प्लवे भेदाग्रहात्तद्व्यवहारः, कदाचिदपि तत्र धीभेदानुपलम्भात्। अतो वाक्यजातीयस्य क्वचित्प्रत्यक्षज्ञानजनकत्वसिद्धौ क्व विरोधावकाशः? अन्यदपि वाक्यं किं न जनयतीति चेत्, न, गोजातीयत्वे शाक्करः किं न दुग्धे दुग्धमितिवदुप-हास्यत्वात्। अस्ति तत्रावान्तरोपाधिरिति चेत्, अस्त्वत्रापि कश्चित्। न च तदज्ञानं तत्कार्योत्पत्तिप्रतिबन्धि, तज्ज्ञानस्य तत्कारणत्वानभ्युपगमात्। अन्यथा अतिप्रसङ्गात्। यथाऽऽहुः—"न कारणपरिज्ञानं तत्कार्योत्पत्ति-कारणम्। न हि बीजाद्यविज्ञानमङ्कुरोत्पत्तिवारणम्॥" इति। न चास्यात्यन्ताज्ञातता, स्वतोऽपरोक्षार्थगोचरत्वस्योपाधे-रवधारणात्। न च तत्त्वमस्यादिवाक्यस्य प्रत्यक्षज्ञानजनकत्वे किं प्रमाणमिति वाच्यम्, निवर्त्यमिथ्यात्वान्यथानुप-पत्त्यैव तत्सिद्धेः। स्वतःशुद्धेऽपि हि विश्वसाक्षिणि ब्रह्मणि स्फटिकमणिघटितदाडिमीकुसुमरागोपरागवत् अवभासमात्र-सिद्धिरियमशुद्धिः, सा च ज्ञानमात्रनिवर्त्येति * तरति शोकमात्मविदित्यादिश्रुतिशतसिद्धम्; मिथ्याभूतस्य च धीमात्र-निवर्त्यत्वं युक्तम्, न च परोक्षं ज्ञानं निवर्तकं दृश्यते। अतः परिशेषादपरोक्षमेव ज्ञानं निवर्तकमिति स्थिते न ताव-त्करणमिन्द्रियम्, बाह्येन्द्रियाणां प्रत्यक्पराङ्मुखत्वात्, मनसोऽपि सोऽहमस्मीत्यस्मिन्नर्थे स्वातन्त्र्येणाप्रवृत्तेः, शब्द-संस्कारादिपुरस्कारे तु तस्यैव करणत्वोपपत्तेः, मनसश्च नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मगोचरसाक्षात्कारकरणत्वस्यादृष्टचरत्वेन शब्दस्य तत्सहकारित्वकल्पनायोगात्, तथात्वे च श्रवणादिनैष्फल्यात्। * न चक्षुषा गृह्यते नापि वाचा, मनसा तु विशुद्धेन, * मनसैवेदमाप्तव्यमित्यादिश्रुतीनां चित्तैकाग्र्यस्यान्तरङ्गत्वबोधने तात्पर्यात्। अत एव * अप्राप्य मनसा सहे-त्यादेरनधिकृतमनोविषयत्वव्यवस्थापनानुपपत्तिः। न च मानसं प्रत्यक्षमस्ति, आत्मनः स्वप्रकाशत्वात्, सुखादेस्तु साक्षिवेद्यत्वात्, भावनासहकृतमनोजन्यसाक्षात्कारस्यापि पथिकपरिभावितप्रियतमासाक्षात्कारवत् भ्रान्तित्वात्, भ्रान्तिरूप-साक्षात्कारस्यापि साक्षिरूपत्वेनैव मानसत्वाभावात्, अनुमानादेस्त्वापरोक्ष्यविद्वेषशीलत्वात्। अतो वाक्यपरिशेषे तत्रापि भेदगर्भाणां वाक्यानां भेदभ्रमनिवर्तकत्वायोगात् अद्वैतवाक्यान्येवाविद्यानिवर्तकापरोक्षज्ञानं जनयन्तीति।

किञ्च प्रत्यक्षस्य भेदभ्रमस्य परोक्षादैन्द्रियिकप्रत्यक्षाद्वा न परिभवो युक्तः, न्यूनत्वात् समत्वाच्च। शास्त्रमूलं तु प्रत्यक्षं साक्षात्कारत्वाविशेषेऽपि निर्दोषहेतुकत्वाद्बाधक्षमम्; तच्चोक्तम्—* न्यूनत्वाच्च समत्वाच्च परोक्षं नाक्षजं क्षमम्। निर्दोषहेतुजन्यत्वात् प्रत्यक्षं शास्त्रजं क्षमम्॥ इति। प्रत्यक्षभेदभ्रमनिवर्तन इति शेषः। साक्षात्कारस्य चाविद्यानिवर्तकत्वं तस्य च शब्दकरणत्वं शब्दादेव सिध्यति, * निचाय्य तं मृत्युमुखात् प्रमुच्यते, * क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादिभिरपरोक्षज्ञानस्य अविद्यानिवर्तकत्वसिद्धेः। * तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः, * वेदान्तविज्ञानसुनिश्चितार्थाः, * स्वाध्यायश्चक्षुरुत एकमस्य योगो द्वितीयमभिवीक्षणाय * अध्ययन-मनननयनोऽस्य द्रष्टा * न मांसचक्षुरभिवीक्षते तम्, * पितृदेवमनुष्याणां वेदश्चक्षुस्सनातनमित्यादेस्तस्य शब्दकारणकत्व-

सिद्धिः। प्रयोगश्च—विगीतं ज्ञानं साक्षात्कारि, तत्त्वमस्यादिवाक्यजन्यज्ञानत्वात्, तत्स्वरूपगोचरश्रावणज्ञानवत्। न च तत् तदजन्यम्, प्रत्यक्षे विषयस्य कारणत्वस्वीकारात्। तत्रैव प्रतिज्ञायामपरोक्षज्ञानविषयत्वात्सुखादिज्ञानवदिति वा प्रयोगः। तत्त्वमस्यादिवाक्यं वा स्वप्रतिपाद्यगोचरसाक्षात्कारजनकम्, स्वप्रकाशार्थोपदेशरूपत्वात्, स्वतोऽपरोक्षार्थविषयत्वाद्वा, संवित्स्वप्रकाशा दशमस्त्वमसीत्यादिवाक्यवत्। अपरोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति, अपरोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वात्, ज्ञानत्ववदिति। न च अत्र परोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति, परोक्षनिष्ठात्यन्ताभावाप्रतियोगित्वात्, ज्ञानत्ववदिति सत्प्रतिपक्षसाधनता, सिद्धसाधनात्। तेषामेव हि वाक्यानामसम्भावनाविपरीतसम्भावनाप्रतिबद्धचेतसि पुरुषे परोक्षज्ञानजनकत्वमिष्यते। पूर्वोक्तश्रुतिविरुद्धतया कालात्ययापदेशाच्च। न च वाच्यम्—अग्निहोत्रादिवाक्यजन्यज्ञानेष्वप्येवं प्रयोक्तुं शक्यमित्याभाससमानयोगक्षेमतेति, तत्र विपक्षे बाधविरहात्। नहि तत्र प्रामाण्यस्यानुपपत्तिः, अनुमानादिवदुपपत्तेः। नाप्यनुष्ठानस्य, परोक्षनिश्चयादपि तदुपपत्तेः। नापि फलस्य। तत एव तत्सिद्धेः। नापि च फलकामनायाः, फलसम्बन्धनिश्चयादेव तस्या अप्युपपत्तेः। अत एव पुरुषप्रवृत्तिरपि संगच्छते। इह तु प्रागुक्तार्थानुपपत्तिरेव विपक्षे बाधिका स्यात्। अतो नाभासतुल्यतेति। एवं पूर्वेष्वपि प्रयोगेष्वाभासतुल्यतोद्धारो द्रष्टव्यः। अतो विपक्षे बाधकस्यैव प्रतिबन्धरहस्यत्वात् उक्तार्थे महाविद्याजातयश्च यथावगाहं प्रयोक्तव्याः। स्वपरपक्षसाधारण्यं हि महाविद्यानां स्वभावः तत्रानुकूलतर्कसदसद्भावाभ्यामेकत्रार्थसिद्धिरितरत्रार्थासिद्धिरिति निर्णयः। ननु तर्कपराहता इमे हेतवः, शब्दस्य प्रत्यक्षान्तर्भावप्रसङ्गादिति चेत्, न, अप्रसङ्गात्। योगिमनसो बाह्यविषयप्रत्यक्षज्ञानजनकत्वेऽपि बाह्यप्रत्यक्षबहिर्भाववदुपपत्तेः। अथ चक्षुरादिपञ्चकान्यतमत्वं योगिमनोन्यत्वे सति बाह्यविषयापरोक्षप्रमितिकारणत्वं वा बाह्यप्रत्यक्षान्तर्भावे प्रयोजकमिष्येत, इहापि तर्हि स्वतोऽपरोक्षार्थब्रह्मात्मविषयशब्दान्यत्वे सत्यपरोक्षप्रमितिकारणत्वं प्रत्यक्षान्तर्भावप्रयोजकमिति समस्समाधिः। किञ्च प्रत्यक्षान्तर्भाव इति इन्द्रियान्तर्भावो वा, साक्षात्कारजनकवाक्यान्तर्भावो वा विवक्षितः स्यात्। पूर्वत्र मनसोऽपि बाह्यानन्तर्भाव इतिवदुपलम्भविरोधात् अशक्यः। उत्तरत्र त्विष्टप्रसङ्गता, ऐकराश्ये सिद्धे सत्यवान्तरभेदाश्रयणाविरोधात्; तदेव तु कथमिति चेत्, न, दशमस्त्वमसीत्यादौ तद्दर्शनस्य समर्थितत्वात्। वाक्यस्यैवापरोक्षधीजनकत्वे मनननिदिध्यासनविध्यानर्थक्यम्, श्रुतवेदान्तानां संसारानुवृत्तिदर्शनविरोधश्चेति चेत्, न, प्रागुक्तप्रतिबन्धनिरसनद्वारेण तयोः श्रवणं प्रति फलोदयकार्यङ्गतया विधानोपपत्तेः; संसारित्वोपलब्धेश्च प्रतिबन्धकवत्पुरुषविषयत्वात्। अतो बाधकापेतसानुग्राहकश्रुत्यादिसिद्धं तत्त्वमस्यादेः साक्षात्कारजनकत्वमिति॥

अत्र ब्रूमः—यत्तावदुक्तं केषुचिद्वाक्येष्वपरोक्षधीहेतुत्वं दृश्यत इति, तन्नरविषाणाङ्कुरप्रसाधने खरविषाणाङ्कुरनिदर्शनमिति मन्यामहे। तथा हि, संवित्स्वप्रकाशेत्यत्र तावत्सामान्यतः स्वपरसमवेतत्रैकालिकसर्वसंवित्स्वप्रकाशत्वं वाक्यार्थः। तादात्विकी तु तज्जन्या संविदेका तदानीं स्वप्रकाशा; तत्र न सर्वसंविदां स्वप्रकाशत्वमिदानीमपरोक्षम्, यतो वाक्यस्य तदापारोक्ष्यहेतुता स्यात्। न च सर्वसंविदैक्यम्, तस्य दूषयिष्यमाणत्वात्। तदैक्येऽपि तत्तदुपहिताकारेण परोक्षापरोक्षविभागस्य दुरपह्नवत्वात्। वाक्यजन्यसंवित्स्वरूपापरोक्ष्ये तावद्वाक्यमेव कारणम्, विषयप्रकाशांशकारणव्यतिरेकेण स्वप्रकाशांशे कारणान्तरानुपलम्भादिति चेत्; तर्हि सिद्धमनुमानादेर्वाक्यान्तराणामप्यपरोक्षधीजनकत्वम्, तत्तज्जन्यधियामपि स्वप्रकाशांशेऽपि तत्तत्कारणत्वात्। सत्यम्, तथाऽपि संवित्स्वप्रकाशेत्यादिवाक्येषु

विषयप्रकाशांशः स्वप्रकाशांशश्चैक एवेति विशेष इति चेन्न, सामान्यविशेषविषयतया तद्भेदस्य दर्शितत्वात् । एवं दशमस्त्वमसीत्यादावपि यदि दशमत्वं स्वात्मनः पश्यत एवेदं वाक्यमुक्तम् ; तदा घटं पश्यतोऽयं घट इतिवत्सिद्धानुवादपरमिदं वाक्यं स्यात् । तथा च प्रत्यक्षानुवादितामात्रेण प्रत्यक्षताभ्रमः, परोक्षविषयप्रयोग इवापरोक्षविषयप्रयोगेऽपि शब्दशक्तेस्तदवस्थत्वात् ; यदा पुनरविदितस्वात्मदशमत्वं प्रत्युच्येत तदा तु दशमत्वांशे परोक्षत्वं स्पष्टम् , उद्देश्यांशस्य तु प्रागेव दृष्टत्वात् विशिष्टेऽपि प्रत्यक्षताभ्रमः, प्रतिपत्तिझाटित्यात् । न च तत्प्रत्यक्षत्वेनैव विशिष्टस्य प्रत्यक्षता, अयं पर्वतो वह्निमानित्यनुमानेऽपि तत्प्रसङ्गात् , गुरुत्वादेरतीन्द्रियत्वभङ्गप्रसङ्गाच्च । एवं क्षत्रियस्त्वमसीत्यादिष्वपि विकल्पोऽनुसन्धेयः ।

यत्तु—प्रत्यक्षे विषये परोक्षप्रकाशव्याघात इति, तदप्यसत् । अपारोक्ष्यादेः ज्ञानधर्मत्वे ज्ञानव्यक्तिभेदेन विषयैक्येऽपि परोक्षत्वापरोक्षत्वयोर्विरोधाभावात् । विषयधर्मत्वेऽपीन्द्रियेण तथाविधं ज्ञानं जायताम्, लिङ्गशब्दादिना त्वन्यथाभूतमिति पुरुषभेद इवैकस्मिन् पुरुषेऽपि करणभेदेन कालभेदेन च एकस्यैव वस्तुनः प्रत्यक्षता परोक्षता च प्रागेव दर्शिता । विपरीतवासनाभूयस्त्वेऽपि करणशक्त्या तत्त्वज्ञानोदयस्योपपादनात् । यदि प्रत्यक्षे विषये परोक्षप्रकाशस्स्यात्, तदा शुक्तित्वप्रकाशेऽपि रजतावसायाविरोधप्रसङ्ग इति चेत्; किं शुक्तौ चक्षुर्व्यापारान्वयव्यतिरेकानुविधायी रजतभ्रमः परोक्षः, येनैवं ब्रवीषि । अथ पुनर्भ्रान्तिरेव प्रसञ्जनीया, तदा शुक्तित्वादिलक्षणविशेषग्रहस्य भ्रमोत्पत्तिप्रतिपक्षतया विशेषाग्रहाख्यसहकारिविरहेण सामग्रीवैकल्याद्वा शुक्तौ रजतभ्रमानुदयः । इह तु अप्रतिबद्धपरोक्षज्ञानसामग्रीसिद्धौ कथं तदनुत्पत्तिः ? तथाविधा च तत्सामग्री प्रागेव दर्शिता । अङ्गीक्रियते च भवताऽपि श्रवणदशायाम् । अत एवैवंविधप्रसङ्गस्य निर्मूलता । किञ्च स्वानिष्टं प्रसञ्जकं परानिष्टं प्रसञ्जनीयमिति तु तर्कतत्त्वव्यवस्था । उक्तञ्च ***श्रीपुण्डरीकाक्षाचार्यैः***—

* प्रसञ्जकं तु स्वानिष्टं परानिष्टं प्रसज्यते । विपर्यये पराभीष्टं स्वाभीष्टे पर्यवस्यति ॥
प्रसञ्जके तु स्वाभीष्टे स्वानिष्टे पर्यवस्यति । स्वाभीष्टस्य त्वसिद्धिस्स्यात् परेष्टस्य प्रसञ्जने ॥ इति ।

उभयमप्यत्र विपरीतम्, स्वतः प्रत्यक्षेऽपि ब्रह्मणि श्रवणदशायां वाक्यतः परोक्षज्ञानजननस्य भवदभिमतत्वात् । मिथ्यैतदिति चेत्, पश्चात्तनप्रत्यक्षज्ञानजननमपि तथैवेति को विशेषः ? शुक्तौ रजतत्वस्येवाविरोधापादकं च मिथ्यात्वमिह स्मर्तुमर्हसि । सत्यं विरोधाच्छुक्तित्वं बाधकत्वेन कथ्यते । मिथ्याभूतं च रजतं बाध्यत्वेनाभिधीयते ॥

तेन मिथ्यैतदिति वचनं तवाविरोधापादकं न भवति, प्रसञ्जनीयं च क्वचिदस्मदिष्टम्, आप्तोपदेशादिभिः शुक्तित्वप्रकाशेऽपि दुष्टेन्द्रियादिना कस्यचित् क्वचिद्रजतावभासानुवृत्तेः, अन्यथा भवतां बाधितानुवृत्तेर्दृष्टान्तस्याप्यभावप्रसङ्गात् । तथा प्रत्यक्षसिद्धेऽपि शुक्तेस्तत्त्वे भ्रान्तविप्रलम्भकवाक्यादिभिरपि रजतधीरुदेत्येव, सा च परोक्षैव, शीघ्रं तु बाध्यमानतया केषांचित्तत्र तदनुत्पत्तिभ्रमः । किञ्च यदि प्रत्यक्षे विषये परोक्षप्रकाशो व्याहतः, तदा पर्वतो वह्निमानित्यादिषु विशेषतो दृष्टानुमानेषु तथाविधार्थगोचरवाक्येषु च परोक्षप्रकाशो न स्यात् । योग्यतामात्रं तु तत्र, न तु तदानीं प्रत्यक्षतेति चेन्न ; यस्यकस्यचिदारण्यकयोगीश्वरादेस्तद्दर्शनात् । तथाऽपि नानुमातुस्तथेति चेत्; तर्ह्यत्रापि दशमत्वादेर्वाक्यश्रवणात्पूर्वमदर्शनान्न वाक्यतस्साक्षात्कारसम्भवः । यत्पुनः स्वस्यैव द्रष्टुं योग्यतयाऽनन्तरं दर्शनाद्वा तत्र

तत्सम्भव इष्येत, तर्हि सिद्धमनुमानादावपि तदुभयसम्भवात्तथात्वम् । यदा च अयं घट इति मन्यमानं प्रत्येव कश्चिदयं घट इति ब्रूयात्, तदा तस्यापि प्रत्यक्षार्थविषयत्वाविशेषात् साक्षात्कारजनकत्वप्रसङ्गः । इष्यत एवेदमपीति चेन्न, स्वतोऽपरोक्षार्थविषयत्वादिति हेतुविशेषणं प्रयुञ्जानस्य तदनिष्टम्, इष्यतां वा, तथाऽपि ज्योतिष्टोमादिवाक्यार्थस्यापि योगिप्रभृतीनां प्रत्यक्षत्वस्यावयोरविगीतत्वात् तान्प्रति केनचिदविदितमाहात्म्येन तत्प्रयोगे ततः साक्षात्कारसम्भवस्स्यात् । तथाच सर्वमपि वाक्यं कस्यचित्साक्षात्कारकारणमिति स्थितौ केषांचिदेवेति व्यवस्थाभङ्गः । अस्त्वेवमपि किं नश्छिन्नमिति चेत्, न, अनुमानादिष्वपि तत्प्रसङ्गस्योक्तत्वात् । तथा च तत्त्वमस्यादिवाक्यपरिशेषासिद्धिः । ततश्चापशूद्रनयविरोधादिप्रसङ्गः । किञ्च विश्वस्यापि ज्ञाततयाऽज्ञाततया वा साक्षिवेद्यत्वस्य भवदभिमतत्वात्सर्वैः प्रमाणैः साक्षात्कारसंभवः सुलभ एव । यदि च स्वतोऽपरोक्षार्थविषयमेव वाक्यं तज्जनकमिति व्यवस्थाप्येत, तदा दशमस्त्वमसीत्यादिदृष्टान्तासिद्धिः । यद्यपि त्वमंशस्य स्वतोऽपरोक्षता, तथाऽपि संख्यादिविशिष्टाकारेण स्वतोऽपरोक्षत्वाभावात्, अन्यथा वाक्यश्रवणात्पूर्वमेव तद्वैशिष्ट्यप्रकाशप्रसङ्गात् । अतोऽनुमानस्येव वाक्यजातीयस्य क्वचिदपि साक्षात्कारहेतुत्वदर्शनस्यासिद्धेरनुग्राहकतर्काभावाच्च स्वाभिमतस्य कस्यचिद्वाक्यस्य तद्धेतुत्वकल्पनं विरुद्धमेव । अत एव स्वतोऽपरोक्षार्थगोचरत्वलक्षणोपाधिरपि निरस्तः ।

यत्तु—निवर्त्यमिथ्यात्वानुपपत्त्या पारम्पर्येणापरोक्ष्यतज्जनकविशेषयोः परिशेष इति, तदप्यसिद्ध्यन्यथासिद्धिभ्यामाक्रम्यते । सत्यमेव हि संसारमुपासनप्रीणितेश्वरसङ्कल्पविशेषनिवर्त्यं साधयिष्यामः । यत्तु—* तरति शोकमात्मविदित्यादिभिर्ज्ञानमात्रनिवर्त्यत्वं सिद्धमिति, एतदपि वेदनज्ञानादिशब्दानामुपासनाख्यविशेषपर्यवसानस्य प्रागेव दर्शितत्वान्निरस्तम् । यदाहुः—* वेदनं ध्यानविश्रान्तं ध्यानं श्रान्तं ध्रुवस्मृतौ । सा च दृष्टित्वमभ्येति दृष्टिर्भक्तित्वमृच्छति ॥ इति । मिथ्याभूतस्य ज्ञानमात्रनिवर्त्यत्वं युक्तमित्येतच्च मिथ्याभूततया भवदभिमतस्य तिमिरादिदोषस्य प्रतिभटादेश्च भेषजशस्त्रादिनिवर्त्यत्वोदाहरणेन प्रागेव दत्तोत्तरम् । अस्तु च मिथ्यात्वे धीबाध्यत्वे युक्तिः, न चात्र मिथ्यात्वम् । दृश्यत्वाद्यदि मिथ्यात्वं प्रपञ्चस्याभिधीयते । ब्रह्मणोऽपि च मिथ्यात्वं तत एवाभिधास्यते ॥ ब्रह्मणो यदि दृश्यत्वं व्यावहारिकमुच्यते । प्रपञ्चस्यापि दृश्यत्वं तात्त्विकं किं त्वयेष्यते ॥ अपि च संसारमिथ्यात्वेऽपि किं निवृत्तिशब्देन प्रतिभासमानमिथ्यार्थप्रध्वंसनमभिप्रेत्य तदर्थमपरोक्षधीगवेषणम्, उत तद्विषयज्ञानप्रध्वंसनम्, आहोस्वित्तत्कारणोच्छेदम्, अथवा तथाविधज्ञानान्तरानुत्पादम्, उत तद्विपरीतविषयावगाहरूपविषयापहारम्, यद्वा तद्विषयसत्यताध्यवसायशैथिल्यम्, अथान्यदेव किंचिदसांव्यवहारिकमिति । नाद्यः; क्वचिदपि मिथ्यार्थस्य प्रध्वंसाभावात्; प्रध्वंसो हि स्वरूपस्य प्रच्युतिः प्रतिपाद्यते । स्वरूपसत्यताभावे कस्य प्रच्युतिरुच्यते ॥ सत्यपि तस्मिंस्तेन तदुच्छेदायोगात् । अन्यथा बाधकज्ञानात्पूर्वं सुषुप्ते द्रष्टरि पुरुषे शुक्तिरजताद्यवस्थितिप्रसङ्गात् । संविदधीनसत्ताकस्य तस्य तन्निवृत्तिरेव हि निवृत्तिः । आहुश्च—* आरोपस्य निवृत्तिस्स्यादारोपस्यापि संक्षयः । तस्य स्वरूपशून्यस्य का निवृत्तिर्हि कथ्यते ॥ न द्वितीयः, तस्य बाधकज्ञानाभावेऽपि बाधकज्ञानवदेव स्वरसवाहिविनाशहेतुबलादेवाशुतरविनाशित्वात् । अन्यथाऽनुदितबाधकज्ञानस्य भ्रान्तस्य सुषुप्त्याद्यभावप्रसङ्गात् । तथाऽऽहुः—

* न भ्रान्तिर्बाधकज्ञानात् नियमेन विनश्यति । न स्याद्धि भ्रान्तचित्तस्य सुषुप्तौ भ्रान्तिसंक्षयः ॥ इति ॥

यद्यपि उत्तरज्ञानमात्रमपि संस्कारादिवत्पूर्वज्ञाननिवर्तकमिष्यते, तथाऽपि यत्किञ्चिदविरुद्धविषयात् परोक्ष-ज्ञानादपि पूर्वज्ञाननिवृत्त्युपपत्तौ विरुद्धविषयप्रत्यक्षज्ञानान्वेषणं निष्फलम्। न च तृतीयः, भ्रान्तिज्ञानकारणानुच्छेदे यथावस्थितप्रत्यक्षज्ञानानुदयात्। न ह्यङ्गुल्यवष्टम्भतिमिरादिदोषेष्वनुवर्तमानेषु चन्द्रैकत्वसाक्षात्कारसम्भवः। सम्भवे वा किं तदुच्छेदेन? प्रत्यक्षानुवृत्त्यर्थं तदुच्छेद इति चेत्, न, तत्सामग्र्यनुवृत्तिमन्तरेण तदुच्छेदेऽपि तदसिद्धेः; तस्यां चानुवर्तमानायां तदवस्थानेऽपि विरोधाभावात्। स्वाभाविकप्रत्यक्षप्रतिबन्धकतया तदुच्छेदकल्पनमिति चेत्, किमत्र स्वाभाविकत्वं किं सामग्र्यां सत्यां स्वरसवाहित्वम्? उत नित्यस्वाभाविकत्वम्? आद्ये प्रागपि कथं तदवस्थाने प्रत्यक्षोदयः? अन्योन्याश्रयणात्। द्वितीयेऽपि नित्यस्वाभाविकप्रत्यक्षस्य च किं नाम प्रतिबन्धकम्? अयमत्र संग्रहश्लोकः—

भ्रान्तिकारणसद्भावे प्रत्यक्षस्य ह्यसम्भवः। सम्भवे निष्फलैव स्यात्तदुच्छेदस्य कल्पना॥

स्वानुवृत्त्यर्थमुच्छेदस्सामग्र्यैवानुवर्तनात्। प्रतिबन्धनिवृत्त्यर्थमुच्छेदे प्रथमं कथम्॥

प्रत्यक्षं कारणोच्छेदे तदुच्छेदस्ततोऽपि चेत्। अन्योन्याश्रयणं तु स्यात्प्रतिबन्धो न चात्मनि॥ इति॥

नापि चतुर्थः, प्रागभावस्यासाध्यत्वात्, तदनुवर्तनस्याप्यन्ततस्तत्प्रतियोगिकारणोच्छेदकोटिनिक्षेपात्, तस्य च निरस्तत्वात्॥ न पञ्चमषष्ठौ, परोक्षादपि तत्सिद्धेः; प्रत्यक्षमपि हि द्विचन्द्रादिज्ञानमनुवर्तमानं परोक्षेण चन्द्रैकत्वानु-मानादिना बाध्यते, तावतैव चन्द्रद्वित्वाध्यवसायशैथिल्यं जायते। अन्यथा देहात्मभ्रमवतामनुमानेनागमेन वा देहातिरिक्तात्मविस्रम्भो न स्यात्। परोक्षबाधे भ्रमोऽनुवर्तत इति चेन्न, तुल्यमेतदित्युक्तत्वात्।

सञ्जातेऽप्यपरोक्षेऽपि बाधे कारणसम्भवात्। अङ्गुल्याद्यैर्भवद्भ्रान्तिरुपष्टम्भनहेतुभिः॥

नापि सप्तमः, तस्यासांव्यवहारिकत्वेनैतदर्थोपायोपदेशायोगात्, अन्वयव्यतिरेकागोचरत्वेनापरोक्षपक्षपात-विरहाच्च। एवं सामान्येनापरोक्षज्ञानानपेक्षायां कुतस्तत्कारणविशेषचिन्तेत्यनुत्थानमेव शब्दजन्यप्रत्यक्षवादस्येत्यभिप्रेत्य भाष्यकारैरिह न संरम्भः कृतः—* सत्यां सामग्र्यां ज्ञानानुत्पत्त्यनुपपत्तेरित्यादिना। * द्रष्टव्य इत्यादेर्दर्शनसमानाकार-विधिपरत्वोक्तेश्चेदमपि दूषितममंस्त। समन्वयाधिकरणपूर्वपक्षे तु परोक्त्यैव दूषयिष्यति—* न च शब्द एव प्रत्यक्षज्ञानं जनयतीति वक्तुं युक्तं तस्यानिन्द्रियत्वादित्यादिना। अस्तु वा कथंचिदापरोक्ष्यपरिशेषः, तथाऽपि प्रत्यक्पराङ्मुख-त्वादिलक्षणविरुद्धव्याप्त्येन्द्रियपरित्यागे तुल्यन्यायतया वाक्यस्यापि परित्यागप्रसङ्गः। दर्शनादर्शनाभ्यां विशेष इति चेन्न, तदसिद्धेः। तत्सन्देहेऽपि न विरुद्धव्याप्तिरिति चेन्न, इन्द्रियादिष्वपि प्रसङ्गात्। अथ सत्यामेव विरुद्धव्याप्तौ गत्यन्तराभावात् तदनादरेण वाक्यस्यापरोक्षधीहेतुत्वं कल्प्येत, हन्त तर्हि इन्द्रियादिष्वेव भक्तिरियं प्रयुज्यताम्। तथा च सिद्धे गत्यन्तरे किं वाक्येन? अयं तु निर्णयः—

विरुद्धव्याप्तिसद्भावो वाक्यस्यापि तथा भवेत्। असद्भावो यदि भवेत् सम एव द्वयोरपि॥

दशमस्त्वमसीत्यादौ भवेद्वाक्यात्परोक्षधीः। सामग्र्युत्थापनात्पश्चात्प्रत्यक्षादपरोक्षधीः॥

न च प्रत्यक्षादेरद्वैतगोचरत्वविरोधः, तेषामपि त्वदभिमतकूटयुक्तिभिस्तत्त्वमस्यादेरिवाद्वैतगोचरत्वस्थापनस्य शक्यत्वात्। यत्तु—प्रत्यक्षस्य न परोक्षात्परिभव इति, तदपि ज्वालैक्यबाधकभेदानुमानादिदर्शनेन निरस्तमेव। यदपि

ऐन्द्रियकप्रत्यक्षाच्छास्त्रजन्यप्रत्यक्षस्य प्राबल्यमुक्तम्, तदप्यसत्, एकदोषप्रसूतत्वादेर्दर्शयिष्यमाणत्वात्।

प्रत्यक्षं ब्रह्म गृह्णाति यदि च ब्रह्मदृश्यता। अब्रह्मालम्बनत्वे तु कथं नु बलवत्तरम्॥

यत्पुनः अपरोक्षज्ञानस्य मोक्षहेतुत्वं श्रुतिसिद्धमिति, तावन्मात्राभ्युपगमेऽपि न नः काचित् क्षतिः। यत्तु शब्दादेव शब्दस्यापरोक्षधीहेतुत्वं दर्शितम्, तदपि हास्यम्; अन्यपरत्वस्य आकुमारं प्रसिद्धेः, साक्षात्कारहेतोर्मनसस्सहायतया दृढव्यवसायहेतुतामात्रेण वा तदुपपत्तेः। यथाश्रुतग्रहणे चक्षुष्ट्वादेरपि स्वीकर्तव्यत्वात्। *श्रुतिस्मृती तु विप्राणां नयने द्वे इति हि श्रूयते। *वेदान्तविज्ञानसुनिश्चितार्था इत्यादिषु परोक्षव्यवसायमात्रमेवोच्यते। यत्तु विज्ञानमिति विशेषणेन विशेषविषयत्वसिद्ध्या निश्चयहेतुत्वे सिद्धेऽपि सुशब्देन विशेषणादपरोक्षनिश्चयहेतुत्वं सिद्धमिति, तदप्यत्यन्तपरिहास्यम्; अकम्पनीयव्यवसायविवक्षया सुशब्दप्रयोगात्। यः पुनः *तत्त्वमस्यादिवाक्यजन्यज्ञानत्वादिति प्रयोगः, स तज्जन्यश्रावणज्ञानेऽनैकान्तिकः। अतिप्रसङ्गश्च, वाक्यान्तरेष्वप्येवं प्रयोक्तुं शक्यत्वात्। परिहारस्य च समत्वात्। विषयजन्येषु च व्याप्तेस्सङ्कोचात्।

न वाक्यजन्यताहेतुः प्रत्यक्षत्वे तु किं पुनः। अर्थजन्यत्वमेव स्यात्ततस्सोपाधिकस्त्वयम्॥

वाक्यविषयप्रत्यक्षेऽपि वाक्यस्यैवार्थत्वादर्थजन्यत्वोपाधेः साध्यव्यापकत्वाविरोधः। यश्च स्वप्रकाशार्थोपदेशरूपत्वात् स्वतः प्रत्यक्षार्थविषयत्वाद्वेति, सोऽपि पूर्ववदेवानैकान्तः। दृष्टान्तस्य च साध्यविकलत्वं दर्शितमेवेति। प्रतिप्रयोगश्च—विगीतं वाक्यं न स्वार्थविषयप्रत्यक्षज्ञानजनकम्, वाक्यत्वात् ज्योतिष्टोमादिवाक्यवत्। तथा विगीता धीः न स्वविषये प्रत्यक्षा, वाक्यजन्यत्वे सति वाक्येतरविषयत्वात् स्वर्गयागादिसम्बन्धबुद्धिवत्। न चात्र श्रुतिविरुद्धतया कालात्ययापदेशः, श्रुतेरन्यपरत्वस्थापनात्। न च दशमस्त्वमसीत्यादिवाक्येन तज्जन्यज्ञानेन वाऽनैकान्तिकता, तत्र साक्षात्कारप्रसङ्गस्यापि निषिद्धत्वात्। नच—पूर्वैरेव हेतुभिस्सप्रतिसाधनता, उपलम्भानुरोधेनानतिप्रसञ्जकव्याप्तिमूलतया प्रबलत्वात्, समत्वेऽपि प्रकरणसमत्वापादनदशायामन्योन्यप्रतिरोधस्येष्टत्वेन तत्प्रसङ्गानुपपत्तेश्च। न च विपक्षे बाधकविरहादप्रयोजकता, अविशेषात्, शब्दान्तराणामपि प्रत्यक्षज्ञानजनकत्वस्य बाधकस्य च सत्त्वात्। न चाप्रत्यक्षार्थविषयतया तेषां तदनुत्पादकत्वमिति वाच्यम्। तथाऽपि अयं घटः दशमोऽयमित्यादिवाक्यानां तत्प्रसङ्गात्। न चेह भवताऽपि शब्दस्य साक्षात्कारहेतुत्वमिष्यते, इष्यतां वा; तथाऽपि ज्योतिष्टोमादिवाक्यानां तत्प्रसङ्गो दुर्वारः। तत्रापि मनस्सहकृतशब्देनैव प्रत्यक्षज्ञानं जायत इति साहसस्य सुशकत्वात्, तावतैव तेषां प्रत्यक्षार्थविषयत्वस्यापि सिद्धेरवान्तरविशेषानिर्धारणादिति। अस्तु वा विपक्षे बाधकाभावः। स तु पूर्वेषामपि समान इति। तथाऽपि प्रतिरोधमात्रं सिद्धम्। नन्वस्ति पूर्वेषां विपक्षे बाधकम्। आत्मविज्ञानस्य मोक्षसाधनत्वश्रुत्यन्यथानुपपत्तिः, तथा हि; श्रुत्युपपत्तिभ्यां वाक्यार्थज्ञानादेव मिथ्याभूतसंसारनिवृत्तिरिति स्थिते प्रत्यक्षस्य भ्रमस्य परोक्षबाध्यत्वायोगेन प्रत्यक्षपरिशेषे ब्रह्मणि च सकलकरणागोचरे अनुमानादिषु च साक्षात्कारवैदेशिकेषु यदि वाक्यादप्यपरोक्षज्ञानं न स्यात्, अपवर्गोऽपि न स्यादेवेति। इदमपि दण्डवातसूदितदर्वीकरनर्तनम्, अस्याः परिपाटिकायाः आरम्भ एव निरस्तत्वात्। यः पुनरसावूहः—अपरोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति, अपरोक्षनिष्ठात्यन्ताभावाप्रतियोगित्वात् ज्ञानत्ववदिति, अत्र तावद्वाक्यस्वरूपजन्यतद्विषयश्रावणसाक्षात्कारेण सिद्धसाधनता, प्रत्यक्षज्ञानहेताविन्द्रियार्थसन्निकर्षे अर्थस्येन्द्रियस्य च तुल्यकक्ष्यत्वात्। अथ पुनः तत्त्वमस्यादिवाक्यजन्यतदर्थविषयज्ञानवृत्तीति

साध्यं विशेष्येत, तथाऽपि परोक्षतद्वाक्यार्थानुभवसंस्कारसहकृतश्रवणजन्यतदर्थप्रतिपादकत्वविशिष्टवाक्यस्वरूपसाक्षात्कारेण सिद्धसाधनतैव; स हि प्रत्यभिज्ञात्मा विशेषणतया अर्थं विशेष्य तथा वाक्यं च विषयीकरोति। अथ तदर्थैकविषयकज्ञानवृत्तीति विशेषयसि, तथाऽपि ब्रह्मेतरविषयत्वधर्मेण हेतोरनैकान्तिकता। तत्खलु सम्प्रतिपन्नेष्वपरोक्षेषु सर्वेष्वपि वर्तते, न पुनस्संशयत्वविपर्ययत्वचाक्षुषत्वादिवत् कुतश्चिदपरोक्षान्निवर्तते; * तत्त्वमस्यादिवाक्यजन्ये तु ज्ञानेनैव वर्तते। * तत्त्वमस्यादिवाक्यव्यतिरिक्तजन्योऽपि ब्रह्मसाक्षात्कारोऽस्तीति चेत्, हन्त तर्हि वाक्यैकपरिशेषप्रयासं विस्मृतवानसि। तथा सति वाक्यजन्यसाक्षात्कारकल्पनवैयर्थ्यं च, तत एव तत्कार्यसिद्धेः। यत्तु—परोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्तीति प्रत्यनुमाने सिद्धसाधनत्वमुक्तं, तत्र यदि तत्त्वमस्यादिवाक्यजन्यज्ञानाभिव्यापीति प्रयुञ्जीत, तदा किं ब्रूयाः? श्रुतिविरोधात् कालात्ययापदेशमेव ब्रूम इति चेत्, हन्ताद्यापि त्वया श्रुतिस्तपस्विनी कूटसाक्षिणी कल्प्यते। सा तु यथार्थवादिनी न किंचित्त्वदभिमतं ब्रवीति। यत्तु—अपरोक्षत्वं ज्योतिष्टोमादिवाक्यजन्यज्ञानवृत्तीति प्रतिबन्द्यनुमाने विपक्षे बाधकाभावाद्वैषम्यमुक्तम्, तदत्रापि समानमेव। अर्थापत्तेः कल्पकासिद्ध्यादिनिरस्तत्वात्। परोक्षादपि ज्ञानात् प्रत्यक्षोपमर्दादेः प्रागेव समर्थितत्वात्। प्रत्यक्षापेक्षायामपि तत्त्वमस्यादिवाक्यव्यतिरिक्तजन्येनापि प्रत्यक्षेण बाधोपपत्तावन्यथासिद्धेः। अस्ति च योगिप्रत्यक्षमदृष्टविशेषसहकृतान्तःकरणजन्यमागमसमधिगम्यमास्तिकानाम्। श्रूयते हि *रामायणे*—* रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः। तत्सर्वं धर्मवीर्येण यथावत्संप्रपश्यति॥ इति॥

यत्तु भाष्ये दर्शनसमानाकारत्वमुच्यते, तन्मोक्षसाधनभूताया ध्रुवानुस्मृतेरेव; न पुनर्धर्मवीर्यफलभूतयोगिप्रत्यक्षं निषिध्यते, तस्यापि श्रुतत्वात्। त्वदभिमतस्य तु श्रुतत्वं प्रतिक्षिप्तमिति तस्यैवासम्भवः। यद्यपि योगिप्रत्यक्षं फलमात्रमित्यस्मन्मतम्, तथाऽपि तदधीनायाः परिशेषासिद्धेरन्यथासिद्धेश्चोपन्यासो नानुपपन्नः। * क्लृप्तकल्प्यविरोधे तु युक्तः क्लृप्तपरिग्रह इति न्यायात्। यदि च यत्किंचिद्विपक्षे बाधकमित्यभिमानमात्रेण परिगृह्यानुमिनोषि, तदा ज्योतिष्टोमादिवाक्येऽपि भवादृशः कोऽपि तथा तदभिमत्याऽनुमिनुयादेव। एवं सिद्धसाधनत्वानैकान्तिकत्वातिप्रसञ्जकत्वाभाससमानयोगक्षेमत्वान्यथासिद्धत्वादिदोषदूषितत्वादनुमानविशेषोत्प्रेक्षणमेव निपुणधियां सिषाधयिषितस्य प्रामाणिकत्वानुमितिमन्तर्गतां सूचयति। अत एवास्मिन्नर्थे महाविद्यादिप्रयोगान्तरमनोरथोऽपि भग्नः। यत्तु—शब्दस्य प्रत्यक्षान्तर्भावप्रसङ्गे स्वतोऽपरोक्षब्रह्मात्मविषयशब्दान्यत्वे सति अपरोक्षप्रमितिकारणत्वं प्रत्यक्षान्तर्भावप्रयोजकमित्युक्तम्, तत् तत्त्वमस्यादेरपरोक्षधीजनकत्वे वक्तव्यम्; तत्तु नाद्यापि सिद्ध्यतीति तत्प्रसङ्गो दुर्वारः। तदेवं वाक्यजन्यसाक्षात्कारसिद्धेः परिशेषात्तज्जन्यपरोक्षज्ञानेनैवाप्रतिबद्धसामग्रीसमुद्भवेन बाध इति स्थितौ श्रवणादिविधिनैरर्थक्यं प्रागुक्तं सुस्थितमेव। ततश्च श्रुतवेदान्तानां संसारानुवृत्तिदर्शनविरोधो दुर्वारः। बाधितानुवृत्तिस्तु बाधिता। जीवन्मुक्तिं च विस्तरेण दूषयिष्यामः। तदेवमनुमानागमार्थापत्तीनां प्रतिक्षेपात् प्रत्यक्षोपमानादेश्च तत्रासम्भवात् त्वयाऽप्यनङ्गीकृतत्वाच्च निष्प्रमाणतया तत्त्वमस्यादेः साक्षात्कारजनकत्ववचनं प्राचामाचार्यवन्दकानां प्रलोभनमात्रमित्युत्पश्याम इति॥

॥ इति शतदूषण्यां शब्दजन्यप्रत्यक्षभङ्गवादस्सप्तमः॥ ७॥

॥ अथ साधनचतुष्टयपूर्ववृत्तत्वभङ्गवादः अष्टमः ॥ ८ ॥

शास्त्रैक्ये विषयाद्यभेदनियते सङ्गत्यधीनक्रमे कर्मालोच्य तदङ्गिकामथ परां विद्यामुपादित्सुभिः ।
यस्तद्वेद्यतया स्वयंफलतयाऽप्यारोहति ज्ञेयतां कुर्वीतैष विभुर्दिश्रिया सह मम स्वान्तं निजान्तःपुरम् ॥

इह तावदानन्तर्यार्थे प्रचुरप्रसिद्धिकमथशब्दमादौ प्रयुञ्जानस्य सूत्रकारस्य तत्सम्भवे तदर्थतैवाभिमतेत्यङ्गीकार्यम् । तत्सम्भवश्च यदि नियतपूर्ववृत्तमसाधारणं तथात्वज्ञापने सप्रयोजनं च किमपि स्यात्, तदा स्यात् । अन्यथा न स्यात् । यथा—* अथ योगानुशासनमित्यादौ । न हि यदृच्छागतं यत्किञ्चिन्निमेषोन्मेषादिकं मक्षिकासञ्चारादिकं वा पूर्ववृत्ततयाऽत्र वक्तुं युज्यते, तस्य सर्वत्र सम्भवात्, अभिधानप्रयोजनविरहाच्च । अत एव सर्वपुरुषव्यापारसाधारणापेक्षितभोजनादिपूर्ववृत्तत्वोक्तिरपि निरस्ता, विशेषनियमाभावात् । अवधानात्ममनस्संयोगादिकमपि न विचारविशेषं प्रति विशेषहेतुः, सर्वशास्त्रसाधारण्यात् । सामग्री तु तथा स्यात्, तदुक्तिरपि यदि सामग्रीत्ववेषेण, तदपि सर्वकार्यसाधारण्यात् तदभिधाननैरर्थक्याच्च निरस्तम् । तेन सामग्रीविशेषविशेषकं विशेषकारणमेव वाच्यम् । अतस्सप्रयोजनाभिधानासाधारणनियतपूर्ववृत्तवस्तुगवेषणे नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयं पूर्ववृत्तम्, तस्यैव ब्रह्मजिज्ञासायां नियमेनापेक्षितत्वात्, तदुक्तेश्चाधिकारिविशेषप्रतिपादनार्थतया सप्रयोजनत्वाच्चेति यदुक्तं तत्परामृशामः ॥

तत्र नित्यानित्यवस्तुविवेकस्तावत्कथंभूत इति । किमिदं वस्तु नित्यमिदं वस्त्वनित्यमित्येवमात्मा, उत नित्यानित्ययोर्वसतीति नित्यानित्यवस्तु तच्च नित्यानित्ययोर्धर्मः, हेयत्वोपादेयत्वे इत्यर्थः—इति **वाचस्पति**कल्पितप्रकार इति । तत्र न प्रथमः । तस्य वेदान्तश्रवणात्पूर्वमसिद्धत्वात् । तत्रैव ह्यात्मादेर्नित्यत्वं वियदादेश्चानित्यत्वं विविच्यते । तथाचान्योन्याश्रयणम्—वेदान्तश्रवणे सिद्धे नित्यानित्यविवेकधीः । नित्यानित्यविवेकेन वेदान्तश्रवणं त्विति ॥ अथ यदि शास्त्रान्तरात्तद्विवेक इति मन्यसे, तदा विपरीतविवेकापत्तिः । वियदादयो वैशेषिकादिभिर्नित्या एव परिगृह्यन्ते ; आत्मादयश्च सौगतादिभिरनित्या असन्तो वा । अथादूरविप्रकृष्टसांख्ययोगशीलनेन तद्विवेक इति चिन्तयसि, तर्हि तत्रैवात्मानात्मविवेकसिद्धेः किं ब्रह्ममीमांसया? अनन्यलभ्यं हि शास्त्रफलम् । विशेषज्ञप्त्यर्थमिति चेन्न, निर्विशेषे तदयोगात् । आत्माद्वैतसिद्ध्यर्थमिति चेन्न, स्वात्मनो नित्यनिर्लेपत्वादिव्यवसायमात्रेण समीहितसिद्धौ स्वव्यतिरिक्तात्मसदसद्भावचिन्तनस्य ध्वाङ्क्षदन्तपरीक्षायमाणत्वात् । आत्मव्यतिरिक्तमिथ्यात्वावसायार्थमित्येतदपि तत एव दत्तोत्तरम् । तस्य सौगतसमयेऽपि सुलभत्वाच्च । उक्तं हि ***योगाचारेण***—* अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ इति । अथ वेदविरुद्धतन्त्रत्वात्ततो न निश्चय इत्याशयः ; तर्हि सूत्रकारैरेव तद्वन्निराकरिष्यमाणसांख्यादितन्त्रैरपि नाश्वसिहि । न हि तद्वा तादृग्वेति कश्चिद्विशेष इति न्यायात् अविरुद्धांशं स्वीकुर्म इति चेत्, कस्तर्हि सौगतेषु ते प्रद्वेषः? तेष्वपि भवदुपजीव्या बहवोऽर्थराशयस्सन्ति । कथं चायमर्थो न विरुद्धः अयं तु विरुद्ध इति वेदान्तश्रवणात् पूर्वमवगच्छसि? तथा च तत्राप्यन्योन्याश्रयणम् । हितोपदेशिपित्रादिवचनविस्रम्भादिति चेत्, तर्हि तत एव नित्यानित्यवस्तुविवेकोऽपि सिध्यति, किं सांख्यादिकपोलजलकणिकास्वादेन? अस्त्वेवमपि, का नो हानिरिति चेत्; वेदान्तश्रवणहानिः । तदुपदेशमात्रेणालसास्तिकवत् समस्तार्थविस्रम्भोपपत्तेः । सर्वस्यापि विवेकस्य आत्मानात्मविवेकार्थतया तत्सिद्धौ ज्ञातव्यान्तरपरिशेषाभावात् । परिशेषे च निर्गुणत्वव्याघाताच्च ।

ख्यातिलाभपूजार्थप्रवचनादिकौतुकात्स्वयं तत्परीक्षणमिति चेत्, हन्तैवं साधु शमादिसाधनसम्पत्सम्पादिता । कामक्रोधादेरेव वेदान्तश्रवणनिमित्तत्वेनोपादानात् । ख्यातिलाभाद्यर्थश्रवणे च नित्यानित्यवस्तुविवेकादेः क्वोपयोगः ?

अथ वैधत्वान्मीमांसाश्रवणस्य स्वयं विमर्श इति, तदपि न, अर्थनिश्चयसिद्ध्यर्थत्वाद्विमर्शस्य । निश्चयो यद्युपदेशात् सिध्यति, किं वृथा प्रयासेन ? अन्यथा प्रदक्षिणनमस्कारादिवददृष्टार्थत्वमेव स्यान्मीमांसाश्रवणस्य । न च मीमांसाश्रवणस्य वैधत्वमिति प्रागेव समर्थितम् । अस्तु च वैधत्वम्, तथाऽपि नित्यानित्यवस्तुविवेकस्यापि स्वेतिकर्तव्यताभूतमीमांसाधीनस्यैव विधिना स्वीकारात्, तथाविधस्य च तस्य अविरोधलक्षणसाध्यत्वान्न पूर्वत्वसिद्धिः । यदि च वैधं वेदान्तश्रवणमिच्छसि, तदा कर्ममीमांसायां कुतस्ते कोपः ? श्रूयते हि—* स्थाणुरयं भारवाहः किलाभूत् अधीत्य वेदं न विजानाति योऽर्थमिति । तेन कर्मभागश्रवणपूर्वकमेव ब्रह्मभागश्रवणमिति सिध्यति । न तावदनधीतवेदस्य वेदान्तश्रवणमुपपद्यते, अनधिकारात् । न चोपनिषन्मात्राध्ययनं कस्यचित् शास्त्रार्थः, स्वाध्यायोऽध्येतव्य इत्यखण्डग्रहणात् । तन्मात्राध्ययनविध्यश्रवणाच्च । कृत्स्नाध्ययनेन कृत्स्नार्थविचारमेव विधिः प्रयुङ्क्ते । तथा च ब्रह्मविचारात्पूर्वं पश्चाद्वा कर्मविचारोऽपि कर्तव्य एवेति पश्य । तथा च सति यदि साधनचतुष्टयसम्पत्तिपूर्वकमश्रूयन्त वेदान्ताः, कथमसौ पुनरनपेक्षितं विरुद्धत्वाभिमतं कर्म जिज्ञासेतेति परिशेषात्कर्मविचारस्य पूर्वत्वसिद्धिः । यदा तु कर्म पूर्वं विचारितम्, तदा * परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायादित्यादिश्रुतिसिद्धप्रकारेण ब्रह्मबुभुत्सा संभवतीत्यतोऽपि क्रमनियम इति कर्मविचारस्य पूर्ववृत्तत्वमवश्याश्रयणीयम् । एवं रागप्राप्तश्रवणपक्षेऽपि क्रमसिद्धिः, रागोऽपि हि साङ्गाधीतसशिरस्कवेदस्यापातप्रतीतसर्ववेदभागार्थस्य कर्मब्रह्मभागयोरविशेषेण सातिशयनिरतिशयसमस्तपुरुषार्थप्रतीतावुभयत्राप्यविशेषेण प्रवर्तने क्रममपेक्षमाणः स्वाध्यायानां सर्वेषां प्रायशः कर्मोपक्रमत्वात् सारस्वताङ्गवत् मुख्यक्रमानुरोधेन स्वाध्यायेतिकर्तव्यताभूतमीमांसाक्रमं प्रयुञ्जानः, * काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः । क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ इति न्यायेन त्रिवर्गे प्रथमप्रावण्यरूपमर्थक्रमं चापेक्षमाणः, * यज्ञेन दानेनेत्यादिना यज्ञाद्यङ्गकोपासनविधौ यज्ञादिदृष्टान्तेषु यज्ञादिकल्पने च पदार्थभूतयज्ञादिस्वरूपाधिगमसाकाङ्क्षतया पूर्वमेव कर्मविचाराक्षेपं पश्यन् ब्रह्मविद्याङ्गभूतकर्मसमृद्ध्यर्थतया ब्रह्मदृष्टिरूपतया च शारीरके मुख्यसङ्गतस्योद्गीथविद्यादेश्च कर्माङ्गाश्रयतया तदाश्रयाङ्गकर्मपरिज्ञानज्येष्ठतामालोचयन् कर्मब्रह्ममीमांसयोः क्रमेण पुरुषं प्रवर्तयति । किंच प्रसङ्गचिन्तितस्याप्यर्थस्य प्रकृते केनचिदुपयोगेन भवितव्यम् । तत्र यद्यपि विद्यारूपत्वाविशेषादिहोद्गीथविद्यादीनां प्रसङ्गस्सम्भवति, तथाऽपि तच्चिन्तनस्यात्र क उपयोगः ? कर्मिणां तदनुष्ठानेन कर्मसाद्गुण्यार्थमिह चिन्तेति चेन्न ; कर्मनिष्ठस्यात्र शास्त्रे त्वयाऽधिकाराभावकथनात् । अथ यदि कर्मविन्मध्ये समागत्य स्वोपयुक्तांशं कंचिच्चिन्तयत्विति मन्यसे, तदसत् ; अनिरूपितब्रह्मस्वरूपस्य ब्रह्मदृष्टिरूपासु तासु चिन्तनानवकाशात् । तदाह—* उद्गीथाद्युपासनानि कर्मसमृद्ध्यर्थान्यपि ब्रह्मदृष्टिरूपाणि ब्रह्मज्ञानापेक्षाणीत्यादि । अथ स एव कर्मार्थं ब्रह्मापि चिन्तयेत्, तर्हि तत एवैकशास्त्र्यं तावत्सिद्धम् ॥ प्रागुक्तनयेन क्रमश्च । गुणप्रधानभाववैपरीत्यमेव तु भवता साधितम् । ब्रह्मविदस्तु तच्चिन्तया क्वोपयोगस्त्वन्मते ? कर्मविद्भ्यस्तदुपदेश उपयोग इति चेत्तर्हि कर्मापि चिन्तयेदविशेषात् । अथ विविदिषार्थकर्मसाद्गुण्यसिद्ध्यर्थमिति पश्यसि, तथाऽप्यनुपयोग एव ; विविदिषायां जातायामेव श्रवणे प्रवृत्तेः, तत्रापि पूर्ववत्परोपदेशार्थत्वायोगात् । कर्मणां च वेदनाङ्गत्वस्य प्रागेव स्थापितत्वात् न विविदिषाङ्गकर्मसिद्धिः । ब्रह्मविद्याभ्यः

पृथक्करणमेव प्रयोजनमिति चेन्न, तस्यैकाधिकरणमात्रसाध्यत्वात्, तथाचात्र चिन्तनस्यादर्शनात् प्रकारान्तरैरेव तु बहुशोऽत्र तासां चिन्तनात्। एवं कर्मविन्निरूपणे ब्रह्मवेदनापेक्षणात् ब्रह्मनिरूपणे च कर्मवेदनसापेक्षत्वात् अन्यतरविदोऽशक्यनिरूपणासूद्रीथविद्यासूभयविद एव चिन्तनावकाश इति फलितम्। शारीरके च ब्रह्मस्वरूपनिरूपणानन्तरमेव तच्चिन्तनं सूत्रितम्। तस्मादत्रैव साक्षात्सङ्गतस्य तच्चिन्तनस्य प्रधानोपयोगापेक्षायामङ्गभूतकर्मसमृद्धिद्वाराऽङ्गिनो वेदनस्य शीघ्रनिष्पादनं नाम महानुपयोगः। तदप्याह—* तान्यपि कर्माण्यनभिसंहितफलानि ब्रह्मविद्योत्पादकानीति तत्साद्गुण्यापादकान्येतानि सुतरामिहैव सङ्गतानीति॥

किंच, * अत्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्। इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत्॥ इति न्यायात्कर्ममात्रेण चेदमृतत्वं लभ्येत, कः पुनः कर्माङ्गकात्कर्मसमुच्चिताद्वा ज्ञानादमृतत्वं लिप्सेतेत्येतदप्युक्तं प्रागेव। अतोऽपि कर्मण्येव प्राक्प्रवृत्तिः। कर्मणि तु निरूपिते न्यायपरिश्रान्तचेतस्तयोत्तरोत्तरातिशयितकर्मविधानादिभिः कर्मणामल्पास्थिरफलत्वमवसाय तत्संवादकानि च * परीक्ष्य लोकानित्यादीनि वाक्यानि प्रागापातधीजनकान्यपि निरूपितसंवादाद्यथाश्रुतार्थानि सामान्यतो निश्चित्यानन्तस्थिरफलस्य केवलकर्मभिरलभ्यतां मत्वा प्राचीनकर्मोपस्कृतज्ञानसाध्यानन्तस्थिरफलापातप्रतीत्या प्रतिबन्धकरहितया सञ्जातबुभुत्सातिशयः शारीरकशास्त्रमारभेतेति स्थितमेतत्। कथंच नित्यानित्यवस्तुविवेकसिद्धये शास्त्रान्तरावकाशः? प्रागुपनयनात् कामचारवादभक्षितया यथोपलब्धकुक्षिंभरेर्बालस्य शास्त्रान्तरावतारशङ्काऽपि नास्ति; उपनीतस्य वेदाध्ययने नियुक्तत्वात् अधीतवेदस्यापि तदर्थविचारे विधिना रागेण वा प्रेरितत्वात् तयोश्च विंशतिलक्षणीश्रवणमन्तरेणानुपरमात्। अक्रमप्रवृत्तांस्तु न शास्त्राधिकारिण इति स्वीकुर्मः। अन्यथेदानीमेव अकृतव्रतस्य अनधिगताङ्गस्य लिखितपठितस्वाध्यायस्यैव मीमांसाधिकारप्रसङ्गात् सौगतादीनामप्यस्मन्मतदूषणार्थिनां ब्रह्मविचाराधिकारप्रसङ्गाच्च। अतो हेत्वन्तरान्नित्यानित्यवस्तुविवेकोऽयमाशामोदकायते। तेनान्यस्मात्तदसिद्धौ न तद्वतो ब्रह्मविचारः, तेनैव तद्वत्तेति तु मिथस्संश्रयः पुनरुन्मज्जति। एतदभिप्रायेण भाष्यम्—* नित्यानित्यवस्तुविवेकादयश्च मीमांसाश्रवणमन्तरेण न संपत्स्यन्त इत्यादि। एतेनैव द्वितीयोऽपि कल्पो दूषित इति भाष्यकाराभिप्रायः। तथा हि। यदि नित्यानित्यौ पदार्थौ प्रमाणेन निश्चित्य तद्गते हेयोपादेयत्वे विविच्येते तदा पूर्वोक्तमेवोत्तरम्, चक्रकापत्तेः। अथ नित्यमस्ति चेत्तदुपादेयमनित्यं चेदनुपादेयमित्येवमात्मविवेकः, तदपि मन्दम्; अपुरुषार्थत्वे नित्यस्याप्यनुपादेयत्वात्, अनित्यस्यापि पुरुषार्थतायामुपादेयत्वात्। अत एव ह्यनित्यस्वरूपस्य मोक्षसाधनस्यानुष्ठानम्। अथ पुरुषार्थेषु नित्यमस्ति चेत्तदेवोपादेयमिति विवेकः; एवंविधसंशयात्मकविवेकस्तु शास्त्रान्तरे कर्मविचारेऽपि प्रवर्तयितुमलमिति नासाधारण्यम्। तत्रापि हि * अपाम सोमममृता अभूम, अक्षय्यँ ह वै चातुर्मास्ययाजिनस्सुकृतं भवतीति नित्यफलापातप्रतीत्या संशय उपपद्यते। वस्तुतस्तत्र नित्यफलं नास्तीति चेत्किमतः? अधिकुर्वाणस्य तदनिश्चयात्। आप्तवाक्यादेवादौ निश्चिनोतीति चेत्; तर्ह्यत्रापि तत एव नित्यमस्तीति निश्चिनुयादिति * नित्यमस्ति चेदित्येवंरूपयद्युपनिबन्धनानुपपत्तेः। तथा निश्चये च प्राग्वदेवोत्तरम्। यदि नित्यमस्तीति सामान्यतो विस्रम्भः; तर्हि इदं नित्यमिदमनित्यमिति विविच्योपादिष्टेऽपि शक्यं विश्वसितुम्; तथाच वृथा वेदान्तवाक्यविचार इति।

याच शमदमादिसाधनसम्पत्, सा किं श्रवणौपयिकतादात्विकावधानरूपा विवक्षिता; उत * शान्तो दान्त इत्याद्युक्तजितेन्द्रियत्वरूपेति । पूर्वस्यास्तावद्धेतुत्वमिच्छामः, तस्यास्सर्वग्रन्थश्रवणसाधारण्यात् नासौ वेदान्तश्रवणे विशेष इति नात्र तद्विवक्षा युक्ता । सांख्यादिश्रवणेऽपि हि तादृग्विधतादात्विकशान्त्यादिसम्प्रयुक्तैव । द्वितीया तु न श्रवणं प्रति साधनम्, * शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येदिति दर्शनसाधनतया तच्छ्रुतेः । न च तद्दर्शनं श्रवणफलमिति दर्शनसाधनभूतश्रवणाङ्गत्वं शमादीनामिति वक्तुं युक्तम्; श्रुतहानाश्रुतकल्पनयादिदोषप्रसङ्गात् । अविधेयज्ञानवादशब्दजन्यप्रत्यक्षयोश्च निरस्तत्वात् । एषां च शमादीनां ब्रह्मविद्याङ्गतयोपादेयत्वं साधनलक्षणे शमदमाधिकरणेऽवगन्तव्यम् । अत एते शमादयः कथं शारीरकश्रवणात्पूर्वमुपात्ताः स्युः? अयमत्र संग्रहः—शान्त्यादयो विधास्यन्ते विद्याङ्गत्वेन संयुताः । शास्त्रारंभे कथं तेषामुपयोगस्त्वयोच्यते ॥ इदं चोक्तं भाष्ये—* नित्यानित्यवस्तुविवेकादयश्चेत्यादिशब्देन संग्रहात् । तथा शमादीनां साधनत्वावगतेः कर्ममीमांसापेक्षतया कर्मविचारपूर्ववृत्तत्वस्य दुस्त्यजत्वमप्युक्तम्—* एषां साधनत्वं च विनियोगावसेयम्, विनियोगश्च श्रुतिलिङ्गादिभ्यः, स च तार्तीय इति । यद्यपि शारीरकमीमांसायामेवापेक्षिताः श्रुतिलिङ्गादयोऽपि व्युत्पादयितुं शक्यन्ते, तथाऽपि संगतिविशेषात्सामान्यतस्तृतीयाध्याय एव तद्व्युत्पादनं प्राप्तमिति सिद्धोपयोगमात्रमत्र कर्तव्यम्, न पुनस्तद्व्युत्पादने प्रयतितव्यम् । इदं च तार्तीयश्रुत्यादिसापेक्षत्वाभिधानं प्रदर्शनार्थम्; कथं वेदप्रामाण्यस्थापनमन्तरेण तदर्थभूतब्रह्मविचारोऽपि स्यात्? तत्प्रामाण्यं च प्रथमाध्यायसाध्यम्, कथं च सामान्यतश्शास्त्राणां शास्त्रार्थानां वा द्वैतीयभेदाभावे दुरनुष्ठानतादुःस्थं प्रामाण्यं प्रतिष्ठितं भवेत्? कथं वा विद्याख्येषु शास्त्रार्थविशेषेषु भेदाभेदचिन्तावकाशः? तेन शब्दान्तरादयो द्वैतीया विशेषतश्चिन्त्याः । तार्तीयोपयोगस्तु दर्शितस्थलान्तरे भाव्यः, श्रुतिलिङ्गादेस्सर्वत्रापेक्षणात् । उद्गीथविद्यादेः क्रत्वर्थत्वपुरुषार्थत्वादिविमर्शस्तु तौर्यप्रयुक्तिसापेक्षः, षोढाविभक्तपाञ्चमिकक्रमप्रमाणापेक्षिणी चार्चिराद्यातिवाहिकगणपौर्वापर्यव्यवस्था, कर्तृलक्षणन्यायोपजीविनी च ब्रह्मविद्याधिकारवर्णाश्रमादिधर्मविशेषस्थापना । एवं * तेषामेकैक एव तावान्यावानसौ पूर्व इत्यादिष्वप्यतिदेशादिसापेक्षत्वमनुसन्धेयम् । सूत्रकारोऽपि * तदुक्तमित्यादिना कर्ममीमांसायां सामान्यन्यायान् पृथक्सिद्धानुदाहरतीति भवद्भिरपि व्याख्यातमेव । न चायं शारीरके वक्तव्यमेव तन्द्रालुतया परोपजीवनेन दर्शयतीति वाच्यम्, तत्रतत्रैव तत्सङ्गतेः स्थापितत्वात् । न च प्रसिद्धैर्न्यायैः स्वयमेव वेदप्रामाण्यादिकं विचारयामः, किं जैमिनीयेनेति वाच्यम् । तथाऽपि कर्मविचारपूर्ववृत्तत्वस्य दुष्प्रतिक्षेपत्वात् । तत्र विचारसागरे परिप्लवमानानां यदि जैमिनिना कर्णधारायितम्, स एष क्षम्यतामपराधः । एवं च लोकोत्तरप्रज्ञेन भवता बादरायणीयमपि नादरणीयमविशेषात् । न चायं क्रमनियमोऽर्थस्वभावादापतन् जैमिनीयो बादरायणीयो वा, येन तत्राभ्यसूयिष्यसि । अतः कार्त्स्न्येन कर्ममीमांसासापेक्षत्वप्रदर्शनार्थमेव शमादिसाधनत्वावगतेस्तार्तीयापेक्षाभाषणम् ।

यद्यपीहामुत्रफलभोगविरागमुमुक्षुत्वे पूर्ववृत्तत्वेन भाषिते (यद्यपि इहामुत्रफलभोगविरागो मुमुक्षुत्वं चेत्युभयं नियतपूर्वमसाधारणं सप्रयोजनाभिधानं चेत्यभ्युपगच्छामः, तथोक्तं भाष्ये) * अधिगताल्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलाषस्य अनन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनीति; तथाऽपि पुरुषप्रवृत्तिक्रमविशेषसूचनस्वारस्यात्, कर्मविचारपूर्ववृत्तत्वोक्त्यैव तयोरप्यर्थलब्धत्वात्, अनन्तस्थिरफलतया प्रथममापातप्रतीतकर्माख्यप्रतिबन्धकनिवृत्तिसूचनेन

निर्विघातब्रह्मविचारारम्भद्योतनात्, यज्ञादिवाक्यार्थापेक्षितपदार्थनिश्चयवक्तव्यज्ञनाद्यथावस्थितब्रह्मतदुपासनादितत्त्वावगम-हेतुभूतन्यायकलापशीलनोद्भेदात् अपवर्गोपायभूतोपासनापेक्षितानभिसंहितफलसहकारिवर्गस्वरूपनिश्चयांशोपजीवनाभिप्रायाच्च कर्मविचारस्यैव पूर्ववृत्तत्वोक्तिः प्रयोजनवत्तामेतीति तामेवाद्रियामहे । अव्यवहितं पूर्ववृत्ततया वक्तव्यमिति चेत्तर्हि मुमुक्षुत्वमेकमेव त्वयाऽपि वक्तव्यम् । तदर्थतया पूर्वेषामुक्तिरिति चेत्तुल्यम् । प्रयोजनाधिक्यं मिथस्संश्रयाद्यभावश्च विशेषः । एतेन तापत्रयाभिहतिपूर्ववृत्तत्ववादिनोऽपि प्रत्युक्ताः, तापत्रयाभिहतिमात्रस्य मन्त्रौषधिनीतिशास्त्रादिप्रवृत्ति-साधारण्यात् । दृष्टानुश्रविकविषयवितृष्णापर्यन्तायास्तु तस्याः कर्मविचारसापेक्षत्वस्थापनात् । तथोक्तं सांख्यैरपि—* दुःखत्रयाभिघाताज्जिज्ञासा तदुपघातके हेतौ । दृष्टे साऽपार्था चेन्नैकान्ताऽत्यन्ततोऽभावात् ॥ दृष्टवदानु-श्रविकस्स ह्यविशुद्धः क्षयातिशययुक्तः ॥ इति । एवं कर्मपरीक्षोपबृंहितैव सा भाष्येऽप्युक्ता—* तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्य इति । श्रुतिश्च—* परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् इत्यादिका । अतः * अथातो ब्रह्मजिज्ञासेत्यत्र न साधनचतुष्टयाद्यानन्तर्यं सूत्रकृदभिप्रेतम्, अपि तु कर्मविचारानन्तर्यमेव । तथा च वृत्तिकारः—* वृत्तात्कर्माधिगमादनन्तरं ब्रह्मविविदिषेति । अयं च पक्षो *भास्करैरप्यङ्गीकृतः* । *निरीश्वरमीमांसकैरपि* * कृत्स्नाध्येतु-र्निश्शेषवेदार्थविज्ञानाय मीमांसारम्भ इति वदद्भिः कर्मोपक्रमं शास्त्रमर्थतो ब्रह्मविचारशिरस्कमित्यभ्युपगन्तव्यमेव । न च द्वादशाध्यायमात्रे शास्त्रं पर्यवसितम्; *शबरस्वामिप्रभृतिभिः* सङ्कर्षकाण्डांशस्थसूत्रोपादानात्, शास्त्रान्तरत्वादुपनिषद्भाग-चिन्तेति पक्षस्य च त्वदीयैः कैश्चित्परिग्रहादिति ॥

॥ इति शतदूषण्यां साधनचतुष्टयपूर्ववृत्तत्वभङ्गवादः अष्टमः ॥ ८ ॥

॥ अथ कथानधिकारवादः नवमः ॥ ९ ॥

हयग्रीवसुधासिन्धुहर्षहेषारवोर्मयः । जयन्ति वादवेलान्तक्षितबाह्यकुदृष्टयः ॥

विस्तरेण कुदृष्टिमतमनुभाष्य * तदिदमित्यादिना, * न्यायानुगृहीतवाक्यप्रत्यक्षादिसकलप्रमाणवृत्तयाथात्म्य-विद्भिरनादरणीयमित्यन्तेन शिष्यान्प्रत्युपदिशतो भाष्यकारस्यायं भावः, सौगतानामिव प्रच्छन्नसौगतानामपि कथायामनधि-कार इति । *वेदार्थसंग्रहे* च स्पष्टमाह—* सर्वशून्यवादिनो ब्रह्मव्यतिरिक्तसर्ववस्तुमिथ्यात्ववादिनश्च स्वपक्षस्थापकप्रमाण-पारमार्थ्यानभ्युपगमाद*भियुक्तै*र्वादानधिकार एव प्रतिपादितः—* अधिकारोऽनुपायत्वान्न वादे शून्यवादिनः । इति । अयमाशयः—यदि प्रपञ्चमिथ्यात्ववादी वादाधिकारिताम् । भजेन्माध्यमिकस्यापि भवेद्वादाधिकारिता ॥ तथा च ब्रह्म-तत्त्वं ते निर्गुणं निष्प्रमाणकम् । कथं मध्यमबौद्धस्य विवादैर्नापलप्यते ॥ एतच्च विस्तरादुपपादयामः । तत्र यत्ताव-त्खण्डितम्—कथकयोः प्रमाणादिसत्ताभ्युपगमः कस्य हेतोः? किं तत्सत्ताभ्युपगमसाहित्यनियतस्य व्यवहारस्यान्यथा प्रवर्तयितुमशक्यत्वात्? उत तद्व्यवहारं प्रति तस्य हेतुत्वात्? लोकव्यवहारसिद्धत्वात्? तदनभ्युपगमस्य कथाफलाति-प्रसञ्जकत्वाद्वा? न प्रथमः, तमन्तरेण तत्तीर्थकैरस्तदनुसारिभिश्च व्यवहारस्य प्रवर्त्यमानत्वात् । अन्यथा भवतस्तन्निरास-प्रयासानुपपत्तेः । साधनबाधनक्षमो व्यवहारः प्रमाणादिसत्ताभ्युपगमसाहित्यनियत इति तमन्तरेण तत्क्षमत्वं न स्यादिति चेन्न; साधनबाधनक्षमत्वं प्रति सद्वचनाभासलक्षणयोगित्वस्यैव प्रयोजकत्वात् । सत्त्वाद्यभ्युपगमे सत्यप्याभासे तदक्षम-

त्वस्य सर्वसंमतेः । अस्मद्वाक्ये चाभासत्वस्य दुरुपपादत्वात् । सत्तानभ्युपगममात्रेणाभासत्वोक्तौ सत्ताभ्युपगमेन भवद्व्यवहार एवाभास इति विपरिवर्तप्रसङ्गात् । अस्ति च सत्ताभ्युपगमे सत्यपि असिद्धविरुद्धादेराभासत्वम् । ननु प्रमाणादिसत्ताभ्युपगमाभावे व्यवहारस्यैव धर्मिणोऽसिद्धौ तस्य कथमाभासत्वसाधनम्? कथं वा सद्वचनाभासलक्षणयोगित्वादिप्रयोजकावधारणामुखेन दूषणदूष्यादिव्यवस्थापनम्? सर्वेषां स्थापनबाधनानां प्रमाणाधीनत्वात्; मैवम्, सत्ताभ्युपगममात्रेण प्रसिद्धिसिद्धेः प्रमाणादिभिरस्माकं व्यवहारोपपत्तेः । उक्तञ्च *इष्टसिद्धिकारैः*—*सत्यं प्रसिद्धिरस्ति, अत एव व्यवहरामः, किंतु नास्या मूलं पश्याम इति । यथा प्रमाणादीनि सद्रूपाणि स्वीकुर्वता भवता प्रमाणं साधकं न तदाभास इत्यादि व्यवह्रियते, तथा व्यवहारिभिरेव सर्वैः प्रमाणादिसत्त्वासत्त्वचिन्तायामुदासीनैः कथा प्रवर्त्यतामिति ह्यादिशामः । यदि चैवं नानुमन्यसे तिष्ठामस्त्वयास्माऽस्वारोपिते सत्तानभ्युपगमपक्षे । तथाऽपि मां प्रति त्वदुक्तमाश्रयासिद्ध्यादिदूषणं दुर्वचम्; दूषणं हीदं कथायां प्रवृत्तस्यैव वाच्यम्, न पुनराहरतो विहरतो वा । सा च कथा कयाऽपि मर्यादया प्रवर्तनीया ।

तत्र वादिप्रतिवादिभ्यां सत्त्वाभ्युपगमे तादृक्पर्यनुयोगानवकाशः । उभाभ्यामसत्याभ्युपगमे परस्येव स्वस्यापि प्रसङ्गः । एकेन सत्त्वमितरेण चासत्त्वमभ्युपगम्य प्रवर्तितायामिदं दूषणमुच्यते चेत्, तद्वदेव कथान्तरस्यापि प्रसक्तिरनिवार्या; कथानियमस्य चोभयाभ्युपगमप्रकारानुरोधित्वात् । अन्यथा कस्य स्वेच्छया त्वदुक्तेऽपि, वाङ्मात्रेणापि दूषणप्रसङ्गेन जयपराजयव्यवस्थाभङ्गप्रसङ्गात् । यश्चैकस्तस्यां कथायां प्रमाणादिसत्त्वमिच्छति तस्यैवेषां नियमभरयन्त्रणा । अथोभाभ्यामपि प्रमाणादिसत्त्वाभ्युपगमौदासीन्येन व्यवहारनियमे समयं बद्ध्वा प्रारब्धायां कथायां दूषणमिदमुच्यते, तदा स्वाभ्युपगमविरोध एव त्वयैवापादितः स्यात् । अथ दुर्वैतण्डिकेन कथां बद्ध्वा तस्यैव दूषणं न ब्रूमः; अपि तु शिष्यादीन् प्रति तस्य कथानधिकारं दर्शयाम इति चेन्न; शिष्यादीन् प्रत्यपि *चार्वाकसौगतमायावादिनामयं* दोष इति वक्तव्यम्; स च दोषो निग्रहस्थानात्मा, तस्य कथाप्रवेशाप्रवेशयोः न तद्बाधक्षमः; न च कथामन्तरेण निग्रहः । नापि द्वितीयः, सत्ताभ्युपगममन्तरेणापि प्रमाणादीनां व्यवहारहेतुत्वस्य माध्यमिकादिषु प्रदर्शितत्वात् । अथ व्यवहारहेतुत्वादेव प्रमाणादीनां सत्त्वम्, सत्त्वाच्च तदभ्युपगमः, असतोऽभ्युपगमायोगादित्युच्यते तदपि न; अस्याप्यर्थस्य कयाऽपि नियमस्थित्या प्रवर्तितां कथामन्तरेण दुस्साधत्वात् । ततश्च सिद्धा सत्ताभ्युपगमात्पूर्वं कथाप्रवृत्तिः । न च साऽपि नियमस्थितिसत्ताभ्युपगमगर्भेति वाच्यम्; तत्त्वावधारणपरपराजयौपयिकोभयसंभावितव्यवहारनियमसमयबन्धमात्रेण समीहितसिद्धेः । न च समयबन्धेऽपि सत्ताभ्युपगमगन्धः, प्रमाणतर्काभ्यां व्यवहर्तव्यं परस्परं प्रतिज्ञाहान्याद्यन्यतमनिग्रहस्थानं प्रदर्शनीयम्, तद्व्युत्पादने तद्वतो भङ्गो व्यवहर्तव्यः, अन्यथा तद्व्युत्पादनासमर्थस्य अ[न्य]भग्नस्तु जेतेति यव्वहर्तव्यः, प्रामाणिकतया प्रतीतः पक्षस्तत्त्वमिति व्यवहर्तव्य इत्येवमादिस्वरूपे नियमबन्धेऽपि सत्ताभ्युपगमप्रसङ्गाभावात् । न च समयबन्धेऽपि हेतुर्वाच्यः, स च कथाप्रवृत्तिमन्तरेण न वक्तुं शक्य इति सत्ताभ्युपगमहेतुत्वाभिधानविषयप्रत्यवस्थानप्रतिबन्ध्यवतारः, तत्त्वनिर्णयविजयमूलत्वेन लोकसिद्धस्याविचारितरमणीयस्य व्यवहारनियमस्य हेतुमन्तरेण वादिभ्यां द्वाभ्यामपि स्वेच्छयैव ग्रहणात् । न चैवं प्रमाणमूलत्वाभावेन विचारतद्विषयतत्फलविप्लवप्रसङ्गः, अनादिपारम्पर्यागतस्य लोकव्युत्पत्तिसंवादिनस्तस्यासंभवान्यथाभावाभावरूपस्वतश्शुद्धिसिद्धत्वात् । न च प्रमाणादिसत्ताऽपि स्वेच्छयैवाङ्गीकार्या; व्यवहारनियममात्रेणैवान्वयव्यतिरेकवता निरपेक्षेण कथाप्रवृत्तितत्फलोपपत्तौ तादृशेतरनिरर्थकसत्ताभ्युपगमायोगात् । नापि तृतीयः, लोकव्यवहार

इति प्रामाणिकव्यवहारविवक्षायां तस्य विचारप्रवृत्तिमन्तरेण दुर्निरूपतया तदर्थमेव पूर्ववन्नियमस्य गवेषणात्; पामरादिव्यवहारविवक्षायां निर्मूलव्यवहारशरण्यस्य ते शरीरात्मत्वादयोऽपि स्वीकर्तव्यास्स्युः, पश्चात्तनबाधात्तत्परित्यागश्चेत्प्रमाणादिसत्ताऽपि सामान्यतो विशेषतश्चास्मदुक्ताभिर्युक्तिभिर्बाध्यमाना परित्याज्या। अथ बाधाभावात्तत्परिग्रहः, तथाऽपि न लोकव्यवहारस्य तत्परिग्राहकता, बाधाभावविचारे च पुनर्नियमान्वेषणावतारः। नापि चतुर्थः, प्रमाणादिसत्तामभ्युपगच्छता त्वयेव तत्सत्त्वासत्त्वानुसरणोदासीनेन मयाऽपि तथाविधस्यैव व्यवहारनियमस्यावलम्बनात् तस्य च मां प्रति फलातिप्रसञ्जकत्वे त्वां प्रत्यपि तुल्यप्रसङ्गस्स्यात्। यथा चाभ्यवहारादिव्यापारेष्वपि सत्तामनिच्छतां माध्यमिकादीनां तत्फलनियमः, तथाऽत्रापि। ननु व्यवहारनियमसमयबन्ध एव सत्ताभ्युपगमोऽनुप्रविष्टः; व्यवहारोऽपि हि क्रिया, सा च निष्पादनात्मिका; तच्चासतस्सद्रूपताप्रापणम्, प्रमाणादिभिर्व्यवहर्तव्यमित्यत्र प्रमाणादेः करणत्वं नियमान्तर्गतम्; तच्च कारणत्वविशेषः, कारणत्वं तु नियतपूर्वकालसत्त्वम्, दूषणसत्त्वे भङ्गः, साधनाङ्गभूतव्याप्त्यादिसत्त्वे च तद्विषयस्तत्त्वमिति च नियम्यते; अतो व्यवहारनियमसमयबन्धादावेव व्यवहारक्रिया तत्कारणदूषणसाधनाङ्गादेस्सत्त्वं कण्ठोक्तमिति कथं सत्तामनभ्युपगम्य कथारम्भ इति' मैवम्; एभिरपि सत्तानभ्युपगमबाधकैः कथायां प्रवृत्तायामेव सत्ताभ्युपगमस्य प्रसाधनीयत्वात्; ततश्च पूर्वोक्तबाधाया दुस्तरत्वात्॥

॥ इति शतदूषण्यां कथानधिकारवादः नवमः ॥ ९ ॥

॥ अथ निर्विशेषस्वयंप्रकाशवादः दशमः ॥ १० ॥

विचित्रं यत्स्वेन स्फुरति विषयाधारभिदुरं तदेव ब्रह्मैकं विगुणमपि साक्षात्कृतमिति।
वदन्तो वैयात्याद्बहुविहितिवात्याहतधियो विधूयन्ते हन्त श्रुतिशतशिरश्शूलवचसः॥

य एष मन्त्रवादः, यद्यपि प्रमाणानि सर्वाण्यपि सविशेषमर्थमभिनिविशन्ते; तथाऽपि स्वप्रकाशाध्यक्षसिद्धनिर्विशेषसंवित्सद्भावे न विमन्तव्यम्, अन्यथा धार्ष्ट्यात् सर्वापह्नवस्यापि दुर्निवारत्वात्। किंच संवित्स्वप्रकाशत्वं तावत्त्रय्यन्तविदां सर्वेषामविगीतम्, तत्र प्रकाशात्मतामात्रेण स्वतस्सिद्धायां संविदि न जडस्वरूपधर्मानुप्रवेशावकाशः। प्रकाशात्मकास्तु न तत्त्वतो विवेक्तुं शक्यन्ते, अन्यथा तेषां परप्रकाश्यतया प्रकाशात्मत्वासिद्धेः। न च स्वरूपमात्रस्वप्रकाशे अन्यतो धर्मसिद्धिरिति वाच्यम्; अनुपलभ्यमानसाधनात् तद्बाधनस्य लघुत्वात्, निर्विशेषत्वानुभवेन तन्निरासव्याघातात्, सविशेषानुभवानां तदपेक्षया दुर्बलत्वात्; ते हि तद्विषयतयैव लब्धसत्ताकाः प्राथमिकेन सर्वसाक्षिणा निरपेक्षेण दुष्टकारणशङ्कादवीयसा स्वानुभवेन सह न स्पर्धितुमर्हन्ति। तादृशस्वप्रकाशस्य तु भ्रान्तित्वोक्तौ संविदसिद्ध्या सर्वासिद्ध्यापातात्। न च बाधकाभावेन भ्रान्तित्वम्, न चाननुभवेनैव बाध इति वाच्यम्, न चात्र योग्यानुपलम्भः, करणाद्ययोग्यत्वेन विशेषणासिद्धेः; स्वयोग्यत्वेऽपि स्वेनानुपलम्भायोगेन विशेष्यासिद्धेः। न च नरविषाणादिसद्भावोऽप्येवं साधयितुं शक्य इति वाच्यम्; तस्य स्वसिद्ध्या समर्थने तस्यैवानुभूतित्वात्, अन्यतस्तु तदसिद्धेः, साधने च बाधात्। यद्यपि जागरस्वप्नयोर्विचित्रबाह्योपलम्भकलुषितधियोर्न तद्विविक्तावभासः; तथाऽपि सुषुप्तिमदमूर्च्छासमाधिमुक्त्याद्यवस्थासु तस्यैव साम्राज्यम्। न च सुषुप्त्यादिषु तत्प्रकाशस्य प्रतिबुद्धेन प्रतिसन्धानप्रसङ्ग इति वाच्यम्; इष्टप्रसङ्ग-

रूपत्वात् । एतावन्तं कालं न किञ्चिदहमज्ञासिषम्, सुखमहमस्वाप्समिति तादात्विकज्ञानसुखसाक्षितया तत्प्रति सन्धानात्। तदेव मात्मसाक्षिकनिर्विशेषानुभवस्यारोपितोपरागविनिवारणमुखेन संवादकतया वाऽनुग्राहकमनुमानागमादिक-मप्याद्रियामहे न वेति।

तत्रोच्यते—किमसौ निर्विशेषा संवित् स्वप्रकाशसिद्धेति स्वयं सैव भूत्वा प्रतिपादयति? अथ ततोऽन्य एव तटस्थतामुपलभ्य? न प्रथमः, तस्यास्स्वयाथात्म्यप्रतिपादनादिसंरम्भवैमुख्यात्। अन्यथा तस्या एव विषयादिवैशिष्ट्यस्या-वर्जनीयत्वेन स्वनिर्विशेषोक्तेरलीकवादत्वप्रसङ्गात्। विषयादिविशेषाणामारोपितत्वान्नालीकवाद इति चेन्न; तदनुल्लेखे तन्निषेधोक्त्ययोगात्। तदुल्लेखे तु विशिष्टप्रकाशावश्यंभावात् न स्वेन निर्विशेषप्रकाशः। नापि द्वितीयः, स तु तामुप-लम्भमानः ततोऽन्यया वा तयैव वा स्यात्, पूर्वत्रावेद्यत्वविरोधः, अनुव्यवसायवेद्यत्वपक्षपातात्। उत्तरत्रापि सर्वलोकसं मतां संविदमेव तथोपलभते ततोऽन्यां वा? आद्ये भ्रान्तित्वापातः, सा हि विषयाश्रयस्वगतविशेषैर्विशेषितैव सर्वैस्सं-दृश्यते। न च तत्तन्मिथ्यात्वेऽपि संविदस्तत्प्रकाशरूपत्वापह्नवः। न च योगादिप्रभावात् विशुद्धप्रकाशो जात इति वाच्यम्, योगस्यैव भ्रान्तित्वापातात्। न च शुक्तिकारजतप्रकाशमप्यालम्बनमात्ररहितमिति वदन् योगीश्वरोऽपि न भ्राम्यति। द्वितीयेऽपि, किमसौ महाभागः स्वस्मा एव स्वसुखादिवत्सिद्ध्यन्तीं तां परस्मा उपदिशति, उत प्रतिवादिनोऽपि तथा सिद्धाम्? नाद्यः, अविस्रंभात्, पुलकोद्गमादिवत् लिङ्गाभावाच्च। नेतरः, स्वप्रत्ययसिद्धस्य परोपदेशनैरपेक्ष्यात्। न हि सुखादिसद्भावमात्रं परस्मा उपदिश्यते। न च सहृदयः कश्चित्तथाविधानुभवमपह्नोतुमीहते, नापि योग्यानुपलम्भ-निराकृतसद्भावमभ्युपगन्तुम्।

ननु न कस्मैचित्सा सिद्ध्यति, अतः स्वस्मै परस्मै वेति को विकल्पावकाश इति चेत्; सा तर्हि न सिद्ध्येदेव, सिद्ध्यन्ती वा कस्मैचिदेव स्यात्। सिद्धिमात्रमियमितीति चेत् कस्य कं प्रतीति वक्तव्यम्; न कस्यचि-त्कंचित्प्रतीति चेत्, न तर्हि सा सिद्धिशब्दार्थतया व्युत्पत्तुं शक्या। स्वस्या एव स्वात्मानं प्रतीति चेत्, इदं तु दाव-दहनविवशजरदजगरपरिभ्रमणम्; कथमसौ वराकः स्वस्या एव स्वात्मानं प्रति सिद्धिरूपां तां ततोऽन्यस्तथैवोपलभते? तन्मयीभूतत्वात्तथोपलभत इति चेन्न, प्रागेव दूषणात्। ततो लोकसिद्धा संविद्विषयाश्रयादिविशिष्टैव स्वतः प्रकाशते, तदुत्तीर्णा तु न स्वतो नापि परत इति तस्याः शशविषाणतुल्यतैव। ननु लोकोत्तीर्णसंवित्स्वरूपं स्वप्रकाशमिति भवद्भि-रपीष्यते, तत्कथमस्मदुक्ते विरागः? तर्हि समबुद्धिरसि, वयं हि प्रत्यक्षाद्यगोचरं ब्रह्मस्वरूपम्, तस्य स्वप्रकाशत्वादि-धर्मवर्गं च श्रुतिबलात् स्वीकुर्मः, भवतस्तु प्रमाणपोतं परित्यज्य स्वप्रकाशालाबुपरिग्रहेणापारसागरं निस्तर्तुमिच्छतो नेदानीं प्रभूता श्रुतिः पुरस्कार्या, तत्पुरस्कारेऽपि सा सविशेषमेव प्रतिपादयतीति वक्ष्यामः। अतो न साम्यमिति। यत्पुन-रुक्तम्—प्रकाशात्मनस्स्वस्यैव स्वतस्सिद्धत्वात्, जडात्मनां केषांचिदपि धर्माणां तदन्तर्भावानुपपत्तिरिति, तदसिद्धस्या-सिद्धेन साधनम्, कस्यचित्पुरुषस्य कंचिद्धर्मविशेषं प्रति प्रकाशविशेषरूपतयैव सर्वेषामनुभवानां स्वतस्सिद्धेः। अतः स्वविषयत्वसाश्रयत्वधर्माभावे तुल्यन्यायतया स्वतस्सिद्धिरपि न स्यादेव। यत्पुनः—प्रकाशात्मकास्तु न ततो विवेक्तुं शक्यन्त इति; तदप्यसत्, साजात्यमात्रेण तादात्म्येऽतिप्रसङ्गात्, ज्ञानरूपो ज्ञानाश्रयश्चात्माऽस्माभिरिष्यते, तद्वद्धर्मि-भूतज्ञानमपि यदि ज्ञानस्वरूपधर्मान्तराश्रयतयोपलब्धं तदा तदप्यङ्गीकुर्मः, अनुपलम्भात्तु तदनभ्युपगमः; न च विविच्य-मानतामात्रेण स्वप्रकाशात्मताभङ्गः, सर्वासामपि संविदां स्वयंप्रकाशानामपि संविदन्तरकर्मत्वस्य समर्थयिष्यमाणत्वात्।

यत्तु—स्वरूपमात्रस्वप्रकाशेऽप्यन्यतो धर्मसिद्धिरित्यनुपलभ्यमानसाधनात्तत्साधनस्य लघुत्वमुक्तम्, तदपि चार्वाकसौहार्दम्, अनुमानाद्युच्छेदप्रसङ्गात् । उपलभ्यन्ते च धर्मा इत्युक्तम् । यदप्युक्तं—निर्विशेषस्वानुभवेन तन्निरसनव्याघातः, सविशेषानुभवानां तु तदपेक्षया दुर्बलत्वमिति ; तत्तदा सुन्दरम्, यदि द्वयोरपि स्वरूपमुपलभ्य बलाबलचिन्ता वर्तेत ; इह तु निर्विशेषस्वानुभव एव नोपलभ्यते । यच्च—निर्विशेषानुभवैकविषयतया सविशेषानुभवानां सत्तालाभादिकमुक्तम्, तदपि प्रस्तुतप्रतीपम्, प्रकाशात्मतामात्रतया स्वतस्सिद्धायां संविदि कथं विषयाश्रयादिविशेषितसविशेषानुभवान्तरप्रकाशः ? करणाद्ययोग्यत्वात् न योग्यानुपलम्भ इत्येतदनुभूतेरनुभूत्यन्तरविषयत्वस्य वक्ष्यमाणत्वान्निरस्तम् ॥

यच्च—स्वयोग्यत्वेऽपि स्वेनानुपलभ्यायोगेन योग्यानुपलब्धेर्विशेष्यासिद्धिरिति, तत्र कः स्वेनानुपलम्भं ब्रवीति ? सविशेषतया तु संविदुपलम्भं ब्रूमः, नतु निर्विशेषतयेति ; स्वेन निर्विशेषतयोपलम्भस्य योग्यानुपलम्भं वदामः, तथाहि—किं जागरदशायामेव निर्विशेषं स्वतः प्रकाशत इति मन्यसे, उत स्वापाद्यवस्थायां यद्वा सर्वावस्थानुपलब्धमपि युक्तिबलान्निर्विशेषतया निष्कृष्यत इति, अथोपलम्भयुक्त्यन्यथात्वेऽपि शब्देन तथा निर्दिश्यत इति । न प्रथमः, विषाश्रयस्वगतविशेषैर्विशिष्टतयैव तदानीं स्वत एव तद्गोचरानुभवान्तरेण वा संवित्स्वरूपस्य प्रकाशमानत्वात् । तदेतदाहुः—* इदमहमदर्शमिति केनचिद्विशेषेण विशिष्टविषयत्वात्सर्वेषामनुभवानामित्यादिना । नापि द्वितीयः, तत्रापि ह्यनुभवोऽस्ति चेत्, सविशेष एव ; न चेत् कस्य निर्विशेषतया प्रकाशः ? * स्वापमदमूर्च्छासु च सविशेष एवानुभव इति स्वावसरे निपुणतरमुपपादयिष्याम इति भाष्यम् । अयमभिप्रायः—सुषुप्त्यादिदशायामिदमर्थप्रकाशनं तावन्नास्तीति सर्वसंमतम् ; अहमर्थप्रकाशस्तु त्वया नेष्यते, इष्यमाणत्वेऽपि न तस्य निर्विशेषतया स्फुरणम्, प्रत्यक्त्वानुकूलत्वादिरूपेण स्फुरणात्, अन्यथा तत्प्रकाश एव नास्तीति । अथ पुनर्जानामीति प्रतीयमानोऽर्थस्तदानीं विषयाश्रयशून्यः प्रकाशत इति मन्यसे, तदपि न ; तस्य तन्निरूपणीयस्वभावतया तद्विरहेण प्रकाशायोगात् । न हि छेद्यादिविधुरश्छिनत्ति परशुः । वयंतु यद्यपि नित्यां संविदं श्रुतिबलादभ्युपगच्छामः, तथाऽपि तस्या न निर्विशेषायाः प्रकाशमिच्छामः, निराश्रयाया वा स्थितिम् । अतस्सुषुप्तावपि सा साश्रयैव, सङ्कोचादिधर्मवती च, एकदेशिमतेनात्मविषयतया सविषया च । ततश्च सुखमहमस्वाप्समिति परामर्शोऽप्युपपन्नः । तव तु न तथा, अनुपलब्धेः । नहि सुप्त एव तथा परामर्शमर्हति, विषयाश्रयरहितेयं संविद्विवर्तत इति परामर्शे प्रतिसम्बन्धितया विषयाश्रयप्रतीत्यवश्यंभावेन सुषुप्तिव्याघातात् । नापि प्रबुद्धस्तथा प्रतिसन्धत्ते ; नहि सुप्तोत्थित एतावन्तं कालं विषयाश्रयरहितज्ञप्तिरूपेणाहमवस्थित इति परामृशति, अपि तु सुप्तोऽहं नाज्ञासिषमिति ज्ञप्तिनिषेधेनैव । अहंकारविगमात् विषयानुभवाभावाच्च तत्प्रतिसन्धानमिति चेत्, हन्त भवानेव निर्विशेषं हन्ति, तदप्रतिसन्धानस्यैवोपपादनात् । किंचान्याभावस्य अन्यानुल्लेखस्य च दृष्टमात्रस्मृतिप्रतिबन्धकत्वायोगात्, अन्यथा अतिप्रसङ्गात् । न चानुभूतस्य स्मरणनियमो नास्तीति वाच्यम् । प्रतिदिवसं चिरकालमन्यवैमुख्येन प्रत्यक्षेणैव प्रकाशमानस्यार्थस्य निखिलसंस्कारतिरस्कारकमरणवेदनादिप्रबलतरप्रतिबन्धकाभावेऽपि सावधानेनापि नियमेनास्मरणस्यानुभवाभावपर्यवसानात् । यत्त्वेतावन्तं कालं न किंचिदहमज्ञासिषमिति अज्ञानसाक्षित्वेनानुभूतिः प्रकाशत इत्युक्तम्, तद्विपरीतफलम् ; नहि ज्ञानप्रतिषेध एव ज्ञानप्रकाशे प्रमाणं भवितुमर्हति । ज्ञानाभावातिरिक्तत्वज्ञानं निरसिष्यते । किंचायं परामर्शोऽहमर्थानुवृत्तिं ज्ञानानुवृत्तिं च परामृशन्नहमर्थनिवृत्तिं ज्ञानानुवृत्तिं च वदतस्ते अत्यन्तप्रतिकूल एव । एवं सुखमहमस्वाप्समिति परामर्शोऽप्यहमर्थस्यैव सुखतया प्रकाशं प्रदर्शयेन्न पुनस्सुखसाक्षितया संवित्प्रकाशम् । एवं मदमूर्छाद्यवस्थासु च भाव्यम्,

ततो न स्वापाद्यवस्थास्वपि निर्विशेषप्रकाशसिद्धिरिति । नापि तृतीयः, युक्त्याऽपि निरालम्बनतया निष्कर्षस्याशक्यत्वात्, आलम्बनमिथ्यात्वस्य निर्धर्मकत्वस्य निराकरिष्यमाणत्वात् । किंच संविन्निर्विशेषा एवंत्वादिति हि निष्कर्षप्रकारः ; तत्र हेतुसाध्यरूपधर्मान्वये कथं निर्विशेषता, तदनन्वये तु साध्यसमत्वसाध्याभावौ, तन्मिथ्यात्वेऽप्यनन्ततस्तथैव ; तयोः संवित्स्वरूपैक्ये पक्षहेतुविभागाभावः, सिद्धसाधनता चेत्यादयो दोषा द्रष्टव्या इति । तदेतदभिप्रेत्याह—* सविशेषोऽप्यनुभूयमानोऽनुभवः केनचिद्युक्त्याभासेन निर्विशेष इति निकृष्यमाणस्सत्तातिरेकिभिः स्वासाधारणैः स्वभावविशेषैर्निर्विशेष इति निष्कृष्टव्य इत्यादिकम् । नापि चतुर्थः, निर्गुणवादस्याखण्डवाक्यार्थस्य च विस्तरेण निराकरिष्यमाणत्वात् । सामान्यतोऽपि पश्यामः—शब्दः किं पदरूपेण स्थित्वा निर्विशेषं बोधयति ? वाक्यरूपेण वा ? नाद्यः, अन्विताभिधानवादे तु केवलपदस्यावाचकत्वात् । यथोक्तम्—'पदजातं श्रुतं सर्वं स्मारितानन्विताथकम् । न्यायसंवादितव्यक्ति पश्चाद्वाक्यार्थबोधकम् ॥ इति । अभिहितान्वयवादेऽपि प्रत्येकं पदानां प्रमाणत्वाभावात् ; यथाऽऽहुः—पदमभ्यधिकाभावात्स्मारकान्न विशिष्यते । इति । प्रत्येकपदशक्तिचिन्तायामपि प्रकृतिप्रत्ययरूपेण स्थितस्य पदस्य क्वचित्प्रकृत्यर्थविशिष्टः क्वचित्प्रत्ययार्थविशिष्टः प्रतिपाद्य इति कथं निर्विशेषबोधकता? स्वार्थिकप्रत्ययविशिष्टेऽपि पदे पुनः प्रकृत्यर्थविशेषस्य प्रत्ययान्तरेण विशिष्टविषयत्वमेष्टव्यम् । अव्ययान्यपि विशिष्टमर्थमेव द्योतयन्ति अभिदधति वा । निर्विशेषमिति पदेन किं बोध्यत इति चेत्, किं केवलेन? उत वाक्यस्थेन ; पूर्वत्र वस्तुतो न किंचित्, अव्युत्पन्नभ्रान्तोक्त्योरर्थविशेषानपेक्षणात् । प्रतीतिमात्रमपि जायमानं मनसा किञ्चिदुल्लिख्य तन्निर्विशेषमिति परामृशेत्, तत्रापि वाक्यच्छायया वैशिष्ट्यमेवोल्लिख्येत । वाक्यस्थेन तु तेन पदान्तरोपस्थापितविशेषाविरोधेन तद्विवक्षितविशेषनिषेध एव क्रियते, यथा नरपतिरद्वितीयः, नगरी निर्विशेषेत्यादिषु । संवित्समस्तविशेषशून्येति भवत्कल्पितवाक्यं तु भ्रान्तिमात्रजनकमिति न ततोऽर्थनिष्कर्षः । नापि द्वितीयः, तत्तत्पदोपस्थापितानेकपदार्थविशेषसंसर्गस्य संसृष्टस्य वा बोधेन निर्विशेषप्रसङ्गाभावात् । तदेतदखिलमभिसन्धायाह—* शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यमित्यादि । अतः प्रतीत्यभावात् निष्कर्षलिङ्गशब्दाद्ययोगाच्च न निर्विशेषस्वप्रकाशत्वसिद्धिरिति ॥

॥ इति शतदूषण्यां निर्विशेषस्वप्रकाशभङ्गवादः दशमः ॥ १० ॥

॥ अथ निर्विशेषविषयनिर्विकल्पकभङ्गवादः एकादशः ॥ ११ ॥

संप्रज्ञातस्थितिमधिगते निर्विकल्पे समाधौ शान्तावद्यं स्तिमितबहुलानन्दसन्दोहमन्तः ।
यत्तद्ब्रह्म स्फुरति यमिनां पूर्णषाड्गुण्यरूपं सा मे नित्यं हृदि हयमुखी देवता सन्निधत्ताम् ॥

यदेतदाहुः—अस्ति तावन्निर्विकल्पकं नाम प्रत्यक्षम्, प्रथमाक्षसन्निपातसमनन्तरमविशिष्टविषयापरोक्षावभासस्य दुरपह्नवत्वात् । अभ्युपेतं चैतत्सर्वैर्वादिभिः । ननु शाब्दास्तत्रापि शब्दानुवेधमिच्छन्ति, यथाऽऽहुः—*न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते ॥ इति । सत्यं तैरपि समाधिदशायां तस्यैव शब्दस्य निरस्तसमस्तकल्पनाजालस्योपलम्भः स्वीकृतः । किंच शब्दानुविद्धत्वं न सर्वत्र ज्ञाने दर्शयितुं शक्यम्, बालादिविज्ञानेषु तदसम्भवात् ; अन्यथा चैषां व्युत्पत्तिमन्तरेण तत्तद्वाचकपरिज्ञानप्रसङ्गात् । बालादिविज्ञानान्यपि सूक्ष्म-

शब्दानुविद्धविषयाणीति चेत्, तथाविधस्य शब्दस्य परैरनभ्युपगमात्। अभ्युपगच्छतामपि तदनुवेधस्य दुस्साधत्वात्। पदज्ञानमेव तावन्न प्रत्यक्षम्, किं पुनस्तदनुविद्धस्तस्य विषयः? नच सूक्ष्मशब्दानुविद्धत्वव्याप्तम्, किंपुनस्त[दनुविद्ध]स्य विषयः। नच सूक्ष्मशब्दानुविद्धत्वव्याप्तं किंचिल्लिङ्गमस्ति। अथ व्युत्पन्नपुरुषबोधदृष्टान्तेन बालादिज्ञानेष्वपि प्रत्ययत्वादि-हेतुभिः शब्दानुविद्धविषयत्वं साध्येत, तदप्यशक्यं, पूर्वोक्तप्रसङ्गा[पाता]त्। अस्तु स्थूलशब्दानुवेधस्य बाधः, तत्सहकृतात्पक्षधर्मताबलात्सूक्ष्मशब्दानुवेधस्सिद्ध्यतीति चेन्न। वाचकतयाऽनुवेधविवक्षायां सूक्ष्माभिमतशब्दस्यावाचकत्वा-देव तदनुवेधासम्भवात्, न हि व्युत्पत्तिपदवीदवीयसस्तस्य वाचकत्वमुत्प्रेक्षणीयम्। अव्युत्पन्नोऽपि शब्दः स्ववाचक इति तु परिभाषामात्रम्, शब्दवाचकतायामपि शब्दस्य व्युत्पत्तिसापेक्षत्वात्। स्ववाचकत्वसिद्धावपि च न वस्तुनस्तदनुवेधः, तस्य तद्वाचकत्वेनाव्युत्पत्तेः। अस्तु रूपादिवदवाचकत्वेनैवानुवेध इति चेत्, न, अतन्निष्ठत्वादारोपासम्भवाच्च। सौगतैरपि शब्दाध्यासो व्युत्पत्ति[कल्पित]कलुषितबुद्धावे[वाद्रियते]वोदाह्रियते, नतु निर्विकल्पके। अतश्चक्षुरादिभि-र्थेषु स्वरूपेणोलब्धेषु व्युत्पत्तिसमयसहानुभूतार्थसंदर्शनादुद्बुद्धसंस्कारवशाद्वाचकत्वागतौ सत्यां वस्तुनस्संज्ञानविकल्प इति न प्रथमाक्षसन्निपातजेषु ज्ञानेष्वव्युत्पन्नबालमूकतिर्यगादिबुद्धिषु च शब्दानुवेधसंभवः। मा भूच्छब्दानुवेधस्तत्र, तथाऽपि, समानेन्द्रियग्राह्यजातिगुणादिविशिष्टमेव सर्वं द्रव्यं प्रथमाक्षसन्निपातादप्युपलभ्यते इति चेत्, तदपि न; अकारणकार्योत्पत्तिप्रसङ्गात्, विशिष्टज्ञानस्य सर्वस्य स्वरूपाज्ञानपूर्वकत्वदर्शनात्, प्राथमिकस्वरूपज्ञानाभावे विशिष्टज्ञानस्या-नुत्पत्तिप्रसङ्गात्। विगीता बुद्धिः स्वरूपज्ञानपूर्विका, विशिष्टबुद्धित्वात्, संप्रतिपन्नवदित्यनुमानात्। अस्तु स्वरूपज्ञानम्, तदेव स्वरूपं जातिगुणादिसर्वात्मकमपि निर्विकल्पे न तथा विविच्यते, विकल्पे तु जातिगुणाद्यात्मना तदेव विकल्प्यते इति चेत्, तन्न; जातिगुणादीनां परस्परमाश्रयाच्च भेदसिद्धेः। अभेदोऽपि तद्वत्सिद्ध्यतीति चेन्न; साधकाभावात्। प्रथमपिण्डग्रहणमस्तीति चेत्, तत्र प्रथमपिण्डग्रहणशब्देन किं पिण्डस्य प्रथमं ग्रहणं विवक्षितम्? उतानुपलब्धचरे-ष्वेकजातीयेषु कस्यचित्प्रथमस्य पिण्डस्य ग्रहणमिति? न प्रथमः, प्रथमाक्षसन्निपातसमनन्तरं जात्यभिन्नवस्तूपलम्भे तस्यैव विकल्पत्वापातात्। अनुवृत्तत्वाद्याकारग्रहणादविकल्पत्वमिति चेत्, न; तथासति जात्यादिस्वरूपस्याग्रहणे तदभिन्न-वस्तूपलम्भासिद्धेः। जात्यादीन्यपि सदात्मना तदैव गृह्यन्त इति चेन्न; तथा सति सन्मात्रं गृहीतं नतु जात्यादिरित्येव पर्यवसानात्। तथाच तदेवास्माकं निर्विशेषमिति। असद्व्यावृत्तिलक्षणो विशेषस्तत्रापि गृहीतस्स्यादिति चेन्न; तस्य तत्स्वरूपानतिरेकात्, अतिरेके वा तद्ग्राहिणस्सविकल्पकत्वप्रसङ्गात्। नापि द्वितीयः; तत्रापि प्रथमाक्षसन्निपातजन्य-ज्ञानस्य उक्तन्यायेन तदभेदग्रहणासिद्धेः। तत्समनन्तरभाविनस्तु विकल्पस्य जातिग्रहणे सत्यपि प्रकारप्रकारिभावेन भेद-स्यैव ग्रहणात्। तदानीं तत्सजातीयवस्त्वन्तरग्रहणाभावात्, जातेर्वस्त्वन्तरानुगतत्वलक्षण आश्रयाद्भेदो न गृह्यते, जाति-गुणादिविशिष्टेऽपि वस्तुन्येको गौरित्याद्येकशब्दानुविद्धप्रत्ययादैक्यमुपलब्धमिति चेन्न; वसनाभरणादिविशिष्टेऽप्येकोऽयमिति प्रत्ययात्। तत्र पुरुषान्तरव्यवच्छेदार्थमेकशब्दः, नतु विशेषणविशेष्यैक्यार्थमिति चेत्, अत्रापि गवान्तरादिव्यवच्छेदार्थ-मित्येवास्तु। नन्वभेदरहितेषु विशेषणेषु मत्वर्थीयसापेक्षं सामानाधिकरण्यं दृष्टम्, जातिगुणादिषु मत्वर्थीयनिरपेक्षसामा-नाधिकरण्यादभेदोऽप्यभ्युपगन्तव्य इति चेन्न; अभेदप्रसङ्गरहितेष्वपि शरीरात्मादिषु देवोऽहं मनुष्योऽहमात्मा देवो जातः कर्मभिरित्यादिमत्वर्थीयनिरपेक्षसामानाधिकरण्यदर्शनात्। लक्षणया तत्र सामानाधिकरण्यमिति चेन्न; तत्रापि कैश्चित्तथाऽभ्युपगमात्। अपृथक्सिद्धत्वादपर्यवसानादिवृत्त्या वा तत्र सामानाधिकरण्यमिति चेन्न; शरीरेऽपि तथा

सुवचत्वात्, तत्रापि तथा सुवचत्वात्, अपृथक्सिद्धत्वस्य मत्वर्थीयनैरपेक्ष्यप्रयोजकत्वादिति । अस्तु तर्हि अपृथक्सिद्धत्वादेव जातिगुणादेराश्रयतादात्म्यमिति चेन्न; भेदगर्भेण संबन्धेनाभेदसाधने व्याघातात्; नायमभेदो भेदाभावात्मा, नापि भेदविरुद्धो धर्मः येन व्याघातस्स्यात्; अपि त्वन्यादृश इति चेन्न; तथाविधस्य कस्यचिद्भेदस्याप्रसिद्धत्वात्, भेदाविरुद्धस्य कस्यचित्स्वभावान्तरस्य साधनेऽस्माकमनिष्टाभावाच्च । एतेन सहोपलम्भनियमादभेद इत्यपि निरस्तम्; सहोपलम्भस्य तन्नियमस्य च तादात्म्यवैरित्वात् । तदेवं भिन्नेष्वभेदसाधकासिद्धौ भेदाभेदयोः प्रतीतिबलादविरोध इति धाष्ट्र्यमात्रेणोच्यते; अतो जातिगुणाद्यात्मकस्य एकस्यासम्भवादेव तद्विषयं निर्विकल्पमाशाम्बरसगोत्राणामाशामात्रपरिकल्पितम् ।

अस्तु तर्हि परस्परमत्यन्तभिन्नानां द्रव्यजातिगुणादीनामगृहीतविशेषणविशेष्यभावानां स्वरूपमात्रग्रहणं निर्विकल्पकम्, तत एव च तत्समनन्तरभाविविकल्पोत्पत्तिरपि निर्व्यूढा भवति, न ह्यगृहीतविशेषणा विशिष्टबुद्धिरुपपद्यते । न च जात्यादीनां विशेषणानां तत्तदिन्द्रियेण ग्रहणयोग्यानां तत्तदिन्द्रियसंप्रयोगादिसामग्र्यां सत्यामग्रहणमुपपद्यते; अतो विशेषणस्वरूपग्रहणरहितं निर्विकल्पकं नास्तीति, तदप्यसारम्; यदि विशेषणविशेष्ययोस्स्वरूपग्रहणम्; कस्तर्हि विकल्पाद्भेदः? समवायग्रहणमिति चेन्न; अपृथक्सिद्धेषु जात्यादिषु वेदान्तविद्भिस्स्वरूपातिरिक्तसमवायानभ्युपगमात्, तथा च वैशेषिकनिराकरणाधिकरणे सूत्रम्—* समवायाभ्युपगमाच्च साम्यादनवस्थितेरिति । अस्तु वा समवायाख्यः सम्बन्धः, स किं तदा न गृह्यते? अयोग्यत्वादिति चेन्न; नित्यं तदग्रहणप्रसङ्गात् । एवमपि कैश्चिदिष्यत इति चेन्न; तथाऽपि विकल्पाविशेषप्रसङ्गः । न हि तदा विकल्पेऽपि समवायग्रहणं संभवति । तथाऽपि विशेषणविशेष्यभावो गृह्यत इति चेन्न, तर्हि तत एव ततःपूर्वं विशिष्टप्रत्ययोत्पत्तिर्वक्तव्या, जाते हि विशिष्टप्रत्यये निष्कर्षकबुद्ध्या विशेषणमिदं विशेष्यमिदमिति विविच्यते; ततश्च प्रथममेव विशिष्टप्रत्यये क्व निर्विकल्पकम्? माभूत् स्वरूपायोग्यत्वम्; * सहकारिवैकल्यात्तु निर्विकल्पके समवायाग्रहणमिति *न्यायाचार्य* इति चेत्; किं तत्सहकारि? अवच्छेदकग्रहणमिति चेन्न, अवच्छेदकयोराश्रयाश्रयिणोस्स्वरूपस्य निर्विकल्पेऽपि ग्रहणात् । अवच्छेदकग्रहणस्य संबन्धग्रहणकारणत्वात् पूर्वमवच्छेदकग्रहणमपेक्षितमिति चेन्न, तस्य कारणत्वे प्रमाणाभावात्; सम्बन्धग्रहणदशायां च येन रूपेणावस्थाय तदवच्छेदकमवच्छिन्द्यात्, तद्यदि रूपं युगपद्ग्रहणेऽपि संभवति, किं तस्य पूर्वग्रहणेन, व्यर्थविशेषणत्वात् । सत्यपि पूर्वग्रहणे तादात्त्विकावच्छेदकस्वरूपोल्लेख एव हि अवच्छेद्योल्लेखापेक्षितः, पूर्वग्रहणे सत्यपि तादात्त्विकावच्छेदकोल्लेखाभावे तदवच्छिन्नसम्बन्धोल्लेखासम्भवात् । अस्तु सम्बन्धस्यापि स्वरूपग्रहणम्, तथाऽपि तस्यावच्छिन्नत्वं न गृह्यत इति चेन्न, अवच्छेदकयोराश्रयाश्रयिणोरवच्छेद्यस्य च सम्बन्धस्य स्वरूपग्रहणे कथमवच्छिन्नत्वाग्रहः? अवच्छेदकस्वरूपग्रहणातिरिक्तस्य तदवच्छिन्नत्वग्रहणापेक्षितस्यासंभवादनभ्युपगमाच्च । एतेन समवायस्य निर्विकल्पकैकविषयत्वं वदन्तो **भूषणमता**नुसारिणोऽपि प्रत्युक्ताः । अतो यदि विशेषणग्रहणम्, तथा न कथंचिदपि निर्विकल्पकत्वसिद्धिः । विशेषणरहितस्वरूपग्रहणे तु तदेवास्माकं निर्विशेषग्रहणमिति । भवतु निर्विकल्पके निर्विशेषग्रहणम्, तथाऽपि विशेषा एव स्वलक्षणापरनामानः स्वयमकिञ्चिन्निष्ठाः कैश्चिदनाश्रिताश्च तत्र गृह्यन्ते नाद्वितीयमिति चेन्न; प्रमाणाभावात् । नीलपीतादिप्रतिनियतविचित्रविकल्पोत्पत्तिरेव प्रतिनियतकारणमन्तरेणानुपपद्यमाना निर्विकल्पकेऽपि स्वानुरूपविशेषोल्लेखं व्यवस्थापयतीति चेन्न; एकस्मिन्नद्वितीये सर्वेषु निर्विकल्पेषु गृह्यमाणे तत्तद्विचित्रवासनादिरूपभ्रमसामग्रीसामर्थ्यादेव प्रतिनियतविकल्पोपपत्तेः । किमेकस्यामेव रज्जौ गृह्यमाणायां विचित्रास्सर्पभूदलनाम्बुधारादिविकल्पाः क्रमशो न संदृश्यन्ते? युगपदपि वा?

किमेकस्मिन् गगने गन्धर्वनगरप्राकारतोरणादिविकल्पाः प्रकल्प्यन्ते? विकल्पानां च भ्रान्तिरूपत्वं भवद्भिरपीष्यते। विशेषाणामेवाभावे कथं विचित्रवासनादिसंभव इति चेन्न; विशेषाणां वासनाहेतुत्वाभावात्, तत्तद्विषयविज्ञप्तिबीजान्येव वासनामङ्कुरयन्ति; अन्यथा शुक्तिरजतादिविषयमिथ्यात्वेन तदनुभवजन्यवासनाभावात् तदनुस्मरणतन्मूलचेलाञ्चलग्रन्थिविघटनादयो न संभवेयुः। नन्वापणादिषु सत्यरजतग्रहणाद्रजतवासना, ततश्च तदेव रजतं वासनावशादेव देशान्तरकालान्तरयोरसदपि प्रतीयते; तत्प्रतीतिमूलश्च पुनस्संस्कारस्मृत्यादिप्रवाह इति युज्यते; यस्य तु क्वचिदपि विशेषा न सन्ति, तस्य कथं विशेषवासना निर्वाह्या? उच्यते—मिथ्यार्थज्ञानस्यापि तावद्वासनाजनकत्वं भवद्भिरपीष्यत एव; ततश्च पूर्वपूर्वभ्रमविशेषजनितसंस्कारविशेषादेव सर्वविकल्पोपपत्तौ किं क्वचिद्विचित्रेणार्थेन विकल्पवैचित्र्याय प्रत्यक्षतया तदनुमेयतया वा कल्पितेन? अस्य चार्थस्य वैशद्याय समानसमयाचारा *योगाचारा*दय उपास्यन्ताम्। तत्र तु भवन्त एव तेषां बाह्याभेदापह्नवन्यायेन आन्तराभेदापह्नवं परानिष्टमुद्घाटयन्तु; अतो विचित्रविकल्पोदयस्य अन्यथासिद्धेर्निर्विकल्पकेऽपि विचित्रविशेषग्रहणकल्पना न युक्ता; तत्कल्पनेऽपि वा लाघवाय विचित्राद्वैतं विश्वविषयमास्थीयताम्। न चैकस्यानेकस्वभावताव्याघातः; रूपरसगन्धस्पर्शस्वभावाः पार्थिवाः परमाणवः, रूपरसस्पर्शस्वभावा आप्याः, रूपस्पर्शस्वभावास्तैजसा इति भवद्भिरेकैकस्यानेकस्वभावकल्पनात्। अत एव नैकस्य विरुद्धस्वभावतेत्यपि दत्तोत्तरम्, लोकदृष्ट्या पराद्धान्तिभिश्च रूपत्वरसत्वादेरविरुद्धस्वभावतया स्वीकारात्, भवद्भिस्तु शान्त्या सिद्धाश्रमीभवद्व्यालनकुलादेरिव नीलधवलादेरपि वैरस्यस्य शमयितुं शक्यत्वात्। तस्मादस्मदभिमतमद्वैतमेव शुद्धं चित्रं वा निर्विकल्पकपदमिति शत्रुमित्रविभागोदासीनैश्च सौगतैरपि संग्रहणीयम्, ततः प्रमाणज्येष्ठस्य प्रत्यक्षस्य प्रथममेव निर्विशेषोल्लेखित्वात् विकल्पोल्लीढविशेषाणां भ्रान्त्या निर्वाहात् न शक्यम् * निर्विशेषवस्तुनीदं प्रमाणमिति न शक्यते वक्तुमिति। अत्रोत्तरमाह—* निर्विकल्पकमपि सविशेषविषयमेवेति। अयमभिप्रायः—तत्र यत्तावच्छाब्दकौमारिलादिमतदूषणं तदस्माकमपि सम्मतमेव। तत्र यदुक्तं विशिष्टग्रहणस्य स्वरूपग्रहणं कारणमिति, तन्न सार्वत्रिकम्; भिन्नसामग्रीवेद्येषु सविशेषणविशेष्येष्वेव तथा दर्शनात्, एकसामग्रीवेद्येषु तु समानकालीनविशेष्यग्रहणेनैव विशिष्टग्रहणासिद्धेः। उक्तं च त्वयाऽपि तत्कालीनविशेषणग्रहणमेव विशिष्टोल्लेखोपयोगीति। तद्वद्विशेष्यस्वरूपस्य पूर्वगृहीतस्यापि तादात्विकोल्लेखाभावे विशिष्टग्रहणासिद्धेः, सति तस्मिंस्तत्सिद्धेः, पूर्वग्रहणस्यानपेक्षितत्वात्। अत एव विशिष्टग्रहणत्वात्स्वरूपग्रहणपूर्वकत्वानुमानं प्रत्युक्तम्। यच्चोक्तं—विशेषणग्रहणे सति न कथञ्चिदपि निर्विकल्पकसिद्धिरिति; तदप्यसत्; निर्विशेषग्रहणरूपनिर्विकल्पके शशविषाणायमाणे यदि विशेषणग्रहणे निर्विकल्पकं नाम न किंचित्स्यात्; न स्यादेव; न ह्यप्रामाणिकमवश्यमङ्गीकुर्मः। योगशास्त्रेषु निर्विकल्पकसमाध्युपदेशान्न तस्याप्रामाणिकत्वमिति चेन्न; तत्रापि निर्विशेषग्रहणस्यानुपदेशात्, आगमानां च सविशेषपरत्वस्य स्थापयिष्यमाणत्वात्, समाधिलक्षणानुप्रविष्टस्यार्थमात्रावभासत्वस्य * स्वरूपशून्यमिवेत्यस्य निर्विशेषग्रहणपरत्वाभावात्; ध्यानमेव हि यथावस्थितध्येयार्थवैशद्यातिशयात् तन्निगीर्णस्वरूपमिव भवतीति तत्रोपदिश्यते; *प्रह्लादवामदेवादि*समाधिषु चानन्तविशेषणविशिष्टब्रह्मानुभव एव श्रूयते; अतो न शास्त्रान्निर्विशेषविषयनिर्विकल्पकसिद्धिरिति। अतः प्रामाणिके कस्मिंश्चिन्निर्विकल्पके यथोपलम्भमङ्गीक्रियमाणे संस्कारानपेक्षप्रथमाक्षसन्निपातमात्रसंभवं प्रत्यक्षं निर्विकल्पकम्, ततस्तत्संस्कारसहकृतेन्द्रियजन्यं तदेकविषयं तज्जातीयपिण्डान्तरविषयं वा प्रत्यक्षं सविकल्पकम्, तच्च येनाकारेण पूर्वापरानुवृत्तेन स्वविषयं विशिनष्टि तदाकारविशिष्टस्य पूर्वमपि ग्रहणावश्यंभावात् प्रथमाक्ष-

संयोगजस्यापि विशिष्टविषयत्वमेव युक्तम्, तदाह—* सविकल्पके स्वस्मिन्ननुभूतपदार्थविशिष्टप्रतिसन्धानहेतुत्वादिति। निर्विकल्पकं तच्च विशिष्टविषयमिति स्ववचनविरुद्धमिति चेन्न; प्रमाणबलाच्छब्दवृत्तिसङ्कोचेऽवश्यंभाविनि परामर्शदशाविषयीक्रियमाणविशेषणनिवृत्तिमात्रेण निर्विकल्पकवाचोयुक्तेरुपपत्तेः। तदाह—* निर्विकल्पकं नाम केनचिद्विशेषेण वियुक्तस्यार्थान्तरस्य ग्रहणं न सर्वविशेषरहितस्येति। यदुक्तं प्रथमाक्षसन्निपातसमनन्तरमविशिष्टविषयापरोक्षावभासो दुरपह्नव इति, तत्राह—* तथाभूतस्य कदाचिदपि ग्रहणादर्शनादिति। अयमभिप्रायः—न तावन्निर्विशेषवस्तुग्रहणमिति वयं तदुत्तरकाले व्यक्तं परामृशामः, न च तदानीमेव। यद्यपि निर्विशेषवस्तुग्रहणमपि स्वप्रकाशत्वात् स्वतःसिद्धमिति वक्तुं शक्यम्; तथाऽपि तथाविधा स्वतस्सिद्धिरपि तथाभूततद्गोचरपरामर्शमन्तरेण दुरुपपादेत्युक्तम्; अन्यथा शशविषाणग्रहणमपि स्वप्रकाशसिद्धमिति धृष्टोक्तेरनिस्तारात्, तथा च न किंचित्प्रतिक्षेप्यं स्यात्, सर्वस्यापि तथातथासिद्धेः सुवचत्वादिति। माभूत् तथाभूतस्य ग्रहणम्, उपपत्त्या तु कल्प्यत इति यदाहुः, तत्राह—* अनुपपत्तेश्चेति। उपपत्त्यभावादित्यर्थः। व्याख्यातमिदं प्रागेव। अदर्शनं विवृणोति—* केनचिद्विशेषणेन इदमित्थमिति हि सर्वा प्रतीतिरुपजायत इति। उपपत्त्यभावं विवृणोति—* त्रिकोणसास्नादिसंस्कारविशेषेण विना कस्य चिदपि पदार्थस्य ग्रहणायोगादिति। यद्वा * तथाभूतस्य कदाचिदपि ग्रहणादर्शनादनुपपत्तेश्चेति योग्यानुपलब्धिबाधमुपपत्तिबाधं चाह; तदुभयविवरणं * केनचिदित्यादिग्रन्थद्वयम्। यद्वा पूर्वग्रन्थद्वयं साधकाभावपरम्; उत्तरं तु तद्द्वयं बाधकपरमिति विभागः। उक्तप्रकारनिर्विकल्पकसविकल्पकविभागमुदाहरणमुखेन विशेषेण दर्शयति—* अतो निर्विकल्पकमेकजातीयद्रव्येषु प्रथमपिण्डग्रहणम्; द्वितीयादिपिण्डग्रहणं सविकल्पकमित्युच्यत इति। निर्विकल्पसविकल्पकोदाहरणविशेषभूतयोः प्रथमद्वितीयपिण्डग्रहणयोः केनचिद्विशेषेण वियुक्तिमवियुक्तिं च दर्शयति—* तत्र प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते, द्वितीयादिपिण्डग्रहणेष्वेवानुवृत्तिप्रतीतिरिति। ननु यदि कस्यचिद्ग्रहणान्निर्विकल्पकत्वम्, तर्हि द्वितीयादिपिण्डग्रहणमपि यत्किञ्चिद्वस्त्वन्तराग्रहणान्निर्विकल्पकमेव स्यात्, ततश्च सविकल्पकनिर्विकल्पकयोर्व्युत्पत्त्यनुसारेण विभाजकं लक्षणं वाच्यमिति; तत्राह—* प्रथमप्रतीत्यनुसंहितवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिधर्मविशिष्टत्वं द्वितीयादिपिण्डग्रहणावसेयमिति द्वितीयादिग्रहणस्य सविकल्पकत्वम्, सास्नादिवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिर्न प्रथमपिण्डग्रहणे गृह्यत इति प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वम्, न पुनस्संस्थानरूपजात्यादेरग्रहणादिति। अयमभिप्रायः—संस्कारसहकृतेन्द्रियजन्यतया सप्रत्यवमर्शं ज्ञानं सविकल्पकम्, संस्कारनिरपेक्षकेवलेन्द्रियजन्यज्ञानं निर्विकल्पकम्; तदेतद्दृश्यते प्रथमपिण्डग्रहणदशायामिदमित्येव ग्रहणाद्द्वितीयादिपिण्डग्रहणेषु तज्जातीयतया सोऽयमिति परामर्शादिति।

ननु यदि प्रथमपिण्डग्रहणे जातिग्रहणं स्यात् तदैवं विभागस्स्यात्; तत्रैव तु किं प्रमाणम्? न ह्यनुवृत्ताकारजातिग्रहणमेकपिण्डग्रहणे संभवतीत्यत्राह—* संस्थानरूपजात्यादेरप्यैन्द्रियकत्वाविशेषात् संस्थानेन विना संस्थानिनः प्रतीत्यनुपपत्तेश्च प्रथमपिण्डग्रहणेऽपि ससंस्थानमेव वस्त्वित्थमिति गृह्यत इति। एतेन वैशेषिकाद्युक्तं निर्विकल्पकमपि निराचकार। ननूक्तेन लक्षणप्रकारेण विभागे प्रथमपिण्डग्रहणेऽपि सविकल्पकत्वं संभवति, यथा प्रथमपिण्डस्यैव द्वितीयपिण्डग्रहणे सोऽयं गौरिति द्वितीयादिपिण्डग्रहणेष्वपि निर्विकल्पकत्वं स्यात्, यथा विस्मृतप्रथमपिण्डस्य परामर्शाभावात् द्वितीयादिपिण्डेष्वप्ययं गौरिति, अतो लक्षणोदाहरणयोरसामञ्जस्यमिव भाति, अनुवृत्तस्वरूपाया जातेर्ग्रहणमेकपिण्डमात्रग्रहणे न संभवतीति चोद्यं चापरिहृतम्; तत्राह—* ततो द्वितीयादिपिण्डग्रहणेषु गोत्वादेरनुवृत्तिधर्मविशिष्टता

संस्थानवत् संस्थानिवच्च सर्वदैव गृह्यत इति तेषु सविकल्पकत्वमेवेति । अयमाशयः—निर्विकल्पकसविकल्पकविभागस्तावदुक्तप्रकारमन्तरेण नोपपद्यत इति दर्शितम्, उदाहरणमपि संभवल्लक्षणव्यक्तिविषयम्, अतः प्रथमद्वितीयाद्यनादर एव; येषु तु प्रथमस्यैव पिण्डस्य द्वितीयादिग्रहणेषु प्रतिसन्धानसंभवः तेषु सविकल्पकत्वमेवास्तु, येषु द्वितीयादिपिण्डग्रहणेषु च प्रथमस्यैव पिण्डस्य द्वितीयादिग्रहणेषु च प्रमुषितसंस्कारस्य प्रतिसन्धानासंभवः तत्रापि निर्विकल्पकत्वमेव; येषु पुनर्द्वितीयादिपिण्डग्रहणेषु गोत्वादेरनुवृत्तिधर्मविशिष्टता संस्थानिवत् संस्थानवच्च सर्वदैव गृह्यते, तेषु सविकल्पकत्वमेवेति तद्द्वितीयविकल्पोदाहरणम्, योग्यतया संस्थानस्य प्रथममेव स्वरूपग्रहणमाश्रयभेदग्रहरूपसहकारिविशेषस्याभावादनुवृत्तिरूपधर्माग्रहणम्, द्वितीयादिपिण्डेषु गृह्यमाणेषु तथाविधसहकारिसद्भावात् संस्थानस्वरूपस्येव तदनुवृत्तेरपि ग्रहणमिति न सङ्कटं किंचिदिति । निगमयति—*अतः प्रत्यक्षस्य न कदाचिदपि निर्विशेषविषयत्वमिति । अत इति साधकाभावात् बाधकसद्भावात्प्रामाणिकस्य निर्विकल्पकसविकल्पकविभागस्य लोकशास्त्राविरोधेन निर्वाहाच्चेत्यर्थः । कदाचिदपीति सविकल्पकदशायामिव निर्विकल्पकदशायामपीत्यर्थः ॥

॥ इति शतदूषण्यां निर्विशेषविषयनिर्विकल्पकभङ्गवादः एकादशः ॥ ११ ॥

॥ अथ सन्मात्रवादिप्रत्यक्षभङ्गवादः द्वादशः ॥ १२ ॥

यस्य सत्त्वेन विश्वस्य सत्ता सदसदात्मनः । प्रत्यक्षाद्यपरिच्छेद्यं तत्सदैकमुपास्महे ॥

यत्तु प्रत्यक्षादिविरुद्धं शास्त्रार्थमुपपाद्य पुनस्तानुशयैरुक्तं—प्रत्यक्षादिविरोधे सत्येव हि शास्त्रस्य बलीयस्त्वं वक्तव्यम्, विरोधमेव न पश्यामः, प्रत्युतैकरस्यम्, प्रत्यक्षस्यापि शास्त्रस्येव निर्विशेषसन्मात्रग्राहित्वात् । ननु यदि सन्मात्रं प्रत्यक्षेण गृह्यते तदा घटोऽस्ति पटोऽस्ति इत्यादिनानाकारवस्तुविषयोपलम्भव्यवहारयोर्विरोधः; न हि सत्सदित्येव प्रतीतिव्यवहाराविति चेन्मैवम्; यथेदं रजतमित्यादिरूपेषु शुक्तिरजतादिभ्रमेष्विदमंशस्याबाधितस्य सर्वत्र प्रत्यक्षेण ग्रहणं रजताद्यंशस्य त्वारोपितस्यैव भ्रान्त्यैवेति विविच्यते, तद्वदत्रापि सर्वत्र सन्मात्रप्रकाशव्यवहारयोः प्रत्यक्षोपज्ञत्वम्, घटपटादिभेदविषययोस्तु तयोर्भ्रमोपज्ञत्वमिति विविञ्चामः; तथा हि; घटोऽस्तीत्यादावस्तित्वं तद्भेदश्च प्रकाशते व्यवह्रियते च, तत्र विधिव्यवच्छेदयोर्भावाभावात्मनोरैक्यायोगात् भेदस्तावदङ्गीकार्यः; ततश्च स्वरूपभेदयोः सद्भटयोः किं द्वयोरपि ग्राहकं प्रत्यक्षम्? उत अन्यतरग्राहि? इति विचारणीयम् । पूर्वत्रापि किं युगपद्ग्राहकम् उत क्रमेणेति? न प्रथमः, स्वरूपग्रहणस्य निरपेक्षतया झटित्युत्पत्तेः, भेदग्रहणस्य त्वाश्रयप्रतियोगिग्रहणसापेक्षस्य जघन्यत्वाच्च यौगपद्यासंभवात् । न द्वितीयः, क्षणिकस्य ज्ञानस्य निरपेक्षं स्वरूपमवलम्ब्यास्तमितस्य भेदग्रहणाय क्षणान्तरस्थितेरशक्यत्वात् । अन्यतरग्राहित्वपक्षेऽपि न भेदमात्रग्राहित्वम्, निराश्रयभेदग्रहासंभवात् । ततः परिशेषात्स्वरूपमात्रग्राहि प्रत्यक्षमिति सिद्ध्यति । एवं प्रत्यक्षस्य भेदग्राहित्वासंभवे तन्मूलानां प्रमाणान्तराणामपि न वस्तुतो भेदसमर्थनसामर्थ्यमिति कुतस्तत्सिद्धिः? सिद्ध्यन्नपि च भेदः इतरव्यवच्छेदरूपतया स्वयमभावात्मतया षष्ठप्रमाणवेद्य इत्यतोऽपि न तस्य प्रत्यक्षग्राह्यता । एवं प्रत्यक्षे प्रथमाक्षसन्निपातक्षणभाविनि स्वरूपमात्रमवलम्ब्य विलीनेऽप्यविद्यावशात्तदनन्तरभाविनि विकल्पेऽपि सन्निकर्षात् प्रत्यक्षाभिमानमात्रं जायते, न तु साक्षात्प्रत्यक्षतेति भ्रान्तिमूल एव भेदव्यवहार इति ।

अत्र ब्रूमः—भेदापह्नवलोभेन भेदं विधिनिषेधयोः । स्वयं समर्थयन् मूर्खः स्ववाग्वज्रेण खण्डितः ॥

यदुक्तं स्वरूपभेदयोर्युगपत् क्रमेण वा ग्रहणमिति, तत्र योग्येषु भेदेषु युगपदेवेति ब्रूमः । तदाह—* एकक्षणवर्तित्वेऽपि प्रत्यक्षज्ञानस्य तस्मिन्नेव क्षणे वस्तुभेदरूपतत्संस्थानगोत्वादेर्गृहीतत्वात् क्षणान्तरग्राह्यं न किंचिदिह तिष्ठतीति । स्वरूपवज्जातिगुणादेरपि तत्तदिन्द्रिययोग्यत्वाविशेषात् एकसामग्रीवेद्यत्वं निर्विकल्पकनिरूपणे प्रदर्शितम् । न च जात्याद्यतिरिक्तं भेदमिच्छामः । त्वमपि हि घटोऽस्तीत्यादिषु घटत्वादिकमेवात्र भेदतयोदाहरसि, घटत्वादेश्च स्वरूपेण गृह्यमाणस्य न प्रतियोगिज्ञानापेक्षा, आश्रयप्रकाशापेक्षायामपि सहोपलम्भादेव नैराकाङ्क्ष्यं समर्थितम् । प्रतियोगिनिरपेक्षस्य कथं भेदत्वमिति चेत्, यदि तस्य भेदत्वं नास्तीति मन्यसे, तर्हि तत एवाश्रयस्येव तद्गतघटत्वादेरपि ग्रहणे न कश्चिद्दोषः । तदाऽपि न सन्मात्रग्राहकत्वसिद्धिः; सौहार्देन तु वदामः; जात्यादीनामेव स्वरूपेण गृह्यमाणानां न प्रतियोग्यपेक्षा, तेषामेव तु भेदत्वाख्येन स्वधर्मेण गृह्यमाणानां कदाचित्प्रतियोग्यपेक्षेति सर्वेषां स्वप्रतीतिसाक्षिकमेतत् । भेदत्वं चानन्तरमेव भेदनिरूपणे शिक्षयिष्यामः । बाधाभावे च सेत्स्यति शुक्तिकारजतादिवत् । बाध्याबाध्यांशनिष्ठावार्ताऽपि निरस्ता । यच्चोक्तं—प्रत्यक्षस्य भेदग्राहित्वाभावात्तन्मूलानामन्येषामपि प्रमाणानां न भेदसमर्थनसामर्थ्यमिति; तत्र किं तेषां कस्यचिदप्यग्राहकत्वं विवक्षितम्? उताभेदग्राहित्वम्? यद्वा भेदग्राहित्वेऽपि तत्र प्रामाण्यं नास्तीति? नाद्यद्वितीयौ, प्रतीतिबाधापसिद्धान्तादिदोषप्रसङ्गात् । न तृतीयः, भेदबाधकानां निरसिष्यमाणत्वात् । यदि च प्रत्यक्षचर्वितचर्वणेन तदर्थेऽप्रामाण्यमनुमानादेः, तदाऽतीन्द्रियस्य कस्यचिदपि कुतश्चित्सिद्धिर्न स्यात् । यदि च स्वविषयभेदे अनुमानादीनां प्रामाण्यं नाङ्गीकृतम्? कुत्र तर्हि तेषां तत्स्यात्? न कुत्रचिदितिचेत्, तर्हि प्रत्यक्षैकप्रमाणवादिचार्वाकः प्रत्यक्षाप्राप्तविषयप्रमाणान्तरप्रदर्शनेन किं त्वया प्रतिक्षिप्यते? धर्माधर्मपरतत्त्वादिगोचरवेदप्रामाण्यप्रत्याशयेति चेत्, चार्वाकवदेव वस्तुतस्तत्र तत्प्रामाण्यमनिच्छतस्ते किमनया स्वैराचारसुखोपरोधिन्या दुराशया? प्रत्यक्षस्य भेदग्राहित्वाभावे लिङ्गलिङ्ग्यादिभेदो विकल्पसिद्ध इति तन्मूलानामनुमानादीनामप्रामाण्यमिति चेत्, तर्ह्यनुमानादिकं प्रमाणमेव न भवतीति चार्वाकवद्ब्रूहि, न पुनर्भेदे न प्रमाणमिति । किंच प्रत्यक्षमूलस्यापि शास्त्रस्य प्रत्यक्षविरुद्धार्थेऽपि प्रामाण्यं संभवतीति मन्यमानस्य तवानुमानादेरपि तथात्वे को विरोधः? यच्चाभावरूपस्य भेदस्याभावप्रमाणवेद्यत्वान्न प्रत्यक्षवेद्यत्वं संभवतीति, तदभावाख्यं प्रमाणान्तरं प्रमेयान्तरं चानभ्युपगच्छतां गोष्ठीषु नावतिष्ठते । भवतु वा षष्ठं प्रमाणम्, तथाऽपि तत्रैव भेदग्राहकतयाऽभ्युपगते क्रमयौगपद्यविकल्पानुपपत्तिस्तदवस्था । प्रत्यक्षेणाधिकरणग्रहणे संस्कारोन्मेषाच्च प्रतियोगिस्मरणे सति क्षणिकेनाप्यभावजन्यज्ञानेन भेदग्रहणमुपपद्यत इति चेत्, हन्त तर्हि पूर्वप्रत्यक्षेणाधिकरणग्रहणे तथैव प्रतियोगिस्मरणे च सति क्षणिकेनापि प्रत्यक्षान्तरेण भेदग्रहणे काऽनुपपत्तिः? पूर्वोत्तरप्रत्यक्षयोः परस्परवार्तानभिज्ञतया वैशिष्ट्यं न सिद्ध्येदितिचेत्, हन्त किं प्रत्यक्षस्याभावप्रमाणस्य च परस्परवार्ताभिज्ञता शिक्षिता भवता? येन तत्र वैशिष्ट्यं बोद्धव्यमिति मन्यसे । प्रथमोदितप्रत्यक्षसंस्काराद्विशिष्टज्ञानोदयस्तत्रेति चेत्, किं प्रत्यक्षान्तरे तथा निर्वाहो राजशासनवारितः? अत एव प्रत्यक्षाभासेन विकल्पेन भेदग्रहणमित्येतदपि दत्तोत्तरम् । एवं प्रत्यक्षस्य भेदग्राहित्वासंभवे तुल्यन्यायतया षष्ठप्रमाणस्य प्रत्यक्षाभासस्य च भेदग्राहित्वासंभवं सिद्धं कृत्वा * अपिचेत्यादिना प्रतीतिविरोधादिकमुदाजहार भाष्यकारः ।

तद्व्याकुर्मः—यदि सन्मात्रं प्रत्यक्षग्राह्यं न भेदः, तदा तुल्यन्यायतया षष्ठप्रमाणप्रत्यक्षाभासादेरपि भेदग्राहित्वासंभवात् घटोऽस्ति पटोऽस्तीति विशिष्टविषया प्रतीतिर्विरुध्येत, अश्वार्थिनश्च महिषदर्शने निवृत्तिर्न स्यात्, भेदग्रहणा-

संभवस्य त्वयोक्तत्वात्; सदिति ग्रहणस्य चाश्वादिसर्वसाधारणस्य निवर्तकत्वायोगात्। सर्वेषां प्रत्यक्षज्ञानानां सन्मात्रविषयत्वे तत्तत्प्रतिपत्तिविषयप्रतिनियतानां सर्वेषां शब्दानां स्मृतिप्रसङ्गः; ततश्च तत्प्रयोगोऽपि यथाविवक्षमेवेति सर्वेषां शब्दानां पर्यायत्वप्रसङ्गः। सर्वेषां च प्रत्यक्षज्ञानानां पूर्वपूर्वगृहीतमात्रग्राहितया स्मृतिवैलक्षण्यं न स्यात्, नच तदिष्यते; सर्वेन्द्रियजन्यज्ञानानामेकविषयत्वेऽभ्युपगते रूपशब्दाद्यग्रहणनिबन्धनान्धबधिरादिभेदस्तत्प्रतिनियतविषयबोधजनकत्वहेतुकेन्द्रियभेदक्लृप्तिश्च न स्यात्।

यत्तु—शास्त्रस्य प्रत्यक्षविरोधपरिहाराय तयोरेकविषयत्वं साधितम्, तदपि शास्त्रस्य प्रतिपन्नविषयानुवादकत्वापादकम्। ब्रह्मणश्च प्रत्यक्षवेद्यत्वं शास्त्रयोन्यधिकरणार्थविरुद्धम्, * न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्, * न चक्षुषा गृह्यते नापि वाचा, * मनसा तु विशुद्धेन, * न मांसचक्षुरभिवीक्षते तम्, * न मांसचक्षुषा द्रष्टुं ब्रह्मभूतः स शक्यते इत्यादिश्रुतिस्मृतिविरुद्धं च। किंच प्रत्यक्षजन्यक्षणिकज्ञानेन सन्मात्रस्य ग्रहणमुपपादयता ब्रह्मण एव दृश्यत्वमुक्तं स्यात्; ततश्च तत्प्रयुक्ततया त्वदभिमतानि जडत्वनाशित्वमिथ्यात्वादीनि दुर्निवाराणि। अतो जात्यादिलक्षणभेदविशिष्टब्रह्मव्यतिरिक्तघटादिसद्विशेषविषयमेवास्मदादिप्रत्यक्षम्, योगिप्रत्यक्षमपि तत्तद्गुणादिविशिष्टब्रह्मविषयमित्युक्तम्। अपिच सच्छब्दार्थः स्वरूपं घटादिशब्दार्थस्तु भेद इति केनावधृतं त्वया? घटपटादिषु सदनुवृत्तेस्सति घटादेश्च मिथो व्यावृत्तेरिति चेत्; घटादेस्सदनुवृत्तेस्सत्त्वस्य चासतो घटाद्व्यावृत्तेर्विपरीतं किं न स्यात्? असतोऽपि किं घटत्वमितिचेत्, मैवम्; नहि सन् घटादिरिति युष्माभिरेव वर्णनात्। यदा च घटोऽस्ति पटोऽस्तीति सदनुवृत्त्या सतस्स्वरूपत्वमिष्यते, तदा घटो नास्ति पटो नास्तीत्यसदनुवृत्त्या तस्यापि स्वरूपत्वं किं नेष्यते? सति तद्व्यावृत्तेरिति चेत्, असति सतोऽपि व्यावृत्तेस्तस्यापि तन्नेष्यताम्। अतो घटत्वादिवत्सत्त्वमसत्त्वं च तत्तद्वस्तूनां धर्म एव। स्वरूपं तु घटादीनां घटत्वादेः सत्त्वादेश्चाश्रयतया परस्परासंकीर्णं प्रत्यक्षेण गृह्यते। अतस्सच्छब्दार्थः स्वरूपं चेद्घटशब्दार्थोऽपि स्वरूपमेव। घटत्वादेर्धर्मतया निष्कर्षे सत्त्वादेरपि तथेति न स्वरूपत्वम्। अतो यत्स्वरूपं घटादीनां प्रत्यक्षग्राह्यं तत्परस्परं व्यावृत्तं सत्ताघटत्वाद्यनन्तविशेषविशिष्टं चेति न तस्य निर्विशेषैकस्वरूपता। अनुवर्तमानं चैकं सत्त्वं घटादिधर्मभूतमिति न तस्यापि सर्वधर्मिभूतब्रह्मता। यश्च प्रतिवस्तुनियतं प्रामाणिकत्वादिकमेव सत्त्वमिच्छति, तस्य पुरतः सत्त्वमेकमित्यपि दुस्साधम्। अतः प्रत्यक्षस्य सर्वस्य नैकविषयत्वम्, न तरां निर्विशेषविषयत्वम्, न तमां ब्रह्मविषयत्वमिति सिद्धे प्रत्यक्षमूलानां प्रमाणान्तराणामपि प्रत्यक्षागोचरविशिष्टविषयत्वे न कश्चिद्दोषः; प्रत्युत निर्विशेषविषयत्व एव प्रत्यक्षादिबाध इति सिद्धम्।

॥ इति शतदूषण्यां सन्मात्रग्राहिप्रत्यक्षभङ्गवादो द्वादशः ॥ १२ ॥

॥ अथ भेददूषणनिस्तारवादः त्रयोदशः ॥ १३ ॥

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तेष्वासनिर्गतः। भेदं बिभित्सतां चित्तं भिन्ते तर्कात्मकश्शरः॥

यदेतत् स्वमर्मघट्टनम्—भेदः स्वरूपं धर्मो वा? न तावत् स्वरूपम्, शुक्तिरजतादिभ्रमानुत्पत्तिप्रसङ्गात्, इदमित्यधिष्ठानतया हि शुक्तिस्वरूपमवगम्यते, अन्यथा निरधिष्ठानभ्रमप्रसङ्गात्; अवगते शुक्तिस्वरूपे तस्यैव रजताद्भेदत्वेन कथं शुक्तिरजतयोर्भेदाग्रहः? कथंतरां च तन्मूलश्शुक्तौ रजताध्यासः? कथंतमां च तदधीनाः कल-

धौताभिलाषिणः करतलप्रसारणग्रहणचेलाञ्चलनिबन्धनतद्रक्षणप्रभृतयः, कथं चाध्यासाभावे नेदं रजतमिति बाधः ? किं च नेदं रजतमिति व्यवहारहेतुर्भेदग्रहः पूर्वमस्ति वा न वा ? अस्ति चेत्प्रथममेव तथा व्यवहारस्स्यात्; न चेद्भेदस्याग्रहे स्वरूपस्याप्यग्रहादिदमिति स्वरूपव्यवहार इदं रजतमित्यध्यासश्च न स्याताम् । यदि च घटस्वरूपमेव पटस्य भेदः, तदा घटो भेद इति पर्यायता प्रसज्येत; घटो भिन्न इति व्यवहारे घटो घटविशिष्ट इत्युक्तं च स्यात्; भिन्नशब्दस्य भेदविशिष्टवाचित्वात्, भेदस्य च घटस्वरूपत्वात् । यद्वा घटो भेद इत्येव व्यवहारस्स्यात् । यदि च घटाद्भेदः पटस्य स्वरूपं तदा कुड्ये पटस्वरूपत्वाभावात् कुड्यस्य घटाद्भेदाभावे घटकुड्यतादात्म्यं प्रसज्येतेति तेनैव क्रमेण सर्वस्य जगतस्तादात्म्ये स्वरूपभेदवादः सर्वाभेद एव पर्यवस्यतीति जितमायुष्मता । अथैतद्दोषपरिहाराय घटव्यतिरिक्तानां तत्तद्वस्तूनां तानि तानि स्वरूपाणि प्रत्येकं घटाद्भेद इति मन्वीथाः, तदा घटव्यतिरिक्तेष्वखिलेषु वस्तुषु परस्परव्यावृत्तेषु घटाद्भिन्न इत्यनुवृत्तव्यवहारस्यानुवृत्तोपाध्यभावान्निर्विषयव्यवहारायोगाच्च परस्परस्वरूपाण्येव परस्परानुवृत्तानीति पुनरपि तदेव सर्वतादात्म्यं प्रसज्येत । किं च घटादीनां स्वरूपाणि सप्रतियोगिकानि निष्प्रतियोगिकानि वा ? पूर्वत्र प्रतियोगिस्मृत्यभावे घटः पट इत्यादिव्यवहारो न स्यात् । उत्तरत्र सप्रतियोगिकभेदरूपत्वं व्याहन्येत । अथ धर्मो भेदः, तदा धर्मधर्मिणोर्भेदोऽस्ति न वा ? न चेद्धर्मधर्मिणोरभेदाद्धर्मस्यैवाभावेन धर्मभेदाभावात् पुनरपि सर्वतादात्म्यं प्रसज्येत । यद्वा धर्मिण एवाभावात् कस्य भेदो वर्णनीयः ? अथ धर्मधर्मिणोर्भेदोऽभ्युपगम्यते, तत्रापि भेदः स्वरूपं धर्मो वेति विकल्पे स्वरूपपक्षस्य दूषितत्वात् धर्मपक्ष एव परिशिष्यते; ततश्च तस्यापि धर्मभेदापेक्षयाऽनवस्था स्यात्; एवं च स्वरूपधर्मयोरन्यतरकोटिबहिर्भावभावात् अन्योन्याभावपृथक्त्वविशेषाणामपि भेदत्वं पलायितमिति । किंच धर्मधर्मिणोराश्रयप्रतियोगिनोश्च भेदग्रहस्तदाकारग्रहणमन्तरेण स्वरूपेण गृह्यमाणयोर्न संभवति, धर्मधर्मित्वादितत्तदाकारग्रहश्च तयोर्भेदग्रहे सतीति परस्पराश्रयणम्, वस्त्वन्तरसिद्धावेकविधिरन्यव्यवच्छेदः व्यवच्छेदसिद्धौ वस्त्वन्तरसिद्धिरिति च । न च भेदग्रहणमन्तरेणापि स्वरूपेण गृह्यमाणयोर्धर्मित्वादिग्रह इति वाच्यम् । भेदग्रहाभावे हि गृह्यमाणयोरेकत्वग्रहे पर्यवसानं स्यात्, अनेकत्वाग्रहे वा, उभयधाऽपि धर्मत्वधर्मित्वलक्षणवैलक्षण्यं कथञ्चिदपि न संभवति । कथं तर्हि सार्वलौकिकोऽयं भेदग्रहः ? अविद्यामाहात्म्यादिति ब्रूमः । न चाविद्यामूलेऽपि भेदग्रहे विचाराः प्रागुक्ताः प्रक्रमन्ते, अविचारितरमणीयतैकवेषत्वात् । न चैतावता परमार्थत्वसिद्धिः, वस्तुतो विचारासहत्वात् । न च वाच्यं प्रमाणप्रमेयतदुपकरणतदवान्तरभेदकथकसिद्धान्तसाधनदूषणादिभेदव्यवस्थाभङ्गात् स्ववचनविरोधस्वसाध्यभङ्गादिरिति, साध्यत्वाभिमतविश्वानुप्रविष्टस्ववचनस्वसाध्यादिभङ्गेऽपि स्वाभिमताद्वैतसिद्धेरवर्जनीयत्वात् । किं चासिद्धभेदेन केनचिद्भेदसाधनमशक्यम्, अन्यथा त्वनवस्थैवेत्येषा दिक् ।

अत्रोच्यते—न तावद्भेदप्रतीत्यपह्नवश्शक्यः; स्ववचनविरोधबाधापसिद्धान्तादिप्रसङ्गात्, तथा सति हि युष्म-दस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तिरित्यादिभाषणमपि व्याहन्येतेति। नच भेदप्रतीतिकारणापह्नवश्शक्यः, कार्यस्य कारणावश्यंभावात् । अन्यथा लोकायतमतापातात् । न च भेदप्रतीतेरकार्यत्वं वक्तुं शक्यम्, नित्यत्वतुच्छत्वयोस्त्वयैव त्यागात् । न च दुर्निरूपं तत्कारणमिति वाच्यम्, एतत्कारणत्वेनैव सुनिरूपत्वात्, अन्वयव्यतिरेकवशात् इन्द्रियादिविशेषप्रसिद्धेश्च । भवताऽपि चाविद्याकारणमिति विशेषतो निर्णीतम्, अन्यथा परमार्थत्वप्रसङ्गात् । न चास्य निर्विषयत्वं सुवचम्, प्रतीत्यपह्नवपक्षोक्तदोषावश्यंभावात्, स्वबाध्यभेदविषयप्रती-

त्यभावेन परसिद्धान्तस्थिरीकरणाच्च। अतो बाध्यविषयत्वमवशिष्यते। तदपि दुर्वचम्, बाधकप्रमाणस्य भेदग्राहित्वे भेदाभावग्राहित्वे यत्किञ्चिद्ग्राहित्वाभावे च भेदस्य स्थिरीकरणात्। भेदाभावोऽपि सिद्ध्यन् भेदाद्भिन्न एव सिद्ध्यति, अन्यथा तदसिद्धेस्तत्सिद्धेर्वा भेदसिद्ध्यापातात्। एवंच सामान्यतः स्थापिते भेदे न पृथग्जल्पानामुत्तरापेक्षा या चात्र भेद-तिरस्करिणी, साऽपि साध्वसाधुविवेकदिव्यचक्षुषि जने न जागर्ति। तथाहि; स्वरूपं धर्मो वेति विकल्पयन् किं सामान्यतः स्वरूपधर्मयोः भेदमङ्गीकृत्य विकल्पयत्यनङ्गीकृत्य वा? न प्रथमः; विकल्पस्य निष्फलत्वात्, अन्यथाऽभ्युपगमबाधात्। न द्वितीयः, विकल्पस्यानुत्थानात्। न पुनः पर्यायेण विकल्पः। नच निर्मुक्तोपाधिभेदैकवस्तुगोचरयोश्शब्दयोरपर्यायता, प्रातीतिकभेदमूलोऽयं विकल्पः परमार्थविमर्शभेदमूलं तद्दूषणमिति चेन्न; विमर्शभेदस्यापि पारमार्थिकत्वानभ्युपगमात्, स्वमूलघातायोगाच्च। अत एव परमतसिद्धभेदोपजीवनेन विकल्प इति प्रत्युक्तम्, अनङ्गीकृतमूलघातकेन परमतेन तत्सिद्धेः अन्यथा परमतेनापि तदसिद्धेस्तन्मूलविकल्पासंभवात्। अतो यदि विकल्पयसि सिद्धो भेदः। यदि न, तथाऽपि सिद्धः, विकल्पोपक्रमत्वात्तद्दूषणस्य। नचानुपलब्धेः किं विकल्पेनापीति वाच्यम्, तथा सति तस्यानिर्वचनीयपक्षनिक्षेपासंभवात्, संविदनुपलम्भवाचोयुक्तेश्चैवं सुलभत्वात्। किंच अभेदः स्वरूपं धर्मो वा? स्वरूपं चेत् भेदभ्रमः क्वचिदपि न स्यात्, भेदविरोधिन्यभेदे दृष्टे तदारोपासंभवात्, अभिन्नो घट इत्यादेः पर्यायतादिप्रसङ्गश्च प्राग्वत्। अथ तु धर्मः, तर्हि सिद्धो भेदः, धर्मधर्मिभावस्य तद्व्याप्तत्वात्। यद्यभेदरूपेणापि धर्मेणाभेदः, स चेत्स्वरूपम्, स एव दोषः, धर्मश्चेदनवस्थेति त्वदुक्तमर्यादाप्रवर्तने का वार्ता? उपलम्भ इति चेत्तुल्यम्। न काचिदिति चेत् किमर्थस्तर्हि भेदापह्नवः? अनन्यार्थ एवेति चेन्न; अप्रविष्टमाध्यमिकपक्षेण त्वया तथाऽनभ्युपगमात्। न भेदापह्नवसाध्यमद्वैतम्। अपि तु स्वतस्सिद्धमिति चेन्न; अद्वैतमित्येव तत्सिद्धेरन्यथा स्वरूपमात्रस्य भेदाभेदविकल्पसहस्य तत्त्वायोगात्। तस्माद्भेदस्वरूपमपह्नुवानैरभेदस्वरूप-मप्यपह्नुतं स्यात्। नचास्त्विति वाच्यम्, माध्यमिकमतापातात्। न चानुभयाकारत्वसिद्धिः, उभयाकारत्वव्याघातात्। नच वयमेकस्यैवैकस्माद्भेदमभेदं च स्वीकुर्मः, येनास्मन्मते तत्प्रसङ्गः; नचाभेदमपि सर्वत्र परित्यजामः, येन प्रकारेण भवत इव सर्वाभावः स्यात्; अतः सर्वं वस्तुजातं स्वव्यतिरिक्तात्सर्वस्माद्भिन्नं स्वस्माच्चाभिन्नमिति सांसिद्धिकीयं तत्त्व-व्यवस्था। अथ यावत्संभवं च विकल्पितं देवानां प्रियेण, धर्मान्तराणां [धर्म्यन्तराणां] स्वाश्रयस्य च स्वरूपधर्मबहिर्भावा-द्व्यावर्तकत्वेन भेदत्वस्य वक्ष्यमाणत्वाच्च उभयं वेत्यपि विकल्पः किं न विकल्पितः? स एव हि नस्समयः। यथासंभवं स्वरूपधर्मयोर्भेदत्वस्यानुप्रवेशोपलम्भात्, व्यावृत्तव्यवहारहेतुर्हि भेदः, स च व्यवहारः क्वचित्स्वरूपतः क्वचिद्धर्मतश्च दृश्यते। शुक्तिरजतभ्रमादेः शुक्तित्वादिधर्मभेदप्रतीतिनिबन्धनत्वस्यान्वयव्यतिरेकसिद्धत्वान्न भ्रमाद्यनुपपत्तिः। नहि शुक्त्यादीनां स्वरूपमेव रजतादिभ्यो भेदः। घटो भिन्न इति व्यवहारगतचोद्यान्यपि घटशब्दप्रवृत्तिनिमित्तविलक्षणसार्वत्रिक-प्रयोगयोग्यभिन्नशब्दप्रवृत्तिनिमित्तयोगात् परिहृतानि। तच्च निमित्तं घटत्वादिभेदानामेव व्यावृत्तव्यवहारहेतुत्वं भ्रान्ति-प्रतिपक्षोपलम्भत्वमित्यादिरूपेण ग्राह्यम्, अतएव व्यावृत्त्यनुवृत्त्यादिप्रयुक्तव्यवहारसाधनतादात्म्यप्रसङ्गोऽपि प्रत्युक्तः स्वरूपशब्दवत्। घटस्वरूपं पटस्वरूपमिति भेदोल्लेखेनैव हि स्वरूपशब्दः सर्वत्र प्रयुज्यते। तत एव तत्रापि स्वरूपमात्र-तादात्म्यमिति चेन्न; स्वधीवचनादिविरोधात्। भेदः स्वरूपमित्यनेनाभेदस्वरूपसिद्धिरिति कस्त्वदन्यो मन्येत? सप्रति-योगिकत्वाप्रतियोगिकत्वविकल्पोऽपि भिन्न इति व्यवहारमात्रस्य प्रतियोगिनिरूपिताकारे व्युत्पन्नत्वात् प्रतियोगिसाकाङ्क्षतेति निरस्तः। स्वरूपधर्मभेदसमर्थनाच्च धर्मधर्मिणोर्भेदोऽनवस्थापरिहारश्च सिद्धः। अयमत्र संग्रहः—

यस्मिन् यद्दर्शने येषामध्यासो नोपपद्यते । तस्य भेदः स तेभ्यस्स्यात्तदुक्तिस्तु विवक्षया ॥ इति ।

एवं तर्हि धर्मभेदपक्ष एवाङ्गीकृतः स्यात्, न पुनः स्वरूपस्य भेदत्वसिद्धिः, तस्य भ्रमसहत्वात् इति चेत्; सत्यम्; तथाऽपि धर्मविशेषाणां धर्म्यन्तरमनपेक्ष्यैव स्वस्मिन्नन्यतादात्म्याध्यसविरोधित्वात्तेषां स्वरूपमेव स्वेषां स्वधर्मिपर्यन्तेभ्य इतरेभ्यो भेद इत्येष्टव्यम्; तच्च स्वरूपमाश्रयापेक्षया धर्मो भेद इत्यपि व्यपदिश्यते; स्वपरनिर्वाहकसमाधिश्च संवेदनादिषु त्वयाऽपि स्वीकृतः । धर्मिस्वरूपस्य न कदाचिद्भेदत्वसिद्धिरिति चेन्न, अगृहीतभेदेषु केषुचिद्धर्मेष्वाश्रयभेदात् भेदव्यवहारदर्शनात्; सौरभादिषु हि धर्मत्वमवगम्य कस्येदमिति सन्दिहानास्तदाश्रयविशेषदर्शनादिभिस्तत्तन्निष्ठतामध्यवस्यन्तस्तदन्यनिष्ठादन्यतां मन्यन्ते । अतोऽस्ति धर्मिणोऽपि क्वचिद्भेदत्वम्, सोऽपि धर्मी स्वधर्ममितरगतधर्माद्भिन्दानो धर्मान्तरेण भिन्न इति न निर्भेदेन भिद्यत इति शङ्का, येन भेदासिद्धिरनवस्थादिकं वा प्रसज्येत । यस्य च धर्मस्य धर्मी भेदः सोऽपि कदाचितस्यैव धर्मिणो भेदस्स्यात्, यदा ह्याकारादिसादृश्यमात्रेण तस्यैव धर्मिणो धर्म्यन्तराद्व्यवच्छेदासिद्धिः यथा विलीने घृते तैलसन्देहदशायां गन्धविशेषेण तद्व्यावृत्तिः, अतोऽत्र नान्योन्याश्रयशङ्काऽपि, अपेक्षानियमाभावात्; गन्धजातिभेदस्य धर्मिभेदाप्रतीतावपि प्रत्यक्षेण पटुकरणानां प्रतीतेरस्फुटरूपधर्मद्वयभेदाभेदचिन्तायाश्च तद्भेदकस्याश्रयादिभेदस्य प्रत्यक्षावसिततदाकारान्तरयोगित्वेनैव सिद्धिः । एवं विषयधर्मादिषु विषयादिभ्योऽपि भेद उदाहर्तव्यः । यच्चोक्तम्—धर्मधर्मित्वादिग्रहो भेदग्रहात्ततश्च स इत्यन्योन्याश्रय इति, तदपि न; तयोर्भेदानभ्युपगमात्, धर्मधर्मित्वादिरेव हि भेद इष्यते । तथाऽऽत्माश्रयापात इति चेन्न; तस्यैव तत्र हेतुत्वानभ्युपगमात्; प्रत्यक्षादिसामग्रीवशादेव हि तद्ग्रहः । समर्थित एव सच जात्यादिरूपभेदः प्रत्यक्षादियोग्यइति । यच्च वस्त्वन्तरसिद्धौ एकविधिरन्यव्यवच्छेदः व्यवच्छेदसिद्धौ वस्त्वन्तरसिद्धिरिति, तदपि न; वस्तुनोर्द्वयोरपि प्रतिनियतधर्मविशिष्टतया प्रत्यक्षादिभिर्ग्रहणात्तावत एव व्यवच्छेदग्रहरूपत्वात् । यच्चोक्तम्—अविद्यावशाद्भेदग्रहः तत्रचाविचारितमणीयत्वैकवेषत्वात् वस्तुतो विचारासहत्वान्न कश्चिद्दोष इति; तत्र किं प्रत्यक्षस्यैव शिरसि भारोऽयं निक्षिप्यते, तत्प्रामाण्यसिद्ध्यर्थमिति चेत्, तदपि वा किमर्थं न परित्यज्यते? लोकविरोधादिति चेत्, तुल्यं विकल्पेऽपि । तत्सिद्धेस्स्वरूपमात्रे बाधकाभावादिति चेन्न; भेदेऽपि बाधकाभावस्योक्तत्वात् । अस्तु तर्हि प्रत्यक्षमप्यप्रमाणमिति चेत्, हन्त तर्हि तत्सिद्धस्वरूपमात्रस्यापि मिथ्यात्वाज्जितं माध्यमिकैः । केनाप्यसिद्धं तत्स्वतस्सिद्धमिति चेत्, तथाभावे तस्य किं त्वया प्रमाणमुपन्यसनीयम्; न किंचिदिति चेत्, साधु सिद्धान्तस्समर्थितः; अथ प्रत्यक्षादिकमेव किमप्रमाणमपि प्रमाणतया उपन्यस्तं कार्यकरम्, तथाच सति परपक्षप्रतिक्षेपः कस्यापि न सिद्ध्येत् । परैः प्रमाणतयाऽभ्युपगमात्तदुपन्यास इतिचेत् न तावता निर्णायकत्वम्, तत्त्वव्यवस्थित्यसिद्धेः । किंच स्वयंप्रकाशप्रत्यक्षेणापि सकलेतरव्यावृत्तमेव प्रत्यग्वस्त्ववभासत इत्यतोऽपि भेदः प्रत्यक्ष एष्टव्यः, अन्यथा जडतादात्म्यप्रसङ्गात्, आकारभेदानभ्युपगमेन सामान्यस्फुरणायोगात्, तावतश्च भ्रमसहत्वेन भेदत्वासिद्धेश्चेति ॥

॥ इति शतदूषण्यां भेददूषणनिस्तारवादः त्रयोदशः ॥ १३ ॥

॥ अथ वेदप्रामाण्यपरिग्रहानुपपत्तिवादः चतुर्दशः ॥ १४ ॥

यदात्मानो वेदा यदनुगुणवर्णाकृतिजुषः प्रमाणं यत्रैते नियतमपरिच्छेद्यविभवे ।
य एषामाहर्ता दनुजमथनो वाजिवदनस्स मे देवश्श्रीमान्विदलयतु संमोहमखिलम् ॥
वेदप्रामण्यवाङ्मात्रकञ्चुकच्छन्नमर्मणाम् । बुद्धसिद्धान्तसुहृदां सन्तः पश्यन्तु बाध्यताम् ॥

अतीन्द्रिये हि धर्मादौ वेदाः प्रमाणमिति साधितं प्रथमकाण्डे । तदुपजीवनेन सिद्धेऽपि प्रामाण्यं शारीरके । अतस्तथागताद्यागमस्तत्त्वानुष्ठानयोरप्रमाणमिति सर्वमीमांसकसम्मतम् । तदेतत्संविन्मात्रव्यतिरिक्तमिथ्यात्ववादे न संगच्छते । तदुक्तमभियुक्तैः—* प्रमाणत्वाप्रमाणत्वे पुण्यपापादितत्फलम् । विध्यर्थवादमन्त्रार्थनामधेयादिकल्पना ॥ सर्वेषु लक्षणेष्वेव स्वप्रमाणगणे स्थितिः । वचनव्यक्तिभेदेन पूर्वसिद्धान्तपक्षता ॥ कर्मभ्यः फलसम्बन्धः पारलौक्यैहलौकिकः । सर्वमित्याद्ययुक्तं स्यादर्थशून्यासु बुद्धिषु ॥ इति । तदिह किंनाम वैषम्यमाश्रित्य वेदाः प्रमाणं बुद्धाद्युपदेशा न प्रमाणमिति निष्कृष्यते ? किं शब्दस्वरूपसत्यत्वासत्यत्वाभ्युपगमेन ? उत परमार्थभूतप्रामाण्याप्रामाण्याश्रयत्वेन ? उत प्रमातृसत्यत्वासत्यत्वाभ्युपगमभेदेन ? यद्वा सत्यभूतप्रमितिहेतुत्वाहेतुत्वाभ्याम् ? किं वा नित्यत्वानित्यत्वाभ्याम् ? अथानादित्वसादित्वाभ्याम् ? उत दोषतदभावाभ्याम् ? अथ व्यवहारविसंवादसंवादाभ्याम् ? अथवा महाजनपरिग्रहबहिष्काराभ्याम् ? आहोस्वित् वेदत्वावेदत्वमात्रेण ? अथाविद्याविशेषजनिताभिमानानभिमानमात्रेण ? अथ वेक्षुक्षीरादिवत्स्वात्ममात्रसाक्षिकेणानिर्देश्यरूपभेदेनेति ।

नाद्यः, असिद्धेः ; न हि *योगाचारादिभिः* बुद्धप्रणीतोऽक्षरराशिस्सत्य इत्यभ्युपगम्यते, नापि भवता वेदरूपः । न वयं वेदस्य शशशृङ्गादिवदसत्यत्वमभ्युपगच्छाम इति चेत्, किं तर्हि सत्यत्वमभ्युपेतम् ? तदपि नेति चेत् तर्हि को विशेषः ? व्यवहारिकापरपर्यायकाल्पनिकसत्यत्वाभ्युपगम इति चेन्न, तैरपि संवृतिसत्यत्वाभ्युपगमात् । अयमेव तावद्विशेष इति चेन्न ; पर्यायमात्रस्य वैषम्यानाधायकत्वात् । अन्ततो वञ्चनार्थत्वस्याप्युभयोरविशेषात् । यथाऽऽहुः—* तुल्यार्थत्वेऽपि चैतेषां मिथ्यासंवृतिशब्दयोः । वञ्चनार्थ उपन्यासो लालावक्त्रासवादिवत् ॥ नास्तिक्यपरिहारार्थं संवृतिः कल्पितेति च ॥ इति । न च युष्माभिः संवृतिसत्यत्वस्यावाच्यत्वं सङ्केतितम् । उक्तं च—* गूढपाषण्डिगोष्ठीगरिष्ठैः तदेतत्संवृतिरिति गीयत इति । अस्तु वा तदभ्युपगमेन वैषम्यम्, भवता तु निपुणधिया द्वयोरपि व्यावहारिकसत्यत्वमविशिष्टमेष्टव्यम्, व्यवहारानुबन्धित्वमात्रस्य तुल्यत्वात् । अतो भवता परित्यक्तपक्षपातेन न तद्बहिष्कारः कार्यः । यदि चाभ्युपगमसिद्धेन सत्यत्वेन प्रामाण्यसिद्धिः, तर्हि वैभाषिकाद्यागमानां तदभ्युपेतेन तेन तत्सिद्धिरनिवार्या । एतेन द्वितीयतृतीयचतुर्था निरस्ताः । विशेषतोऽपि ब्रूमः—द्वितीये तावत्प्रामाण्यलक्षणवैषम्यसिद्धिः प्रामाण्याश्रयत्वेनेति वदता साध्यमेव साधनत्वेनोपन्यस्तम् । ननु विशेषणविशिष्टाकारेण साधनत्वम्, स्वरूपतस्तु साध्यत्वमिति चेन्न ; विशेष्यासिद्धौ विशिष्टस्याप्यसिद्धेः । भवन्मते विशेषणमप्यसिद्धमेव, वेदप्रामाण्यस्यापि ब्रह्मव्यतिरिक्तस्य पारमार्थ्यानभ्युपगमात् ; तदभिमानमात्रस्य चोभयोरविशेषात् । तृतीयेऽपि सत्यप्रमातृत्वेन कस्तावदिष्यते भवता ? किं संविन्मात्रमुत तदेवोपहितमुतोपाधिभेद एव ? आद्ये व्याहत्यपसिद्धान्तौ । अनन्तरे प्रमातृत्वस्य सत्यतानभ्युपगमान्नेष्टसिद्धिः । तत्र स्वरूपमात्रस्य सत्यता *योगाचारै*रप्यङ्गीक्रियते । उपाधिमात्रपक्षे तु उपाधिस्वरूपस्य तत्प्रमातृत्वस्या-

प्यसत्यत्वमेवेति । नापि चतुर्थः, विकल्पासहत्वात्; तत्र किं प्रमितेः स्वरूपतः सत्यत्वं विवक्षितमुत विषयतः? न पूर्वः, शास्त्रजन्यायाः प्रमितेर्भवता स्वरूपसत्यत्वानभ्युपगमात्। तेन तु तदभ्युपगमेन तदागमस्यैव प्रामाण्यापातः। तुल्यैस्तु तदपि नेष्यत इति त एव भवतोऽत्रान्तरङ्गसंबन्धिनः। नाप्युत्तरः, विषयतः सत्यत्वस्य चिद्व्यतिरिक्तांशे भवता योगाचारेणाप्यनभ्युपगमात्। चिदंशस्य विषयत्वेऽभ्युपगम्यमानेऽपि सत्यत्वमुभयसम्मतम्; तत्र क्षणिकत्व-नित्यत्वादिभेदस्तु दुरुपपादः, निर्धूतसमस्तधर्मविप्लवा हि संविद्भवद्भिस्तैश्च परिगृह्यते। नापि पञ्चमः, आविद्यकस्य वेदस्य भवताऽपि नित्यत्वानभ्युपगमात्; अभ्युपगमे वा नित्यसंसारादिप्रसङ्गात्; क्षणिकत्वनित्यत्वादिकल्पनाभेदस्या-प्यप्रयोजकत्वात्। नापि षष्ठः, अविद्याकल्पितत्वाभ्युपगमेनानादित्वासिद्धेः; अनादित्वेनैवेयं कल्पनेति चेन्न, बाह्यै-रपि सर्वज्ञसन्तानान्तरितधर्मदेशनासन्तानस्य अनादित्वाभ्युपगमात्; क्षणभङ्गतदभावादिकं तु वाक्यार्थयाथार्थ्यं प्रत्य-किञ्चित्करमेव। नापि सप्तमः, तत्पक्षेण तदागमस्य दोषमूलत्वाभावात्; भवत्पक्षेण तूभयोरपि दोषमूलत्वाविशेषात्; वक्तृदोषो वेदे नाभ्युपेत इति चेत्, किं दुष्टेन्द्रियादिषु सोऽभ्युपेतः, येन तदप्रामाण्यं सिद्ध्येत्? अतो येन केनापि दोषेणाप्रामाण्यं स्यादित्यनुसन्धत्स्व। अविद्याख्यदोषमूलत्वमपि वेदस्य नेष्टमिति चेदागतोऽसि पन्थानम्, अत एव कल्पितत्वादेरपि प्रतिक्षेपात्। अकल्पितत्वेऽपि प्रतीतिबाधाभ्यां मिथ्यात्वमिति चेन्न, ब्रह्मणोऽप्यकल्पितस्य त्वदभिमत-युक्त्याभासैर्बाधप्रसङ्गात्; अनिर्वचनीयकुसृतेश्च निरसिष्यमाणत्वात्। नाप्यष्टमः, कारणदोषाविशेषे विसंवादानुदयस्या-किञ्चित्करत्वात्; दोषज्ञानेनैव बाधसिद्धेः; तथा चाहुः—* दुष्टकारणबोधे तु सिद्धेऽपि विषयान्तरे। अर्थात्तुल्या-र्थतां प्राप्य बाधो गोदोहनादिवत्॥ इति। किञ्च बाह्यागमेषु न विसंवादस्त्वया सुवचः, अदृष्टस्यातीन्द्रियत्वेन तत्र तदयोगात्; दृष्टार्थेषु विषहरणाद्युपदेशेषु तत्राप्यविसंवाददर्शनात्; तत्त्वविषये तु प्रत्यक्षादिविसंवादस्य तद्विरोध-गमनिकाकुसृतेश्चोभयतुल्यत्वात्; वेदाधीनस्य संविन्नित्यत्वादिरूपविसंवादस्य वेदप्रामाण्यसिद्धिसमनन्तराभिधेयत्वात्; अन्यथा विपरिवर्तप्रसङ्गात्। एतेन नवमोऽपि दत्तोत्तरः; बहुजनविवक्षायां समानत्वात्; निपुणजनविवक्षायां सर्वेषा-मप्यज्ञानभ्रमादिकलुषितत्वाभ्युपगमेन त्वत्पक्षे तदसिद्धेः; हेतुदर्शनरहितपुरुषपरिग्रहविवक्षायामपि परमार्थतः कारण-दोषे निर्णीते दोषानभिज्ञैः भ्रान्तैरेव परिग्रह इत्यायातम्; ततश्च न विशेषः। नापि दशमः, संज्ञावैषम्यमात्रस्या-किञ्चित्करत्वात्; तद्व्यवहारभेदरूपस्य तु किञ्चित्करस्य प्रस्तुतानुपयोगात्। नाप्येकादशः, तथाविधाभिमानस्य पुरुष-भेदेनोभयत्रापि सुलभत्वात्; न तत्र वयं प्रामाण्यमभिमन्यामह इति चेत्, ते वा किं वेदे? अतो यस्यकस्यचिदभि-मानसिद्धं प्रामाण्यमिति त्वयैव स्थापनीये त्वमेव कथं तत्प्रामाण्यं नाभिमन्यसे?

द्वादशस्तु परिशिष्यते; तत्र स्वात्मशब्देन किं सर्वेषां प्रमातॄणां स्वात्मा विवक्षितः? उत भवदन्तरात्मा? नाद्यः, इक्षुक्षीरादिरसभेदवत् * ज्योतिष्टोमेन स्वर्गकामो यजेत, * चैत्यं वन्देत स्वर्गकाम इत्यनयोः प्रामाण्याप्रामाण्य-लक्षणभेदस्यान्यैरनुपलम्भात्; नेतरः, भवत्स्वात्मानमपि हि वयमितरात्मसमानतयैवोन्नयामः; रत्नतत्त्वपरीक्षकवदह-मतिशयितप्रज्ञ इति चेत्, सौगतेनाप्येवमुक्ते किमुत्तरम्? मध्यस्थदृष्टिरिति चेन्न, तदसिद्धेः; अस्तु वेदप्रामाण्यम-प्यविचारितरमणीयं किं नश्छिन्नमिति चेत्, प्रथमं तावद्वैषम्योपपादनाभिमानः, ततो वैदिकत्वविडम्बनम्, पश्चा-त्तत्त्वानुष्ठानव्यवस्थाभङ्गः, ततश्च स्वर्गापवर्गगमनसरणेः। एवं च सौगतसौहार्दभयपलायितेन द्वैवर्गिकमतमहादुर्गमेवा-नुप्रविष्टमिति। अत्र च प्रामाण्यादेरप्रयोजका एव केचित्कल्पा मन्दमतिसम्मोहशमनायोपन्यस्य निरस्ताः। एतदभि-

प्रायेण यादवप्रकाशैरुक्तम्—* वेदोऽनृतो बुद्धकृतागमोऽनृतः प्रामाण्यमेतस्य च तस्य चानृतम् । बोद्धाऽनृतो बुद्धिफले तथाऽनृते यूयं च बौद्धाश्च समानसंविदः ॥ इति । किंच प्रत्यक्षतोऽनुमानतश्च भवद्भिर्निर्विशेषं प्रसाध्यते, ततश्च प्राप्तार्थतयाऽपि शास्त्राप्रामाण्यम्, द्वित्रावयवानुमानवाक्यपाठमात्रेण ब्रह्मविद्यानिष्पत्तौ कः खलु जडः श्रुतिनिकरशिखरपरिशीलनप्रयासादिकमारभेत ? न ब्रूमस्तर्ह्यनुमानादिकमस्मत्सिद्धान्तसाधनतयेति चेत्, किमिदं श्रुतिप्रामाण्यभङ्गभीरुतया, उतानुमानादेस्तत्र प्रामाण्यायोगात् ? नाद्यः, भवद्भिरनुक्तेऽपि तत्सद्भावमात्रेण श्रुतिप्रामाण्यभङ्गस्य दुर्वारत्वात्; संप्लवोदयस्य च शास्त्रयोन्यधिकरणनिरस्तत्वात् । न द्वितीयः, ज्ञानोदयादेवानुत्पत्तिलक्षणस्याप्रामाण्यस्यासिद्धेः; एककोटिनियततया च संशयरूपस्याप्यभावात्; निपुणतरप्रयोगे च प्रयोगदोषाणामभावात् । विपर्ययलक्षणं तु विषयापहारमन्तरेण न सिद्ध्यतीति । तथा च सति तुल्यविषयतया तत एव शास्त्रमप्यप्रमाणमिति घट्टकुट्यां प्रभातम् । एवं च सति अद्वैतवाक्यानां न तत्त्वावेदकत्वं द्वैतवाक्यानामेव तत्त्वावेदकत्वमित्यभिमतविपर्यासश्च । अन्ततः शास्त्राप्रामाण्यमप्यस्माकमिष्टमेवेति चेन्न, पूर्वन्यायेन दत्तोत्तरत्वात् । असन्दिग्धाविपर्यस्तबोधोदयस्य दुरपह्नवत्वात् । बोध्यमिथ्यात्वे च वैदिकव्यपदेशकञ्चुकं मुञ्चतस्ते बाह्यसमयसुरङ्गाप्रवेशमन्तरेण कथासमरसीम्नि संशयापत्तेः । तदेतदखिलमभिसन्धाय भाष्ये—सन्मात्रग्राहिप्रत्यक्षप्रतिक्षेपाय गृहीतमात्रग्राहित्वेन सन्मात्राभिमतब्रह्मस्वरूपपरवेदान्तवाक्यानामप्रामाण्यप्रसङ्ग उदाहृतः । स्थलान्तरेषु विप्रकीर्णं शेषमवधातव्यमिति ॥

॥ इति शतदूषण्यां वेदप्रामाण्यपरिग्रहानुपपत्तिवादः चतुर्दशः ॥

॥ अथ दृश्यत्वानुमाननिरासवादः पञ्चदशः ॥ १५ ॥

अबाधादध्यक्षप्रभृतिमितिवर्गेष्ववधृतं शरीरं यस्येदं जगदखिलमन्तर्यमयितुः ।
स मे तर्कैरेतैर्निजविभवलुण्टाकमथनैः प्रसीदत्वासीदन्निगमशतसीमा हयमुखः ॥

यदेतत्सन्मात्रग्राहिप्रत्यक्षदूषणान्ते भाष्यम्—* सन्मात्रब्रह्मणः प्रमेयभावश्च, ततो जडत्वनाशित्वादयस्त्वयैवोक्ताः इति । अनेन पश्यतोहराणां दृश्यत्वानुमानस्यानैकान्तिकत्वमपि सूचितम् । उत्तरत्रापि कचित्परमतव्याप्त्या प्रसङ्गं प्रायुङ्क्त—ब्रह्म मिथ्या ज्ञानविषयत्वात् इति । सांख्याधिकरणे च व्याघातमसूचयत्—* दृश्यत्वबाध्यत्वाभ्युपगमात्सुतरामसङ्गतम् इति । योगाचारोक्तसंवेदनहेतुनिरासेन चेदमपि निरस्तं भविष्यतीत्यमंस्त । तदिह वयं विस्तृणीमहे—विगीतं मिथ्या दृश्यत्वात्, यद्यदित्थं तत्तथा, यथा शुक्तिरजतमित्यादि । तत्र किमिदं मिथ्यात्वमभिप्रेतम् ? किं तुच्छत्वम्, उतान्यथाख्यातिविषयत्वम्, उत सदसद्विलक्षणत्वम्, अथ प्रतिपन्नोपाधौ निषेधप्रतियोगित्वरूपं बाध्यत्वम्, अथवा स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वम्, यद्वा सत्यब्रह्मविलक्षणत्वम्, यद्वाऽन्यदेव किंचिदिति । नाद्यः, प्रतीतिविरोधादपसिद्धान्ताच्च । अत एव न द्वितीयः, मिथ्यात्वाध्यासादिविषयतया सिद्धसाधनत्वाच्च; शुक्त्यादिरेव हि रजताद्यात्मनाऽन्यथाख्यातेर्विषय इत्यभ्युपगम्यते; अथारोपितत्वेन विषयत्वमिष्येत, तथाऽपि सिद्धसाधनता, सर्वस्यापि वस्तुनो यत्र कचिद्येनकेनचिदारोप्यमाणत्वात् । न तृतीयः, परं प्रत्यप्रसिद्धविशेषणत्वात्; अर्थापत्तिप्रसिद्धं तदिति चेन्न, तस्याः स्वावसरे दूषयिष्यमाणत्वात् । न चतुर्थः, तद्धि बाध्यत्वं बाध्यमबाध्यं वा ? पूर्वत्र सिद्धसाधन-

त्वम्, तस्य प्रपञ्चसत्यत्वाविरोधित्वात्। उत्तरत्र किं ब्रह्मस्वरूपमुत ततो भिन्नम्? आद्ये सिद्धसाधनत्वम्, ब्रह्मसम्बन्धस्यास्माभिरिष्यमाणत्वात्; बाध्यत्वधर्मयोगो हि प्रपञ्चस्य साध्यते; बाध्यत्वं च ब्रह्मस्वरूपमित्यभिधत्से। द्वितीये तेनैव दृश्यत्वहेतोरनैकान्त्यम्। तेनैव हेतुना तत्सिद्ध्यसिद्ध्योर्नानैकान्त्यमिति चेन्न; तेनैव तत्सिद्धावनैकान्त्यप्रसङ्गः, तदसिद्धौ हेतोरसाधकत्वमिति प्रसङ्गपर्यवसितत्वात्। तेनैव तत्सिद्धौ तत्साधनस्य सतः कथमनैकान्त्यम्? नहि तत्साधकत्वे तदसाधकत्वप्रसङ्ग इत्युन्मत्तोऽपि ब्रूयादिति चेन्न; अभिप्रायानभिज्ञानात्; नहि तत एव तत्सिद्धिमभ्युपगम्यानैकान्त्यं ब्रूमः, अपि त्वबाधिते बाध्यत्वे दृश्यत्वहेतुर्वर्तत इति भवताऽभ्युपगतत्वेन तथाऽभ्युपगमेऽन्यतरानैकान्त्यप्रसङ्ग इति। तर्हि तत्र दृश्यत्वहेतुर्न वर्तत इत्यभ्युपगम्यानैकान्त्यं परिहरिष्याम इति चेत्तदा दृश्यत्वानुमानेन तत्साधनं न शक्यते, तज्जनितज्ञानविषयत्वे तस्य दृश्यत्वावश्यम्भावात्, अतोऽनुमानमेव परित्यज्यानैकान्त्यं परिहर्तुमर्हसि। ननु बाधितस्याबाधितस्य च साधारणं बाध्यत्वमात्रं साध्यत इति चेन्न; तथाऽपि सिद्धसाधनत्वस्य दुष्परिहरत्वात्; बाधितबाध्यत्वमभ्युपगच्छतः साधारणाकारस्याभ्युपगमात्; पक्षधर्मताबलादस्मदभिमतविशेषलाभ इति चेन्न, तस्यास्तद्विरुद्धत्वात्। अविरोधेऽपि पूर्वोक्तानैकान्त्यस्य स्थितत्वात्। न पञ्चमः, प्रत्यक्षाद्यैस्तद्विषयकैस्तदभावग्रहासंभवात्। श्रुतीनामपि निषेधिकानामन्यत्र व्यवस्थापनात्। अत एव योग्यानुपलम्भनिराकृतसद्भावस्य तदभावस्यानुमानेन साधयितुमशक्यत्वात्। कृत्स्नप्रत्यक्षोपरोधे च निर्मूलतयाऽनुमानप्रामाण्यस्यैवासंभवात्। तदभ्युपगमे च स्वोक्तिविरोधात्, परसिद्धान्तस्थिरीकरणाच्च। अप्रमाणेन साधितस्यापि सत्यत्वेऽसदुक्तिमात्रेणापि तद्दूषणस्य दुर्वारत्वात्। नापि षष्ठः, सिद्धसाधनादेव। सर्वं ब्रह्मात्मकमिति भास्करादिभिरिव त्वयाऽपीष्यत इति चेन्न; तदपृथक्सिद्धिमात्रेणास्माभिस्तदुक्तेः। तथाऽपि सत्यभूतब्रह्मव्यतिरेकसाधनादसत्यत्वं फलतीति चेन्न; स्वयमपि सत्यस्य सत्यान्तरव्यतिरेकमात्रेणासत्यत्वप्रसङ्गाभावात्, स्वयं घटस्य घटान्तरव्यतिरेकेऽपि न ह्यघटत्वम्। ब्रह्मैकमेव सत्यमिति सिद्धे तद्व्यतिरेकसाधनेनैवासत्यत्वं सिद्ध्यतीति चेन्न; आत्माश्रयप्रसङ्गात्, अवधारणेन हि प्रपञ्चासत्यत्वं विवक्षितम्, तत एव च तत्सिद्धिरिति। श्रुतिसिद्धब्रह्ममात्रसत्यत्वोपजीवने अनुमाननैरर्थक्यप्रसङ्गः, अन्ततः श्रुतेरेव पुरस्करणीयत्वात्, तस्याश्च निरपेक्षत्वात्। विप्रतिपन्नं प्रत्यनुमानं सप्रयोजनमिति चेन्न; श्रुतिप्रामाण्यमनिच्छतस्तदुपजीवनासंभवात्, इच्छतस्तस्यैव तत्सिद्धेः। श्रुतेश्च प्रत्यक्षाद्यविरोधिविषयत्वे सिद्धे सा कथं प्रत्यक्षादिबाधकानुमानस्योपजीव्या? ननु सत्यमिति केनचित्सामान्यतो निश्चित्य तद्व्यतिरेकस्साध्यत इति चेन्न; प्रत्यक्षादिभिस्तन्निश्चये प्रपञ्चस्यैव सत्यतया तस्य तद्व्यतिरेकसाधनायोगात्। ततश्च शास्त्रनिश्चितसत्यव्यतिरेकसाधनेऽपि तस्य सत्यान्तरत्वमात्रं सिध्येत्। सत्यत्वात्यन्ताभावः साध्य इति पक्षेऽप्येवमेव दोषो ग्राह्यः। नापि सप्तमः, तत्किं लोकतः शुक्तिरजतादिषु विधातुमापणिकरजतादिषु निषेद्धुं च शक्यम्, किंचिदथाशक्यमिति; न प्रथमः, प्रत्यक्षादिभिर्बाधस्य दुर्निवारत्वात्। न द्वितीयः, तस्याप्रसिद्धत्वात्। तथाविधस्य कस्यचिदन्यस्य साधने तेनाप्युपहितस्य प्रपञ्चस्याक्षतत्वेनानिष्टाभावात्। एवं प्रत्यक्षबाधे निरूपिते सत्यर्थापत्त्यभावयोः पृथक्प्रामाण्यमिच्छतां ताभ्यामपि बाधः सिद्धः। अबाध्यत्वलक्षणव्यवहाराविसंवादान्यथानुपपत्त्या सत्यत्वसिद्धिः। अभावोऽपि प्रपञ्चस्य बाध्यत्वाभावाख्यं सत्यत्वं प्रकाशयन् मिथ्यात्वानुमानं बाधत एव। नचात्र योग्यानुपलब्धिर्नास्तीति वाच्यम्, योग्यत्वस्योपपादितत्वात्। न हि लोकसिद्धमिथ्यात्वादन्यत् किमप्ययोग्यं मिथ्यात्वमस्ति। नचानयोः श्रुतिबाधः, तदान्यपर्यस्थापनात्।

ननु सत्यत्वे सिद्धे बाधः, तदेव न किञ्चित्पश्यामः ; किं सत्तासामान्यम्? उत स्वरूपसत्त्वम्? अथवा भावत्वम्? यद्वा प्रामाणिकत्वमात्रम्; अथवा किञ्चिदिति। नाद्यः, सामान्यमनिच्छतस्तदयोगात्, इच्छतोऽपि सामान्यादिषु मिथ्यात्वसाधनस्य निरुपद्रवत्वप्रसङ्गात्। न द्वितीयः, तत्रापि किं स्वरूपमेव सत्त्वम्? उत स्वरूपस्य सत्त्वम्? पूर्वत्र मिथ्याभूतस्यापि स्वरूपं स्वरूपमेवेति न किञ्चिद्व्यतिरिक्तं भवति। निस्स्वरूपं तदिति चेन्न; तेनैव रूपेण तत्स्वरूपनिर्णयात्, अन्यथा प्रातिस्विकवस्त्वन्तरस्वरूपाभावे सर्वेषां निःस्वरूपत्वप्रसङ्गात्। उत्तरत्र तत्सत्त्वस्य सत्त्वान्तराभावे मिथ्यात्वं दुर्वारम्, ततश्च विश्वमिथ्यात्वम्। न तृतीयः, अभावस्य मिथ्यात्वप्रसङ्गात्। इष्टमिदमिति चेन्न; अविशेषाद्भावस्यापि तत्प्रसङ्गात्। भावान्तराभाववादे तु भावानामेवाभावत्वात् तत्प्रसङ्गः। न चतुर्थः, दृश्यत्वानुमानमपोद्य तदसिद्धेः। न पञ्चमः, तस्य सर्वत्र प्रमाणबाध्यत्वे शशविषाणवदसिद्धेः। योग्यत्वेऽनुपलम्भबाधादिति। तदेतदसारम्; प्रामाणिकत्वमेव हि सर्वत्र सत्त्वमभ्युपगच्छामः। तदुक्तं भाष्ये—* व्यवहारयोग्यता सत्त्वमिति। न चैतद्बाधकानुमाने जीवति न सिद्ध्यतीति वाच्यम्, कालात्ययापदेशस्य निर्मूलत्वप्रसङ्गात्; यथा वह्न्यनुष्णत्वानुमानं प्रतियोगिभूतोष्णत्वग्राहिणा बाध्यते, तथेहापि सत्यत्वव्यतिरेकानुमानं प्रतियोगिविशेषसत्यत्वग्राहिणा बाध्यते। नच तन्न गृह्यत इति वाच्यम्, तद्व्यतिरेकासिद्धिप्रसङ्गात्। ब्रह्मणि तद्ग्रहाद्व्यतिरेकसिद्धिरिति चेन्न; ब्रह्मण्यपि सत्त्वस्य त्वदुक्तयुक्तिभिः खण्डनात्। तत्राखण्डितत्वे तदेव विश्वस्यापि सत्त्वमिति पश्य। स्वतस्सदेव ब्रह्मेति चेत्, किमहेतुकत्वं विवक्षितम्? उत स्वयंप्रकाशत्वम्? यद्वा सत्त्वाभावेऽपि सदिति? पूर्वत्र ब्रह्मव्यतिरेकात्प्रपञ्चस्य कार्यत्वमेव साधितं स्यात्। ततश्चांशतस्सिद्धसाध्यता। द्वितीयेऽपि परप्रकाश्यत्वसाधनात्स एव दोषः। तृतीये तु प्रपञ्चस्यापि तद्वत्सत्त्वे को विरोधः? एतेन सत्त्वस्य सत्त्वान्तराभावादसत्त्वप्रसङ्गोऽपि प्रत्युक्तः। अतस्सत्त्वमात्रप्रतिक्षेपे शून्यवादावतारः। क्वचित्तदभ्युपगमे प्रामाणिकेषु सर्वेषु तत्सिद्धिरनिवार्येति।

नचैवं मिथ्यात्वासत्त्वादौ तस्य सामान्यतोऽस्माभिरप्रतिक्षेपात् सत्यस्यैव हि रजतत्वादेः स्वात्यन्ताभावाश्रयनिष्ठतया प्रतीयमानत्ववेषेण मिथ्यात्वम्, तत्तन्निष्ठात्यन्ताभावप्रतियोगित्वमेव तस्यासत्त्वमिति यथालोकमभ्युपगमात्। किंच य एष विश्वं विचारसहमलीकमनिर्वचनीयं चेत्यादिरूपं व्याहतप्रतिज्ञानमाद्रियते, स किं स्वपक्षं किंचित् स्थापयति न वा? स्थापनेऽपि प्रमाणतोऽप्रमाणतोऽपि वा? नेति पक्षे परपक्षं दूषयतोऽयमेव विकल्पः। तत्र प्रमाणत इति पक्षे तत्प्रमाणं तथात्वेन विचारसहं न वा? पूर्वत्र कथं विश्वमिथ्यात्वम्? तस्यापि तदन्तर्भावात्; उत्तरत्र कथं तत्प्रमाणम्? प्रमाणताभ्रमेणेति चेत्तथाऽपि किं तेन? अन्यथा हेत्वाभासानामप्रतिक्षेपे सर्वसमयसाम्राज्यप्रसङ्गात्। लोकव्यवहारसिद्धमिति चेन्न; तस्य सपरिकरस्य परिग्रहे लोकस्थिरीकरणात्। प्रमाणान्तराविरोधादेश्च तत्परिकरत्वात्, अन्यथा लोकतोऽप्यसिद्धेः। त्रिचतुरकक्ष्याविमर्शावस्थापितमिति चेन्न; तथैव विश्वानुग्राहकप्रमाणानामप्यवस्थापनात्। तत्तद्विमर्शबाधस्य विश्वद्वेषिण्यपि निवारकाभावात्। तस्य तु प्रथमकक्ष्यायामेव स्फुटप्रतीतिव्याघातादिभिर्विलय इति विशेष इति। नचापच्छेदनिमित्तनैमित्तिकशास्त्रयोः प्रामाण्यविशेष इव अप्रामाण्यविशेषेऽपि परत्वात्प्राबल्यम्; न मिथ्येत्यस्मदुक्तेस्ततोऽपि परत्वात्। अविश्रमस्तर्हीति चेन्न; स्वदोषस्य परत्रारोपात्। परत्वमात्रेण प्राबल्यं ब्रुवतस्तवैवासौ दोषः। किंच यद्यप्रमाणं परं स्वविषयं नावस्थापयेत्, कथं प्रबलम्? स्थापयतो वा कथमप्रामाण्यम्? ननु प्रमाणत्वे कथं बाध्यत्वं तस्मिन्वा कथं तदित्यपच्छेदेऽपि प्रसज्यत इति चेन्न; अनियतविरोधपौर्वापर्यतयाऽन्यतरोदयसंभावनया च प्रयो-

गान्तरेषु प्रामाण्योपपत्तेः । किंच त्वदुक्तप्रमाणस्यापि दुष्टकारणप्रसूतत्वं त्वयैवाभ्युपगम्यत इति अदोषप्रसूतस्यापि न प्राबल्यदौर्बल्यविभागः । अन्यथा माध्यमिकयुक्तीनां सर्वसिद्धान्तजीवितास्वादिनीनां सर्वतः परत्वेन प्राबल्यप्रसङ्गात् । तदेवं सिद्धं न कथंचिदपि विश्वमिथ्यात्वप्रतिज्ञानं शक्यमिति ।

दृश्यत्वं च किमभिप्रेतम्? किं चाक्षुषत्वम्? यद्वा ज्ञानविषयत्वमात्रम्? उत दृग्व्यतिरिक्तत्वम्? अथवाऽन्यत्किंचिदिति? नाद्यः, भागासिद्धत्वात् । अत एव न द्वितीयः, व्यर्थविशेषणत्वाच्च । ब्रह्मव्यवच्छेदार्थं विशेषणं सार्थकमिति चेन्न; तस्य ज्ञानविषयत्वानभ्युपगमात् । अभ्युपगमे वा योगिप्रत्यक्षादिविषयतया सन्मात्रग्राहिप्रत्यक्षवर्णनाच्च हेतोस्तत्र वृत्तेः । नच तृतीयः, अनैकान्तिकत्वादेव । ज्ञानविषयत्वमात्रमपि ब्रह्मणो नास्तीति चेन्न; *आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, *ब्रह्म वेद ब्रह्मैव भवति, *अथातो ब्रह्मजिज्ञासेत्यादिस्वपराभ्युपगतश्रुतिसूत्रादिविरोधात्, सन्मात्रग्राहि प्रत्यक्षमिति वादस्यापि प्रहाणप्रसङ्गाच्च । व्यावहारिकं ब्रह्मणो दृश्यत्वं न तु पारमार्थिकमिति चेत्, हन्त किं प्रपञ्चदृश्यत्वं पारमार्थिकम्? येन तस्मिन् मिथ्यात्वं सिद्ध्येत् । तथा च सति पारमार्थिकं दृश्यत्वं तत एव दृश्यमपारमार्थिकमिति भ्रान्तजल्पितायेत । अतः प्रपञ्चस्यापि व्यावहारिकदृश्यत्वमभ्युपेयम्; तच्च ब्रह्मणोऽप्यविशिष्टमिति तस्यापि मिथ्यात्वप्रसङ्गस्याविशेषेऽपि सत्यत्वे प्रपञ्चस्यापि सत्यत्वप्रसङ्गः । यदि च व्यावहारिकमपि दृश्यत्वं ब्रह्मणो नास्तीत्युच्येत, तदा ब्रह्मविज्ञानान्मोक्ष इति वेदान्तसिद्धान्तविरोधश्च । किंच ब्रह्मणो दृश्यत्वं नास्तीत्यत्र ब्रह्मशब्दः किं कस्यचिदप्यबोधकः? उताब्रह्मबोधकः? अथवा ब्रह्मबोधक इति? नाद्यः, ब्रह्मशब्दप्रयोगनैरर्थक्यप्रसङ्गात् । न द्वितीयः, अब्रह्मणस्तेनाभिधाने तस्यैव दृश्यत्वनिषेधात्, ततः प्रपञ्चे हेतोरसिद्धेश्च । न तृतीयः, ब्रह्मणो दृश्यत्वस्य दुस्त्यजत्वात् । स्वयंप्रकाशस्य ब्रह्मणो यथाकथंचिल्लक्षणया ब्रह्मशब्देन प्रतिपादनमिति चेत्, तथाऽपि लक्षणया वृत्त्या शब्दजन्यप्रतीतिविषयत्वं सिद्धम्, तावतैव दृश्यत्वमवर्जनीयम् । ब्रह्मशब्देन ब्रह्मणो लक्षणा चानुपपन्नेत्यादावेवोक्तम् । एतेन सर्वशब्दागोचरत्वं ब्रह्मणो वदन् प्रत्युक्तः; ब्रह्म न शब्दप्रतिपाद्यमित्यत्र पूर्ववद्विकल्पदूषणयोरवर्जनीयत्वात् । *यतो वाचो निवर्तन्त इत्यत्रापि यच्छब्देन ब्रह्मानुवादोऽवर्जनीयः । उपहितमनूद्यत इति चेत्तथाऽपि ज्ञानविषयत्वं सिद्धम् । उपहितानुवादेनानुपहिते तन्निषेधश्चाशक्यः । एवमनुभूतिः स्वयंप्रकाशेत्यादिभिरवेद्यत्वप्रतिपादनमपि तन्निराससमये निरस्तं द्रष्टव्यम् । न चतुर्थः, पारमार्थिकव्यतिरेकस्य शुक्तिकारजतादौ प्रपञ्चेऽप्यनभ्युपगमेन साधनविकलत्वासिद्ध्यादिदोषात् । अपारमार्थिकव्यतिरेकस्य ब्रह्मण्यपि विद्यमानत्वेनानैकान्त्यादेव । अत एव प्रातिभासिकव्यतिरेकपक्षोऽपि निरस्तः । किंच घटोऽस्ति पटोऽस्तीत्यादिषु सत्त्वमनुभूतिविषयतयैव प्रतिभासते ॥

॥ इति शतदूषण्यां दृश्यत्वानुमाननिरासवादः पञ्चदशः ॥ १५ ॥

॥ अथ व्यावर्तमानत्वानुमानभङ्गवादः षोडशः ॥ १६ ॥

विश्वं व्यावर्तमानत्वान्निवर्तयितुमिच्छतः । निवर्तयामः कुमतीन् कथसंग्रामसीमतः ॥

यथा घटादयोऽपरमार्थाः, व्यावर्तमानत्वात्; यदुक्तसाधनं तदुक्तसाध्यम्, यथा रज्ज्वाद्यधिष्ठानसर्पभूदलनाम्बुधारादि; यत्सन्न तद्व्यावर्तते, यथा सर्पाद्यधिष्ठानभूता रज्जुः; यद्वा सर्वाधिष्ठानं ब्रह्म; यदि व्यावर्तमानस्यापि सत्त्वं, तदा सत्यमिथ्यार्थविभागाभावप्रसङ्ग इति तर्कानुग्रहः—इति । तत्र किमिदं व्यावर्तमानत्वम्? किं यतःकुत-

श्चिदन्यत्वम्? अथ यत्र कुत्रचिद्देशादावसत्त्वम्? यद्वा प्रध्वंसवत्त्वम्? उत प्रतिपन्नोपाधौ निषेधप्रतियोगित्वम्? किं वा कदाचित्कचिदेव प्रकाशमानत्वम्? अन्यद्वा किंचित्?

नाद्यः, युष्मदर्थादन्येन ब्रह्मणैवानैकान्त्यात्। युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्ध-स्वभावयोरितरेतरभावानुपपत्तिर्भवतां भाष्यारम्भे भाषिता। यदि ब्रह्मणस्तदन्यत्वं मिथ्या, तर्हि परमार्थतस्तयोरैक्य-प्रसक्तिः, यथा घटस्य स्वरूपादन्यत्वे मिथ्याभूते तदैक्यम्। ततश्च मिथ्याभूतप्रपञ्चैक्याद्ब्रह्मणोऽपि मिथ्यात्वं सत्य-ब्रह्मतादात्म्यात्तस्यापि सत्यत्वं वा स्यात्। किंच ब्रह्मनिष्ठमन्यत्वं मिथ्याभूतमिति वदता किं प्रपञ्चनिष्ठमन्यत्वं सत्यमभि-मतम्? तर्हि तेनैवान्यत्वेन परमार्थतो ब्रह्मणोऽन्येनानैकान्तिकत्वसद्वितीयत्वापसिद्धान्ताः। यदि तन्मिथ्या, तथाविधान्य-त्वस्य ब्रह्मण्यपि त्वयैवाभ्युपगमाद्दुस्तरमनैकान्त्यम्। न द्वितीयः, तस्य मिथ्यात्वं प्रत्यप्रयोजकत्वात्। न हि शुक्तिरजतादे-र्देशान्तरादावभावान्मिथ्यात्वम्, अपि तर्हि प्रतिपन्नदेशादावभावात्। अन्यथा येनाप्याकारेणासत्त्वात् ब्रह्मणोऽपि मिथ्या-त्वं स्यात्। न हि ब्रह्मासद्रूपेण वा सदसद्विलक्षणरूपेण वा सदिति भवन्तोऽप्यभ्युपगच्छन्ति। अथ यत्र देशे काले वा तदभावस्तत्रैव मिथ्यात्वं साध्यम्, तदा सिद्धसाधनम्। न हि वयं काचित्कस्य कादाचित्कस्य च सर्वत्र सर्वदा सत्त्वं ब्रूमः। तथा सत्यापणस्थरजतस्य सर्वदेशवृत्तिकत्वाविरोधे [न] शुक्तिरूप्यादेरपि सत्यत्वापातात्; कार्यकारणभाव-विलोपप्रसङ्गाच्च। न तृतीयः, दृष्टान्तस्य साधनविकलत्वात्। न ह्यध्यस्तं सर्पादिकं बाधदशायामपि प्रध्वस्तमिति कश्चि-द्वदति, बाधविनाशयोर्विविक्ततयैव व्युत्पत्तेः। प्रतिपन्नस्य नेति निषेधो बाधः। विनाशस्तु लब्धसत्ताकस्य स्वरूप-प्रच्युतिः। दण्डादिना निहतेषु सत्येषु हि सर्पादिषु प्रध्वस्तबुद्धिः। तत एव चेदं प्रध्वंसप्रतियोगित्वं देशकालसत्य-त्वेन व्याप्तमुपलब्धमिति विपरीतसाधकत्वम्। नापि चतुर्थः, असिद्धेः। नहि स्वदेशादौ घटादयो न सन्तीति बाध्यन्ते। नेदं रजतमितिवन्नायं घट इत्यादिस्वारसिकबाधादर्शनात्। ननु सर्वानुवृत्तस्य सत एव सर्ववस्तुदेश [शि] त्वेनावभासा-त्तत्रैव चास्ति पट इति पटादिविधौ तद्विरोधिघटादेर्निवृत्तिदर्शनान्मिथ्यात्वं स्यादिति चेत्, मैवम्; सतोऽत्र पटादि-स्वरूपस्य देशत्वाभावात्, अननुवृत्तेश्च। घटोऽस्ति पटोऽस्तीत्यादिप्रतीतौ सत्त्वं घटादिधर्मत्वेनैव प्रतीयते, नतु घटादी-नामाश्रयत्वेन, घटश्चलति पटश्चलति घटो महान् पटो महानित्यादिषु क्रियागुणादिवत्। अतोऽनुवृत्तत्वात्सतो देशत्व-मित्यपि निरस्तम्। ब्रह्म तु सर्वानुवृत्तं सदपि न घटोऽस्ति पटोऽस्तीत्यादिधीविषयः। न पञ्चमः, अप्रयोजकत्वात्, यत्र कुत्र [क] चित्प्रमितत्वमात्रेणैव सत्यत्वसिद्धेः। कालान्तरादौ प्रकाशानुत्पत्तेस्तत्सामग्र्यभावप्रयुक्तत्वात्। नचाप्रकाश-मानत्वेन विरुद्धत्वात्प्रमितत्वमेवात्र नास्तीति वक्तुं युक्तम्, देशकालादिभेदेन विरोधपरिहारात्। अन्यथा विपरिवर्तस्यापि दुर्वारत्वात्। यदि च यथाकथञ्चिदप्रकाश [मानत्वा] नान्मिथ्यात्वम्, तदा ब्रह्मणोऽपि तत्प्रसङ्गः, तस्याप्यामोक्षादविद्या-वशेनाप्रकाशमानत्वस्य भवद्भिरेव स्वीकारात्। अन्यथा कथमप्रकाशितार्थप्रकाशकत्वादित्यस्य भवदुन्नीतभावरूपाज्ञानानु-मानहेतोरत्र सिद्धिः? कथंच ब्रह्माज्ञानसाधनं तिरोधानवाचोयुक्तिश्च? तिरोहितस्वरूपस्यापि तस्य सर्वदा कथञ्चित्प्रकाश-मानत्वमप्यस्तीति चेत्; त[द्व]द्घटादेरप्यस्तीति न कश्चिद्भेदः। स्वकालावच्छिन्नस्य तत्प्रकाशस्य कालान्तरेऽप्यनपायात् घटादिप्रकाशस्य कादाचित्कत्वादस्ति भेद इति चेन्न; * नित्यो नित्यानामित्यादिशास्त्रसिद्धनित्येश्वरबुद्धिविषयत्वेन घटा-देरपि नित्यं प्रकाशमानत्वात्, भ्रान्तबुद्धिविषयतया शुक्तिरजतादेश्च। वयं तु तथा न जानीम इति चेन्न; अस्माभिरपि तथाऽङ्गीकारात्। [शास्त्रेण तथा ज्ञायमानत्वात्।] अस्माकं नित्यं घटादिप्रकाशो नास्तीति विवक्षितमिति चेत्; तुल्यम्।

न ह्यसदर्थनिष्ठो ब्रह्मप्रकाशो नित्य इति त्वयाऽपि स्वीकृतम् । नित्यस्तु ब्रह्मप्रकाशो नासत्प्रतिसम्बन्धिकः । किंच किं प्रकाशस्य नित्यत्वं वस्तुसत्यत्वव्यवस्थापकम्? उताबाधितत्वम्? आद्ये निर्दोषत्वादिमात्रेणैव प्रामाण्यसिद्धौ तन्नित्यत्वस्य प्रामाण्यं प्रत्यनङ्गता। दोषे सति च प्रकाशानुवृत्तेर [प्रयोजकत्वम् ।] किंचित्करत्वम् । द्वितीये तु कादाचित्कस्यापि घटादिप्रकाशस्य तदस्तीति घटादिसत्यत्वमकामेनापि स्वीकार्यम् । ततश्च—व्यावृत्तिरनुवृत्तिर्वा न मिथ्यात्वादिसाधिका । न बाधो जगतोऽध्यक्षाद्ब्रह्मणोऽप्यस्ति यौक्तिकः ॥ अयमत्र विभागः—

बाधश्शुक्त्यादिधीरत्र व्यावृत्तिर्भ्रमसंशयः । मिथ्यात्वं रजताद्यर्थस्वरूपाभाव उच्यते ॥

नापि षष्ठः, तस्य बाधपर्यायस्य तत्फलभूतभ्रान्तिविषयत्वनिवृत्तिलक्षणस्य वाऽनुपलम्भादिनिरस्तत्वात् । इतरस्य त्वप्रयोजकत्वात् । व्यतिरेकासिद्धिश्च बहुधा द्रष्टव्या । यन्न मिथ्या तन्न व्यावर्तत इति हि व्यतिरेकः । ब्रह्म तु न मिथ्या, सर्वतो व्यावर्तते, सर्वान्यत्वात्, सर्वत्र स्वयमवर्तमानत्वाच्च । एवमनुवृत्त्यनुमानेऽपि द्रष्टव्यम् । एतेन व्यावर्तमानत्वविकल्पदूषणन्यायेन भिन्नत्वात्, क्वाचित्कत्वात्, बाध्यत्वात्, जडत्वात्—इत्यादिप्रपञ्चमिथ्यात्वहेतुजालं सनूलोन्मूलितमिति तेषूदासि भाष्यकारैः । तर्कश्च [मन्दः] दुष्टः, बा[ध्या]धाबाधादिभिरेव सत्यमिथ्यार्थविभागसिद्धेरिति ॥

॥ इति शतदूषण्यां व्यावर्तमानत्वानुमानभङ्गवादः षोडशः ॥ १६ ॥

॥ अथ दृश्यसम्बन्धानुपपत्तिपरिहारवादः सप्तदशः ॥ १७ ॥

बिभ्राणमात्मनि सदा महतीं विभूतिं देहेन तन्मयनिदर्शितभूषणास्त्रम् ।
आलिङ्गितं कमलया मम चित्तवृत्तेरालम्बनं भवतु दैवतमद्वितीयम् ॥

यत्तु— आत्मख्यातिवादिभिरार्जितं ग्राह्यलक्षणायोगाख्यं तर्कं भिक्षित्वा दृग्दृश्ययोस्सम्बन्धानुपपत्तिरिति नामान्तरेण पठन्ति ; तदपि सम्बन्धस्याबाधितप्रत्यक्षसिद्धत्वादेव निरस्तम् । आहुश्च—* उक्तं तु सौगतैर्ग्राह्यलक्षणाभावलक्षणम् । अन्ये दृग्दृश्यसम्बन्धाभावमाहुर्निरासि तत् ॥ इति । ननु कोऽसौ सम्बन्धः? न तावत्संयोगः, दृशेरद्रव्यत्वात् । द्रव्यत्वाभ्युपगमेऽपि गुणादिभिस्सह तत्सम्बन्धस्य संयोगत्वायोगात् । नापि समवायः, आत्मधर्मस्य ज्ञानस्यार्थे तदयोगात् । न चार्थानामेव ज्ञाने समवायः, तेषां बाह्यत्वात्; अतद्धर्मतयैव प्रतीयमानत्वाच्च । न च रूपरसयोरिवैकार्थसमवायः, उभयाश्रयैकस्यानुपलम्भादिनिरस्तत्वात् । नाप्येकान्तःकरणसंक्रमः, निर्विकारायाश्चित्तेस्संक्रमाख्यपरिणामायोगात् । विवर्तपक्षे तु दृग्दृश्यसम्बन्धस्य मिथ्यात्वावश्यंभावात् । न त्व[चा]र्थस्याप्यन्तःकरणे संक्रमः, बहिरेवोपलभ्यमानत्वात् । अन्तःकरणस्य विषयस[स्व]रूपवृत्तियोगो विषयसंक्रान्तिरिति व्यपदिश्यत इति चेन्न; विषयविधर्मिण्या वृत्तेर्विषयसारूप्यस्यानुपलम्भनिरस्तत्वात् । गौरिति ज्ञानं गौरित्यर्थ इत्यर्थसारूप्यं प्रत्यक्षसिद्धमिति चेन्न ; तयोः पृथगर्थत्वात् । गोत्वविशिष्टमर्थं प्रकाशयज्ज्ञानं गौरिति ज्ञानमिति व्यपदिश्यते । गोत्वविशिष्टार्थस्तु गौरित्यर्थ इति । अन्यथा गौरिति शब्द इत्यत्रापि शब्दस्यार्थसारूप्यप्रसङ्गात् । तथा चेदमर्थसारूप्यवादिनो वेतालस्य वैरूप्यायैव जायते । विषयोपरागापरनामकसंभिन्नवृत्तिमदन्तःकरणभेदाग्रहजनितातात्त्विकधर्मयोगाभिमान एवोपलब्धिनामा चितेर्विषयसम्बन्ध इति चेन्न; प्रत्येकं सार्वत्रिकाणां चैतन्यस्वरूपाणामनन्तान्तःकरणसन्निधानाभ्युपगमेन पुरुषबहुत्वस्थापकभोगपति-

नियमादिभङ्गप्रसङ्गात्। नच प्रत्यात्मसमवेतमदृष्टादिकं नियामकं किमपि तैरिष्यते, अन्तःकरण[गत]स्य तु साधारण्यं दुष्परिहरम्, अनादिसामग्रीस्वभावादेव कश्चिद्भोगप्रवाहः कंचित्प्रति भवतीति चेन्न; पूर्वपूर्वसामग्र्या अपि सर्वसम्बन्धित्वेन साधारण्ये तदधीनोत्तरनियमासिद्धेः। नच तादात्म्यं दृशोर्दृश्यसम्बन्धः, जडत्वाजडत्वादिविरुद्धधर्मप्रतिहतत्वात्। एकस्याश्च संविदोऽनेकविषयत्वदर्शनेन परस्परविरुद्धानेकतादात्म्ये तेषामपि मिथस्तादात्म्यप्रसङ्गात्। ततश्च विरोध एव जगति न स्यात्। इदं सर्वमिति सर्वावलम्बिबुद्धितादात्म्येनान्ततस्सर्वैक्यप्रसङ्गेन विचित्रव्यवहारविलयप्रसङ्गात्। तथा च पुनरेकस्याप्यर्थस्य नर्तकीभ्रूलतादर्शनादिष्विवैकविषयसंविदैक्यप्रसङ्गेनास्मदिष्टापाताच्च। न च चित्राद्वैतम्, स्ववचनविरोधात्, नानात्वं चित्रत्वं तत्प्रतिषेधस्त्वद्वैतमिति। चित्ररूपं तु नानारब्ध[मितिस्थ]मेकमिति न विरोध इति निर्वहन्ति। एवं चित्ररसादिष्वपि। नानारूपसमुदाय एव वा। नचात्रारम्भस्समुदायो वा, अनभ्युपगमात्। नच चित्रत्वं मिथ्या, अस्मन्मतप्रसङ्गात्। निराकारमपि ज्ञानं वासनावैचित्र्यादेकाकारमनेकाकारमिव भातीति चेत्; तथाऽपि मिथ्याभूतस्याकारस्य सत्यज्ञानेन तादात्म्यमनुपपन्नमिति ज्ञानाकारस्य बाह्यत्वमेष्टव्यम्। तथाऽपि ज्ञान एवायमाकाराध्यास इत्यान्तरत्वमिति चेन्न; एतावदात्मख्यातेरस्माभिरर्पीप्यमाणत्वात्। नच स्वजन्यज्ञाने स्वाकारसमर्पकत्वमेव ग्राह्यत्वम्। अन्याकारस्यान्यत्र समर्पयितुमशक्यत्वात्। मृगमदवासनासंक्रमेऽपि हि द्रव्यसंक्रम एव। अनेनैव न्यायेन *यस्मिन्नेव हि सन्तान इत्यादिकमपि निरस्तम्। कार्पासरक्ततादिषु पाकजगुणान्तरारम्भः। कथंच विनश्यताऽर्थेनानुत्पन्ने ज्ञाने स्वाकारसमर्पणम्? न चाकारः स्थिरस्त्वयेष्यते, येनाकारिण्यतीतेऽपि परस्मिन्वर्तेत। ततस्वरूपमिथ्याकारयोगएव तत्संक्रम इत्युच्यत इति चेन्न; मिथ्याकारेण सह सत्यस्य सम्बन्धायोगात्। एवमालम्बनस्य स्वाकारसमर्पकत्वायोगात्तद्धेतुत्वमात्रेण ग्राह्यत्वेऽधिपतिप्रभृतीनामपि ग्राह्यत्वप्रसङ्गः। नच ज्ञानस्वरूपमेवार्थस्य तत्सम्बन्धः। सम्बन्धसम्बन्धित्वलक्षणविरुद्धधर्माध्यासप्रसङ्गात्, विषयविशेषनियामकाभावाच्च। न हि तत्कंचित्प्रत्यज्ञानमस्वरूपं वा। न हि नीलं कंचित्प्रत्यनीलम्। नच हेतुत्वमात्रमेव नियामकम्, इन्द्रियादेरपि विषयत्वप्रसङ्गात्; अतीतादेरविषयत्वप्रसङ्गाच्च। अदृष्टादिवशात्कर्मकारकं विषय इति चेन्न; नित्यतया कारकशून्यस्येश्वरज्ञानस्य निर्विषयत्वप्रसङ्गात्, अस्मदादिज्ञानस्याप्यतीतानागतेरसत्त्वादकारकैरसम्बन्धप्रसङ्गात्, भ्रान्तिविषयस्यासत्त्वादकारकत्वेन भ्रान्तेर्नित्यनिर्विषयत्वप्रसङ्गाच्च। मुक्तस्य च विधूतपुण्यपापस्याज्ञानमिच्छतोऽदृष्टादेर्नियामकस्यासम्भवात्। नचार्थगतप्राकट्यजननमेवार्थसंबन्ध इति युक्तम्; ज्ञानातिरिक्तस्यार्थप्रकाशस्यानुपलम्भादिबाधात्, तज्जनने च ज्ञानस्यार्थसम्बन्धान्तरमन्तरेणासामर्थ्यात्, अन्यथाऽन्यत्रापि तदारम्भप्रसङ्गात्, अतीतादिषु निराधारप्राकट्यजननायोगाच्च। नच विषयविषयिभावाख्योऽयमपरस्सम्बन्धः, तस्यापि नियामकान्तराभावे सार्वत्रिकत्वप्रसङ्गाच्च। तस्यापि द्रव्यादिषट्कान्तर्भावे सामान्यादिभिस्सह तत्संवेदनस्यासम्बन्धप्रसङ्गात्; बहिर्भावे त्वभावत्वादिप्रसङ्गात्। भूषणकारव्यतिरिक्तानामपसिद्धान्तापाताच्च।

एवं प्रकारान्तरेष्वपि दूषणमविनाभूतम्। सर्वथाऽप्यतीतानागतयोर्वर्तमानज्ञानसम्बन्धस्य दुर्निर्वहत्वात्। नहि निराधारस्सम्बन्धस्सम्भवति। अन्यथा भविष्यद्वृष्ट्यादिभिरिदानीमपि सस्यादिपोषणप्रसङ्गात्। यश्चासौ विषयविषयिभावात्मा दृग्दृश्ययोस्सम्बन्ध इष्यते, किं ताभ्यामसम्बद्धः? उत सम्बद्धः? उतोभयात्मा? आहोस्विदनुभयात्मा? अन्यो[न्यात्माकारो]वा? पूर्वत्र तयोस्सम्बन्धो न स्यात्। तदसम्बन्धस्यापि तत्सम्बन्धत्वे सर्वस्यापि सम्बन्धस्य सर्वसम्बन्धत्वप्रसङ्गात्। उत्तरत्रापि सम्बन्धान्तरेण, न वा? आद्येऽनवस्था। द्वितीये त्वसम्बद्धत्वम्। न हि सम्बन्ध-

रहितमपि सम्बद्धमिति समस्ति । स्वतो मिलितोऽयं सम्बन्ध इति चेन्न; सम्बन्धिनोरेव स्वतो मेलनस्य लघुत्वात् । नामान्तरेण च मेलनमेव नास्तीत्युक्तिः स्यात् । संबन्धिन एव स्वसंबन्धात्मकत्वे व्याघातस्य पूर्वोक्तत्वाच्च । उभयानुभयादि-पक्षास्तु व्याघातादिनिरस्ता एव । अनुभयपक्षे चास्मदिष्टानिर्वचनी [यतावादः] यापातः स्यात् । किंच विषयविषयि-भावाख्यसंबन्धो द्विष्ठः, एकनिष्ठो वा ? नाद्यः, अन्योन्यस्मिन्नन्योन्यत्वाभावेन द्वयोरपि तस्यासिद्धेः । सिद्धौ वा द्वयोरपि विषयत्वविषयित्वयोः प्रसङ्गात् । अत एव न द्वितीयः, संबन्धरूपताव्याघाताच्च । येनात्मनाऽसौ संबन्धः क्वचिद्वर्तते किं तेनैवात्मनाऽन्यत्रापि ? उत ततोऽन्येन ? आद्ये द्वयोरपि विषयत्वादिप्रसङ्गः । द्वितीये कथमेकस्य द्व्यात्मकता ? द्वयो [तयो]-रप्यात्मनोर्द्विष्ठत्वाभावात् । सम्बन्धरूपतात्यागे तदात्मनोऽपि सम्बन्धस्य तत्त्वं न स्यात् । एवमन्यान्यपि सम्बन्धसामान्य-विकल्पदूषणान्यत्रानुसन्धेयानि । ननु किं सम्बन्धान्तरगवेषणेन ? स्वत एव किंचिज्ज्ञानं कस्यचिदेवेति नियतस्वभावमुप-लम्भसिद्धमिति चेन्न; नियामकमन्तरेण नियमेऽतिप्रसंगात् । कस्यचिदिति सम्बन्धविभक्तेर्मिथ्याविषयत्वप्रसंगाच्च । तन्निरूप्यस्वभावतया स्वसामग्र्या जन्यत इति चेन्न; ईश्वरज्ञानस्य तदभावेन निर्विषयत्वप्रसंगात् । सामग्र्या हि स्वरूपमुत्पादयितुं शक्यम्, न तु [स्व] सम्बन्धिनिरूप्यत्वापादनम्, सर्वाकारैस्सर्वनिरूपणापादनप्रसंगात् । सम्बन्धरहि-तयोरपि भावाभावयोरिव विषयविषयिणोर्निरूप्यनिरूपकभाव इति चेन्न; सम्बधरहितयोर्भावाभावयोरपि तत्त्विकस्य निरूपणस्यास्माभिरभ्युपगमात् । तथाऽपि दोषादिसामग्रीवैचित्र्यादेवासम्बन्धविषयनिरूप्यत्वं शुक्तिरजतादिज्ञानोत्पत्तौ दृष्टमिति सर्वत्रापि तथाऽभ्युपगम्यत इति चेत्; आगतोऽसि पन्थानम् । विषयमिथ्यात्वादेव हि तत्र विषयसम्बन्धा-भावः, तथाऽत्रापि स्वीकर्तव्यमिति । अत एकस्यैव संविदात्मनोऽनाद्यविद्यादोषवैभवादविचारितरमणीयसंबन्धे तदाकाराव-भासोऽभ्युपगन्तव्य इति ।

अत्रोच्यते—किं दृग्दृश्ययोस्संबन्धानुपपत्त्या तदुपपादनार्थं दृश्यमिथ्यात्वकल्पनमित्यर्थापत्तिविवक्षा ? यद्वा विकल्पासहत्वेन सम्बन्धाभावं सिद्धं कृत्वा तेनैव सम्बन्धिनोऽप्यभावसाधनम् ? उत दृश्यसत्यत्वे तस्य संवेदनसंबन्धाभाव-प्रसङ्ग इति प्रपञ्चमिथ्यात्वसाधकानुमाने श्रुत्याद्यनुग्राहकतर्कविवक्षा ? इति । नाद्यः, अन्यथैवोपपत्तेः, परिदृश्यमाना-र्थस्यानुपपत्तौ प्रसज्यमानायामुपपादककल्पनं ह्यर्थापत्तिः । न च दृग्दृश्यसम्बन्धस्योपपादकं दृश्यमिथ्यात्वम्, अपि तु तत्प्रतिक्षेपकमेव । अत उपपादककल्पनापदेशेनानुपपत्तिकल्पनमेवेत्यायातम् । मिथ्याभूतसम्बन्धस्योपपादकमेवेति चेन्न; तथाविधस्य तस्यादर्शनेन तदुपपादकान्वेषणायोगात् । नापि द्वितीयः, सम्बन्धाभावेऽपि मेरुमन्दरयोश्शशविषाणयो-श्शाखाचन्द्रयोरिव च सम्बन्धित्वाभिमतयोस्सत्त्वाविघातात् । अन्यथा दृश्यवद्दृशोऽपि तस्या एव वा मिथ्यात्वं किं न कल्प्यते ? दृगधीनसिद्धेर्दृश्यस्य दृगभाव इव तत्सम्बन्धाभावे च मिथ्यात्वं सिध्यति, दृशेस्तु स्वसंवेदनसिद्धतया दृश्य-सम्बन्धाभावेनासत्यत्वमिति चेन्न; यथा दृशो दृशिकर्मत्वाभावेऽपि स्वसंवेदनेन सिद्धिस्तद्वद्विश्वस्यापीति वदतः कः प्रतीकारः ? स्वात्मनि क्रियाविरोध इति चेत्, तुल्यम् । संवेदनेऽपि स्वव्यवहारे स्वगोचरसंविन्निरपेक्ष्यमात्रविवक्षायां न बाध इति चेत्, घटादावपि तथाऽस्तु । संविद्विषयत्वं घटादेः प्रतीयत इति चेत्; किमतः ? स्वव्यवहारेऽन्य-सापेक्षत्वमिति चेन्न; संवित्सम्बन्धस्य त्वयैव प्रतिक्षिप्तत्वेन तदधीनव्यवहारत्वायोगात् । ततश्च परिशेषात् घटादेरन्य-निरपेक्षव्यवहारत्वसिद्धेस्तावन्मात्ररूपं स्वसंवेदनं फलितमेव । घटादिस्वरूपवत्तस्य स्वसंवेदनमपि नोपलभ्यत इति चेत्; संविदो वा किं स्वतस्स्वयंप्रकाशत्वमुपलभ्यते ? अनुभूतित्वाद्यनुमानादिभिस्साध्यत इति चेन्न; घटत्वाद्यनुमानैरपि

विश्वस्वप्रकाशत्वसाधनप्रसङ्गस्याप्यवेद्यत्वनिराकरणे स्थापनात्। किंच अनुमानविषयत्वाङ्गीकारे कथं विषयविषयिभावसम्बन्धं विघटयसि? तद्विघटने वा कथं स्वप्रकाशत्वमेव साधयसि? अतो दृग्दृश्ययोस्सम्बन्धानुपपत्त्या दृश्यमिथ्यात्वे दृशोऽपि मिथ्यात्वप्रसङ्गो दुर्वारः। स्वतस्सिद्धतया तत्सत्यत्वे विश्वस्यापि तत एव सत्यत्वमवर्जनीयम्, अविशेषात्। ननु भवतोऽपि संविदस्स्वयंप्रकाशत्वं घटादेर्दृगधीनसिद्धित्वं चाभिमतम्, अतः कथं प्रतिबन्द्यवतारः? इत्थम् अस्माभिस्संवित्स्वयंप्रकाशकत्वस्य संविदन्तरवेद्यताभ्युपगमात्। यदि त्वयाऽपि तथेष्यते, ततस्तत्रैव विषयविषयिभावस्सिद्धः। यदि तत्रापि विषयमिथ्यात्वम्, ततस्स्वयंप्रकाशत्वमेव न स्यात्। धर्मरूपत्वात्तदाऽपि माभूदिति चेन्न; तत्परित्यागे स्वसंवेदनेन संवित्सत्यत्वस्थापनानुपपत्तेः। धर्मतामपहाय संवित्स्वरूपतया तदेव तिष्ठतीति चेत्; तर्हि स्वरूपमेव स्वप्रकाशत्वसाधकसंविदन्तरविषय इत्यायातम्। तथा सति विषयभूतायास्संविदोऽपि त्वदुक्तानुपपत्त्यैव घटादिवन्मिथ्यात्वमवर्जनीयम्। तन्मिथ्यात्वेऽपि तद्विषया संविदन्या स्वसंवेदनगुप्ता तिष्ठतीति चेन्न; तत्संवेदनेऽप्युक्तदोषानतिलङ्घनात्। अतस्संविदन्तरकर्मतागन्धरहितसंवित्स्वयंप्रकाशत्वे विश्वस्यापि तथात्वेन सत्यत्वप्रसङ्गो दुर्वारः। संविदोऽपि यथाकथञ्चिद्दृश्यत्वाभ्युपगमेऽपि तन्मिथ्यात्वप्रसङ्गेन दृश्यमिथ्यात्वकल्पनमशक्यमि[त्यं स्यादि]ति।

किंच यदि परिदृश्यमानस्सम्बन्धोऽनुपपन्नस्तदा सम्बन्धान्तरमेव दृष्टबाधेन कल्प्यताम्। न पुनस्सम्प्रतिपन्नस्वारसिकबाधरहितदृश्यबाधो युक्तः। सम्बन्धान्तरमपि कल्प्यमानमनुपपन्नमिव भातीति चेत्, किं दृश्यमिथ्यात्वं कल्प्यमानमुपपन्नमिव भाति? यत्ते स्ववचनव्याघातादिकमापादयति। अनुपपन्नमपि गत्यभावादवलम्ब्यत इति चेत्, सम्बन्धसत्यत्वमप्यनुपपन्नमपि किं नावलम्ब्यते? अनुपपन्नत्वमेव सत्यत्वाभाव इति चेत्; मिथ्यात्वेऽनुपपन्ने तदभावस्यावर्जनीयत्वात्। यथा सम्यग्रजतस्य मिथ्यारूपत्वानुपपत्तौ सत्यत्वम्। अतस्सम्बन्धोऽपि तथाभूतः कश्चिदिति नित्यमुपलम्भानुरोधेन तत्सत्यत्वस्थापने दृश्यस्याप्युपलब्धसत्यत्वाबाधोपपत्तेः, मिथ्यात्वस्य च स्वयमेवानुपपन्नत्वाभ्युपगमादस्माकमनायासेनेष्टसिद्धिप्रसङ्गात्। अनुपपन्नत्वाभिमतपरपक्षाणामपि प्रतिषेधायोगाच्च। यथारुचि परिग्रह इति तु स्यात्। तथा च कृतं वैदिकत्वकञ्चुकवहनवृथाप्रयासेन। न च तृतीयः, असत्यत्वपक्षेऽपि सम्बन्धानुपपत्तिप्रसङ्गेन प्रतितर्कपराहतत्वात्। असत्यत्वेऽपि शुक्तिरजतादिष्वारोपितसम्बन्धेन व्यवहारः प्रतीयत इति चेत्; सत्यत्वेऽप्यनुभूतेस्तद्विषयज्ञानान्तरस्यारोपितसम्बन्धेन व्यवहार इति तुल्यम्। अतस्सम्बन्धमात्रस्य विकल्पासहत्वाभिमतस्यारोपितत्वमिष्यताम्। किं ततो दृश्यमिथ्यात्वकल्पनप्रयासेन? किंच प्रसङ्गस्य विपर्यये पर्यवसानमप्यङ्गम्। अत्र च दृश्यस्य सत्यत्वे सम्बन्धानुपपत्तिप्रसङ्ग इत्यस्य विपर्यय उपपद्यते चायं सम्बन्ध इत्येवं रूपस्स्यात्। तथा च सम्बन्धोपपत्त्या दृश्यमिथ्यात्वकल्पनमिति स्यात्। ततश्च सम्बन्धिपरित्यागेन सम्बन्धस्वीकारप्रसङ्गः। न ह्यस्ति सम्भवस्सम्बन्धिनमन्तरेण सम्बन्धस्येति। अनुपपन्न[विशेषेण] वेषेणोपपन्नं विपर्यय इति तत्स्वीकार इति चेन्न; प्रसङ्गतद्विपर्यययोरविशेषप्रसङ्गात्। तथा च प्रसङ्गविपर्ययासिद्धिः। अन्यथेष्टप्रसङ्ग इति स्यात्। उपलभ्यते चायं सम्बन्ध इत्येव विपर्यये न दोष इति चेत्; तर्हि दृश्यसत्यत्वे सम्बन्धोपलम्भभङ्गप्रसङ्ग इति [प्रति] तर्कः स्यात्। अहो! सम्बन्धिसत्यत्वे सम्बन्धोपलम्भभङ्ग इति कुत्रेयं व्याप्तिर्गृह्यते? तथाऽप्यारोपितस्सम्बन्धो दृश्यसत्यत्वे न स्यादिति प्रसङ्ग इति चेत्? तर्ह्यनारोपितोऽयं सम्बन्ध इत्यास्थीयताम्। अनारोपितस्तु विकल्पासहत्वान्न सिध्यतीति चेत्; तथाऽप्येकस्यारोपितत्वे तदनुबन्धिनोऽन्यस्याप्यारोपितत्वमिति वृथानिर्बन्धः। तथा हि सति सम्बन्धिनो ब्रह्मणोऽपि विलयप्रसङ्गात्। अनारोपितयोरेवारोपितसम्बन्धस्य

परकीयस्वकीयत्वभ्रमादौ दृष्टत्वाच्च । एतेन दृश्यसत्यत्वे सम्बन्ध उपपद्येतेति विवक्षाऽपि निरस्ता, इष्टप्रसङ्गात् । विषयविषयिभावस्य भ्रान्त्यविशेषेण सर्ववादिसंमतत्वात् । अत एव विपर्ययापर्यवसानं च ॥

यत्त्वतीतानागतादिभिस्सह सम्बन्धो न सम्भवतीति । तत्र पृच्छामः, वर्तमानैर्वा कथं सम्भवतीति । स्वरूपस्य विद्यमानत्वादिति चेन्न ; विद्यमानयोरेव शशविषाणयोरसम्बन्धदर्शनात् । तथाऽपि क्वचिद्दर्शनादभ्युपगम्यत इति चेत् ; अत्रापि तथाऽभ्युपगम्यताम् । संयोगादिलक्षणस्सम्बन्धोऽतीतादिभिर्न दृष्ट इति चेत्, अयं तु दृष्टत्वादङ्गीक्रियताम् । दृष्टत्वेऽपि निराधारत्वेन प्रतिक्षिप्यत इति चेन्न ; वर्तमानयोरिवातीतादेरपि स्वकालवृत्तित्वेनाधारत्वोपपत्तेः । यथा चाभिन्नदेशयोरिव भिन्नदेशयोरपि मूर्तयोस्संयोग इष्यते, तथा भिन्नकालयोरपि प्रतिनियतसामग्रीसामर्थ्याद्वा नित्यज्ञाने नित्यं तत्प्रवणस्वभावत्वाद्वा विषयविषयिभाव इति किं नोपपद्यते ? व्यवधानाव्यवधानाभ्यां विशेष इति चेन्न ; तद्विशेषमात्रस्याकिञ्चित्करत्वात्, अन्यथाऽतिप्रसंगात् ; तथाऽप्यव्यवहितत्वलक्षणसम्बन्धस्तत्र न सम्भवतीति चेन्न, सम्बन्धमात्रस्याव्यवहितत्वलक्षणाभावात् । गोमानित्यादौ तद्दर्शनाभावात् । तल्लक्षणस्यात्रानिष्यमाणत्वात् । ननु * ज्ञानमपि हि द्रव्यमेव, सम्बन्धश्च संयोगलक्षणः इति भाष्यं वः [प्यवचः] कथमिति चेन्न ; सम्भवद्विषयस्य तस्य संयुक्ताश्रितत्वादेरप्युपलक्षणपरत्वात् । सर्वत्र संग्रहः कथमिति चेत् तत्तत्स्वभावविशेषादेव । तेषामनुवृत्तादिव्यपदेशः कथमिति चेत्, न ; आधाराधेयभावादिवदुपपत्तेः । तथाऽपि विविक्तव्यवहारेऽभिव्यासमाकारान्तरमन्तरेण कथमिति चेन्न ; व्यवहारानुगुण्यापादनरूपत्वस्य प्रतीतिसिद्धत्वात् । अन्यथा भवतामप्यवेद्यत्वे सत्यपरोक्षव्यवहारानुगुण्यादिकथनम [सं] बद्धप्रलाप एव स्यात् । एतेन भविष्यद्वृष्ट्यादिना सस्यादिपोषणप्रसंगोऽपि प्रत्युक्तः, सम्बन्धस्वभावविशेषाणां प्रतिनियतसामर्थ्यात् । सामग्रीवैचित्र्यादेव च वर्तमानतत्प्रतिनियतविषयत्वोपपत्तेः । तथाऽपि कोऽसौ सम्बन्ध इति सौहार्देन पृच्छाम इति चेत् ; वयमपि परमसौहार्देन प्रतिब्रूमः । कोऽसाविति किं संज्ञाविशेषः पृच्छ्यते ? उत स्वरूपविशेषः ? यद्वा लक्षणम् ? उत प्रकारान्तरम् ? अथवा संयोगादिषु कुत्रान्तर्भाव इति ? उतान्यः कश्चित् ? आद्ये तमन्तरेणापि सामान्यत एव व्यवहारनिष्पत्तेः किं तद्विचारक्लेशेन ? विषयविषयिभाव इत्येव वा विशेषनाम निर्दिश्यताम् । सङ्केत्यतां वा यथारुचि नामान्तरम् । द्वितीयेऽपि स एव सः न त्वसः, अन्यथा व्याघातादिप्रसङ्गात् । तृतीयेऽपि लक्षणमन्तरेणापीक्षुक्षीरादिरसवैषम्यवत्स्फुटप्रतीतिसिद्धं दुरपह्नवतरम् । अतिपीडायां तु व्यवहा [रविशेषा] रानुगुण्यापादनम् । अत एव चतुर्थेऽपि दत्तमुत्तरम् । पञ्चमे तु न कुत्रचिदिति वा क्वचिदन्तर्भावदर्शने तत्रैवेति वा वक्तव्यम् । बहिर्भावेऽपि नाभावत्वप्रसङ्गः, स्वेच्छापरिसंख्यातद्वित्रादिबहिर्भावेऽन्येषामभावत्वप्रसङ्गात् । अन्यस्तु व्यवहाराङ्गतया प्रतीयमानत्वे स्वयमेवावगम्यताम् ; अनङ्गत्वे तु किं तन्निरूपणेनेति ।

यत्तु—* सम्बन्धपरिग्रहे सम्बन्धान्तरानवस्था, अन्यथा तत्सम्बन्धत्वपरित्याग इति । तदपि किं सम्बन्धमात्रापह्नवार्थमुच्यते ? ज्ञानार्थनिरूपितसम्बन्धविशेषापह्नवार्थं वा ? आद्ये स्वव्याघातः, दूष्यदूषणवाच्यवाचकादिसम्बन्धप्रतिक्षेपे त्वदुक्तदूषणस्यैवाकिंचित्करत्वप्रसङ्गात् । तदभ्युपगमे चास्माकं प्रतिक्षेपासिद्धेः । स्वपरप्रतिक्षेपसामर्थ्यस्याप्यन्यत्र प्रतिक्षेपात् । द्वितीये त्वनङ्गाङ्गीकारः, सम्बन्धस्य सतोऽपि विशिष्टव्यवहारे सम्बन्धान्तरमपेक्षितमित्यनङ्गस्यैव स्वीकृतत्वात् । यु [उ] क्ताङ्गत्यागो वा, अङ्गस्यापि स्वपरपरित्राणस्य परित्यागात् । अन्यसम्बन्धस्य चाङ्गत्वे दूष्यदूषणसम्बन्धादावपि प्रसङ्गात् । सम्बन्धान्तराभावे सम्बन्धत्वहानिरित्यपि तत एव दत्तोत्तरम् । अन्यथा स्वपरनिर्वाहक-

मात्रभङ्गे स्वयंप्रकाशस्यापि निरासप्रसङ्गात् । स्वव्यवहारस्य नैरपेक्ष्यमन्यत्रादृष्टं तत्र हि स्वीक्रियते, तद्वदत्रापि स्वप्रतिसम्बन्धिव्यवहारे सम्बन्धान्तरनैरपेक्ष्यमिति समाधिस्सम एव । यत्तु सम्बन्धस्य स्वतो मेलने सम्बन्धिनोरेव स्वतो मेलनप्रसङ्ग इति, तदपि दृश्यमाने सम्बन्धे नावतरति; कल्प्यमाने तु वयमपि तथाऽभ्युपगच्छाम इति कानिष्टप्रसङ्गः? इदमप्यसूत्रयत्—* समवायाभ्युपगमाच्च साम्यादनवस्थितेरिति । नच तत्र मेलनमेव नास्तीति प्रसङ्गो दोषः, तदभावेऽपि विशिष्टव्यवहारजननस्वभावतयैव तत्तत्स्वरूपसिद्धेः । न च स्वयमेव सम्बन्धात्मकं स्वसम्बन्ध्यात्मकं चेति स्वरूपभेदमङ्गीकुर्मः, येन व्याघातादिप्रसङ्गस्स्यात् । अतो यत्र वस्तुनोर्विशिष्टव्यवहारजननस्वभावत्वं दृष्टं तत्र तत्तत्स्वरूपमेव विशिष्टव्यवहारजनकत्वमात्रेण सम्बन्ध इति व्यपदिश्यते; यत्र तु सम्बन्ध एव स्फुटस्तत्र तदभ्युपगमेन तदुपरि सम्बन्धान्तरनैरपेक्ष्यमङ्गीक्रियत इति सर्वत्र विशिष्टव्यवहारे निरुह्यमाणे स्ववचनविरोधादिनरकपातमनुमत्य किं विश्वमिथ्यात्ववृथाग्रहेण? यत्तु विषयविषयिभावो द्विष्ठ एकनिष्ठो वेति, तत्र विषयत्वं विषयित्वं चैकैकनिष्ठमितरेतरप्रतियोगिकमिति निष्कर्षः । ताभ्यामेव च विषयविषयिणोर्विशिष्टव्यवहारसिद्धेः । तदुभयसमाहाराद्विषयविषयिभावाख्यसम्बन्ध इत्युच्यते । अत एव येनात्मनाऽसौ क्वचिद्वर्तेत इत्यादिकमपि दत्तोत्तरम्; यानि चान्यानि सम्बन्धसामान्यदूषणानि तान्यपि दूष्यदूषणादिसम्बन्धसत्त्वासत्त्वयोस्स्वव्याघातकानीति न ततोऽपि दृग्दृश्यसम्बन्धभङ्गः । तदेतत्सर्वं ***योगाचारोक्त***ग्राह्यलक्षणायोगनिरासे फलिष्यतीति मत्वाऽत्रोदास्ते । इहाप्यसूचयत्—* अनुभूतिसद्विषययोश्च विषयविषयिभावेन भेदस्य प्रत्यक्षसिद्धत्वादित्यादिना सदनुभूतिभेदभाष्येण ॥

॥ इति शतदूषण्यां दृग्दृश्यसम्बन्धानुपपत्तिपरिहारवादः सप्तदशः ॥ १७ ॥

॥ अथ बाह्यप्रकाशानुपपत्तिवादः अष्टादशः ॥ १८ ॥

अज्ञानसन्तमसमाश्रयणोन्मुखानां संवित्प्रदीपमहसा सहसा निरुन्धन् ।
विद्यास्वयंवरपतिर्व्यपहन्त्वविद्यां सर्वानुभूस्स भगवान्पुरुषोत्तमो नः ॥

यत्तद्भावरूपाज्ञानदूषणसमये * नित्यमुक्तस्वप्रकाशचैतन्यैकस्वरूपस्य ब्रह्मणोऽज्ञानानुभवश्च न संभवतीत्यादिभाष्यम्, तत्र बाह्यप्रकाश एव सर्वः परपक्षे न संभवतीत्यभिप्रेतम् । तद्व्याकुर्मः । यदुच्यते—नित्यमुक्तं ब्रह्मैव स्वगतानाद्यविद्यामनुभवतीति, कथमिदमुपपद्यते? बन्ध [न] स्यानाद्यविद्यातत्कार्यानुभवात्मकत्वान्मोक्षस्य च तन्निवृत्तिरूपत्वात् ।—नित्यमुक्तस्य बन्धश्चेन्नित्यमुक्तिर्न संभवेत् । बन्धस्यापि च नित्यत्वाद्बन्धाभावे त्वमुक्तता ॥ ननु भवन्मतेऽप्यज्ञानमस्त्येव, तच्च सर्वज्ञेनानुभूयते, स च नित्यमुक्त इति को विशेष इति चेन्न; पराज्ञानादिदर्शनस्य बन्धरूपत्वानभ्युपगमात् । ब्रह्माज्ञानमेव परगतं ब्रह्मणाऽनुभूयत इति चेन्न; तथाऽपि परगतत्वादेव तस्य बन्धरूपत्वप्रसङ्गाभावात् । तर्ह्यस्माकमप्यहंकारापरपर्यायान्तःकरणगतमज्ञानं भवतु, तच्च संविदधीनसिद्धित्वात्तदात्मकब्रह्मणाऽनुभूयत इति को दोष इति चेन्न; सुषुप्तिमरणमूर्च्छाद्यहंकारविलयदशायामज्ञानानुभवभङ्गप्रसङ्गात् । न हि तदानीं निराश्रयाज्ञानस्थितिसंभवः, निरधिष्ठानभ्रमानुज्ञानप्रसङ्गात्; ब्रह्माश्रयत्वे तु स्वगताज्ञानानुभवावश्यम्भावः । भवत्वज्ञानानुभवः, स तु मिथ्याभूतानुभव इति न नित्यमुक्तत्वविरोध इति चेन्न; मिथ्याभूतस्यैव तस्य बन्धतयोपपादनात् । अन्यथा तन्निवृत्त्यर्थं शास्त्रारम्भानुपपत्तिप्रसंगात् । ततश्च तथाविधनिवृत्तिरूपे मोक्षे नित्ये कथं तत्प्रतियोगिनस्तस्य संभवः?

ततश्च नित्यं ब्रह्मण्यविद्याविमुखे स्वयमेव विलीयमाना सा कथमहंकारादीन्यपत्यानि प्रसूताम्? कथं वा तेषु ब्रह्मणो दृष्टिपात इति न बाह्यानुभवसम्भवः । स एष प्रथमो हेतुर्ब्रह्माश्रयाज्ञानानुपपत्तिकथनेन व्याख्यातप्रायः; तृतीयश्च साक्षित्वशोधने प्रदर्शित एवेति कृत्वा मध्यमं हेतुं विवव्रे—* स्वानुभवस्वरूपत्वादित्यादिना ॥

अनुभूतिस्वरूपमपि ब्रह्म स्वानुभवैकतानमिति ह्यभ्युपगम्यते । तस्य स्वरूपातिरिक्ताविद्यानुभवः किं स्वतः? उतान्यतः? नाद्यः; स्वानुभवैकतानत्वव्याघातात्; अनिर्मोक्षप्रसंगाच्च । मोक्षे वा स्वाभाविकरूपव्याघातप्रसंगात् । किंच यत्र शुक्तिरजतादौ विषयमिथ्यात्वम्, तत्र विषयिणोऽपि मिथ्यात्वावश्यम्भावात् निवर्तकज्ञानेन सविषयवृत्तिस्वरूपबाध इति हि त्वन्मतम् । ततश्च यदि मिथ्याभूताविद्यानुभव [स्वभावता] स्वभावतो ब्रह्मणस्तदा तस्यापि मिथ्यात्वेन बाधकज्ञानेन निवृत्तिरेव स्यात् । नापि द्वितीयः, अविद्याब्रह्मातिरिक्तस्यान्यस्यानभ्युपगमात् । अभ्युपगमे वा तत्सत्यत्वमिथ्यात्वविकल्पेन सद्वितीयत्वानवस्थयोरन्यतरप्रसंगात् । माभूदविद्या ब्रह्मस्वरूपातिरिक्तमन्यत्, अविद्यैव तु ब्रह्मस्वरूपं तिरोधत्ते, तन्निबन्धनोऽयमविद्यानुभव इति चेन्न; प्रकाशमात्रस्य ब्रह्मणस्तिरोधाने तत्स्वरूपनाशप्रसङ्गादेरन्यत्र प्रपञ्चनात् । किंच तिरोहिते ब्रह्मणि तस्याविद्यानुभवः, अनुभूतायां चाविद्यायां लब्धस्वरूपया तया तिरोधानमित्यन्योन्याश्रयणम् । अनुभवनिरपेक्षं तिरोधानमिति चेत्; तथा सति तदज्ञानं काचादिवत्स्वसत्तया ब्रह्म तिरस्करोतीति संविदधीनसत्ताकत्वाभावेन स्वतस्सिद्धतया संविद्रूपज्ञानबाध्यत्वं न स्यात् । तेन च तदुपात्तः प्रपञ्चोऽपि तथाविध एवेति सत्यस्स्यात् । आहुश्च—* काचादिवत्तिरस्कारे दोषो वाचामगोचरः । ज्ञानबाध्यत्वहानिस्स्यात्स्यात्प्रपञ्चस्य सत्यता ॥ इति । अस्तु तर्ह्यविद्यानुभवाधीनं तिरोधानम्, अनुभवस्तु निरपेक्ष इति नान्योन्याश्रयणमिति चेन्न; अनिर्मोक्षप्रसङ्गादेरुक्तत्वात् । किंच अतिरोहितस्वरूपस्यैव लाघवेनाभ्युपगन्तुमुचितत्वात् । ननु भवतामपि ब्रह्मस्वरूपं स्वानुभवैकतानम्, तदेव च सर्वज्ञमित्यभ्युपगतमिति को विशेष इति चेन्न; अस्माकं ब्रह्मस्वरूपस्य स्वानुभवैकतानत्वेऽपि गुणभूतेन ज्ञानेन सविषयत्वस्वभावेन स्वेतरसमस्तविषयीकरणात् । एतेन मुक्तोऽपि व्याख्यातः । बद्धस्य तु सर्वविषयीकरणस्वभावमपि ज्ञानमौपाधिकान् संकोचविकासान् भजतीति न विरोधः । उपाधयश्च प्रवाहानादिरूपेणोपस्थिताः कर्मादय इति नानवस्थादयो दोषाः । अतो यदि बाह्यानुभवमिच्छसि, तदा स्वरूपमात्रप्रकाशस्वभावादात्मस्वरूपादतिरिक्तं तद्धर्मभूतं ज्ञानमभ्युपगच्छ वा, त्यज वा बाह्यानुभवव्यसनमिति । त्यजामस्तर्हि बाह्यानुभवम्, न ह्यत्र वस्तु बाह्यं किंचिदनुभूयत इति चेन्न; विकल्पासहत्वात् । किमत्र बाह्यतया प्रतीयमानानामनुभूतिस्वरूपत्वमभिमतम्? उत स्वरूपातिरिक्तानामवस्तुत्वम्? अथ वस्तूनामवस्तूनां वा बाह्यानामनुल्लेखः? उत बाह्यानुभवस्यैवावस्तुत्वमिति । नाद्यः, आत्मख्यातिवादस्य त्वयैव दूषणात्, तदभ्युपगमस्य चान्यत्र दत्तोत्तरत्वात् । न द्वितीयः, प्रपञ्चापह्नवनिर्मूलनात् । अवस्तुत्वेऽपि तदुल्लेखस्य दुरपह्नवतया बाह्यप्रकाशावश्यंभावात् । न तृतीयः, सर्वलौकिकपरीक्षकहृदयविसंवादात्, सर्वसंरम्भविलयप्रसङ्गाच्च । न चतुर्थः, माध्यमिकवादावतारात् । अस्तु बाह्यानुभवस्यैवावस्तुत्वमिति चेन्न; तस्यैव विशोधितस्य त्वया ब्रह्मत्वाभ्युपगमात् । तदतिरिक्तस्य तु त्वदभिमतस्य कुतश्चिदप्यसिद्धेः । सिद्धावपि तस्यैव बाह्यानुभवाभावे तद्व्यतिरिक्तानामपि बाह्यानुभवभेदानामसम्भवे पुनरनुल्लेखपक्षपरिशेषात् । अतो बाह्योल्लेखस्ते हातुमुपादातुं वा न शक्य [त इति] मिति दुरन्तमिति ॥

॥ इति शतदूषण्यां बाह्यप्रकाशानुपपत्तिवादः अष्टादशः ॥ १८ ॥

———

॥ अथ ब्रह्माश्रयाज्ञाननिरासवादः एकोनविंशः ॥ १९ ॥

अनन्यचेतसां पुंसामज्ञानमवधुन्वते । निरस्ताज्ञानगन्धाय नित्यं सर्वविदे नमः ॥

अहङ्काराभिव्यङ्ग्यत्वं दूषयद्भिर्भाष्यकारैरज्ञानाश्रयत्वमपि संविदो निरस्तम्—* न च संविदाश्रयत्वमज्ञानस्येत्यादिना । अविद्याश्रयविकल्पे चोक्तम्—* नापि ब्रह्माश्रित्य, तस्य स्वप्रकाशज्ञानरूपत्वेनाविद्याविरोधित्वात् इत्यादिना । प्रदेशान्तरेषु च सर्वज्ञत्वनिर्दोषत्वादिश्रुतिशतैर्विरोधो दर्शितः । तत्सर्वं सङ्कलय्य व्याकुर्मः । यद्यसौ परमात्मा त्वदुक्तप्रकारेण संविन्मात्रस्वरूपः, यदि वा यथाश्रुति सर्वज्ञः, नोभयथाऽपि तस्याज्ञानाश्रयत्वं संभवति । तथा हि—न तावद्घटादिवत् ज्ञातृत्वात्यन्ताभावलक्षणमज्ञानमिह विवक्षितम्, तस्य त्वदभिमते ब्रह्मण्यपि घटादाविव यावत्स्वरूपभावितया स्वरूपे सति निवर्तयितुमशक्यत्वात् । नापि ज्ञानप्रागभावप्रध्वंसौ । ब्रह्मणि धर्मभूतस्य ज्ञानस्य क[स्य] दाचिदप्यनभ्युपगमात् । नापि ज्ञानान्योन्याभावः, ज्ञानान्तरानभ्युपगमात्; स्वप्रतियोगिकभेदायोगाच्च । वृत्तिज्ञानादध्यस्तज्ञानाद्वा भेदस्य स[नि]त्यत्वेन तस्यापि निवर्त्यतयाऽभिमताज्ञानत्वायोगात् । भावरूपाज्ञानत्वाभ्युपगमादेव च नाभावान्तरमपि । अतो यत्तदज्ञानं ज्ञाननिवर्त्यमभिमतम्, तज्ज्ञातर्येव भवितुमर्हति; ज्ञानस्य स्वाश्रय एवाज्ञाननिवर्तकत्वव्याप्तेः । न हि देवदत्तगतेन ज्ञानेन यज्ञदत्तगतमज्ञानं निवर्तते । ननु ईश्वरादिगतेन ज्ञानेन कथं तदनुग्रहविषयजीवगताज्ञाननिवृत्तिस्तवेति चेन्न; तत्र शक्तिविशेषोपबृंहितत्वेन तदुपपत्तेः । न हि प्रकाशाकारतामात्रेण तत्र परगताज्ञाननिवर्तकत्वम्, तथा सति नित्यं तन्निवृत्तिप्रसङ्गात् । अतो जीवगतेनान्तःकरणगतेन वा तत्त्वज्ञानेन ब्रह्माज्ञाननिवृत्तिरिति प्रत्युक्तम् । ततश्च यत् ज्ञाननिवर्त्यमज्ञानम्, न तत् ज्ञातृत्वप्रसक्तिशून्ये ब्रह्मणि भवितुमर्हति । तदेतद्भावरूपाज्ञानदूषणे प्रसङ्गाभिप्रायेण प्रायुङ्क्त—* विवादाध्यासितमज्ञानं न ज्ञानमात्रब्रह्माश्रयम्, अज्ञानत्वात्; शुक्तिकाद्यज्ञानवत्; ज्ञात्राश्रयं हि तत् इति, * ब्रह्म नाज्ञानास्पदम्, ज्ञातृत्वविरहात्, घटवत् इति च । ननु कल्पितं ज्ञातृत्वं ब्रह्मणोऽप्य[स्ति, तेनास्या] स्तीति तस्याज्ञानाश्रयत्वोपपत्तिरिति चेन्न; अहङ्कारोपहितवेषेणैव तस्य ज्ञातृत्वकल्पनाभ्युपगमात्, सुषुप्तिमरणादिष्वहङ्कारप्रलयेऽपि संविदात्मन एवाज्ञानाश्रयत्वाभ्युपगमाच्च । ततश्च शुक्तिकाज्ञानवद्ब्रह्माज्ञानमप्यहमर्थनिष्ठमिति वा कल्पय, त्यज वा सर्वत्र ब्रह्माज्ञानम् । उभयथाऽपि न त्वामुपद्रवामः । यश्च वस्तुतो ज्ञातृत्वं परिगृह्याज्ञानमपि ब्रह्मणि स्थापयेत्, सोऽपि नित्यसर्वज्ञत्वानुपपत्त्या निरसिष्यते । स्वप्रकाशत्वाच्च । ब्रह्मप्रकाशबाध्यं हि ब्रह्माज्ञानमभिमतम्, ब्रह्म च नित्यस्वप्रकाशरूपम्, ततस्तेजसीव तिमिरं कथं तत्र तत्स्यात्? तच्चेत्स्वस्मिन्नज्ञानं सहेत, कस्तस्य निवर्तकः? ब्रह्मविषयं वृत्तिज्ञानं निवर्तकमिति चेत् अनुभाव्यत्वे घटादिवदननुभूतित्वप्रसंग इति त्वदुक्तं किं न स्मरसि? प्रस्मर वा । तथाऽपि विशेषाभावान्न तस्यापि निवर्तकत्वम् । निवर्तकानुपपत्तौ चास्य विस्तरो ग्राह्यः । ननु भवतोऽपि जीवस्वरूपं स्वप्रकाशम्, तदेव चाज्ञानाश्रयतयाऽभिमतमिति चेत् सत्यम्, तथाऽपि न तत्र विरोधः । नहि स्वप्रकाशांशप्रत्यनीकमप्रका[शां]शं प्रत्यगात्मनो ब्रूमः, अपि तु तस्यैव देहेन्द्रियादिविधर्मिणः स्वप्रकाशत्वनित्यत्वस्वादुतमत्वादिधर्मविशिष्टरूपाज्ञानम् । तच्च तदात्मगतेन विशिष्टविषयेण ज्ञानेन निवर्तते । यथा च शबरसंवर्धितस्य राजकुमारस्य शबरतयाऽऽत्मानमभिमन्यमानस्य प्रकाशमान एव स्वात्मनि क्षत्रियत्वाज्ञानम्, तच्चोपदेशादिजन्यराजत्वज्ञानेन निवर्तते; तद्वदत्रापीति स्वयमेव परिभावय । नित्यमुक्तत्वाभ्युपगमाच्च । न ह्यज्ञानाश्रयत्वमनन्तर्भाव्य कश्चिद्बन्धो नाम, न च बन्धाभावादन्या मुक्तिः । येच मुक्तिदशायां पाषाणादिवदज्ञत्वमिच्छन्ति, न तेऽपि तदानीं संसारबीजभूतमज्ञानमनु-

न्यन्ते । अस्मन्मते तु यद्यपि सार्वज्ञ्यमात्मनां स्वरूपप्रयुक्तं, तथाऽपि तदुपाधिवशान्निरुद्धमिदानीं न विद्यत इति बन्धमोक्षयोः कालभेदान्न विरोधः । अस्माकमप्यविद्यातन्निवृत्त्योः पौर्वापर्यान्न विरोध इति चेत्; तर्हि नित्यमुक्तत्व [व्याघातः]-विरोधः । अविद्यायाः स्वकालेऽपि वस्तुतो निवृत्तत्वान्नित्यमुक्तत्वमुपपद्यत इति चेत्; कथं तर्हि पौर्वापर्यम् । प्रतिभासभेदाधीनमिति चेन्न; प्रतिभासयोरपि नित्यनिवृत्तस्वरूपतया तत्रापि पौर्वापर्यासिद्धेः । एवं च तत्तत्प्रतिभासपारम्पर्यगवेषणेऽपि न निस्तारः । न च सत्यस्ते प्रतिभासभेदः, येन निरुपाधिकं तत्र पौर्वापर्यं स्यात् । निवृत्त्यनुपपत्तिहेतवश्चात्र संचारणीयाः । सर्वज्ञत्वाच्च । न हि सर्वं जानाति यत्किंचित्सर्वमेव वा न जानातीति सम्भवति । माभूत्सार्वज्ञ्यं ब्रह्मण इति चेत्, न तावदयं शापः । नाप्यनभ्युपगममात्रप्रकाशनम्, अकिंचित्करत्वात् । नापि प्रमाणानुधावनम्, वैपरीत्यात् । श्रूयते हि—* यस्सर्वज्ञस्सर्ववित् इत्यादि । स्वयं च ब्रवीति—* वेदाहं समतीतानि वर्तमानानि चार्जुन । भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ इति । स्मरन्ति च—* सर्वज्ञस्सर्ववित्सर्वशक्तिर्ज्ञानबलर्धिमान् । इत्यादि । न नित्यं तस्य सार्वज्ञ्यमिति चेत्, अस्य कोऽर्थः ? किं कदाचिदपि सार्वज्ञ्यं नास्तीति ? उत सदप्यनित्यमिति ? नाद्यः, श्रुतिविरोधात्; गुणनिषेधश्रुतीनां श्रुतिविहितगुणव्यतिरिक्तविषयत्वस्थापनात् । न द्वितीयः, स्वाभाविकसार्वज्ञ्यश्रुतिविरोधादेव । न हि स्वाभाविकसार्वज्ञ्यस्य विनाशस्सम्भवति । नापि चोत्पत्तिः, प्रागभावाभावात् । विस्तरस्त्वन्यत्र । अतो नित्यसर्वज्ञत्वाद्ब्रह्मणो न कदाचिदपि तस्याज्ञानाश्रयत्वसम्भवः । एतेन समस्तदोषनिषेधकवाक्यशतबाधोऽपि स्थापितः ॥

ननु क एवमाह अज्ञानाश्रयभूतं ब्रह्मेति ? यं प्रति तन्निषेधसम्भवः, इति चेत्; हन्त किमस्मदुक्तयुक्त्या प्रयुक्तो भवान् ब्रह्माज्ञानं निषेधति ? उत स्वमनीषिकासिद्धवृषलोद्वाहमन्त्रन्यायेन ? पूर्वत्र त्यजामस्संरम्भम् । उत्तरत्रापि न तावन्निरुपाधिकयोरेकत्र सम्भवः, उपाधिभेदापादितयोरपि न त्वदुक्तयुक्त्या सिद्धिः; न हि देशकालादिभेदेन तयोर्निर्वाहं पश्यसि, तथा दर्शनेऽपि प्रागुक्तयुक्तयः प्रतिस्पर्धिन्यः । प्रातिभासिको विधिः पारमार्थिको निषेध इत्यपि न [पालयितुं] पलायितुं शक्यम्, निषेधस्याप्यन्ततस्त्वदुक्तरीत्या प्रातिभासिकत्वात् । नचाविद्यास्वरूपतदाश्रयत्वादेर्दुर्निरूपतया तन्निषेधः पारमार्थिक इति युक्तम्, तन्निषेधस्य दुर्निरूपतया तत्स्वरूपादिपारमार्थिकत्वप्रसङ्गेन विपरिवर्तस्य सुशकत्वा[च्च]त् । भवतूभयमपि दुर्निरूपत्वादपारमार्थिकम्, का नः क्षतिरिति चेन्न, * परस्परविरोधे हि न प्रकारान्तरस्थितिरिति न्यायस्य सुस्थितत्वात् । ननु गगनकुसुमवदेतत्स्यात्; तद्धि न सुरभि नाप्यसुरभीति चेन्न; तत्र स्वरूपस्यैवाभावेन विधिनिषेधयोरनवकाशात्, अत्र पुनस्स्वरूपसद्भावात् । अत्रापि तदभावे माध्यमिकविजय [प्रसङ्गात्]-स्स्यात् । ततश्चान्यतरपरिशेषे प्रामाणिकेनात्मना निषेधस्यैव स्थितौ विधेरसम्भवः । प्रमाणविरुद्धस्तु तत्सम्भवस्त्वादृशां भ्रमेणैव स्यात् । तथा चादित्येऽन्धतमसमपि कश्चिदल्पजीवितः कल्पयतीति न प्रामाणिकतत्त्वस्थितिविरोधः । एवं च क्षणभङ्गादिवादानामपि यथेष्टं परिग्रहः कार्यः, अर्थस्थितिमनादृत्याऽऽकस्मिकपरिग्रहमात्रेण वेदान्तार्थस्थापनस्य तत्र चात्र च विशेषाभावात् । युक्तीनां च यथाभिमानं त्रिचतुरकक्ष्यास्थायित्वस्य समानत्वात् । अन्यथा कथमेकैकशोऽनन्तस्यात्मवर्गस्य तत्तत्सैद्धान्तिकतर्केन्द्रजालव्यामोहवशंवदत्वमिति ॥

॥ इति शतदूषण्यां ब्रह्माश्रयाज्ञाननिरासवादः एकोनविंशः ॥ १९ ॥

॥ अथ अवेद्यत्वभङ्गवादः विंशः ॥ २० ॥

श्रुतिगणशिरोनिष्णातानां स्वसत्त्वमभीप्सतां श्रवणमननध्यानैरध्यक्षतश्च चकास्ति यत् ।
अमतमिति यद्भूम्ना मन्तव्यतामवगाहते भवभयतमःप्रत्यासेधं भजेमहि तन्महः ॥

यदाहुः—* अनुभूतिस्स्वयंप्रकाशा, अनुभूतित्वात्, अनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्ग इति ; तत्र तावदनुभूतिशब्दस्यार्थावगतिहेतुत्वे व्याघातः, अहेतुत्वेऽपि पुनर्व्याघात इत्याबालगोपालमुपलभ्यम् । स्वयंप्रकाशेत्यनेन किं स्वव्यवहारे स्वाश्रयस्य कदाचित्स्वगोचरानुभूत्यन्तरनैरपेक्ष्यमात्रं साध्यते ? उत सर्वदा सर्वस्य स्वगोचरानुभूतिविरहः ? नाद्यः, सिद्धसाधनात् । वयमपि संविदो विषयप्रकाशनवेलायां स्वाश्रयं प्रति संविदन्तरकर्मतामन्तरेण प्रकाशमङ्गीकुर्मः । तदिदं सिद्धसाधनत्वमभिप्रेत्याह—* यत्त्वनुभूतेस्स्वयंप्रकाशत्वमुक्तम्, तद्विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैवेति । अत एव ये नाम स्वयंप्रकाशत्वनिवृत्तावनवस्थादिप्रसङ्गास्ते भवन्तु सम्यञ्चो न वेति तत्रास्माभिरिहोदासि । नापि द्वितीयः, प्रत्यक्षविरोधात् । तदाह—* परानुभवस्य हानोपादानादिलिङ्गकानुमानज्ञानविषयत्वात्, स्वानुभवस्याप्यतीतस्याज्ञासिषमिति ज्ञानविषयत्वदर्शनाच्चेति । स्ववचनविरोधमभिप्रेत्याह—* अतोऽनुभूतिश्चेत्स्वतस्सिद्धेति वक्तुं न शक्यते इति । तथा हि । अनुभूतिस्स्वयंप्रकाशेत्यत्रानुभूतिशब्दः कस्यचिद्बोधको न वा ? बोधकत्वेऽप्यनुभूतिरूपब्रह्मस्वरूपबोधकस्तदन्यबोधको वा ? ब्रह्मस्वरूपबोधकत्वे सिद्धं तस्य तज्जन्यसंवित्कर्मतया प्रकाशमानत्वम् । प्रकाशमानं स्वरूपमनेनानूद्यत इति चेन्न ; तथाऽप्यनुवादात्मकसंवित्कर्मतया प्रकाशमानत्वस्य दुरपह्नवत्वात् । अन्यथा तदनुवादत्वस्यासिद्धिप्रसङ्गात् । ततश्च प्रतिज्ञापदयोः फलप्रतिपादनाभ्यां व्याघातः । तदन्यबोधकत्वे तु तस्यैव स्वयंप्रकाशत्वं प्रतिज्ञातं स्यात् । ततश्च सिषाधयिषितासिद्धिरर्थान्तराख्यं निग्रहस्थानमपसिद्धान्तश्च प्रसज्येरन् । कस्यचिदप्यबोधक इति पक्षे त्ववाचकप्रयोगान्निरर्थकनिग्रहस्थानप्रसङ्गः । हेतोश्चाश्रयासिद्धिः । एवं हेतुसाध्यप्रतिपादकशब्दावपि संविदन्वितहेतुसाध्यप्रतिपादकावित्यभ्युपगन्तव्यम् । अन्यथा त्वप्रतिपादकत्वे वाऽनन्वितप्रतिपादकत्वे वा निरर्थकापार्थकनिग्रहस्थानापातात् । अतस्तदन्वितहेतुसाध्यप्रतिपादने तयोरप्यनुभूतिविशेषकत्वात्ताभ्यामपि वेद्यत्वं फलितम् । अतस्साध्यहेतुवाचिपदयोः फलप्रतिपादनाभ्यां विरोधः । अतोऽनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्ग इति तर्कोऽपि स्ववधाय कृत्योत्थापनम् । प्रागुक्तप्रत्यक्षेण तत्रत्यानुभूतिशब्देनैव चानुभूतेरनुभाव्यत्वस्थितावननुभूतित्वप्रसङ्गात् । एतेनावाच्यत्वमपि ब्रह्मणो निरस्तं मन्तव्यम् । किंच यदनुभाव्यं [तदननुभूति] न तदनुभूतिरूपम्, यथा घट इति व्यतिरेकदृष्टान्तेऽपि त्वदुक्तन्यायेनानुभाव्यत्वप्रतिक्षेपस्य शक्यत्वात्साध्याव्यावृत्तो दृष्टान्तस्स्यात् । घटस्स्वयंप्रकाशो घटत्वात्, घटस्यानुभाव्यत्वे पटवदघटत्वप्रसङ्ग इति वियातजल्पस्य दुर्वारत्वात् । एवं च क्रमेण सर्वस्यापि स्वयंप्रकाशत्वमायातमिति तदनुविधायिसत्यत्वादिप्रसङ्गश्च दुस्तरः । घटोऽनुभूयते पटोऽनुभूयत इत्यनुभाव्यतयैव घटादिः प्रकाशत इति चेत् अनुभूतिरपि परगता स्वगता चातीतानागतकालयोरनुमानशब्दसंस्कारादिजन्यसंविदन्तरकर्मतयैव भातीति तुल्यम् । अनुभूतेरनुभाव्यत्वप्रतीतिर्भ्रान्तिरिति चेत्, किं घटादेरनुभाव्यत्वप्रतीतिर्भ्रान्तिर्न देवानांप्रियस्य ? ततश्च परमार्थानुभाव्यत्वप्रतिक्षेपे घटादेरपि परमार्थानुभाव्यत्वरहितत्वाद्व्यतिरेकदृष्टान्तासिद्धिः । निषेध्यस्य क्वचिदप्यप्रसिद्धेर्निषेधासिद्धिश्च । अपरमार्थानुभाव्यत्वप्रतिक्षेपे सिद्धसाधनत्वं स्वपक्षविरोधश्च । अन्यथा तद्विषयशास्त्रानुमानाद्यनारम्भप्रसङ्गात् । तत एवानुभाव्यत्वमात्रनिषेधोऽप्यशक्यः । किंच यदि परगतानुभूतिर्नानुभूयते, कथं शब्दार्थसम्बन्धग्रहः ?

परबुद्धिविशेषानुमानेनैव हि सर्वत्र सिद्धे कार्ये वा व्युत्पत्तिः । एवं च व्युत्पत्तेरशक्यत्वाच्चेष्टाशब्दयोः प्रमाणकोटिनिक्षेप एव न स्यात्; परस्पराभिप्रायानभिज्ञतया वादिनोश्शुष्ककलह एव स्यात्; परस्पराशयपरिज्ञानादेव च सर्वो लौकिको व्यवहारः, त्वत्समानानां च पशुमृगादीनां भयाद्युत्पत्तिश्च । तदेतत्सर्वमभिप्रेत्योक्तम्—* परानुभवानुमानानभ्युपगमे च शब्दार्थसम्बन्धग्रहाभावेन समस्तशब्दव्यवहारोच्छेदप्रसङ्गः इति । * आचार्यस्य ज्ञानवत्तामनुमाय तदुपसत्त्यादि च क्रियते इति भाष्यं शिष्यस्य च व्यवहारविशेषादिभिरन्यथाज्ञानादिकमनुमाय तस्मै तत्त्वमुपदिश्यत इत्यस्योपलक्षणम् । तदेवमनुभूतेरन्यस्य वा वेद्यत्वं नास्तीति प्रतिज्ञानं स्वव्याघातकत्वान्न साधनाङ्गमिति ॥

ननु वेद्यत्वं वेद्यं न वा ? आद्ये वेद्यत्वस्य वेद्यत्वान्तराश्रयत्वेनानवस्था । अन्यथा वेद्यत्वाभावे वेद्यमेव न स्यात् । उत्तरत्रावेद्यत्वं क्वचित्त्वयाऽपि प्रतिज्ञातं स्यात्—इति चेत् हन्त किं [तर्हि] वेद्यत्वस्य वेद्यत्वान्तरप्रतिक्षेपेणावेद्यत्वसमर्थनार्थमयं प्रयासः ? उत वेद्यत्वमेव किमपि नास्तीति तत्स्वरूपप्रतिक्षेपार्थम् ? अथान्यार्थम् ? अनर्थको वेति । आद्ये त्वदुक्तानुमानस्य सपक्षे सति तत्रावर्तमानत्वात्सर्वानुमतासाधारणाख्याभासत्वप्रसंगः । तत्र साध्यवृत्तिर्मिथ्याभूतेति परिहार इति चेत् तर्हि तस्य वेद्यत्वमेवायातमिति निरर्थकास्सन्नाहाः । अनुभूतावपि च भवतामवेद्यत्वलक्षणसाध्यवृत्तिर्मिथ्याभूतैव, निर्धर्मकत्वाभ्युपगमात्; तस्य स्वरूपत्वाभ्युपगमे च विवाद एव नस्यात्—इत्यादिकमन्यत्र ग्राह्यम् । नापि द्वितीयः, वेद्यत्वस्वरूपापह्नवेन सर्वस्यापि वेद्यत्वप्रतिक्षेपे पुनरप्यसाधारणत्वप्रसङ्गात् । भ्रान्तिसिद्धं वेद्यत्वं तत्र विद्यत इति चेत्, तदनुभूतावपि समानमेव । तत्प्रतिक्षेपे ह्यपसिद्धान्तप्रतीतिविरोधादयः । न तृतीयः, अन्यस्य कस्यचिदनुपलम्भात् । चतुर्थस्तु परिशिष्टोऽस्मदिष्ट इति । एतेन वाच्यत्वं वाच्यमवाच्यं वेत्यादिप्रलापोऽपि प्रत्युक्तः । यच्चाप्रसिद्धविशेषणत्वपरिहारार्थं वेद्यत्वं किंचिन्निष्ठात्यन्ताभावप्रतियोगि, धर्मत्वात् घटत्ववदिति सामान्यतः साध्यप्रसिद्धिसाधकत्वेनोक्तमनुमानम्, तदपि प्रत्युक्तम्, किंचिच्छब्देन तत्रैव तस्य वेद्यत्वापादनात्, किंचित्त्वधर्मेणानैकान्त्यप्रसंगाच्च । न हि किंचिच्छब्दवाच्यस्य किंचित्त्वं नास्तीति वक्तुं शक्यम्, वेद्यत्वादेरपि तथाऽपह्नवप्रसङ्गेनाश्रयासिद्ध्यादिप्रसङ्गात् । किंचित्त्वाभावे च न किंचिदेव भवेदिति तुच्छत्वमेव प्रसज्येत । तथा च तन्निष्ठात्यन्ताभावप्रतियोगित्वसाधने भवतो न विवक्षितविशेषसिद्धिः । किंच सामान्यतः कस्यचिद्वेद्यत्वं नास्तीत्येतावति साधितेऽपि किंचिच्छब्दार्थोऽनुभूतिरिति कुतोऽवसीयते ? पूर्वोक्ताविगीतहेतुवैभवादिति चेत् तर्हि घटस्स्वयंप्रकाशो घटत्वादित्यादिहेतुनाऽपि घटादिविशेषपरिग्रहो दुर्वारः । अनुभाव्यत्वप्रतीतिसदसद्भावाभ्यां वैषम्यं तु परिहृतम् । तर्कानुग्रहसदसद्भावाभ्यां वैषम्यमिति चेत्, कोऽसौ तर्कः ? अनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्ग इत्युक्तरूप इति चेन्न; घटादावपि तथाविधतर्कस्योदाहृतत्वात् । किंच यदि घटादिवदनुभूतेरनुभूतिलक्षणविरहस्स्यात्तदाऽननुभूतित्वं युक्तम्, न पुनरनुभाव्यत्वमात्रेण तत्सिद्धिः; तस्य तदप्रयोजकत्वात् । न चानुभाव्यत्वेऽनुभूतिलक्षणविरहस्स्यादिति वक्तुं शक्यम्, अनुभवान्तरानुभाव्येऽपि परानुभवादौ स्वसत्तयैव स्वविषयभासकत्वरूपस्य स्वसत्तयैव स्वाश्रयं प्रति प्रकाशमानत्वरूपस्य वा कस्यचिदनुभूतिलक्षणस्य स्वानुभवसिद्धस्यानपगमात् । तदवस्थाने चानुभूतित्वस्यानपायादिति । तदिदमुच्यते—* नचान्यविषयत्वेऽननुभूतित्वमित्यादिना । किं च योऽयमनुभाव्यत्वेऽनिष्टप्रसङ्गस्सोऽननुभाव्यत्वेऽपि समान इति प्रतितर्कप्रतिघातः । अनुभूतेरननुभाव्यत्वे गगनकुसुमादिवदननुभूतित्वप्रसङ्ग इति । तुच्छत्वात्तत्राननुभूतित्वम्, न त्वननुभाव्यत्वादिति चेन्न; साध्यसमव्याप्त्यभावेनोपाधित्वायोगात् । न ह्यनुभूतिव्यतिरिक्तेषु तुच्छत्वं त्वयाऽभ्युपगम्यते ।

तत्रत्यमननुभूतित्वं तत्प्रयुक्तमित्येतावन्मात्रं विवक्षितमिति चेत्, तर्हि घटादिगतमप्यननुभूतित्वं तत्तद्वस्तुप्रतिनियतघटत्वादिप्रयुक्तं न त्वनुभाव्यत्वनिबन्धनमिति स्यात्। आश्रयाभावो धर्माभावे प्रयोजको भवितुमर्हति, निराश्रयधर्मसिद्ध्ययोगात्; न पुनराश्रयगतधर्ममात्रसद्भाव इति चेत् तर्ह्यनुभाव्यत्वमपि घटत्वादिवन्नाननुभूतित्वप्रयोजकमिति स्यात्, धर्ममात्रत्वाविशेषात्। व्याप्त्या विशेष इति चेन्न; सहचारमात्रस्य व्याप्तित्वाभावात्। न ह्यननुभाव्यत्वानुभूतित्वयोः कश्चिद्विरोधो दृष्टः, येन नियमस्सिध्येत्, साहित्यमेव परगतानुभवादिषु दृष्टम्। किंच अनुभूतेरेवानुभाव्यत्वेऽवश्यम्भाविन्यननुभूतित्वं प्रति कथमनुभाव्यत्वस्योपाधित्वम्? अनुभाव्यत्वस्याभावेऽपि स्वप्रकाशत्वादेवानुभूतेरसत्त्वं न प्रसज्यत इति युष्माभिरभ्युपेतव्यमिति चेन्न; तथाऽपि स्वप्रकाशसिद्धेयमनुभूतिरित्येवंरूपानुभूतिविषयतामन्तरेण तत्सत्त्वस्य व्यवस्थापयितुमशक्यत्वात्। इदमखिलमभिसन्धायोक्तम्—* घटादेरप्यज्ञानाविरोधित्वमेवाननुभूतित्वनिबन्धनम्, नानुभाव्यत्वमित्यास्थीयताम्—इति।

नचास्य साधनव्यापकत्वम्, अनुभाव्यतयाऽभ्युपगन्तव्ये परानुभवस्वरूपे तदभावदर्शनात्। नच साध्यसमव्याप्तिहानिः, अनुभूतिव्यतिरिक्तेषु सर्वेष्वपि साक्षादज्ञानविरोधित्वाभावात्। अनुभाव्यत्वेऽनुभूतेरज्ञानाविरोधित्वमपि प्रसज्यत इति चेत्, अननुभाव्यत्वेऽपि गगनकुसुमादिवत्तत्प्रसङ्गस्तदवस्थः। असत्त्वप्रयुक्तं तत्राज्ञानाविरोधित्वमिति तु दत्तोत्तरप्रायमेव। एवम् अनुभूतिरनन्याधीनस्वधर्मव्यवहारा, स्वसम्बन्धादर्थान्तरे तद्धर्मव्यवहारहेतुत्वात्—इत्याद्यनुमानेष्वप्यवेद्यत्वविवक्षायां पूर्ववद्दोषो भाव्यः, आगमबाधश्च। यदि ह्यनुभूतिरूपं ब्रह्म न वेद्यम्, कस्तर्हि तत्त्वावेदकशास्त्रस्य विषयः? प्रपञ्चमिथ्यात्वमात्रमिति चेन्न; *अथातो ब्रह्मजिज्ञासा, *आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, *ब्रह्मविदाप्नोति परम्, *अस्ति ब्रह्मेति चेद्वेद, सन्तमेनं ततो विदुः इत्यादीनां समुद्रघोषत्वप्रसङ्गात्। ब्रह्माध्यस्तोपरागमात्रनिवर्तनार्थं ब्रह्मानुवादोऽयमिति चेत्, तथाऽपि तैस्तैश्शब्दैरनुवादरूपैरप्यनुभाव्यत्वमवर्जनीयमेव। मिथ्याभूतमिदमनुभाव्यत्वमिति चेत्, घटादेरपि समानमित्युक्तमेव। उपहितं ब्रह्म शास्त्रवेद्यमिति चेन्न; अतत्त्वावेदकत्वप्रसङ्गात्। तस्याप्युपाधेर्विलयान्न दोष इति चेन्न; तत्प्रतिक्षेपकेणापि केनचिदुपहितरूपेणानुपहिताकारेण वा ब्रह्मस्वरूपस्पर्शनस्यावर्जनीयत्वात्। अत उपहितरूपं वेद्यमनुपहितरूपं तु न व्यवहर्तुं शक्यमिति तस्य वेद्यत्वप्रतिक्षेपोऽपि दुश्शकः। ननु अवेद्यत्वेऽपि स्वप्रकाशत्वेनैवावस्थाय *तत्त्वमस्यादिवाक्यजन्यस्य स्वेतरनिषेधवाक्यजन्यस्य *द्रष्टव्य इत्यादिविहितज्ञानस्य चावच्छेदकं ब्रह्म भवेदिति चेन्न; अवच्छेदकमिति बुद्ध्यैवात्रापि विषयीकारात्। अन्यथा [स्वयंप्रकाशानुवादादि] स्वप्रकाशानुमानादिनैरर्थक्यप्रसङ्गाच्च। तस्मादवच्छेदकत्वावेद्यत्वप्रतिपादकमपि वाक्यमन्ततो वेद्यत्वमेवोपस्थापयति।

ननु—*यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्, *विज्ञातारमरे केन विजानीयात्, *येनेदं सर्वं विजानाति तं केन विजानीयात्, *यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, *न शब्दगोचरो यस्य योगिध्येयं परं पदम् इत्यादिकं कथं निर्वहणीयमिति चेत्, भवतो वा कथम्? स्वरसप्रतीतमवेद्यत्वमङ्गीकुर्वता मया किं नाम दुर्निर्वहमिति चेन्न; मतत्वविज्ञातत्वादेरपि तत्रैव स्वरसप्रतीतत्वात्, अमतविज्ञातादिशब्दैरपि तत्रैव तत्स्वरूपप्रतिपादनात्। अन्यथा प्रागुक्तनयेन परस्परविरोधेन चानन्वयादिप्रसङ्गात्। अमतत्वोपहितरूपेण मतत्वमङ्गीकुर्म इति चेत्, किमतः? तावताऽपि ज्ञानविषयत्वस्य दुस्त्यजत्वात्। अमतत्वं सामान्यत-

स्स्वानुविद्धं मतत्वमपि प्रतिक्षिपतीति चेत्, तथा सत्यमतत्वमप्रतिपन्नमेव भवेत्। तथाऽप्यमतत्वे वाक्यतात्पर्यम्, मतत्वव्यपदेशस्तु गलोपरि गर्जितमिति चेन्न; विपरिवर्तस्य दुर्वारत्वात्। कस्यामतत्वे वाक्यतात्पर्यं वर्ण्यते? ब्रह्मण इति चेत्, हन्त ब्रह्मणो वेद्यत्वभयं परित्यज्य किमेवमुच्चारयसि? यदि चाकारभेदेन मतत्वामतत्वयोर्व्यवस्था, तदाऽस्मत्पक्षेऽपि न काचित्क्षतिः। तत्तद्वाक्यप्रतिपन्नगुणविभूत्याकारितवेषेण मतत्वम्, वस्त्वन्तरस्वभावविरहेण तत्तत्प्रमाणगोचरतयाऽनवच्छिन्नविषयत्वादिना चामतत्वमिति। एतेन * अविज्ञातं विजानतामित्यादिकमपि निर्व्यूढम्। * विज्ञातारमरे केन विजानीयात् इत्यत्र कृच्छ्रेण ज्ञातव्यत्वे तात्पर्यम्, बाह्यार्थप्रकाशनक्षमचक्षुराद्यगोचरत्वे वा। एवम्, * येनेदं सर्वं विजानाति तं केन विजानीयात् इत्यादिकमपि भाव्यम्। यद्वा, * मत्तस्स्मृतिर्ज्ञानमपोहनं च इत्याद्युक्तप्रकारेण यत्प्रसादेनेदं सर्वं विजानाति, तं परमात्मानं तत्प्रसादमन्तरेण केन विजानीयादिति। * यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह इत्यत्रापि ब्रह्मानन्दस्य वाङ्मनसापरिच्छेद्यत्वे तात्पर्यं प्रकरणादौ व्यक्तम्। अन्यथा यच्छब्दादिभिस्तत्प्रतिपादनासम्भवात्; * आनन्दं ब्रह्मणो विद्वान् इति तद्विषयविहितवेदनासंभवाच्च। एतेन, * न शब्दगोचरो यस्येत्यादिकमपि निर्व्यूढम्; निष्कृष्टस्वरूपस्य देवादिशब्दागोचरत्वे वा तात्पर्यम्। एवमन्यान्यपि वेद्यत्वादिप्रतिक्षेपकाणि वाक्यानि प्रमाणान्तरश्रुत्यन्तरवाक्यशेषवाक्यस्थपदान्तराविरोधेन नेतव्यानि। * अनुभाव्यत्वेऽननुभूतित्वमित्युपहास्यम् इति तर्कदूषणमुपसंहृत्योपहास्यतां प्रतिपादयता आगमबाधादिकं सुस्पष्टमिति सूचितं मन्तव्यमिति ॥

॥ इति शतदूष्ण्याम् अवेद्यत्वभङ्गवादः विंशः ॥ २० ॥

॥ अथ संविदनुत्पत्तिदूषणवादः एकविंशः ॥ २१ ॥

विविधविषयाकृष्टैर्वागादिभिस्सुलभागसां स्वयमुपनतं स्वान्तध्वान्तं चिरस्य निरस्य नः।
भगवति हरौ प्रत्यक्तत्त्वान्तरात्मनि निर्भरप्रसृमरसुधाधाराकारा प्रसीदतु शेमुषी ॥

ये तु स्ववचनविरोधजालमप्यवधीरयन्तः सर्वसाक्षिकामपि संविदुत्पत्तिं प्रतिक्षिपन्ति, तान्प्रति ब्रूमः। किं घटादिविषयप्रकाशात्मिकाया एव संविद उत्पत्तिः प्रतिक्षिप्यते? उत सकलविषयविरक्तायाः कस्याश्चिदन्यस्याः? नाद्यः, घटादीनामप्यनुत्पत्तिमत्त्वप्रसंगात्। नहि तदुत्पत्तेः प्रागेव तद्विषया प्रत्यक्षसंविदस्मदादीनां सम्भवति। अन्यथाऽस्मदादीनामपि सर्वदा सर्वज्ञत्वप्रसङ्गात्। ननु पूर्वं स्वरूपेणावतिष्ठते, पश्चात्तु सामग्रीवैचित्र्यात्तत्तद्घटादिविषया भविष्यतीति चेन्न; सत्यां संविदि सामग्र्या एवानपेक्षणात्। तत्तद्घटादिविषयीकरणलक्षणसम्बन्धार्थं तदपेक्षेति चेन्न; सामग्रीविशेषप्रतिनियतसंवित्स्वरूपातिरिक्तसम्बन्धकल्पने प्रमाणाभावात्। संवित्स्वरूपनित्यत्वे श्रुतिसिद्धे सामग्रीवैयर्थ्यपरिहाराय तत्कल्पनमिति चेत्, स किं संविदि साध्य आकारः? उतानादिसिद्धं संवित्स्वरूपमेव? तत्र सधर्मकत्वसविकारत्वादिभीरुणा भवता प्रथमः पक्षो न कक्षीकार्यः। आरोपितधर्मविकारान्वयाददोष इति चेन्न; आरोपस्यैव विषयीकरणात्मकस्य निरूप्यमाणत्वात्। यदि हि विषयीकरणमप्यारोपितम्, तर्हि तद्विषयविषयीकरणान्तरापेक्षयाऽनवस्था। क्वचिद्वा विषयीकरणस्य सत्यत्वेन प्रागुक्तो दोषः। न च विषयीकरणमारोपितमप्यविषय इति वाच्यम्; व्याघातात्। नापि विषयीकरणान्तरमन्तरेण स्वरूपेणैव तत्प्रकाशत इति वाच्यम्, तत्रैव सामग्रीनैरपेक्ष्यप्रसंगेन सर्वदा संविदस्तद्विषयत्वे तत्सम्बन्धि-

घटादेरपि सर्वदा प्रकाशप्रसङ्गात् । किंच विश्वव्याप्तायामनादौ संविदि तत्तदधिष्ठानतया भासमानायां सम्बन्धार्थं सामग्री-गवेषणमिति भवतो न युज्यते ; न ह्यसंविदध्यस्तो घटादिलक्षणः कश्चित्समस्ति भवताम् ; न च घटादिः सामग्र्यधीनसंब-न्धलक्षणमात्रसिद्धसत्ताकः । अतो यावदुत्पत्तिविनाशं घटादिप्रकाशो दुर्वारः । प्रकाशत एव कस्मैचिदिति चेन्न ; सर्वस्मै प्रसङ्गात् । एकस्यामेव हि संविदि विश्वारोपो भवताम् । अनन्तसंविदध्यासात्प्रकाशाप्रकाशोपपत्तिरिति चेन्न ; घटादिवि-षयसंविदामध्यस्तत्वे संविदन्तरानुपलम्भे च शून्यवादप्रसंगात् । सत्यां संविदि नानात्वमात्रमध्यस्तमिति चेत्, तथा सति सर्वत्र सर्वविषयप्रकाशो दुर्वारः, सर्वेषु प्रतिमाचन्द्रेषु कलङ्कप्रकाशवत् । यस्तु दृग्दृश्ययोस्सम्बन्धानुपपत्त्या विश्वमपह्नो-तुमीहते, स कथं तत्सम्बन्धार्थं प्रयतते ? अतः संविदनुत्पत्तिवादिनामप्रकाशो वा यावत्सत्त्वं तत्प्रकाशो वा दुष्परिहरः । प्रागभावरहितायास्संविदः कथमुत्पत्तिरिति चेन्न ; उक्तानुपपत्त्यैव तद्वत्त्वात् ।

ननु न तावत्संविदा स्वप्रागभावग्रहः, स्वप्रागभावस्थितौ संविदनुत्पत्त्या ग्राहकाभावात् । तदपक्रमे तु विषयाभावादेव तद्ग्रहणायोगात् । नापि संविदन्तरेण तद्ग्रहः, निष्प्रतियोगिकाभावग्रहणायोगात् । प्रतियोगिन्याश्च संविदस्स्वतस्सिद्धायास्संविदन्तरविषयत्वायोगादिति । नैवम्, स्वतः परतश्च तद्ग्रहोपपत्तेः । स्वतस्तावत् एतावन्तं कालं न किंचिदहमज्ञासिषमिति योऽयं प्रत्ययः, स हि सामान्यतः पूर्वकालवर्तिनं स्वात्माभावमपि गृह्णाति । न चातीतस्य प्रागभावस्य कथं विषयीकार इति वाच्यम्, अस्मदादिप्रत्यक्षज्ञानव्यतिरिक्तज्ञानेषु त्रिकालवर्तिनामपि ग्रहणात् । न चातीतस्यासतो ग्रहणादप्रमाणत्वम्, अतीतस्यापि स्वकाले सत्त्वात्, अन्यथा वर्तमानस्य पूर्वोत्तरकालासत्त्वेन तद्ग्राहि-णोऽप्यसद्ग्राहित्वेनाप्रमाणत्वप्रसङ्गात् । गृह्यमाणवैपरीत्याभाव एव हि प्रामाण्यम्, न पुनर्ग्राह्यस्य ग्रहणसमकालत्वम् । अन्यथा भवन्मतेनानिर्वचनीयरजतसमकालवर्तिन्या रजतभ्रान्तेः प्रामाण्यप्रसङ्गात् । संवित्प्रागभावग्राहकं किमिदं प्रमाण-मिति चेत् यद्धटाद्यभावग्राहकं तदेव । प्रत्यक्षानुप्रविष्टया वा पृथक्प्रमाणात्मिकया वा योग्यानुपलब्ध्या घटाद्यभावग्रह इति चेत्, इहापि तथैव । अतिक्रान्तैवानुपलब्धिरुपलब्धिकाले कथमुपकुर्यादिति चेन्न ; स्मृत्यभावकल्पितया प्राचीनयैव तया तत्सिद्धेः, प्रातर्गजाभावादिविज्ञानवत् । तद्वदत्रापि प्रमाणसंज्ञाविशेषो यथारुचि प्रक्षिप्यताम् । न च संस्कार-विलयात् स्मृत्यभावः ; प्रबलतरसुखदुःखकालदैर्घ्यादिसंस्कारतिरस्कारकाभावे तदयोगात् । न च सुषुप्त्यादय एव संस्का-रोच्छेदकाः, तथा सति पूर्वदिनाद्यनुभूतस्यास्मरणप्रसङ्गात् । तथा च सुप्तोत्थितः शत्रुमपि मित्रतया प्रतिपद्येत, पु[त्र]त्री-मपि कलत्रतया, श्रोत्रमपि नेत्रतयेति विश्वविप्लवः । न च विषयप्रकाशविरहादहंभावविगमाद्वा संस्कारानुत्पत्त्या तद-स्मृतिः,अर्थान्तराप्रकाशासद्भावयोः प्रकाशमानसंस्कारोत्पत्तिप्रतिबन्धकत्वेऽतिप्रसङ्गत् । न चाविशदप्रकाशरूपत्वादस्मृतिः, सर्वदा संविदंशस्यास्मरणप्रसङ्गात् । न हि संविदंशे वैशद्यं तवास्ति, नित्यमेव निर्धर्मकत्वात् । विषयाश्रयोल्लेखाद्वैशद्ये तत्स्मृतिरिति चेत्, तदपि न ; वैशद्यमन्तरेणाप्यन्धकाराद्यनुभूतवस्तुमात्रादिषु स्मृतिदर्शनात् । तदेवं स्वतस्तत्प्रागभाव-ग्रह उपपादितः । परतोऽपि तत्प्रागभावग्रहः संविदो वेद्यत्वसमर्थनादेव सिद्धः । अन्यथा त्वद्वाक्यजन्यापि संवित्तत्प्रा-गभावस्य दुर्ग्रहत्वं न साधयेत्, संवित्प्रागभावदुर्ग्रहत्वग्रहणे संविद्ग्रहणावश्यंभावात् । स्वप्रकाशस्वरूपमेव प्रतियोगित्वे-नोपजीव्य तत्प्रागभावदुर्ग्रहत्वं साध्यत इति चेत्, एवं तर्हि तत्प्रागभावग्रहेऽपि तदेवोपजीव्यताम् । किंच, प्रतिवादिनः शिष्याणां च त्वत्सिद्धान्तार्थज्ञानमनुत्पन्नं मत्वैव त्वया वाक्यं प्रयुज्यते, स्वयमपि कदाचिद्गुरूपदिष्टं प्रतिवादिनिर्दिष्टं

वाऽर्थमजानानो न जानामीत्येव भाषसे, जिज्ञाससे च ; एवं मूर्खपण्डितविभागोऽपि लोके बहुलमुपलभ्यते । तदेतदखिलं ज्ञानप्रागभावग्रहाभावे कथं घटेत ? ज्ञानादिविधिशास्त्रं च कथं जीवेत् ? तदेवं स्वस्मिन् वर्तमानस्य भविष्यत्संवित्प्रागभावस्य ग्रहणं योग्यानुपलब्ध्या जायते, अतीतस्य तु स्मरणानुमानादिना । परगतस्याप्यनुमानादिनैव । अतः स्वतः परतोऽपि सिद्धः संविदः प्रागभावः ।

ननु भवद्भिरपि धर्मभूतज्ञानस्यापि स्वरूपनित्यत्वमभ्युपेतम्, ततश्च तत्प्रागभावतदुत्पत्त्यादिसमर्थनेऽपसिद्धान्त इति चेन्न ; अस्माकं धर्मभूतज्ञानस्य सधर्मकत्वादवस्थाविशेषवत्त्वात्तत्तदर्थं सामग्रीसमागमोपपत्तेः । तत्तत्प्रकाशात्मकावस्थाविशेषेषु च प्रागभावोत्पत्त्यादिबुद्धेरुपलम्भविरोधाद्यभावात्, अपसिद्धान्ततानवताराच्च । अनुभूतेरवस्थान्तरापत्तिरेव न सम्भवति, अजत्वादेवेति चेन्न ; स्वरूपानुत्पत्तिमात्रस्य भवदभिमताविद्यया अस्मदभिमतप्रकृत्यादिभिश्च व्यभिचारात् । समस्तव्यतिरिक्तत्वे सतीति तर्ककौशलम्, अन्ततोऽप्रयोजकत्वं च । अवस्थान्तरापत्तिराहित्यस्य हेतुत्वे साध्याविशेषात्, मिथ्याभूतावस्थान्तरनिषेधेऽपसिद्धान्तात्, सत्यावस्थानिषेधे च व्यतिरेकव्याप्तेर्भग्नत्वात् । यत्सत्यावस्थाविशिष्टं तज्जायते, यथा घट इति हि सा । न च घटादेः सत्यावस्थाविशिष्टत्वं त्वयाऽभ्युपगम्यते । एतेनानुभूतेर्विनाशनिषेधोऽपि प्रत्युक्तः, प्रागुक्तप्रकारेण प्रत्यक्षादिबाधाच्च । यदि घटाद्यनुभूतिर्न विनश्येत्, तर्हि सुषुप्त्याद्यनुपपत्तिः, भवत्पक्षे मोक्षानुपपत्तिश्च । विद्यमानायां तस्यां विषयोल्लेखविलक्षणावस्थाविशेषस्य प्राग्वदेव दुष्प्रतिपादत्वात् । प्रध्वंसेऽपि ग्राहकाभावचोद्यं प्राग्वदेव परिहर्तव्यम् । न च स्वरूपनित्यत्वे प्रध्वंसानुपपत्तिः, घटादिष्वपि सत्कार्यवादिभिस्तथैव प्रध्वंसस्य निर्वहणीयत्वात् । उक्तं च भाष्ये—* तमिममिन्द्रियद्वारकज्ञानप्रसरमपेक्ष्योदयास्तमयव्यपदेश इति । नापि द्वितीयः, अहमर्थविलक्षणाया निर्विषयायास्संविदोऽनुपलम्भनिरस्तत्वात् । मुक्तौ निर्विषयत्वस्यान्यत्र प्रतिक्षेपात् । स्वापमदमूर्च्छासु निर्विषयसंविदुपलम्भोऽस्तीति वाङ्मात्ररूपत्वात् । अहमर्थस्य तु स्वरूपमात्रप्रकाशात्मकस्य विषयान्तरविरहेऽपि घटादिविषयग्राहिसंविद्विलक्षणतया तदाश्रयतया च प्रतिपन्नस्य भवता संविद्विलक्षणतयाऽहङ्कारग्रन्थित्वाभ्युपगमात् ; पक्षान्तरे तु तद्वदेव तद्धर्मभूतसंविदोऽपि सर्वदा निर्विषयत्वसाधनस्योपलम्भनिरस्तत्वात् । सुषुप्तौ तु निर्विषयायास्तस्याः प्रकाशादर्शनात् । स्वमात्रप्रकाशस्याप्यहमर्थस्वरूपस्यास्माभिः प्रत्यक्त्वानन्दत्वादिविशेषवत्तयैव स्वतःप्रकाशत्वाभ्युपगमेन क्वचिदपि निर्विशेषप्रकाशानभ्युपगमात् । यद्यप्यस्मत्पक्षे सुषुप्त्यादिषु धर्मभूता संविन्निर्विषया, तथाऽपि साश्रयत्वादिभिस्तदानीमपि न निर्धर्मकत्वम् । विषयरहितायास्तु तस्यास्तदानीं न प्रकाशमिच्छामः, येन प्रतिसन्धानप्रसङ्गचोद्यान्न मुच्येमहि । उक्तं हि भाष्ये—* यत्त्वनुभूतेस्स्वयंप्रकाशत्वमुक्तम्, तद्विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैव इत्यादि । यच्चानुमानम्—अनुभूतिरनुत्पन्ना, अनुभूतित्वादित्यादिकम्, तदप्युपपादितप्रत्यक्षादिसमस्तप्रमाणबाधितम्, प्रागुक्तप्रतिकूलतर्कजालप्रतिहतं च । केवलव्यतिरेकिभङ्गश्चान्यत्र कृतः । घटादिविषयोल्लेखरहितस्वरूपमात्रपक्षीकारे चाश्रयासिद्धिर्वा सिद्धसाधनं वेत्यादिदूषणमूह्यम् ॥

॥ इति शतदूषण्यां संविदनुत्पत्तिदूषणवादः एकविंशः ॥ २१ ॥

———

अथ संविन्निर्विकारत्वानुमानभङ्गवादः द्वाविंशः ॥ २२ ॥

परिणमयति विश्वं यस्स्वयं निर्विकारः परिणमति च योऽसौ तत्तदर्थान्तरात्मा ।
विषमविषयतृष्णाधन्वकान्तारजातं व्यपनयतु भयं मे विश्वजिष्णुस्स विष्णुः ॥

यदुच्यते—अनुभूतिर्निर्विकारा, अनुत्पन्नत्वात्, यदुक्तसाध्यं न भवति तदुक्तसाधनमपि न भवति, यथा घटादिरिति । तत्र संविदुत्पत्त्यादिसमर्थनादसिद्धिबाधौ सुगमौ । किंच किमिदं निर्विकारत्वं नाम? किमुत्तरावधिराहित्यम्? उत घटादिवन्नामान्तरव्यपदेशार्हावस्थाविशेषराहित्यम्? उतावस्थामात्रराहित्यमिति । नाद्यः, अनुत्पन्नेन प्रागभावेनोत्तरावधिमता व्यभिचारात् । भावरूपाज्ञानेन च भवत्पक्षे । भावान्तराभाववादिनस्तेऽनुत्पन्नः प्रागभावो नास्तीति चेन्न; त्वदभिमतेनाप्यन्यतरानैकान्त्यनिर्वाहात् । भावत्वे सतीति विशेषयिष्याम इति चेन्न; कथायामविशेषितस्य हेतोर्विशेषणे हेत्वन्तरापातात् । अस्मान्प्रति व्यर्थविशेषणत्वाच्च । ततश्च पुनस्त्यागे प्रतिज्ञाहानिः । भावरूपाज्ञाने व्यभिचारस्तदवस्थः । इदं सर्वं हृदि निधायाह—* भावेष्विति विशेषणे तर्ककुशलताऽऽविष्कृता भवतीति । विशेषितोऽप्ययं हेतुर्भवदभिमतयाऽनाद्यविद्यया तत्त्वज्ञानोदयादन्तवत्याऽनैकान्तः । मिथ्याभूतायास्तस्याः प्रध्वंसोऽपि मिथ्याभूत इति नानैकान्त इति चेन्न; घटादिप्रध्वंसस्यापि मिथ्यात्वेन यदुत्तरावधिमदिति व्यतिरेकव्याप्तेर्दुर्ग्रहत्वापातात् । व्यावहारिकं घटादेरुत्तरावधिमत्त्वमुपजीव्य व्याप्तिग्रह इति चेन्न; अविद्याया अपि तथाविधोत्तरावधिमत्त्वाभ्युपगमेनानैकान्त्यस्यानिस्तारात् । अथ पुनः परमार्थोत्तरावधिराहित्यमेव साध्यार्थ इत्यातिष्ठसे, तथाऽपि व्यतिरेकासिद्धिः; यत्परमार्थविकारवत्तदुत्पन्नं यथा घट इति भवतोच्चैर्भाषितुमशक्यत्वात् । माभूद्व्यतिरेकः; अविद्याऽपि सपक्ष एवास्तु, हेतुश्च सपक्षैकदेशवर्तिकेवलान्वयी भविष्यतीति चेन्न; तथाऽप्यप्रसिद्धविशेषणत्वापातात् । न ह्यप्रमितप्रतियोगिकं व्यतिरेकमभ्युपगच्छामः । न च परमार्थविकारं प्रमितमिच्छसि । न चाप्रमितस्य परमार्थता सम्भवति । क्वचिच्च परमार्थविकाराभ्युपगमेऽपसिद्धान्तः । ततश्च भवद्दृशा विकारश्चेदपरमार्थ इति व्याप्तौ सिद्धायां व्यवच्छेद्याभावाद्व्यर्थं विशेषणमिति । तदेतदखिलमभिसन्धायाह—* किं भवतः परमार्थभूतोऽप्यस्ति विकारः? येनैतद्विशेषणमर्थवद्भ[विष्य]वतीति ।

ननु माभूद्व्यवच्छेद्यम्, तथाऽप्यनैकान्त्यपरिहारक्षमतयाऽपि सार्थं विशेषणमिति चेत्, हन्तैवं शशविषाणरूपविकाररहितेति किं न साध्यते? तावताऽपि ह्यनैकान्त्यं सुपरिहरम् । अप्रसिद्धविशेषणत्वापातादिति चेत्, तुल्यम् । अस्तु तर्हि सिद्धसाधनत्वपरिहारार्थं परमार्थेति विशेषणम्, प्रसङ्गतस्त्वनैकान्त्यमपि परिहरिष्यति; विकारराहित्यमात्रे हि साध्यमाने मिथ्याभूतविकारराहित्यमात्रेण यदि भवान् सिद्धसाधनतां ब्रूयात्तदाऽस्माभिर्विशेषितव्यमिति चेन्न; अतिप्रसङ्गात् । पर्वतोऽग्निमानित्यादिषु सर्वेष्वपि प्रयोगेषु परमार्थाग्निमानित्यादिप्रयोगप्रसङ्गात् । स्वयंप्रकाशानुमानेषु च भवताऽनुभूतिः परमार्थतः स्वयंप्रकाशेत्यादिप्रयोगो वाच्यः, अन्यथा हि मिथ्याभूतस्वयंप्रकाशत्वाभ्युपगमेन परः सिद्धसाधनतामुद्घाटयेत् । नच वयमप्यपरमार्थान् कांश्चन विकारानिच्छामः, येन संविदस्तद्योगात्सिद्धसाधनतां प्रब्रूम इति बिभेषि । अतः सुष्ठूक्तं भाष्ये विशेषणवैयर्थ्यम् । उत्तरयोरपि कल्पयोरनैकान्त्यमदर्शयत्—* भवदभिमताऽविद्याऽनुत्पन्नैव विविधविकारास्पदमिति । तत्र न तावद्द्वितीयः, अविद्याया एव महदादिनामान्तरव्यपदेशार्हसमस्तविकारयोगित्वस्य भवद्भिरेव स्वीकारात् । घटकपाललोष्टाद्यवस्थाविशेषोऽपि ह्यन्ततोऽविद्याया एव । अनुभूतिस्मृत्यादिनामान्तरव्यपदेशार्हा-

वस्थाभेदाश्च संविद एव प्रत्यक्षमीक्ष्यन्त इति कथं तदभावसाधनम्? अनुभूतित्वादयः संविदवस्थाविशेषा मिथ्याभूता इति चेन्न; दत्तोत्तरत्वात्। नहि सत्यः कश्चिदवस्थाविशेषस्ते समस्ति। अत एव न तृतीयोऽपि। अपसिद्धान्तप्रसङ्गस्त्वधिकः, मिथ्याभूतानामवस्थाविशेषाणां संविदो भवतैव स्वीकारात्। अन्यथा जगद्भ्रमतन्निवृत्त्यपेक्षातदुपायगवेषणतदनुष्ठानतदर्थशास्त्रारम्भादेरभावप्रसङ्गात्। इष्टप्रसङ्गोऽयमिति चेन्न; व्यावहारिकव्यवस्थाप्रतिष्ठितानां तेषां त्वयैव स्वीकारात्। अन्यथा तिष्ठ सत्यपक्षे, त्यज वा शास्त्रारम्भादिकमिति। संविद्विकाराणां मिथ्यात्वमेवात्र साध्यत इति चेन्न; अत्रापि व्यतिरेकभङ्गप्रसङ्गात्। नहि यद्विकारवत्तदुत्पन्नं यथा घट इत्यत्र सत्यविकारयोगित्वमुत्पत्तिव्याप्तं दृष्टम्, येन तन्निवृत्त्या तन्निवृत्तिस्स्यात्। लोकदृष्ट्या तथा दर्शनमस्तीति चेन्न; तस्याः संविद्विकारेषु घटादिविकारेषु च पक्षपाताभावेन त्वदुक्तव्याप्तेर्दुर्ग्रहत्वात्। त्वद्दृष्टेस्तूभयविद्वेषशीलतयाऽपि तथाविधनियमग्रहासिद्धेः। केवलान्वयित्वशङ्काऽपि पूर्ववद्दूष्या। ननु भवतोऽपि ब्रह्मानुत्पन्नं निर्विकारं च, ततस्तदेव समर्थयमानेष्वस्मासु कस्ते कोप इति चेन्न; अस्मत्सिद्धान्तापरिज्ञानात्। नहि वयं लोकसिद्धामुदयास्तमयादिविकारशतशालिनीमहमर्थधर्मभूतां संविदं परं ब्रह्मेति परिभाषामहे; नच तामेव सकलविषयाश्रयशून्यावस्थाम्; अपितु समस्तचिदचिद्विशिष्टतया स्वविशेषणभूतचिदचित्प्रतिष्ठितक्लेशादिजन्मादिविकारजातं स्वरूपतोऽस्पृष्टविकारक्लेशं सङ्कोचविकासवैदेशिकसार्वज्ञ्यमनन्तमङ्गलगुणमीश्वरतत्त्वम्। यदि तस्य निर्विकारत्वं साधयसि, कामं साध्यताम्। तत्र प्रमाणमिदमन्यद्वेति निपुणं विभावय। न चेश्वररूपस्यापि समस्तावस्थाशून्यत्वं साधयितुं शक्यम्, कादाचित्कतत्तन्मूर्तद्रव्यसंयोगविभागाद्यवस्थाविशेषाणां वियदादिष्विव विश्वव्यापिनीश्वरेऽपि दुर्वारत्वात् नित्यासङ्कुचितप्रकाशात्मनि तज्ज्ञानेऽपि तत्सङ्कल्पाद्यवस्थाविशेषाणामनन्तानामाम्नातत्वात्। अकर्मनिबन्धनतया च तेषामपुरुषार्थत्वप्रसङ्गाभावात्। बीजाङ्कुरवदवस्थाप्रवाहानादित्वेनाहेतुकत्वादिचोद्यानवतारात्। आगमिके चास्मिन्नर्थे हैतुकसंक्षोभस्याशक्यत्वादिति॥

॥ इति शतदूषण्यां संविन्निर्विकारत्वानुमानभङ्गवादः द्वाविंशः ॥ २२ ॥

॥ अथ संविन्नानात्वनिषेधकानुमानभङ्गवादः त्रयोविंशः ॥ २३ ॥

प्रतिपुरुषमनेकाः प्रत्यवस्थं विचित्राश्शुभगतिषु धियो यश्चोदयत्यञ्जसा नः।
अखिलचिदचिदन्तर्यामि तद्विष्णुसंज्ञं सवितुरहमुपासे तस्य देवस्य भर्गः॥

यदाहुः—अनुभूतिर्न नाना, अजत्वात्; यन्नाना तज्जायते, यथा घटः। दृश्यमानस्तु संविद्भेदो विषयाश्रयादिभेदोपाधिकत्वान्न स्वाभाविकः, घटाकाशतरङ्गचन्द्रपराभिमतसमवायादिभेदवत्। अन्यथा कल्पनागौरवप्रसङ्गादिति। तदसारम्; किमत्र यतःकुतश्चिदपि भेदो निषिध्यते? उत संविज्जातीयमात्रात्? अथ संवित्स्वरूपात्? उत संविदन्तरात्? अथवा संवित्सजातीयराहित्यं साध्यत इति। न प्रथमः, प्रत्यक्षविरोधात्, देहात्मविवेकानुपपत्तिप्रसङ्गात्; अपसिद्धान्ताच्च। * युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्ताविति हि वः कूटस्थोपदेशः। अपरमार्थोऽपि भेदस्तत्र निर्दिश्यत इति चेत् साधु तत्त्वोपदेशः समारब्धः। परमार्थतस्तयोः [ऐक्य] भेदप्रसङ्गाच्च। अत्राप्यपरमार्थभेदनिषेधे स एव दोषः, परमार्थभेदानुमितिप्रसङ्गो वा। परमार्थभेदनिषेधे

तु व्यतिरेकव्याप्तिभङ्गः, यत्परमार्थभेदवत्तदुत्पन्नम्, यथा घट इति हि सा स्यात्। नच घटादौ परमार्थभेदस्त्वयाऽभ्युपगम्यते। तदाह—* जन्मप्रतिबद्धः परमार्थविभागः किं क्वचिद्दृष्टस्त्वयेति। अविद्यायाश्चानुत्पन्नतयाऽभ्युपेतायास्संविदपेक्षया परमार्थभेदाभ्युपगमे पक्षविपक्षमात्रवृत्तितया विरुद्धो हेतुः। अपरमार्थभेदाभ्युपगमे तु जडाजडतादात्म्यातिदेशः। तदाह—* अविद्याया आत्मनः परमार्थतो विभागाभावे वस्तुतोऽविद्यैव स्यादात्मेति। न द्वितीयः, संविदः संविद्विजातीयत्वानभ्युपगमेन सिद्धसाधनात्। न हि संविदेव भवति संविज्जातीयमात्राद्भिद्यत इति कश्चिदिच्छति। तथेच्छन्तमपि प्रति नासौ हेतुः, अविद्यायां संविद्विजातीयायां तद्वृत्तेः। सा ह्यनुपपन्ना संवित्तत्त्वात् सर्वस्मादेव हि भिन्ना त्वयेष्यते। तद्भेदानभ्युपगमे तन्मिथ्यात्वाभ्युपगमे च दत्तमुत्तरम्। न तृतीयः, सिद्धसाधनत्वादेव। नापि चतुर्थः, संविदन्तरसिद्धौ तदवधिकभेदस्यापि सिद्धेस्तन्निषेधायोगात्। तदसिद्धौ कथं तन्निरूपितभेदनिषेधः। उपाधिवशात्संविदन्तरत्वेन प्रतीयमानं स्वरूपमेव संविदन्तरशब्देनानूद्य तदवधिकभेदो निषिध्यते, चन्द्रस्तरङ्गचन्द्रान्न भिद्यत इतिवदिति चेत् तथाऽपि हेतोर्विरोधः, संविदन्तराद्भिन्नायामविद्यायां तद्वृत्तेः। न हि सा संविदन्तरभेदरहिता, प्रागुक्तदोषात्। यश्च प्रवाहानादिमविद्यामिच्छति, तस्यापि प्रागभावे संविदन्तराद्भिन्ने हेतुवृत्तेर्विरोध एव। यद्यप्यभावमपि नेच्छेत्, तथाऽपि घटादिषु संविदन्तरभेदाभावात्सपक्षभूतेषु सर्वेषु हेतोरवृत्तेरसाधारणता। अपरमार्थस्संविदन्तराद्भेदस्तत्रास्तीति न सपक्षतेति चेत्; तर्हि संविदोऽपि संविदन्तरादपरमार्थभेदयोगान्न तत्र तद्राहित्यं साधयितुं शक्यम्। अपारमार्थ्यमेव तस्यात्र साध्यत इति चेत् तथाऽपि घटादिष्वपि संविदन्तरभेदापारमार्थ्यसिद्धेः सपक्षत्वमपरिहार्यम्। संविदः संविदन्तराद्भेदमात्रं मिथ्या, घटादेस्तु स्वरूपमपीति विशेष इति चेत्, किमतः? स्वरूपस्य मिथ्यात्वे सत्यत्वेऽपि संविदन्तरप्रतियोगिकमिथ्याभेदयोगित्वस्य साधारणत्वात्। एतेन अनुभूतित्वादिति हेतुनाऽप्यस्य साध्यस्य दुस्साधत्वं दर्शितम्। तरङ्गचन्द्रदृष्टान्तोऽपि विषमः, तरङ्गचन्द्रस्य मिथ्याभूतस्य सत्यचन्द्रतादात्म्यायोगात्। यदि चन्द्रव्यतिरिक्तस्तरङ्गचन्द्रो नास्तीति निर्दिश्येत, तर्ह्यत्रापि संविदन्तरं मिथ्येत्येवोक्तं स्यात्। तथा विषयाश्रयभेदभिन्नानन्तसंविदुपलम्भे च कस्यास्सत्यत्वं कासां तु तरङ्गचन्द्रवन्मिथ्यात्वमिति विशेषकाभावादनियमेन सर्वसंविन्मिथ्यात्वं सर्वसंवित्सत्यत्वं वा प्रसजेत्। सामान्यतस्संवित्तत्त्वे कुतश्चित्सिद्धे तद्व्यतिरिक्तास्संविदो निषिध्यन्त इति चेत्, क एवमाह? संवित्तत्त्वव्यतिरिक्तास्संविद इति, अपि तु संविद एव संविदः। न च संवित्तत्त्वं सामान्यतः सिध्यदेकमिति सिध्यति, येन तद्व्यतिरिक्तसंविन्मिथ्यात्वं साध्येत। एकतया सिद्धौ च किमत्र पुनस्साध्यम्? अत एव न पञ्चमः, एकयाऽनाद्यविद्ययाऽनैकान्त्याच्च। प्रवाहाविद्यापक्षेऽपि सजातीयवत्यविद्याप्रागभावे त्वदभिमतेऽनुत्पन्नत्वहेतोर्वृत्तेर्विरोधश्च। तस्यापि सजातीयवत्त्वं मिथ्येति चेत्, तर्हि घटादेरपि सजातीयवत्त्वं मिथ्येति यन्नाना तदुत्पन्नमिति व्याप्तिप्रदर्शनासिद्धिः। व्यावहारिकं घटादेः सजातीयवत्त्वमुपजीव्य व्याप्तिप्रदर्शनमिति चेत्, प्रागभावस्यापि व्यावहारिकसजातीयवत्त्वात्तद्वर्तिनो हेतोर्विरोध एव। न चाभावस्य जातिर्नास्तीति सजातीयाभावः, समानोपाध्याक्रान्तत्ववेषेणाविशेषात्। अन्यथा संविदोऽपि जातिमनभ्युपगच्छतः सिद्धसाधनत्वप्रसङ्गात्। नच घटादिभेदस्य व्यावहारिकत्वमिति स्थितमन्यत्र। तदेतत्सर्वमभिप्रेत्याह—* अबाधितप्रतीतिसिद्धदृश्यभेदसमर्थनेन दर्शनभेदोऽपि समर्थित एव, छेद्यभेदाच्छेदनभेदवदिति।

ननु दृश्यभेदेऽपि दर्शनमेकमेवोपलभ्यते, यथा घटपटाविमाविति; छेद्यभेदेऽपि छेदकव्यापार एक एव दृश्यते, यथा एकप्रहारभेद्येष्वनेकेषु काण्डेषु; अतः कर्मभेदे क्रियाभेद इति न व्याप्तिः; नच दृश्यभेदसमर्थनन्यायेन

दर्शनभेदसिद्धिरिति विवक्षा, छेद्यभेदाच्छेदनभेदवदित्युदाहरणस्यानाकाङ्क्षितत्वप्रसङ्गात्; न च छेद्यभेदसमर्थनन्यायेन छेदनभेदस्समर्थ्यते, यदर्थमप्युदाह्रियेत, अतः किमर्थं भाष्यमिति। उच्यते—दृश्यभेद इति न दृश्यानां स्वरूपभेदमात्रं विवक्षितम्, अपि तु कर्मकारकत्वविशेषणभेदः, अनेकेषामप्येकसामग्रीविशेषमध्यपतितानां घटादीनामेकं कर्मत्वम्, एवं कारकान्तरेष्वप्यनेकेषामेकं तत्तत्कारकत्वं दृश्यते, यथा दर्शपूर्णमासयोः करणत्वमेकमेव, तथाऽत्राप्यनेकेषामेकं कर्मत्वमिति न विरोधः। एवं छेद्यभेदेऽपि द्रष्टव्यः। ततश्चायमर्थः—यदि सर्वासां संविदामैक्यं स्यादेकस्यां घटादिप्रतिनियतविषयायां संविदि संविदन्तरविषयाणामपि प्रकाशप्रसङ्गः, न च तथोपलभ्यते, दृष्टादृष्टव्यवस्थाप्रदर्शनात्, अतोऽवगम्यते मिथोऽनाघ्रातविषयाः संविदः स्वरूपतो भिन्ना इति। तत्रेदं निदर्श्यते—यथा छेदनक्रियाः परस्परास्पृष्टविषयाः परस्परं विभिचन्ते तद्वदिति। एतेन दृश्यमानस्य संविद्भेदस्य विषयादिभेदोपाधिकत्वं विषयभेदमिथ्यात्वेन संविद्भेदस्य मिथ्यात्वसमर्थनं च निरस्तम्। दृश्यमानत्वादेव च कल्पनागौरवप्रसंगोऽपि परिहृतः। दर्शनस्य च बाधकाभावादेव [च] प्रमात्वं सिद्धम्। ननु प्रत्यगात्मनिष्ठधर्मभूतज्ञानं नित्यमिति य इच्छति तस्य कथं संविद्भेदस्य विषयभेदोपाधिकत्वापह्नवः? उच्यते; नित्याऽपि संवित्तत्तत्कर्मानुरूपं तेषुतेषु विषयेषु संकोचं विकासं च भजते। ततश्च कर्मानुरूपतत्तद्विषयीकरणविकारविशेषापेक्षया स्वरूपत एव क्रियाभेदः प्रतिनियतविषयता च युज्यते। तव तु न तथा, नित्यनिर्विकारस्वप्रकाशमात्रत्वाभ्युपगमात् संविदः। मायातिरोधानतदधीनविचित्रविषयत्वादिकं तु न सम्भवतीत्यन्यत्र द्रष्टव्यमिति॥

॥ इति शतदूषण्यां संविन्नानात्वनिषेधकानुमानभङ्गवादः त्रयोविंशः॥ २३॥

॥ अथ निर्विशेषत्वानुमानभङ्गवादः चतुर्विंशः॥ २४॥

विभूतिगुणवर्गेण विशिष्टं यमधीमहे। अप्रतर्क्यविशेषाय तस्मै भगवते नमः॥

यदाहुः—अनुभूतिर्निर्विशेषा, अनुभूतित्वात्, यत्सविशेषं न तदनुभूतिः, यथा घटः, अनुभूतेस्सविशेषत्वे घटवदननुभूतित्वप्रसङ्ग इति। अत्र तावत्प्रतिज्ञायां निर्विशेषपदमनुभूतिपदप्रतिपन्नादधिकार्थबोधकम्? न वा? पूर्वत्र तेनैवानुभूतिरितिवदनधिकार्थत्वेन पुनरुक्तिनिग्रहापत्तिः। समस्तविशेषाभाव एव तेन प्रतिपाद्यत इति चेन्न; उक्तोत्तरत्वात्। तथा हि। स किमनुभूतिस्वरूपमेव? ततोऽतिरिक्तं वा किंचित्? पूर्वत्र पुनरुक्तिः, सिद्धसाधनता च। नहि संवित्पर्यायशतपाठेऽपि नः काचित्क्षतिः। उत्तरत्र विशेषवत्त्वमवर्जनीयम्। समस्तविशेषाभावो न ब्रह्मणो रूपादिवद्धर्म इति चेत्, रूपादिवद्धर्मत्वं नास्तीति वदता किं गुणत्वादिरूपेण धर्मत्वं प्रतिक्षिप्तम्? उत यथाकथञ्चिद्विशेषणत्वमपि? आद्ये गुणत्वादिरूपेण विशेषकत्वाभावेऽपि प्रकारान्तरेण विशेषकत्वात्सविशेषत्वं तावदवर्जनीयम्। तथा च सति गुणादिरूपे विशेषे कः प्रद्वेषः? द्वितीये पक्षीकृताया एवानुभूतेस्सा[ध्यधर्मा]ध्यानन्वयस्य त्वयैवोक्तत्वादनुमानवृत्तान्तानभिज्ञत्वमनन्वितनिग्रहस्थानं च। प्रमाणबलादयमेको विशेषः स्वीक्रियत इति चेत्, प्रमाणबलादिति किमिदमेवानुमानं प्रमाणम्? उतान्यच्छ्रुत्यादिकम्? न पूर्वः, असिद्धेः। कथं तस्यैव प्रमाणत्वे विमन्यमानं प्रति तदेव प्रमाणमुपस्थापयसि? नोत्तरः, श्रुत्यादेर्निर्विशेषप्रतिपादकत्वस्य दूषयिष्यमाणत्वात्। यदि चाभावरूपमेकं विशेषमभ्युपगच्छसि, तदा भावरूपेष्वन्येषु विशेषेषु किं भावरूपत्वादेवामर्षः? उत प्रमाणाभावात्? नाद्यः, अभावरूपे विशेषे कस्यचिदमर्ष-

प्रसङ्गात् । न द्वितीयः, नित्यत्वस्वयंप्रकाशत्वादेस्त्वयैव प्रमाणैरुपपाद्यमानत्वात् । व्यावहारिकप्रमाणोपस्थापितत्वान्नित्यत्वादीनां मिथ्यात्वमिति चेन्न; निर्विशेषत्वस्यापि व्यावहारिकप्रमाणोपस्थापितत्वेन मिथ्यात्वप्रसङ्गात् । अस्त्वेवं किं नश्छिन्नमिति चेत्, नित्यत्वनिर्विशेषत्वादेर्मिथ्यात्वेन सौगतवैशेषिकाद्यभिमतानित्यत्वसविशेषत्वादेरवर्जनीयत्वात् । ननु निर्विशेषमिति प्रतिज्ञायां विशेषान्तरं निर्विशेषत्वं च विशेषत्वलक्षणसामान्योपाधिना युगपदेव प्रतिक्षिप्यते, ततःपरं च न किंचिद्वक्तव्यमस्तीति चेत्, तत्तत्साध्यधर्मानन्वयलक्षणो दोषः प्रागेवोक्तः । किंच विशेषान्तरशब्देन किं सामान्यतः सविशेषत्वमेव विवक्षितम्? उत रूपरसादयः कतिचन विशेषाः? पूर्वत्र निर्विशेषत्वमपि नास्ति सविशेषत्वमपि नास्तीति व्याहतवर्णना; * परस्परविरोधे हि न प्रकारान्तरस्थितिरिति न्यायात् । उत्तरत्र रूपरसादिविशेषं निर्विशेषत्वादिकं चापोह्य शास्त्रसिद्धैः सर्वज्ञत्वादिभिः सविशेषत्वप्रसङ्गः । किञ्चेयं प्रतिज्ञा त्वदभिमतहेतुरूपधर्मप्रतिक्षेपिका? न वा? आद्ये हेत्वभावे साध्याभावः, प्रतिज्ञाहेतुविरोधश्च । द्वितीये तेनैव विशेषणतयाऽभ्युपगतेन सविशेषत्वम् । हेत्वादिधर्मान्वयस्य प्रमाणसिद्धत्वाभ्युपगमेन तन्निषेधे कालात्ययापदेशप्रसङ्गश्च । यदि च व्यावहारिकहेतुधर्मान्वयेन साध्यसिद्धिरिति मन्यसे, तदा बाष्पधूमभ्रमानुमितदहनवत् स्वप्नलब्धद्रविणनिर्मितभूषणवच्च साध्यव्यापिव्यावहारिकत्वस्य त्वयैवानुमन्तव्यत्वान्न किंचिदस्माकं दूषणीयमस्ति । यादृच्छिकसंवादिलिङ्गविभ्रमवदभिमतसिद्धिरिति चेत्, किमियं सिद्धिर्निर्णयात्मिका? उत सन्देहात्मिका? न पूर्वः, यादृच्छिकसंवादीत्यनेनैव विसंवादशिरसोऽपि सम्भावितत्वेन निर्णयासिद्धेः । नोत्तरः, सन्दिग्धनिर्णयार्थं न्यायं प्रवर्तयितुमिच्छतः पुनरपि तेनैव न्यायेन सन्देहस्यैव स्थिरीकरणात् । असत्यात्सत्यसिद्धिभागस्तु स्वस्थाने द्रष्टव्यः । अतो न कथंचिदपि सर्वविशेषशून्यत्वं प्रतिज्ञातुं शक्यते । घटस्य च परमार्थतः सविशेषत्वानभ्युपगमाद्दृष्टान्तस्साध्याव्यावृत्तः । अथ मिथ्याभूतविशेषयोगात्तत्र सविशेषत्वमिच्छसि; तदाऽनुभूतेरपि तथाविधविशेषाभ्युपगमान्न तत्प्रतिक्षेपः शक्यः । परमार्थविशेषशून्येति साध्यार्थे तु व्यतिरेकदृष्टान्तासिद्धिरुक्ता । यस्त्वनुभूतिर्दृश्यधर्मरहितेति साध्यं प्रयुङ्क्ते, तस्य साध्यविशेषणवैयर्थ्याच्च निग्रहः । अदृश्यधर्मानभ्युपगमात् । एवं प्रत्यक्त्वाजडत्वप्रकाशत्वादिहेतवोऽपि निरस्ता वेदितव्याः ॥

ये च धर्मपक्षीकारेण प्रयोगाः—भेदादयो नानुभूतिधर्माः, दृश्यत्वात्, धर्मत्वात्, रूपादिवत्, इत्यादयः; तत्र तावत् स्वाभ्युपगतनित्यत्वादीनामपि पक्षीकारेऽपसिद्धान्तः । तद्बहिष्कारे तैरेवानैकान्त्यम् । तेषां मिथ्यात्वेनाभ्युपगमान्नापसिद्धान्तानैकान्ताविति चेन्न; तथा सति तत्प्रतिक्षेपकान् प्रति तत्समर्थनप्रयासनैरर्थक्यात् । तेषामनुभूतिस्वरूपमात्रत्वे च तत्स्वरूपमभ्युपगच्छद्भिस्सौगतादिभिस्सह न विमन्तव्यम् । अनित्यत्वादिकल्पनात्तैर्विवादस्तत्प्रतिक्षेपश्च क्रियत इति चेन्न; अनित्यत्वादिनिषेधस्यापि स्वरूपत्वे स्वरूपातिरिक्तस्य सत्यत्वे मिथ्यात्वे च सिद्धसाधनत्वव्याघातादिभिर्दत्तोत्तरत्वात् । किञ्चानुभूतिशब्देन लोकसिद्धसंविद्विवक्षायां विषयाश्रयस्वगतविशेषाणामनन्तानां प्रत्यक्षादिसिद्धत्वस्थापनात्कालात्ययापदेशः । श्रुतिसिद्धब्रह्मस्वरूपपक्षीकारे तु श्रुत्यैव तद्गतानन्तविशेषविषयया बाधश्चापरिहार्य इति । तदेतत्सर्वमपि संगृहीतं भाष्ये—* यदपि नास्या दृशेर्दृशि [स्व] रूपाया दृश्यः कश्चिदपि धर्मोऽस्ति, दृश्यत्वादेव तेषां न दृशिधर्मत्वमिति च, तदपि स्वाभ्युपगतैः प्रमाणसिद्धैः नित्यत्वस्वयंप्रकाशत्वादिधर्मैरुभयमनैकान्तिकमित्यादिना । तत्र स्वाभ्युपगतैरित्यपसिद्धान्तादेस्संग्रहः । प्रमाणसिद्धैरिति तु बाधादेः । अनैकान्तिकशब्दः स्वसाध्यसम्बन्धनियमनिषेधार्थः । तेन यथासंभवं बाधादेरपि संग्रह इति । प्रतिप्रयोगश्च—अनुभूतिः सविशेषा, भासमानत्वात्, घटादिवत्; नित्यत्वाद-

योऽनुभूतिधर्मः, अभ्युपगतानुभूतिस्वरूपं प्रति तद्धर्मतया प्रमाणतस्साध्यमानत्वात्; यत्र यत्प्रमाणतः साध्यते स तद्धर्मः, यथा सम्प्रतिपन्नः, इत्यादयः। नचात्र विपक्षे बाधकाभावः शङ्क्यः, प्रागुक्तनिर्विशेषप्रतिज्ञानुपपत्त्यादेरेव बाधकत्वात्। अन्ततो निर्विशेषानुमानस्यैव विपक्षे बाधकरहितत्वाच। न च दृष्टान्तासिद्धिः, त्वयैव घटादेर्व्यतिरेकदृष्टान्ततयोदाहरणात्। बाधादेरपि प्रसङ्गाभावेन प्राबल्यमस्मदुक्तानामिति॥

॥ इति शतदूषण्यां निर्विशेषत्वानुमानभङ्गवादः चतुर्विंशः ॥ २४ ॥

॥ अथ संविदात्मत्वभङ्गवादः पञ्चविंशः ॥ २५ ॥

अन्योन्यव्यतिरिक्तयोरविजहद्धर्मत्वधर्मित्वयोर्व्यापारे गृहमेधिनोरिव ययोः साहित्यमासूत्र्यते।
सा संवित्सकलार्थसाधकवपुस्तत्सिद्धभोगः प्रभुः श्रीमानस्तु स मे समस्तदुरितोत्ताराय नारायणः॥

यदुच्यते—संविदात्मा अजडत्वात्, यदुक्तसाध्यं न भवति तदुक्तसाधनमपि न भवति, यथा घटः, इति; तदसत्; स्वस्मै भासमानत्वरूपस्याजडत्वस्य हेतोरसिद्धेः। अव्यभिचरितप्रकाशसत्ताकत्वस्य सुखादिभिर्व्यभिचारात्। तेषामपि संविद्व्यतिरेकस्यानात्मत्वस्य च सौगतसुहृदा त्वयाऽप्यपरित्यागात्। सजातीयनैरपेक्ष्यादेरपि दीपादिभिर्घटादिभिरपि वा व्यभिचारात्। सर्वथा सजातीयनिरपेक्षप्रकाशत्वस्य पक्षेऽप्यसिद्धेः। सा खल्वात्मसम्बन्धसापेक्षप्रकाशा। अन्यथा स्वाश्रयव्यतिरिक्तेभ्योऽपि तत्प्रकाशप्रसङ्गात्। अत एवात्मनिरपेक्षत्वमप्यसिद्धम्; संविदन्तरनिरपेक्षप्रकाशत्वस्य स्वस्मै परस्मै वेति विकल्पे पूर्वस्यासिद्धेरुत्तरस्य विरुद्धत्वात्, अन्यस्मा एव भासमानत्वनियमात्, घटादिवदनात्मत्वसिद्धेश्च। अन्यथा घटादेरपि भासमानत्वमात्रेणात्मत्वप्रसङ्गस्यावारणात्। अतो ज्ञानत्वमेव हेतुः परिशिष्यते। तच्च प्रकाशरूपत्वम्। तच्च स्वस्मै परस्मै वेति विकल्पेन दूषितमेव। न कस्मैचिदिति पक्षे तु प्रकाशत्वहानिः, तथैव सर्वत्र प्रसिद्धेः। किंचानेन हेतुना संविद आत्मत्वं साधयन्तः किमिदमात्मत्वमभिसन्धाय साधयन्ति? किं ज्ञातृत्वादिकम्? उत प्रत्येतुः प्रत्येतव्याद्व्यतिरिक्तत्वम्? अथवा स्वस्मै भासमानत्वम्? उताव्यभिचरितप्रकाशसत्ताकत्वम्? यद्वा स्वप्रकाशत्वम्? उत स्वानतिरिक्तत्वम्? यद्वाऽन्यदेव किंचिदिति। नाद्यः, प्रत्यक्षविरोधात्। ज्ञातृत्वं हि ज्ञानाश्रयत्वम्। तत्र स्वापेक्षया स्वस्यैवाश्रयत्वं व्याहतम्, आश्रयत्वाश्रयित्वलक्षणविरुद्धधर्माध्यासात्। अत एव स्वाश्रयतादात्म्येन ज्ञातृत्वमपि प्रतिक्षिप्तम्। धर्मधर्मिभेदाभेदपक्षस्तु भवताऽपि नाङ्गीक्रियते। नापि ज्ञानान्तराश्रयत्वं वक्तुं शक्यम्, योग्यानुपलम्भनिरस्तत्वात्, इच्छादेरिच्छान्तराश्रयत्वादिवत्। किंच क्षणिकस्यैव ज्ञानस्य ज्ञातृत्वं साध्यते? उत स्थिरतयाऽभ्युपगतस्य तस्यैव? पूर्वत्र प्रतिसन्धानाद्यनुपपत्तिः सौगतादीन्प्रति प्रयुक्ता भवन्तमास्कन्दति। उत्तरत्रापि किं निराश्रयस्य ज्ञानस्य ज्ञातृत्वं साध्यते? उत साश्रयस्य? आद्येऽप्यस्मदभिम[तज्ञानात्मका]तात्मनो ज्ञातृत्वसाधने सिद्धसाधनत्वम्। निराश्रयज्ञानान्तरपक्षीकारे तु आश्रयासिद्धिः। सर्वाभ्युपेतसंविद एव निराश्रयत्वविवक्षायां प्रत्यक्षादिविरोधः। द्वितीये ज्ञातृद्वयोपलब्धिप्रसङ्गः। उत्तरोत्तरज्ञानानामप्युक्तहेतुसम्बन्धाविशेषेण ज्ञातृत्वप्रसङ्गेनानवस्था व्यभिचारो वा। किंच सत्यज्ञातृत्वसाधनेऽपसिद्धान्तः। आरोपितज्ञातृत्वसाधने त्वदुक्तवाक्यानुमानादिभिस्तदारोपस्यास्माभिरभ्युपगमात्सिद्धसाध्यता। प्रतीयमानज्ञातृत्वस्यारोपितत्वसाधनं त्वनन्तरमेव दूषयिष्यामः। एवं ज्ञातृत्वकल्पप्रतिक्षेपेणैव द्वितीयः कल्पोऽपि प्रतिक्षिप्तः।

अस्या महाराजपोषकः

श्रीमान् मा. सुदर्शनाचार्यः ।

राजपोषकः

Sri K. RAGHAVACHARYA,
(Retd. Asst. Presidency Post Master, Madras.

Fascicule No. 2. ॥ श्रीरस्तु ॥ सञ्चिका नं—२.

॥ श्रीहस्तिशैलशिखरोज्ज्वलपारिजाताय नमः ॥

श्रीमद्विशिष्टाद्वैतसिद्धान्तप्रवर्तनधुरंधर - कवितार्किकसिंह

सर्वतन्त्रस्वतन्त्र - श्रीमद्वेदान्ताचार्य विरचित

सकलग्रन्थबृन्द प्रकाशनी

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

(प्रतिमासमवतरन्ती मासिकी सञ्चिका ।)

परिष्कारकः पर्यवेक्षकश्च

श्रीकाञ्ची. वेदवेदान्तवैजयन्ती विद्यालयाध्यक्षः

प्रतिवादिभयङ्कर - अण्णङ्गराचार्यः ।

Srimath Vedantadesika Granthamala

[A MONTHLY JOURNAL]

GENERAL EDITOR

SRI KANCHI. P. B. ANNANGARACHARYAR.

....

प्रकाशनादि सर्वाधिकारी

विद्वान्. ति. अ. संपत्कुमाराचार्यः, एम्. ए., कञ्जीवरम्.

प्रत्येक सञ्चिकामूल्यम्—एकरूप्यमात्रम् । प्रापणव्ययः पृथक् ।

AUGUST —1940

G. C. PRESS, WASHERMANPET, MADRAS.

॥ श्रीः ॥

परमानन्द संदोहमयी वार्ता ।

अधस्तान्निर्दिष्टनामानो महानुभावा अस्या ग्रन्थमालायाः प्रचारणविषये महान्तं परिश्रममुररीकृ
ग्राहकपोषकादिसज्जीकरणे कृतप्रतिज्ञा इति सानन्दं निवेदयामः ।

(तेषां महाशयानां नामधामादिकम्—)

१. **श्रीयुत पंडित परांकुशाचार्यजी,** वेणीमाधवमंदिर, प्रयागघाट, मथुरा.

२. **श्रीयुत पंडित रघुनन्दनाचार्यः,** श्रीरङ्गमन्दिरम्, बृन्दावनम्.

३. **श्रीमान् N. कृष्णमाचार्यस्वामी,** त्रिदण्डीमठ, दारागञ्ज, प्रयाग.

४. **श्रीमान् अल्लोर रामस्वामी,** रामविलास अग्रहारम्, मैसूरु.

एवमन्येऽपि महाशयास्तत्रतत्र यथाशक्ति प्रचारं कर्तुमङ्गीकरिष्यन्तीति **सादरं प्रतीक्षामहे** प्रार्थयामहे

अस्यां ग्रन्थमालायां स्तोत्रावलीविभागः साकल्येन समाप्तमुद्रणस्समभवत् । श्रीयुत गणेशराममुरली
(सोलापुर) महात्मनां द्रव्यसाहाय्यात् तत् कार्यं सत्वरं संपन्नमिति सानन्दं निवेदयामः । तन्मूल्यं सपादरूप्यमात्र

श्रीजगन्नाथपुरीस्थ - श्रीराजगोपालमठाधीश्वर - महन्त श्रीयुत गदाधररामानुजस्वामिनां द्रव्यसाहाय
काव्यनाटकविभागोऽपि अचिरादेव समाप्तमुद्रणः प्रादुर्भविष्यतीति च सानन्दमावेदयामः । इति

31—8—40 **प्रकाशकः ।**

(i) Ordinary Subscribers Re. 1 0 0 per fascicule.
Re. 1 8 0 „ „ per V. P. P.

(on reciept Re. 1 2 0 by M. O. one copy will be sent per Book Post.)

(ii) Simpathisers Rs. 30 0 0 (in advance) For the whole series.
(iii) Patrons Rs. 50 0 0 „ „
(iv) Donors Rs. 100 0 0 „ „

(The names of all sympathisers, patrons and donors will be published.)

अवेद्यत्वाभिमतानुभूतेर्वेद्यत्वप्रसंगस्त्वधिकः । नापि तृतीयः, प्रत्यक्षविरोधात् । स्वाश्रयायैव हि सा भासमाना दृश्यते । स्वस्मा इति प्रकाशफलित्वं हि ज्ञाप्यते । प्रकाशफलित्वं च प्रकाशाधीनव्यवहारादिमत्त्वम् । नच ज्ञानमात्रस्यैव व्यवहारादिकर्तृत्वं भवताऽप्यभ्युपगम्यते । फलित्वारोपसाधने तु प्राग्वदेव परिहारः । नापि चतुर्थः, सिद्धसाधनात् । तावता चात्मत्वसिद्धौ सुखदुःखादेरपि प्रसङ्गात् । पञ्चमषष्ठयोरपि सिद्धसाधनतैव । नापि सप्तमः ; तत्किं परसम्प्रतिपन्नात्मतादात्म्यविधिपर्यवसितम्? उतानुभूतेर्यथाकथंचिदात्मशब्दप्रतिपाद्यतामात्रनिष्ठमिति? आद्ये व्याघातादिदोषस्तदवस्थः । द्वितीये तु सिद्धसाधनत्वमेवेति । अस्तु तर्ह्यात्मानं पक्षीकृत्यात्मत्वादेव ज्ञानतादात्म्यसाधनम्; ततो नोक्तदोषावकाशः इति चेन्न ; धर्मिणोऽपि धर्मतादात्म्यविधेर्व्याहतत्वात् । तस्य ज्ञानत्वमात्रसाधने तु त्रय्यन्तविदां सिद्धसाधनात् । आत्मशब्दवाच्यस्यैव विषयोल्लेखलक्षणावस्थायोगः कल्पनालाघवाद्विधीयते इति चेन्न ; तथाऽपि तथाविधावस्थैव ज्ञानम्, तदाश्रय आत्मेति वैशेषिकादिवत्तस्य ज्ञातृत्वमेव सिध्यति । अवस्थामिथ्यात्वाद्वैषम्यमिति चेन्न, बाधाभावादिना तत्सत्यत्वस्य दुरपह्नवत्वात् । तथाऽपि भवदभिमतानन्तावस्थनित्यज्ञानातिरिक्त आत्मा न सिध्यतीति चेन्न ; ज्ञातुः तद्धर्मभूतज्ञानस्य च तावता दुरपह्नवत्वात् । ज्ञानं किमेकमेव सत्सामग्रीवशाद्विषयोल्लेखाद्यवस्थावद्भवति, उत ज्ञातर्येव ज्ञानलक्षणानन्तावस्थेति विशये श्रुतिशरणानां पूर्वः पक्षः, लाघवमात्रशरणानामुत्तर इति स्थिते द्वेधाऽपि भवदभिमतं न सिध्यत्येवेति का पूर्वरूपे वार्ता । उत्तररूपे दुस्तरं श्रुत्यदिकमनुसन्धत्स्वेति । श्रुतिरेवात्मनो ज्ञानानतिरिक्तत्वं साधयतीति चेन्न ; परिहृतप्रायत्वात् । तत्र हि—श्रुतिप्रत्यक्षसंसिद्धे ज्ञातृत्वे ज्ञानताश्रुतिः । नेया तद्गुणसारत्वात्स्वप्रकाशतयाऽपि वा ॥ वदन्ति हि * विज्ञातारमरे केन विजानीयादित्याद्याः परश्शताः श्रुतयः साक्षाज्ज्ञातृत्वमेव । तदविरोधाय ज्ञानमात्रश्रुतिरपि जडत्वं प्रतिक्षिपति, न तज्ज्ञातृत्वम्, अन्यथा प्रत्यक्षादिभिश्च विरोधात् । येनैव शास्त्रेण ज्ञानरूपत्वमात्मनः साध्यते संविदात्मत्वपक्षे तस्य श्रोताऽपि न सिध्येत् । न ह्यनात्मानं प्रत्युपदिश्यत इति भवताऽपीष्यते । आत्मा तु संविन्मात्ररूपो ज्ञातृत्वाभावान्न श्रोतुमीष्टे । अहंकारः शृणोतीति चेत्, स किं स्वार्थं परार्थं वा शृणोति? नाद्यः, स्वनाशपर्यन्तत्वात् ; अहमर्थात्यन्तविलयगर्भो हि भवत्पक्षे मोक्षः । न हि कश्चित्स्वनाशाय मोक्षशास्त्रं शृणोति । अत एव न द्वितीयः, स्वात्यन्तनाशेन परोपकरस्य कस्याप्यनभिमतत्वात् ; अहमर्थस्य चात्मत्वमस्मन्मतेन सिद्धमिति ॥

॥ इति शतदूषण्यां संविदात्मत्वभङ्गवादः पञ्चविंशः ॥ २५ ॥

॥ अथ अहमर्थात्मत्वसमर्थनवादः षड्विंशः ॥ २६ ॥

अहंत्वेदंत्वाभ्यां स्वपरविदितांश्चेतनगणानहङ्कारादीनप्यचिदुपधिभेदाननहमः ।
अहन्ता यस्यैका कबलयति वैशिष्ट्यविभवान्ममास्मिन्विश्राम्यत्वहमिति मतिर्विश्ववपुषि ॥

यदुच्यते—अहमर्थो नात्मा, सुषुप्तिमोक्षयोरननुवर्तमानत्वात् । मोक्षे च तदनुवृत्तावज्ञत्वादिप्रसङ्गाच्च । अतश्चैतन्यमात्रमात्मा । तत्रानिदमि चैतन्ये निरुपाधिरहंभ्रमः । कर्तृत्वादिस्तु सोपाधिः सर्पलोहित्यवत्क्रमादिति । अत्र ब्रूमः—सुषुप्तौ तावदहमर्थाननुवृत्तौ पुनः प्रतिसन्धानानुपपत्तिप्रसङ्गः । न ह्यहमर्थान्तरेणानुभूतमर्थमहमर्थान्तरं स्मर्तुमलम्, अतिप्रसङ्गात् । सुषुप्तावपि तदनुवृत्तौ तदानीमपि तत्प्रकाशप्रसङ्ग इति चेन्न ; विद्यमानस्य प्रकाशनियमानभ्युपगमात् । तदानीमप्रकाशेऽपि तदनुवृत्तौ किं प्रमाणमिति चेन्न ; पूर्वोत्तरवर्त्यहमर्थप्रतिसन्धानबलादेव मध्येऽपि

तत्कल्पनात् । पूर्वोत्तरकालावच्छिन्नमध्यकालकल्पनेनास्वाप्समितीदानींतनकालानुसन्धानवदिदानीमतीतकालावच्छिन्नाहमर्थस्यापि प्रकाशोपपत्तेः । मध्ये चाहमर्थाभावे संस्काराधाराभावात्प्रतिसन्धानाभावप्रसङ्गाच्च [ङ्गश्च] । संवित्स्वरूपमविद्यास्वरूपं वा तदाधारो भवत्विति चेन्न ; तयोरपि तदानीमनुवृत्तौ प्रमाणाभावात् । न हि ज्ञातारमन्तरेण ज्ञानमज्ञानं वा स्थातुमलम् । अन्यथा घटादिष्वपि तदवस्थितिप्रसङ्गात् । ज्ञानाभावस्तत्रापि विद्यत इतीष्टप्रसङ्ग इति चेन्न ; भवदभिमतभावरूपाज्ञानस्य तत्र प्रसज्यमानत्वात्, तस्य च तन्निष्ठत्वेन त्वयाऽनभ्युपगमात् । न च संवित्स्वरूपस्य संस्काराधारत्वम्, निर्विकारत्वनिर्विशेषत्वविरोधात् । नाप्यविद्यास्वरूपस्य, तथा सति तस्यैव ज्ञातृत्वप्रसङ्गात् । न ह्यन्यगतसंस्कारेणान्यस्य स्मृतिः संभवतीत्युक्तम् । उपादानोपादेयभावादुपपद्यत इति चेन्न ; क्षणभङ्गनयप्रसङ्गात् । सत्कार्यवादाभ्युपगमेनाविद्यातद्विवर्तयोरेकत्वादुपादानं संस्कारे उपादेये कार्यकर इति चेन्न ; उपादानोपादेययोः काल्पनिकैक्यस्य सौगतमतेऽपि सत्त्वात् ; परमार्थैक्यस्य त्वन्मतेऽप्यभावात् । किं वा सुषुप्तिकाले संविदविद्ययोः सद्भावे प्रमाणम् ? सुप्तोत्थितस्य सुखमहमस्वाप्समिति परामर्श इति चेन्न ; तेन सुखस्वापविशिष्टतदानींतनाहमर्थस्यैव विषयीकरणात् । इदानींतनाहमर्थप्रकाशनेन तदुपलक्षणमिति चेन्न ; इदानींतनसुखसंविद्भ्यां तदानींतनस्वापविशिष्टाहमर्थोपलक्षणं किं न स्यात् ? तदानीमहमर्थप्रकाशाभावे कथं तत्परामर्श इति चेत् कथं तदानीमज्ञानसुखसाक्षिसंवित्प्रकाशाभावे तत्परामर्शः ? तत्परामर्शादेव तदा तत्प्रकाशोऽपि कल्प्यत इति चेत् तथाऽहमर्थप्रकाशोऽपि कल्प्यताम् । उपलम्भविरुद्धं तत्कल्पनमिति चेत्, कोऽयमुपलम्भः ? एतावन्तं कालं न किंचिदहमज्ञासिषमित्येवंरूप इति चेत्, तर्हि तत एवाज्ञानसुखसाक्षिसंवित्प्रकाशकल्पनमपि विरुध्येत । उपलम्भस्य बहिर्विषयवेदननिषेधरूपत्वात्तत्कल्पनमुपपद्यत इति चेत्, समः समाधिः । मामप्यहं न ज्ञातवानित्युपलम्भो विरोधीति चेत्, कस्य विरोधी ? किमहमर्थस्य ? उत तत्संवेदनस्य ? उत वेदनमात्रस्य ? न प्रथमः, अतद्रूपत्वादुपलम्भस्य । न ह्येतावन्तं कालं नाहमभूवमिति कश्चित्प्रतिसन्धत्ते, अपि तु विद्यमानमपि मां न ज्ञातवानिति । न द्वितीयः, एतावन्तं कालं न ज्ञातवानित्यनेन संविदमपि न ज्ञातवानिति संवित्संवेदनस्यापि निषेधप्रसङ्गात् । स्वप्रकाशेन तदा तत्प्रकाशनम्, निषेधस्तु विषयप्रकाशस्येति व्यवस्थेति चेत्, तुल्यमहमर्थेऽपि । अत एव न तृतीयः, स्वपक्षोन्मूलनप्रसङ्गाच्च । * नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवतीति सुषुप्तिविषयश्रुत्या तदानीमहमर्थप्रकाशकल्पनं विरुध्यत इति चेत्, तर्हि * प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति तद्विषयश्रुत्यैव संवित्सुखादिप्रकाशकल्पनमपि विरुध्येत, अविशेषात् । तथाऽपि तदानींतनमज्ञानमनुभूतमननुभूतं वा ? पूर्वत्र संविदोऽपि प्रकाशसिद्धिः, स्वयंप्रकाशत्वात् ; उत्तरत्राज्ञानप्रतिसन्धानानुपपत्तिरिति चेन्न ; तदानींतनकालस्येव तदानींतनाज्ञानस्यापि तदानीमेव कल्प्यमानत्वेन तद्विषयप्रतिसन्धाना [न] भ्युपगमात् । तथाऽपि प्रातर्गजाभावादिनयेन तदानीमधिकरणोपलम्भोऽवश्यंभावीति चेन्न ; इदानीमेव कल्प्यमाने मध्यकालवर्तिनि स्वात्मनि योग्यस्मृत्यभावेन ज्ञानाभावस्यापि कल्पनोपपत्तेः । तदानीमधिकरणोपलम्भस्यावश्यंभावेऽपि अहमर्थस्यैव प्रकाशकल्पना युक्ता । अहं न ज्ञातवानिति स एव ह्यज्ञानाश्रयतया प्रतिसन्धीयते । अतो न कथञ्चिदपि सुषुप्तावहमर्थाभावो वक्तुमपि शक्यः । अहमेव पूर्वं सुप्तः, तथाऽप्यहमर्थस्तदानीं नास्तीति स्ववचनविरोधाच्च । मुक्तावप्यहमर्थानुवृत्तिः प्रागेव श्रुतिवशाद्दर्शिता । न च मोक्षे अहमर्थानुवृत्तावज्ञत्वप्रसङ्गः, तथा सति संविदनुवृत्तावपि तत्प्रसङ्गात् । यथावस्थितस्वरूपप्रकाशो नाज्ञत्वादिहेतुः, अपि तु तद्विरुद्ध एवेति चेत्, तुल्यम् । यदि

च मोक्षेऽहमर्थो न स्यात् मोक्षशास्त्रस्याधिकार्यभावः स्यात्। न हि स्ववधाय स्वयमेव बुद्धिपूर्वकारी प्रवर्तते। अहमर्थस्य चात्यन्तविनाशो मोक्षे भवद्भिरिष्यते। संविदात्मनः स्वस्य च विवेकाग्रहात् प्रवर्तते इति चेत्, तर्हि स्वविनाशे संविदो विनाशमभिमन्येत। स च स्वविनाश एवेति मन्यमानो न प्रवर्तेतैव। स्वात्मावस्थानभ्रमात् प्रवर्तत इति चेन्न; फलस्वरूपमजानतस्तदर्थित्वायोगेनोपायानधिकारात्। अहमर्थस्थितिमपेक्षमाणस्य च भवन्मते नित्यसंसारप्रसङ्गात्। अहमर्थस्थितिभ्रमेण प्रवृत्तस्याप्यद्वैतज्ञानोदयसामर्थ्यादेवानिच्छतोऽप्यहमर्थविनाश इति चेत्, तथा सति राज्यकामस्य शिरश्छेदवदपवर्गः स्यादिति सम्यक् पुरुषार्थपरत्वं शास्त्रस्य समर्थितं भवति।

अस्तु तर्ह्याध्यात्मिकादिदुःखत्रयाभिघातवशात्तदविनाभूताहमर्थस्यापि विनाशोऽभिमत इति, तदपि मन्दम्; * तमेवं विद्वानमृत इह भवति, * तमेव विदित्वाऽतिमृत्युमेतीत्यादिभिर्मृत्युतरणहेतुतया श्रुतस्य ब्रह्मवेदनस्य साक्षान्मृत्युहेतुत्वप्रसङ्गात्। * ब्रह्मैव भवति, सर्वं ह पश्यः पश्यति इत्यादिभिर्विरोधप्रसङ्गाच्च। अस्तु तर्हि ज्ञप्तिरूप एवात्मा मोक्षशास्त्राधिकारीति चेन्न; तस्य ज्ञातृत्वमन्तृत्वाद्यसंभवेन श्रवणमननाद्ययोगात्, नित्यमुक्तस्वभावतयाऽपवर्गार्थित्वासंभवाच्च। ज्ञातृत्वदुःखित्वाध्यासात्सर्वमुपपद्यत इति चेन्न; तदध्यासप्रलापानामन्यत्रोत्सारितत्वात्। एतेनात्मनोऽपवर्गार्थमहमर्थरूपो ज्ञाता प्रवर्तत इति च प्रयुक्तम्, दृष्टादृष्टरूपप्रयोजनान्तरमन्तरेण परार्थं स्वानर्थस्य परमकारुणिकैरप्यनभ्युपगमात्। तदेतत्प्रियतमोज्जीवनार्थं मुण्डोपहारवदित्यायातम्। अपि च यद्यहमर्थो नात्मा कथमनात्मनि देहेऽहंबुद्धिः देहात्मभ्रम इत्युच्यते? स हि त्वत्पक्षे देहाहङ्कारभ्रम इत्यभिधीयेत। आत्माहङ्कारयोरैक्यभ्रमाद्देहाहङ्कारभ्रम एव देहात्मभ्रम इति चेन्न; तद्भ्रमस्याद्याप्यसिद्धेः। संविद्रूपस्य चाहं जानामीत्यादिना तद्धर्मभावादिविरुद्धधर्मवत्तया प्रतीयमानस्याहमर्थेन देहेन वा तादृशभ्रमप्रसङ्गाभावात्। ततश्च देहात्मवादनिराकरणप्रयासोऽपि निरर्थकः स्यात्, देहश्चैतन्यमिति चार्वाकैरप्यनङ्गीकारात्। देहस्याहन्त्वचेतनत्वादिप्रतिक्षेप एव हि तान्प्रति क्रियते। अन्यथा तेषां सिद्धसाधनत्वात्। यदि चाहमर्थो नात्मा, तस्य प्रत्यक्त्वमपि न स्यात्, अहंबुद्ध्यैव प्रत्यगर्थस्य परागर्थाद्विवेकात्। * युष्मदस्मत्प्रत्ययगोचरयोरित्यादि हि भवदीयभाष्येऽप्युक्तम्। नन्वहमर्थविषयेंऽशद्वयमस्ति, तत्र तत्प्रकाशांशः प्रत्यक्पदार्थः, तदधीनप्रकाशोऽहन्त्वांशः परागर्थः, इदं रजतमिति भ्रमे शुक्तिरजतांशभेदवदिति। तदप्याशामोदकमात्रम्, इदंप्रत्ययेऽपि कश्चित्प्रत्यगंशोऽस्तीति निष्कर्षप्रसङ्गात्। उपलम्भविरुद्धः स इति चेत्, तुल्यम्। अहंप्रत्ययविषयेऽपि वस्तुन्येवेदमंशः परकीयानुमानादृश्यत इति चेत्; तर्हि तत्रैवेदंप्रत्ययगोचरे प्रत्यगंशोऽपि सिद्ध इति तद्वदेव घटादिष्वपि तत्कल्पनाप्रसङ्गः। नात्र परात्मनीदमंशः प्रतीयते, अपि त्वेकमेव वस्त्वंशभेदमन्तरेणापि प्रतिसंबन्धिभेदेनाहन्त्वेदन्त्वाभ्यां प्रकाशत इति चेन्न; अहमर्थप्रकाशेऽप्येकस्यैव पुत्रत्वेन पितृत्वेन प्रतीतिवत् इदमंशभानप्रसङ्गात्। तत्रापि कदाचिदयमहमस्मीति प्रतिभातीति चेन्न; देवोऽहमित्यादिषु देवादिशब्दवत् विशेषणविवक्षया तत्रेदंशब्दप्रयोगात्। तस्य चांशस्यास्माभिरपि परत्वाभ्युपगमात्। प्रतिसंबन्धिनिरूप्योऽहमर्थो न स्वरूपं भवितुमर्हतीति चेन्न; पुत्रादिष्वपि तत्प्रसङ्गात्। प्रतिसंबन्धिनिरपेक्षं मनुष्यत्वाद्याकारान्तरं दृश्यते, अतस्तत्र न दोष इति चेन्न; अत्रापि वस्तुत्वचेतनत्वाद्याकारान्तरसिद्धेः। नन्वहंशब्दप्रत्यभिज्ञानादहंकार एवाहमर्थ इति निश्चीयते, स च क्षेत्रान्तर्भूतो भगवता परिगणितः, * महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च इत्यारभ्य * एतत्क्षेत्रमिति वचनात्, * निर्ममो निरहंकार इत्यादिषु च हेयतयाऽयमुपदिश्यते, अतो नात्मा भवितुमर्हतीति। तदसत्, बुद्धिशब्दप्रत्यभिज्ञानेन भवदभिमतसंविदोऽपि बुद्धिपर्यायवाच्यमहत्तत्त्वानतिरे-

कप्रसङ्गात् । अध्यवसायाख्यकार्योपकरणत्वमात्रेण तत्र बुद्धिशब्द इति चेत्; तर्हि अनात्मनि देहे अहमभिमानाख्यकार्यकरतयाऽत्राप्यहंकारशब्द इति भाव्यम् । अहम्भावान्तरहेतुत्वं न शब्दशक्त्या प्रतीयत इति चेन्न; अभूततद्भावार्थच्विप्रत्ययमुत्पाद्य व्युत्पत्त्या तदुपपत्तेः । क्षेत्रान्तर्भावपरिगणनं तु बुद्धेरप्यविशिष्टमिति । संविदोऽपि क्षेत्रकुक्षिनिक्षेपे नैरात्म्यवादप्रसङ्गः, समाधिश्च समान एव । निरहंकार इत्यादिषु गर्वपर्यायोऽहंकार उत्कृष्टजनावमानहेतुत्वादनर्थहेतुरिति हेयतयोपदिश्यते; न पुनरहमर्थोऽहंकारतत्त्वं वा, तयोरुपाधिमन्तरेणानर्थहेतुत्वाभावात् । तथा च सत्युपाधेरेव हेयत्वापत्तेः । नचाहंभावः स्वरूपेण त्यक्तुं शक्यः, त्यागबुद्धावपि तदनुप्रवेशात् । सुषुप्तिमूर्छादिषु तत्त्यागाभ्युपगमेऽपि नासौ स्वशक्त्या, दैवादापन्नत्वात् । अहंभावस्य चोपादेयत्वमेव श्रुत्या प्रतीयते * अथातोऽहंकारादेशः, अहमेवाधस्तादहमुपरिष्टात्, * त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते तद्योऽहं सोऽसौ योऽसौ सोऽहमित्यादिषु । * तत्त्वमसिनिरूपणे चैषामबाधितं सामानाधिकरण्यमनुसन्धेयमिति सिद्धमनारोपितज्ञातृत्वविशिष्टोऽहमर्थ एवात्मेति ॥

॥ इति शतदूषण्यां अहमर्थात्मत्वसमर्थनवादः षड्विंशः ॥ २६ ॥

॥ अथ ज्ञातृत्वाध्यासभङ्गवादः सप्तविंशः ॥ २७ ॥

तमाश्रये यस्त्विह चेतनानामेको बहूनां विदधाति कामान् ।
शक्तिः परा यस्य समस्तसूतिः स्वाभाविकी ज्ञानबलक्रिया च ॥

यदाहुः—ज्ञातृत्वादिप्रकाशो भ्रान्तिः, देहात्माभिमानवत एव जायमानप्रकाशत्वात्, स्थूलोऽहमित्यादिप्रतीतिवदिति, तदसत्; हेत्वसिद्धेः । न हीश्वरस्य योगिनां मुक्तानां वा देहात्मभ्रमः, न च तेषां ज्ञातृत्वादिकं न प्रकाशते । यथा परं ब्रह्मैव सङ्कल्पयति—* हन्ताहमिमास्तिस्रो देवता इत्यादि । अस्ति च * वेदाहं समतीतानीत्यादिभगवद्गीतावाक्यशतम् । तथा * तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च, * सर्वं ह पश्यः पश्यतीत्यादिभिर्योगिनां मुक्तानां चाहंत्वज्ञातृत्वादिप्रतिपत्तिः । अन्यथा संवित्स्वरूपप्रतिभानस्यापि भ्रान्तित्वप्रसङ्गः । देहात्मभ्रमनिवृत्तावपि तत्प्रतिभासोऽस्तीति चेत् कुतः? श्रुतेरिति चेत्, तुल्यम् । किंच ज्ञातृत्वावभासो निरधिष्ठानस्साधिष्ठानो वा? नाद्यः, अपसिद्धान्तात् । न द्वितीयः, संविदधिष्ठानत्वे तत्सामानाधिकरण्येनानुभवितुः ज्ञातृत्वं ज्ञानमिति प्रकाशप्रसङ्गात्; इदं रजतमिति शुक्तिसामानाधिकरण्येनेव रजतस्य । अधिष्ठानान्तरस्य तु परमार्थस्यानभ्युपगमात्, अपरमार्थस्याप्यन्ततस्संविदधिष्ठानत्वेनोक्तदोषानपायात् । दर्पणादिषु व्यधिकरणतया मुखाद्यध्यासस्तर्हि कथमिति चेन्न; उक्तोत्तरत्वात् । तत्र हि परमार्थभूते दर्पणे मुखदेशत्वमध्यस्यते । तत्र च सामानाधिकरण्यमस्त्येव । किंच सत्यस्य दर्पणस्याधिकरणत्वं मुखस्य चारोपितस्याधेयत्वं पश्यामः, अत्र तु सत्यतयाऽभ्युपेतायास्संविद एव मुखवदारोपितत्वाभिमतोऽहमर्थ एवाधिकरणतया प्रतीयते । एवं मुखदर्पणसंसर्गाध्यासपक्षेऽप्यधिकरणसत्यत्वादसिद्धिः । ननु दर्पणे मुखदेशत्वारोपः, मुखे वा दर्पणदेशित्वारोपः, एवमत्रापि संविद्यहमर्थदेशित्वारोप इति कः पक्षपातः? यथा संप्रतिपन्नस्य देवदत्तस्य गन्धर्वनगरदेशित्वारोप इति चेन्न; सामग्रीसंभवासंभवाभ्यां विशेषात् । तत्रहि दर्पणप्रतिहतप्रतिस्रोतःप्रवृत्तनयनालोकेन देशवियुक्तमुखमात्रग्रहणेऽनुकूलस्रोतसा च दर्पणदेशे गृह्यमाणे देशत्वादिसाम्यान्मुखदेशभेदाग्रहणाच्च मुख-

देशत्वारोपसंभवः ; मुखे च यत्किंचिद्देशवर्तिनि दर्पणदेशवृत्तिवस्त्वन्तरेण देशित्वादिसाम्यात् अन्यदेशवृत्तित्वाग्रहाच्च दर्पणदेशित्वारोपः, अत्रतु संविदि निर्विशेषायां देश्यन्तरसाम्यासंभवात्तद्भेदाग्र[हणा]हासंभवाच्च कथमहमर्थदेशित्वाध्यासः ? अहमर्थे तर्हि संविद्देशत्वाध्यास इति चेन्न ; तदध्यस्तस्य अहमर्थस्य तत्सामानाधिकरण्यप्रतीतियोग्यस्य रजते शुक्तिदेशत्वाध्यासवत्तदनुपपत्तेः । मणिप्रभाविषयसप्रभाकमण्यारोपवत्सर्वमुपपन्नमिति चेन्न ; प्रभाश्रयस्य परमार्थमणेस्संप्रतिपन्नत्वेन तस्य तत्प्रभायां तत्साम्यादिभिरारोपस्योपपत्तेः । अत्रापि यदि ज्ञानाश्रयस्सत्य इष्यते ज्ञानस्य सत्यं साधर्म्यम्, तदा तद्धर्मे ज्ञाने कुतश्चित्तदारोपस्संभवतीति शङ्क्येत । न च तत्साधर्म्येऽपि तस्य संभवः, प्रभावद्धर्मभूतस्य ज्ञानस्य धर्मिणमन्तरेण कदाचिदपि प्रकाशासंभवात् । धर्मधर्मिभावेन तु प्रतीतौ धर्मे धर्म्यारोपासंभवात् गमने गन्तृत्वारोपवत्तदसंभवः । न हि मणिधर्मतयैव प्रतीतायां प्रभायां मणिबुद्धिसंभवः । स्फटिकरागायःपिण्डौष्ण्यादिवत्संविद्यपि तच्छायापत्तितः संसर्गतो वा ज्ञातृत्वमस्त्विति चेन्न ; जपाकुसुमवह्न्यादेर्वास्तवरागौष्ण्ययोगेन तच्छायापत्तिसंसर्गाभ्यां तद्गुणकत्वेन प्रतीत्युपपत्तेः ; अत्र तु संविद्यहंकारे च वास्तवज्ञातृत्वानभ्युपगमात्, अवास्तवज्ञातृत्वच्छायापत्त्यादावन्योन्याश्रयानवस्थादिदोषात् । ज्ञप्तिमात्रत्वच्छायापत्त्यादौ ज्ञप्तिमात्रत्वप्रतिभासप्रसङ्गाच्च । अहङ्कारवृत्तिविशेषेऽनुभवस्य च्छायापत्त्या ज्ञातृत्वप्रकाश इति चेन्न ; * शब्दगन्धरसादीनां कीदृशी प्रतिबिम्बतेति न्यायेन नीरूपस्य च्छायापत्त्ययोगात् । भेदाग्रहमूलभ्रमस्यापि निर्विशेषे दुर्निर्वहत्वस्यान्यत्र प्रपञ्चितत्वात् । उभयत्रासिद्धमपि चूर्णहरिद्रासंसर्गजरागवत् ज्ञातृत्वं प्रकाशत इति चेन्न ; तथा सति वास्तवज्ञातृत्वप्रसङ्गात् । आगन्तुकचैतन्यवादावतारस्त्वधिकः, लोकायतवादावतारो वा । ते ह्येवमाहुः—* पृथिव्यप्तेजोवायव एव तत्त्वानि, तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवदिति । ननु च ज्ञातृत्वोत्पत्त्यभ्युपगमे स्यादिदं चोद्यम्, न पुनरध्यासे । तथा हि—क्रियाशक्तिमानहङ्कारो व्यञ्जकस्वभावत्वात् दर्पण इव स्वनिष्ठतया मुखम्, स्वक्रियात्मनाऽनुभूतिमभिव्यनक्ति, तत एव जानामीति भ्रम इति । तदपि मन्दम्, नित्यप्रकाशस्यानुभवस्याभिव्यक्तिनैरपेक्ष्यात् ; अपेक्षायामपि जडस्याहङ्कारस्य संविद इव साक्षाद्व्यञ्जकत्वाभावात् । इन्द्रियादिवद्व्यञ्जकत्वाभ्युपगमेऽपि तज्जन्यज्ञानान्तरानभ्युपगमेन तदसिद्धेः । ज्ञानान्तराध्यासस्य त्वयापि निरूप्यमाणत्वात् । तज्जन्यज्ञानविषयतया घटादेरिव संविदोऽपि त्वदुक्तप्रकारेणाननुभूतित्वमिथ्यात्वादिप्रसङ्गाच्च ।

किंच, किमनभिव्यक्तस्यैवाहङ्कारस्यानुभूतिव्यञ्जकत्वम् ? उताभिव्यक्तस्य वा ? नाद्यः, सत्याकारत्वेनानारोपितत्वप्रसङ्गात् । न द्वितीयः, संविदभिव्यक्तिमन्तरेण तदनभिव्यक्तेः । अनभिव्यक्तायाश्च संविदो व्यञ्जकत्वे स्वयंप्रकाशत्वादिपरित्यागप्रसङ्गात् । तदभिव्यक्तितः पश्चादभिव्यक्तस्याहङ्कारस्य तदभिव्यक्तिं प्रति करणत्वे विरोधात्, तादधीन्यादिप्रसङ्गाच्च । पूर्वाभिव्यक्तस्याप्यनुभवस्य तद्व्यङ्ग्येनैवाहङ्कारेण विशदव्यक्तिस्साध्यते, रविकरव्यङ्ग्येन करतलेन पूर्वव्यक्तरविकरविशदीकरणवदिति चेन्न ; निर्द्धर्मके निरंशे स्वप्रकाशे वैशद्यासंभवस्यान्यत्रोक्तेः । रविकरे तु सधर्मके सावयवे स्फुटास्फुटभावाद्युपपत्तेः । न च तत्र करतलेन तद्विशदीकरणम्, करतलप्रतिहतिवशाद्बहुलीभूतस्यालोकस्य सेतुसंरुद्धस्रोतस इव स्वयमेव बहुलतयोपलम्भात् । न च तत्र निरोध एव नास्तीति वक्तुं शक्यम्, तिरोधानवैयर्थ्यादिप्रसङ्गात् । न च निरोधेऽपि बाहुल्यं नास्तीति शङ्कनीयम्, प्रतीपस्रोतसा तत्सिद्धेः । तच्च दर्पणादिप्रतिफलितरविकिरणैर्गर्भगेहान्धकारनिरसनादिषु सिद्धम् । न च तावता करतलादुपरिष्टादपि बहुलोपलम्भप्रसङ्गः, मूलाग्रयोरालोकानां घनविरलभावस्य सर्वत्र दीपादिष्वप्युपलब्ध्या प्रतिहतालोकस्याप्यग्रवैरल्योपपत्तेः । न च मात्रयापि पार्श्वालोकात् करतलोपरितनस्यालोकस्य

न वैषम्यं दृश्यत इति वाच्यम्, सूक्ष्मस्य वैषम्यस्य दुर्ग्रहत्वात्। अन्यथा माध्यंदिनमार्ताण्डमण्डलालोकमध्यजाज्वल्यमानप्रदीपालोकसन्निधाने तत्रत्यालोकमण्डलस्य बहुलतरत्वेन ग्रहणप्रसङ्गात्। न च करतलप्रतिहतौ मूलेऽपि तत्प्रसङ्गः, उपलम्भव्यवस्थाप्यत्वादुपलब्धियोग्यबाहुल्यस्य। किंच यत्स्वनिष्ठतयाऽभिव्यक्तेः प्रयोजकं व्यञ्जकत्वम्, तत्किं ज्ञानत्वम्? उत ज्ञानजनकत्वम्? यद्वा इन्द्रियत्वम्? उत तदनुग्राहकत्वम्? उत तत्सम्बन्धहेतुत्वम्? यद्वा बोद्धृबोध्ययोरन्यतरगतप्रतिबन्धनिराकर्तृत्वम्? अथवा सांख्यादिमते घटादिं प्रति दण्डादेरिव स्वानतिरिक्तस्वाभिमतानुभूतिं प्रति जनकत्वमेवेति। नाद्यः; असिद्धेः, विरोधाच्च। उत्तरे कल्पास्सर्वेऽपि संविदो ज्ञानविषयत्वानभ्युपगमेनैव निरस्ताः। विशेषतोऽपि ब्रूमः। न द्वितीयः, इन्द्रियादिभिरनैकान्त्यात्। न तृतीयः, असिद्धेः। अहङ्कारजन्मनामेकादशानामेव हीन्द्रियत्वं श्रूयते। न चतुर्थः, अदृष्टेश्वरादिभिर्व्यभिचारात्। अत एव न पञ्चमः। इन्द्रियक्रियादिभिश्च व्यभिचारोऽधिकः। न षष्ठः, शमदमादिभिर्दोषादिभिश्चानैकान्त्यात्; दर्पणादिदृष्टान्तस्य च साधनवैकल्यात्। न चाहङ्कारापनेयं किंचिदनुभूतिविषयज्ञानोत्पत्तिप्रतिबन्धकं संभवति, बाह्यस्यान्धकारादेरिवान्तरस्य किल्बिषादेरप्यहङ्कारनिवर्त्यत्वाभावात्। अज्ञानस्यापि भावरूपस्याभावरूपस्य वा ज्ञानमात्रनिवर्त्यत्वात्। भवदभिमताज्ञानस्य स्वरूपाश्रयविषयादिदुर्निरूपत्वस्यन्यात्र स्थापनात्। नच ज्ञानप्रागभावस्तदुत्पत्तिप्रतिबन्धकः, प्रागभावस्य कैश्चित्कारणत्वाभ्युपगमात्, अन्येषामपि कार्यस्य तन्निरसनरूपत्वेन कार्योत्पत्तेः प्रागभावनिरसनापेक्षायामात्माश्रयप्रसङ्गात्। किंच व्यञ्जकानां स्वनिष्ठतयाऽभिव्यङ्ग्याभिव्यञ्जनस्वभावत्वे सौगतसौहार्दं प्रकाशितं भवति। अप्रामाण्यं स्वत इति हि तैरङ्गीक्रियते। स्वतःप्रामाण्यभागे चापौरुषेयी श्रुतिरपि न प्रमाणं स्यात्। अथ मन्यसे---आत्मा तावन्निर्विकार इति श्रुतिसिद्धम्, तस्य च ज्ञातृत्वाभ्युपगमे विकारित्वप्रसङ्गः, ज्ञातृत्वं हि गन्तृत्ववत्क्रियाविशेषकर्तृत्वरूपत्वाद्विक्रियात्मकम्; अतः कृतिशक्तिमतोऽन्तःकरणस्य सैव कृतिश्चितिशक्तिरूपात्मसन्निधानेन ज्ञानरूपेव भातीति न क्वचिदपि तात्त्विकं ज्ञातृत्वम्। प्रयोगश्च---ज्ञातृत्वकर्तृत्वाहंत्वादिकं नात्मधर्मः, विक्रियात्मकत्वात्, दृश्यत्वात्, दृश्यनिष्ठत्वात्, अहमर्थसमानाधिकरणतया प्रतीयमानत्वात्, संप्रतिपन्नवत्। अत्रैव विकारिद्रव्यस्थमिति वा साध्यम्। विप्रतिपन्नोऽहंप्रत्ययो नात्मगोचरः, अहंप्रत्ययत्वात्, देहाहंप्रत्ययवदिति; यद्वा, आत्मा वा ज्ञातृत्वकर्तृत्वाहंत्वादिरहितः, निर्विकारत्वात्, अन्तःकरणरूपाहङ्कारव्यतिरिक्तत्वात्, अजडत्वात्, प्रत्यक्त्वात्, आत्मत्वादित्यादिभिश्चेति। अत्र ब्रूमः, यथा निर्विकारत्वमात्मनश्श्रुतिसिद्धं तथा ज्ञातृत्वमपि तत एव सिद्धम्। तथाहि * अथ यो वेदेदं जिघ्राणीति स आत्मेत्यादि, तथा * एष हि द्रष्टा [स्प्रष्टा] श्रोतेत्याद्यारभ्य * विज्ञानात्मा पुरुष इत्यादिभिरात्मन एव साक्षाज्ज्ञातृत्वं श्रूयते। निर्विकारश्रुतिविरोधात् भ्रान्तिसिद्धविषया ज्ञातृत्वश्रुतिरिति चेन्न, विपरिवर्तप्रसङ्गात्। निर्गुणनिरूपणे च विषयव्यवस्थाया निर्वहणं द्रष्टव्यम्। कथं च ज्ञातृत्वस्य विकारात्मत्वम्? न तावन्मृत्पिण्डादिवत्स्वरूपान्यथाभावेन; तदसिद्धेः। नापि धात्वर्थयोगितामात्रेण, अस्तिभवतीत्यादियोगेनानुभूतेरपि विकारित्वप्रसङ्गात्। नित्यत्वादस्त्यादेर्विकारत्वं नास्तीति चेन्न; ज्ञातृत्वेऽपि समानत्वात्। ज्ञातृत्वस्य कादाचित्कतयोपलम्भाज्ज्ञानं विकार इति चेन्न; अस्त्यादेरपि कादाचित्कतयोपलम्भात्तस्यापि विकारत्वप्रसङ्गात्। ज्ञाननित्यत्वश्रुत्यादिबलादस्त्यादेर्न विक्रियात्मत्वमिति चेत्, तर्हि ज्ञातृत्वमपि श्रुतिसिद्धमेव; यथा---* न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इति। एवंच सति कर्मोपाधिकतत्तत्करणव्यापारद्वारकनियतविषयज्ञानप्रकाशाप्रकाशावपेक्ष्य उदयास्तमयव्यपदेशः। उक्तं च भगवता शौनकेनापि---* यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः। दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा॥ यथोद-

पानकरणात्क्रियते न जलाम्बरम् । सदेव नीयते व्यक्तिमसतस्संभवः कुतः ॥ तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥ इति । एतेन ज्ञाननित्यत्वे नित्योपलम्भप्रसङ्ग इति चोद्यमपि परिहृतम्, कर्मोपाधिकसङ्कोचवशात्तदप्रकाशात् । ज्ञानसङ्कोचविकासाभ्यामात्मनो विकारित्वमिति चेन्न ; साक्षात्तदाश्रयत्वाभावात्, व्यवधानेन तदाश्रयत्ववचनस्य स्वरूपविषयनिर्विकारश्रुत्या सह विरोधगन्धाभावात् । एवं च सति प्रत्यक्षकलहशान्तिरपि स्यात् । यच्च विक्रियात्मकत्वादित्याद्यनुमानतूलजालम्, तत्रापि बाधानैकान्त्यादिपवनदहनसंमूर्च्छनम् । बाधस्तावन्नित्यज्ञातृत्वप्रतिपादकश्रुत्यादिवशात्सर्वत्र सिद्धः ।

विशेषतश्च ब्रूमः—विक्रियात्मकत्वादिति स्वरूपपरिणामविवक्षायामसिद्धिः । क्रियायोगमात्रादिविवक्षायामस्याभिरनैकान्त्यम् । दृश्यत्वान्नात्मधर्म इत्यस्य दूषणं तु निर्विशेषत्वनिराकरणे ग्राह्यम् । दृश्यनिष्ठत्वादित्येतदप्यात्मनो दृश्यत्वसमर्थनेन परिहृतम् । यदि पुनर्द्रष्टृनिष्ठत्वनिषेधे तात्पर्यम्, तदा व्याघातः; नहि ज्ञातृत्वमेव ज्ञातृनिष्ठं न भवतीति संभावयामः । यच्चाहमर्थसमानाधिकरणतया प्रतीयमानात्वादिति, तदप्यात्मत्वेनानैकान्तिकम् । अस्ति ह्यहमात्मेत्यपि सामानाधिकरण्यम् । आत्मा तावदस्ति, तस्यात्मत्वं नाम किमपि नास्तीति कुत्रानैकान्त्यमिति चेत्? तर्हि ज्ञाता नाम कश्चिदस्ति ज्ञातृत्वं नाम किंचिन्नास्तीति परिभाष्य तत्पक्षीकारेण प्रयोगं परित्यज्य तूष्णीमास्स्व । एषु च ज्ञानमात्रात्मधर्मत्वनिषेधे त्वप्रसिद्धविशेषणता । ज्ञानधर्मत्वमात्रनिषेधेंऽशतस्सिद्धसाधनता । ज्ञातृधर्मत्वनिषेधे स्ववचनविरोधापसिद्धान्तौ । विकारिद्रव्यस्थमिति साध्येऽप्यात्मनोऽपि शरीरसम्बन्धादिमात्रविकाराभ्युपगमेन सिद्धसाधनता उत्पत्तिविनाशादि विकारिद्रव्यनिष्ठमिति साध्येऽपि बाधाप्रयोजकत्वादिरपरिहार्यः । एवमहंप्रत्ययो नात्मगोचरः, अहंप्रत्ययत्वादित्यत्रापि ज्ञानमात्राहमर्थाद्यात्मशब्दार्थविकल्पेन सिद्धसाधनत्वाप्रसिद्धविशेषणत्वविरोधापसिद्धन्तादिर्द्रष्टव्यः । न च भ्रान्तिस्थलेऽहंप्रत्ययस्यानात्मविषयतया अन्यत्रापि तथैव भवितव्यम्, अतिप्रसङ्गात् । यश्चात्मा ज्ञातृत्वादिरहित इति साध्ये निर्विकारत्वादिति हेतुः, सच विकारविकल्पेन निरस्तप्रायः । यस्त्वन्तःकरणरूपाहङ्कारव्यतिरिक्तत्वादिति, सोऽपि तेनैवात्मनो ज्ञानरूपत्वमपि निषेद्धुं शक्यमिति प्रसञ्जकत्वादप्रयोजकत्वाच्च परिहृतः । ज्ञातृत्वाभ्युपगमे जडत्वपराक्त्वानात्मत्वादिप्रसङ्ग इति विपक्षे व्याप्तिसिद्धेः प्रयोजकत्वमिति चेन्न ; ज्ञातृत्वेऽप्यजडत्वादिकं भवत्विति त्वत्प्रयुक्तप्रसङ्गव्याप्तावपि पर्यनुयोगावतारात् । एतेनाजडत्वादित्यनुमानमपि निरस्तं भवतीति । यश्चाहङ्कारस्य ज्ञातृत्वमिच्छति, स कथं दृश्यत्वप्रकृतिपरिणामत्वादिभिर्देहस्याचेतनत्वं साधयति । यदि पुनर्दृश्यत्वाद्यविशेषेऽपि देहस्याचेतनत्वमन्तःकरणस्य ज्ञातृत्वं च देहत्वादिवद्व्यवस्थितं मन्येत, तदाऽन्तःकरणस्यैव दृशित्वमपि साधयेत्, पर्यनुयोगपरिहारयोस्तुल्यत्वात् । विकारिद्रव्यविशेषस्यैव परिणामविशेषवशाज्ज्ञातृत्वमिच्छन्नूनं भूतचैतन्यवादमेवाभिप्रेत्यात्मापह्नवादिषु भिक्षुपादप्रसारणन्यायेन प्रव[र्ति]र्तत इत्यायातम् । अतस्सिद्धं ज्ञातृत्वमात्मन एव ; तच्चानध्यस्तं सत्यमिति ॥

॥ इति शतदूषण्यां ज्ञातृत्वाध्यासभङ्गवादः सप्तविंशः ॥ २७ ॥

॥ अथ साक्षित्वभङ्गवादः अष्टाविंशः ॥ २८ ॥

चतुर्दशविधस्यापि साक्षिवर्गस्य साक्षिणे । स्वतस्सर्वविदे तस्मै नमस्सर्वान्तरात्मने ॥

यत्पुनराहुः—आसंसारमज्ञानसाक्षित्वेन ब्रह्मावतिष्ठते । श्रूयते हि—* साक्षी चेता केवलो निर्गुणश्चेत्यादि । न च स्वप्रकाशप्रत्यक्षादैन्द्रियिकप्रत्यक्षाच्चातिरिक्तं साक्षिप्रत्यक्षं नाम न किञ्चिदुपलभ्यत इति वाच्यम्, सुखमहमस्वाप्समेतावन्तं कालं न किंचिदहमज्ञासिषमिति सुखाज्ञानयोः साक्षित्वेन सुप्तोत्थितस्य स्वात्मपरामर्शादिति । अत्रोच्यते । तत्र तावत्स्वरूपसुखप्रकाशः स्वप्रकाशान्तर्गतः, न पुनस्साक्षिप्रकाशगम्यः । वैषयिकसुखप्रकाशस्तु सुषुप्तिकाले न संभवति । अज्ञानमपि तदानीन्तनस्मृत्यभावेनानुमीयते, तत्कालादिवत् । न हि सुषुप्तिकालोऽपि तदानीमेव साक्षिणा गृहीत इतीच्छसि । इष्यमाणत्वेऽपि कालोपाधेरपि कस्यचिद्ग्रहीतव्यतया जागरनिर्विशेषत्वप्रसङ्गः । तदग्रहणे पुनरेतावन्तं कालमिति कालविशेषणोपादानविरोधस्स्यात् । किंच किमिदं साक्षित्वमिति निरूपणीयम् । किं साक्षात्कर्तृत्वम्, उत साक्षात्कारत्वम्, उताविद्यकप्रकाशं प्रति हेतुत्वम्, उतान्यत्किंचित् ? इति । नाद्यः, ब्रह्मणो वास्तवज्ञातृत्वानभ्युपगमात् । लोके परमार्थद्रष्टारमेव साक्षीति व्यपदिशन्ति । आविद्यकस्यापि ज्ञातृत्वस्याहंकारनिष्ठत्वाभ्युपगमेन विलीनाहंकारेषु सुषुप्त्यादिकालेषु तदसिद्धेः । न द्वितीयः, * साक्षाद्द्रष्टरि संज्ञायामित्यनुशासनविरोधात् । आह चाहमर्थात्मत्वसमर्थनमध्ये—* साक्षित्वं च साक्षाज्ज्ञातृत्वमेव, न ह्यज्ञातुस्साक्षित्वम्, ज्ञातैव हि लोकवेदयोस्साक्षीति व्यपदिश्यते, न ज्ञानमात्रम्; स्मरति च भगवान् पाणिनिः—* साक्षाद्द्रष्टरि संज्ञायामिति साक्षाज्ज्ञातर्यैव साक्षिशब्दमिति । औपचारिकसाक्षित्वाभ्युपगमेऽपि स साक्षात्कारः किं स्वात्मनः, उताविद्यायाः ? नाद्यः, स्वप्रकाशस्यान्यवैमुख्येन दृगधीनसिद्धेरविद्याया एवासिद्धिप्रसङ्गात् । न द्वितीयः, मिथ्याभूताविद्यागोचरत्वेन वृत्तिज्ञानवत् ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गात् । स्वरूपेणाबाधितस्यापि वृत्तिज्ञानस्य विषयमिथ्यात्वादेव हि मिथ्यात्वमुपवर्णितं सविषयमिथ्यात्ववादिभिः । स्वगोचर एव साक्षात्कारः पुनरविद्यागोचर इव भातीति चेन्न; तथाऽप्यविद्याया असिद्धिप्रसङ्गात् । न ह्यन्यगोचरस्य ज्ञानस्य ततोऽन्यगोचरत्वेन भ्रमः, अनुव्यवसायस्य विषयावच्छिन्नग्राहकत्वात् । तद्भ्रमेऽपि न तेन ज्ञानेन तत्सिद्धिः । किंच स्वगोचर एवायं साक्षात्कारोऽविद्यागोचर इव कस्य भाति ? न तावद्ब्रह्मणः, अहमविद्यागोचर इति ज्ञातुमसमर्थत्वात् । नाप्यविद्यायाः, अहं ब्रह्मणो गोचर इव भामीति तस्या अपि ज्ञातुमशक्यत्वात् । न चान्यस्य, तदुभयव्यतिरिक्तस्य कस्यचित् सुषुप्त्यादिषु अप्रकाशमानत्वेन तदयोगात् । न च न कस्यचिदिति वक्तुं शक्यम्, भातीत्यादेः प्रतिसम्बन्धिनमन्तरेण प्रयोगादृष्टेः । मिथ्यासाक्षित्वमिति चेन्न; साक्षित्वं यदि मिथ्या स्यात् साक्ष्यन्तरपरिग्रहः । न चेदाधारभावेऽपि मिथ्यात्वमनुवर्ण्यताम् ॥ नन्वासंसारमविद्यायास्स्वात्मनश्च प्रकाशो ब्रह्मणः, अपवर्गे तु स्वात्मन एवेति नियम इति चेत्, किमपवर्गदशायामविद्यायाः प्रकाशो निवृत्तो न वा ? निवृत्तश्चेत् स्वात्मैव निवृत्तस्स्यात् । अनिवृत्तत्वे त्वविद्याऽपि तदानीमनिवृत्ता स्यात् । प्रागपि प्रकाशमात्राधीनसिद्धिर्हि सा । यदि च ब्रह्मस्वरूपसाक्षात्कार एवाविद्यामपि प्रकाशयेत्, ब्रह्मणोऽविद्यायाश्च तादात्म्यं प्रसज्येत । स्वरूपमेव हि तेन प्रकाशनीयम् । अस्वरूपप्रकाशत्वे वृत्तिवन्मिथ्यात्वं प्रागेवोक्तम् । विषयापहार एव वा स्वरूपापहारोऽपि वा यद्वा तद्वा मिथ्यात्वमस्तु । किंचाविद्यासाक्षित्वं ब्रह्मणस्स्वरूपमेव, ततोऽन्यद्वा ? पूर्वत्र स्वरूपस्य नित्यत्वान्नित्यमविद्यासाक्षित्वप्रसङ्गः । उत्तरत्र तत् किं परमार्थभूतमुतापरमार्थभूतम् ? आद्ये ब्रह्मव्यतिरिक्तसत्यत्वानभ्युपगमेनापसिद्धान्तः । द्वितीये तत् किमविद्यास्वरूपमुत तदारब्धम् ? नाद्यः, विषयस्वरूपमात्रस्यैव साक्षिस्वरूपत्वे घटा-

देर्यावद्विनाशं व्यवधानादिदशायामप्यविच्छेदेन प्रकाशप्रसङ्गात् । न द्वितीयः, साक्षित्वाधीनसिद्धेरविद्यायाः साक्षित्वजनकत्वायोगात् । साक्षित्वस्याप्यनादित्वाभ्युपगमेनापसिद्धान्ताच्च । एतेनाविद्याप्रकाशं प्रति हेतुत्वपक्षो निरस्तः, अनादेर्हेत्वनपेक्षणात् । नापि चतुर्थः, तस्यापि स्वरूपान्तर्भावबहिर्भावादिविकल्पदुःस्थत्वादिति । अतो न कथंचिदपि निर्विशेषज्ञानमात्रस्य साक्षित्वं संभवतीति साक्षित्वोपदेशसामर्थ्यादेव ज्ञातृत्वादिकमात्मनोऽवश्याभ्युपगन्तव्यमिति ॥

॥ इति शतदूषण्यां साक्षित्वभङ्गवादः अष्टाविंशः ॥ २८ ॥

॥ अथ शास्त्राविरोधपरिहारवादः एकोनत्रिंशः ॥ २९ ॥

विदितमनुवदन्तो विश्वमेतद्यथावद्विदधति निगमान्ताः केवलं यन्मयत्वम् ।
अविदितबहुभूमा नित्यमन्तर्विधत्तां हयवरवदनोऽसौ सन्निधिस्सन्निधिं नः ॥

यदाहुः—शास्त्रप्रत्यक्षयोर्विरोधे शास्त्रं बलीयः । अन्यथाऽद्वैतशास्त्रस्य प्रामाण्योच्छेदप्रसङ्गात्, अपरोक्षदेहात्मभ्रमादेश्च दुर्निरासत्वापातात् । न चात्र विरोध एव न सम्भवतीति वाच्यम्, भेदप्रपञ्चगोचरत्वतन्निषेधाभ्यां विरुद्धविषयत्वोपलम्भात् । न च देशकालस्वरूपादिभेदेन निषेधः संकोचमर्हति, * नेह नानास्ति किंचन, * तस्मान्न विज्ञानमृतेऽस्ति किंचित्कचित्कदाचिद्द्विज वस्तुजातमित्यादिभिस्सर्वदेशसर्वकालवर्तिनां ब्रह्मव्यतिरिक्तवस्तूनां सर्वप्रकारनिषेधोपलम्भात् । * त्रय आवसथास्त्रयः स्वप्ना इति च स्वप्नस्येव जागरसुषुप्तयोरपि मिथ्यात्वमेव ह्युच्यते । नच जागरादिवत्स्वप्नस्यापि सत्यत्वमुच्यत इति विपरिवर्तः, स्वप्नशब्देनैव तयोरुपचरितत्वात् । स्वप्नशब्दस्य च मिथ्यार्थे लोकप्रसिद्धत्वात् । अन्यत्र तदभावात् । न ह्यावसथशब्दस्सत्ये प्रसिद्धः । न च भेदविधायकश्रुतिबलात् भेदनिषेधकश्रुतीनामन्यपरत्वम्, निषेधस्यैव प्रसङ्गसापेक्षत्वेन विध्यपेक्षया परत्वात् अपच्छेदन्यायेन बलीयस्त्वात् । नच सिद्धवस्तुविषययोस्समुच्चयविकल्पादिसम्भव इति निर्गुणवादे निरूपितम् । अतोऽत्यन्तविरोधे रज्ज्वधिकरणसर्पभूविदलनवत्कम्बुकलधौतवच्चोभयबाधोऽन्यतरबाधो वाऽवश्यंभावी । तत्र नाद्यस्संभवति, पारमार्थिकत्वापारमार्थिकत्वातिरिक्तकोटिदर्शनाभावात् । निषेधकतया परस्य च शास्त्रस्य निषेधकान्तरादर्शनात् । न च विधिरेव निषेधस्य निषेध इति वाच्यम्, तस्य स्वरूपतस्स्वार्थावगाहित्वात् । निषेधस्य तु प्रतियोगिप्रतिक्षेपात्मकतयैव स्वरूपलाभः । विनाशादिषु कथमिति चेन्न ; तत्रापि प्रतियोग्यपेक्षत्वात् । विनाशादिषु शब्देषु नास्तिशब्दस्य गोचरः । नञुपश्लेषवैधुर्यात् केवलं प्रतिपद्यते ॥ अतोऽन्यतरबाधोऽवशिष्यते । बाधश्च बलवता दुर्बलस्यैव । न च प्रत्यक्षपरोक्षयोः प्रत्यक्षत्वपरोक्षत्वाभ्यामेव प्राबल्यदौर्बल्ये, शुक्तिप्रत्यक्षेण शुक्तिरजतप्रत्यक्षबाधस्य दीपशिखादिभेदानुमानेन दीपैक्यप्रत्यभिज्ञानबाधस्य च परित्यागप्रसङ्गात् । न चोपजीव्योपजीवकभावात् प्रत्यक्षशास्त्रयोः प्राबल्यदौर्बल्ये ; व्याप्तिग्राहकप्रत्यक्षोपजीविनाऽनुमानेन ज्वालैक्यप्रत्यक्षबाधस्योक्तत्वात् । नच पूर्वत्वादुपक्रमवत् प्रत्यक्षप्राबल्यम्, पूर्वत्वमात्रस्यापच्छेदे परस्यैव प्राबल्यनिश्चयेनाप्रयोजकत्वात् । न च परत्वस्य बाधप्रयोजकत्वे माध्यमिकमर्यादया त्रय्यन्तानामपि बाध्यत्वमिति वाच्यम्, परत्वमात्रस्य बाधकत्वेनानुपन्यासात् । अन्यथा द्विचन्द्रज्ञानादिना प्राक्तनचन्द्रैकत्वज्ञानादिबाधप्रसङ्गात् । तस्माद्द्वयोर्ज्ञानयोर्विरोधे सावकाशत्वादन्यथासिद्धं बाध्यम्, अनवकाशत्वादनन्यथासिद्धं बाधकम् । अवकाशश्चाविरुद्धविषयलाभोऽप्रमाणकोटिनिवेशो वा । तत्र पूर्वस्येहासंभवो दर्शितः । उत्तरस्तु कार-

णदोषे पर्यवसितः। न च शास्त्रजन्यज्ञानस्य दुष्टकारणप्रसूतत्वम्, कर्त्रभावेनैव भ्रमविप्रलम्भप्रमादाशक्तिमूलत्वशङ्कोच्छेदात्; अविच्छिन्नसम्प्रदायत्वेन शैथिल्यावापोद्वापादिविचारवैदेशिकत्वात्; उपबृंहणब्रह्ममीमांसाद्यनुग्रहेण प्रतिपत्तृदोषाणामपि निर्मूलत्वात्। अतश्शब्दप्रमाणदोषतया संप्रतिपन्नसमस्तसम्भावनाविरहे शास्त्रजन्यज्ञानस्य निर्दोषकारणप्रसूतत्वेन प्रामाण्यात् प्राबल्यं प्रतिष्ठितम्। न च प्रत्यक्षदोषतया संप्रतिपन्नकाचकामीलादिदोषविरहात् गगनपवनदहनसलिलवसुधादिगोचरप्रत्यक्षस्यापि प्राबल्यं स्थितमिति वाच्यम्, भेदवासनायाः प्रत्यक्षदोषत्वेन वासनामूलभेदभ्रमे दृष्टत्वात्; भेदवासनायाश्च बीजाङ्कुरन्यायेन प्रवाहानादितया तत्तत्प्रत्यक्षमूलत्वोपपत्तेः। अतो दुष्टकारणप्रसूतं भेदज्ञानं निर्दोषनिगमान्तजन्मना निर्विशेषाद्वैतज्ञानेन बाध्यत इति।

अत्रोच्यते। यदुक्तम्—शास्त्रबलीयस्त्वाभावे सत्यद्वैतशास्त्रप्रामाण्योच्छेदप्रसङ्ग इति, तदसत्; प्रत्यक्षाविरोधिन्येवाद्वैते द्वैते वा तत्प्रामाण्यस्य निर्वाह्यत्वात्। यच्च प्रत्यक्षप्राबल्ये देहात्मभ्रमादौ दुर्निरसत्वमिति, तदयुक्तम्; देहात्मभेदप्रत्यक्षानुसारिणैव शास्त्रेण तन्निरसनात्। अन्यथा प्रत्यक्षाच्छास्त्रस्य बलीयस्त्वे यूपादित्यैक्यवाक्येन यूपादित्यभेदग्राहिप्रत्यक्षबाधप्रसङ्गात्। यच्चोक्तं निषेधस्य सर्वविषयत्वोपलंभेन संकोचो न युज्यत इति, तदपि मन्दम्; सर्वविषयत्वे सत्येव हि प्रमाणान्तरविषयात् संकोचो युज्यते। अन्यथा *न हिंस्यादित्यस्याग्नीषोमीयवाक्येनापि संकोचो न स्यात्। न चात्र प्रत्यक्षविरोधमात्रेण संकोचः, प्रकरणाद्यापन्नविशेषेणापि तत्सिद्धेः। तथा हि यत्र परमात्मानं प्रति अपृथक्सिद्धत्वं विवक्षितम्, तत्र प्रपञ्चस्य स्वातन्त्र्यनिषेधे तात्पर्यम्, न तु ब्रह्मविशेषणभूतसमस्तनिषेधे। यथैक एव देवदत्तस्तिष्ठति नान्यत् किंचिदित्युक्ते तत्तुल्यपुरुषान्तरनिषेधे तात्पर्यम्, न पुनस्तदवयवगुणजात्यादिनिषेधे। तदुक्तं संवित्सिद्धौ—*यथा चोलनृपः सम्राडद्वितीयोऽस्ति भूतले। इति तत्तुल्यनृपतिनिवारणपरं वचः। नतु तत्पुत्रतद्भृत्यकलत्रादिनिवारणम्॥ इति। यत्र पुनर्जीवानां स्वाभाविकस्वरूपप्रतिपादने तात्पर्यं तत्र देहात्मभ्रमप्रतिक्षेपाय देहादेस्तस्मिन्नध्यस्तत्वमात्रमुच्यते। न पुनस्स्वरूपेण मिथ्यात्वम्। यथा शुक्तौ रजतस्याध्यस्तत्वेन शुक्तिरजतमिथ्यात्वम्; न रजतमात्रमिथ्यात्वं तद्वत्। यत्रतु जीवानां परिशुद्धानां परस्परसाम्ये तात्पर्यं तत्र देवादिरूपस्य तत्प्रयुक्तसुखदुःखादिरूपस्य च वैधर्म्यस्यौपाधिकत्वेन स्वाभाविकत्वनिषेध एव क्रियते। यथैकजातीयानां रक्तानामुपरञ्जकद्रव्यान्तरसंसर्गप्रयुक्तवर्णवैषम्यादेरस्वाभाविकत्वमुच्यते। निर्गुणवादादेश्च हेयगुणनिषेधे तात्पर्यमित्यन्यत्र स्थितम्। *सदेवेत्यादि च सद्विद्यानिरूपणसुगमार्थम्। एवं सर्वत्रोह्यम्। यत्पुनः *त्रयस्स्वप्ना इति जागरसुषुप्त्योरपि स्वप्नसाम्यमुच्यत इति, तत्र जागरसुषुप्त्योस्स्वप्नसाम्ये विवक्षितेऽपि न मिथ्यात्वाकारेण साम्यमिति पश्यामः। यथा पैंगल्यातिशयविवक्षया कश्चिदग्निर्माणवक इत्युपचरति, कश्चिदूष्मलत्वविवक्षया, कश्चिच्च तपश्चर्यादिप्रयुक्तपरिशुद्धिविवक्षया, एवमत्रापि प्रमाणान्तराविरोधाय स्वप्नसाधर्म्यान्तरे तात्पर्यं ग्राह्यम्। तच्च यथा स्वप्नस्य ईश्वरस्रष्टृत्वेन जीवस्य कर्मानुगुणनियतदेशकालस्वरूपतत्तत्स्वप्नफलभोगादौ न स्वातन्त्र्यं तद्वज्जागरसुषुप्त्योरपि कर्मफलत्वेनेश्वराधीनत्वान्न तत्र जीवस्य स्वातन्त्र्यमित्येवमादिरूपेण प्रमाणाविरोधेन ग्राह्यमिति। ततश्च—

औपचारिकवाक्येषु योग्यमेवोपचर्यते। तत्तत्प्रकरणादिभ्यस्तद्विशेषोऽपि सिध्यति॥

यत्तु भेदनिषेधकश्रुतीनां भेदविधायकश्रुत्यपेक्षया परत्वेन बलीयस्त्वमिति, तत्रापि नापच्छेदन्यायविषयत्वमिति निर्गुणनिरूपणे ग्राह्यम्। यच्चाद्वैतगोचरशास्त्रस्य निषेधकान्तरं न दृश्यत इति; तदपि परमसुहृदं माध्यमिकं

विस्मृत्योच्यते । स हि शून्यमेव तत्त्वमिति वदन् संविदद्वैतमपि निषेधति । न च तद्वाक्यं दोषमूलत्वेनाप्रमाणत्वात्तरमप्यकिंचित्करमिति वाच्यम्, वेदान्तवाक्यस्यापि अविद्याख्यदोषमूलत्वस्य त्वयैव वर्ण्यत्वात् । दोषाणामवान्तरभेदस्तु न बलाबलहेतुः, भ्रमविप्रलम्भादीनामितरेतरभिन्नत्वेऽपि दोषत्वस्याविशेषात् । तथाऽपि प्रामाण्यभ्रमो वेदेषु बहुलमुपलभ्यत इति चेत् , किमतः ? तत्त्वस्थितिनिरूपणेऽनुपकारकत्वात् । अत एव शास्त्रप्रत्यक्षयोः प्राबल्यदौर्बल्यहेतुरपि निर्मूलः, अविद्याख्यदोषमूलत्वाविशेषात् । न च भेदवासना दोषः, शास्त्रतो निर्विशेषाद्वैते सिद्धे हि तद्विपरीतसंस्कारात्मनो भेदवासनाया दोषत्वकल्पनासिद्धिः, तद्दोषत्वे च सति तन्मूलात्प्रत्यक्षात्प्राबल्येन शास्त्रतो निर्विशेषाद्वैतसिद्धिरित्यन्योन्याश्रयात् । शास्त्रेण निर्विशेषत्वे सिद्धे स्याद्भेदवासना । दोषस्तद्दोषभावे च सिद्धे स्यान्निर्विशेषधीः ॥ न च क्वचिद्भेदवासना दोष इति लोके सर्वत्र प्रसङ्गः, अभेदवासनायामपि तथा प्रसङ्गात् । तस्यापि च भेदवासनाख्यदोषस्य शास्त्रेऽपि दुस्त्यजत्वाच्च । अन्यथा प्रकृतिप्रत्ययपदवाक्यतदर्थादिभेदस्याकाङ्क्षासन्निधियोग्यतादिभेदस्य चानुपलम्भे वाक्यार्थविशेषप्रत्ययस्यानुदयप्रसङ्गात् । न च भेदवासना प्रत्यक्षस्यैव दोष इति वाच्यम्, विपरीतसंस्कारात्मना दोषत्वे क्वचिद्दोषता क्वचिन्नेति नियामकाभावात् । आकारान्तरेण तद्दोषत्वस्य दुष्प्रतिपादत्वात् । तद्दोषत्वे सति तन्मूलस्य भ्रान्तत्वम्, तद्भ्रान्तत्वे च सिद्धे तद्दोषत्वमिति च परस्पराश्रयणात् । प्रत्यक्षस्य भ्रान्तत्वम्, तद्भ्रान्तत्वे निर्विशेषत्वप्रतिपादनम्, तत्प्रतिपादने भेदवासनाया दोषत्वमिति चक्रकं चात्रानुसन्धेयम् । न चाद्वैतवाक्यार्थज्ञाने त्वभेदवासना मूलम्, अत एव ध्यानादिविध्युपयोग इति वाच्यम्; अभेदवासनाया अप्यन्ततो भेदवासनामूलत्वात् । न ह्यभेदज्ञानं भेदज्ञानमन्तरेण संभवति । स्वयमेव प्रतियोग्यादिभेदवासनावहत्वात्, न चाभेदवासना निष्प्रतियोगिकस्वरूपधीहेतुरिति वाच्यम्, नित्यस्फुरितस्य चिन्मात्रस्य निष्प्रतियोगिकत्वेऽपि तस्य वासनामूलत्वतन्मूलप्रत्यक्षादिविषयत्वस्य त्वयैव प्रतिक्षेपात् । अतो भेदनिषेधकाद्वैतवाक्यार्थज्ञानस्यापि भेदवासनामूलत्वं तदापादकत्वं च फलितम्, ततश्च तुल्यदोषत्वे किं कस्य बाधकं बाध्यं वा ? किं चाभेदवासनाया दृष्टरूपेणादृष्टरूपेण वा तत्त्वमस्यादिवाक्याद्वाक्यार्थज्ञानोपकारकत्वम् ? नाद्यः, वाक्यार्थवासनामन्तरेणापि वाक्यस्य यथासम्भवं सत्यासत्यस्वरूपस्वार्थबोधकत्वस्य भवद्भिरपि स्वीकर्तव्यत्वात् । उक्तं चाभियुक्तैः—* अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हीति । अन्यथा क्वचिदप्यपरिचितविचित्रवाक्यार्थप्रत्ययो न स्यात् । तथा च सति गतं कवीनां प्रावीण्येन, भवतां च पूर्वपक्षविज्ञानेन, श्रुतीनां चाप्राप्तार्थसमर्पणसामर्थ्येन । नापि द्वितीयः, शक्त्युपबृंहितज्ञाननिवर्त्यत्वाकृष्टप्रपञ्चसत्यत्वभीरुभिर्भवद्भिरनभ्युपगमात् । अभ्युपगच्छतामप्याकाङ्क्षादित्रयपरामर्शादिरूपदृष्टसामग्रीघटनमन्तरेणादृष्टस्योपयोगाभावात् । अत्र चाद्वैतानुध्यानजन्यवासनामन्तरेण तत्प्रत्ययसामग्रीसिद्धेः । अन्यथा तच्छ्रवणस्याप्यनुपपत्त्या वासनाजनकस्य तद्ध्यानस्याप्यसिद्धिप्रसङ्गात् । न चापरोक्षरूपवाक्यार्थज्ञानजननार्थं दृष्टद्वारेणादृष्टद्वारेण वा तदुपयोग इति वाच्यम्, शब्दजन्यप्रत्यक्षादेर्दूषणात् । न शब्दजन्यं प्रत्यक्षं प्रत्यक्षत्वाद्यथेतरत् । व्यवस्थाभञ्जने तु स्यात्सर्वमानेषु संकरः ॥ अन्त्यप्रत्यक्षवेद्यं तु ब्रह्म चेदधिकान्वितम् । सविशेषत्वमेव स्यान्न चेत्प्राग्वच्च संसृतिः ॥ अत एव शास्त्रप्रत्यक्षजन्यज्ञानयोः परोक्षत्वापरोक्षत्वलक्षणवैषम्यनिषेधोऽपि प्रत्युक्तः ।

यच्चोपजीव्यस्यापि प्रत्यक्षस्य ज्वालाभेदानुमानेन बाधो दृष्ट इति ; तदप्यतिस्थवीयः, तत्र उपजीव्यविरोधाभावात् । नहि तत्र ज्वालैक्यप्रत्यभिज्ञादिकं भेदानुमानस्योपजीव्यम् । न च भेदानुमानं स्वोपजीव्यव्याप्तिग्राहकप्रत्यक्षविशेषं बाधते । तथाऽप्युपजीव्यजातीयस्यापि विरोधे तद्वा तादृग्वेति न कश्चिद्विशेष इति चेत्, सामान्यत उपजीव्यजातीयस्यापि

ज्वालैक्यज्ञानस्य विशेषतोऽपि दृष्टदोषजातीयत्वात् । अचिरनिर्वापितारोपितप्रदीपेऽपि निर्वाणादर्शिनस्तदेवेदमिति दृढप्रत्यभिज्ञानमुदेत्येव । तत्रापि हि भेदादर्शनसादृश्यादिकं दोषः । सोऽत्रापि संभवन् ज्वालैक्यज्ञानस्य निर्दोषत्वनिर्णयं प्रतिरुणद्धि । तावति चानुमानमबाधितमुदेतीति न दोषगन्धः । इह तु स्वोपजीव्यं तज्जातीयं च कृत्स्नं प्रत्यक्षं बाध्यत्वेन प्रसक्तमिति स्थितः स्वव्याघातः । अत उपजीव्यप्रत्यक्षबाधेन शास्त्रं नोदेतुमलम् । किंच शास्त्रप्रत्यक्षयोर्बलाबलपरीक्षकप्रमाणमपि ब्रह्मव्यतिरिक्तभेदगोचरत्वेन शास्त्रेणैव बाध्यत इति स्वेनैव स्वबलं प्रतिक्षिपत् शास्त्रं कथं प्रत्यक्षात्प्रबलं भविष्यति ? असत्यात् सत्यप्रतिपत्त्यादिकं तु दूषयिष्यते । अतः प्रत्यक्षादिसिद्धानुपमर्देनैव भेदनिषेधकश्रुतीनां तात्पर्यमुपपादनीयमिति ॥

॥ इति शतदूषण्यां प्रत्यक्षशास्त्रविरोधपरिहारवादः एकोनत्रिंशः ॥ २९ ॥

॥ अथ असत्यात्सत्यसिद्धिभङ्गवादः त्रिंशः ॥ ३० ॥

सत्यैरेव सदातनोक्तिनिवहैस्सत्यप्रमाहेतुभिस्सत्यं ज्ञानमनन्तमेकममलं यद्ब्रह्म निर्दिश्यते ।
तत्सत्यैः परिकर्मितं गुणगणैस्सत्याभिसन्धिक्रियं सत्यानन्दविभूतिकं विचिनुमस्सत्यस्य सत्यं महः ॥

योऽयमसत्यप्रलापः—असत्यादपि शास्त्रादेस्सत्यस्य ब्रह्मणः सिद्धिस्संभवति । अस्ति चासत्यात्सत्योत्पत्तेस्सत्यप्रतिपत्तेश्च लोके बहुलमुपलम्भः; आरोपितैरेव शुक्तिरजतरज्जुसर्पशङ्काविषभावितगरुडादिभिः सत्यस्य हर्षभयमरणगरलहरणादेर्दर्शनात् । तथा स्वाप्नार्थेन शुभादिः, प्रतिबिम्बेन बिम्बतत्त्वम्, लिप्यक्षरैरक्षराणि, रेखागवयादिभिस्सत्यगवयादिः, चित्रपुरुषदिभिः पुराणवृत्तान्तादिः, नादविशेषोपाधिकशब्दनानात्वेनार्थभेदश्चेति असत्यैरेव सत्यानि निश्चीयन्ते । तथा बाष्पारोपितधूमादिभिर्यदृच्छासन्निहितधूमध्वजादिसिद्धिः । न चात्र सर्वत्र तत्तत्संवित्स्वरूपमेव सत्यं कारणमिति वाच्यम्; ज्ञप्तिस्वरूपमात्रस्य कारणत्वे ज्ञप्त्यन्तरादपि तदुत्पत्तिप्रसङ्गात् । विषयविशेषविशेषितायास्तु कारणत्वोक्तौ नागृहीतविशेषणन्यायेन विषयस्यापि कारणत्वावश्यम्भावात् । नचासत्यात्सत्यसिद्धौ लिङ्गविभ्रमात्साध्यसिद्धिप्रसङ्ग इति वाच्यम्, यादृच्छिकसंवाददशायामिष्टप्रसङ्गत्वात् । तत्सिद्धिनियमः प्रसज्यत इति चेन्न; तदनियमस्यासत्यत्वप्रयुक्तत्वाभावात्, अपि त्वव्याप्तिनिबन्धनत्वात् । व्याप्तं हि साधनम् । नह्यसन्धूमाभासो वह्निव्याप्तः । बहुलत्वोद्धवत्वादिवत्त्वादनारोपितत्वस्यापि व्याप्त्युपयोगितयाऽन्वयव्यतिरेकसिद्धत्वात् । प्रतिबिम्बादेश्चासत्यस्यापि सत्यमुखादिसिद्धौ अन्वयव्यतिरेकाभ्यां व्याप्तिसिद्धेः । प्रतिबिम्बस्यासत्यत्वेऽपि बिम्बप्रतिबिम्बयोर्व्याप्तिस्सत्या, तद्वशात्तत्र बिम्बसिद्धिरिति चेन्न; व्याप्तिर्हि सम्बन्धत्वाद्व्याप्यव्यापकसापेक्षा; कथं तयोरन्यतराभावे सा सत्या भवेत् ? अतो व्याप्यं प्रतिबिम्बादिकमसत्यमेवेति तद्गता व्याप्तिरपि तद्गतमालिन्यादिवदसत्यैव । न च विषयमिथ्यात्वे तद्विषयज्ञप्तिसत्यत्वसिद्धिः, न हि नभःप्रसूनमिथ्यात्वे तत्परिमलपारमार्थ्यम् । अतश्शास्त्रादेर्मिथ्यात्वनिश्चयेऽपि ततः परमार्थनिर्विशेषब्रह्मनिश्चय उपपद्यते । नच सहसा शास्त्रस्यासत्यता धियमधिरोहति, स्वजन्यविश्वनिवर्तकाद्वैतबोधजन्मनः प्राक् सत्यतयैवावभासात् । अतो बोधनदशायां स्वयमपि सदित्यवभासात् स्वजन्यबोधसामर्थ्यादेव स्वस्यापि निवृत्तिसिद्धौ पुनः बोधान्तरस्यानपेक्षितत्वेन तदुत्पादकत्वाभावाच्च न कश्चिद्विरोधः । न च वाच्यं सत्यतया प्रत्यक्षादिसिद्धस्यापि प्रपञ्चस्य शास्त्रेणेव शास्त्रसिद्धसत्यत्वस्यापि ब्रह्मणः केनचिद्बाधे मिथ्यात्वं संभवतीति,

अदर्शनादेव तन्निरासात् । न च कारणदोषनिश्चयात् फलितः प्रतीतिविषयबाधः, याद‍ृच्छिकसंवादिलिङ्गविभ्रमादिभिरेवानैकान्त्यात् । अतो वस्तुतो मिथ्याभूतादपि शास्त्रादेः परमार्थसद्वितीयब्रह्मनिश्चय उपपद्यत इति ।

अत्रोच्यते—यदुक्तमसत्यात्सत्योत्पत्तिर्दृश्यत इति, तदसत्, सत्यैर्ज्ञानादिभिरेव तत्रतत्र तत्सिद्धेः । यत्तत्रोक्तम्—ज्ञप्तिस्वरूपमात्रस्य कारणत्वे ज्ञप्त्यन्तरादपि तत्सिद्धिप्रसङ्ग इति, तदपि मन्दम्, ज्ञप्तिस्वरूपाणां परस्परविचित्रशक्तित्वात् । विषयविशेषमन्तरेण वैचित्र्यं कुतस्सिद्धमिति चेत्, किमयमुत्पत्तिप्रश्नः ? उत ज्ञप्तिप्रश्नः ? आद्ये तत्सामग्रीवैचित्र्यमेवोत्तरम् । तदेव च कुतस्सिद्धमिति चेन्न ; सामग्रीवैचित्र्यपारवश्यस्य सार्वत्रिकत्वात् । सामग्रीवैचित्र्यादेव हि तत्तद्विषयत्वनियमोऽपि संविदः । न च तत्तद्विषयत्वमेव सामग्र्यधीनो विशेष इति वाच्यम्, एकविषयत्वेऽपि सामग्रीविशेषात्प्रत्यक्षत्वपरोक्षत्वस्मृतित्वानुभवत्वगरलनिवर्तकत्वतदशक्तत्वादिविशेषदर्शनात् । न च विषयोऽपि ज्ञप्तिसामग्र्यनुप्रविष्ट इति वाच्यम्, अतीतानागतानुमानादिषु तदयोगात् । अस्मदादिप्रत्यक्षज्ञानमात्रे त्विन्द्रियसंप्रयोगाधारतया तस्य कारणत्वमिष्यते । न च मिथ्याभूतस्य विषयस्य संप्रयोगाधारता, प्रकाशात्पूर्वं तत्स्वरूपाभावात् । प्रकाशस्य च संप्रयोगसमनन्तरभावित्वेन चक्रकाश्रयप्रसङ्गात् । द्वितीयेऽपि स्वयंप्रकाशादनुव्यवसायादेर्वा यथाभिमानं तत्सिद्धिः । तथाऽप्यवान्तरवैचित्र्योपलम्भे विषयविशेष एव कारणमिति चेन्न ; विषयविशेषस्यैव तत्र तदवान्तरवैचित्र्यरूपत्वात् ; तत्प्रकाशं प्रति सत्यस्य दोषादेरेव प्रयोजकत्वात् । मिथ्याभूतस्य विषयस्यैव च तत्प्रकाशप्रयोजकत्वे सत्यादसत्यप्रतीतिमात्रसिद्धेः । तदुपलक्षितस्य ज्ञानस्य च हर्षभयानुव्यवसायादिहेतुत्वेऽप्युपलक्षणस्य तस्य हेतुत्वाभावात् । न हि कारणोपलक्षणमपि तत्कार्यकारणं भवति, अतिप्रसङ्गात् । अन्वयव्यतिरेकाभ्यां नातिप्रसङ्ग इति चेन्न ; विषयस्यैव निरपेक्षहेतुत्वविवक्षायामप्रतीयमानादपि सर्पादेर्भयादिप्रसङ्गात् । ज्ञप्तिसापेक्षत्वविवक्षायां तदुपलक्षणमात्रेणान्वयव्यतिरेकयोरन्यथासिद्धेः । तर्हि ज्ञप्तेरपि निरपेक्षाया हेतुत्वे ज्ञप्त्यन्तरादपि तदुत्पत्तिप्रसङ्गः, सविषयाया हेतुत्वे विषयोपलक्षणत्वमिति विपरिवर्तप्रसङ्ग इति चेन्न ; ज्ञप्तेरुपलक्षणत्वे तदुपलक्षितस्य विषयस्याज्ञायमानदशायामपि भयादिहेतुत्वप्रसङ्गात् । कार्योत्पत्तिदशायामपि कारणोपलक्षणावस्थानापेक्षायां नामान्तरेण तस्यापि कारणत्वस्वीकारात् । न चैवं विषयेऽप्यस्त्विति वाच्यम्, विषयोल्लेखमन्तरेण विषयिणो ज्ञानस्यावस्थानाभावादेव केवलज्ञानात्तदुत्पत्तिप्रसङ्गस्यानवतारात् । अप्रसृतनिर्विषयाभ्युपगमपक्षेऽपि प्रसरावस्थाविशेषविशिष्टस्य कारणत्वस्वीकारात् । ज्ञानमन्तरेण विषयस्याप्यवस्थानं कथमिति चेन्न ; क्षणभङ्गात्मख्यात्यादिप्रसङ्गात् त्वयाऽपि तत्प्रतिक्षेपात् । तथाऽपि लिङ्गतज्ज्ञानयोरिवात्रापि विषयविषयिणोर्द्वयोरपि कारणत्वमस्त्विति चेन्न ; तत्र द्वयोरप्यनन्यथासिद्धान्वयव्यतिरेकवत्वात्, अत्र तु विषयस्यान्यथासिद्धत्वाद्विषयिणश्च हेतुताया दुस्त्यजत्वात् । लिङ्गज्ञानेऽपि विषयस्योपलक्षणत्वमस्त्विति चेन्न ; लिङ्गभ्रमेऽप्युपलक्षणत्वसिद्धेः तदुपलक्षितेन ज्ञानेन लिङ्गिसिद्धिनियमप्रसङ्गात् । अतो न लिङ्गज्ञाने विषयोपलक्षणत्वम् । अत्रापि तर्हि विषयान्तरोपलक्षितज्ञानेऽप्युपलक्षणत्वं सिद्धमिति ततो हर्षादिसिद्धौ घट्टकुट्यां प्रभातमिति चेन्न ; तद्विषयोपलक्षणज्ञप्तिस्वरूपविशेषस्यैव तत्कारणत्वस्वीकारात् । यथा गुणविशेषोपलक्षितजात्यादिस्वरूपस्य वाच्यत्वे गुणस्य वाच्यबहिर्भावः, तथाऽत्रापि विषयस्य कारणबहिर्भावः । भवतु वा परमार्थधूमाद्युपलक्षितं ज्ञानं कारणमिति, तथाऽपि भवतो न कश्चिल्लाभः, तत्रापि विषयस्याकारणत्वात्, सर्वत्र ज्ञानस्य सत्यस्य कारणत्वसिद्धेः । किंच—

कार्यकारणभावे हि पौर्वापर्यमुदीर्यते । असत्यत्वे कथं पूर्वभावित्वं कस्यचिद्भवेत् ॥

ननु तत्तद्विषयाणां मिथ्याभूतानामपि कारणत्वं शास्त्रतस्सिध्यति ; * स्वप्नेष्वगम्यागमनं च धन्यमित्यादिभिस्तद्विषयाणामेव हि शुभाशुभादिसिद्धिहेतुत्वं स्वप्नाध्यायादिषु पठ्यते इति चेन्न ; उपचारादपि प्रयोगसंभवात्, तद्भ्रमस्यैव तत्र हेतुत्वात्तस्य च सत्यत्वात् । स्वाप्नार्थानामीश्वरसृष्टत्वपक्षे तन्मिथ्यात्वासिद्धेश्च । यत्तु लिप्यक्षरैरक्षरग्रहणमिति, तत्र लिपिस्वरूपं सङ्केतो वर्णबुद्धिश्च न मिथ्याभूताः । न च वर्णबुद्धिरेव तद्वर्णबुद्धिहेतुः, आत्माश्रयप्रसङ्गात् । न च लिपिषु वर्णभ्रमः सत्यवर्णधीहेतुः, गौरवात् । सङ्केतवशादेव तत्सिद्धौ वर्णभ्रमस्य कारणत्वकल्पने प्रमाणाभावात् । भावेऽपि तत्पारमार्थ्यस्योक्तत्वाच्च । रेखागवयेऽपि सत्यादेव रेखासन्निवेशसादृश्यमात्रात् पूर्वानुभूतगवयस्य पुरुषस्य प्रथमं गवयस्मृतिः । अननुभूतगवयस्य तु न गवयस्मृतिरपि, रेखासादृश्याबोधनात् । कदाचिदाप्तवाक्येन गवयोपलक्षणात्तस्या-द्रेखायामपि कस्यजिद्गवयभ्रमस्संभवेदपि, तस्यापि न ततः परं किमपि ततस्सत्यगवयज्ञानमिति समस्तीति नासत्यात् सत्यधीः । चित्रपुरुषादिभिः पुराणवृत्तान्तादिज्ञानेऽपि उपदेशो वा, प्रत्युत पुरुषलिखितत्वव्यवसाये सति लिङ्गं वा निदानम् ; न तु चित्रगोचरः पुरुषभ्रमः । नादविशेषोपाधिकशब्दनानात्वेऽपि तत्तन्नादाभिव्यक्तरूपेण संबन्धग्रहणसहकृतशब्दस्वरूपमेवार्थधीहेतुः । तच्च विशेषणेन सह सत्यमेव । न चौपाधिकं शब्दनानात्वम्, एकरूपस्य शब्दस्यानुपलम्भात्, कल्पकाभावाच्च । क्रमयौगपद्यादिविकल्पदुःस्थत्वेन वर्णानां बोधकत्वे निरस्ते बोधकान्तरं किंचित्कल्प्यते ; तच्च सामर्थ्यादिशालिभिः प्रत्यक्षयितुमपि शक्यते ; * स्फोटस्त्वं वर्णसंश्रय इति महाभारतेऽप्युच्यत इति चेन्न ; वर्णानां स्फोटव्यञ्जकत्वेऽपि क्रमयौगपद्यादिविकल्पावतारप्रसङ्गात् । परिहारस्य च समत्वात् । * स्फोटस्त्वं वर्णसंश्रय इत्यस्य वर्णानामेव स्फुटीकरणशक्तिमात्रविषयत्वात् । समाधिग्रन्थेष्वपि शब्दब्रह्मापरनाम्नो वाचकेतरस्यैव कस्यचिद्वाचकहेतोः परब्रह्मानुसन्धानोपकारकतयाऽनुसन्धेयत्वविधेः, तावत एव च योगिभिस्साक्षात्करणात् । स्फोटदूषणविस्तारस्त्वाचार्यादिग्रन्थेष्वनुसन्धेयः । बाष्पारोपितधूमेन यादृच्छिकाग्निसिद्धिस्तु न भ्रमसामर्थ्याधीना, अन्यथा सर्वत्र तद्भ्रमे तत्सिद्धिप्रसङ्गात् । अत एव हि तत्र प्रामाण्यमपि नाङ्गीक्रियते । अत्रापि यादृच्छिकब्रह्मसद्भावे शास्त्रादेस्स्वयमप्रमाणत्वात्प्रमाणान्तरासंभवाच्च, न तत्सत्यत्वव्यवसायः शक्यः । तदेवं लोकदृष्ट्या अस्मदृष्ट्या च सत्यादेव सत्यस्य सिद्धिः । भवदृष्ट्या त्वसत्यादसत्यस्यैव सिद्धिरिति न कथञ्चिदप्यसत्यात्सत्यसिद्धिरुदाहर्तुं शक्यते । असत्यस्यापि प्रतीतिः सत्यादेव दोषादेर्भवति, किं पुनस्सत्यस्य ।

ननूपलक्षणत्वं नाम ज्ञाप्यबहिर्भावेऽप्युपलक्ष्यज्ञानहेतुत्वम्, तथा च मिथ्याभूतस्य विषयस्य उपलक्षणत्वाङ्गीकारे पुनरपि हेतुत्वं सिद्धमिति चेन्न ; उपलक्षणं हि न स्वरूपेण ज्ञापयति, अपि तु स्वज्ञानेन ; तथा च ज्ञानगतमेव हेतुत्वं न पुनर्विषयगतम्, विषयस्य मिथ्यात्वेन हेतुत्वायोगात् । अन्यथा कुलालविज्ञानविषयभूतस्यागामिघटस्य घटं प्रति हेतुत्वं स्यात् । न च तद्युज्यते, नियतपूर्ववृत्तित्वाभावात् । न च तावता विषयस्य हेतुत्वाभावे कुविन्दज्ञानस्यापि हेतुत्वं स्यादित्यतिप्रसङ्गश्शक्यते वक्तुम् । तद्वदत्रापि । कार्यस्य कारणकालासन्निधानात्तत्राहेतुत्वमिति चेत्तुल्यम्, अविशेषादसान्निध्यस्य । अथाप्यत्र पुनः अतिप्रसङ्गात् तत्परिहारार्थं विषयस्यापि हेतुत्वमकामेनापि स्वीकर्तव्यमिति चेत्, तर्हि कर्तृज्ञानविशेषणे घटादावपि किं न स्वीकार्यम् । कार्यकारणभावनियमस्यावश्याङ्गीकार्यत्वात् कारणायत्तमेव वैषम्यं तेषुतेषु स्वीक्रियत इति चेत्, तुल्यमत्रापि । तदसत्त्वेऽपि कारणत्वमस्त्विति चेन्न ; व्याघातात् । नियतपूर्वभावित्वं हि कारणत्वम् । व्यावहारिकमपि कारणत्वं तेनैव रूपेण निर्वहन्ति दुर्वैतण्डिकाः । पूर्वभावित्वं हि पूर्वकालसत्त्वमेव । कारणं

हि पूर्वावधिः । अवधित्वं च स्वसद्भावेनैव । कारणानां नियतपूर्वत्वमिति सामान्यनिर्देशेऽपि तत्र सद्भावोऽसद्भावो वा कश्चिदेकः परिशिष्यते, परस्परविरोधात् । तत्रासद्भावपक्षस्त्वकारणलक्षणत्वादवधूयते । सद्भावपक्षस्त्ववशिष्यते । अतो नागामिनः कारणत्वम् । नाप्यत्यन्तासतः । तेन सत्यादेव कारणात्कार्यस्य, ज्ञापकाद्वा ज्ञाप्यस्य सिद्धिः । श्रुतिरपि—* कथमसतस्सज्जायेतेति, * सन्मूला इति, * सदेव सोम्येदमग्र इति च । ननु मिथ्यार्थज्ञानस्योपलक्ष्यज्ञानहेतुत्वेऽपि तज्ज्ञानोपलक्षणार्थं मिथ्यार्थस्य हेतुत्वमिति चेन्न ; तत्रापि तज्ज्ञानस्यैव हेतुत्वात् । तथा चानवस्थेति चेन्न, अवश्यवेद्यत्वाभावात् । तथा च सत्यस्यैव ज्ञानस्य हेतुत्वमिति नासत्यात्सत्यसिद्धिः । किंच प्रतिबिम्बाद्बिम्बसिद्धौ विप्रतिपन्नः प्रतिबिम्बो बिम्बपूर्वकः प्रतिबिम्बत्वादिति वा, प्रतिबिम्बज्ञानं बिम्बज्ञानपूर्वकं प्रतिबिम्बज्ञानत्वादिति वा अनुमानप्रवृत्तिः । उभयत्रापि सत्यादेव ज्ञाप्यसिद्धिः, प्रतिबिम्बत्वस्य ज्ञानस्य च सत्यत्वात् । नहि चन्द्रत्वादित्यनुमानं प्रयुज्यते, व्यभिचारात् । अपि तु चन्द्रत्वेनारोपितत्वादिति । चन्द्रत्वेनारोपितत्वं सत्यमेव । यथा रजतत्वेनारोपितमिदमिति ज्ञानं परमार्थविषयमेव; बाधकज्ञानत्वात् ; तथा प्रतिबिम्बचन्द्रोऽयमिति ज्ञानं परमार्थविषयमेव । ततो वा नासत्यात्सत्यसिद्धिः । किंचासत्यत्वेऽपि प्रतिबिम्बादेर्ज्ञातृत्वज्ञानाद्यनेकसत्योपश्लेषेणैव सत्यबुद्धिहेतुत्वसिद्धिः । यत्तूपलक्ष्यबहिर्भूतत्वे सत्युपलक्ष्यप्रतीतिजनकत्वमुपलक्षणत्वम्, ततश्च ज्ञानोपलक्षणतया विषयो यद्यभिमतस्स्यात्तर्हि तत्रैवासत्यात्सत्यप्रतिपत्तिरिति, तन्न ; वस्तुतो विषयस्योपलक्षणत्वमपि नाभ्युपगच्छामः, स्वेनैव वा स्वविषयज्ञानान्तरेण वा सविषयज्ञानस्वरूपप्रकाशस्य प्रागेवोक्तत्वात् । अभ्युपगम्यापि वदामः । न हि भ्रमविषयस्यापि सर्वथा मिथ्यात्वं ब्रूमः, सामान्यरूपेण देशकालान्तरादिषु सत्त्वाभ्युपगमात् । रजतज्ञानमिति तेन रूपेण उपलक्षणे तु सत्यमेवोपलक्षणम् । शुक्तिरजतज्ञानमिति प्रबुद्धपरामर्शेऽपि शुक्तिरजतत्वतत्संसर्गाणां स्वरूपतः सत्यत्वात्, शुक्तिगतात्यन्ताभावप्रतियोगिनोऽपि रजतत्वस्य शुक्तिनिष्ठतया प्रतीयमानताया अपि सत्यत्वात् । शुक्तिनिष्ठतया प्रतीयमानत्वविशेषितरजतज्ञानमिति विशिष्टरजतेनोपलक्षणेऽपि न विशेषणविशेष्यतत्सम्बन्धादेरसत्यत्वं प्रपश्यामः । अतो न क्वचिदपि असत्यात्सत्यसिद्धिः । यद्यपि चासत्यानां केषांचिदन्वयव्यतिरेकनियमात्सत्यसिद्धिहेतुत्वनियमः, तथाऽपि नासत्यादेव सत्यब्रह्मसिद्धिनियमो व्यवहर्तुं शक्यते, अदर्शनादन्वयव्यतिरेकासिद्धेः । सम्भावनामात्रेऽपि यादृच्छिकसंवादिलिङ्गविभ्रमादिवत् प्रमाणत्वाभावात् । असत्यात्सत्यसिद्धिनिर्णायकस्यापि प्रमाणत्वानुपगमेन विवक्षितासिद्धेश्च । बाधाभावस्य च परिहरिष्यमाणत्वात् ॥

यत्तूक्तम्—विषयमिथ्यात्वे तद्विषयज्ञप्तेरपि सत्यत्वं न सिध्यतीति, तदपि हास्यम् । कारणमिथ्यात्वे कार्यमिथ्यात्वस्य च तुल्यन्यायतया दुस्त्यजत्वेनासत्यात्सत्योत्पत्तिभङ्गात् । एवं ज्ञापकमिथ्यात्वे ज्ञाप्यमिथ्यात्वमपि स्यात् । इदं च स्वसिद्धान्तोच्छेदनमनवेक्षमाणैरुच्यते, मिथ्याभूतप्रपञ्चसिद्धिरूपस्य ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गात् । ब्रह्म स्वप्रकाशात्मकमेव, तथाऽपि साक्षिप्रकाशो वृत्तिप्रकाशो वा प्रपञ्चसिद्धिरूप इति चेन्न ; तयोर्ब्रह्मव्यतिरेकेण सत्यत्वे भेदवादावतारात् । अव्यतिरेकेण सत्यत्वे तूक्तदोषानतिक्रमात् । असत्यत्वे तु तयोरपि ब्रह्माधीनसिद्धित्वेन तत्रैवोक्तदोषप्रसङ्गात् । अस्तु ब्रह्मणोऽपि मिथ्याविषयत्वं मिथ्यावेद्यत्वं च, तथाऽपि बाधाभावात् सत्यत्वमिति चेत्, तुल्यम् । सविषयावृत्तिस्तत्र बाध्यत इति चेन्न ; स्वप्नादिषु दर्शनमस्त्येव, अर्थास्तु न सन्तीत्येव बाधकप्रत्ययोदयात् । विषयाभावे कथं विषयित्वम्, विषयित्वाभावे च कथं ज्ञानत्वमिति चेन्न ; अतीतविषयानुमानादिषु विषयाभावेऽपि विषयित्वदर्शनात् । यद्देशकालादिवृत्तितया यस्य प्रतिभासः, तद्देशकालादिवृत्तितया तस्य सद्भावे कथं तत्र विषयाभाव इति

चेन्न; अत्रापि यथाकथञ्चिद्विषयस्य विद्यमानत्वात्। तदुक्तम्—* जन्मन्येकत्र भिन्ने वा तथा कालान्तरेऽपि वा। तद्देशे वान्यदेशे वा स्वप्नज्ञानस्य गोचरः॥ इत्यादि। तथाऽपि प्रतिपन्नोपाधिसंभेदेन विषयस्य विद्यमानत्वं नास्तीति चेन्न; तावताऽपि तद्विषयत्वस्यानपायात्। प्रामाण्यमात्रमेव हि ततो निवर्तते। अख्यात्यादिपक्षे च क्वचिदपि विषयमिथ्यात्वानभ्युपगमात्, विषयमिथ्यात्वस्य च दूरतो निरस्तत्वात्; असत्ख्यातित्वस्यैवान्ततस्सत्त्वात्; तदसत्त्वे तत्पक्षाङ्गीकारस्यैवानुपपन्नत्वात्; उपपन्नत्वाङ्गीकारे चानियमात्, न कथञ्चिदप्यसत्यात्सत्यप्रतिपत्तिरुदाहर्तुं शक्यते। यत्तु वस्तुतोऽसत्यस्यापि न सहसा पुनश्शास्त्रस्यासत्यता धियमधिरोहतीति। किं ततः? निर्विशेषबोधकत्वव्यवसायोपपत्तिरिति चेन्न; तदुपपत्तावपि तत्प्रमात्वासिद्धेः। आरोपितलिङ्गेन लिङ्गबुद्धिवत्। ततश्च सत्यब्रह्मव्यवसायासिद्धिः। न च शास्त्रस्यासत्यता सहसैव धियं नाधिरोहति, ब्रह्मव्यतिरिक्तसमस्तमिथ्यात्वश्रवणवेलायामेव शास्त्रस्य तत्प्रामाण्यस्याप्येकप्रहारेण बाध्यमानत्वात्। अन्यथा सजातीयविजातीयादिसमस्तभेदशून्यब्रह्मप्रतीत्यनुदयप्रसङ्गात्। एतेन प्रमाणस्वरूपमिथ्यात्वेऽपि प्रामाण्यमस्तीति विप्रलम्भव्यवहारोऽपि दत्तोत्तरः। न च बाधितानुवृत्त्या सदिति प्रतीत्यनुवृत्तेः शास्त्रस्य कारणत्वम्, बाष्पादौ बाधितानुवृत्त्या धूमादिभ्रमे वर्तमानेऽपि धूमध्वजानुमानाद्यदर्शनात्। यत्तु मिथ्याभूतशास्त्रप्रतिपन्नस्यापि ब्रह्मणो बाधो न दृश्यत इति, तदसत्; कारणदोषनिश्चयादेव बाधसिद्धेः। तदुक्तम्—* दुष्टकारणबोधे तु सिद्धेऽपि विषयान्तरे। अर्थात्तुल्यार्थतां प्राप्य बाधो गोदोहनादिवत्॥ इति। यत्तत्रानैकान्त्यमुक्तम्, तदपि मन्दम्, संवादकान्तराभावसहकृतकारणदोषनिश्चयस्य बाधाव्यभिचारित्वात्। शून्यमेव तत्त्वमिति माध्यमिकवाक्येन च साक्षाच्च बाधो दृश्यते। तद्वाक्यं दोषमूलत्वेनाप्रमाणत्वान्न बाधकमिति चेत्, तर्हि वेदान्तवाक्यान्यपि दोषमूलत्वेन भवतैवाभ्युपगतानि न विश्वबाधकानि स्युः। दोषावान्तरभेदकल्पनं चाप्रयोजकमेव। व्यावहारिकव्यवस्थया वेदान्तानां प्रामाण्यसिद्धिरिति चेत्, किं तद्व्यावहारिकत्वम्? अप्रामाणिकत्वेऽपि प्रामाणिकवत्प्रतिभासमानत्वमिति चेन्न; माध्यमिकैरपि तच्छास्त्रस्य तथैव प्रामाण्याभ्युपगमात्। त्वदनभ्युपगमस्य प्रयोजकत्वे तदनभ्युपगमस्यापि तत्प्रसङ्गाच्च। एवमनुपपन्नत्वेऽप्यनुपपन्नवद्भासमानत्वमित्यादीन्यपि लक्षणानि निरस्तानि। व्यावहारिकव्यवस्थया वेदप्रामाण्यं च त्वया दुरुपपादमिति स्थितमन्यत्र। अतस्स्वपक्षस्थापकप्रमाणपारमार्थ्यानभ्युपगतौ न कथञ्चिदपि स्वसिद्धान्तस्थितिरिति सिद्धं सत्यादेव सत्यस्य ब्रह्मणस्सिद्धिरिति॥

॥ इति शतदूषण्यामसत्यात्सत्यसिद्धिभङ्गवादः त्रिंशः॥ ३०॥

॥ अथ जीवन्मुक्तिभङ्गवादः एकत्रिंशः॥ ३१॥

अन्ते विरोधिजनसङ्क्रमणीयसर्वपूर्वोत्तराघनिवहप्रतिबन्धकेन।
यद्ध्यानसन्ततिलताप्रथमाङ्कुरेण मुक्ता इवात्र मुनयः स गतिस्स्वयं नः॥

समन्वयाधिकरणभाष्ये परेषां सयूथ्यकलहमुपक्षिप्य जीवन्मुक्तपक्षः प्रतिक्षिप्तः, तदेवात्र पूर्वापरसङ्गतेर्व्याकुर्मः। यदाहुः—ब्रह्मात्मैक्योपदेशपरतत्त्वमसिवाक्यश्रवणजनिततत्त्वाध्यवसायादेव जीवन्नपि मुच्यते पुरुषः, ज्ञानस्यैव स्वाभाविकमोक्षप्रतिबन्धनिवर्तकत्वात्, तस्य च निष्पन्नत्वात्; बाधातिरिक्तायाश्च विरोधिनिवृत्तेरभावात्। न हि

रज्जुयाथात्म्यज्ञानातिरेकेण मिथ्याभूतसर्पभयनिवृत्तेः सर्पविनाशोऽप्यपेक्षितः । न च शरीरादेस्सत्यत्वमिच्छामः, येन ज्ञानमात्रान्न निवर्तेत । श्रूयते च—* तमेवं विद्वानमृत इह भवति, * तमेव विदित्वा अतिमृत्युमेति, * यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते ॥ इति । जीवन्मुक्तिशब्द एव च क्वचित्पुराणेषु पठ्यते * जीवन्मुक्ता भवन्तीत्यादि । यः पुनर्जीवन्मुक्तस्यापि यथापूर्वं देहाद्यनुबन्धः, सोऽपि दग्धपटवन्न बन्धकः; स्वयमेव च कदाचिच्चक्रभ्रमस्वप्नादिवदत्यन्तप्रतिभासलयमेष्यति । * कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः, * न कर्म लिप्यते नरे, * यस्य नाहङ्कृतो भावः इत्यादिभिर्ब्रह्मविदां कर्मालेपोपदेशश्च जीवन्मुक्तिमन्तरेण न घटते । * तस्य कार्यं न विद्यत इति सर्वोपायानुष्ठाननिवृत्तिरपि तेषां तदैव मुक्तिमावेदयति । अतो वयं निर्गुणब्रह्मविदस्सर्वस्वैरयोग्याः—इति ।

अत्र ब्रूमः—यदुक्तं ज्ञानस्यैव मोक्षप्रतिबन्धकनिवर्तकत्वात्तस्य च निष्पन्नत्वात्तदानीमेवासौ मुक्त इति, तदसत्; असकृदावृत्तस्याप्रयाणादनुवृत्तस्य ज्ञानविशेषस्य मुक्तिसाधनत्वस्थापनात्; तस्य च प्रक्रान्तस्याप्यन्तिमप्रत्ययसावधिकत्वेन निश्शेषनिष्पन्नत्वाभावात् । भवतु वोपायभूतज्ञानं निष्पन्नम्, तथाऽपि तदानीमेव फलसिद्धिरिति नायं नियमः, स्वर्गादिसाधनेषु सगुणानुष्ठितेषु यज्ञादिष्विव प्रतिबन्धकेन फलविलम्बोपपत्तेः । न च प्रतिबन्धकमपि मिथ्यात्वाविशेषात्तत्त्वज्ञानेनैव निवृत्तमिति वाच्यम्, तथा सति जीवनादेरपि निवृत्तिप्रसङ्गेन जीवन्मुक्तिवाचोयुक्तेरेवायुक्तेः । शरीरादिमिथ्यात्ववर्णनदूषणमपि विस्तरेणान्यत्र द्रष्टव्यम् । इहामृतत्वश्रुत्यादिकमपि प्रत्यक्षादिविरोधात् बहुविधश्रुतिस्मृत्यादिविरोधाच्च उत्तरपूर्वाघाश्लेषविनाशरूपमुक्तिकल्पावस्थाविशेषाभिप्रायमिति व्यवस्थाप्यते । एतदभिप्रायेण ह्युक्तं महाभारते—* मुक्तानां लक्षणं ह्येतच्छ्वेतद्वीपनिवासिनामिति । * अत्र ब्रह्म समश्नुत इत्येतदपि समाधिदशाभाविब्रह्मानुभवपरम् । न च सैव साक्षाद्ब्रह्मप्राप्तिः, अस्यानुकलं विच्छेदात्; अपुनर्विच्छेदस्य निरवशेषब्रह्मानुभवस्य सिषाधयिषितत्वात् । यत्तु यथापूर्वं देहानुबन्धस्य दग्धपटवन्न बन्धकत्वमिति, तदपि स्वहृदयविसंवादेनोक्तम् । न हि तत्त्वमस्यादिवाक्यश्रवणसमनन्तरमप्यनुवर्तमानदेहेन्द्रियादिभिर्दुःखादिकं न जायते । का चेयं जीवन्मुक्तिः? किं जीवत एव देहादिभेदनिवृत्तिः, उत तत्प्रतिभासस्य, अथ तदधीनप्रवृत्तेः, यद्वा तन्मूलपुण्यपापादेः, अथवा तत्प्रयुक्तसुखदुःखादेः, यद्वाऽन्यस्य कस्यचिदिति । नाद्यः, व्याघातात्; जीवनस्य शरीरादिसम्बन्धात्मकत्वात् । सशरीरत्वं बन्धः, अशरीरत्वं मोक्ष इति त्वयैव श्रुतिभिरुपपादितत्वात् । अथ सशरीरत्वप्रतिभासे सत्यपि बाधात् सशरीरत्वं निवृत्तमिति न विरोध इति चेत्, सशरीरत्वे निवृत्ते कथमशरीरस्य सतो जीवन्मुक्तिः? अजीवतोऽपि हि मुक्तिः सशरीरत्वरूपमिथ्यार्थाध्यवसायनिवृत्तिमात्रात्मा, न तु त्वन्मते तदधिका वस्तुस्वरूपनिवृत्तिरिति जीवन्मुक्तेरजीवन्मुक्तेश्च न विशेषं पश्यामः । सशरीरत्वप्रतिभासबाधेऽपि द्विचन्द्रज्ञानादिवत्तदनुवृत्त्या विशेष इति चेन्न; त्वत्पक्षे बाधितानुवृत्त्यसम्भवस्योक्तत्वात् । प्रत्यक्षविरोधाच्च । निवृत्तावप्यनुवृत्तवद्भातीति चेन्न; स्वरूपतो नित्यनिवृत्तस्य प्रतिभासमात्राधीनसिद्धितयाऽभिमतस्य प्रतिभासानुवृत्तौ निवृत्तिवचनायोगात् । न द्वितीयः, बाधादेव, जीवनविरोधाच्च । न च देहादिभेदप्रतिभासात्यन्तनिवृत्तौ जीवनं नाम किमपि । न च सुषुप्तवदसौ जीवन्मुक्तो निवृत्तप्रतिभास एव प्राणिति, तथा सति यथापूर्वं प्रवृत्तिविरोधात् ।

अत एव न तृतीयः । न च यत्किञ्चित्प्रवृत्तिशून्यं कंचिदद्वैतनिष्ठं पश्यामः, शृणुमो वा । प्रतिष्ठिताद्वैतविज्ञानैरेव हि भवत्सिद्धान्तग्रन्थकन्थाशतानि निर्मितानि । नापि चतुर्थः, जातिवर्णाश्रमाद्युपाधिकानां विधिनिषेधानां ब्रह्मविदोऽप्यनुवर्तनीयत्वस्य * नाविरतो दुश्चरितात्, * नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते । मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ इत्यादिभिस्सिद्धत्वात् । अलेपकमतभङ्गे चास्य प्रपञ्चो ग्राह्यः । अथ मन्यसे अबुद्धिपूर्वकेषु न लेप इति, अस्त्वेवम् ; तथाऽपि नासौ मुक्तः, बुद्धिपूर्वैः प्रारब्धैश्च बन्धानुवृत्तेः । एतावन्मात्रजीवन्मुक्तेरश्लेषश्रुतिवशेनास्माभिरपीष्यमाणत्वात् । अत एव न पञ्चमः, प्रामादिकैः कर्मभिः ब्रह्मविदां फलारम्भानभ्युपगमात् । बुद्धिपूर्वैः फलस्य प्रत्यक्षादिसिद्धस्य दुरपह्नवत्वात् । अनिर्वचनीयत्वादिमात्रेण तदपह्नवे तत्त्वज्ञानात्प्रागपि वस्तुतो मुक्तत्वेन जीवन्मुक्तिपर्वकल्पनानुपपत्तेः । नापि षष्ठः, अन्यस्यापि निवृत्तिः, जीवनविरोधिनी नवा ? आद्ये विरोधादेव जीवन्मुक्त्यसम्भवः । द्वितीयेऽपि जीवनाविनाभूतदुःखादेरेवावर्जनीयत्वान्न मुक्त्युपपत्तिः । अन्ततो अविद्याशेषमन्तरेण जीवनानुपपत्तिः । तच्छेषे च मुक्त्यनुपपत्तिः । ईश्वरावताराणामिव ब्रह्मविदामपि जीवतां दुःखाद्यभिनयमात्रमिति चेत्, हन्त स्वानुभवविरुद्धं धार्ष्ट्यम् । शक्यञ्चेदं सर्वैर्वक्तुम् । न च स्वपरप्रयोजनविरहे मन्दोऽपि कश्चित्प्रवर्तेत । न च मुक्तस्य लीलाप्रसङ्गमप्यनुमन्यसे, जक्षदादिवाचामेव भक्षणात् । अतो जीवति चेन्न मुक्तः, मुक्तश्चेन्न जीवतीति न कथञ्चिदपि जीवन्मुक्तिस्संभवतीति । यत्तु चक्रभ्रमादिदृष्टान्तेनानुवृत्तांशस्य स्वयमेव विलय इति, तदप्यहेतुकविनाशाद्यनुपपत्त्या बाधितानुवृत्तिभङ्गे निरस्तम् । यत्पुनरपलेपोपदेशो जीवन्मुक्तिमन्तरेण न घटत इति, तदपि प्रामादिकविषयत्वस्थापनादेव परिहृतम् । * तस्य कार्यं न विद्यत इत्यादिसर्वोपायानुष्ठाननिवृत्तिवादाश्च मुक्तविषयतया समाध्यवस्थाविषयतया च यथासंभवं व्यवस्थाप्याः । अन्यथा ब्रह्मविदामेव यावज्जीवानुष्ठानस्य निषिद्धपरिहारस्य च श्रुतिस्मृतिसिद्धस्य बाधप्रसङ्गात् । किंच निर्गुणविषयत्वाभिमतसद्विद्यानिष्ठस्यैव * तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति शरीरपातमात्रमपेक्षते मोक्ष इति विलम्बावधिमुपदिशन्ती श्रुतिरेव जीवन्मुक्तिं वारयति । तथा * न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति, अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशत इति श्रुतिमप्यधीमहे । अत्राशरीरत्वञ्च कर्माधीनशरीरवैधुर्यमित्यन्यत्र स्थापितम् । आपस्तम्बेनोपासनगत्यादिविषयबहुविधाध्यात्मशास्त्रार्थतत्त्वपारदृश्वना निराकृतेयं जीवन्मुक्तिः—* वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्, बुद्धे क्षेमप्रापणम्, तच्छास्त्रैर्विप्रतिषिद्धम्, बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत, एतेन परं व्याख्यातमिति । एतेन—निर्विशेषवादिनां जीवन्मुक्तिनिराकरणेन, तत्कल्पितं निराकरणीयं सर्वं तुल्यन्यायतया निराकृतमित्यर्थः । अतः प्रत्यक्षश्रुतिस्मृत्यादिविरोधात्, स्वैराभिलाषिभिः स्वैरजनसङ्ग्रहश्रद्धाव्यामुग्धैर्वा कल्पितेयं जीवन्मुक्तिरिति प्रत्यक्षीकृतस्वदुःखैर्मुमुक्षुभिरुपेक्षणीयेति ॥

॥ इति शतदूषण्यां जीवन्मुक्तिभङ्गवादः एकत्रिंशः ॥ ३१ ॥

———

॥ अथ बाधार्थसामानाधिकरण्यभङ्गवादः द्वात्रिंशः ॥ ३२ ॥

यदधिकरणमेतद्यद्विधेयं यदर्थं यत उदितमपीति प्रोच्यते यद्धि विश्वम् ।
तमजमजडमन्तर्यामिणं सर्वजन्तोर्निरवधिमहिमानं देवमाराधयामः ॥

यदाहुः—य इह निर्विशेषचिन्मात्रब्रह्माविद्याविवर्तरूपाणां तत्तत्पदार्थानां तत्त्वोपदेशपरेषु वाक्येषु ब्रह्मणा सह सामानाधिकरण्यनिर्देशः, स बाधार्थ एव, अर्थान्तरासम्भवात् तस्य विवक्षितत्वात् । तथा हि—अन्धकारादिषु स्थाणुमविशिष्टमवलोक्य यश्चोर इति मुह्यति तं प्रति तत्त्वदर्शी कश्चिद्वदति त्वदृष्टश्चोरः स्थाणुरिति । तस्य कोऽर्थः ? चोरत्वाभिमानविषयस्ते न चोर इति । न हि कल्पान्तरादिष्वपि चोरस्यैव स्थाणुत्वं स्थाणोर्वा चोरत्वं प्रतीतिमधिरोहेत् । न चाप्तो व्याहतं भाषते । न च स्थाणुत्वं तदानीमुपदेष्टव्यम्, अनपेक्षितत्वाच्छ्रोतुः । अतोऽवसीयते चोरत्वबाधार्थ एवायमुपदेश इति । तद्वदिहापि * इदं सर्वं यदयमात्मा, * पुरुष एवेदं सर्वम्, * जगच्च सः, * ज्योतींषि विष्णुर्भुवनानि विष्णुरित्यादिषु सत्यासत्यसामानाधिकरण्येषु स्वरूपैक्यासंभवादसत्यांशबाध एवाभिप्रेतः । न च स्थाणावारोपितचोरबाधेऽपि चोरमात्रस्थितिवत् ब्रह्माध्यस्तप्रपञ्चबाधेऽपि प्रपञ्चस्वरूपस्थितिश्शङ्क्या, इदं सर्वमिति कृत्स्नानुवादेन बाधेऽवशिष्टासंभवात् । अतश्चोरभयनिवृत्त्यर्थं स्थाणुत्वोपदेशेन चोरत्वबाधवत् * द्वितीयाद्वै भयं भवतीत्यादिप्रतिपन्नसमस्तसांसारिकभयनिवृत्तये सर्वस्यात्मत्वोपदेशेन सर्वस्य बाध एव विवक्षित इति ।

अत्र वदामः—किमिह प्रपञ्चमिथ्यात्वं सिद्धं कृत्वा सामानाधिकरण्यस्य तद्बाधपरता स्वीक्रियते ? उत सामानाधिकरण्यशक्त्यैव प्रपञ्चमिथ्यात्वपर्यवसितो बाधस्साध्य इति । नाद्यः, विश्वलुण्टाकवैयात्यवात्यावेगस्य सर्वतः प्रशमितत्वात् । अस्तु वा प्रपञ्चमिथ्यात्वम्, तथाऽप्यत्र न बाधार्थतैवेति निश्चेतुं शक्यम्, * सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्यत्र शान्त्यर्थं ब्रह्मात्मकसर्वानुसन्धानविधानस्य भवद्भिर्व्याख्यातत्वात्; तस्यैव च लक्षणादिदोषदवीयसः शास्त्रार्थस्यान्यत्रापि नेतुं शक्यत्वात् । न च विधिसन्निधानासन्निधानाभ्यां विशेषः, सर्वत्र प्रकरणे व्यवहितस्याव्यवहितस्य वा विधेः स्थितत्वात्; अनेकपदलक्षणादिदोषशतपरिग्रहाद्विप्रकृष्टविधिसमन्वयमात्रस्वीकारस्य समीचीनत्वात् । तत्त्वमस्यादिवाक्यप्रस्तावे तदेतत्सर्वमभिप्रेत्याह—* बाधार्थत्वे च सामानाधिकरण्यस्य तत्त्वंपदयोरधिष्ठानलक्षणा निवृत्तिलक्षणा चेति लक्षणादयस्त एव दोषाः इति । नापि द्वितीयः, प्रवृत्तिनिमित्तभेदेनैकार्थ्यपर्यवसानमात्रे सामानाधिकरण्यशक्तिस्थापनात् । प्रवृत्तिनिमित्तयोरेकाश्रयत्वविरोधादत्र सामानाधिकरण्यस्य बाधार्थता स्वीक्रियत इति चेत्, तथाऽपि न सामानाधिकरण्यशक्त्या बाधप्रतीतिः, व्यधिकरणवाक्य इव विरोधादेवार्थान्तरपरत्वे विवक्षिते प्रकृत्यंशेनैव समन्वययोग्ये निमित्ते लक्ष्यमाणे तद्विशिष्टैकार्थविषयत्वात् सामानाधिकरण्यस्य । तथाऽपि स्थाणुपदस्य चोरपदसमानाधिकरणप्रयोगबलादेव चोरत्वाभावलक्षकत्वस्वीकार इत्यन्ततो बाधनिदानमेवात्र सामानाधिकरण्यम्, तद्वत् प्रकृतेऽपीति चेत्; विरोधपरिहाराय लक्षणास्वीकारेऽपि राजा राष्ट्रमित्यादाविव लघीयस्येकपदलक्षणापक्षे तिष्ठति न सर्वपदलक्षणादिपरिग्रहो युक्तः । तथा हि—चोरः स्थाणुरित्यत्र चोरपदेन चोरत्वारोपाधिकरणलक्षणा, स्थाणुपदेन तु चोरत्वाभावसहचरितस्वार्थेन तल्लक्षणेति सर्वपदलक्षणा सिद्धा, द्वयोरपि पदयोर्मुखभेदेन प्रवृत्तेर्विरूपलक्षणा, तत्र च पदान्तरोपस्थापितधर्माभावस्य पदान्तरेण लक्षणेति विरुद्धधर्मलक्षणा चेति । एतत्सर्वं पूर्वोक्तेन भाष्येण सूचितम्—* अधिष्ठानलक्षणा

निवृत्तिलक्षणा चेतीति। गत्यन्तराभावादेव चोरस्थाणुशब्दसमभिव्याहारे स्वीक्रियतां नाम तथा क्लेशः, न च तत्रापि दृष्टान्ते क्लेशः, यश्चोर इति ख्यातस्स स्थाणुरिति स्थाणुशब्दे लक्षणागन्धाभावात्। अथापि * जगच्च स इत्यादिषु गत्यन्तरं लोकवेदप्रसिद्धं दृश्यत एव। प्रयुञ्जते हि नरपतिरेव लोक इति लौकिकाः। सस्मार च भगवान्वाल्मीकिः—* रामभूतं जगदभूद्रामे राज्यं प्रशासतीति। श्रुतौ च * स राष्ट्रमभवत्सराष्ट्रं नाभवदित्यादिप्रयोगास्संदृश्यन्ते। अत्र च एकेनैव निमित्तेन एकस्यैव पदस्य पदान्तरोपस्थापितानुगुणार्थलक्षकत्वमेवेति न पूर्वोक्तदोषः। * इदं सर्वमिति चेतनाचेतनात्मकसर्वप्रपञ्चनिर्देशेन ब्रह्मत्वोक्तौ चिदंशे तादात्म्यमचिदंशे बाध इत्यपि वैरूप्यं भवता स्वीकार्यम्। अथैतद्दोषपरिहाराय अचिदंश एव इदं सर्वमिति निर्दिष्ट इति मन्यसे, तदा स्वेच्छामात्रसिद्धस्सङ्कोचक्लेशः।

किंच जगद्ब्रह्मसामानाधिकरण्ये लक्षणायामप्यस्मदभिमतार्थलाघवमुक्तम्, न चात्र लक्षणेति निगमान्तविदः। अपृथक्सिद्धविशेषणवाचिशब्दानां विशेष्यपर्यवसानव्युत्पत्तेः, शरीरस्य च शरीर्यपृथक्सिद्धेश्शरीरवाचिनां च देवमनुष्यादिशब्दानां शरीरिपर्यन्तप्रयोगस्य लोकवेदयोर्दर्शनात् विश्वस्य चेतनाचेतनात्मकस्याविशेषेण परमात्मशरीरत्वश्रुतेस्तत्तद्वाचिशब्दानां ब्रह्मपर्यवसानोपपत्तौ तन्निबन्धनमेव ब्रह्मसामानाधिकरण्यमिति युक्तमङ्गीकर्तुम्। तथा च सति चेतनाचेतनविषयब्रह्मसामानाधिकरण्यप्रयोगाणामेकस्मिन्वाक्ये वाक्यान्तरेऽप्येकरूप एव निर्वाहः, सर्वश्रुत्यविरोधश्च सिध्येत्। किंच, यत्रयत्र जगद्ब्रह्मणोस्सामानाधिकरण्यं दृश्यते तत्रतत्र प्रायशस्तद्धेतुमपि सर्वप्रमाणाविरुद्धं निर्दिशन्ति श्रुतिस्मृतयः, यथा—* तदनुप्रविश्य, सच्च त्यच्चाभवत्, * स भूमिं विश्वतो वृत्वा, अत्यतिष्ठद्दशाङ्गुलम्, पुरुष एवेदँ सर्वम्, * सर्वं समाप्नोषि ततोऽसि सर्वः, * सर्वगत्वादनन्तस्य स एवाहमवस्थितः इत्यादि। ततश्च सर्वविरोधिप्रशमनपटीयसि सामानाधिकरण्यनिदाने श्रुत्यैव दर्शिते सर्वक्षोभकबाधार्थतास्वीकारो वेदविप्लावकरुचिभ्य एव रोचते। किंच, चोरः स्थाणुरित्यादिषु चोरादिपदलक्षिताधिष्ठानातिरेकिणि स्थाणुत्वादौ विरोधिधर्मे पदान्तरेणोपस्थापिते चोरत्वनिवृत्तिः, न पुनः पदान्तरेणापि स्वरूपमात्रनिर्देशे, ब्रह्मणि तु जगद्वाचिशब्दलक्षितस्वरूपातिरेकेण को नाम विरोधिधर्मः पदान्तरेणोपस्थाप्यते? न कश्चिदिति चेत्, न तर्हि ततो बाधः। कल्पितो विरोधिधर्म इति चेत्, कल्पितत्वाविशेषे किं कस्य बाधकं बाध्यं वा भवतु? सुन्दोपसुन्दवत्परस्परमिति चेन्न; एकस्यैवोद्देशोपादानादेरेकस्मिन्वाक्ये दुश्शकत्वात्। विरुद्धोभयपरित्यागेन स्वरूपमात्रं पदद्वयेन विवक्षितमिति चेत्, न तर्हीदं बाधार्थसामानाधिकरण्यम्, उपलक्षणसामानाधिकरण्यताया भवद्भिरेवोक्तत्वात्; तस्य च निरस्तत्वात्। ननु किं धर्मोपस्थापनेन, स्वरूपमेव तु तद्विरोधीति तदुपस्थापनेन बाध इति चेन्न; भ्रमाधिष्ठानतया स्वत एव प्रकाशमानस्य स्वरूपस्योपदेशनैरपेक्ष्यात्, भ्रमविरोधित्वासम्भवाच्च। संभवे वा नित्यं भ्रमानुदयप्रसङ्गात्। न च स्वरूपं न प्रकाशत इति वाच्यम्, तथा च निरधिष्ठानभ्रमोदयप्रसङ्गात्; नित्यप्रकाशत्वविरोधाच्च। अविद्यातिरोहितमविशदं स्वरूपं भ्रमसहतया पूर्वं प्रकाशते, अतिरोहितं तु विशदरूपं बाधार्थपदेनोपस्थाप्यत इति चेन्न; तिरोधानवैशद्याद्यसंभवस्य स्वरूपनाशादिप्रसङ्गेन प्रपञ्चितत्वात्; वैशद्यस्य चान्ततः स्वरूपानतिरेकिणः प्रागेव सत्त्वे प्रकाशे चावश्यंभाविनि तत एव सर्वबाधोपपत्तौ सर्वभ्रमानुत्पत्तौ वा न सामानाधिकरण्येन बाध्यं पश्यामः। प्रागेव सत्त्वेऽसत्त्वे च तत्स्वरूपप्रकाशयोः। सामानाधिकरण्येन नैव बाध्यं तु दृश्यते॥ ननु शुक्तिरजतभ्रमे नेदं रजतमितिवत् प्रपञ्चाभावो बाधार्थशब्देनोपस्थाप्यते, न ह्यवश्यं शुक्तित्वोपदेशादेव रजतभ्रमनिवृत्तिः, अपितु साक्षाद्रजतत्वाभावोपदेशादपीति चेत्, इदमपि पिष्टपेषणम्, प्रपञ्चाभावस्य ब्रह्मस्वरूपान्तर्भावबहिर्भाव-

योरुक्तोत्तरत्वात् । न च नेदं रजतमितिवत् इह साक्षान्निषेधकश्शब्दः । न च चोरः स्थाणुरितिवदगत्या विधायकस्यैव निषेधपरत्वक्लृप्तिः, निष्कण्टकस्य गत्यन्तरस्य दर्शितत्वात् । अत इदमेव शिष्यते—* ज्योतींषि विष्णुर्भुवनानि विष्णुरित्यादौ विनिविष्टानामेकैकशो नञस्समर्पणेन बाध इति, तत्रापि च वयं नञन्तरं निक्षिप्य तदेव बाधेमहि । तदेतत्सङ्गृहीतम्—* नेदं रजतमितिवत् अप्रतिपन्नस्यैव बाधस्यागत्या परिकल्पनम्, तद्वदेव तत्पदेनाधिष्ठानातिरेकिधर्मानुपस्थापनेन बाधानुपपत्तिश्चेत्यादिभिर्भाष्यैः ॥

॥ इति शतदूषण्यां बाधार्थसामानाधिकरण्यभङ्गवादः द्वात्रिंशः ॥ ३२ ॥

॥ अथ संविदद्वैतभङ्गवादः त्रयस्त्रिंशः ॥ ३३ ॥

बहुविधभक्तिज्ञानप्रभावपूतैर्निषेवितं बहुभिः । प्रभयेव भानुमन्तं लक्ष्म्या सेव्यं तु लक्षयामस्तम् ॥

अत्र खलु महार्णवावर्तगर्तकुहरेषु आवर्तमानाः पुरुषा आवर्तयन्ति नियतमेतादृशानि वाक्यानि—एकैव संविदनेकज्ञातृज्ञेयतदवच्छिन्नज्ञप्तिरूपेण विवर्तत इत्येवमादीनि । तदसङ्गतम्; घटादिविषयैकैकधियां तथा विवक्षायां क्वचिदपि विदिताविदितविभागाभावप्रसङ्गात् । तत्तत्पूर्वोत्तरकालयोः प्रपञ्चानुपलब्धिप्रसङ्गाच्च । सैव संवित्तच्चातच्च वेद्यं क्रमेणोपसर्पतीति चेन्न; घटादेरिव सुखादेरिव च संविदोऽप्युत्पत्तिविनाशादिप्रत्ययस्य निराबाधत्वात् । यौक्तिकबाधस्य सुखदुःखादावपि वक्तुं शक्यत्वात् । विषयाश्रयरूपोपाधिमात्रं व्यावर्तते, संवित्तु प्रत्यभिज्ञाबलात्सर्वत्रैकैवेति चेन्न, अहमर्थस्य तद्धर्मसुखादेश्च तद्वत्प्रसङ्गात् । निराकारायास्संविदः स्वतो भेदाप्रतीतेः विषयाश्रयाभ्यां तत्प्रतीतेश्च तद्भेद औपाधिक इति चेन्न; संयोगादिष्वपि सम्बन्धिव्यङ्ग्यभेदत्वेन तथा प्रसङ्गात् । अन्वयव्यतिरेकाभ्यां तत्कार्यत्वादिसिद्धिरिति चेत्, तुल्यम् । व्यक्तिमात्रमेव संविद इति चेन्न; श्रद्दधानस्य ते संयोगादावपि तथाऽध्यवसातव्यत्वात् । अथाऽन्या काचिन्निराश्रया निर्विषया नित्या संवित् सर्वविषयभागिनीति चेन्न; तस्यास्सर्वमानानाघ्रातत्वेन खपुष्पायमाणत्वात् । आघ्रातत्वेऽपि मिथ्याकोटिनिवेशात् । तदभ्युपगमेऽपि तदेव सर्वदा सर्वोपलब्धिप्रसङ्गात् । क्रमेण नियतविषयोल्लेखस्वभावेयमिति चेन्न; तन्नित्यत्वेन हेतुतो नियमायोगात् । निर्विकारत्वेन विकाररूपोल्लेखस्यापि दुर्वचत्वात् । नित्यं व्यापित्वेन सन्निधितदभावनियमस्याप्ययोगात् । विषयसत्त्वमेवोल्लेख इति चेन्न; मिथ्यात्वेनाभ्युपगते सत्त्वाभ्युपगमायोगात् । वर्तमानत्वमिह सत्त्वमिति चेन्न; भूतभविष्यतोः कदाचिदनुल्लेखप्रसङ्गात् । तत्काले वर्तमानत्वं विवक्षितमिति चेन्न; तदभावेऽपि भ्रान्त्योल्लेखस्य विद्यमानत्वात् । तत्कालवर्तित्वेनाध्यसनमुल्लेखशब्दार्थ इति चेन्न; अध्यासरूपस्यैवोल्लेखस्य निरूप्यमाणत्वात् । अतो नित्यैकसर्वसाक्षिसंविदभ्युपगमे युगपत्सर्वोपलब्ध्यादिप्रसङ्गो दुर्वारः । न वा किञ्चित्कदाचिदपि भायात् । सर्वेषां चायत्नलभ्यं सार्वज्ञ्यम् । सर्वेऽप्यन्धबधिरादयश्च स्युः । गुरुशिष्यपण्डितजडादिभेदश्च ज्ञानभेदनिबन्धनो निर्मूलः स्यात् । नच विषय एव नास्तीति वादिनं प्रति सर्वविषयोपलम्भादिप्रसङ्गो निरर्थक इति चेत्, किमिह विषयानुल्लेखो विवक्षितः ? स्वमात्रविषयत्वं वा, मिथ्याविषयत्वं वा, तथाविधमन्यद्वा ? नाद्यः, सर्वलोकोपलम्भस्ववचनसिद्धान्तादिविरोधात् । बन्धाभावेन शास्त्रवैयर्थ्यादिप्रसङ्गाच्च । न द्वितीयः, नीलादिकमन्तर्भाव्यैव स्वशब्दोक्तौ नीलादिनानात्वेन संविन्नानात्वप्रसङ्गात् । तन्नानात्वापह्नवे च सर्वविरोधः, नानात्वैकत्वसमुच्चयस्य चित्राद्वैतस्य

च त्वदनभिमतत्वात् । अभ्युपगच्छतामपि व्याघातशतवात्यावैयात्यनिरासघूर्णितत्वात् । अथाऽनन्तर्भाव्य, तथासति कथं तत्प्रकाशः ? तदप्रकाशे वा कथं तद्व्यवहारः ? तदभावे च कथं तदनन्तर्भावोक्तिः ? न तृतीयः, सर्वोपलब्ध्यादिप्रसङ्गस्य दीर्घायुष्ट्वात् । नच मिथ्याभूतं सर्वमेकम्, विचित्रोल्लेखव्याघातात् । तथाऽपि तत्प्रसङ्गस्थितेश्च । न चतुर्थः, असद्विषयत्वादौ दत्तोत्तरत्वात् । अनिरूपितभेदाभेदाविद्याविलासदौर्घट्यविश्रमेऽस्मदुक्तदूषणाभ्युपगतिमन्तरेणापसर्पणासिद्धेः । अवस्तुनि प्रयुक्ता दोषा न दोषा इति चेन्न ; प्रपञ्च इव खपुष्पादौ प्रसङ्गात् । वस्तुनि च दोषानवकाशात् क दोषः ? न क्वचिदिति चेत्, जितं जैनेन । सर्वत्रेति चेत्, त्यज संविदमपि । न संविदीति चेत्, आशामात्रमेतदिति । विद्याविद्ययोरपि भेदाभेदानिरूपणे कथं शोधकवाक्यावकाशः ? कथं च शुद्धविद्यात्मब्रह्मविज्ञानादपवर्ग इति नियमः ? तत्स्वरूपादिदौस्थ्यं च स्वदेशे द्रष्टव्यमिति । अविद्येति विद्याभावस्तदन्यस्तद्विरुद्धो वा कश्चिदर्थः ? विद्या च ब्रह्म वा, तदन्यद्वा किञ्चित् ? न तावदभावः, ब्रह्मणो देशादिभेदेऽपि तदयोगात् । न च तदन्यः, अन्याभावस्य सिद्धान्तिततत्वात् । तन्मिथ्यात्वादिवर्णनस्य च निस्सारत्वात् । न च तद्विरुद्धः, अनाद्यविद्यानुवृत्तिवैघट्यात् । ब्रह्मव्यतिरिक्तस्य तु सर्वस्याविद्यात्मकत्वेन विद्याकोटिनिक्षेपासिद्धेः । भ्रान्तिरूपविद्याविरोधित्वे मुमुक्षूपकारकत्वप्रसङ्गात् । किंच, यदि दुर्घटाऽविद्या विश्वकर्त्री, ब्रह्मैवाविद्या स्यात्, निरधिष्ठान एव विश्वभ्रमः, तत्त्वमेव भेदाभेदौ, तत्त्वावेदकवाक्यान्येवातत्त्वावेदकानि, सत्तैव नास्ति, शून्यमेव तत्त्वम्, ज्ञानमेवाज्ञानम्, पूर्वपक्ष एव सिद्धान्तः, प्रमाणमेवाप्रमाणम्, अनुपपत्तिरेवोपपत्तिः, जय एव पराजयः, तत्त्वज्ञानमेवातत्त्वज्ञानम्, इत्यादिजल्पान् किमिति न कल्पयन्ति ? कल्पयन्ति चेत्, न नः काचित्क्षतिः । लौकिकाः परिहसन्ति, वैदिकाः प्रतिक्षिपन्ति । किं बहुना ? स्वयमप्यन्तर्हसन्तीति तानाक्षिपन्ति सन्तः । तथा चानिरूपितरमणीयत्वव्यावहारिकत्वादिविडम्बनमप्यम्बरकुसुमायते, प्रातिभासिकवद्व्यावहारिकस्यापि अप्रामाणिकत्वाविशेषात् । तस्याप्यविचारितरमणीयत्वस्य तैरेवाङ्गीकारात् । तथा च अशेषस्यापि वेदान्तस्य व्यवहारसम्बन्धित्वात् तत्त्वावेदकातत्त्वावेदकवाक्ययोः स्वरूपतः प्रवृत्तितो विषयतः फलतो वैषम्याभावात् । तद्वैषम्ये भेदवादप्रसङ्गः ॥

तत्त्वावेदकवेद्यं चेद्ब्रह्म मिथ्येति कथ्यते । अब्रह्मवेद्यतापक्षे भेदवादः प्रसज्यते ॥

॥ इति शतदूषण्यां संविदद्वैतभङ्गवादः त्रयस्त्रिंशः ॥ ३३ ॥

॥ अथ उपदेशानुपपत्तिवादः चतुस्त्रिंशः ॥ ३४ ॥

हयमुखमुखैस्तत्तद्रूपैरकर्मविनिर्मितैरुपदिशति यस्तथ्यं पथ्यं सतामवसीदताम् ।
जननपदवीयातायातश्रमापहरां धियं जनयतु स मे देवः श्रीमान् धनञ्जयसारथिः ॥

अस्ति तावदासर्वेश्वरादस्मदादिपर्यन्तमासंसारमनुवर्तमानो दृष्टादृष्टप्रयोजनः, सर्वसैद्धान्तिकसम्मतश्शिष्याचार्यक्रमः । स एष निर्विशेषैकशेमुषीमात्रपरिशेषमुषितनिरवशेषभुवनस्य न कथंचिदपि सङ्गच्छते । तथा हि— आत्माद्वैतमुपदिशन्नाचार्यः किं शिष्यतया शिक्षणीयं कंचिदपि नोपलभते, उतोपलभते ? आद्ये कस्मा उपदिशेत् ? न कस्मैचिदिति चेत् ; तर्हि नोपदिशेदेव, श्रोतृप्रतिपत्तिप्रयोजनकत्वादुपदेशस्य । अन्यथा अरण्यरुदितत्वप्रसङ्गादारण्यकोपदेशस्य । स्वस्मा एवेति चेन्न ; उपदेष्टव्यप्रतिपत्तौ नैराकाङ्क्ष्येण श्रोतृत्वासिद्धेः । तदप्रतिपत्तौ वा अज्ञत्वेनानुप-

देष्टृत्वात्। द्वितीये तु स्वात्मनोऽन्यमनन्यं वा? अन्यत्वेऽपि सत्यमसत्यं वा? नाद्यः, अपसिद्धान्तादिप्रसङ्गात्। न द्वितीयः, मिथ्याभूतस्य शिष्यस्य मिथ्यात्वेनोपलम्भे तदर्थमुपदेशाद्यसम्भवात्। न हि प्रतिबिम्बादित्वेन प्रतीयमानेभ्यः प्रतिबिम्बादिभ्य उन्मत्तोऽप्युपदिशेत्। पाञ्चालिकादिभ्यो बालिकादिव्यवहारवदिति चेन्न; मौग्ध्यमन्दीकृतकृत्याकृत्यविवेकानां बालिकादीनां क्रीडारसादिनिर्विविक्षया तदुपपत्तेः। अत्रापि तथास्त्विति चेन्न; स्वपरहृदयविसंवादादपसिद्धान्ताच्च। समूलभेदभ्रमनिर्मूलनाय तत्त्वमस्याद्युपदेश इति वो मठकमठसम्प्रदायः। मिथ्याभूतं शिष्यं सत्यत्वेनोपलभमानस्तु स्वयं भ्रान्तत्वादननुविधेयवाक्यः स्यात्। स्वस्माद्भिन्नतया सत्यत्वेनोपलभ्यमानाय शिष्याय स्वात्मैक्यमुपदिशन्नाचार्यः विप्रलम्भकश्च स्यात्। कथं चासावद्वैतश्रवणमहिमनिश्शेषितातत्त्वप्रतिभासे मृषाभूते शिष्ये सत्यतां प्रत्येष्यति? अनन्यत्वपक्षेऽप्यनन्यत्वेनान्यत्वेन वा शिष्यस्य उपलम्भः? उभयमपि पूर्वोक्तैरेव दूषणैराचूषितम्। किंच, अद्वैतोपदेष्टाऽऽचार्यो निवृत्ताविद्यः, उतानिवृत्ताविद्यः? निवृत्ताविद्यत्वे शब्दार्थतत्प्रतिभासादिभेदगुच्छोच्छेदेन तुच्छहेतुरुपदेशस्स्यात्। बाधितानुवृत्तिस्तु बाधिता। न चेश्वरकृतेषूपदेशेषु बाधितानुवृत्तिमूलत्वसम्भवः, अनादिसर्वज्ञतया करणपरतन्त्रज्ञानत्वाभावेन तस्य भ्रमतद्बाधितानुवृत्त्यादेरसम्भवात्। *यस्सर्वज्ञस्सर्ववित्, *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादि हि श्रूयते। अस्तु वा बाधितानुवृत्तिसम्भवस्त्वन्मते, तथाऽपि नोपदेशादिप्रवृत्तिसम्भवः। नहि पानीयाभिमाननिवृत्तावपि दोषवशात् प्रकाशमानासु मरुमरीचिकावीचिकासु कश्चित्पिपासति। अनिवृत्ताविद्यश्चेत् भ्रान्तत्वादेव पूर्ववदनाप्तत्वप्रसङ्गः। किमर्थश्चायमात्माद्वैतोपदेशः? अविद्यानिवृत्त्यर्थ इति चेत्; किमुपदेष्टुः, उत श्रोतुः, उतोभयोः, अथोभयव्यतिरिक्तस्य? नाद्यः, पूर्वमेव तस्य निवृत्ताविद्यत्वात्। अनिवृत्ताविद्यत्वे परोपदेशेन स्वभ्रमनिवृत्त्ययोगात्। परोपदेशजनितपरमादृष्टप्राबल्यादिति तु सम्भवन्नप्यर्थः प्रपञ्चसत्यत्वभयाद्भवता नावलम्ब्यते। नापि द्वितीयः, उपदेष्टृज्ञानस्याविद्यानिवर्तकत्वमस्ति नवा? अस्ति चेत्तेनैव शिष्याविद्याया अपि निवृत्तावुपदेशनैष्फल्यम्। नास्ति चेत्, तर्हि तत एव शिष्यज्ञानस्याप्यविद्याया अनिवर्तकत्वादुपदेशनैष्फल्यम्। न च तृतीयः, उक्तदोषसमुच्चयप्रसङ्गात्। नापि चतुर्थः, अतिप्रसङ्गात्; नहि देवदत्ताय सर्पाभावोपदेशेन यज्ञदत्तस्य सर्पभ्रमो निवर्तते। तथा च सति सर्वतत्त्वसाक्षात्कारिषु ईश्वरादिषु जागरूकेषु क्वचिदपि कस्यचिदपि भ्रमानुदयप्रसङ्गात्। यश्च नित्यनिवृत्ताविद्यं ब्रह्मेति भाषते, स कथं ब्रह्माविद्यानिवृत्त्यर्थ उपदेश इत्युपदिशेत्? अस्तु तर्हि निष्प्रयोजन एवायमुपदेश इति चेन्न; * प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति न्यायात्। न च वस्तुतो न कश्चित्कस्मैचिदुपदिशतीति वाच्यम्, व्यावहारिकव्यवस्थया सर्वस्य निर्वाह्यत्वेनाभ्युपगमात्। अन्यथा स्वसिद्धान्तसमर्थनस्येव परसिद्धान्तदूषणस्याप्यसिद्धौ परेषामेव विजयित्वप्रसङ्गात्। दूषणसमर्थनप्रयोजनाभावेऽपि प्रयोजनसद्भावभ्रममूलोऽयमुपदेशभ्रम इति चेत्; हन्त पुनरपि समीचीनमेव तत्त्ववित्त्वमुपदेष्टुरुपपादितम्। माभूत्तत्त्ववेदित्वम्, तथापि स्वप्नसिद्धशिष्याचार्यवद्व्यवहार इति चेत्; हन्त तर्हि सिद्धान्तान्तरशिष्याचार्यादिव्यवहारात्को विशेषः? न हि जिनसुगतादिशिष्याचार्यव्यवहारात् प्रतिभासते भवतां विशेषः, येन वैषम्यं वक्ष्यसि। विशेषस्तत्त्वविषयत्वमिति चेन्न; तत्त्वविषयत्वस्याप्यतत्त्वकोटिनिवेशेन पुनरप्यविशेषात्। तत्त्वातत्त्वविषयताव्यवस्थापनस्य तस्यापातरमणीयाभिमानमात्रसारत्वाविशेषात्। अस्त्वविशेषः, को दोष इति चेन्न; परिग्रहबहिष्कारादिव्यवस्थाभङ्गप्रसङ्गात्। सापि व्यवस्था समीचीनतासमीचीनतामोहहेतुकेति चेत्; तर्हि जितमनायासेन सर्वैस्त्वद्विरोधिभिः, त्वन्मतपरिग्रहस्य त्वयैव समीचीनताभ्रमहेतुत्वकण्ठोक्तेः। परमतस्यापि त्वयैवासमीचीनताभ्रमविषयत्वाभिधानेनार्थतस्तद्वि-

परीतसमीचीनत्वस्यैव समर्थितत्वात् । सर्वमप्यसमीचीनमिति तत्त्वस्थितावस्माकमेव जय इति चेत् ; अस्यैव वाक्यार्थस्य समीचीनत्वासमीचीनत्वयोः सर्वासमीचीनत्वासिद्धेः । एतस्याप्यसमीचीनत्वं सर्वासमीचीनत्वान्तर्गतमिति चेन्न ; दुष्परिहरस्वव्याघातनिरयनिपातस्य बहुशोऽन्यत्र स्थापनात् । तदलमनेन व्रणकिणभूषणशम्फलीजनसध्रीचां व्याहतवाचां भूषणाभिमतेन दूषणाभिधानेन ।

एवम् आत्मैक्यं स्वाभाविकमभ्युपगच्छतां भास्करयादवमतानुसारिणामुपाधितः स्वतो वा भेदेऽपि सार्वज्ञ्याज्ञत्वसङ्करादेरपरिहरणीयत्वादुक्तोपदेशानुपपत्तिरपरिहार्या । स्वाभाविकैक्ये तु स्वाभाविकभेदो व्याघातादपि निरस्त एव । [तथाऽन्तःकरणभेदोऽपि न प्रतिसन्धान] औपाधिकोऽपि भेदो न प्रतिसन्धानपरिपन्थी, अन्यथा सौभरिदेहेष्वीश्वरावतारभेदेष्वप्यप्रतिसन्धानप्रसङ्गात् । यथाच चक्षुरादिकरणभेदः पाणिपादाद्यवयवभेदश्च न प्रतिसन्धानं प्रतिरुणद्धि तथाऽन्तःकरणभेदोऽपि न प्रतिसन्धानं प्रतिरोद्धुमलम् । अत एव सर्वगुणदोषसङ्करो दुर्वारः, निर्विकारनिरवद्यश्रुतिविरोधोऽपीति कृतमप्रसक्तोपालम्भेन । अतः परमार्थनिरुपाधिकात्यन्तात्मभेदमन्तरेण नोपदेशसम्भवः । ननु परस्परं शिष्याचार्यादिभावेनावस्थितेषु भगवदवतारेषु परमार्थत आत्मभेदाभावेऽपि व्यवस्था सुस्था, फलं चास्त्येव किञ्चित्, तत्रेश्वरमायापुरस्कारः परिष्कारश्शङ्करमतस्य, उपाधिभेदाभिधाने तु भास्करोदयप्रत्यूषः, विभागशक्तिवैभववादस्तु यादवराज्याभिषेकः, गत्यन्तरं तु प्रमाणपथिकप्रान्तरं सम्भवदपि समानमस्माकमिति प्रतिबन्दिमुखेन श्वावराहकलहावतारे कस्ते निस्तार इति । अत्र ब्रूमः—अस्ति हि समस्तसमाधानहेतुरीश्वरलीला ; स भगवान् पुरुषोत्तमः स्वमाहात्म्यानुगुणलीलाप्रवृत्तः स्वेच्छया स्वीयमेव रूपं विचित्राकारं परिणमय्य तत्तज्जातीयोचितमभिनीय निखिलजगदुज्जिजीवयिषया शिष्याचार्यादिभावमप्यभिनीय स्वोपदेशानुष्ठानादिभिर्धर्मसंस्थापनं लोकनिर्वाहादिकं च निर्वर्तयतीति किं नोपपद्यते ? उक्तं च न्यायाचार्यैरपि *मायावत् समयादय इति । नच युष्मच्छिष्याचार्येष्वपि इयमेव रीतिरिति वक्तुं शक्या, परस्यैवाभावेन परार्थत्वासिद्धेः । दुःखमयत्वेन केवलं स्वार्थत्वायोगात् । अस्माकमपीश्वरस्य तु स्वव्यतिरिक्तानन्तसंसारिचेतनसद्भावेन तदर्थं स्वलीलारसोचिततत्तत्संव्यवहारोपपत्तेः । चिन्मात्रस्य तु निर्विशेषत्वेन कथं लीला ? कथं चेश्वरत्वम् ? न चार्वाचीनेषु तादृशलीलासम्भव इत्युक्तम् । अतो वास्तवं जीवभेदं जीवेश्वरभेदं चानभ्युपगच्छतां मोक्षार्थोपदेशादिप्रवृत्तिर्न सम्भवतीति ॥

॥ इति शतदूषण्याम् उपदेशानुपपत्तिवादः चतुस्त्रिंशः ॥ ३४ ॥

॥ अथ तिरोधानानुपपत्तिवादः पञ्चत्रिंशः ॥ ३५ ॥

यन्मायामोहितात्मानो यन्मायामोहितं विदुः । तत्प्रपद्य तदुक्तोऽयं तिरोधिरवधूयते ॥

यदाहुर्ब्रह्मघातिनो ब्रह्मविदो ब्रह्मस्वरूपमविद्यातिरोहितमिति ; तत्र किमिदं तिरोधानम् ? किमिन्द्रियसम्बन्धनिवारणम् ? किमैन्द्रियकज्ञानस्य तद्विषयतानिवर्तनम् ? यद्वा सर्वेषामपि ज्ञानानां तद्विषयताऽपाकरणम् ? अथवा स्वस्य स्वकर्मताव्यपोहः ? स्वप्रकाशभङ्ग एव वा ? विशदस्वरूपस्याप्यविशदस्वरूपत्वापादनं वा ? ब्रह्मप्रकाशसामग्र्यनुप्रविष्टस्वभावनिरासो वा ? अनिरूपणीयस्वरूपमन्यदेव वा किंचिदिति ? नाद्यः, अशक्यत्वात् । तथा हि—सम्बन्धशब्देन किं सामान्यतस्सम्बन्धमात्रं विवक्षितम्, तद्विशेषो वा ? आद्ये त्विन्द्रियाणां ब्रह्मणश्चारोपणीयत्वारोपणाधिकरणत्वादि-

सम्बन्धोऽपि न स्यात् । तथा च सति तेषामेवासिद्धौ किं तत्सम्बन्धनिवारणापेक्षया ? तदसिद्धिरपि नास्माकं दोषायेति चेन्न ; अवगति [शेष] क्रमाधीनसिद्धिभङ्गस्य भवद्भिरनभ्युपगमात् ; अन्यथा व्यावहारिकप्रत्यक्षतन्मूलानुमानादिव्यवहार-व्यवस्थाऽपि न सिध्येत् । इन्द्रियोत्पत्तिवादिन्यः श्रुतयश्च प्रकुप्येयुः । द्वितीये तु किं सर्वविशेषनिषेधः, कतिपय-विशेषनिषेधो वाऽभिमतः ? पूर्वं तु पूर्वेणैव दत्तोत्तरम्, *निर्विशेषं न सामान्यमिति हि न्यायविदः । उत्तरत्रापि स विशेषः किं ज्ञानोत्पत्त्यनुपयुक्तः संयोगादिमात्रलक्षणः, उत तदानुगुण्यविशेपित इति ? अनुपयुक्तत्वपक्षे तिरोधानशब्दानुपपत्तिः, सर्वव्यापिनि ब्रह्मणि सर्वाधिष्ठाने सोऽपि सम्बन्धो दुर्निवारश्च । पक्षान्तरे तु तदानुगुण्यं किं सर्वत्रापि निवर्तनीयम्, ब्रह्ममात्रे वा ? सर्वत्र चेत्, प्रत्यक्षाद्यनुपपत्तिरेव । ब्रह्ममात्रे चेत्, किमिदं तिरोधानं कदाचिन्निवर्तनीयम्, उतानिव-र्तनीयम् ? निवर्तनीयत्वे ब्रह्मण ऐन्द्रियकत्वप्रसङ्गेन * अद्रेश्यमग्राह्यमित्यादिश्रुतिविरोधः, दृश्यत्वप्रयुक्तमिथ्यात्वजड-त्वादिप्रसङ्गः, शास्त्रस्य च ब्रह्मविषयस्यानुवादरूपता च । अनिवर्तनीयत्वे तु नित्यतिरोधानान्नित्याध्यासः, तस्य तद-धीनत्वाभ्युपगमात् । एवंच सन्मात्रग्राहिप्रत्यक्षवादोऽपि प्रतिक्षिप्तस्स्यात् । तत एव न द्वितीयोऽपि । किंच किमिद-मैन्द्रियकत्वेन सम्प्रतिपन्नं ज्ञानं साधिष्ठानं जगद्गृह्णाति, उत निरधिष्ठानम् ? आद्ये त्वारोपितवत् अधिष्ठानस्यापि शुक्ति-रजतादिष्विदमर्थस्येव तत्प्रतीतिविषयत्वाविशेषात् कथमिव तन्निवर्तनीयम् ? द्वितीये त्वपसिद्धान्तो निरधिष्ठानभ्रमापातश्च । न च ब्रह्मव्यतिरिक्तं किमप्यधिष्ठानं ब्रूषे । अत एव न तृतीयोऽपि ; उक्तेन न्यायेन सर्वेषामपि ज्ञानानां तद्विषयत्वात् । अन्यथा कथं ब्रह्मविषयाजडत्वस्वयंप्रकाशत्वसत्यत्वविचारसङ्कथाः प्रवर्तेरन् । नापि चतुर्थः, भवतैव तदनभ्युपगमात् । अन्यथा ब्रह्मण एव साक्षाद्दृश्यत्वप्रसङ्गात् । अतिरोहितदशायां विषयत्वविषयित्वलक्षणस्वभाववैशिष्ट्येन भेदसत्यत्व-प्रसङ्गाच्च । नापि पञ्चमः, स्वप्रकाशशब्देन किं स्वगोचरं प्रकाशान्तरं विवक्षितम्, स्वरूपमेव वा ? नाद्यः, दत्तोत्तर-त्वात् । द्वितीये तु स्वप्रकाशभङ्ग इति किं सिद्धस्य प्रकाशस्य विनाशो विवक्षितः, उत सेत्स्यत उत्पत्तिप्रतिबन्धः ? पूर्वत्र नश्वरत्वं ब्रह्मणः प्रसज्यते ; ततश्च श्रुतिविरोधः, निरधिष्ठानभ्रमप्रसङ्गादयश्च पूर्वोक्ताः पार्ष्णिं गृह्णीयुः । उत्तरत्र ब्रह्मानादित्वभङ्गः । एवं च ब्रह्मस्वरूपघातिन्यविद्या स्वयमसती किमाश्रया तिष्ठेत् ? तस्यास्तदन्तरेणापि सिद्धौ सत्यत्व-प्रसङ्गः । न च षष्ठः, प्रत्यक्षैकस्वरूपे स्वात्मनि पारोक्ष्यलक्षणवैशद्यापादनायोगात् । अन्यथा स्वात्मभङ्गप्रसङ्गात् । निर्विकारे निर्विशेषे वस्तुनि विषयातिरेकलक्षणवैशद्यस्यापि दुर्निरूपत्वात् । वेदान्तजन्यवृत्तिविशेषविषयत्वमेव वैशद्य-मिति चेन्न ; प्रकाश्यातिरेकाभावे धारावाहिवदनुपकारकत्वात् । प्रकाश्यातिरेके सविशेषत्वस्यावर्जनीयत्वात् । नापि सप्तमः, स्वरूपभूतप्रकाशस्यासाध्यत्वेन सामग्रीनैरपेक्ष्यात् ; तद्गतस्यातद्गतस्य वा प्रकाशान्तरस्य तद्विषयस्यानभ्युपगमात् । अभ्यु-पगमे वा सधर्मकत्वदृश्यत्वादेर्दुर्निवारत्वात् । तन्मिथ्यात्वे तदर्थसामग्रीनैष्फल्यं स्यात् । भ्रान्तिज्ञानोत्पत्तिसामग्रीवि-च्छेदस्य च दोषत्वाप्रसिद्धेः । प्रतिबन्धकाभावस्य हेतुत्वमनभ्युपगच्छतां सप्तमस्य पक्षस्य दुर्घटत्वाच्च । अष्टमस्तु कष्टः पक्षो विकल्प्यते । किं तदधिष्ठानभूतं ब्रह्म प्रकाशप्रतिपक्षभूतम्, उत तदनुगुणम्, अथोदासीनमिति । आद्ये पूर्वोक्ता एव दोषाः । द्वितीये असाध्यस्य किं तदानुगुण्येन ? साध्यत्वे च प्रागुक्ता दोषाः । प्रकाशानुगुणे च कथं तिरोधानवाचोयुक्तिः ? प्रकाशमाने च कथमध्यासः ? प्रकाशमान एवाधिष्ठाने सर्वत्राध्यास इति चेत् ; तर्हि किं तिरो-धानप्रयासेन ? यथावत्प्रकाशमानेऽध्यासायोगादिति चेन्न ; निर्विशेषस्य स्वप्रकाशस्याविद्याशतेनाप्ययथास्वरूपप्रकाशत्वा-पादनायोगात् । तद्योगे वा निर्विशेषत्वादिभङ्गप्रसङ्गात् । तृतीयेऽप्यजागलस्तनवदनुपकारकत्वमेव ।

ननु भवत्पक्षेऽपि जीवब्रह्मणोस्स्वरूपं स्वयंप्रकाशम्, तदुभयमपि कर्मरूपयाऽविद्यया तन्मूलगुणत्रयमयपाप-रूपया मायया तिरोहितमिति निर्विगानमेव; अन्यथा संसारात्यन्ताभावप्रसङ्गात्; ततश्च भवतोऽपि समानं चोद्यमिति समदुःखसुखौ भवावेति चेन्न; भवत एव दुःखसम्बन्धः, अस्माकं तु सुखमेवेति पश्यतु भवान्। ब्रह्मणस्तावत् स्वरूपं स्वयंप्रकाशमपि नान्यस्मै प्रकाशते, तद्धर्मेण तु तस्य प्रकाशते। सर्वेषामात्मनां स्वरूपमपि स्वस्मा एव स्वप्रका-शत्वात्, अन्यस्मै तदीयज्ञानान्तरकर्मतयैवावभासते; ततश्च तद्गोचरज्ञानप्रसरोत्पत्तिप्रतिबन्धादिलक्षणं तिरोधानमुपपन्नमेव। स्वस्मै तु नित्यं प्रकाशमानत्वान्नित्यसर्वज्ञत्वाच्च ब्रह्मणो न स्वरूपहानाज्ञत्वादिदोषलेशावकाशः। जीवस्य तु स्वरूपं यद्यपि स्वस्मै स्वयं प्रकाशते, यद्यपि च तत्रैव देवाद्यध्यासः, तथाऽपि न भवत्पक्षवद्दोषः, प्रकाशमानाकारस्याधिष्ठानत्वोपाधिक-त्वात्, तदारोपप्रतिबन्धकस्य तत्तद्विरोधिधर्मप्रकाशस्य विनिवारणेन तिरोधानोपपत्तेश्च। देवादिविलक्षणस्वरूपप्रकाशे कथं तेऽध्यास इति चेन्न; वस्तुतो विलक्षणत्वेऽपि विलक्षणवित्त्यभानात्। शुक्तिरजताख्यातविदम्भानवत्। इदमर्थो हि वस्तुतो रजताद्विलक्षणोऽपि न तथा भाति, तद्वैलक्षण्यव्यवस्थापकस्य शुक्तित्वादेरप्रतीतेः। तथेहापि सावयव-त्वस्थूलत्वानित्यत्वविकारित्वजडत्वादिधर्मविशिष्टदेहाद्वैधर्म्यरूपनिरवयवत्वाणुत्वनित्यत्वनिर्विकारत्वस्वप्रकाशत्वादीनां स्व-रूपप्रकाशे प्रकाशाभावात्तद्विपरीताकारारोपः स्वरूपमात्रे च प्रकाशमाने युक्त एव। ममाप्येवमस्त्विति चेन्न; भवत्पक्षे तत्तद्धर्माणामभावात्। तदभावस्तदप्रकाशस्योपकारक एवेति चेत्; तथा सति नित्यतिरोधानान्नित्याध्यासप्रसङ्गः। न हि तत्तत्प्रकाशलक्षणा तिरोधाननिवृत्तिः कदाचिदप्युपपद्यते। ब्रह्मण्यसतां तेषां तत्त्वज्ञानोदयदशायां प्रकाशे तत्त्वज्ञान-स्यैवातत्त्वज्ञानत्वप्रसङ्गेन पुनरप्यनिर्मोक्षप्रसङ्गात्। ब्रह्मस्वरूपमेव तथातथा भातीति न दोष इति चेत्; किं तथात्वं स्वरूपम्, उत स्वरूपातिरिक्तम्? पूर्वत्रेदानीमपि तत्प्रकाशो दुर्वारः। उत्तरत्र तु तदानींतनभ्रान्तिदुर्वारेति दुस्तरं व्यसनम्। ततो यदि निर्धर्मकमपि जडत्वेनाभ्युपेतम्, तदा तत्स्वरूपाप्रकाशलक्षणं तिरोधानमपि वक्तुं शक्यते, यद्वा स्वयंप्रकाशमपि सधर्मकत्वेनाभ्युपेतम्, तदा तद्धर्माप्रकाशलक्षणं तिरोधानं सुवचमिति न कथञ्चिदपि निर्विशेषनित्यस्वयं-प्रकाशे स्वस्य परस्य वा ज्ञानान्तरागोचरे वस्तुनि तिरोधानवाचोयुक्तिर्घटत इति ॥

॥ इति शतदूषण्यां तिरोधानानुपपत्तिवादः पञ्चत्रिंशः ॥ ३५ ॥

॥ अथ आत्माद्वैतभङ्गवादः षट्त्रिंशः ॥ ३६ ॥

नमस्त्रेधा विभक्तानामात्मनामन्तरात्मने। ब्रह्मणे हयवक्त्राय बन्धमोक्षैकहेतवे ॥

यदुच्यते तावदात्माद्वैतवादिभिरेक एवात्मा देहाद्युपाधिभेदेन बहुधा प्रतिभाति, तरङ्गचन्द्रवत्, सौभर्यादि-वच्च। तथा च प्रयोगाः—विगीतानि शरीराणि मयैवात्मवन्ति, शरीरत्वात्, सम्प्रतिपन्नमच्छरीरवत्; सर्वं जाग्रच्छरीरं मदविद्याकल्पितम्, शरीरत्वात्, कल्पितत्वाद्वा, स्वप्नदृष्टमच्छरीरवत्; सर्वोऽप्यात्मा अहमेव, चेतनत्वात्, अहमिव; सर्वाणि सुखदुःखानि मयैव भुज्यन्ते, सुखदुःखत्वात्, मत्सुखदुःखवत्; विगीतानि शरीराणि देवदत्तात्मना आत्मवन्ति, शरीरत्वात्, सम्प्रतिपन्नदेवदत्तशरीरवत्; एवं सहस्रशोऽनुमानानि विभज्य प्रयोज्यानि। विप्रतिपन्नश्शरीरभेदोऽनेकात्म-निरपेक्षः, शरीरभेदत्वात्, सौभरिशरीरभेदवत्। एवमनुमानान्तराण्यपि करणभेदादिपक्षीकारेण भाव्यानि। एवमन-

भ्युपगमे कल्पनागौरवप्रसङ्ग इति । ननु पण्डितत्वमूर्खत्वसुखित्वादिविरुद्धधर्माध्यासाद्भेदस्सिद्धः, तथा चाक्षपादैस्सूत्रितम् * नानाऽऽत्मानो व्यवस्थात इति । उक्तं च त्वदासन्नैस्साङ्ख्यैरपि—* जन्मजरामरणानां [जननमरणकरणानां] प्रतिनियमादयुगपत्प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ इति । सत्यपि च विरुद्धधर्मे यद्यभेदः, तदा सत्यमिथ्यैक्यादिकमपि स्यादिति शून्याद्वैतमेव स्यादिति चेन्न ; तेषां विरुद्धत्वाभावात् । सहानवस्थानलक्षणो ह्यत्र विरोधोऽभिमतः, स चाधिकरणभेदे सिद्धे, तत्सिद्धिश्च विरुद्धधर्माध्यासात्, इत्यन्योन्याश्रयणात् । न चैवं घटपटादिष्वपि विरोधपरिहारे सर्वभेदविलय इति वाच्यम्, तेषु स्वरूपभेदस्यैव स्फुटतरमुपलभ्यमानत्वात्, अन्तत इष्टप्रसङ्गरूपत्वाच्च । अत एवानुमानानां प्रत्यक्षबाधोऽपि परिहृतः । अत्र परस्परसुखादिप्रतिसन्धानप्रसङ्गो बाधक इति चेन्न ; एकेनानुभूतानामेव क्वचिदप्रतिसन्धानदर्शनात् । न हि जन्मान्तरानुभूतेषु, एकस्मिन्नपि वा जन्मनि चिरकालदृष्टेषु पूर्वदिवसभुक्तव्यञ्जनादिषु वा सर्वेषां पुरुषाणां तत्तत्प्रतिसन्धानमुपलभामहे । संस्कारप्रमोषात्तदपटुत्वाद्वा तत्र प्रतिसन्धानाभावः, ये पुनरप्रमुषितस्फुटतरसंस्कारास्ते जातिस्मरादयो जन्मान्तरानुभूतमेतज्जन्मानुभूतं च प्रतिसन्दधत इति चेन्न ; अत्राप्यविद्यावैचित्र्यादुपाधिभेदप्रतिनियततया वा प्रतिसन्धानाभावः प्राकृतानाम्, तत्त्वविदस्तु प्रह्लादवामदेवादयः प्रतिसन्दधतीति तुल्यम् । यथोक्तम्—* सर्वगत्वादनन्तस्य स एवाहमवस्थितः । मत्तस्सर्वमहं सर्वं मयि सर्वं सनातने ॥ इत्यादि । श्रुतिश्च—* तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मि विप्र इति । आदिभरतऋभुनिदाघादिवृत्तान्तेषु च व्यक्तोऽयं पन्थाः ।

किञ्च, परस्परसुखादिप्रतिसन्धानमस्मदादिष्वपि प्रसज्यमानं नानिष्टम् । यो हि स्वसुखादीन् प्रतिसन्धत्ते स एवान्योऽपीत्यस्मन्मते तत्प्रतिसन्धानमप्येतत्प्रतिसन्धानमेवेति किमत्र प्रसञ्जनीयम् ? नाहं राजादिसुखमनुभवामीति प्रतिसन्धानाभावः प्रत्यक्षसिद्ध इति चेन्न ; अहं सुखमनुभवामीति राजशरीरे तदुपलम्भात् । अन्यस्यैव उपलम्भ इति चेन्न ; अद्याप्यन्यत्वासिद्धेः । अहमस्मादन्यः, अयं च मत्तोऽन्य इति परस्परान्यत्वं प्रत्यक्षसिद्धमिति चेन्न ; परस्याप्रत्यक्षत्वेन तद्गतान्यत्वस्य प्रत्यक्षयितुमशक्यत्वात् । स्वस्य प्रत्यक्षत्वेऽपि स्वगतान्यत्वस्यापि प्रतियोगिभूतपरप्रतीतिमन्तरेणानुपपत्तेः । परश्च प्रतीयमानोऽन्यतया वा स्यात्, अनन्यतया वा, सामान्यतो वा ? नाद्यः, प्रत्यक्षतस्तदप्रतीतेः । लिङ्गतोऽपि कश्चिदस्तीत्यनुमीयते, न तु मत्तोऽन्य इति । मुखविकासादिना स्वविरुद्धसुखाद्यनुमानेऽन्यत्वमप्यनुमितं भवतीति चेन्न ; तेषां विरुद्धत्वस्य प्रागेव दूषितत्वात् । न द्वितीयः, सर्वेषां स्वप्रतियोगिकव्यतिरेकप्रसङ्गेन शून्यवादावतारात् । अत एव न तृतीयः, प्रतिसन्धानमात्रात् भेदे स्वस्मादपि भेदप्रसङ्गात् । तथापि कथं प्रतिसन्धानतदभावयोस्सिद्धिरिति चेन्न ; तदभावस्यासिद्धेः । सिद्धावपि देशकालोपाध्यादिभेदेन तदुपपत्तेः । अन्यथा स्वाश्रयैकदेशवर्तिसंयोगादि [गुण] विलयप्रसङ्गात् । न चैतद्युक्तम्, ईश्वरघटादिसंयोगस्य व्यापित्वे घटादेरपि विभुत्वप्रसङ्गात् । संयोगादीनां स्वाभावसमानाधिकरणतयैव धर्मिग्राहकेणैव सिद्धेस्तथाऽभ्युपगमः, इह तु न तथेति चेन्न ; अत्रापि प्रागुक्तानुमानैरद्वैतशास्त्रैश्च सुखादीनामपि तत्सिद्धेः । वैशेषिकादिभिस्तथाऽभ्युपगमाच्च । तथाच श्रूयते—*अथातोऽहंकारादेशः इत्यारभ्य, *अहमेवेदं सर्वमात्मैवेदं सर्वमिति । आत्मभेदश्च बहुशो निषिध्यते—* नेह नानास्ति किञ्चन, मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति । यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं विजानीयादात्मेत्येवोपासीत, द्वितीयाद्वै भयं भवतीत्यादिभिः । तथाच स्मृतिः—* तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत् । विज्ञानं परमार्थो हि द्वैतिनोऽतथ्यदर्शिनः ॥ यद्यन्योऽस्ति परः

कोऽपि मत्तः पार्थिवसत्तम । तदेषोऽहमयं चान्यो वक्तुमेवमपीष्यते ॥ वेणुरन्ध्रविभेदेन भेदष्षड्जादिसंज्ञितः । अभेदव्यापिनो वायोस्तथाऽसौ परमात्मनः ॥ आकाशमेकं हि यथा घटादिषु पृथग्भवेत् । तथाऽऽत्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् ॥ एक एव हि भूतात्मा भूतेभूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ इति । उक्तं च भगवता * सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ इति । एवंविधान्यन्यान्यपि वचनान्यसङ्ख्यातत्वान्न कार्त्स्न्येनोदाहर्तुं शक्यन्ते । न च बद्धमुक्तव्यवस्थाभावप्रसङ्गः, ब्रह्माज्ञानवादे त्वितः पूर्वं मुक्तानामेवाभावात् । एकमेव हि ब्रह्मैकयाऽविद्यया बध्यमानं बहुतया बम्भ्रमीति, तदेव कदाचिन्मोक्ष्यत इति स्थितेः । शुको मुक्तो वामदेवो मुक्त इत्यादि शास्त्रं कथमिति चेन्न ; कथञ्चित्स्वप्नपुरुषमोक्षवत् तस्यापि मिथ्यात्वात् । जीवाज्ञानवादे तु प्रतिजीवमविद्याभेदाज्जीवानाञ्च बिम्बप्रतिबिम्बस्थानीयत्वात्प्रातिस्विकाविद्यानिवृत्त्या प्रत्येकमोक्षे जीवान्तरस्थित्युपपत्तेः । ब्रह्मणस्तु नित्यमुक्तत्वेन बद्धमुक्तावस्थयोरेवाभावात् । तस्मादविद्यापरिकल्पितोऽयं जीवानां मिथो भेद इति ।

अत्रोच्यते—यदुक्तं विगीतानि शरीराणि मयैवात्मवन्तीति ; तत्र मयेति किमहमर्थो विवक्षितः ? उत तदनुबन्धिनी संवित् ? उत तदुभयोत्तीर्णः कश्चित्तयोरपि साक्षी ? नाद्यः, एकस्मिन्नपि शरीरे भवद्भिरहमर्थस्यात्मत्वानभ्युपगमेन तद्दृष्टान्तस्य साध्यविकलत्वात् । पक्षस्य चाप्रसिद्धविशेषणत्वात् । अनात्मनाऽऽत्मवन्तीति प्रतिज्ञाविरोधापत्तेः । स्वसिद्धान्तविरुद्धाहमर्थात्मत्वतदभेदसङ्कथनेनापसिद्धान्तप्रसङ्गाच्च । न द्वितीयः, अस्माभिस्तस्याः क्वचिदप्यात्मत्वानभ्युपगमेन साध्यविकलत्वादेव । तथैवाप्रसिद्धविशेषणत्वमपि, सर्वत्र संविन्मात्रस्यास्माभिरात्मत्वप्रतिक्षेपात् । तथैव च विरोधः, अनहमर्थेन संविदा आत्मवन्तीति प्रतिज्ञानात् । नापि तृतीयः, भवदभिमतस्य साक्षिणोऽस्माभिरन्यत्र प्रतिक्षेपात् । अस्मदिष्टेन तु सर्वाध्यक्षेणेश्वरेणात्मवन्तीति साधने सिद्धसाधनात् । जीवाधिष्ठितान्यपि हि शरीराणि परमात्मनाऽऽत्मवन्त्येव, तस्य सर्वशरीरत्वात् । सद्वारकमिति तु विशेषः । एवमुत्तरेष्वपि प्रयोगेष्वस्मच्छब्दविकल्पेन दूषणमूह्यम् । विशेषतोऽपि ब्रूमः,—यत्तु मदविद्याकल्पितमिति साध्यते, तत्रापि दृष्टान्तस्य साध्यविकलतैव, स्वप्नदृष्टानामपि पदार्थानामीश्वरसृष्टत्वस्य श्रुतिसिद्धत्वात् । * न तत्र रथा न रथयोगा न पन्थानो भवन्ति, अथ रथान् रथयोगान्पथः सृजते, स हि कर्ता इतीश्वरकर्तृत्वश्रवणात् । समर्थितं चैतत् * सन्ध्ये सृष्टिराह हीत्यस्मिन्नधिकरणे । मदविद्याकल्पितमित्यस्य साध्यस्य प्रपञ्चसत्यत्वप्रतिपादनेन बाधोऽपि द्रष्टव्यः । तेनैव कल्पितत्वादिति हेतोरसिद्धिश्च । यत्तु सर्वोऽप्यात्माऽहमेव, चेतनत्वादिति ; तत्राहमर्थत्वमात्रसाधने सिद्धसाधनता । स्वतादात्म्यसाधने वक्ष्यमाणेन विरुद्धधर्माध्यासेन बाधः । चेतनत्वादिति हेतोस्स्वपक्षेणासिद्धिः । दृष्टान्तस्य साधनविकलता च । चिद्रूपत्वमात्रस्य हेतुत्वे धर्मभूतज्ञानेनानैकान्तः । त्वत्पक्षे वृत्तिज्ञानेनापि । वैशेषिकादिमतेनासिद्धिश्च । आत्मत्वादिति प्रयोगेऽपि चेतनत्वचिद्रूपत्वादिविकल्पेन दूषणमूह्यम् । आत्मत्वजातिमत्त्वादिति विवक्षायां नानात्मवादप्रसङ्गः, व्यक्तिभेदनान्तरीयकत्वाज्जातेः । यत्तु सर्वाणि सुखदुःखानि मयैव भुज्यन्त इति ; तत्र स्वहृदयविसंवादस्तावत् ; यदि च सर्वाणि दुःखानि स्वेनैव भुज्यन्ते, तर्हि कथं परहिंसादिप्रवृत्तिः । न हि स्वसुखोच्छेदाय स्वदुःखोत्पादनाय वा प्रेक्षावन्तः प्रवर्तेरन् । अद्वैतदर्शिनां न तथा प्रवर्तनमिति चेन्न ; सर्वतत्त्वोपदेशिना भगवता वासुदेवेनापि स्वयमेव वा धनञ्जयादिमुखेन वा परपीडादर्शनात् । नित्यमुक्तत्वेनास्पृष्टसुखदुःखस्यात्मनस्तद्भोक्तृत्वासंभवादपसिद्धान्तश्च । अत एव दृष्टान्ते साध्यवैकल्यं च । अथ परमतेन भोक्तृ-

त्वमन्वारुह्योच्येत, तदाऽपि तन्मतेनाहमर्थस्यैवात्मत्वात्तदद्वैतसाधने भवतः कथमात्माद्वैतसिद्धिः ? अस्मच्छब्दानुबन्धेन यान्यन्यान्यैक्यसाधने । प्रयुक्तान्यनुमानानि तेषामेषा निराक्रिया ॥

यत्पुनरस्मच्छब्दानुबन्धमुत्सृज्य विगीतानि शरीराणि देवदत्तात्मनाऽऽत्मवन्तीति प्रयुक्तम्, तत्राप्यहमर्थत्व-संविन्मात्रत्वाद्यात्मशब्दार्थविकल्पेन प्रागुक्तदोषो दुस्तर एव । यच्च प्रतिपन्नश्शरीरभेदोऽनेकात्मनिरपेक्ष इति ; तत्रैकात्मा-धिष्ठितत्वविवक्षायामीश्वराधिष्ठानेन सिद्धसाधनता । भिन्नात्माधिष्ठानराहित्यविवक्षायां निषेध्यसिद्धौ तथैव तत्सिद्धेर्बाधः । तदसिद्धौ किं निषेध्यम् ? क्वचित्प्रमितस्यैव निषेध्यत्वमिति स्थितमन्यत्र । एवमन्येष्वप्यात्मैक्यसाधनेषु दूषणमूह्यम् । यः पुनर्विपक्षे दण्डवत्प्रदर्शितः कल्पनागौरवप्रसङ्ग इति ; स तदा स्यात्, यदि नोपलभ्येत न श्रूयेत वा भेदः । वक्ष्यते तदुभयम् । प्रतिप्रयोगाश्च—चैत्रात्मा मैत्रात्मनो भिन्नः ; कदाचिदपि मैत्रानुभवजनितस्मृतिरहितत्वात्, घटवत् ; व्यतिरेकेण वा, यो मैत्रान्न भिद्यते स तदनुभवजनितस्मृतिमान्, यथा मैत्रात्मैव, इत्यादयः । न चात्र हेत्वसिद्धिः, स्वात्मप्रत्यक्षसिद्धत्वात् । अन्यथाऽऽचार्यानुभूतमखिलं च स्मरन् किमर्थं शृणोषि ? पराभिप्रेतं च जानन् किमर्थं विक-ल्पयसि ? मयि च त्वदभिप्रेताभिज्ञे किमर्थमुत्तरं ददासि ? परोक्तं च त्वदुक्तमभिमन्यमानः किमर्थं दूषयसि ? निर्विशे-षणतया पूर्वेषां प्राबल्यमिति चेन्न ; विशिष्टस्याप्युपलम्भानुरोधिनो बलीयस्त्वात् । अन्यथा मेयत्वाभिधेयत्वादीनामाभास-हेतूनां निर्विशेषणतामात्रेण बलीयस्त्वे सविशेषणानां हेतूनामुपप्लवः । तेन पूर्वेषामपि बाधो निर्विशेषणानामपि जायते ।

यत्तु पण्डितत्वमूर्खत्वादीनां विरुद्धत्वं नास्ति, अधिकरणभेदे सिद्धे सहानवस्थानलक्षणविरुद्धत्वम्, ततश्च स इत्यन्योन्याश्रयणादिति । तत्किं क्वचिद्विरोधमभ्युपगम्य सोऽत्र नास्तीत्युच्यते ? उत क्वचिदपि विरोधाभावमभिमत्य ? नाद्यः, अविशेषात् । न हि सितासितादिभेदात् ज्ञानाज्ञानादिभेदस्य वैषम्यं पश्यामः । अधिकरणस्वरूपभेदस्य स्फुटो-पलम्भाद्वैषम्यं सिद्धमिति चेन्न ; असिद्धेः । न हि वैषम्यानुपलम्भेऽपि वस्तूनां भेदस्सिध्यति, तस्यैव तत्त्वात् । अन्यथा वैधर्म्याग्रहेऽपि स्वरूपोपलम्भमात्रेण भेदसिद्धौ संशयविपर्ययोच्छेदप्रसङ्गात् । अथ पुनर्वैधर्म्योपलम्भवेलायां स्वरूपभेदो-ऽप्यन्यः प्रतीयत इत्यभिमन्यसे, तर्ह्यत्रापि तथाऽनुमन्यस्व । नापि द्वितीयः, अविवादप्रसङ्गात् । नहि स्वसिद्धान्ताविरो-धिनि परमते विवादसम्भवः । अन्यथा स्वसिद्धान्तवादिभिरपि विवादप्रसङ्गात् । अनैकान्तवादस्य च साम्राज्यापातात् । किंच—स्थिरीकृतो विरोधस्स्याद्विरोधं प्रतिरुन्धता । विरोधाप्रतिरोधे हि विरोधो निरुपद्रवः ॥ विरोधोद्घाटनं मुक्त्वा किंनु दूषणमुच्यते । सर्वत्रैवाविरोधे तु भवेत्सर्वविरोधिता ॥ यत्तु प्रलपितम्, घटपटादिष्वपि विरोधपरिहाराद्भेदविलय इत्यत्र इष्टप्रसङ्गत्वमिति ; तत्स्वसिद्धान्तोच्छेदायोक्तम्, सर्वाद्वैते सत्यमिथ्यार्थविभागभङ्गप्रसङ्गात् । सर्वमिथ्यात्वस्य च भवद्भिरनभ्युपगमात् । विरोधमुत्सृज्य सत्यमिथ्याविभागस्य दुरुपपादत्वाच्च । एवञ्च विरोधसिद्धावनुमानादिसिद्धपरप्रति-योगिकभेदस्य स्वात्मनि प्रत्यक्षतया प्रत्यक्षबाधोऽपि सिद्धः । अत एव परस्परप्रतिसन्धानप्रसङ्गोऽपि निरुपद्रवः । पटुप्रत्य-याभ्यासादराहितातिशयतादात्विकसंस्कारवशेन प्रतिसन्धानप्रसङ्गे सति न जन्मान्तराद्युदाहरणावकाशः । यत्तु तत्रोक्तम्, अविद्यावैचित्र्यादुपाधिभेदप्रतिनियततया वा प्रतिसन्धानाभाव इति ; तदपि न, अविद्यास्वरूपतत्प्रमाणादेरन्यत्र प्रतिक्षेपात् । अन्यथा चिदचिद्विभागस्यापि तद्वैचित्र्यनिबन्धनतया तदैक्यस्यापि प्रसङ्गात् । उपाधिभेदस्तु न प्रतिसन्धानप्रतिबन्धकः, सौभर्युपाधिभेदवत् ; अन्यथा जातिस्मरत्वमपि कस्यचिन्न स्यात् । अन्तःकरणैक्यात्तदुपपत्तिरिति चेन्न ; केषांचित्कल्पा-

न्तरानुभूतस्मृतिदर्शनात् । अन्तःकरणभेदात्सुखादिव्यवस्थायां बाह्यकरणभेदादपि व्यवस्था किं न स्यात्? नच तथाऽस्ति; दृष्टमेव स्पृशामीति प्रतिसन्धानात् । एवं पाणिपादाद्यवयवभेदादपि प्रसङ्गो दर्शयितव्यः ।

यत्तु तत्त्वविदः प्रह्लादवामदेवादयः प्रतिसन्दधत इत्युक्तम्; तदपि मन्दम्, तेषां सर्वान्तरात्मभूतपरमात्मपर्यन्तस्वात्मानुसन्धानेन तथातथा व्यपदेशात् । अत एव हि * सर्वगत्वादनन्तस्येत्युक्तम् । तदभिप्रायेण च श्रुतिः * तद्धैतत्पश्यन्नृषिरिति । तदेतद्ब्रह्मान्तर्यामिकत्वं पश्यन्नित्यर्थः । एवमेव हि * सर्वं समाप्नोषि ततोऽसि सर्वः इत्यादिकमपि । एतेनैवादिभरताद्यनुसन्धानप्रकारोऽपि निर्व्यूढः । अन्यथा तत्त्वविदां सर्वात्मगतसुखदुःखानुसन्धाने त्वेकदर्वीकरभयपलायितस्यानन्तसर्पमध्यनिपातन्यायेन तत्त्वदर्शित्वं विपरीतफलं स्यात् । न च तेषां सर्वकर्मक्षयात् भोगो नास्तीति वाच्यम्; स्वगतसुखदुःखानुसन्धानस्यैव भोगत्वेन तदनङ्गीकारव्याघातात् । यत्तु सुखादिप्रतिसन्धानप्रसङ्गे परप्रतिसन्धानमपि स्वप्रतिसन्धानमेवेति किमत्र प्रसञ्जनीयमित्युक्तम्; तदपि विरोधोपपादनेनैव परिहृतम् । यत्तु परस्परान्यत्वोपलम्भे जल्पितम्, परस्याप्रत्यक्षत्वे तद्गतान्यत्वमपि न प्रत्यक्षयितुं शक्यमिति; तस्य किं प्रत्यक्षनिर्बन्धेन, अनुमानतोऽपि तत्सिद्ध्युपपत्तेः । स्वात्मनि तदन्यत्वस्य प्रत्यक्षत्वे स्वप्रतियोगिकतद्गतान्यत्वस्यानुमातुं शक्यत्वात् । यो यद्गतान्यत्वप्रतियोगी स ततोऽन्यः, यथा सव्यहस्ताद्दक्षिणहस्त इति हस्तस्थत्वाद्व्याप्तेः । यत्तत्रोत्तरम्परः प्रतीयमानोऽन्यतया वा, अनन्यतया वा, सामान्यतो वेति; तत्रान्यतयैवेति ब्रूमः । यद्यपि तत्र न प्रत्यक्षम्, तथाऽपि मुखविकासाद्यनुमितेन हर्षादिना स्वस्मिन्ननुपलभ्यमानत्वेन स्वस्मादन्यतयैवानुमातुं शक्यते । दर्शितं च सुखदुःखतदभावादीनां यथोपलम्भं विरुद्धत्वम् । अत एव सामान्यतः प्रथमप्रतीतावप्यनन्तरं विरुद्धधर्मोपलम्भेनापि भेदानुमितिस्सिद्धा । एतेन प्रतिसन्धानतदभावयोः कथं सामानाधिकरण्यमित्यत्र तदभावासिद्धिवचनमपि प्रत्युक्तम् । तदभावसिद्धावपि उपाधिभेदेन तदुपपत्तिस्तु प्रागेव दूषिता । यत्तु प्रतिसन्धानतदभावविरोधशमनाय प्रदेशवर्तिसंयोगादिकमुदाहृतम्; तद्विवक्षितमजानतैवोक्तम् । नहि वयं प्रतिसन्धानस्वरूपस्य सर्वत्र वृत्तिं प्रसञ्जयामः, आत्मवैभववादिनो हि प्रदेशवर्तिन एव ज्ञानादिगुणान् वदन्ति । यत्र क्वचित्प्रदेशेऽनुभवोत्पत्तावपि तदन्येनापि प्रदेशेन प्रतिसन्धानादिकमवर्जनीयमेव । अन्यथा दक्षिणहस्तेन स्पृष्टं सव्यहस्तेन स्पृशामीति प्रतिसन्धानं न स्यात् । सौभरिप्रतिसन्धानमपि दूरमपास्येत; तत्रापि प्रादेशिकप्रतिसन्धानोत्पत्त्या प्रतिसन्धानाभावस्य वक्तुं शक्यत्वात् । तस्मादाश्रयणविषयीकरणयोरविशेषभ्रमात् संयोगादिनिदर्शनम् । श्रुतयस्तु * अहमेवेदं सर्वम्, * आत्मैवेदं सर्वमित्यादिकाः प्रह्लादादिवाक्योक्तन्यायेन निर्व्यूढाः । * नेह नानास्ति किञ्चनेत्यादिभेदनिषेधास्तु समस्तचिदचिद्विशिष्टे ब्रह्मण्येकस्मिन् ज्ञाते विशिष्टबहिर्भूतप्रतिक्षेपपराः, यथा शरीरजातिगुणवसनभूषणादिपरिगणिते कस्मिंश्चित्पुरुषेऽवस्थिते तत्रैक एव तिष्ठति नान्यः कश्चिदिति व्यपदिशन्ति, तद्वदत्रापि । एवमनभ्युपगमे अहंत्वमादिलोकोपलम्भविरोधः । शास्त्रप्रत्यक्षविरोधे प्रत्यक्षप्राबल्यं स्थितमन्यत्र । तथा *नित्यो नित्यानां चेतनश्चेतनानामेको बहूनामित्यादिभेदश्रुतिशतकोपश्च । विषयभेदाद्विरोधे शाम्यत्यन्यतरबाधोऽनुपपन्न इति सगुणनिर्गुणश्रुतिचिन्तने सुस्पष्टम् । मीमांसाशास्त्रसन्दर्भः सर्वो विषयभेदतः । श्रुतीनामविरोधाय जायते न तु बाधनात् ॥

एतेन स्मृतिष्वपि भारोऽवरोपितः । तत्रापि ब्रह्मात्मकत्वप्रतिपादनप्रकरणे प्रागुक्तन्यायावतारः । जीवानां परस्परभेदनिषेधप्रकरणे तु ज्ञानरूपतयाऽत्यन्तसमस्वरूपाणां कर्मकृतदेहोपाधिकदेवत्वादिभेदस्य स्वरूपानुबन्धित्वप्रतिक्षेपे तात्पर्यम् । तथा चोच्यते * देवादिभेदेऽपध्वस्ते नास्त्येवावरणो हि सः, * पुमान्न देवो न नरो न पशुर्न च पादपः,

इत्यादिना । * यद्यन्योऽस्ति परः कोऽपीत्यत्रान्यशब्देनान्यादृशत्वमेवोच्यते, अन्यथा परशब्दपौनरुक्त्यात् । एवं सत्यात्मनां परस्परसाम्यप्रतिपादकवाक्यान्तरानुगुण्यमपि सिध्यति । अत एव भगवद्वचनमपि निर्व्यूढम्, * सर्वत्र समदर्शिन इति तत्रैवोक्तेश्च । घटाकाशतरङ्गचन्द्राद्युदाहरणवाक्यस्य जीवविषयत्वेऽयमेव न्यायः । तत्तु यदा परमात्मविषयम्, तदा तद्गतदोषैरस्पृष्टत्वमात्रे तदुभयदृष्टान्ततात्पर्यमिति * वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्चेति सूत्रेणैव समर्थितम् । एवमनभ्युपगमे बद्धमुक्तव्यवस्थाभङ्गश्च । यत्तत्रोक्तम्—ब्रह्माज्ञानवादे तावत्पूर्वं मुक्ता एव न सन्ति, शुकादिमोक्षोऽपि स्वप्नदृष्टपुरुषमोक्षवन्मिथ्येति ; तत्र तावदद्वैतविद्योपदेशिनां त्वदाचार्याणामपि मोक्षस्य मिथ्यात्वे स्वयं कथं मोक्षमन्विच्छसि ? कथं वा शिष्यांश्च प्रेरयसि ? आमोक्षाज्जीववच्छरीरं किमित्यपरिज्ञानादिति चेन्न ; सर्वशरीराणामेकात्माधिष्ठितत्वे मिथ्यात्वे चाविशिष्टे तत्तदधिष्ठाने च प्रतिभासमात्रसिद्धेर्दृष्टृदृश्यशरीरविशेषासिद्धेः । ततश्च पश्चात्तनोऽपि मोक्षो मिथ्याभूत इति कथमद्यतनाद्विशेषः ? तस्मान्न कदाचिदपि मोक्ष इति वा न कदाचिदपि बन्ध इति वा स्यात् । इष्टमेवैतदुभयमपीति चेन्न ; पूर्वत्र नित्यबन्धप्रसङ्गेन निवर्तयितुमशक्यत्वात्, उत्तरत्र निवर्त्याभावाच्च बन्धनिवर्तनोपायोपदेशादिपरशास्त्रनैरर्थक्यादिप्रसङ्गात् । जीवाज्ञानवादे तु ब्रह्मणो बन्धानभ्युपगमात् ब्रह्मव्यतिरिक्तस्य च मिथ्यात्वात् केवलं बाधिताबाधितव्यवस्थेत्येव स्यात्, नतु बद्धमुक्तव्यवस्था । अथ ब्रह्मप्रतिबिम्बस्थानीयानामपि जीवानां ब्रह्मत्वम्, तदा ब्रह्माज्ञानवादप्रसङ्गे प्रतिपादित एव दोष इति ।

एवं भास्करादिपक्षेऽपि परस्परं जीवानाम्, ईश्वरण चाभेदस्य स्वाभाविकत्वात्, उपाधिभेदस्य चाकिञ्चित्करत्वस्थापनात्, सर्वसुखदुःखादिप्रतिसन्धानप्रसङ्गे बद्धमुक्तजीवेश्वरव्यवस्थाभङ्गप्रसङ्गो दुर्वारः । यत्तु भेदवादेऽप्यतीतकल्पानन्त्यात्प्रतिकल्पमेकमुक्तावपि सर्वमुक्तिप्रसङ्गात् कथं बद्धमुक्तव्यवस्थेत्याहुः ; तदपि मुग्धभाषितम्, अनन्तघटध्वंसेऽपि घटान्तरस्थितिवदनन्तकल्पानां ध्वंसेऽपि कल्पान्तरवदनन्तपार्थिवपृथक्कारेऽपि द्रव्यान्तरानन्त्यवद्यथोपलम्भमानन्त्यातिशयाद्व्यवस्थोपपत्तेः । एकस्य वाऽऽत्मनः कथमितः पूर्वमपवर्गाभावः ? हेत्वनागमनादिति चेत्, एवमनेकेष्वपीति भावय ; तथा अनन्ता एव जीवा इत्यपि यथाप्रमाणमनुसन्धत्स्व । नन्वेवमपि कश्चिन्नित्यं मुक्तः कश्चित्तु बध्यते मुच्यते चेति व्यवस्था न सिध्यति, आत्मनां स्वतस्समत्वादीश्वरस्य साधारण्यादिति चेत् ; हन्तैवमास्तिकपदवीमनुप्रविष्टोऽसि । ततश्च किं जीवेश्वरभेदमनभ्युपगम्य पृच्छसि, उत तदभ्युपगमेन ? न प्रथमः, श्रुतिविरोधादभेदवादिनाऽपि सर्वज्ञत्वादिवैषम्याङ्गीकाराच्च । नापि द्वितीयः, आत्मत्वाविशेषेऽपि कथमीश्वरो नित्यमुक्त इतिवदपहास्यत्वात् । संसारहेत्वत्यन्ताभाववत्तया धर्मिग्राहकेण तत्सिद्धेरिति चेत् ; हन्तानीश्वरेष्वपि केषुचित्तथा धर्मिग्राहकसद्भावे किं कुर्मः ? अनीश्वरत्वादेव संसारयोग्यत्वमस्तीति चेत् ; तत्सत्यम्, सा स्वरूपयोग्यता, न तु सहकारियोग्यता । स्वरूपयोग्यत्वं सहकारियोग्यत्वव्याप्तमिति चेन्न ; निस्तुषबीजादिष्वङ्कुरादिसहकारिसन्निपातादर्शनात् । तथाऽप्यविरुद्धयोरसंसर्गः प्रणाशाभावे कालविप्रकर्षव्याप्त इति चेन्न ; मुक्तानामुत्तरकालबन्धाभाववदुपपत्तेः । हेतूनामत्यन्तोच्छेदात् न पुनस्सहकार्यागमोऽपुनरावृत्तिश्रुतेरिति चेन्न ; तुल्यत्वात् । अत्यन्ताभावादिति हि विशेषः, स तु विरुद्ध इति चेन्न ; धर्मिग्राहकतस्तत्सिद्धौ विरोधासिद्धेः । ततश्च तद्विपरीतानुमानाद्युत्थानमपि प्रतिरुद्धम् । धर्मिग्राहकमेव न पश्यामीति चेत् ; तर्हि निर्विषयं चोद्यमिति तूष्णीं भव, अधीष्व वा तत्त्वमाचार्येभ्य इति । तदेतत्सर्वमादिभरतवाक्यव्याख्यानव्याजेन भाष्यकारैस्सूचितमिति द्रष्टव्यम् ॥

॥ इति शतदूषण्याम् आत्माद्वैतभङ्गवादः षट्त्रिंशः ॥ ३६ ॥

॥ अथ जीवेश्वरैक्यभङ्गवादः सप्तत्रिंशः ॥ ३७ ॥

आत्मतत्त्वविदां पुंसां यद्धास्यं लास्यकारणम् । तद्वन्दे परमानन्दमिन्दिरामन्दिरं महः ॥

यत्पुनर्महासाहसिका दृढतरनिरूढदेहात्ममोहमन्दधियः प्रत्यक्षादिविरोधमपि तिरस्कृत्य स्वात्मानमेवेश्वरमभिमन्यन्ते, तदपि भेदसामान्यस्य आत्मनानात्वस्य च समर्थनात् * एको बहूनामित्याद्युक्तैकानेकतादात्म्यायोगाच्च निरस्तप्रायमेव । विशेषतोऽपि पश्यामः । जीवस्येश्वरत्वं किं प्रत्यक्षबलादभ्युपगम्यते ? उतोपपत्तिसामर्थ्यात् ? यद्वा शास्त्रवैभवात् ? अन्यतः कुतश्चिन्न सम्भवत्येव । नाद्यः, अनीश्वरतयैव स्वात्मन उपलम्भात् । अप्रतीतेश्वरस्य कथं तत्प्रतियोगिकानीश्वरत्वनिरूपणमिति चेन्न ; श्रुत्यादिभिः प्रमितेश्वरतत्त्वानां तत्प्रतियोगिकभेदनिरूपणोपपत्तेः, स्वात्मनि अप्रत्यक्षमेर्वादिभेदोपलम्भवत्, यदीश्वरः स्वात्मा प्रत्यक्षमेव तथोपलभ्येतेत्यप्रतीतेश्वराणामपि स्वगतेच्छाविघातदुःखादिदर्शनात्तावत एवानीश्वरत्वोपलम्भरूपत्वात् । अनीश्वरोऽहमित्युपलम्भो नास्तीति चेन्न ; अशक्येष्वनीश्वरोऽहमित्येवोपलम्भात् । सामर्थ्याभावलक्षणधर्मविषयोऽयमनीश्वरशब्द इति चेन्न ; ईश्वरप्रतीतावपि तस्यैव धर्मस्य ईश्वरव्यतिरेकात्मनोल्लिख्यमानत्वात् । माभूद्वा स्वात्मन्यनीश्वरशब्दः, ईश्वरव्यतिरेकरूपधर्माणां स्वरूपतस्तावत् प्रतीतिरपरिहार्या । कार्यविशेषेषु ईश्वरोऽहमित्यभिमन्यन्त एव सर्वे पुरुषाः । कर्मण्यैश्वर्यबोधोऽधिकार इत्युच्यत' इति चेन्न ; क्षेत्रज्ञानामपि तावन्मात्रेश्वरत्वप्रतिपादनेऽस्माकमिष्टापातात् । एतावानेवेश्वरशब्दार्थो लोके व्युत्पत्तिसिद्ध इति चेन्न ; ईश्वरत्वस्यात्यन्तनिम्नोन्नततारतम्यवत्तयोपलम्भात् । ततः किमिति चेत् ; इयदेवेश्वरत्वमिति परिच्छेदासिद्धिः । तथापि लोकसिद्धोत्कर्षकाष्ठामात्रे पर्यवसानमस्त्विति चेन्न ; लोकायतवादप्रसङ्गात्, सर्वव्यक्तिसाधारणाकारस्यैव वाक्प्रवृत्तिनिमित्तत्वेन लोके प्रसिद्धेः । साधारणाकारेऽपीश्वरशब्देन प्रतिपिपादयिषिते तद्विरुद्धदुःखादिधर्मवत्तामात्रस्य प्रतिक्षेपायोगात् । सर्वविषयमीश्वरत्वमनुपलब्धमिति चेत् ; सत्यम्, तत एव हि शास्त्रावतारः । अनुपलम्भादेव बाधे शास्त्रमपि तत्प्रतिपादनासमर्थमिति चेन्न ; अनुपलम्भमात्रेण बाधेऽतिप्रसङ्गात्, योग्यानुपलम्भस्यासिद्धेः, सिध्यतश्च तस्य स्वस्मिन्नीश्वरत्वमात्रप्रतिक्षेपसामर्थ्यात् । ततश्च नाहमीश्वर इत्यनुपलम्भात् सिध्यति, न पुनरीश्वरो नास्तीति । तदेवं कर्मवश्यानां प्रतिहतिभूयिष्ठसङ्कल्पानामाध्यात्मिकादिदुःखसन्ततिसन्तप्तानां स्वदुःखमूलोन्मूलनाय लौकिकमलौकिकं वा हेतुमन्विच्छतामस्मदादीनामनीश्वरत्वे प्रत्येकं प्रत्यक्षतः परस्परमनुमानतश्च सिद्धे न काचिदप्युपपत्तिर्जीवेश्वरत्वं साधयितुमीष्टे ।

एतेन द्वितीयोऽपि विकल्पो निरस्तः, स्वशरीरवत्परशरीरेऽपि जीवानामीश्वरव्यतिरेकस्य दुःखादिसम्भेदसिद्धत्वात् । तस्य च तेषां प्रत्यक्षत्वात् । तथा च सति जीवः ईश्वराद्भिन्नः चेतनत्वादित्यादौ बाधप्रतिज्ञाविरोधादयो द्रष्टव्याः । अथ विरुद्धधर्ममिथ्यात्वेन जीवेश्वरयोः स्वरूपैक्यमविरुद्धमित्युच्यते, तथापि जीवेश्वरयोः कार्यकारणोपाधिरूपेणाध्यस्तत्वाभ्युपगमात् रज्ज्वारोपितसर्पभूदलनादेर्ब्रह्माध्यस्ततेजस्तिमिरादिविरुद्धवर्गस्य च तादात्म्यविरोधो न स्यात् । न चैतद्युक्तमभ्युपेतुम्, व्यावहारिकत्वेऽपि यथालोकं व्यवस्थाप्यत्वात् । आरोपितोभयबाधदशायामप्यधिष्ठानमात्रपरिशेष एव, न पुनरारोपितयोस्तादात्म्यम्, नाप्यधिष्ठानारोपितयोः ; अन्यथा सर्वशून्यत्वे सर्वसत्यत्वे वा पर्यवसानात् । तैमिरिकस्य चन्द्रे चन्द्रान्तरवत् स्वस्मिन्नेव स्वाध्यासादविरोध इति चेन्न ; उपरिदेशस्य तत्र चन्द्रान्तराध्यासाधिष्ठानत्वं चन्द्रस्य वा द्वित्वाध्यासाधिष्ठानत्वमिति न क्वचिदपि स्वस्मिन्नेव स्वाध्यासः । स्वमहिमप्रतिष्ठितत्वाद्युक्तेरपि निराधारत्वादिमात्रे तात्पर्यम् ।

तथाऽपि चन्द्रद्वित्ववत्स्वरूपभेदाध्यासः, तन्निवृत्तौ स्वरूपैक्यमविरुद्धमिति चेत्; हन्तैवमचेतनवर्गेऽपि किं न कल्प्यते? तन्मिथ्यात्वप्रतिपादनबलादिति चेन्न; * नेह नानास्तीत्यादिना ज्ञातृज्ञेयज्ञानरूपसमस्तनिषेधाभ्युपगमात्, * यत्र त्वस्य सर्वमात्मैवाभूदिति वाक्यशेषेण त्वदनभिमतस्यापि सर्वस्वरूपैक्यस्य स्वरसप्रतीतेः। प्रत्यक्षादिसिद्धविरोधानुसारेण तत्र तादात्म्यं परित्यजाम इति चेत्; तर्हि सैव दृष्टिर्जीवेश्वरयोरपि किं न निक्षिप्यते? अन्यथा कालात्ययापदेशस्य विरोधस्य च निर्मूलत्वे प्रतिवाद्यपि यत्किमपि जल्पन्न निगृह्येत।

नापि तृतीयः। शास्त्रमपि हि सहस्रशो जीवेश्वरयोर्भेदमेव कण्ठोक्त्या क्वचित्प्रतिपादयति, क्वचिद्विरोधिधर्मम्, क्वचित्तु भेदाक्षेपकं सम्बन्धविशेषम्। यथा—* क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः। * जुष्टं यदा पश्यत्यन्यमीशम्, * पृथगात्मानं प्रेरितारं च मत्वा * द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति * तस्माद्वा एतस्माद्विज्ञानमयात्, अन्योऽन्तर आत्माऽऽनन्दमयः, * अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः, * उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः * अन्यश्च राजन् स परस्तथान्यः पञ्चविंशकः, इत्यादिभिर्जीवपरयोर्भेदः स्वशब्देनोच्यते। तथा * यस्सर्वज्ञस्सर्ववित् * पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च * स कारणं करणाधिपाधिपः * तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम्। पतिं पतीनां परमम् * दासभूतास्स्वतस्सर्वे ह्यात्मानः परमात्मनः, * आत्मदास्यं हरेस्स्वाम्यं स्वभावं च सदा स्मर इत्यादिभिर्विरोधिनो धर्माः। * एष त आत्माऽन्तर्हृदये, * एवमयमन्तरात्मन्, * पुरुषो मनोमयः * य आत्मनि तिष्ठन्....यस्यात्मा शरीरमित्यादिभिः, * पतिं पतीनामित्यादिभिश्च पूर्वोक्तैर्भेदाक्षेपकः सम्बन्धः। मुक्तिदशायामपि विशेषतो भेदः श्रूयते—* सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चिता, * तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति * इदं ज्ञान [मु] मपाश्रित्य मम साधर्म्यमागताः इत्यादिभिः। एवंच प्रत्यक्षाद्यविरुद्धतत्त्वस्थितौ श्रुतिशतसिद्धायां सर्वत्र जीवेश्वरसामानाधिकरण्यमैक्यनिर्देशश्च स्वस्वामिभावसंबन्धादिभिरुपचारतोऽपि निर्वोढव्यम्। तथाच श्रुतिशैली * सराष्ट्रं नाभवत् स राष्ट्रमभवत् स इदं भविष्यतीत्यादि। श्रुतवेदान्तस्य तु शब्दशक्तिनिष्कर्षे सत्यपर्यवसानात् विशिष्टैक्यादिविवक्षया च तयोरुपपत्तिः। एवमनभ्युपगमे चेतनवदचेतनेऽप्यैक्यव्यपदेशबाहुल्यात् अचेतनतादात्म्यमपीश्वरस्य दुर्वारम्, विरुद्धधर्माध्यासादेरनादरमात्रेण वाङ्मात्रेणवा परिहर्तुमशक्यत्वात्। चेतनस्यापरमार्थत्वाद्बाधार्थं तत्र सामानाधिकरण्यमिति चेन्न; जीवेऽपि प्रसङ्गात्। उपास्तिप्राप्तिदशयोरप्यैक्यव्यपदेशाज्जीवैक्यं परमार्थभूतमिति चेन्न; आरोपेणाप्युपासनस्य सगुणब्रह्मोपासनादिषु भवद्भिरेव स्वीकारात्। नचाहंग्रहोपासनमात्राज्जीवेश्वरैक्यसिद्धिः, भवत्पक्षेऽहमर्थभूतान्तःकरणेन ब्रह्मण ऐक्यप्रसङ्गात्। केवलाहमर्थोपासनदशायां तदीश्वरत्वप्रसङ्गस्याभावात्। ईश्वरदृष्टिविधौ तु जीवेश्वरभेदस्यैव पारमार्थिकत्वम्। यथाऽऽत्मनि गरुडदृष्टौ गरुडात्मनोर्भेदस्य। अन्यथा दृष्टिविधेः सत्योपासनविधेश्च वैषम्यासिद्धिप्रसङ्गात्। वामदेवेन्द्रादिवदहमर्थविशिष्टतदन्तर्यामिनिर्देशोऽपि विशेषणविशेष्यभावादिना भेदस्सिद्धः। एवमेव परमात्मशरीरत्वविशेषितप्रत्यगात्मोपासनेऽपि।

तदेवमचेतनेऽपि चेतनभ्रमवदनीश्वरेष्वपि जीवेष्वीश्वरभ्रमं परित्यज्य तद्वशीकरणहेतुभिस्तत्पारतन्त्र्यानुसन्धानादिभिरात्मानं बन्धान्मोचय, न पुनस्समस्तनिग्रहानुग्रहक्षमसत्यसङ्कल्पेश्वरतादात्म्यमोहमहापराधेन सर्वनिग्रहपात्रमात्मानमन्धे तमसि पातय। प्राप्तावैक्यव्यपदेशोऽपि भवत्पक्षे प्रपञ्चैक्यव्यपदेशवद्बाधेनापि किं नोपपद्यते? आत्मबाधे कथं

मोक्षस्य पुरुषार्थत्वमिति चेत्; धिङ्मूर्ख, अहमर्थबाधे मोक्षस्य पुरुषार्थतां वदन् किमीदृशोक्तौ जिह्रेषि? तत्त्वावेदकवाक्यप्रतिपन्नं जीवैक्यमिति चेत्; अचिदैक्यमपि हिं तेनैव प्रतीयते। अन्यथा तत्र बाधार्थसामानाधिकरण्यस्वीकारोऽपि दुश्शकः, आरोपितैक्यमात्रेण समन्वयोपपत्तेरौपचारिकोक्तेरपर्यनुयोज्यत्वात्। नदीसमुद्रघटाकाशमहाकाशादिदृष्टान्तेन मुक्तौ भेदनिवृत्तिवचनं च साम्यसहश्रुत्याद्यनुरोधेन कर्मोपाधिकनामरूपादिवैधर्म्यरूपभेदतन्निवृत्तिभ्यामपि चरितार्थम्। जीवेश्वरैक्यश्रुतीनां च निर्वाहक्रमम् * अवस्थितेरिति काशकृत्स्नः इत्यसूत्रयत्। आह च मोक्षधर्मे * अन्यश्च राजन् स परस्तथाऽन्यः पञ्चविंशकः। तत्स्थत्वादनुपश्यन्ति ह्येक एवेति साधवः॥ इति। इममेवार्थमभिप्रेत्य * आत्मेति तूपगच्छन्ति ग्राहयन्ति चेत्यहंग्रहोपासनमपि सूत्रितम्। नच भेदविषयस्फुटानेकश्रुतिबाधो न्याय्यः। एकवाक्यप्रतिपाद्ये च कचिच्चिदचितोरीश्वरतादात्म्ये वैरूप्यकल्पनप्रयासश्च ते निरर्थकः। भिन्नवाक्यप्रतिपन्नेऽपि सम्भवदैकरूप्यमपरित्याज्यम्। अस्मत्पक्षे तु भेदश्रुतिघटकश्रुतिप्रत्यक्षाद्यविरुद्धं सर्वत्र विभूतितद्वद्भावेनैकरूपमेव चिदचितोरीश्वरसामानाधिकरण्यम्।

ननु भवतोऽपि कचिद्वैरूप्यमङ्गीकार्यम्, * ब्रह्म वेद ब्रह्मैव भवतीत्यादिना मुक्तस्य ब्रह्मसामानाधिकरण्ये विभूतितद्वद्भावविवक्षानुपपत्तेः। प्राप्याकारो हि तत्र निर्दिश्यते। न च विभूतिभावः प्राप्यः, तस्य नित्यसिद्धत्वाभ्युपगमात्। तदाविर्भावविवक्षायां तस्य तत्राशाब्दत्वात्। यदि चेश्वरविभूतित्वं मुक्तस्याङ्गीक्रियते, तदा मुक्तस्य तत्पारतन्त्र्यशेषत्वे अपि स्याताम्। नचायमिष्टप्रसङ्ग इति वाच्यम्, स्वरूपाविर्भावलक्षणस्य मोक्षस्यापि संसारवद्दुःखात्मकत्वप्रसङ्गात्; चेतननिष्ठयोश्शेषत्वपारतन्त्र्ययोः दुःखानुषङ्गव्याप्तेः। तथाच स्मरन्ति * सर्वं परवशं दुःखं सर्वमात्मवशं सुखमिति। निषेधन्ति च पारतन्त्र्यम् * सेवा श्ववृत्तिर्व्याख्याता तस्मात्तां परिवर्जयेदिति। श्रुतिश्च मुक्तस्य स्वातन्त्र्यमेव दर्शयति * स स्वराड्भवतीति। सूत्रं च मुक्तविषयम्, *अत एव चानन्याधिपतिरिति। * सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्ते, * सत्यकामस्सत्यसङ्कल्पः, * सर्वेषु लोकेषु कामचारो भवति, * कामान्नी कामरूप्यनुसञ्चरन्नित्येवमादयश्च मुक्तस्य पारतन्त्र्यगन्धं प्रतिरुन्धते। * सङ्कल्पादेव तच्छ्रुतेरिति च मुक्तस्य विचित्रसृष्टौ हेत्वन्तरनैरपेक्ष्यमसूत्रयत्। नच * जगद्व्यापारवर्जमिति जगद्व्यापारनिषेधात्पारतन्त्र्यमपि सूत्रकारसम्मतमिति वाच्यम्, प्रतिसर्गदशायामीश्वरस्येव स्वतन्त्रस्याप्यनिच्छतो जगद्व्यापारनिवृत्त्युपपत्तेः। अस्तु वा जगद्व्यापारोचितस्वातन्त्र्यविरहः, तथाऽपि स्वप्रवृत्त्यादिषु न पराधीनत्वसिद्धिः। अल्पशक्तिरधिकशक्त्यपेक्षया परतन्त्र एवेति चेन्न; भिन्नविषयत्वे तत्प्रसङ्गाभावात्। एकविषयत्वेऽप्यविरोधे परस्परसहकारित्वमात्रेण परस्परं पारतन्त्र्यस्य परस्परं स्वातन्त्र्यस्य वा प्रसङ्गात्। स्वव्यापारांशे नैरपेक्ष्यस्य च द्वयोरपि वक्तुं शक्यत्वात्। न च मुक्तकर्तृकप्रवृत्तिनिष्पत्तावीश्वरः मुक्तनिरपेक्ष इति युक्तम्, स्ववचनविरोधात्। नच मुक्तसङ्कल्पाधीनभोगनिर्माणे मुक्तेश्वरयोः प्रयोज्यप्रयोजकभावः, प्रमाणाभावात्, पूर्वोक्तश्रुत्यादिविरोधाच्च। कारयितृत्वश्रुतेरप्युन्निनीषाधोनिनीषागर्भत्वेन कर्मवश्यमधिकृत्यैव प्रवृत्तेः। आनन्दयितृत्वश्रुतेश्च मोक्षप्रदानादिना चरितार्थत्वात्। नच निवारणसमर्थेश्वरस्यानिवारणमुपजीव्य मुक्तः प्रवर्तत इति वाच्यम्, विपरिवर्तेऽपि निवर्तकाभावात्। न च प्रागशक्त्या परापेक्षया च पश्चादपि तयोर्नियमः, प्राङ्मुक्तत्वाभावेनापवर्गस्यात्यान्तोच्छेदप्रसङ्गात्। प्रागशक्त्यादेश्च कर्मोपाधिकत्वात्। संसारदशायामीश्वरपारतन्त्र्यमपि सांसारिकसुखदुःखैकभोगहेतुतया राजादिपारतन्त्र्यवत् कर्मानुरूपमेव। अतः कर्मनिवृत्तौ तदपि निवर्तिष्यत एवेति स्वतन्त्रो मुक्तः। अतः *स स्वराड्भवतीत्यत्राकर्मवश्य इति व्याख्यानेऽपि कर्मवश्यत्वाविनाभूतमीश्वरपारतन्त्र्यमपि फलतो निवर्तितं भवति। नच मुक्तस्वातन्त्र्यविषयाणां श्रुतीनाम्

* पतिं विश्वस्येत्यादिश्रुतिबलादनीश्वरविषयतया सङ्कोचः, पतित्वश्रुतीनामेवामुक्तविषयतया सङ्कोचोपपत्तेः। न च द्वयोरपि पृथग्विषयलाभे नियामकाभावात्कस्य सङ्कोच इति नित्यसन्देह इति वाच्यम्, * स स्वराड्भवतीत्येवंरूपस्य व्यपदेशस्य स्वेतरसमस्तवश्यत्वनिवृत्तावेव तात्पर्योपलम्भात्। यदि तु न कस्य चिद्वश्यो मुक्त इत्येवमादिव्यपदेशस्स्यात्तदा स्यादेव सन्देहः। न च तथाऽस्ति। अतएव सूत्रकारोऽपि अनन्याधिपतिरिति शब्दं प्रायुङ्क्त, न त्वधिपतिरहित इति। अत्र * ब्रह्म वेद ब्रह्मैव भवतीत्येवमादयश्च मुख्यार्थत्यागमसहमाना भवत्पक्षेण परमसाम्यश्रुतयो वा निस्संकोचत्वमभिलषन्त्यः सहकारिण्यो भवेयुः। आदिभरतमृगत्वप्राप्तिवत् कृशोदरीनीडनिहितस्य कीटस्य कृशोदरीत्ववच्च ब्रह्मोपासकस्य ब्रह्मतापत्तिश्च युक्ता। न चास्य मुख्यब्रह्मत्वे * यतो वा इमानीत्यादिलक्षणस्याव्याप्तिः, तस्य जगद्व्यापारजागरूकजिज्ञास्यव्यक्तिविशेषविषयतया विरोधाभावात्। कारणब्रह्मविषयैकाद्वितीयादिशब्दोऽपि विभक्तनामरूपकार्यबहुत्वाभावाधिष्ठात्रन्तरनैरपेक्ष्यादिकमेव दर्शयतीति भवद्भिरेव व्याख्यातम्। अन्यथा नित्यसूरिपरिग्रहाद्ययोगात्। न च समनिषेधश्रुतिबलात् परमसाम्यश्रुतेस्संकोचः, पारम्यविशेषणविरोधप्रसङ्गात्। न च भोगमात्रसाम्यपारम्याच्चरितार्थता, स्वतन्त्रपरतन्त्रयोर्भोगसाम्यासम्भवेन स्वातन्त्र्यसाम्यस्यापि नान्तरीयकत्वात्। अनिच्छया जगद्व्यापारविरहरूपवैषम्यं तु न भोगवैषम्यहेतुः, इच्छाविघातादिप्रसङ्गाभावात्। अतस्सिद्धं मुक्तानामीश्वराद्भेदे सत्यपि तदपेक्षया पारतन्त्र्यासम्भवादैक्ये साम्ये वा पारम्यविशेषिते विभूतितद्वद्भावेन मुक्तेश्वरयोस्सामानाधिकरण्यमनुपपन्नमिति।

अत्रोच्यते—न वयं सर्वत्रैकरूप्यमन्विच्छामः, यावद्बाधं तदभ्युपगमात्। अचेतनेश्वरयोः क्षेत्रज्ञेश्वरयोश्च सामानाधिकरण्ये विभूतितद्वद्भावेनैकरूप्यस्य बाधकाभावात्तदभ्युपगच्छामः। ब्रह्मैव भवतीत्यत्र तु फलनिर्देशरूपतया पूर्वसिद्धस्य प्राप्यत्वाभावाच्च विभूतित्वातिरिक्तः कश्चिदर्थस्सामानाधिकरण्यहेतुरित्यास्थेयम्, स च * परमं साम्यमुपैतीति श्रुत्यन्तरानुसारेण परमसाम्यापत्तिरूप इति निश्चीयते। अतो गौणोऽयं प्रयोगः * वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमान् लोकानभिजयतीतिवत्। नहि तत्र पश्वालम्भनमात्राद्विष्णुतादात्म्यमुपपद्यते। एवम् * विष्णुक्रमान् क्रमते विष्णुरेव भूत्वेमान् लोकानभिजयतीत्यादि भाव्यम्। एवकारश्चोपमाद्योतक इत्यपि कैश्चित्पूर्वैर्व्याख्यातम्। * इववद्वैवमेवेति नैघण्टुकाश्च पठन्ति। अतो गौणतया मुख्यतया वा ब्रह्मसाम्यमेवात्र प्रयोगे विवक्षितम्। अस्तु वा ब्रह्मविभूतित्वमेवात्रापि सामानाधिकरण्यहेतुः, तथापि तदाविर्भावविवक्षया प्राप्यत्वोपपत्तिः। यत्तत्रोक्तं शाब्दत्वाभावादिति; तत्स्वपक्षमपरामृश्योच्यते, भवत्पक्षेऽपि हि नित्यं ब्रह्मभूतस्य को नामापूर्वब्रह्मभावः। अरोपिताकारनिवृत्तिर्वा ब्रह्मस्वरूपत्वप्रकाशो वेति चेत्; न तर्हि तत्रैव शाब्दत्वम्, साक्षाद्ब्रह्मभावस्य नित्यसिद्धत्वेन साध्यत्वायोगात्। अशाब्दोऽपि साध्यः कश्चिदर्थो विवक्षित इति कल्प्यत इति चेत्; हन्त तर्ह्यस्मदुक्ते कः प्रद्वेषः? नूनं प्रमाणोपपत्तिशतविरोधमप्यनादृत्य नित्यनिर्दोषस्य ब्रह्मण एवाज्ञत्वसंसारित्वादिकमङ्गीक्रियत इत्ययमेव भवतो लाभः। अस्मदुक्तार्थे तु * पतिं विश्वस्य, * करणाधिपाधिपः * यस्यात्मा शरीरम्, * दासभूतास्स्वतस्सर्वे ह्यात्मानः परमात्मनः इति श्रुतिस्मृत्यादिकमप्यनुग्राहकं भवति। यदुक्तं पारतन्त्र्यशेषत्वयोरपुमर्थान्वितत्वमिति; तत्र किं ताभ्यां तदपि साध्यते? उत तदभ्युपगमे तत्प्रसङ्गमुखेन तद्विपर्ययेण तद्विपर्यय इति? तत्र न तावत्तत्साधनम्, कालात्ययापदिष्टत्वात्। तथाहि—मुक्तोऽपि कदाचिद्दुःखी, चेतनत्वे सति परतन्त्रत्वात्, शेषत्वाद्वा, सम्प्रतिपन्नवत्; मुक्तगतं पारतन्त्र्यं शेषत्वं वा स्वाश्रयस्य कदाचिद्दुःखावहम्, चेतनगतपारतन्त्र्यादिरूपत्वात्, सम्प्रतिपन्नवत्; ईश्वरो मुक्तानामपि इच्छाविघातानिष्टापादनादिभिः

कदाचिद्दुःखहेतुः, तदपेक्षया तदानीमपि स्वातन्त्र्यादियोगित्वात्, यो यच्चेतनापेक्षया उक्तसाधनः स तद्दुःखहेतुः, यथा सम्प्रतिपन्नः, इत्यादिर्हि तत्र प्रयोगस्स्यात्। तत्र तावत् सर्वत्र मुक्तस्य दुःखरहितनिरतिशयानन्दविधायकैः * अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः, * रसँ ह्येवायं लब्ध्वाऽऽनन्दी भवतीत्यादिभिः श्रुतिशतैर्बाधस्सुगमः। उपाधिश्च कर्मवश्यत्वं दुष्कर्ममूलत्वं दुष्कर्मजनिताप्रीत्यादिदुःखकारणयोगित्वमित्यादिरूह्यः।

किंच मुक्तः कदाचिद्दुःखीत्यत्र प्राच्यदुःखित्वेन सिद्धसाधनम्, मुक्तिदशायां दुःखवानिति साध्ये दृष्टान्तस्य साध्यविकलता, एवं पारतन्त्र्यपक्षीकारेण प्रयोगेऽपि तस्य यावदात्मभाविन एकत्वात् प्राचीनदुःखहेतुत्वेन सिद्धसाधनता, मुक्तिदशायां दुःखावहमिति साध्ये पूर्ववत्साध्यवैकल्यम्। एवमीश्वरो मुक्तानां दुःखहेतुरिति साध्येऽपि प्राचीनदुःखहेतुत्वेन सिद्धसाधनत्वम्, मुक्तिदशायां दुःखहेतुरिति साध्ये साध्यवैकल्यं च सिद्धम्। ननु यत्काले पारतन्त्र्यं तत्काले दुःखहेतुत्वं व्याप्तमिति मुक्तिकालवर्तिनोऽपि पारतन्त्र्यस्य सामान्यव्याप्तिबलादेव पक्षधर्मतासहकृतात्तत्कालवर्तिदुःखहेतुत्वं सिध्यति, अतो न वैकल्यं सिद्धसाधनत्वं चेति; तदपि मन्दम्, किं यत्काले पारतन्त्र्यं तत्काले सर्वत्र दुःखहेतुत्वं व्याप्तिसिद्धम्, उतात्यन्तायोगव्यवच्छेदमात्रम्, उत दुःखसम्भावनामात्रमिति? न प्रथमः, व्यभिचारात्; नहि पतिप्रभृतीनां परतन्त्रा भार्यापुत्रदासादयः, सर्वे सर्वदा ततो दुःखिनो दृश्यन्ते, प्रत्युत पारतन्त्र्यमेव परमं भूषणमभिमन्यमानाः केचित्सद्भृत्यपुत्रादयः स्वातन्त्र्यनिर्देशेऽपि रोषलोहितचक्षुषः परिवाराभिमानिनो विमन्यन्ते। अतस्तेषु स्वातन्त्र्यमेवानिष्टतमम्, पारतन्त्र्यं त्विष्टतममेव दृश्यते। यदाऽपि च तस्य किंचिद्दुःखहेतुत्वम्, तदाऽपि तदनुबन्धित्वादेव तद्दुःखं सहन्ते। भ्रान्तिमूलं तदिष्टत्वमिति चेत्; हन्त स्वातन्त्र्यस्य वाऽन्यस्य वा कस्यचिच्छब्दादेरिष्टत्वमपि भ्रान्तिमूलमेव। सांसारिकं हि सर्वं भोगजातमन्ततो भ्रान्तिमेव कूटस्थयति। स्वयं दुःखस्वरूपत्वेऽपि इष्टान्तरप्रतिलम्भकत्वात् पतिपारतन्त्र्यादेरिष्टतमत्वम्, यथा कृषिचिकित्सादेरिति चेत्; तर्हि स्वातन्त्र्यस्यापि स्वयं सुखत्वाभावेऽपीष्टान्तरप्रतिलम्भकत्वादेवेष्टतमत्वमपि स्यात्। नियमनमात्रमपि केभ्यश्चित्स्वदत एवेति स्वातन्त्र्यस्य स्वतस्सुखत्वमिति चेन्न; तृणाद्युत्क्षेपणादिस्वातन्त्र्यस्य तथाविधसुखत्वादर्शनात्। यत्र तु स्वातन्त्र्यं स्वरूपेण सुखवद्दृश्यते, तत्रापि ख्यात्यादिकमन्तर्भाव्यैव तत्तथा। तच्च क्वचित्पारतन्त्र्येऽपि समानमिति तस्यापि स्वतस्सुखत्वसिद्धिस्स्यात्। अतो यत्रेष्टसाधनत्वबुद्धिर्गुणताभिमानो वा, तत्स्वातन्त्र्यं पारतन्त्र्यं वेष्टतमम्, यत्र त्वनिष्टसाधनत्वबुद्धिर्दोषत्वाभिमानो वा, तत्र तु तद्वा तदन्यद्वाऽनिष्टतममविशेषाद्दृश्यते। अतः पारतन्त्र्यस्य स्वसत्ताकाले सर्वत्र दुःखहेतुत्वव्याप्तिर्न सिध्यति। नापि द्वितीयः, निर्दोषभृत्यस्य गुणवत्पाररतन्त्र्यादिभिर्व्यभिचारात्। तत्र पारतन्त्र्यस्य स्वाभाविकं दुःखहेतुत्वं गुणवत्प्रतिसम्बन्धित्वादिवशादपोद्यत इति चेत्; तर्हि पारतन्त्र्यस्य दुःखहेतुत्वमपि दुष्टप्रतिसम्बन्धिकत्वादिनैवेति किं न स्यात्? गुणवत्प्रतिसम्बन्धिकत्वेऽपि तस्य क्वचिद्दुःखहेतुत्वदर्शनादिति चेत्; तर्हि तस्यापवादकत्वमपि न स्यात्। निर्दोषभृत्यस्य तदपवादकमेवेति चेन्न; तथाऽपि पारतन्त्र्यस्य सुखहेतुत्वं दुष्टप्रतिसम्बन्धिकत्वादिनाऽपोद्यत इति विपरिवर्तस्य दुष्परिहरत्वात्। एतदुक्तं भवति—स्वातन्त्र्यं पारतन्त्र्यमिति न कश्चिद्विशेषः सुखदुःखसम्भवे, अपि तु भोगादृष्टादिकमेव नियामकमिति। किंच तत्तद्देहात्माभिमानानुगुण्येन देवतिर्यङ्मनुष्यस्त्रीपुंसादिषु पुरुषार्थव्यवस्थादर्शनादत्रापि स्वतन्त्रात्माभिमानिनां पारतन्त्र्यं दुःखाय, परतन्त्रयथावस्थितात्मदर्शिनां पारतन्त्र्यमेव सुखकारणमिति यथालोकमनुसन्धेयम्। अतः पारतन्त्र्यस्य दुःखात्यन्तायोगव्यवच्छेदः उपाधिमूलत्वादुपाधिनिवृत्तौ निवर्तेतैवेति न मुक्ते तत्साधनम्। नच तृतीयः, स्वरूपयोग्यत्वमात्रसाधने

सिद्धसाधनात् ; सहकारियोग्यत्वस्य संशयस्य वा साधने कालात्ययापदेशात् । नापि प्रसङ्गतद्विपर्ययाभ्यां मुक्तस्य पारतन्त्र्याभावसाधनम्, तत्रापि व्याप्तेरवश्यम्भावात् तस्याश्च दूषितत्वादिति । अतः * सर्वं परवशं दुःखमित्यादिकमपि संसारिविषयम् । * सेवा श्ववृत्तिर्व्याख्यातेत्येतदप्यसेव्यसेवाविषयम् ।

स्वातन्त्र्यमपि दुःखाय स्वाङ्गुलिच्छेदनादिषु । पारतन्त्र्यं सुखायैव पत्नीनां तु स्वभर्तृषु ॥ स्वातन्त्र्यं सुखहेतुः स्यादिति चेद्भवतोच्यते । न कथं सुखशाली स्यात्कीलोत्पाटी स वानरः ॥ अयोग्यपारतन्त्र्यं हि दुःखायेति निषिध्यते । भगवद्दास्यमेवाहुर्लास्यहेतुं मनीषिणः ॥ ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी । इत्यादिकानुसन्धानमासुरं भावमाह हि ॥ हिरण्यासुरसिद्धान्तसिद्धामीश्वरभावनाम् । भावयन्तोऽवलम्बन्ते हरिदास्यविडम्बनम् ॥ हरिदासस्य राजर्षेरिति तन्मुनिभाषितम् । दासोऽहं कोसलेन्द्रस्येत्यादिसंवादमृच्छति ॥ परतन्त्रान्वयाभावे स्वातन्त्र्यं ब्रह्मणः कथम् । अस्वातन्त्र्ये कथं सौख्यमात्मनो निर्गुणस्य ते ॥ स्वातन्त्र्यपारतन्त्र्याभ्यां सुखं वा दुःखमेव वा । न व्याप्तं हि यतस्तत्तत्प्रमाणानुगुणं द्वयम् ॥ * स स्वराड्भवति * अत एव चानन्याधिपतिरिति श्रुतिसूत्रे अपि दुःखहेतुकर्माधीनपारतन्त्र्यप्रतिक्षेपपरे एव, आत्मतत्त्वस्य शरीरत्वविधायकश्रुतिबलात्स्वतोदासत्वस्मृतेश्च तत्सङ्कोचोपपत्तेः प्रपञ्चयिष्यमाणत्वात् । * सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्तेइ त्यत्रावधारणेनापि तत्तत्कार्यहेतुतया तथा प्रसिद्धकारकव्यापारादिनैरपेक्ष्यमेवोच्यते, न पुनरीश्वरव्यापारनैरपेक्ष्यम्, तथा सति चास्यैव सङ्कल्पादिति निर्देशेन भवितव्यम् । व्युत्क्रमेणान्वये स एव दोषः । न चेश्वरसङ्कल्पसापेक्षतामात्रेण सत्यसङ्कल्पत्वश्रुतिविरोधः । ईश्वरस्य तत्सङ्कल्पानुगुणसङ्कल्पयोगित्वात् । एतेन कामचारश्रुतिः * सङ्कल्पादेवेति सूत्रं च निर्व्यूढम् ।

यत्तु स्वतन्त्रस्याप्यनिच्छतो जगद्व्यापारनिवृत्त्युपपत्तिरिति ; तदसत्, मुक्तस्य सर्वगोचरशक्तिसद्भावे प्रमाणाभावात् । न च मातापितृप्रभृतिसृष्टिवचनात्सर्वविषयशक्तिक्लृप्तिः, तन्मात्रसृष्टिशक्तेरेव सिद्धेः । नच * यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठतीति सामान्यवचनात्सर्वशक्तित्वसिद्धिः, यं कामं कामयत इत्यस्यानुवादकत्वात् , तस्यच काम्यमानमात्रविषयत्वात्, मुक्तस्य कामनायाः सर्वविषयत्वे प्रमाणाभावात् । विश्वामित्रादिसङ्कल्पवत्सङ्कुचितविषयत्वेनापि तत्सिद्धेः । ईश्वरस्य तु * सोऽकामयत, बहुस्यामित्यादिभिस्तत्सिद्धेः । मुक्तस्य तु कामनायां सत्यां जगद्व्यापारविरहायोगात् । शक्तस्य चिकीर्षा हि व्यापाराविनाभूता । अशक्तस्य कामना दुःखहेतुरेव । नच * स एकधा भवतीत्यारभ्य, * अपरिमितधा भवतीति श्रुतेर्मुक्तस्य जगद्व्यापारोऽपि संभवतीति वाच्यम् ; तस्याः श्रुतेः परमात्मभोगशेषभूतस्वभोगार्थानन्तशरीरपरिग्रहमात्रविषयत्वात् । यत्तु मुक्तकर्तृकभोगनिर्माणे मुक्तेश्वरयोः प्रयोज्यप्रयोजकभावे प्रमाणाभावः, पूर्वोक्तश्रुत्यादिविरोधश्चेति ; तत्र विरोधः परिहृतप्रायः । प्रमाणमपि समर्थयिष्यमाणनियन्तृत्वादिश्रुत्यसङ्कोचः । अत एवेश्वरानिवारणान्मुक्तप्रवृत्तौ विपरिवर्तप्रसङ्गोऽपि प्रत्युक्तः ।

यत्तु कर्मनिवृत्तौ पारतन्त्र्यमपि निवर्तत इति ; तत्र किं कर्माधीनस्य पारतन्त्र्यस्य निवृत्तिर्विवक्षिता, उत पारतन्त्र्यमात्रस्य ? पूर्वत्रेष्टापादनम् । तदतिरिक्तं पारतन्त्र्यं जीवेषु न दृष्टमिति चेन्न ; समर्थयिष्यमाणत्वात् । संसारिणामीश्वरपारतन्त्र्यं कर्महेतुकम्, कर्मफलभोगहेतुत्वात्, राजादिपारतन्त्र्यवदिति चेन्न ; नित्यैरेव तद्धेतुभूतैर्जीवपरस्वरूपादिभिरनैकान्त्यात् । नच तेषां तादर्थ्यनियमाभावान्नानैकान्त्यमिति वाच्यम्, ईश्वरपारतन्त्र्यस्यापि तादर्थ्यनियमानिश्चये-

नासिद्धिप्रसङ्गात्। कार्यत्वे सतीति विशेषणे विशेषणासिद्धेः। कार्यपारतन्त्र्यपक्षीकरणे सिद्धसाधनात्। उत्तरत्राचेतनेष्वनैकान्त्यम्। चेतनगतं पारतन्त्र्यं कर्मव्याप्तमिति तन्निवृत्त्या तन्निवृत्तिरिति चेन्न ; तथाऽप्यप्रयोजकत्वात्। मुक्तो न परतन्त्रः, चेतनत्वे सत्यकर्मवश्यत्वादीश्वरवदिति हि तदा प्रयोगः, तत्रेश्वरत्वमेवोपाधिः। न चेदं पक्षेतरत्वम्, अचेतनानां संसारिचेतनानां च पक्षव्यतिरिक्तानां व्यवच्छेद्यानां सिद्धेः। न च पक्षेतरत्वमित्येतावता परित्यागः, बाधे सति तस्याप्युपाधित्वस्य क्वचित्स्वीकारात्। अग्नेरनुष्णत्वसाधने पदार्थत्वेनाग्नित्वमेवोपाधिमाहुः। मुक्त ईश्वरपरतन्त्रः, अनीश्वरत्वात्, सम्प्रतिपन्नवदिति प्रत्यनुमानं च। न चात्र मुक्तेतरत्वमुपाधिः, ईश्वरे तस्य व्यभिचारात्। नापि मुक्तेश्वरव्यतिरिक्तत्वमुपाधिः, मुक्ते पारतन्त्र्यस्य बाधकाभावेन तद्व्यतिरेकस्याप्युपाधिकुक्षिनिक्षेपायोगात्। अन्यथा पक्षविपक्षव्यतिरिक्तत्वमुपाधिरिति सर्वानुमानभङ्गप्रसङ्गात्। निर्विशेषणत्वाच्च। प्रत्यनुमानबलीयस्त्वं वा। अतः कर्मनिवृत्तावपि मुक्तस्य पारतन्त्र्यनिवृत्त्ययोगात् * स स्वराड् भवतीत्यत्राकर्मवश्यत्वविवक्षायां न स्वरूपप्रयुक्तपारतन्त्र्यनिवृत्तिः फलति। यत्तु * स स्वराड् भवतीत्येवम्भूतव्यपदेशसामर्थ्यात् * पतिं विश्वस्येत्यादिश्रुतीनां सङ्कोच इति ; किमस्य सामर्थ्यम्? स्वाधीनत्वप्रतिपादनं वा? पराधीनत्वनिवृत्तिपर्यवसितत्वं वा? नाद्यः, स्वाधीनत्वमात्रस्येश्वराधीनत्वेन सह विरोधाभावात्। एकस्यैवानेकाधीनत्वं हि लोकवेदयोर्दृष्टम्। जीवेश्वराधीनं हि क्षेत्रज्ञशरीरम्। स्वाधीनत्वं चात्र स्वसङ्कल्पाधीनप्रवृत्त्यादियोगित्वम्, तच्चेश्वरानुमत्या सिध्यत्येव। न द्वितीयः, कर्माधीनत्वनिवृत्तिमात्रादपि तदुपपत्तेः। स्वेतरसमस्ताधीनत्वनिवृत्तिस्तात्पर्यतो लभ्यत इति चेन्न ; स्वेतरसमस्तापेक्षया ईश्वरत्वस्य परमात्मन्यपि * सर्वस्येशानः इत्यादिभिश्शब्दत एव सिद्धेः। एवमपि सन्देहे मुक्तस्य पारतन्त्र्यं न सिध्यतीति चेन्न ; शाब्दत्वेनाविलम्बितप्रतीतसर्वेश्वरत्ववशादेवार्थत्वेन विलम्बितप्रतीतानन्येश्वरत्वस्यैव सङ्कोचोपपत्तेः। भूयसां न्यायाच्च। भूयांसि वाक्यानि परमात्मनस्सर्वेश्वरत्वं विदधति। * स स्वराड् भवतीत्येकमेव मुक्तस्यानन्येश्वरत्वं विवक्षतीति ततोऽप्यस्यैव सङ्कोचो युक्तः। श्रुतिस्मृतीतिहासेषु पुराणेषु च सर्वतः। सर्वोत्तरागमेष्वेवं विष्णोस्स्वातन्त्र्यमुच्यते॥

* सङ्कल्पादेवेत्यादिकं तु नान्याधीनत्वं प्रतिक्षेप्तुमलमिति प्रागेवोक्तम्। * यस्यात्मा शरीरमित्यात्मतत्त्वस्य शरीरत्वविधानात् शरीरत्वस्य चाधेयत्वविधेयत्वशेषत्वस्वभावरूपत्वादपि तत्सङ्कोचो न्याय्यः। उपबृंहणानुसाराच्च। *आत्मदास्यं हरेस्स्वाम्यं स्वभावं च सदा स्मर। *दासभूतास्स्वतस्सर्वे ह्यात्मानः परमात्मनः। इत्यादिभिः स्वाभाविकं भगवद्दास्यमभिधीयते, स्वभावं, स्वत इति च कण्ठोक्तितः, दासभूता इति च्विप्रत्ययमन्तरेण प्रयोगाच्च। तत्रैवादरातिशयाद्धि स्वत इत्यप्यनूद्यते, दासभूता इति निरुपाधिकनिर्देशेनैव स्वतस्त्वसिद्धेः। सर्वशब्दश्चात्र न मुक्तबहिष्कारं क्षमते, प्रतिनिर्देशसामर्थ्याच्च। * अन्यराजानस्ते क्षय्यलोका भवन्तीत्यविदुषां क्षय्यलोकत्वकारणमन्यराजत्वमुच्यते, तच्च निष्कर्षे कर्माधीनत्वमेव, तन्निवृत्तिश्च विदुषः * स स्वराड्भवतीति विवक्षिता। अतोऽपि कर्मवश्यत्वमात्रमेवात्र निषिध्यत इति न स्वाभाविकभगवद्दास्यनिषेधः। अन्यथा *पतिं विश्वस्येत्यादिप्रमाणेन विरोधः। एतेन अनन्याधिपतिरिति सूत्रमपि निर्व्यूढम्। एवं बद्धमुक्ताविशेषेण शेषशेषिभावादिभेदे जीवेश्वरयोस्स्वाभाविके स्थिते तदविरोधेन * ब्रह्मैव भवतीत्यादीनाम्, * अविभागेन दृष्टत्वादिति मुक्तविषयसूत्रस्य च विभूतित्वाविर्भावादिमुखेन निर्वहणं प्रागुक्तन्यायेन भाव्यम् ; ऐक्यापत्तिब्रह्मद्वित्वयोर्भेदश्रुत्या समाधिकराहित्यश्रुत्या च प्रतिक्षेपात्। समनिषेधो हि केन चिदाकारेण सर्वातिशायित्वं प्रथयति। तथाच लक्षणवाक्यस्वारस्यम् ; स्वेतरसमस्तवस्तुव्यावर्तकत्वाल्लक्षणस्य। नच परमसाम्यश्रुत्यसङ्कोचाय

मुक्तस्यापीश्वरत्वमङ्गीकार्यमिति द्वयोस्सर्वप्रकाराविशेषादैक्यमभिलषितुं शक्यम्, * भोगमात्रसाम्यलिङ्गाच्चेति भगवता सूत्रकारेणैव तत्परिहारात्। आह च वृत्तिकारः—* जगद्व्यापारवर्जं समानो ज्योतिषेति। द्रमिडभाष्यकारश्च * देवता-सायुज्यादशरीरस्यापि देवतावत्सर्वार्थसिद्धिस्स्यादिति। ज्ञानानन्दयोरत्यन्तसाम्यादपि हि परमसाम्यशब्दश्चरितार्थः। सर्वज्ञ-त्वनिरतिशयानन्दत्वे हि तत्र तत्र मुक्तस्यापि वाक्यान्तरैः प्रतिपाद्येते इति सर्वगुणसाधारणरूपपरमसाम्यशब्दस्तत्रैव पर्यव-सितुमर्हति। पारम्यविशेषणं च तत्रत्याल्पसादृश्यव्यवच्छेदेन सप्रयोजनम्। यथा दशवर्णषोडशवर्णस्वर्णनिष्कयोः काञ्चनकलधौतनिष्कयोर्वा परमसाम्योक्तौ परिमाणवैषम्यमात्रं निषिध्यते, नतु वर्णवैषम्यम्।

यत्तु स्वतन्त्रपरतन्त्रयोर्भोगसाम्यासम्भवेन मुक्तस्यापि स्वतन्त्रत्वमिति; तदसत्, स्वातन्त्र्यपारतन्त्र्ययोर्भोगा-प्रयोजकत्वस्य प्रागेव स्थापनात्। यथावस्थितात्मानुसन्धानानुगुण्येन स्वतन्त्रस्य स्वातन्त्र्यं परतन्त्रस्य च पारतन्त्र्यमनुकूलं भवतीति द्वयोरपि यथावस्थितात्मानुसन्धानानुबन्धिभोगस्याविशेषात्। पुत्रस्य पितृपारतन्त्र्यमेव स्वस्वातन्त्र्यादपि प्रीतिं जनयति। विभूतिमत्त्वजगद्व्यापारादिभिरीश्वरानन्दो मुक्तानन्दातिशयितस्स्यादिति चेन्न; स्वाभाविकदास्यानुसन्धायिनः सद्भृत्यस्य स्वाम्यैश्वर्येणेव मुक्तस्यापि परमात्मविभूतिभिरेव निरतिशयानन्दोदयात्। एतदुक्तं भवति—यद्यत्प्रामाणिकम् तत्तत्सर्वं मुक्तेश्वरयोर्यथावस्थिताकारेणानुकूल्येन भातीति भोगमात्रसमानता, यथा राजराजान्तरङ्गयोस्सर्वमपि राजैश्वर्यमा-नुकूल्येन साधारणमेवेति। तदेवं चेतनाचेतनयोरिव जीवेश्वरयोरपि यावदात्मभाविनि भेदे सिद्धे तद्भेदस्य मिथ्यात्वम्, औपाधिकत्वम्, स्वाभाविकत्वेऽपि अभेदसहत्वं वा वदतां कलिब्रह्ममीमांसकानां वेदान्तेषु न कश्चिदवकाशो दृश्यत इति स्थिते तार्किकरञ्जनार्थं ब्रूमः—ब्रह्म सत्येनात्मना सद्वितीयम्, पदार्थत्वात्, घटवदित्यादिभिर्मायावादिनो मुखपिधानम्। जीवः ईश्वरादनौपाधिकभेदवान्, सार्वज्ञ्यरहितत्वात्, घटवदित्यादिभिर्भास्करतिरस्कारः। ईश्वराहम्भावोऽपि विच्छेदर-हितनित्याहम्भावान्तरसद्वितीयः; अहम्भावत्वात्, सम्प्रतिपन्नजीवाहम्भाववदिति यादवप्रकाशपिशाचवित्रासनम्। ईश्वरा-हम्भावस्य नित्यत्वाभावात् दृष्टान्तस्य साध्यविकलतेति चेन्न; तथा सतीश्वरस्य कदाचित् अचित्कल्पत्वादिप्रसङ्गात्। न चायमिष्टप्रसङ्ग इति वाच्यम्, सर्वज्ञत्वादिश्रुतीनां कालावच्छेदाभावात्। न च सर्वज्ञ इत्यादिशब्दाश्शक्तिविषयाः, अनुशासनस्य * शक्तौ हस्तीत्यादिना नियतविषयत्वात्। * पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति ज्ञानशक्त्योः पृथक्स्वाभाविकत्ववचनाच्च। न च प्रलयादिषु निद्रानिर्देशात् कदाचिदज्ञता, तस्य निर्व्यापारदशा-मात्रविषयत्वात्, * व्यपगतनिद्राभयक्रोधतन्द्रिरित्यादिश्रुत्यनुसारात्। न चावतारेष्वज्ञानादि दृष्टमिति वाच्यम्, तस्या-भिनयरूपत्वात्। उक्तं हि महाभारते—* कालस्य हि च मृत्योश्च जङ्गमस्थावरस्य च। ईशते भगवानेकस्सत्यमेत-द्ब्रवीमि ते॥ ईशन्नपि महायोगी सर्वस्य जगतः प्रभुः। कर्माण्यारभते कर्तुं कीनाश इव दुर्बलः॥ तेन वञ्चयते लोकान्मायायोगेन केशवः। ये तमेव प्रपद्यन्ते न ते मुह्यन्ति मानवाः॥ इति। न च *सदेवेत्यादिवशात्प्रलयदशायां गुणादेरपि विलयः, चिदचिदीश्वरशक्तित्रयस्यापि विलयप्रसङ्गेन पुनस्सृष्ट्याद्यभावप्रसङ्गात्। सद्विद्यानिरूपणेनैव * सदेवे-त्यादेर्निर्विशेषपरत्वप्रतिक्षेपात्। अतः स्वाज्ञानमेव कुमतीनामविद्योपाध्यवस्थाविशेषादिप्रयुक्तमीश्वराज्ञानकल्पनम्। तदेव-मभेदगन्धासहवैधर्म्यशतप्रतिष्ठितो यावदात्मभावी जीवेश्वरभेदः। स्वदुःखं यदि जानाति नारभेत परः पुमान्। यदि नैव विजानाति नारभेत पुनः पुमान्॥ तदेतत्सर्वं * विभेदजनकेऽज्ञाने इति श्लोकमुपक्षिप्य भाष्ये प्रपञ्चितम्।

॥ इति शतदूषण्याम् जीवेश्वरैक्यभङ्गवादः सप्तत्रिंशः ॥ ३७ ॥

॥ अथ अखण्डवाक्यार्थखण्डनवादः अष्टत्रिंशः ॥ ३८ ॥

ज्ञानानन्दगुणोपेतं ज्ञानानन्दमयं महः । पायादपायाद्भवतो भवबन्धविधायकात् ॥

सत्यज्ञानादिभिर्वाक्यैरखण्डं बोध्यमिच्छताम् । अहं करोमि मूर्खाणामहङ्करणखण्डनम् ॥

यत्तु जल्पन्ति विगीतं वाक्यमखण्डार्थपरम्, समानाधिकरणवाक्यत्वात्, सोऽयं देवदत्त इत्यादिवाक्यवदिति । अत्र किमिदमखण्डार्थपरत्वम्? निरवयवार्थपरत्वं वा ? अच्छेद्यार्थपरत्वं वा? निर्विशेषणपरत्वं वा? विशेष्यमात्रपरत्वं वा? निर्भेदार्थपरत्वं वा? भावरूपविशेषणरहितपरत्वं वा? एकविशेष्यपरत्वं वा? अन्यद्वा किंचित्? इति । न प्रथमद्वितीयौ, सिद्धसाधनात्; दृष्टान्तस्य साध्यविकलत्वाच्च । न हि देवदत्तपिण्डस्य निरवयत्वमच्छेद्यत्वं वा भवताऽभ्युपेतम् । नापि सोऽयं देवदत्त इति वाक्यादपि तथा प्रतीतिः । दृष्टान्तान्तरोपादानेऽपीह दुस्तरो व्यभिचारः । न तृतीयः, तत्र निर्विशेषणत्वमपि किं शब्दबोध्यत्वेनाभिमतम्? उत वस्तुगत्या? आद्ये निर्विशेषणत्वमपि लक्षणविशेषणविशिष्टार्थबोधनादविशिष्टार्थबोधकत्वाभिमानभङ्गः । निर्विशेषणत्वं न विशेषणम्, अपि तु स्वरूपमेवेति चेत्; न, स्वरूपस्य सम्प्रतिपन्नत्वेनासाध्यत्वात् । तदा ह्यर्थपरमित्येतावदेवोक्तं स्यात्, तथा च सिद्धसाधनता । तत्परिहारार्थं तर्ह्यखण्डविशेषणमिति चेत्; किं पर्यायपदोपादाने सिद्धसाधनताऽपैति? अखण्डपरमित्येतावत्प्रयुञ्जानो न चोद्येतेति चेत्; तदपि दत्तोत्तरम्, यत्किंचिदर्थपरमिति विवक्षिते सिद्धसाधनात्; विशेषणाभावविशिष्टपरमिति पूर्वोक्तविरोधात् । द्वितीये तु सगुणब्रह्मप्रतिपादकस्य वाक्यस्य न कश्चिद्विशेषः । तदपि हि वस्तुगत्या निर्विशेषणमेव वक्ति भवतः । विशेषणप्रतिपादनाप्रतिपादनाभ्यां वैषम्यमिति चेत्; न, प्रातीतिकप्रतिपादनस्य परमार्थतोऽप्रतिपादनस्य चोभयत्रापि समानत्वात्; अस्मन्मते वस्तुतस्सविशेषणेऽपि देवदत्तश्श्यामो युवेत्यादिवाक्यानां प्रवृत्तिदर्शनात्, दृष्टान्तस्य साध्यविकलत्वाच्च । त्वन्मतेन तु व्यधिकरणवाक्यानामपि परमार्थतो विशेषणशून्यार्थविषयत्वेन हेतुविशेषणवैयर्थ्यम् । न चतुर्थः, विशेष्यस्वरूपस्यैव मात्रशब्देनोपादाने सिद्धसाधनत्वात्; अतिरिक्तोपादाने विवक्षितासिद्धेः । पदप्रतिपन्नविशेषणत्यागस्तेन विवक्षित इति चेत्, स किं वाच्यत्वेन विवक्षितः? उत तत्राविद्यमानतामात्रेण? उत विशेषणानां बोधनव्यापारागोचरत्वेन? आद्ये बोध्यवैशिष्ट्यप्रसङ्गः, सत्यपदस्यासत्ये तात्पर्यमिति व्याहतवर्णनप्रसङ्गश्च । साध्यवैकल्यञ्च, तदिदंशब्दयोस्तत्तेदन्ताभावप्रतिपादकत्वाभावात् । द्वितीयेऽपि पूर्ववत् सगुणब्रह्मवाक्यसमानतया तेषामप्यखण्डपरत्वप्रसङ्गः, साध्यवैकल्यं च, देवदत्तस्य कालद्वयसम्बन्धाभावे क्षणिकत्वप्रसङ्गात् । तृतीयेऽपि किं सर्वेषां तथाविधबोधनव्यापारागोचरत्वमभिमतम्? उत निरूपकाणाम्? नाद्यः, भवदभिमततर्कानभिज्ञानां तदभिज्ञत्वेऽपि तदविश्वासिनां च तद्विशेषणविशिष्टप्रतीतेः । न द्वितीयः; असिद्धेः, अनुपपत्त्यभावस्य वक्ष्यमाणत्वात्; नापि पञ्चमः, व्यावृत्तिपरत्ववर्णनस्यापि निर्मूलत्वप्रसङ्गात् । अनृतजडपरिच्छिन्नव्यावृत्तिपरतया हि पदत्रयव्यावृत्तिरभिमता । सजातीयभेदराहित्यं विवक्षितमिति चेत्; न; तस्यैतच्छब्दप्रतिपाद्यत्वाभावात् विशेषणविशिष्टत्वेऽपि तत्सिद्ध्यविरोधाच्च, पूर्ववच्च साध्यवैकल्यं स्यात् । जडादिभेदस्य मिथ्यात्वाभ्युपगमे अन्यत्रोत्तरमुक्तम् । न च षष्ठः, भावरूपविशेषणदूषकाणां तर्काणामभावरूपविशेषणैस्सह का पैतृष्वस्रीयता? तैरपि सम्बन्धाभावात् ।

तथा च—भावो यथा तथाऽभावो निर्विशेषत्वबाधकः। अबाधकत्वे भावेऽपि बाधकत्वकथा मुधा॥ वाक्यार्थस्य सखण्डत्वं भावेन यदि जायते। अभावेनापि जायेत सखण्डत्वमखण्डितम्॥ भावान्तरमभावो वा यद्वा भावान्तराधिकः। न खण्ड्यते सखण्डत्वं द्वयोरपि च पक्षयोः॥ देवदत्तः श्यामो युवेत्यादिभिरनैकान्त्याच्च। प्रत्यक्षबलात्तत्र वैशिष्ट्यम्, अत्र तु शब्दैकसमधिगम्यत्वाद्यथाशब्दं व्यवस्थेति चेत्; तर्हि शब्दैकसमधिगम्यार्थविषयत्वे सति समानाधिकरणवाक्यत्वादिति हेतुस्स्यात्। तथा सति दृष्टान्तस्य साधनविकलत्वप्रसङ्गस्स्यात्। न हि सोऽयं देवदत्त इत्येतद्वाक्यमतीन्द्रियार्थविषयम्। पूर्ववत्साध्यवैकल्यं च। सप्तमस्त्वसत्पक्ष एवेति सिद्धसाधनमेव। अष्टममपि विकल्पं विकल्पयामः, तत्किं निर्विवादयत्किंचिद्बोधनमात्रादधिकम्? उतानधिकम्? आद्ये विशिष्टपरत्वमकामेनापि स्वीकार्यम्। द्वितीये तु सिद्धसाधनत्वमेव। विगीतं वाक्यमिति किं तत्त्वमसिसत्यज्ञानादिमात्रं विवक्षितम्? उत सोऽयं देवदत्त इति वाक्यव्यतिरिक्तं सर्वमपि समानाधिकरणवाक्यम्? नाद्यः, देवदत्तः श्यामो युवा लोहिताक्ष इत्यादिभिरनैकान्त्यात्। न द्वितीयः, तैरेव कालात्ययापदेशात्। न हि सोऽयं देवदत्त इत्यादिवाक्यस्येव देवदत्तः श्याम इत्यादिवाक्यस्य विरोधाभासोऽप्यस्ति। आहुश्च * सर्वस्यापि च पक्षत्वे बाध एव प्रसज्यते। अनैकान्तिकता तु स्यात् पक्षीकारे च कस्यचित्॥ वाक्यत्वादिति हेतुश्च स्वरूपासिद्धतां व्रजेत्। आकांक्षादित्रयाभावे तद्भावे काविशिष्टधीः॥ यश्चास्मिन्नेव साध्ये लक्षणवाक्यत्वात् प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवदिति प्रयोगः, सोऽप्येतैरेव दूषणैर्निरस्तप्रायः। प्रतिज्ञाहेत्वोर्विरोधश्च, लक्षणस्यासाधरणधर्मत्वात्। किञ्च प्रकृष्टप्रकाशश्चन्द्र इत्यत्र प्रकृष्टप्रकाशत्वं किं चन्द्रशब्दप्रवृत्तिनिमित्ततया विवक्षितम्? उत तदुपलक्षणतया? आद्ये चन्द्रशब्दस्य स्ववाच्यतापरत्वात् प्रवृत्तिनिमित्तभेदेन वैशिष्ट्यं स्यात्, अन्यथा चन्द्रशब्दस्य तत्रापि निष्प्रयोजनत्वप्रसङ्गात्, सामानाधिकरण्यस्यासिद्धिप्रसङ्गाच्च। न हि पर्यायेणापि सामानाधिकरण्यम्, * भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति हि तल्लक्षणम्। द्वितीयेऽप्युपलक्षणीयोपलक्षणाकारद्वयप्रतिपादनाद्वैशिष्ट्यं सुस्थितमेव। प्रतिपन्नाकारोऽप्यधिक इति प्रागेवोक्तम्। प्रकृष्टप्रकाशश्चन्द्र इतिवदित्यत्र प्रकाशमात्रविवक्षायां सर्वप्रकाशानामपि चन्द्रत्वप्रसङ्गः, तस्य तन्मात्रलक्षणत्वात्। प्रकाशविशेषविवक्षायां प्रकृष्टप्रकाशश्चन्द्र इत्यस्य विशिष्टार्थविषयत्वात् दृष्टान्तस्य साध्यविकलत्वं स्यात्; अन्यथा प्रकृष्टपदवैयर्थ्यं च। तथा गन्धवती पृथिवीत्यादिषु लक्षणवाक्येष्वनैकान्त्यम्।

अथ मन्यसे सर्वलक्षणवाक्येषु लक्ष्यपदेन स्वरूपं निर्दिष्टम्, लक्षणांशेन तु स्वेतरसमस्तव्यावृत्तिर्विवक्षिता, तेनाकारेण स्वरूपमेव वा। अस्मिन् ज्योतिर्मण्डले कश्चन्द्रः? एषु द्रव्येषु का पृथिवी? इत्यादि वदतां तत्तत्स्वरूपविषयो हि प्रश्नः, तत्र यदि प्रतिवचनं प्रकारविषयं स्यात्तदाऽन्यप्रश्ने तदन्योक्तिरित्यसङ्गतिः स्यात्। तस्मात्स्वरूपमेव वाक्यार्थः, तत्र लक्षणस्वरूपविशेषणवैशिष्ट्यमविवक्षितम्। एवं विशेषणलक्षणत्यागात् विशेष्यापरित्यागाच्च जहदजहल्लक्षणया ब्रह्मैवात्र प्रतिपाद्यम्। यद्वा कल्पितसत्तादिसामान्यस्यैव वाचकाः। जहल्लक्षणयैवैते प्रागुक्तब्रह्मबोधकाः॥ इति। तन्न, अविवक्षितमिति किमबोध्यत्वं विवक्षितम्? उतान्यार्थबोध्यत्वम्? नाद्यः, लक्षणवैशिष्ट्याप्रतिपत्तौ व्यावृत्तेरप्यसिद्धेः। न हि गन्धवत्त्वमन्तरेण पृथिव्यां व्यावृत्तिप्रतीतिरस्ति। न द्वितीयः, तदानीमपि तद्विशिष्टत्वस्यानपायात्। अतस्सर्वत्र लक्षणवाक्येषु लक्षणान्वयस्तद्विरोधिव्यावृत्तिश्चाभिमते इति तदुभयवैशिष्ट्यं वाक्यान्तरेभ्योऽधिकमेव। अतस्सर्वेष्वपि वाक्येषु वैशिष्ट्यं दुस्त्यजमेव। प्रतिप्रयोगश्च—विगीतं वाक्यं विशिष्टपरं वाक्यत्वात्; व्यधिकरणवाक्य-

वदिति । इदं चानुमानं सर्वलोकप्रतीत्यनुगुणत्वाद्विशेषणक्लेशरहितत्वाच्चाधिकबलमेवेति अनेन पूर्वयोर्बाधः प्रतिरोधो वा । न च जरद्गवादिवाक्यैरनैकान्त्यम्, आकाङ्क्षादित्रयवत एव वाक्यत्वेन विवक्षितत्वात् । यद्वा प्रमाणत्वे सतीति विशेषणमिह प्रथममेव प्रक्षेप्यम्, तथाऽप्यनेन पूर्वयोर्बाधः प्रतिरोधो वा दुर्वारः । न च व्यधिकरणवाक्यत्वमत्रोपाधिः, लोके वेदे च विशिष्टपरसमानाधिकरणवाक्यदृष्टेस्तस्य साध्यसमव्याप्त्यभावात् । किञ्चानयोरनुमानयोर्विपक्षे बाधकाभावात् अप्रयोजकत्वं च । नन्वस्ति विपक्षे बाधकम्; तथा हि—यदि विगीतं वाक्यं विशिष्टपरं स्यात्तदा निर्गुणवाक्यविरोधप्रसङ्ग इति चेन्न; निर्गुणवाक्यानां दोषनिषेधपरत्वस्थापनात् । विशेषणविशेष्ययोर्विशेषणानां च मिथो भेदादेकार्थपरताभङ्ग इति चेत्; किं प्रधानभूतैकार्थपरता भज्येत? उत विशेषणविशेष्यतादात्म्यलक्षणैकार्थपरता? उत निर्विशेषैकार्थपरता? न प्रथमः, प्रसञ्जकप्रसञ्जनीययोर्व्याप्त्यभावात् । न द्वितीयतृतीयौ, इष्टप्रसञ्जनत्वेन दुष्टत्वात् । विशेषणविशेष्यतादात्म्यनिर्विशेषत्वयोरसिद्धत्वेन विपर्यये पर्यवसानासिद्धेश्च । द्वितीयस्य विपर्यये पर्यवसानं तु क्षपणकगन्धिवेदान्तिमतमुत्थापयत् भवतोऽपसिद्धान्ततामावहेत् ।

ननु विशेषणभेदेन विशिष्टताभेदात् विशेष्यभेद इति प्रसङ्गार्थ इति चेत्; कोऽयं विशिष्टताभेदो नाम? किं विशेषणभेद एव? उत तत्सम्बन्धभेदः? उत व्यावृत्तिभेदः? यद्वा तदधीनबुद्धिभेदः? अथवा विशेष्यभेद एव? नाद्यः, व्याप्त्यभावस्योक्तत्वात्; विशेषणभेदेन विशिष्टताभेदादित्यनयोरैकार्थ्यप्रसङ्गेन हेतुफलभावासिद्धेश्च । न द्वितीयः, अव्याप्तेरेव; एकस्य विशेष्यस्यानेकविशेषणसम्बन्धभेदादनेकत्वमिति स्ववचनविरोधाच्च । प्रसञ्जनीयविपर्ययेण प्रसञ्जकविपर्यये तात्पर्यादविरोध इति चेत्; एकश्चायम्, अतोऽनेकविशेषणसम्बन्धोऽस्य नास्तीति स स्यात्; तत्र च श्यामत्वाद्यनेकविशेषणविशिष्टतयोपलभ्यमाने देवदत्तादौ व्यभिचार एव । एकत्वमनेकविशेषणसम्बन्धाभावश्चेत्युभयमेकत्रोपसंह्रियमाणमेकस्यानेकसम्बन्धो नोपपद्यत इति वदतः स्ववचनविरोधमावहति । न तृतीयः, तत्तद्विशेषणसम्बन्धभेदैर्यथास्वं विरोधिव्यावृत्तिभेदे विवक्षितेऽनेकव्यावृत्तीनामेकत्र सम्भवात्, अविरोधिव्यावृत्तिभेदस्य त्वसिद्धत्वात् । नहि नैल्यमुत्पलादपि व्यावर्तयेत्, तथा सति घटः पट इत्यादिवन्नीलमुत्पलमित्यादिसमानाधिकरणवाक्यानामनन्वयप्रसङ्गाच्च । भेदकं विशेषणं भेद्यं विशेष्यमिति स्थिते सङ्कोचकप्रत्यक्षाद्यसम्भवे स्वेतरसमस्तविशेषणाश्रयाद्भेदस्सिध्येदिति चेत्; तर्हि तत एव विशेषणान्तरप्रयोग इव तदप्रयोगेऽपि स्वाश्रयाद्भेदः किं न सिध्येत्? विरोधादिति चेत्; किमत्र मानम्? उपलम्भ इति चेत्; किं प्रत्यक्षादिजन्योऽयमुपलम्भः? उतैतद्वाक्यस्थसत्यादिपदजन्यः? न प्रथमः, शास्त्रैकसमधिगम्ये तदसम्भवात् । न द्वितीयः, अविशेषादविरोधिविशेषणान्तराश्रयादपि व्यावृत्त्यभावेन तत्तद्वाक्योदिताविरोधिसर्वविशेषणान्वयसिद्धेः । यदि चैकमेव विशेषणं स्वेतरसमस्ताश्रयाद्व्यावर्तयेत्, तदा विशेषणान्तरप्रयोगस्सर्वत्र निरर्थकः । तस्यापि चैकस्य निरसनीयत्वेन तत्प्रयोगोऽपि प्रतिकूलः; * प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायात् । परस्परप्रवृत्तिनिमित्तप्रतिक्षेपोऽनेकपदप्रयोजनमिति चेन्न; अनृतजडपरिच्छिन्नभिन्नतया गूढसौगतकूटस्थैर्व्याख्यातत्वात्, पदद्वयप्रयोगेणापि चरितार्थत्वाच्च तेनैव निश्शेषप्रतिक्षेपसिद्धेः । यद्वा विशेष्यपदमात्रमेव प्रयोक्तव्यम्, प्रक्षालनादिति न्यायात्; एकं पदमबोधकमिति चेन्न; उपलम्भविरोधात् । स्मृतिमात्रं स्मृत्यविशिष्टबोधमात्रं वा तेन जन्येतेति चेत्, किमतः? तावतैव विशेष्यस्वरूपप्रकाशसिद्धेः तदतिरिक्तस्य च पदान्तरप्रयोगेऽपि भवता प्रतिक्षेपात् । विशेष्यपदमात्रप्रतिपन्नं स्वरूपं विशेषणविधिनिषेधसाधारणं प्रतीयेत, ततश्च संशयस्स्यादिति स्वयं विशेषणाभावनिर्णयाय विशेषणपदप्रयोग

इति चेत्; हन्त! अभावनिर्णयाय भावप्रतिपादनमिति महदिदमुपपादनमाहात्म्यमिति विपरीतनिर्णय एव ततस्स्यात्। विषं भुङ्क्ष्वेत्यादिवत्तात्पर्यपरीक्षया तदभावनिर्णय इति चेत्; एवं विशेष्यपदमात्रप्रयोगेऽपि तात्पर्यपरीक्षया सर्वविशेषण-शून्यत्वमुन्नीयताम्। तात्पर्यनिश्चायकं तत्र नास्तीति चेत्, अहो विशेषणपदप्रयोगे विशेषणाभावतात्पर्यं निश्चीयते, तदप्रयोगे तु नेति सम्यक्परीक्षकत्वम्। देवदत्तोऽयमित्यादौ विशेषणपदाप्रयोगेऽपि तद्विशिष्टत्वं प्रतीयत इति सन्देहा-नपाय इति चेत्; श्यामो युवेत्यादिविशेषणपदप्रयोगेऽपि तद्विशिष्टत्वं प्रतीयत इति सन्देहानपाय एव। प्रतीतमपि युक्त्या निरस्यत इति चेत्; अप्रतीतं किं निरसितुं युक्त्या न शक्यते? नूनमुपकारकमेवापकारकं मन्यसे। प्रति-योगिस्मृत्यभावे तत्प्रतिक्षेपो न शक्यत इति चेन्न; साधारणधर्ममात्रप्रतीत्यैव धर्मिणां बुद्ध्यधिरोहात्। अन्यथा संशय-स्याप्यनुत्थाने सिद्धमेकपदेनैव निर्विशेषम्, किमनेकैरजागलस्तनायमानैस्सत्यादिपदैः।

नापि चतुर्थः, स हि बुद्धिस्वरूपभेदमात्रं वा? ग्राहकविशेषाधीनप्रत्यक्षादिभेदो वा? ग्राह्याकारभेदो वा? आद्ये धारावाहिकबुद्धौ वस्तुनः क्षणिकत्वप्रसङ्गः। अभिज्ञाप्रत्यभिज्ञयोर्भिन्नविषयत्वेन क्षणिकत्ववादिसम्मतसर्व-प्रत्यभिज्ञाप्रामाण्यभङ्गप्रसङ्गश्च। अतिरिक्तस्त्वयं विशेषः, स्मृत्यनुभवयोर्भिन्नविषयत्वप्रसङ्गश्च। एवं वादिप्रतिवादिशिष्या-चार्यबुद्धीनामेकविषयत्वाभावात्परस्परव्यवहारानभिज्ञतया कथाप्रवृत्त्यादिभङ्गप्रसङ्गश्च। एतेनात्मख्यातिवादस्तदनुविधायि-विषयान्तःकरणवृत्त्यध्यासवादश्च निर्मूलः। अत एव न द्वितीयः। स्वराद्यनुमितपुत्रादेः पूर्वानुभूतान्यत्वप्रसङ्गश्च। तथा च श्रवणमनननिदिध्यासनादीनां भिन्नविषयता स्यात्। तृतीयेऽपि ग्राह्याकारमात्रं विवक्षितम्? विरुद्धग्राह्याकारभेदो वा? पूर्वत्र उक्तनयेन विशेष्यभेदासिद्धिः, एकस्यैवानेकविशेषणविशिष्टताग्रहणात्। अन्यथा व्यावहारिकस्यापि विरुद्धाविरुद्ध-धर्मव्यवस्थापनस्यासिद्धिप्रसङ्गात्। उत्तरोऽपि प्रागुक्तनयेनासिद्ध एव। तत्त्वमसीत्यत्र तत्त्वमाकारयोरविरोधस्तु सामाना-धिकरण्यवादे द्रष्टव्यः। नापि पञ्चमः, विशिष्टताभेदाद्विशेष्यभेद इति हेतुसाध्यभावासिद्धिप्रसङ्गात्। पर्यायद्वारा पर्व-क्रमेण बुद्ध्यारोहणमात्रार्थमिदमिति चेत्; तर्हि विशेषणभेदाद्विशेष्यभेद इत्येतावदेवोक्तं भवति, तच्च व्याप्त्यभावादीनां प्रथममेव दत्तोत्तरम्। अस्तु तर्हि परस्परसमवायप्रसङ्गो विपक्षे दण्डः। तथा हि—सर्वं हि वाक्यमुद्देश्योपादेयविभाग-वत्; ततश्च क्रमावश्यंभावः, यौगपद्येन विशेषणानामन्वये सत्युद्देश्योपादेयविभागासिद्धेः, * यद्वृत्तयोगः प्राथम्यमित्या-द्युद्देश्यलक्षणमित्याहुः। ततश्च यदि विशेषणविशिष्टमुद्दिश्य विशेषणान्तरं विधीयते तदोद्देश्यानुप्रविष्टविशेषणांशस्यापि विशेष्यांशस्येव विशेषणान्तरेण विशेष्यत्वप्रसङ्गः। एवं विशेषणान्तरविशिष्टोद्देश्येऽपीति; तन्न, सर्वेषां वाक्याना-मुद्देश्योपादेयनियमाभावात्। सर्वस्याप्राप्तत्वे विशिष्टमेव विधेयं निरणैषुः * यदाग्नेयोऽष्टाकपाल इत्यादिषु। गत्यभाव-विषयो विशिष्टविधिरिति चेत्, किमतः? उद्देश्योपादेयविभागस्स्वरस इति चेत्; तथाऽपि कृत्स्नस्याप्राप्तत्वे स एव गत्यभाव इति विशिष्टविधिर्भवति। अन्यथा न क्वचिदपि विशिष्टविधिस्स्वीकारः। अतो विशिष्टविधिस्थलेषु युगपदनेक-विशेषणविशिष्टैकप्रतीतिरनिवार्या। यत्र किंचिदुद्दिश्य किमपि विधीयते, न तत्रापि परस्परसमवायसिद्धिः, प्रथमं तावत् परस्परमुद्देशासम्भवात्। प्राप्तो ह्यंश उद्देश्य एव, अप्राप्तोंऽशो विधेय एवेति व्यवस्थापनात्। प्राप्तस्यापि विशे-षणस्य विशेष्यान्वयप्रतिपत्त्यर्थमितरांशानुवादेन तदंशविधिस्स्वीकार्य इति चेन्न; तद्विशिष्टतानुवादेनैव तदन्वयप्रतीति-सिद्धेः। अत उद्देश्योपादेयभावस्य प्राप्तत्वाप्राप्तत्वनिबन्धनत्वान्नाभिधानदशायां क्रमापेक्षा। स्मृतिविमर्शयोस्तदपेक्षायामपि प्रत्येकं स्मरणात् यथायोग्यं विमर्शाच्च न परस्परसमवायप्रसङ्गावकाशः। * यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणमिति

तूच्चारणक्रमविषयम्, नाभिधानविषयम्। अत उद्देश्यांशगतविशेषणस्य तूपादेयविशेषणाधारत्वप्रसङ्ग इति च प्रत्युक्तम्। उद्देश्यपदवदुपादेयपदस्यापि विशेष्यसमवेतविशेषणबोधनव्युत्पत्तेर्यथाव्युत्पत्ति विवक्षितत्वात्प्रयोगाच्च। नहि दण्डी देवदत्तः कुण्डलीत्यत्र दण्डस्यापि कुण्डलित्वमनुन्मत्तोऽभिमन्येत।

ननूद्देश्यस्य व्याप्यत्वमुपादेयस्य व्यापकत्वं सर्वत्राभिमतम्। अस्त्वेवम्, तथाऽपि यथा यो यो धूमवान् सोऽग्निमानित्यादिषु, अतो विशिष्टस्योद्देश्यत्वे तस्यांशस्याशेषस्याप्युपादेयांशेन व्याप्तिर्वक्तव्येति चेत्; अस्त्वेवम्, तथाऽपि न समवायेन व्याप्तिर्वक्तव्या; यथाप्रमाणं सम्बन्धनियमस्यैव व्याप्तिरूपत्वात्, न हि धूमोऽग्निव्याप्त इति धूमसमवेतोऽग्निः, ततोऽत्र विशेष्यस्याधारतया तत्सम्बन्धनियमः; विशेषणस्य तु न स्वरूपेणैव विशेषणान्तरेणैकार्थसमवायतस्सम्बन्धनियम इति यथाप्रमाणमास्थीयताम्। एवं तर्ह्युद्देश्यांशगतविशेषणस्य शाखासारसादिवदुपलक्षणत्वमात्रं स्यादिति चेत्; किं तेन? न हि तथात्वेऽपि निर्विशेषत्वं सिध्यति। लक्षणस्य बहिर्विषयत्वात्तत्सिद्धिरितिचेत्, न; तस्य बहिष्ठत्वेऽप्युपादेयस्य तन्निष्ठतया निर्विशेषत्वासिद्धेः; न चोपलक्षणं सर्वं बहिष्ठमिति नियमः, गोत्वपृथिवीत्वाद्युपलक्षणसास्नादिमत्त्वगन्धवत्त्वादेर्बहिष्ठत्वाभावात्। न च सारसादिकमपि बहिष्ठम्, संयोगादिमत्त्वात्; अन्यथा सम्बन्धाभावेन देवदत्तक्षेत्राद्युपलक्षणत्वासम्भवात्; असम्बन्धमुपलक्षयन्न कस्यचिदेवोपलक्षणं स्यात्; अपि त्वसम्बन्धाविशेषात् सर्वस्यापि स्याद्वा न वा। कस्यचिदुपलक्षणस्य सम्बन्धाभावे वाक्यस्यानन्वयप्रसङ्गश्च। एतेन चन्द्राद्युपलक्षणशाखादिकमपि निर्व्यूढम्। न हि साऽप्यसम्बन्धिनि तमुपलक्षयति; तस्यास्सर्वोपलक्षकत्वप्रसङ्गात् निर्णयासिद्धेः। सर्वस्य तदुपलक्षणत्वं तदानीमेव स्यादित्यतिप्रसङ्गेन तत्त्वासम्भवात्। कस्तर्हि तत्सम्बन्धः यस्तन्निर्देशविवक्षितः? स एव किमिति सौहृदेन पृच्छाम इति चेत्; शाखाग्रे चन्द्र इति वदन्तो द्विविधाः, प्रतीतिमात्रतन्त्राः निरूपकाश्च। तत्र पूर्वे व्याप्तिसिद्धं संयोगादिकमुपजीव्य प्रयुञ्जते, इतरे तु तदार्जवदेशलक्षणविवक्षयेति। अतः पारम्पर्येण सम्बन्धश्शाखायामपि सिद्धः। तादृशार्जवादिसम्बन्धस्साक्षात्सम्बन्धभ्रमेऽपि भ्रमकारणतयाऽपेक्षितत्वात् नापैतीति भ्राम्यत्प्रयोगेऽपि सम्बन्धमात्रसत्यत्वसिद्धिः। अस्तु तर्हि विशेष्यं न विशेषणान्तराधिकरणम्, उद्देश्यपदप्रदिपन्नत्वात् तत्पदोपात्तविशेषणवदिति चेन्न; प्रागुक्तोपलम्भविरोधादिदूषणानामनिवार्यत्वात् तथाविधवाक्यानां सर्वेषां प्रामाण्यप्रसङ्गात्। त्वदुक्तेनैव हेतुना त्वदुक्तदृष्टान्तवदेव विशेष्यं न पदान्तरबोध्यमित्यतिप्रसङ्गाच्च। एतेन युगपद्बोधने विशेष्यांशवत् प्रातिपदिकार्थैक्यपरसमानविभक्तिसामर्थ्यादेव विशेषणानां मिथो विशेषणान्तरैर्विशेष्येण च तादात्म्यप्रसङ्गोऽपि प्रत्युक्तः। न हि पदद्वयप्रतिपन्नविशेष्यैक्यमात्रात्तत्सिद्धिः, भवत्पक्षे सगुणब्रह्मवाक्यपर्यालोचनेन व्याप्तिविरोधात्। न च सगुणसमानाधिकरणवाक्यस्य प्रातिपदिकार्थैक्ये तात्पर्यमिति स्यात्, तद्वदेव निर्गुणवाक्येष्वपि विशेष्यमात्रैक्यपरत्वनिर्णयात्। तथा च, सगुणे निर्गुणे वापि सामानाधिकरण्यधीः। विशेषणानां भेदेऽपि विशेष्यैक्ये नियम्यते॥ अन्यथा व्युत्पत्तिप्रतिपत्त्योर्विरोधात्। अत एव * भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति तल्लक्षणविदः।

ननु भिन्नप्रवृत्तिनिमित्तत्वं हि भिन्नार्थत्वम्, प्रवृत्तिनिमित्तस्य शब्दवाच्यत्वात्, अतो भिन्नार्थानां शब्दानामेकार्थपरत्वमिति व्याघात इति चेत्; किमिदं लक्षणवाक्यस्य दूषणाभिप्रायेणोक्तम्? उतान्यपरत्वाभिमानेन? नाद्यः, अनभ्युपगमात्; न द्वितीयः, भिन्नप्रवृत्तिनिमित्तानां शब्दानां प्रवृत्तिनिमित्तपरित्यागेनैकार्थपरत्वमिति शेषपूरणेन व्याख्येयमिति चेत्; कुत एतत्? एकैकस्मिन्नर्थे प्रवृत्तिरिति शेषपूरणेन विपरीतं वा किं न स्यात्? एकार्थत्वस्य तात्पर्य-

सिद्धत्वात् भिन्नार्थत्वस्य तद्विरुद्धत्वाच्चेति चेत्; तर्हि व्यधिकरणवाक्येष्वपि नानाकारकादिवैशिष्ट्यं न स्यात्; तत्राप्येकार्थत्वस्य तात्पर्यसिद्धत्वात्। * अर्थैकत्वादेकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्यादिति हि वाक्यविदः। न च बौद्धगन्धिवैयाकरणादिवत्तत्रापि वैशिष्ट्यं माभूदिति वाच्यम्; अपसिद्धान्तात्। वस्तुतस्तत्रापि वैशिष्ट्यं न सिद्धान्त इति चेत्; तर्हि तद्वदेव समानाधिकरणवाक्यस्यापि विशिष्टपरत्वमभ्युपगम्य तैस्सह बाध उपपाद्यताम्। एवं च समानाधिकरणवाक्यत्वादिति हेतुविशेषणोपादानवैयर्थ्यं च प्रागेवोक्तम्। अनेककारकविशिष्टैकार्थपरत्वं व्यधिकरणवाक्येषु व्युत्पत्तिसिद्धमिति चेत्; तर्हि अनेकविशेषणविशिष्टैकविशेष्यपरत्वं समानाधिकरणवाक्येषु व्युत्पत्तिसिद्धमिति समस्समाधिः। एवं च विषयव्यवस्थया विरोधे शमयितव्ये बाधाध्याहारलक्षणादिपरिग्रहो देवानांप्रियेभ्य एव रोचते। प्रवृत्तिनिमित्तशब्दवाच्यविशेषणनिष्ठो हि भेदस्तदाश्रयभूतविशेष्यगतञ्चैकत्वमिति कोऽत्र विरोधमनुसन्दधीत? अतस्सामानाधिकरण्यलक्षणानुपपत्तिर्न ते विपक्षे बाधिका, अपि तु स्वपक्ष एवेति तूष्णीमास्स्व। पदद्वयप्रतिपन्नविशिष्टद्वयैक्ये विशेष्यैक्यवद्विशेषणैक्यमपि दुस्त्यजम्, तद्वदेव वा विशेष्यभेदोऽपि किं न स्यादिति चेत्; किमिदम्? अधश्शायितोऽपि केशान्न मुञ्चसि! विशिष्टद्वयैक्यशब्देन विशेषणाद्यैक्यविवक्षायामात्माश्रयासिद्ध्यादिदोषः; विशेष्यैक्यविवक्षायां तस्य विशेषणैक्यं प्रत्यसाधकत्वस्योदीरितत्वात्, यथा जात्यादिरूपविशेषणैक्येऽपि विशेष्यभेदः प्रत्यक्षादिसिद्धत्वाद्दुरपह्नवः, तथा विशेष्यैक्येऽपि विशेषणभेदस्तत एव दुरपह्नवः। अन्यथाऽनेकगुणविशिष्टैकवस्तुप्रतिपादकतयाभिमतानां सगुणवाक्यानामनुत्थानप्रसङ्गात्। यथा वाऽनेकप्रतियोगिभेदेऽपि तत्तद्व्यावृत्तवस्त्वैक्यम्, तथा अनेकविशेषणभेदेऽपि तत्तदन्वितवस्त्वैक्यं न व्याहतमेव। एवं च विशेषणैक्यप्रसङ्गे प्रतियोग्यैक्यप्रतिबन्देरपि दुस्तरत्वं स्यात्। किंच, यथा क्रमेण युगपद्वा प्रत्यक्षादिभिरनेकविशेषणविशिष्टैकवस्तुप्रतिपत्तौ विशेष्यभेदो वा विशेषणानां मिथस्तादात्म्यसमवायो वा न प्रसज्येते, तथा शब्देनापि; प्रत्यक्षाद्यनुसारिव्युत्पत्तिवशंवदत्वात् तत्सामर्थ्यस्यापि प्रायशस्तत्समानत्वात्। एवमन्यदपि द्रष्टव्यम्।

प्रतिकूलतर्काश्च भवन्ति। तथा हि—यद्येकपदप्रतिपन्नादन्यूनानधिकमेव पदान्तरेणापि बोध्येत; तदा पर्यायत्वप्रसङ्गः, पदान्तरवैयर्थ्यं च; निमित्तभेदादपर्यायत्वमिति चेत्; तर्हि वैशिष्ट्यप्रसङ्गः, तथा च स्वेष्टभङ्गः, निमित्तभेदे सत्यपि तदन्वयाभावाद्वैशिष्ट्याभाव इति चेत्; किमत्र घटः पट इतिवत्प्रमाणविरोधादनन्वयः? उत तदविरोधेऽपि श्रद्धासंगृहीततर्कावस्करबलात्? नाद्यः, असिद्धेः; न द्वितीयः, प्रागेव निरस्तत्वात्। यदि च सन्तमपि निमित्तभेदमनादृत्य सर्वैः पदैस्स्वरूपमात्रमेव बोध्येत; तर्ह्येकेतरपदप्रयोगे नैरर्थक्यं स्यात्, प्रतिपन्नेऽपि स्वरूपे तत्तत्प्रतियोगिव्यावृत्तिसिद्ध्यर्थं पदान्तरप्रयोग इति चेत्; किं तत्प्रवृत्तिनिमित्तान्वयसामर्थ्यात्तत्प्रतियोगिव्यावृत्तिसिद्धिः? उत तत्तत्पदजन्यस्वरूपमात्रबोधादेव? नाद्यः, वैशिष्ट्यस्य दुर्वारत्वात्; न द्वितीयः, अविशेषात्; प्रथमपदेनैव स्वरूपप्रतिपत्तौ सर्वव्यावृत्तिसिद्धिप्रसङ्गात्, तेन तदसिद्धौ पदशतेनापि तदसिद्धिप्रसङ्गात्; यथा पर्यायाणां शतमपि पठ्यमानं न व्यावृत्तिभेदमापादयति, तथाऽत्रापि। अतः एकेतरपदानां नैरर्थक्यमेव। सामानाधिकरण्येन निर्विशेषपरत्वसिद्ध्यर्थमनेकपदप्रयोग इति चेन्न; तथाऽपि पदद्वयमात्रेणापि तत्सिद्धेः बहुपदप्रयोगे नैरर्थक्यप्रसङ्गात्; तथा च न विशेषणपदद्वयमपि प्रयोक्तव्यम्; एकविशेषणपदसहितविशेष्यपदमात्रेण सामानाधिकरण्यसिद्धेः। सामानाधिकरण्यस्य निर्विशेषपरत्वे सिद्धे तदर्थतया अनेकपदप्रयोगसाफल्यम्, तत्साफल्ये च सति सामानाधिकरण्यस्य निर्विशेषपरत्वसिद्धिरित्यन्योन्याश्रयता। ननु तत्तत्प्रवृत्तिनिमित्तविशिष्टं वस्तु शब्दबोध्यम्, प्रवृत्तिनिमित्तानि च स्वविरोधिव्यावृत्तिसहवर्तीनि, अत्र तु विशिष्ट-

बोधनानुपपत्त्या विशेष्यमात्रं बोधयन्त्यपि पदानि नैरर्थक्यादिपरिहाराय स्वप्रवृत्तिनिमित्तसहिततत्तद्विरोधिव्यावृत्तिमपि लक्षयन्ति, ततस्तत्तद्व्यावृत्तमेकं वाक्यार्थ इति किं नोपपद्यते ? श्रूयताम् । तत्तद्व्यावृत्तिः किमत्र धर्मिस्वरूपम् , उत ततोऽन्या ? तत्र न तावत्स्वरूपम्, स्वरूपस्यैव तत्प्रकाशत्वात्; प्रकाशाप्रकाशयोरध्यासानुपपत्त्यादेरन्यत्र प्रतिपादनात् । किंच तत्तद्विरोधिव्यावृत्तिः किं परस्परभिन्ना ? उतैका ? भिन्नत्वे तदात्मकत्वात् ब्रह्मणोऽपि भेदप्रसङ्गात्; न च व्यावृत्तिभेदो मिथ्येति वाच्यम्; मिथ्याभूताभेदप्रतिपादनायानेकपदनैष्फल्यात्; अतत्त्वावेदकत्वप्रसङ्गाच्च । एकत्वे प्रथमपदेनैव सर्वव्यावृत्तिसिद्धौ पदान्तरप्रयोगनैष्फल्यमनतिक्रान्तम् । एकनिष्ठानेकप्रतियोगिकान्योन्याभावनिरूपणं तर्हि कथमिति चेत्; इत्थम् । प्रतियोगिभेदादन्योन्याभावभेदाभ्युपगमे दोषाभावात् । अभेदेऽपि तत्तत्प्रतिसम्बन्धित्वलक्षणविशेषणविशिष्टैकान्योन्याभावपरत्वादनेकपदप्रयोजनसिद्धिः । एवं स्वरूपानतिरिक्तान्योन्याभावे समाधिरनुसन्धेयः । न चात्रापि तत्तत्प्रतिसम्बन्धित्वलक्षणविशेषणवैशिष्ट्यमात्रमभ्युपगतमिति वाच्यम्, प्रागेव तत्तद्धर्मवैशिष्ट्यस्य यथाप्रतीत्यभ्युपगन्तुमुचितत्वात् । नाप्यन्या; सा हि तत्तत्प्रवृत्तिनिमित्ताकारा वा स्यात्? उत ततोऽन्या तदविनाभूतेति ? न प्रथमः, दूरं गत्वा घट्टकुटीप्रभातप्रसङ्गात्; नापि द्वितीयः, तत्तत्समानयोगक्षेमतया तदभावे तदसिद्धिप्रसङ्गात्, न हि घटत्वाभावेऽप्यघटव्यावृत्तिसिद्धिः, तत्सिद्धौ तद्वैशिष्ट्यस्यापरित्याज्यत्वात् पुनरपि परपक्षकुक्षिप्रवेशेन भस्मीभावः । अभावरूपविशेषणमात्रवैशिष्ट्यमनुमन्यामह इति त्वपक्षपातिनस्ते न युक्तम् । न च व्यावृत्तीनां मिथ्यात्वेन समाधिः, जडाद्यैक्यप्रसङ्गस्यान्यत्रोक्तत्वात्; पूर्ववदतत्त्वावेदकत्वप्रसङ्गाच्च । भवत्पक्षे तत्तत्प्रवृत्तिनिमित्तानामपि मिथ्यात्वात्तत्तद्वैशिष्ट्येऽप्येवं न भेतव्यम् । अतो भवता प्रथममेव तदभ्युपगम उचितः ।

एतेन शौक्ल्यं कार्ष्ण्यव्यावृत्तं पीतिमव्यावृत्तमित्यादिप्रतिबन्दिनिस्तारसिद्धिः, तत्र प्रतिपदं प्रतिपाद्यभेदाभ्युपगमात् । यदि पुनस्तत्रापि कार्ष्ण्यव्यावृत्तिरेव पीतिमव्यावृत्तिः स्यात्, तदा पीतिम्नः कार्ष्ण्यव्यावृत्तिसद्भावेन पीतिमव्यावृत्तिप्रसङ्गः । एवं विपरिवर्तेन कार्ष्ण्यव्यावृत्तिप्रसङ्गः । अतः कार्ष्ण्यव्यावृत्त्यभावे पीतिमव्यावृत्तेः कार्ष्ण्ये दर्शनात्तयोर्मिथो भेदस्सिद्धः, व्यावृत्त्यनुवृत्त्योरेकत्र विरोधात् । व्यावृत्त्यनुवृत्तिभ्यामेव हि व्यक्तिजातिभेदं सर्वेऽप्याहुः । ताभ्यामेव हि घटादेस्सतश्च मिथ्यात्वामिथ्यात्वविवेको भवद्भिरपि स्वीकृतः । अतः कार्ष्ण्यव्यावृत्तमित्यादौ प्रतिपदं प्रतिपाद्यभेदस्याभ्युपगन्तव्यत्वान्न निष्प्रयोजनत्वप्रसङ्गावकाशः । यद्यपि भावान्तरं व्यावृत्तिरिति पक्षः, तथाऽपि तस्य व्यावृत्तित्वं तत्तत्प्रतिसम्बन्धित्वसमुचितोपाधिभेदगर्भमिति तेनाकारेण प्रतिपाद्यभेदसिद्धिः, अन्यथा शौक्ल्यस्वरूपस्यैव पीतिमव्यावृत्तिरूपत्वे कार्ष्ण्ये पीतिमव्यावृत्तिशब्दो न प्रयुज्येत । न च तावता भावान्तराभाववादपरित्यागप्रसङ्गः; अभावाभ्युपगमेऽपि अभावाभावेष्विवात्रापि निर्वाहस्य तन्त्राचार्यैस्समर्थितत्वात् । सम्भवति च शौक्ल्यादेस्सकलेतरव्यावृत्तिरूपत्वम्, तत्प्रकाशेऽन्याध्यासस्यादृष्टेः, ब्रह्मस्वरूपे निर्विशेषे प्रकाशमान एव सर्वेतराध्यासात् सर्वेतरव्यावृत्तिरूपत्वं दुरुपपादमेव । किञ्च निर्विशेषबोधने वाक्यस्य सामानाधिकरण्यासिद्धिप्रसङ्गश्च । समानाधिकरणानेकार्थबोधकतयैव ह्यन्ततः शब्दानां सामानाधिकरण्यम् । अत एव हि * भिन्नप्रवृत्तिनिमित्तानामित्यादिलक्षणमुक्तम् । न चैतदुदाहरणविशेषविषयमिति वक्तुं युक्तम्; एकप्रवृत्तिनिमित्तानां वा परित्यक्तमुख्यामुख्यसर्वप्रवृत्तिनिमित्तानां वा सामानाधिकरण्यादर्शनात् । सत्यज्ञानादिवाक्ये दृश्यत इति चेत्; न, आशामोदकतुल्यत्वात् । तर्हि पर्यायपाठेष्विति चेत्, किं पुनरुक्तोदाहरणेषु, यथा घटं कुम्भमानयेत्यादिषु ? किं वा निघण्टुवत् पर्यायव्युत्पादनार्थपाठेषु, यथा कः पिक इत्युक्ते कोकिलः पिक इत्यादिषु ? तत्राद्ये

अनन्वयादेव सामानाधिकरण्यासिद्धिः, अनन्वयश्चाकाङ्क्षादिविरहात्, आकाङ्क्षादित्रयसमाहारे सत्येव ह्यन्वयः, अन्यथा नैराकाङ्क्ष्येण क्वचिदपि वाक्यभेदो न स्यात्। द्वितीये तु निमित्तभेदोऽस्त्येव, कोकिलशब्दस्य कोकिलत्वजात्यैव प्रवृत्तत्वात्पिकशब्दस्य पिकशब्दवाच्यत्वलक्षणविवक्षया प्रयोगात्। कथमिदमवगतमिति चेदित्थम्; कः पिक इति पृच्छतो हि पिकशब्दवाच्यः क इत्यभिप्रायः, तदुत्तरार्थस्तु तदनुरूप एव भवितुमर्हति, ततश्च कोकिलः पिकशब्दवाच्य इत्येवोत्तरवाक्यार्थः। एतदनभ्युपगमे तत्रापि पौनरुक्त्यादिदोषो दुष्परिहर इति।

एवं च न समानाधिकरणवाक्यस्य मुख्येऽपि विशिष्टैक्ये संभवति, लक्षणा, तत्रापि सर्वपदलक्षणा, तत्र च निर्विशेषविशेष्यमात्रलक्षणा, तदुपरि व्यावृत्तिलक्षणेत्यादिपरिक्लेशो भवति! इदं च तात्पर्यनिर्णयवशात्स्वीक्रियत इति वदन् कथं न जिह्रेति? स्वप्रतिपत्तिर्भवतीति कथमेनं न निर्भर्त्सयति? अथवा लक्षणयापि ब्रह्मणश्शब्दबोध्यत्वं वदता * यतो वाचो निवर्तन्त इत्यादेः स्ववचनविरुद्धोऽप्यसङ्कोचोपपादनप्रयासो विस्मृतः। मुख्यतया बोध्यत्वं तत्र निषिध्यत इति चेत्; विपरीतं किं न स्यात्? उभयधाऽपि वाग्वृत्त्या बोध्यत्वस्याविशेषात्, बोध्यत्वे मिथ्यात्वप्रसङ्गभयं लक्षणया बोध्यत्वेऽपि समानमेव, विशेषाभावात्। अत एव परमार्थतो वा लक्षणया वा बोधनं नेच्छाम इति चेत्; तर्ह्यखण्डवाक्यार्थासिद्धिरेव भवेत्, परमार्थतस्तत्प्रतिपादनाभावेऽपि तत्सिद्धौ तत्रैव सखण्डवाक्यार्थसिद्धिरपि किं न स्यात्?

यत्तु वाक्यतात्पर्याविरोधायैकपदलक्षणेव सर्वपदलक्षणापि न दोष इत्याहुः। तदपि तात्पर्यस्यान्यथा निर्णयादेव निरस्तम्। यत्पुनर्विषं भुङ्क्ष्वेत्यादिषु सर्वपदलक्षणा दृष्टेति; तदपि न। भुङ्क्ष्वेत्यस्य निषेधप्रतियोगिविशेषसमर्पकस्य, तत्रापि मुख्यत्वात्, विषशब्देनैव ह्यनर्थकरभक्ष्यरूढेन भुज्यमाने तस्मिन्ननर्थहेतुतया निषिद्धतामभिप्रयता भोजननिषेधोऽप्यभिप्रेतः। यद्वा भुङ्क्ष्वेत्यत्र प्रकृत्या निषिद्धभोजनं विवक्षितम्, विषशब्देन तन्निषेध एव विवक्षितः, तथापि प्रत्ययांशस्य मुख्यत्वं सिद्धम्। अस्तु तर्हीहापि प्रत्ययांशस्य मुख्यत्वम्, विशेष्यैक्यस्य तदर्थस्यापरित्यागादिति चेत्; न, विशेष्यमात्रस्यैव प्रतिपत्तुमशक्यत्वोपपादनेन विशेष्यैक्यस्यापि दुष्प्रतिपादत्वात्। यत्तु विशेष्यस्यापि मुख्यार्थैकदेशत्वात्तत्र वृत्तिर्न लक्षणेति केचिदाहुः, तदपि मन्दम्, विशिष्टविषयायाश्शक्तेर्विशेषणाभावे विशिष्टाभावेन निर्विषयत्वात्। किंच, विशेष्यविषया शक्तिर्यदि नैवोपपद्यते। अभिधेयत्वयोगेन तन्मिथ्यात्वं प्रसज्यते॥ अतो विशेष्यबोधने विशेषणद्वारायाश्शक्तेस्तदभावे कुण्ठितत्वमेव; अन्यथा विशेष्यपरित्यागेनापि बोधनमात्रेण सर्वत्र मुख्यत्वप्रसङ्गात्। अतोऽत्र निर्निमित्तलक्षणादिदोषो दुष्परिहरः। यद्यपि विशेष्यमात्रे तदैक्ये च मुख्यत्वं संभवति, विशेष्यं हि वाक्ये प्रधानोंशः, तथाऽपि तत्र स्वारस्यहानिरवर्जनीयैव। किंच वाक्यार्थस्य निश्शेषभेदरहितत्वे तत्प्रतिपादकस्य वाक्यत्वाभावप्रसङ्गः, परस्परसंसृष्टपदार्थपरतया वा तत्संसर्गपरतया वा खल्वन्विताभिधानाभिहितान्वययोस्सम्भवः। निर्विशेषे तु तदुभयमपि न संभवति, बौद्धमतगन्धिवैयाकरणाद्यभिमतबुद्धिविशेषादिवाक्यार्थत्वं मीमांसाचार्यादिभिर्विस्तरेण प्रतिक्षिप्तमिति न तत्रास्माभिरिह प्रयस्यते।

नन्वस्तु तत्त्वमसिसत्यज्ञानादिवाक्यानामखण्डपरत्वं निष्प्रमाणकम्, तथापि भवता वादजल्पयोस्सखण्डपरत्वे प्रमाणं वाच्यमिति चेत्; उच्यते। विप्रतिपन्नं वाक्यं विशिष्टपरम्, बोधकत्वात्; सम्प्रतिपन्नवत्; न च पदमात्रैश्रमहेतुभिर्वाऽनैकान्त्यम्; तेषामपि यत्किञ्चिद्विशिष्टबोधकत्वमात्रस्य सिद्धत्वेन तत्रापि साध्यसामान्यस्य विद्यमानत्वात्, सारकत्वे हि पदानां विशिष्टमेव सार्थम्, एकस्यापि पदार्थस्य प्रकृत्याद्यंशभेदेन विशिष्टत्वात्पदार्थानामपि निपुणनिरूपणे

प्रायशो विशिष्टत्वादेव । अख्यातिगर्भमयथार्थगोचरं वा भ्रान्तिज्ञानमपि विशिष्टविषयमेव । संसर्गमात्राख्यातिरेव ह्यख्यातिर्न पुनस्सर्वाख्यातिः । एतेनाखण्डवाक्यार्थ इति भवद्वाक्येनाप्यनैकान्त्यं परिहृतम् । न च निर्विशेषगोचरप्रत्यक्षादिभिरनैकान्त्यम्, तेषामन्यत्र प्रतिक्षिप्तत्वात् । पराभिमतनिर्विकल्पकस्य निश्शेषोन्मूलनात् । एवं वाक्यत्वादिति प्रागुक्तश्च हेतुरनुसन्धेयः । यद्वा किमनुमानक्लेशेन? सत्यज्ञानादिवाक्यश्रवणसमनन्तरं निपुणनिरूपितनीतिपरिशुद्धबुद्धीनामपि विशिष्टवाक्यार्थबोध एव जायते, यथा सगुणब्रह्मादिपरतया भवदभिमतवाक्यश्रवणे ; न चैतदपह्नवमर्हति, सर्वेष्वपि वाक्येषु विशिष्टवाक्यार्थबोधापह्नवप्रसङ्गात्, नच तत्साहसिकानां पश्यतोहराणां भवतामपीष्टम् । अतोऽनन्यथासिद्धानन्तर्यनियमाधिगमादन्यत्रेवात्रापि स्वानन्तरभाविविशिष्टवाक्यार्थबोधं प्रति करणत्वं प्रत्यक्षत एव सिद्धम् । बाधशङ्का तु प्रागेव निरस्तेति । अतस्सिद्धं सखण्डपरम् * तत्त्वमसि, * सत्यमित्यादिवाक्यमिति ॥

॥ इति शतदूषण्याम् अखण्डवाक्यार्थखण्डनवादः अष्टत्रिंशः ॥ ३८ ॥

॥ अथ भावरूपाज्ञानभङ्गवादः एकोनचत्वारिंशः ॥ ३९ ॥

श्रुतिकिरीटनिरूपणनिर्भरप्रसरयैव धिया परिशोधिताम् ।
सुविमलां पदवीमदवीयसीं भजत माधवभक्तिमयीमिमाम् ॥

भावरूपं यदज्ञानं ये जनाः परिचक्षते । तच्चित्ते तत्तथाभूतं निश्चिन्वन्ति विपश्चितः ॥

एवं ह्यज्ञानमुषिततत्त्वज्ञानैर्विज्ञातम्—प्रत्यक्षानुमानागमैर्भावरूपमज्ञानं प्रतीयते । तत्र प्रत्यक्षं तावदहमज्ञो मामन्यं च न जानामीत्यादिरूपं सर्वसम्मतम् । तत्किं भावरूपमज्ञानं विषयीकरोति उताभावरूपमिति विवेचनीयम् । न तावदभावरूपम्; अभावो हि प्रतियोगिनिरूपणाधीननिरूपणः ; ततश्च ज्ञानाभावप्रतीतिर्ज्ञानग्रहणमन्तरेण नोपपद्यते ; ज्ञानं विषयनिरूपणाधीननिरूपणमिति विषयेण सहैव गृह्यते, ततश्च यद्विषयस्य ज्ञानस्याभावो व्यवजिहीर्षितस्तद्विषयं ज्ञानं तदानीमेव संजातमिति कथं तदभावः प्रतीयेत? यः प्रतियोगिभूतज्ञानावच्छेदकत्वेन विषयः यदा व्यवह्रियते तदैव तद्विषयज्ञानाभावं वदन् स्ववचनविरोधमपि न जानाति । ननु ज्ञानव्यक्तिभेदाददोषः, निषिध्यमानं ज्ञानमन्यत्तस्य निषेधप्रतियोगिनो निरूपणौपयिकं ज्ञानं चान्यदिति ; नैवम्, संसर्गाभावस्य तज्जातीयसमस्तप्रतियोगिनिरूप्यत्वात् ; इह भूतले घटो नास्तीतिवत् । ततश्च सर्वज्ञानप्रतियोगिको निषेधः एकयापि ज्ञानव्यक्त्या विरुद्ध एव ; न ह्येकस्मिन् घटे विद्यमानेऽप्यघटं भूतलमिति व्यवहरन्ति । एतावन्तं कालं न किञ्चिदहमज्ञासिषमिति च प्रतीतिरपि न काञ्चिदपि तदानीं ज्ञानव्यक्तिं क्षमते । ननु कालभेदेन ज्ञानाज्ञानयोरविरोधः, न हि ज्ञानाभावप्रतिपत्तिकाल एव ज्ञानाभावेन भवितव्यमिति नियमः, मैवम्, प्रत्यक्षज्ञानस्य वर्तमानग्राहित्वनियमात् । तथा च सूत्रितं भगवता जैमिनिना * सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वादिति । यद्यपि योगीश्वराणां प्रत्यक्षमतीतानागतेऽपि गृह्णातीति शास्त्रबलादभ्युपगन्तव्यम्, तथाप्यस्मदादिप्रत्यक्षं वर्तमानग्राहीत्येव नियमः । अस्तु तर्हि प्रत्यक्षेतरेण प्रमाणेनावर्तमानज्ञानेन ज्ञानाभावप्रतीतिः, अस्वाप्समेतावन्तं कालं न किञ्चिदहमज्ञासिषमित्यादिषु कालविशेषस्येव ज्ञानाभावस्याप्यतीतस्यानुमेयत्वोपपत्तेरिति चेत् ; तन्न, अहमज्ञो मामन्यं च न जानामीत्यत्र वर्तमानतयैवाज्ञानप्रतीतेः । किमिदं जानासीति

पृष्टश्च कश्चिन्न जानामीत्युत्तरं दिशति। अत एवात्र प्रमाणान्तरजन्यज्ञानेनापि विरोधः स्थित एव। एतेन ज्ञानाभावगोचरज्ञानेनापि विरोधस्सिद्धः। नहि ज्ञानमुदयमानं तदानीमेव सर्वज्ञानाभावं प्रकाशयितुमलम्, स्वस्यापि ज्ञानत्वाविशेषात्, विद्यमानत्वाच्च। एवमाश्रयज्ञानेनापि विरोधः, न हि यत्किञ्चिदाश्रयप्रतीतिमन्तरेणाभावप्रतिपत्तिमनुमन्यामहे। उक्तं चाभियुक्तैः * लब्धरूपे कचित्किंचित्तादृगेव निषिध्यत इति। ननु सामान्यतः आश्रयप्रतियोग्यादिज्ञानमुपजीव्य विशेषतस्तत्तद्विषयं ज्ञानं निषिध्यत इति न कश्चिद्विरोध इति; तदपि मन्दम्, निषिद्ध्यमानस्य विशेषज्ञानस्य विषयविशेषाधीनविशेषत्वेन तत्प्रकाशमन्तरेण प्रकाशायोगात्, तत्प्रकाशे वा विशेषज्ञानस्यापि सिद्धेस्तन्निषेधायोगेन व्याघातस्य स्थितत्वादिति। नच भावरूपेऽप्यज्ञाने विरोधप्रसङ्गः, भावरूपत्वादेव स्वरूपेण निरूपयितुं शक्यत्वात्। अस्ति च स्वरूपेणैव प्रतीतिः मुग्धोऽस्मि, मूढोऽस्मीत्यादिका। तस्मादहमज्ञ इत्यत्रापि तदेव भावरूपमज्ञानं प्रतीयते। न च वाच्यं नित्यसर्वगतसाक्षिसन्निधाने कथं ज्ञाताज्ञातविभाग इति; ज्ञाततयाऽज्ञाततया वा सर्वस्य साक्षिचैतन्यविषयत्वात्। इदमहं जानामीत्यत्र ज्ञानावच्छेदकतया, इदं न जानामीत्यत्र त्वज्ञानावच्छेदकतयेति विशेषः। न च तत्प्रकाशमात्रेणाज्ञाननिवृत्तिप्रसङ्गः, साक्षिप्रकाशस्याज्ञानगोचरभ्रान्तित्वेन तन्निवर्तकत्वायोगात्। यथा इदं रजतमिति भ्रान्तेरिदंप्रकाशो न निवर्तकः, तद्वदत्रापि अज्ञानावच्छेदकविषयप्रकाशः। प्रमाणभूतज्ञानोदये ह्यज्ञाननिवृत्तिः। नच ब्रह्मस्वरूपप्रकाशस्य ब्रह्माज्ञानविरोधित्वम्, तस्य साक्षित्वावस्थायां तद्विषयत्वेन तदविरोधित्वात्। स्वरूपमात्रप्रकाशदशायामप्यज्ञानाभावादेव तन्निवर्तनस्यानपेक्षितत्वात्। नच ब्रह्मविषयज्ञाने सति तदज्ञानाभावः, तद्विषयज्ञानाभावे तु तदवच्छिन्नाज्ञानप्रकाशानुपपत्तिरिति वाच्यम्, स्वप्रकाशतया स्वविषयज्ञानान्तरमन्तरेणापि तदवच्छेदकत्वोपपत्तेः। तदवच्छेदकप्रकाशस्य तद्विरोधित्वे भवत्पक्षेऽप्यज्ञानग्रहणानुपपत्तिप्रसङ्गात्। एवं बाह्यविषयेऽपि प्रमाणोदयात्प्रागज्ञानावच्छेदकतया साक्षिणैव तत्तद्विषयप्रकाशो न विरुद्धः। अतस्सिद्धं भावरूपमज्ञानं प्रत्यक्षसिद्धमिति॥

अनुमानं च—विप्रतिपन्नं मानज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम्, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति। धारावाहिकद्वितीयादिव्यवच्छेदार्थं विप्रतिपन्नशब्दः। स्वरूपभूतज्ञानव्यावृत्त्यर्थं भ्रान्तिभूतज्ञानव्यावृत्त्यर्थं च मानशब्दः। करणप्रतीतिव्युदासाय ज्ञानशब्दः। स्वप्रागभावस्वोत्पादकादृष्टस्वोत्पत्तिप्रतिबन्धकादृष्टस्ववेद्यगतवृत्त्यभिव्यक्तिप्रागभावाः साध्यविशेषणैर्व्यवच्छेद्याः। वस्त्वन्तरशब्दो वैशद्यार्थः। एवं स्वशब्दोऽपि। प्रागभावव्यतिरिक्तेत्येतावता प्रथमचतुर्थविशेषणफलसिद्धौ पृथग्विशेषणनिर्देशो व्यवच्छेद्यविशेषव्यञ्जनाय। धारावाहिकद्वितीयादिष्वनैकान्त्यपरिहारायाप्रकाशितार्थशब्दः। आलोकमध्यारोपितदीपव्यवच्छेदायान्धकारोक्तिः। तत्रापि द्वितीयादिप्रभाव्यवच्छेदाय प्रथमोत्पन्नशब्दः। इन्द्रनीलादिप्रभाव्यवच्छेदाय प्रदीपशब्दः।

आगमश्च—* अनृतेन हि प्रत्यूढाः, तेषां सत्यानां सतामनृतमपिधानम्, * नासदासीन्नो सदासीत्तदानीं तम आसीत्तमसा गूढमग्रे प्रकेतम्, * इन्द्रो मायाभिः पुरुरूप ईयते इत्यादिरिति।

तदेतदतीव स्थवीयः। तथा हि—यदुक्तं भावरूपमज्ञानं प्रत्यक्षेण प्रतीयत इति, तत्र किं ज्ञानविरोधित्वेनैव भाति? उताविरोधित्वेन? नाद्यः, पूर्वोक्तसमस्तप्रसङ्गाविशेषात् विरोधितयाऽपि हि भासमानं प्रतियोगिप्रकाशमन्तरेण न प्रकाशेतैव। ततश्च तद्विषयप्रकाशे सति तद्विरुद्धस्याज्ञानस्य दूरापक्रमणात् कुतस्तद्ग्रहणम्? ननु गृह्यमाणमिदमज्ञानं सामान्यतः स्वप्रतियोगिनिरूपणं न विरुणद्धि, अपि तु विशेषत इति चेत्; अभावरूपाज्ञाने तर्हि कः प्रद्वेषः, सामान्य-

विशेषरूपेण परिहारस्य समत्वात् ? यच्च निषिध्यमानविशेषज्ञानेऽपि प्रतियोगिविषयापेक्षया विरुद्धत्वमुक्तम्; तदपि भावरूपेऽपि तुल्यम्। अन्यथा तदविरुद्धत्वप्रसङ्गात्। तत्र सामान्यतः प्रतियोगिविशेषज्ञानमस्तीति चेत्, तदपि तुल्यम्। गौरवं पुनरधिको दोषः। न हि भावरूपाज्ञानस्य ज्ञानविरुद्धत्वं ज्ञानाभावनिरूपणमन्तरेण घटते। यत्तूक्तमज्ञानावच्छेदकतया प्रतियोगिविषयप्रकाशस्याज्ञानविरोधित्वाभावात् ब्रह्मणोऽन्यस्य वा अज्ञानावच्छेदकत्वेन प्रकाशो न निरुद्ध इति; तदभावपक्षेऽपि किं तथा नाङ्गीक्रियते, अभावप्रतियोगिभूतज्ञानावच्छेदकतया तत्तद्विषयप्रकाशो न विरुद्ध इति ? तद्विषयज्ञानस्य तद्विषयज्ञानाभावेन विरुद्धत्वादिति चेन्न; भावरूपाज्ञानेनापि तद्विषयत्वहेतुकविरोधाविशेषात्। अन्यथा तद्गोचरप्रमाणज्ञानोदयेऽपि तदज्ञानानिवृत्तिप्रसङ्गात्। प्रमाणत्वादेव तस्य तन्निवर्तकत्वमिति चेन्न; स्वरूपप्रकाशांशेन प्रमाणत्वस्य साक्षिप्रकाशेऽप्यविशिष्टत्वात्। अन्यथोत्तरस्यापि तदभावप्रसङ्गात्। वस्तुतः प्रामाण्यस्य च उभयत्रापि त्वयाऽनभ्युपगमात्। प्रतियोगिविषयप्रकाशतामात्रेण तद्विरोधित्वे त्वज्ञानसाक्षिप्रकाशस्यापि प्रतियोगिप्रकाशत्वावश्यंभावेन विरोधाविशेषात्। इदंप्रकाशस्तु शुक्तिरजतसाधारणाकारगोचरत्वेन विरोधाभावान्न रजतभ्रमं निवर्तयति। न चात्रापि तथेति त्वया वक्तुं शक्यम्, निराकारे तदयोगात्, साकारे तु बाह्ये समाधानाविशेषात्। ततश्च वरं यथोपलम्भमुभयस्वीकारः। स्वप्रागभावव्यतिरिक्तेति वदता त्वयापि ह्यभावरूपमज्ञानं व्यवच्छेद्यतया स्वीकृतम्। नापि द्वितीयः, अनुपलम्भात्। मुग्धोऽस्मीत्यादिरूप उपलम्भ उक्त इति चेन्न; तस्यापि ज्ञानविरोधमन्तर्भाव्यैव प्रतीतेः। इतरथा ज्ञानविरोधित्वे प्रमाणाभावात्। अतः प्रध्वंसप्रलयविनाशावसानादिशब्दवन्नञर्थगर्भवाक्यार्थव्युत्पन्ना एव मोहादिशब्दाः। नञनुपलम्भमात्रेण तु स्वरूपतो निरूप्यत्वभ्रमो बालकानाम्। यच्च सर्वैः प्रमाणैर्ज्ञानाभावप्रतीतिर्न स्यादिति; तदप्यसत्, तथा सति ज्ञानाभावाभावेन मानज्ञानानां नित्यत्वप्रसङ्गात्। स्वप्रागभावेत्यादि च व्यर्थम्, अज्ञानं च न कदाचिदपि स्यात्। अतस्सिद्धं भावरूपमज्ञानं न प्रत्यक्षसिद्धमिति।

या चेयमनुमानजीर्णकन्था; तत्र किमिदमप्रकाशितार्थप्रकाशकत्वादित्यत्र प्रकाशकत्वं नाम ? किं ज्ञानत्वम् ? किं वा ज्ञानकारणत्वम् ? अथवा करणानुग्राहकत्वम् ? यद्वा ज्ञानहेतुत्वमात्रम् ? किं वा प्राकट्यहेतुत्वम् ? यद्वा सामान्यतस्साक्षाद्वा परम्परया वा विषयव्यवहारानुगुण्यहेतुत्वमिति ? नाद्यः, दृष्टान्तस्य साधनविकलत्वात्। न द्वितीयः, पक्षे तदभावेन स्वरूपासिद्धिप्रसङ्गात्। दीपस्य च करणभूतेन्द्रियानुग्राहकत्वेन साक्षात्करणत्वासिद्धेः। न तृतीयः, पक्षे तदभावात् स्वरूपासिद्धेरेव। नापि चतुर्थः, इन्द्रियादिष्वनैकान्त्यात्; स्वरूपासिद्धेश्च। न पञ्चमः, प्राकट्यमनभ्युपगच्छतां स्वरूपासिद्ध्यादेरेव। अभ्युपगच्छतामपि दीपप्रभायास्तद्धेतुत्वाभावेन साधनविकलत्वात्। नापि षष्ठः, इन्द्रियादिभिरनैकान्त्यात्। किंच इदमनुमानमप्रकाशितार्थप्रकाशकं न वा ? आद्ये स्वगोचरावरणाज्ञाननिवर्तकमनिवर्तकं वा ? निवर्तकत्वे स्वगोचराज्ञानविषयाज्ञानान्तरावश्यंभावात् तत्प्रकाशेऽपि तथेत्येवं क्रमेणानवस्था। यदि पुनस्तदेवाज्ञानं स्वात्मानमपि तिरस्करोतीति मतम्, तदा तेनैवानुमानेनाज्ञाननिवृत्तिप्रसङ्गः। यत्प्रकाशकं यज्ज्ञानं तदेव तदज्ञानस्य निवर्तकमिति च व्याहतमेव। अनिवर्तकत्वे तु निष्प्रयोजनत्वमनुमानकुसृतिनिर्माणमहाप्रयासस्य। तेनानैकान्तिकत्वप्रसङ्गश्च। तस्यापि पक्षीकारे तस्मिन्नंशे बाधः। द्वितीयेऽपि प्रकाशितप्रकाशकत्वं वा विवक्षितम्, अप्रकाशकत्वमेव वा ? पूर्वत्र निष्प्रयोजनत्वम्, येनैवादौ प्रकाशितं तेनैव कृतत्वात्। उत्तरत्राप्रमाणत्वमेवानुत्पत्तिलक्षणमिति।

यच्चागमैस्तत्सिद्धिरित्युक्तम्; तदपि न, तत्रानिर्वचनीयत्वाभिमताज्ञानप्रसङ्गाभावात्। सदसद्वैलक्षण्यादेर्व्याघातग्रस्तत्वाच्च। अनृतशब्दस्यात्र ज्ञानसङ्कोचहेतुभूतकर्मविषयत्वात्। तद्धि ज्ञानविरोधित्वेन बहुश्रुतिस्मृतिसिद्धम्। ऋतशब्दश्चानुकूले कर्मणि प्रयुक्तः * ऋतं पिबन्तावित्यादिषु; ततो नञस्तदन्यत्वेन तद्विरोधित्वेन वानृतशब्दः। अत्र सांसारिकं पुण्यमपि मुमुक्षोः प्रतिकूलतया पापमिति तदप्यनृतशब्देन संगृहीतम्। * न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्त इति श्रुतेः। तमश्शब्दोऽप्येवं मूलप्रकृतिविषय इति * तम एकीभवति, * यस्य तमश्शरीरम् * आसीदिदं तमोभूतमप्रज्ञातमित्यादिभिस्सिद्धम्। सदसदभावोक्तिश्च व्यष्टिचेतनाचेतनविलयपरा। नह्यत्र सदसदन्यत्वमुक्तम्। विलयोऽप्यवस्थान्तरमेव, न बाधः। एवं मायाशब्दोऽपि प्रकृतिविषय एव श्रुत्या समर्थितः * अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः, * मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति। प्रकृतिशब्दस्य रूढ्या पदार्थविशेषे वृत्तेः उपादानार्थत्वादपि तस्य प्रथमं बुद्ध्युपारोहः। अत्र हि मायाशब्देनाभिहितं किमित्यपेक्षायां प्रकृतिरित्युच्यते, न पुनः प्रकृतेर्मिथ्यात्वं प्रतिपाद्यते। न हि संभवति मिथ्याभूतस्योपादानत्वम्। मायाशब्दश्च विचित्रसृष्टिकरार्थवाची, असुरराक्षसास्त्रादिषु प्रयोगात्। * देवमायेव निर्मितेत्यादिषु प्रयोगदर्शनाच्च। अत एवैन्द्रजालिकादिष्वपि मायाशब्दो मन्त्रौषधादिविचित्रसृष्टिकरार्थत्वादेव, एकरूपप्रवृत्तनिमित्ते संभवति विरुद्धार्थकल्पनायोगात्। तत्र मुख्यामुख्यविभागहेत्वभावाच्च। मायामूलभ्रान्तिविषयेषु क्वचिन्मायाशब्दो लक्षणया, न पुनर्मिथ्यार्थत्वात्। मायामृगोऽपि मारीचसृष्टिरेव हि तात्त्विकी। न चेद्रामशरेणास्य निधनं नोपपद्यते॥ शुक्तिरजतादिषु मायाशब्दप्रयोगादर्शनाच्च। ननु भावान्तरमभाव इति भवतां सिद्धान्तः, ततश्च भावरूपमेवाज्ञानं भवद्भिरभ्युपगन्तव्यम्, तत्र तत्किमर्थं निषिध्यत इति। अत्र ब्रूमः—यदर्थं भवता प्रसाध्यते तदर्थमस्माभिः प्रतिषिध्यते। यदि भवता ज्ञानाभावात्मकमज्ञानं भावरूपमिति प्रसाध्यते तदा न वयं प्रतिक्षिपामः। अस्ति हि नित्यस्य प्रमाणशब्दाभिलपनीयविषयाभिमुख्यावस्थाविशेषाद्विलक्षणः यत्प्रागभावादिशब्दाभिलप्योऽवस्थाविशेषः। न ह्येतावदेव भवता साध्यते, अपि तु ज्ञानप्रागभावातिरिक्तः कश्चित्सदसदनिर्वचनीयो जगत्कारणत्वब्रह्मतिरोधायकत्वादिविशिष्टः प्रसाध्यते। सच निष्प्रमाणकत्वादस्माभिः प्रतिक्षिप्यते॥

॥ इति शतदूषण्यां भावरूपाज्ञानभङ्गवादः एकोनचत्वारिंशः॥ ३९॥

॥ अथ जीवाज्ञानभङ्गवादः चत्वारिंशः॥ ४०॥

अखिलचिदचिदन्तर्यामितां प्राप्य तिष्ठन् स्वयमखिलगुणाढ्यस्सूरिभिर्नित्यसेव्यः।
निजचरणनिषेवावैभवेनापराधान् व्यपनयति नराणां व्यक्तमेनं भजामः॥

ये पुनः प्रसक्तं ब्रह्मणोऽविद्यादिरूपमसाध्यदोषं भिषज्यन्त इवाहुः—न ब्रह्मणि साक्षादज्ञानसंसारादिगन्धः, अविद्यान्तःकरणप्रतिबिम्बितस्य तस्य जीवत्वात्; जीवाश्रयत्वाच्चाज्ञानसंसारादेः। यद्यपि मूलबिम्बस्वरूपेण प्रतिबिम्बेनापि भवितव्यम्, तथापि यथा मणिकृपाणदर्पणादिप्रयुक्ताल्पत्वमलिनत्वतरलत्वादयो धर्माः प्रतिबिम्बैकवर्तिनो वस्तुतस्तदभिन्नेऽपि मुखे न सम्बध्यन्ते, नापि परस्परं संकीर्यन्ते, तथाऽत्रापि ब्रह्मप्रतिबिम्बभूतजीवगता दोषा ब्रह्मणि न सम्बध्यन्ते, प्रतिजीवं नियताश्च भवन्ति। वस्तुतो ब्रह्माव्यतिरिक्तानां जीवानां कथमशुद्धिरिति चेन्न; मुखाव्यतिरिक्तानां

प्रतिबिम्बानां कृपाणाद्युपाधिकश्यामत्वादिवदौपाधिकाशुद्धिसंभवात् । अत एव जीवेश्वरबद्धमुक्तशिष्याचार्यादिव्यवस्थाश्च सिध्यन्ति । नन्वविद्यास्वरूपलाभे तत्र जीवाख्यप्रतिबिम्बप्रकाशः, तत्प्रकाशे तदाश्रयाविद्याक्लृप्तिरित्यन्योन्याश्रयणं प्रकटमिति चेन्न; उभयोर्बीजाङ्कुरन्यायेनानादितया परिहारात् । नच प्रासादनिगरणादिवदवस्तुरूपत्वेनानुपपन्नतैकवेषाया-मविद्यायामितरेतराश्रयत्वादयो वस्तुदोषाः क्षतिमावहन्ति । यद्वा स्वरूपत एवाविद्यानां तत्कल्पितानां च जीवानामनादि-त्वमस्तु, एकजीववाद इवानेकजीववादेऽपि तदविरोधात् । मुखप्रतिबिम्बश्यामत्वादेरिव जीवाशुद्धेरपि मिथ्यात्वात् ज्ञान-निवर्त्यत्वमप्युपपद्यते । प्रतिबिम्बस्थानीयानामपि जीवानां परमार्थब्रह्माव्यतिरेकात् । * अनेन जीवेनात्मनाऽनुप्रविश्येत्यपि परब्रह्मणो जीवतादात्म्यानुसन्धानमप्युपपद्यते । अत एव * क्षेत्रज्ञं चापि मां विद्धीत्यादिकमपि निर्व्यूढम् । एवं परमा-र्थतो ब्रह्माव्यतिरेकेऽपि काल्पनिकभेदाश्रयणेन व्यवस्थेत्युक्तमिति ॥

अत्र ब्रूमः—तत्र तावदन्तःकरणप्रतिबिम्बाद्यसंभवस्यान्यत्र प्रतिपादनात्तन्निबन्धनजीवभेदादिक्लृप्तिरपि निर्मूलैव, अथाऽपि वदामः । किं जीवानामकल्पितेन स्वाभाविकेन रूपेणाविद्याश्रयत्वम्? उत तदतिरिक्तेन तस्मिन् कल्पितेन? अथ कल्पिताकारविशिष्टस्वरूपेण? न प्रथमः, ब्रह्माज्ञानवादप्रसङ्गात् । न द्वितीयः, जडाज्ञानवादावतारात्; जडस्य नित्याज्ञत्वेन तन्निवृत्तेरशक्यत्वप्रसङ्गाच्च । जडस्य स्वाज्ञाननिवृत्तिवाञ्छानुपपत्तेः, जडस्याज्ञानप्रसङ्गाभावाच्च, अज्ञाननिवृत्तेः पुरुषार्थत्वमपि न स्यात् । नच तृतीयः, तत्र किं स्वकल्पिताकारविशिष्टे वा स्वयमविद्या तिष्ठेत्, अविद्यान्तरकल्पिताकारविशिष्टे वा? पूर्वत्र आत्माश्रयत्वमन्योन्याश्रयणं वा, स्वकल्पिताकारविशिष्टस्वरूपलाभे सति स्वात्मलाभवर्णनात् । उत्तरत्राप्युक्तचोद्यावतारे अविद्यान्तरापेक्षायामन्योन्याश्रयचक्रकानवस्थान्यतमापत्तेः । किंच सर्व-जीवभेदकल्पिकाविद्या किमेका, उत प्रतिजीवं भिन्ना? पूर्वत्र एकमुक्तावविद्याविनाशात् सर्वमुक्तिप्रसङ्गे कथं बद्धमुक्त-व्यवस्था? अन्यस्यामुक्तत्वे त्वविद्यास्थित्यवश्यंभावात् कथमेकस्यापि मोक्षः? उत्तरत्रापि जीवभेदे स्थिते तन्मूलाविद्या-भेदक्लृप्तिः, तन्निश्चयाच्च जीवभेदक्लृप्तिरिति परस्पराश्रयणम् । नच सत्यो जीवभेदस्त्वयेष्यते । नच तदा तत्सिद्ध्यर्थ-मविद्याकल्पनमपेक्ष्यते । प्रत्यक्षादिसिद्धजीवभेदानुसारेण तत्कल्पकाविद्याभेदक्लृप्तौ को विरोध इति चेन्न; प्रत्यक्षादि-सिद्धस्य जीवभेदस्य अस्मन्मतेन सत्यतायां तन्मूलभूताविद्याकल्पनवैयर्थ्यात् । ब्रह्माज्ञानवादेन तु जीवभेदस्य मिथ्या-त्वेनैव जीवैक्यात् तद्भेदक्लृप्त्यर्थाविद्याभेदक्लृप्त्यनुपपत्तेः । उभयपक्षोल्लङ्घिनः परमार्थस्य वाऽपरमार्थस्य वा भवदभि-मतस्य जीवभेदस्याप्यसिद्धेः । किंच याभिरविद्याभिर्जीवाः कल्प्यन्ते किं तासां ब्रह्मैवाश्रयः? उत जीवा एव? आद्ये ब्रह्माज्ञानमपरिहार्यम् । द्वितीये भिन्नजीवाश्रयाविद्याभेदसिद्धौ जीवभेदः, तत्सिद्धौ च तदाश्रयाविद्याभेदसिद्धिरिति मिथ-स्संश्रयः । अथ जीवभेदकल्पनार्थं नाविद्यान्तरापेक्षा, बद्धमुक्तव्यवस्थासिद्ध्यर्थं कल्पिताभिरेवाविद्याभिर्जीवभेदस्यापि सिद्धेरिति चेन्न; प्रागुक्तपरस्पराश्रयानतिलङ्घनात् । बीजाङ्कुरन्यायेन तदुल्लङ्घनमिति चेत्? किं याभिरविद्याभिर्ये जीवाः कल्प्यन्ते तासां तज्जीवाश्रयाणामेव बीजाङ्कुरन्यायमिच्छसि? उत पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्तरोत्तरजीवक्लृप्तिः? न प्रथमः, तत्र बीजाङ्कुरन्यायस्यासंभवात्; न हि यदङ्कुरोत्पादकं यद्बीजं तदेव तस्यारंभकम् । नापि द्वितीयः, जीवानां भङ्गुरत्वादिप्रसङ्गेन जीवनित्यत्वाजडत्वादिश्रुतिविरोधात्; अकृताभ्यागमकृतविप्रणाशादिप्रसङ्गाच्च । सन्तानैक्यादविरोध इति चेन्न; क्षणभङ्गवादस्य दुर्निरसनत्वप्रसङ्गात् । जीवब्रह्मणोरत्यन्तवैदेशिकत्वप्रसङ्गाच्च । अथ ब्रह्मण एव पूर्वपूर्वजीव-भावाश्रयाभिरविद्याभिरुत्तरोत्तरजीवभावप्रकल्पनमिति मन्यसे, तदपि दत्तोत्तरम्, अविद्याप्रवाहकल्पितजीवभावस्यापि

तद्धत्प्रवाहानादित्वे ध्रुवरूपताभङ्गप्रसङ्गात्। नच तदिष्टम्, आमोक्षाज्जीवभावस्य ध्रुवत्वाभ्युपगमात्। यत्त्ववस्तुरूपायामविद्यायां नेतरेतराश्रयत्वादयः वस्तुदोषाः क्षतिमावहन्तीति, तद्ब्रह्माज्ञानवादे दुर्घटत्वपक्षदूषणेनैव निरस्तम्। एवं च सति ब्रह्माज्ञानवादे मुक्तानामज्ञानसद्भावे को विरोधः? शुद्धविद्यास्वरूपे तत्र तेजसीव तमसः कथमशुद्धेस्संभव इति चेन्न; अवस्तुभूतायामसंभवस्यैव त्वया गुणत्वस्वीकारात्। अन्यथा कथं प्रागुक्तेषु बाधकेषु जीवत्सु जीवाश्रयाविद्याक्लृप्तिः? तेन जीवाश्रयाविद्यामपि दुर्घटय, सुघटय वा ब्रह्माश्रयाविद्यामेव। यत्तु मिथस्संश्रयादिपरिहाराय स्वरूपत एव जीवकल्पिकाविद्यानां तत्कल्पितजीवानां चानादित्वमस्त्वित्यन्वारूढम्, तत्र किमेकैकजीवकल्पिकाविद्या जीवानां जीवान्तरदर्शने कारणम्, नवा? पूर्वत्र जीवान्तरदर्शनस्यापि भ्रमरूपत्वात् तयैवानन्तजीवक्लृप्तिरनिवार्या। तथाच जितमेकजीववादेन, लाघवात्; दोषाणां चाविशिष्टत्वात्। उत्तरत्र जीवानां परस्परवार्तानभिज्ञत्वप्रसङ्गेन वादिप्रतिवादिशिष्याचार्यादिव्यवस्थाभङ्गः॥

यत्पुनरुक्तं प्रतिबिम्बश्यामतादेरिव जीवाशुद्धेरपि मिथ्यात्वाज्ज्ञाननिवर्त्यत्वमुपपद्यत इति; तदप्यसत्, अशुद्धिनाशे तत्तदशुद्धिहेतुभूताविद्याख्योपाधिविगमे च प्रतिबिम्बस्थानीयो जीवस्तिष्ठति वा, न वा? तिष्ठति चेदाविद्यकभेदस्थितेरनिर्मोक्षः। न चेज्जीवस्य स्वरूपोच्छित्तिरेव मोक्षः स्यादित्यवैदिकमतावतारः। मुखात्मना प्रतिबिम्बमिव ब्रह्मात्मना जीवस्तिष्ठतीति चेत्; किं प्रतिबिम्बस्यात्मा मुखम्? तथा सति सत्यमिथ्यैक्यादिप्रसङ्गात्। अत एव दार्ष्टान्तिकमपि निरस्तम्। किंच यस्य ह्यपुरुषार्थरूपो दोषः स्वनिष्ठतया प्रतिभासते तस्य तदुच्छेदापेक्षा स्यात्, तत्र किं बिम्बस्थानीयेन स्वात्मनैव स्वगताशुद्धिं पश्यति ब्रह्म? उत प्रतिबिम्बस्थानीयेन जीवात्मना? उतान्येन केनचिदात्मना? अथान्य एव कश्चित्पुरुषस्थानीयः पश्यतीति? न प्रथमः, ब्रह्माज्ञानवादप्रसङ्गात्। न द्वितीयः, स्वाशुद्धिनिवृत्तेः प्रतिबिम्बवत्स्वनाशाविनाभावेन तदुच्छेदापेक्षाविरहप्रसङ्गात्। मुख्यबिम्बप्रतिबिम्बभावविवक्षायां च द्वयोरपि कल्पयोर्मुखादिवद्दोषप्रतिभासाधारत्वायोगाच्च, तद्वदेवाचेतनत्वात्। न तृतीयचतुर्थौ, असंभवादनभ्युपगमाच्च। किंच जीवकल्पनारूपो भ्रमः किमविद्यायाः? उत जीवस्यैव? अथ ब्रह्मणः? नाद्यः, अचेतनत्वात्तस्याः। न द्वितीयः, भ्रमविषयतयैव स्वसिद्धौ भ्रमोदयात्प्राक्स्वरूपासंभवेन निराश्रयभ्रमोदयासंभवात्। स्वभ्रमाश्रयतया पूर्वमेवात्मसद्भावे त्वात्माश्रयः। कल्प्यकल्पनायाः स्वकल्पकत्वं च शुक्तिरजतादिषु न क्वचिद्दृष्टमिति विरुद्धोपलम्भबाधः। न तृतीयः, ब्रह्माज्ञानवादप्रसङ्गादेव। यत्पुनरुक्तम्—जीवात्मनामपि वस्तुतो ब्रह्माव्यतिरेकात् *जीवेनात्मनेति ब्रह्मणो जीवतादात्म्यानुसन्धानं युक्तमिति; तदप्यसारम्, जीवानुसन्धानस्य कल्पितत्वे ब्रह्माज्ञानवादावतारात्। अकल्पितत्वे सयूथ्यदूरापक्रमणप्रसङ्गात्। अनुभयात्मत्वे त्वनुसन्धानासिद्धेरेव ब्रह्मणो बहुभवनसङ्कल्परूपेक्षणतत्पूर्वकविचित्रसृष्टिजीवात्मत्वानुसन्धानतत्पूर्वनामरूपव्याकरणादिवदनादिसमस्तव्यापारनिरोधेन समन्वयाविरोधलक्षणोक्तसमस्तार्थविलयप्रसङ्गात्। अत एव भास्करोऽस्तमितः, ब्रह्मणो जीवतादात्म्यानुसन्धाने स्वात्मनो दुःखाद्यनुसन्धानस्य दुर्वारत्वात्; तदभावे बहुभवनसङ्कल्पानुपपत्तेरिति। यादवप्रकाशमते तु प्रतिसर्गदशायां सन्मात्रपरिशेषस्य ब्रह्मणश्चिदचिदीश्वरसृष्ट्यनुरूपसङ्कल्पप्रसङ्गो न संभवतीति विशेषः। प्राचीनकल्पान्ते भविष्यत्सृष्टिसङ्कल्प इति चेन्न; तथात्वे प्रमाणाभावात्, प्रतिसर्गमनन्तरसङ्कल्पश्रुतेर्बाधकाभावाच्च। अतो यावद्ब्रह्मणः परस्परं च जीवानामत्यन्तभेदः पारमार्थिको नाङ्गीक्रियते न तावज्जीवेश्वरबद्धमुक्तादिव्यवस्थासिद्धिरिति।

जीवाज्ञानविभागादीश्वरचिदचिद्विभागक्लृप्तिरभूत् । इति कल्पयतां जीवः कारणमीशस्तु तत्कार्यम् ॥ तेनाद्वैतवादिनां पारम्पर्यवैपरीत्यक्लृप्तिः पाषण्डपदपर्यवसानभूमिरिति परित्यजन्ति सन्तः ॥

॥ इति शतदूषण्यां जीवाज्ञानभङ्गवादः चत्वारिंशः ॥ ४० ॥

॥ अथ अविद्यास्वरूपानुपपत्तिवाद एकचत्वारिंशः ॥ ४१ ॥

अविद्याख्यावद्यं फलमपि तदीयं भगवतो विदूरे यस्येति श्रुतिशिरसि जोघुष्यत इदम् ।
यदज्ञानाद्बन्धो भवति न तु यद्वैभवविदां स मे देवः श्रीमांश्छमयतु सदा चेतसि तमः ॥

यः पुनरयं स्वप्रकाशचिन्मात्रैकरसस्य ब्रह्मणो विश्वभ्रमहेतुरविद्याख्यो दोषः, स किं परमार्थः, उतापरमार्थः ? आद्येऽपि ब्रह्मणो भिन्नोऽभिन्नो वा ? भिन्नत्वे परमार्थद्वित्वप्रसङ्गः । अभिन्नत्वे च ब्रह्मण एव विश्वभ्रमहेतुदोषत्वमुक्तं स्यात् । तथाच ब्रह्मणो नित्यत्वेन नित्यभ्रमप्रसङ्गः । सहकारिसद्भावात् कदाचिद्भ्रमः, तद्वैकल्यात्तु पश्चान्निवृत्तिरिति चेत् ; तर्हि प्राप्ताप्राप्तविवेकेन सहकारिदोष इत्युक्तं भवति । तत्रापि हि परमार्थापरमार्थविकल्पानुपपत्तिर्दुर्वारा । कश्चासौ सहकारित्वेन विवक्षितः ? तत्त्वमस्यादिवाक्यजन्यतत्त्वज्ञानप्रागभाव इति चेन्न ; भावरूपाज्ञानप्रतिपादनप्रयासवैयर्थ्यप्रसङ्गात् । तस्य च प्रागभावस्य न ब्रह्मस्वरूपता युक्ता, तत्त्वज्ञानाद्ब्रह्मनिवृत्तिप्रसङ्गात् । ब्रह्मव्यतिरिक्तस्य तु मिथ्यात्वेन तद्दर्शनहेतुदोषत्वं ब्रह्मण एव स्यात् । ब्रह्मणश्च नित्यत्वेन तस्य नित्यप्रकाशप्रसङ्गेन तत्त्वज्ञानानुत्पादप्रसङ्गः । अपरमार्थभावरूपदोषपक्षेऽप्ययमेव दोषः । अनादित्वान्न दोषान्तरापेक्षेति चेत् ; अनादित्वेऽपि तयोः कारणापेक्षा परिहर्तुं शक्यते, न पुनरपरमार्थस्य प्रतिभासे दोषाख्यनिबन्धननैरपेक्ष्यम् । अन्यथा दोषमन्तरेण प्रकाशमानस्य ब्रह्मवत्सत्यत्वप्रसङ्गात् । दोषस्य दोषान्तरापेक्षायामनवस्थाप्रसङ्गात् । स्वपरनिर्वाहकोऽयं दोष इति चेन्न ; प्रपञ्चस्यैव दोषमन्तरेणाध्यासप्रसङ्गात् । मिथ्यार्थस्य दोषमन्तरेण प्रतिभासोऽनुपपन्न इति चेन्न ; अविद्याया इव स्वस्यैव स्वप्रतिभासहेतुदोषत्वकल्पनामात्रेण तत्प्रतिभासोपपत्तेः । स्वस्यैव स्वहेतुत्वमनुपपन्नम्, अध्यासोत्पत्त्योरविशेषादिति चेन्न ; अनाद्यविद्याध्यासे तयोर्विशेषस्य भवतैव स्वीकृतत्वात् । नह्यसावनध्यस्ता, सत्यत्वतुच्छत्वयोरन्यतरप्रसङ्गात् । नचाध्यस्ताऽप्युत्पन्ना, अनादित्वसिद्धान्तभङ्गप्रसङ्गात् । न च साऽप्यादिमती, प्रपञ्चाविशेषप्रसङ्गात् । तथा च किं तया, तद्वदेवानियमतोऽपि प्रपञ्चस्य स्वतोऽध्यासोपपत्तेः ? अध्यासोत्पत्त्योरविशेषाभ्युपगमेऽप्यविद्यायां स्वाध्यासमूलदोषतयाऽभ्युपगतायां स्वहेतुत्वव्याघातो दुस्त्यजः ।

किंच यदि निर्दोषस्यापि ब्रह्मणोऽविद्या प्रकाशेत, नित्यं तत्प्रकाशप्रसङ्गः, अविशेषात् । निवृत्तत्वात्पश्चान्न प्रकाशिष्यत इति चेन्न ; भवत्पक्षे प्रकाशनिवृत्तेरेव प्रकाशमाननिवृत्तिरूपत्वात् तयोर्हेतुसाध्यभावनिर्देशानुपपत्तेः । तत्त्वज्ञानोदयात्पश्चादप्रकाशः, पूर्वं तु तदभावात् तस्याः प्रकाश इति चेत् ; तथा सति तत्त्वज्ञानप्रागभाव एव ब्रह्मणोऽविद्यादर्शननिबन्धनमिति प्रपञ्चदर्शनस्यापि स एव प्रयोजकः किं न स्यात् ? तथा च किमन्तर्गडुनाऽविद्यया ? अभावस्य विचित्राध्यासहेतुत्वं न दृष्टमिति चेत् ; भावस्य वा घटादेः क्व दृष्टम् ? तिमिरादिदोषाणां दृश्यत इति चेत्, विशेषाग्रहादेरभावरूपस्यापि तद्दृश्यत इति तुल्यम् । अभ्युपगतं च सर्वैरपि भ्रमेषु भेदाग्रहो निबन्धनमिति । अभावस्य पूर्वापरकालविशिष्टत्वात्तत्तत्कालविशेषप्रतिनियतकार्यविशेषाध्यासाय तादृशमहिमशालिन्यविद्या कल्पनीयेति चेत् ; कल्पि-

ताऽपि सा कथमनादिरातत्त्वज्ञानमनुवर्तमानानि तत्तत्कालनियतानि च कार्याण्यध्यसेत्? स्वभावादिति चेत्, स किमभावे नाङ्गीक्रियते? कल्पनालाघवं तु तत्र विशेषः। विवर्तपारम्पर्यादविद्यायास्तदुपपत्तिः, न त्वभावस्य निर्विकारस्येति चेत्; सा किं विवर्तपरंपराऽविद्यायास्स्वरूपम्? उत तत्कार्याण्येव? यद्वा वस्त्वन्तराणि? नाद्यः, उक्तदोषानतिक्रमात्; स्वरूपत्वाविशेषात् सर्वदा सर्वाध्यासप्रसङ्गात्। न द्वितीयः, निर्वाह्यस्यैव निर्वाहकत्वानुपपत्तेः। नच तृतीयः, अनभ्युपगमात्। अभ्युपगमेऽपि तत्सत्यमिथ्यात्वादिविकल्पशतदौस्थ्यापातात्। सत्यत्वे सद्वितीयत्वादिप्रसङ्गात्, मिथ्यात्वेऽपि तत्परम्परायां प्रतिनियतकालविचित्राध्यासे तथाविधपरम्परान्तरक्लृप्तिप्रसङ्गात्। पूर्वपूर्वविवर्तानामेव उत्तरोत्तरहेतुत्वान्नासौ दोषः, यथा ब्रह्मपरिणामानां प्रकृतिपरिणामानां वा तत्तदुत्तरोत्तरपरिणामहेतुभाव इति चेन्न; तथाऽप्यविद्याकल्पनस्य निर्मूलत्वप्रसङ्गात्, ब्रह्मण्येवान्यनिरपेक्षानाद्यध्यासप्रवाहवैचित्र्येण सर्वाध्याससिद्धेः। तर्हि परिणामपरंपरासामर्थ्यमाश्रित्य परिणामिद्रव्यापह्नवप्रसङ्ग इति चेन्न; प्रत्यक्षादिविरोधप्रसङ्गात्। नचात्रापि तथा, तद्विषयप्रमाणानां प्रत्येकं प्रतिक्षेपात्। न तथा निरधिष्ठानभ्रमापत्तिरिति भेतव्यं भवता, ब्रह्मण एव सर्वविवर्ताध्यासाधिष्ठानत्वाभ्युपगमात्। नह्यपरमार्थभूताया अविद्याया अधिष्ठानतया स्वीकारश्शक्यः, तथा सति ब्रह्मण एवासिद्धिप्रसङ्गे माध्यमिकसमाजमध्यमध्यास्स्व। ब्रह्मसत्यत्वश्रुत्यादिबलात्तदभ्युपगमः, नतु विवर्ताधिष्ठानत्वादिति चेन्न; विकारतदुपादानप्रकृत्यादिसत्यत्वश्रुतिबलादेव प्रकृतितत्परिणामपरम्पराभ्युपगमप्रसङ्गेनाविवादप्रसङ्गात्। तत्सत्यत्वप्रतिपादकश्रुतिबाधे ब्रह्मसत्यत्वप्रतिपादिकाया अपि तस्या बाधितुं शक्यत्वात्। किंच किमविद्या प्रकाशते? न वा? नचेत्तुच्छत्वम्, निरुपाख्यस्यैव तुच्छत्वात्। प्रकाशते चेत्, स प्रकाशः किमविद्यास्वरूपम्? उत ब्रह्मस्वरूपम्? अथ तस्यास्तस्य वा धर्मः? उतान्यः कश्चित्? न तत्राद्यः, स्वप्रकाशत्वेन ब्रह्मवत्सत्यत्वप्रसङ्गात्। न द्वितीयः, तन्नित्यत्वेन नित्यमविद्याप्रकाशादनिर्मोक्षप्रसङ्गात्। नापि तृतीयः, तयोर्ज्ञातृत्वानभ्युपगमात्। अध्यस्तज्ञातृत्वाभ्युपगमे कः प्रतीकार इति चेन्न; तस्याप्यध्यासस्याविद्याहेतुकत्वेऽन्योन्याश्रयणात्, प्रकाशाध्यासस्य तदधीनत्वात्, तस्याश्च प्रकाशाधीनसिद्धित्वात्। ब्रह्महेतुकत्वे तस्य नित्याध्यासप्रसङ्गात्। अहेतुकत्वे पूर्ववत्प्रपञ्चाध्यासस्यैवाहेतुकत्वप्रसङ्गादादिमदनादिवैषम्यस्याप्रयोजकत्वोक्तेः। निर्दोषप्रकाशगोचरत्वप्रयुक्तदोषाणां च प्रागनुवृत्तेः। नापि चतुर्थः, सत्यस्य तस्यानभ्युपगमात्, मिथ्याभूतस्य त्वध्यासेऽन्योन्याश्रयप्रसङ्गात्।

एतेनाविद्याप्रवाहपक्षोऽपि निरस्तः, प्रपञ्चप्रवाहस्यैव हेतुकार्यभावेन स्थित्युपपत्तौ निरर्थकाविद्याप्रवाहकल्पनायोगात्, उपलम्भाद्यसिद्धेश्च।

किंचेयमविद्या निराश्रया? साश्रया वा? पूर्वत्र ब्रह्मवत् सत्यत्वप्रसङ्गः। शशशृङ्गवद्वा तुच्छत्वप्रसङ्गः। उत्तरत्राप्यसावाश्रयः किं ब्रह्मस्वरूपम्? उत तदेवोपहितम्? अथवा स्वतन्त्रोऽन्यः? न प्रथमः, नित्यशुद्धस्याशुद्धिविरोधात्। अन्यतरमिथ्यात्वे वा उभयमिथ्यात्वे वा तदविरोध इति चेन्न; शुद्धमिथ्यात्वेऽपसिद्धान्तशास्त्रवैयर्थ्यादिप्रसङ्गात्। अशुद्धमिथ्यात्वे तन्निवृत्तिनैरपेक्ष्यप्रसङ्गात्। कदाचिदपि तस्या अभावात् तत्प्रतिभासनिवृत्तेरपेक्षेति चेत्; प्रतिभासस्यापि मिथ्यात्वे प्रसङ्गसाम्यात्। तत्सत्यत्वानभ्युपगमात्। मिथ्यात्वेऽपि सत्यत्व इवापुरुषार्थत्वाविशेषात् तन्निवृत्त्यपेक्षेति चेत्; तर्ह्यपुरुषार्थाश्रयत्वलक्षणाशुद्धत्वस्य दुस्त्यजत्वात्तन्मिथ्यात्वोक्तिरुपच्छन्दनमात्रे पर्यवस्यति। उभयमिथ्यात्वे तूभयविधदोषापत्तिः। व्याघातादयश्च स्युः। नापि द्वितीयः, अविद्याश्रयस्य ब्रह्मण उपाधिमत्त्वे सत्यमिथ्याविकल्पिताविद्यान्तरादिपरिग्रहेऽपसिद्धान्तानवस्थाविरोधादिदोषसमुन्मेषात्। नापि तृतीयः, ब्रह्माज्ञानवादपरित्यागादिप्रसङ्गात्। तस्या-

प्याधारनिरूपणेऽनवस्थादिप्रसङ्गाच्च । स्यादेतत्, ब्रह्मवत्स्वयमेवाविद्या स्वाश्रयेति ; तन्न, आश्रयाश्रयित्वयोरेकप्रतिसम्बन्धिकयो रूपादिभेदमन्तरेण विरुद्धत्वात् ; ब्रह्मणस्तु स्वाश्रयत्वं नास्त्येव । आश्रयान्तरनिषेधाभिप्रायेण स्वाश्रयत्वोक्तिः । अस्तूपाधिभेदेनेति चेन्न ; तस्याप्याधाराकारोपाधेरनाधारत्वानुपपत्तेः तदाधारोपाध्यन्तरादिभेदकल्पनेऽनवस्थानात् । आधेयाकारतादात्म्येन तस्यापि स्वाधेयत्वे तूपाधिभेदवाचोयुक्तिविलोपप्रसङ्गात् । ननु मिथ्याभूतायाः किमाश्रयविकल्पेन, अध्यासस्याधिष्ठानमात्रं ह्यपेक्षितमिति चेन्न ; भवत्पक्षे सर्वत्राश्रयाणामध्यासाधिष्ठानमात्रत्वात् । घटादिसंसर्गोऽपि भूतलादावध्यस्त एव, अन्यथा तत्रैव तत्सत्यत्वप्रसङ्गात् । किंचापरमार्थभूतेयमविद्याप्रतीतिर्नाहङ्कारतद्वृत्तितदवच्छिन्नदृशिष्वन्यतमा, तेषां तदपत्यत्वात् । अन्यथाऽपि काल्पनिकत्वेन मूलदोषान्तरापेक्षायामनवस्थानात् । न च ततोऽन्या काचिद्दृशिः ? तस्या ब्रह्मस्वरूपत्वे ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गात् । तदतिरिक्तसंविदन्तरासिद्धेश्च ।

अपि च प्रकाशमानेयमविद्या किं ब्रह्मात्मना प्रकाशते ? उत तदन्यत्वेन ? यद्वाऽन्यत्वानन्यत्वसाधारणात्मना ? नाद्यः, सहि ब्रह्मस्वभावनिह्नवेन वा ? स्वस्वभावनिह्नवेन वा ? उभयोस्समुच्चयेन वा ? उभयनिह्नवेन वा ? आद्ये ब्रह्मस्वभावनिह्नवे प्रकाशतत्त्वविलयेन तदधीनसत्ताकमविद्यादिकमपि विलीनमेव स्यादिति वृथा शास्त्रादिपरिश्रमः, प्राप्यनिवर्त्यायाः प्रसङ्गस्यापि दूरापास्तत्वात् । अविद्यास्वभावनिह्नवे तु ब्रह्ममात्रप्रकाशे अपवर्गबन्धवैषम्यविरहप्रसङ्गेन पूर्वोक्तदोषानतिपातः । समुच्चयस्तु न संभवत्येव, विद्याविद्ययोर्वैरस्य शाश्वतिकत्वात् । अन्यथा विद्यानिवर्त्यत्वमविद्यायाः क्वचिदपि न स्यादिति स्थितमन्यत्र । उभयनिह्नवे तु उभयविधदोषस्यानायाससिद्धिः स्यात् । स्यादेतत्, यथा दर्पणमुखयोस्स्वभावमनपह्नुत्य दर्पणे मुखाध्यासः, यथा वा अतिरस्कृतोभयस्वभावो दीपकज्जलसंभेदः, यथा वा दीपालोकमण्डलस्य तद्बाह्यसन्तमसमण्डलस्य च सामीप्याविरोधः, एवमयमविद्याब्रह्मणोरनपह्नुतोभयस्वभावयोरेवानादिरासत्तिविशेष इति किमस्मान् वर्णनावशेन वशीचिकीर्षसि ? मैवम्, सर्वत्र तादात्म्याध्यासे भेदाग्रहं संसर्गाध्यासे त्वसंसर्गाग्रहमन्तरेण क्वचिदपि भ्रमासिद्धेः । दर्पणमुखाध्यासेऽप्यन्तरालाग्रहणादेव नैरन्तर्यभ्रमः । कथं तर्हि दर्पणस्य दूरस्थताग्रहणमिति चेत् ; श्रूयतामवधानेन, दर्पणाभिमुखप्रवृत्तेन नायनतेजःप्रवाहेण सान्तरालदर्पणग्रहः, दर्पणप्रतिहतेन तु प्रतिस्रोतसा तेनागृह्यमाणान्तरालमुखस्वरूपमात्रग्रहः, तत एव दर्पणे मुखमिति भ्रमः, तद्व्यवहारमात्रं वा जायते । ज्ञानद्वितयं न दृश्यत इति चेत् ; किं धारावाहिकधीसन्ततौ तद्भेदः ? अत्र तु तत्त्वधीभ्रमयोरितरेतरव्यवहिता धारेति विशेषः । यौगपद्यप्रतीतिस्तु शैघ्र्यातिशयेन कालकलाभेदाग्रहणात् । अतः न क्वचिदपि प्रत्यक्षविरुद्धाकारस्य क्लृप्तिः । दीपकज्जलसंभेदे तु न विरोधगन्धोऽपि, तत्राध्यासप्रसङ्गाभावात् वध्यघातकभावादिविरोधासिद्धेः । मूर्तयोस्समानदेशत्वविरोधस्त्वंशभेदेन सूक्ष्मवैदेश्यात्परिहृतः । आलोकसन्तमसमण्डलयोरपि सादेश्य एव विरोधः, नतु सामीप्ये । नचात्रापि ब्रह्माविद्ययोः परस्परसमीपदेशत्वादिस्वीकारो युक्तः ; परिच्छिन्नत्वादिप्रसङ्गात् । अतो नाविद्याब्रह्मासक्तिर्वक्तुं शक्यते । एवमन्यान्यप्यनन्तानि विकल्पदूषणानि अविद्यास्वरूपमनुबध्नन्ति ।

ननु किमनेनानिष्टापादनप्रपञ्चेन, प्रासादनिगरणादिवदवस्तुभूतायामविद्यायां नैते वस्तुदोषाः क्षतिमावहन्ति ; यदाहुः * दुर्घटत्वमविद्याया भूषणं न तु दूषणमिति ; अतोऽविद्याऽप्यनुपपन्नेति स्थितौ ब्रह्माद्वैतमकण्टकमिति चेत् ; हन्त निष्प्रयोजनः प्रयासस्तव माध्यमिकादिमतनिरासे । तेऽपि यदि सर्वशून्यत्वमपि दुर्घटम्, ततोऽपि सर्वशून्यत्वमेव प्रतिष्ठितमितीष्टप्रसङ्गतां यदि ब्रूयुः, तदानीं किं वक्ष्यसि ? यदि सर्वशून्यत्वं दुर्घटम्, तदा परपक्षविजयप्रसङ्गः, ततश्च

दुर्घटपक्षं परित्यज्य परपक्षः स्वीक्रियतामिति ब्रूयामिति चेत्; तर्ह्यस्माभिरप्येवमभिधाने भव निरुत्तरः। तदेतत्सर्वमुपक्षिप्तं भाष्ये—*निर्विषया निराश्रया स्वप्रकाशेयमनुभूतिः स्वाश्रयदोषवशादनन्ताश्रयमनन्तविषयमात्मानमनुभवतीत्यत्र किमयं स्वाश्रयदोषः परमार्थभूतः, उतापरमार्थभूतः, इति विवेचनीयमित्यादिना। आरम्भणाधिकरणे च व्यस्तृणीत ॥

॥ इति शतदूषण्यामविद्यास्वरूपानुपपत्तिवादः एकचत्वारिंशः ॥ ४१ ॥

॥ अथ मायाविद्याविभागभङ्गवादः द्विचत्वारिंशः ॥ ४२ ॥

य एको दुर्लङ्घ्यत्रिगुणनिजमायानिगलितैर्विचित्रैः क्षेत्रज्ञैर्विहरति सरोजासहचरः।
जगत्सर्गक्षेमक्षपणपरिकर्मीणमहिमा दयालुर्देवोऽसौ तुरगवदनस्तारयतु नः ॥

ये तु ब्रह्मणो दोषं परिजिहीर्षन्तः ब्रह्माज्ञानं मायाशब्देनोपचरन्ति, तान्प्रति ब्रूमः, मायाविद्ययोः को विशेष इति। परव्यामोहनहेतुर्माया, स्वव्यामोहनहेतुरविद्येति चेत्, किं परेषामदर्शनेऽपि तद्व्यामोहनम्? उत तद्दर्शने? न प्रथमः, असंभवात्; न हि मायाविनः परानपश्यन्तस्तन्मोहनमिच्छन्ति, मोहयन्ति वा; मायाविशब्दस्य परव्यामोहनाभिसन्धिमत्पुरुषविशेषवाचित्वात्। अन्यथा मोहनहेतूनां मणिमन्त्रौषधीनामपि मायावित्वप्रसङ्गात्। नापि द्वितीयः, तद्धि परदर्शनं ब्रह्मणः किं स्वभावतः? उताज्ञानेन? अथ तयैव मायया? नाद्यः, निर्दोषदर्शनविषयतया परेषां सत्यत्वप्रसङ्गात्; ब्रह्मणि ज्ञातृत्वस्य स्वाभाविकत्वप्रसङ्गाच्च। न द्वितीयः, ब्रह्माज्ञानवादावतारात्। तथा [च] सति तेनैवाज्ञानेन सर्वसंभवे तद्व्यतिरिक्तमायाभ्युपगमानुपपत्तिश्च। न च तृतीयः, परेषु दृष्टेषु तन्मोहनमात्रोपकरणत्वान्मायायाः परदर्शनहेतुत्वायोगात्। अथ ब्रह्मगतायाः मायायास्त्वयमतिशयो धर्मिग्राहकसिद्धः यत्परदर्शनतद्व्यामोहनयोर्हेतुत्वमिति चेन्न; मिथ्याभूतपरदर्शनहेतुत्वांशेन तस्या एवाविद्यात्वस्यापि दुर्वारत्वात्।

अथ मन्यसे, विपरीतदर्शनहेतुरविद्या, यथा शुक्तिरजतादिदर्शनहेतुः, माया तु न ब्रह्मणो विपरीतदर्शनहेतुः, मिथ्याभूतस्य ब्रह्मव्यतिरिक्तस्य मिथ्यात्वेनैव बोधनात्; नहि शुक्तिरजतमिथ्यात्वग्राहकस्याविद्यात्वम्, तथा सति बाधकज्ञानानां सर्वेषामप्यविद्यामूलत्वप्रसङ्गात्; भवदभिमतसर्वज्ञस्यापि सर्वेषां जीवानां भ्रमस्वरूपं विजानतस्तत्तद्भ्रमविषयैस्सह तत्तद्भ्रमग्रहणादविद्यावत्त्वप्रसङ्गात्; न हि निर्विषयज्ञानग्रहणं संभवति; न चेश्वरस्य भ्रमानभिज्ञता, असर्वज्ञत्वप्रसङ्गात्; आश्रितव्यामोहनिबर्हणार्थप्रवृत्तिशून्यत्वप्रसङ्गाच्च। अतो मिथ्याभूतं ब्रह्मव्यतिरिक्तं मिथ्यात्वेनैव बोधयन्ती ब्रह्मणो माया नाविद्येति; तदप्यसारम्। किमिदं ब्रह्म स्वव्यतिरिक्तं मिथ्याभूतं स्वभ्रमसिद्धतया मिथ्यात्वेन, उत परभ्रमसिद्धतया, अथ भ्रमसिद्धत्वमजानदपि मिथ्यात्वमात्रं जानातीति? न प्रथमः, ब्रह्माज्ञानस्य दुस्त्यजत्वात्। न द्वितीयः, परेषामदर्शने परभ्रमसिद्धत्वादर्शनात्; परदर्शने पुनरविद्यास्वीकारापाताच्च। परानपि परभ्रमसिद्धतया ब्रह्म पश्यतीति चेन्न; परान्तरस्वीकरणेऽनवस्थानात्। तेषामेव परेषां भ्रमेण तत्सिद्धत्वदर्शनेऽपि तथाविधविशिष्टपरदर्शने स्वस्याविद्यापेक्षणात्। नहि वन्ध्यासुतभ्रमसिद्धो वन्ध्यासुत इति ज्ञाने वन्ध्यासुतस्यैव भ्रमः, न तु तद्विज्ञातुरिति वक्तुं शक्यम्। न च तृतीयः, भ्रमसिद्धत्वाज्ञाने मिथ्यात्वस्य दुर्ग्रहत्वात्। न ह्यसत्त्वमात्रं मिथ्यात्वम्, अपि तु स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वादिकम्। परेषां मिथ्यात्वदर्शने च न ब्रह्मणः परव्यामोहनेच्छा संभवति; न हि प्रतिबिम्बवन्ध्यासुतचित्र-

पुरुषादीनां व्यामोहनाय मायाविनोऽपि मायां प्रयुञ्जते ; प्रयुञ्जाना वा कथं स्वयमनुन्मत्ताः स्युः । आहुश्च—* अचेतनेषु मायावी मायामोचक एव वा । उभावुन्मत्तपदवीमश्नुवाते मनीषिणाम् ॥ इति । ततश्च ब्रह्मापि मिथ्यात्वेनावधारितपरव्यामोहनार्थं मायां प्रयुञ्जानमुन्मत्तपर्यायमिव स्यादिति तदेव ब्रह्माज्ञानम् । अथ स्यात्—यद्यपि परव्यामोहने परदर्शनमवश्यंभावि, मिथ्याभूतपरदर्शनं च न दोषमन्तरेण ; तथाऽपि नात्र ब्रह्मणः परदर्शनहेतोर्मायाख्यदोषस्याविद्यात्वम् , अपुरुषार्थापरमार्थदर्शनहेतुरविद्येति तल्लक्षणात् ; ब्रह्मणस्तु व्यामोहनीयान् परान् प्रकाशयन्त्यपि माया नापुरुषार्थतया प्रकाशयति, स्वप्नसिद्ध [भोगो] लीलोपकरणादिवत्पुरुषार्थतयैव प्रकाशयति, अतस्तस्या नाविद्यात्वमिति ; तदपि न, पुरुषार्थहेतोर्दोषत्वाभावात् । दोषत्वे त्वपुरुषार्थतान्वयस्यावर्जनीयत्वात् । न ह्यनिष्टं किंचिदनन्तर्भाव्य क्वचिदपि दोषत्ववर्णनम् , अन्यथा तत्तत्सामग्र्या तत्तत्कार्योत्पत्तौ सर्वेषां कारणानां दोषत्वमेव वा गुणत्वमेव वा स्यादिति गुणदोषविभागाभावप्रसङ्गात् ।

ननु किमिहेष्टानिष्टचिन्तनेन ? स्वाभाविकाकारो गुणः, औपधिकाकारस्तु दोषस्स्यात् , यथा द्विचन्द्रदर्शनदशायां चक्षुषस्तिमिरादि ; नच द्विचन्द्रदर्शने कश्चिदपुरुषार्थस्पर्शः, इति चेत् ; मैवम् , द्विचन्द्रदर्शनहेतोरपि पारम्पर्येणानिष्टमन्तर्भाव्यैव दोषत्ववर्णनात् । अन्यथा निधिदर्शनादिहेतोरञ्जनादेरप्यस्वाभाविकतया दोषत्वप्रसङ्गात् । यदि च द्विचन्द्रदर्शनहेतोर्दोषत्वमविद्यात्वं च न स्यात् , कथं तन्निरासाय प्रेक्षावन्तः प्रयस्यन्ते । न ह्यस्पृष्टानिष्टगन्धं किंचिद्विमृश्यकारिणां निरसनीयम् । माभूत्तर्हि माया ब्रह्मणो दोषः, पुरुषार्थैकपर्यवसायितया गुण एव तु स्यादिति चेन्न ; सा किमुच्छेदनीया न वा ? पूर्वत्रापि किं ब्रह्मेच्छया, अन्यतो वा ? यदि ब्रह्मेच्छया कथं पुरुषार्थैकपर्यवसायिता ? न ह्यस्पृष्टानिष्टं निरसनीयमित्युक्तम् । न चान्यतस्तदुच्छेदः, ब्रह्ममायामोहितैरल्पज्ञानशक्तिभिः क्षेत्रज्ञैस्सर्वज्ञस्यापरिमितशक्तेर्ब्रह्मणोऽनन्तपुरुषार्थसाधिकायाः विश्वेन्द्रजालपिञ्छिकाया अपहर्तुमशक्यत्वात् । नच स्वतः कदाचिन्मायोच्छेदिनीति वाच्यम् ; अहेतुकविनाशेन क्षणभङ्गापातात् ; अविशेषादितःपूर्वमेव तदुच्छेदप्रसङ्गाच्च । ततश्चानुच्छेदपक्षाविशेषे नित्यैव माया ब्रह्मस्वरूपानुबन्धिनी स्यात् । अस्तु मायायाः नित्यत्वम् , तथाऽपि न ब्रह्माज्ञानप्रसङ्ग इतीष्टप्रसङ्गत्वमेवेति चेन्न ; ब्रह्मस्वरूपानुबन्धिनी हि माया किं ब्रह्मवत्परमार्थभूता, उतापरमार्थभूता ? नाद्यः, अद्वैतपरतया युष्माभिरभ्युपेतैः श्रुतिशतैर्विरोधप्रसङ्गात् ; अपसिद्धान्ताच्च । अथ पुनर्मायामपि ब्रह्मस्वरूपेऽन्तर्भाव्य श्रुतिविरोधादिकं परिजिहीर्षसि ; तथा च सति ब्रह्मण एव मायाशब्देनोपचारात्तस्य च स्वमात्रप्रकाशचिन्मात्रवपुषः परदर्शनहेतुत्वाभावात्परव्यामोहनादिकमेव न स्यात् । परदर्शनमपि ब्रह्मणः स्वभाव इति चेदिष्येत, हन्त जितं सगुणवादेन । नापि द्वितीयः, नित्यायास्तस्या मिथ्यात्वस्य साधयितुमशक्यत्वात् । न ह्यबाधितमपि मिथ्येति वक्तुं शक्यम् , बाधिताऽपि द्विचन्द्रादिबुद्धिवन्नित्यमनुवर्तेत इति चेन्न ; भवत्पक्षे बाधितानुवृत्त्यसम्भवस्योक्तत्वात् । नित्यस्यापि मिथ्यात्वे कथम् * अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते इति पराशरादिवचनं निर्वक्ष्यसि ? ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गं कथं परिहरिष्यसि ? अबाधादिति चेन्न ; तत्रापि यत्किंचिद्बाधकस्य सुवचत्वात् । प्रमाणाप्रमाणविभागस्य त्वयैव शिथिलीकृतत्वात् ।

किंचेयं माया परमार्थत्वेन ब्रह्मणः प्रकाशते ? उतापरमार्थत्वेन ? पूर्वत्र सिद्धं ब्रह्माज्ञानम् । उत्तरत्र कथं तया क्रीडितुमिच्छेत् ? कथं च तन्मूलां मिथ्यात्वेनैव प्रतीयमानां क्रीडामभिनिविशेत ? नहि क्रीडोपकरणानि तन्मूलां क्रीडां तदुभयप्रतिभासस्वरूपं चापरमार्थतया जानतां प्रेक्षावतां क्रीडारसो निष्पद्यते । बालोन्मत्तादयः कथं प्रतिबिम्बा-

दिभिः क्रीडन्तीति चेन्न ; तेषां तदानीं प्रतिबिम्बादेस्तत्प्रतिभासस्य च मिथ्यात्वग्रहणाभावात् । अस्त्विहापि बालादिवद्ब्रह्म, तथा च स्मरन्ति * बालः क्रीडनकैरिव, * क्रीडतो बालकस्येव चेष्टां तस्य निशामय इत्यादीति चेन्न ; उन्मत्तवदीश्वरस्याविस्रम्भणीयत्वप्रसङ्गात् ; स्वयं व्यामुह्यतः परव्यामोहनसामर्थ्यासंभवाच्च ; मुमुक्षुभिरुपेक्ष्यत्वप्रसङ्गाच्च । बालकदृष्टान्तस्तर्हि कथमिति चेत् ; सर्वथा सादृश्यस्य दृष्टान्तानङ्गत्वात् । अन्यथा बालत्वादेरपि प्रसङ्गात् । किंच यस्य जीवब्रह्मणोरद्वैतं तत्त्वम्, तस्य कथं जीवाज्ञाने ब्रह्माज्ञानं न स्यात्? अथ यदि जीवो ब्रह्मणस्तत्त्वतो भिन्नः, ततः कथमैक्यज्ञानान्मोक्ष इत्यादिकं घटेत? अतो यस्य मते माया सत्या, मायाविनश्च भगवतो न भ्रमः, व्यामोहनीयाश्च जीवाः परस्मादत्यन्तभिन्नाः सत्याश्च, परेण च यथावद्दृश्यन्ते, तस्यैव मायाविद्याविभागेन ब्रह्माज्ञानं सुपरिहरम् ; न तु निर्विशेषैकचिन्मात्रवादिन इति ॥

॥ इति शतदूषण्यां मायाविद्याविभागभङ्गवादः द्विचत्वारिंशः ॥ ४२ ॥

अथ निवर्तकानुपपत्तिवादः त्रिचत्वारिंशः ॥ ४३ ॥

अनन्यानां पुंसामनवधिकभक्तिस्थितिजुषामविद्याध्वंसो यच्चरणवरिवस्यापरिणतेः ।
तदेकं सत्संवित्सुखमवधिदूरीकृतगुणं हताशेषावद्यं हयवदनमीडीमहि महः ॥

प्रतिष्ठितोऽयमर्थः प्रमाणपरतन्त्राणां—यदुत कर्मयोगज्ञानयोगपरिशोधितान्तःकरणस्य तत्तद्वर्णाश्रमोचितनित्यनैमित्तिकोपसंहृतिनिषिद्धपरिहारनिष्ठस्य अनवरतविहितध्यानार्चनादिक्रमपरिणतनिरतिशयप्रीतिरूपतापन्ननिदिध्यासननिरुद्धसुहृद्द्विषत्संक्रमणीयपूर्वोत्तरपुण्यपापस्य, फलोन्मुखकर्मपर्यवसाननिर्मुक्तस्थूलसूक्ष्माचित्संसर्गस्य तथाविधभजनाराधितपरमपुरुषप्रसादादेव सार्वज्ञ्यापरपर्याया निश्शेषाविद्यानिवृत्तिरिति । ये पुनरद्वैतविज्ञानादेव ब्रह्माज्ञाननिवृत्तिरिति जल्पन्ति, तान्प्रति ब्रूमः कथंभूतमिदमद्वैतज्ञानमिति । किं ब्रह्मस्वरूपभूताज्ज्ञानाद्भिन्नम्, उताभिन्नम्, यद्वा भिन्नाभिन्नम्, उतानुभयात्मकम्, उताशक्यवेदनकथम्भावं किञ्चिदिति । न प्रथमः, तद्धि निर्विषयम्, सविषयं वा? पूर्वत्र ज्ञानत्वमेव हीयेत । वृत्तिरूपं हि ज्ञानं सविषयमेवेति भवतामपि सिद्धान्तः । उत्तरत्रापि कस्तस्य विषयः? किं ब्रह्मस्वरूपम्, उत तदेवाविद्याशबलम्, यद्वा तद्व्यतिरिक्तं तस्य मिथ्यात्वं वा, अथवाऽन्यदेव किञ्चिदिति । नाद्यः, आत्मस्वरूपस्येव ज्ञानस्य तस्यापि भ्रमनिवर्तकत्वायोगात् ; उभयोरपि यथावस्थितब्रह्मस्वरूपप्रकाशरूपत्वाविशेषात् । ननु स्वरूपप्रकाशोऽध्यासोपाधिकाधिष्ठानप्रकाशात्मकः, यथेदं रजतमित्यत्र इदमर्थप्रकाशः, विषयप्रकाशस्त्वध्यासनिवर्तकः, यथेदमर्थस्य शुक्तिरिति प्रकाशः, इति चेन्न ; दत्तोत्तरत्वात् । नहीदमिति प्रकाशस्य शुक्तिरिति प्रकाशस्य चात्यन्तसमानविषयता, इदमिति प्रकाशस्य शुक्तिरजतसाधारणाकारविशिष्टगोचरत्वात् ; शुक्तिरिति प्रकाशस्य रजतव्यावर्तकशुक्तित्वविशिष्टविषयत्वात् । अन्यथा तस्यापि भ्रमानिवर्तकत्वप्रसङ्गात् । नचात्राप्याकारभेदोऽधिको वृत्तिज्ञानेन बोध्यत इति वाच्यम् ; तस्याकारस्य सत्यत्वे सगुणसिद्धान्तोररीकरणप्रसङ्गात् । मिथ्यात्वे भ्रान्तिज्ञानत्वादेव सुतरामनिवर्तकत्वप्रसङ्गात् । वसुन्धरारन्ध्रबोधे मालाभुजङ्गनिवृत्तिवदुपपद्यत इति चेन्न ; तस्यैव भ्रमरूपत्वेन तद्वदेव स्वयं स्वविषयाबाधकत्वात् सर्वत्र भ्रमनिवृत्त्यसिद्धिप्रसङ्गात् । बाधकान्तरगवेषणायामनवस्थानात् । स्वपरनिर्वाहकसमाधेरपि बाधकज्ञानविषयीभूतप्रपञ्चविरोधिमिथ्याकारा-

ध्यासस्वरूपप्रकाशातिरिक्तप्रकाशाभावेन तस्याकारस्य बाध्यत्वासिद्धेरेवेति परिहृतत्वात्। स्वस्यैव स्वविषयार्थबाधकत्वे व्याघाताच्च। अस्तु तर्ह्यभिज्ञाप्रत्यभिज्ञयोरिव स्वरूपतद्विषयज्ञानयोस्साध्यभेद इति चेन्न; दत्तोत्तरत्वात्। तत्रैतत्स्यात्, यथा देवदत्तगोचरत्वाविशेषेऽप्यसावित्यवगाहमानाभिज्ञा न देवदत्तभेदभ्रमं निवर्तयति, सोऽयमिति प्रत्यभिज्ञाबुद्धिस्तु तत्प्रतिक्षेपाय प्रगल्भते। तद्वदत्रापि स्वरूपप्रकाशस्सोऽहमिति कल्पिताकारप्रकाशश्चेति चेन्न; दत्तोत्तरत्वात्। तत्राप्यभिज्ञाप्रत्यभिज्ञयोः प्रकाश्याकारभेदोऽस्ति। अन्यथा अभिज्ञाप्रत्यभिज्ञयोर्भेदासिद्धिप्रसङ्गात्। को वा भवन्तमन्तरेण स इत्यादिकोल्लेखिनीं प्रत्यभिज्ञामसावित्येतावन्मात्रोल्लेखिन्याऽभिज्ञया सह धारावाहिकवदत्यन्तसमानविषयामभिमन्येत। अत्रापि आकारातिरेकाभ्युपगमे तु दत्तमुत्तरम्। प्रकाशातिरेकिविषयित्वतदभावाभ्यां वैषम्यमिति चेत्; किं ततः? बाधकत्वाबाधकत्वे प्रत्यप्रयोजकत्वात्। वृत्तिज्ञानस्य हि बाधकत्वं यथावस्थितब्रह्मस्वरूपप्रकाशात्मकत्वेन, नतु वृत्तित्वाद्याकारेण, तथासति विरोधिप्रकाशातिरिक्तवृत्तित्वाद्याकारबाध्यत्वेन मुद्गरादिनिवर्त्यसत्यसर्पघटादेरिव प्रपञ्चस्यापि सत्यत्वप्रसङ्गात्। एतेनाविद्याशबलं तदेव विषय इति दत्तोत्तरम्, साक्षिप्रत्यक्षवदेव भ्रमोपकारकत्वप्रसङ्गात्। अन्यथा साक्षिप्रत्यक्षस्यापि भ्रमनिवर्तकत्वप्रसङ्गेन प्रपञ्च [प्रति] निर्भासस्याप्यनुदयप्रसङ्गात्। साक्षिप्रत्यक्षमपि हि अविद्याप्रकाशात्मकं स्वप्रकाशं च। ब्रह्मव्यतिरिक्तमात्रगोचरत्वपक्षे स्वयं तद्भ्रमरूपत्वात्तद्बाधकरूपत्वसंभावनापि नास्ति। नहि शुक्तिकलधौतधीरेव कलधौतधियमवधुनोति। तन्मिथ्यात्वविषयपक्षस्तु तदा शोभते, यद्यधिष्ठानयाथात्म्यग्रहणमन्तरेणापि तन्मिथ्यात्वं सुग्रहं स्यात्। याथात्म्यग्रहरूपता च दूषितैव। किंच, इदं निवर्तकज्ञानं स्वविषयं ब्रह्मव्यतिरिक्तमिथ्यात्वं किं मिथ्यात्वेन गृह्णाति उत सत्यत्वेन, उतानिर्द्धारितविशेषात्मनेति। आद्ये व्याघातः, मिथ्यात्वस्य च मिथ्यात्वग्रहणे प्रपञ्चस्य सत्यत्वेन प्रकाशप्रसङ्गात्; स्वप्नावगतपितृमरणमिथ्यात्वेन पितृसत्यतावत्, सम्यग्रजतमिथ्यात्वमिथ्यात्वेन रजतसत्यतावच्च। ब्रह्मव्यतिरिक्तत्वोपाधिक्रोडीकारवशात् प्रपञ्चस्य तन्मिथ्यात्वस्य च मिथ्यात्वमेकहेलया लभ्यते, यथा भवतां प्रपञ्चस्य तत्सत्यत्वस्य च सत्यत्वमिति चेन्न; विरोधाविरोधाभ्यां वैषम्यात्। न हि रजतमिथ्यात्वमिथ्यात्वेऽपि रजतमपि मिथ्याभूतं दृष्टम्। नच शुक्तिरजतमिथ्यात्वे तन्मिथ्यात्वं मिथ्याभूतं दृष्टम्॥

तदयं संग्रहः—मिथ्यात्वस्य च मिथ्यात्वे मिथ्यात्वं बाधितं भवेत्। सत्यत्वस्य तु सत्यत्वे सत्यत्वं स्थापितं भवेत्॥ ननु वन्ध्यासुततन्मरणयोरिव द्वयोरपि मिथ्यात्वमुपपद्यत इति चेन्न; निराश्रयतया तत्र धर्मिमिथ्यात्वोपपत्तेः। नहि तत्रापि वन्ध्यासुतमिथ्यात्वं वा तन्मरणमिथ्यात्वं वा मिथ्याभूतं दृष्टम्। द्वितीये तु ब्रह्मव्यतिरिक्तस्य प्रपञ्चमिथ्यात्वस्य सत्यत्वेन प्रकाशनात् सद्वितीयत्वभ्रान्तित्वादिदोषो दुस्तरः। ब्रह्माव्यतिरेके तु दत्तमुत्तरम्। तृतीयेऽप्यसम्भवः, ब्रह्मव्यतिरिक्तत्वग्रहणे प्रयोजकज्ञानवतो मिथ्यात्वेनैव ग्रहणप्रसङ्गात्; प्रयोजकज्ञानाभावे प्रपञ्चमिथ्यात्वस्याप्यग्रहणप्रसङ्गात्। ब्रह्मव्यतिरेकेणाग्रहणे गृह्यमाणस्य मिथ्यात्वस्य ब्रह्मणश्चागृह्यमाणव्यतिरेकयोश्शुक्तिरजतयोरिवैक्येन ग्रहणप्रसङ्गात्। ततश्च सत्यत्वेन प्रकाशप्रसक्तेर्न साधारणाकारग्रहणसंभवः। अन्यस्य कस्य चिद्विषयत्वमपि परमार्थापरमार्थविकल्पेन दत्तैरेव दूषणैर्दूषितम्, परमार्थत्वे ब्रह्मव्यतिरेके द्वैतप्रसङ्गात्, तदव्यतिरेकेऽन्यत्वस्यैवासिद्धिप्रसङ्गात्। अपरमार्थत्वे अविद्यातत्कार्यकोट्यन्तर्भावेन बाध्याकारतया प्रागुक्तदोषापातात्। बहिर्भावे तद्बाधकगवेषणप्रसङ्गात्। किंच ब्रह्मव्यतिरिक्तं तत् बाधकं ज्ञानं सत्यमसत्यं वा? असत्यत्वे त्विदमपि बाध्याकारकोटौ घटमानं कथमिव तद्बाधकं स्यात्? आकारभेदादविरोध इति चेन्न; बाधकाकारभेदस्यापि बाध्यत्वाभ्युपगमात्। अन्यथा तस्य सत्यत्वप्रसङ्गात्। तत्रा-

प्याकारभेदाभ्युपगमेऽनवस्थानात्। प्रमाणस्थापके[ने] प्रमाणविशेषस्थापकाकारविशेषस्यापि स्थाप्यत्ववदविरोध इति चेन्न; स्थापकाकारविशेषस्थितेस्स्थाप्यसामान्यस्थित्युपयुक्तत्वात्। बाधकाकारविशेषबाध्यत्वस्य विश्वबाधासिद्धिपर्यवसितत्वात्।

किंचैतन्निवर्तकं ज्ञानमद्वैतश्रवणादिमात्रसमुद्भवमिदानीन्तनमेव ज्ञानम्? एष्यद्वा किमपि? पूर्वत्र भवन्मतश्राविणां तत्क्षणादेव प्रपञ्चविलयप्रसङ्गः; यद्वा आत्मैक्याद्विश्वेषामेव। बाधितानुवृत्तिस्तु दूषितैव। उत्तरत्रापि तत्किं पूर्वाविशिष्ट-विषयमपि निवर्तकम्? उत विशिष्टविषयम्? अविशिष्टविषयत्वे तु पूर्वस्यापि निवर्तकत्वप्रसङ्गः। तस्य तदभावे उत्तर-स्यापि तन्न स्यात्। विशिष्टविषयत्वं तु न संभवत्येव। ब्रह्मणि प्रकाशिष्यमाणपरमार्थाकारान्तरानभ्युपगमात्। अपर-मार्थाकारान्तरप्रकाशस्य प्रागुक्तन्यायेन दूषितत्वात्। प्रपञ्चमिथ्यात्वव्यवसायस्य च भवन्मतश्रद्धाजडानामिदानीमपि सिद्ध-त्वात्। परोक्षरूपमिदानीन्तनज्ञानमपरोक्षभ्रमबाधकं न भवति, अपरोक्षं तु भविष्यज्ज्ञानं बाधनायालमिति चेन्न; परो-क्षापरोक्षशब्दाभ्यामविशदविशदत्वविवक्षायामनतिरिक्तविषयतयैव तथाविधभेदासिद्धेः। करणभेदाधीनभेदस्य चाकिंचि-त्करत्वात्। न चास्य करणभेदः, भविष्यतोऽपि विशदज्ञानस्य भवद्भिर्वाक्यजन्यत्वाभ्युपगमात्।

एतेन वेदान्तनैरर्थक्यमपि फलितम्, यतः कुतश्चिदनुमानादेरप्यद्वैतज्ञानसम्पादनोपपत्तेस्तदतिरिक्तस्य कस्य-चिदंशस्य वेदान्तेऽपि भवद्भिः प्रतिपादनानभ्युपगमात्। सत्यस्य प्रामाण्यस्योभयत्रानभ्युपगमात्, व्यावहारिकस्य तु तस्योभयत्र सम्मतत्वात्, उपासनादिपरवेदान्तभागस्य तत्तत्फलविशेषपर्यन्ततया बन्धकत्वेन बन्धनिवृत्तिं प्रति प्रतिकूल-त्वाभिधानात्। अतो यदा प्रपञ्चमिथ्यात्वानुमानादिकं न विश्वबाधकं तदा वेदान्तवाक्यान्यपि न तद्बाधकानि स्युः, तदविशिष्टज्ञानजनकत्वात्; यदि तानि बाधकानि स्युः, तदा तदविशिष्टादनुमानादेरपि तद्बाधः स्यादिति निरर्थक-स्तत्त्वावेदको वेदान्तभागः। एवञ्च वेदान्तमन्तरेणापि यथावस्थितब्रह्मस्वरूपज्ञानसम्पादनोपपत्तेः शारीरकापशूद्राधि-करणानारम्भप्रसङ्गश्च। ननु भेदवासनाविक्षिप्तचेतसां बुबुत्सोद्बोधने शास्त्रोपयोग इति चेन्न; सांख्यसौगतसमयेऽपि तत्त्वविचारमारभमाणैः पुरुषैस्तापत्रयाभिहतानां भेदवासनाविक्षिप्तचेतसामपि तत्त्वबुबुत्सोत्पत्तेः। नच प्रतिपत्तृभेदेन शास्त्रमनुमानं च सप्रयोजनमिति वाच्यम्, सर्वात्मना साधकबाधकप्रमाणसंभावनावैदेशिके विषये शास्त्रार्थतत्त्वस्य मीमांसितत्वात्। अतस्तत्रभवतां महत्तरेषु मतगह्वरेषु महावाक्यश्रवणमपि बालव्यामोहनमात्रमित्यापद्यते। अतो न निवर्तकज्ञानं ब्रह्मणो भिन्नम्।

नापि द्वितीयः, ब्रह्मस्वरूपस्य विश्वनिवर्तकत्वे तस्यानादित्वेन प्रपञ्चाध्यासाभावप्रसङ्गेन प्रपञ्चप्रतिभासस्या-प्यनुदयप्रसङ्गात्। एकस्यैव दण्डादेर्घटादिकारणत्वतन्नाशकत्ववदुपपद्यत इति चेत्; यौगपद्ये विरोधात्, क्रमे तु सह-कार्यवश्यंभावात्। नहि दण्डो घटकारणसामग्रीमध्यमध्यासीन एव घटं नाशयति, अपि तु सिद्धे घटे अभिघातरूप-संयोगादिकमपेक्ष्य। अत्रापि तर्हि ब्रह्म स्वरूपेणाध्यासानुगुणम्, अध्यासमेव तु निवर्त्यं सहकारित्वेनापेक्ष्य तन्निवर्त-कम्, निवर्तनशक्तस्यापि निवर्त्यासिद्धौ निवृत्तिजनकत्वायोगादिति चेन्न; तथाप्यनादेरध्यासस्य चिरतरानुवृत्तिभङ्ग-प्रसङ्गात्। एवं पूर्वपूर्वक्षणानुवृत्तिभङ्गे कदाचिदपि नाध्याससिद्धिः। किञ्च परिशुद्धं ब्रह्मस्वरूपमध्यासानुगुणम्, अशुद्धं तु तन्निवर्तकमिति महदिदमुपपादनम्। अस्तु तर्हि सामग्र्यभावादितःपूर्वमनुत्पन्नं सामग्रीसम्पत्तिदशायामुत्पत्स्यमानान्तः-करणवृत्तिविशेषमेव सहकारित्वेनापेक्ष्य ब्रह्मैव निवर्तकम्; तन्न, प्राप्ताप्राप्तविवेकेनान्तःकरणवृत्तेरेव निवर्तकत्व-

प्रसङ्गात् । तथा च सति ब्रह्मस्वरूपान्तर्गतत्वपक्षव्याघातः । अत एव न तृतीयः, अपसिद्धान्ताच्च । किञ्च तस्य सत्यत्वे भेदांशेन ब्रह्मणस्सद्वितीयत्वप्रसङ्गः । मिथ्यात्वे त्वभेदांशेन ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गः । नित्यत्वानित्यत्वविकल्पेनापि दूषणमूह्यम् । चतुर्थस्तूभयप्रतिक्षेपरूपोऽनिर्वचनीयोक्तदूषणनयेनोभयसिद्ध्यनतिरेकात् दूषणेनैव दूषितः । पञ्चमस्तु परिशिष्यते । तथाभूतं किं तज्ज्ञानं यथाकथंचिदपि प्रतीतिपदवीं नावतरति, अथावतरति? पूर्वत्र किं साधनदूषणप्रयासेन? उत्तरत्र कथंचिदपि उक्तकोटिबहिर्भावासिद्धेः न पृथग्दूषणीयमवशिष्टमिति । किंच निवर्तकज्ञानं निवर्तिष्यते न वा? पूर्वत्र तन्निवृत्तेरेवागन्तुकत्वाद्ब्रह्मस्वरूपातिरिक्ताविद्यास्थितिप्रसङ्गः । उत्तरत्र ब्रह्मस्वरूपातिरिक्तनिवर्तकज्ञानसद्भावेनैवाविद्यास्थितिरनिवार्या । अतो यदविद्याया निवर्तकत्वेन सम्मतं तदेव स्वात्मना स्वनिवृत्त्या वा तामेव स्थापयतीति विपरीतापत्तिरिति । निवर्तकज्ञानप्रध्वंसोऽपि निवर्तिष्यत इति चेत्; तर्हि तत्तन्निवर्तकनिवृत्त्यनुवृत्तिप्रसङ्गेन ब्रह्मणो यावदात्मभाविन्यविद्यानुवृत्तिस्स्यादिति वैपरीत्यस्थैर्यापत्तिः । इत्यलं हिताहितविपर्यस्तचेतसां शोच्यानां निग्रहेणेति ॥

॥ इति शतदूषण्यां निवर्तकानुपपत्तिवादः त्रिचत्वारिंशः ॥ ४३ ॥

॥ अथ निवृत्त्यनुपपत्तिवादः चतुश्चत्वारिंशः ॥ ४४ ॥

सत्त्वानीव विरुद्धजातिजनुषा सिद्धानि सिद्धाश्रमे वैरं यत्र मिथस्त्यजन्ति विधयस्सर्वैर्निषेधैस्सह ।
तं रङ्गेशयमङ्गसङ्गिकमलालक्ष्येश्वरप्रक्रियं शान्तावद्यमनन्तमङ्गलगुणं देवं प्रपद्येमहि ॥

येयं ब्रह्मणः श्रवणमनननिदिध्यासनादिक्रमपरिणतविशदाद्वैतवाक्यार्थविज्ञानहेतुका निश्शेषाविद्यानिवृत्तिरुच्यते, सा किमध्यासरूपा, नवा? पूर्वत्र कथं निश्शेषाविद्यानिवृत्तिः, अध्यासरूपायां तस्यां सत्यां तन्मूलविद्याया अपि विद्यमानत्वात्, उपादानमन्तरेणोपादेयस्थित्ययोगात् । आत्मोपादाना साऽस्त्विति चेन्न; आत्मनः परिणामित्वप्रसङ्गात् । सत्योपादानायाश्च सत्यत्वेन सद्वितीयत्वप्रसङ्गात् । नच दोषमन्तरेणाध्यासो भवतामपीष्टः, तथा सत्यविद्याकल्पनस्यैव निर्मूलत्वप्रसङ्गात् । यदि सा ब्रह्मवदविद्यावच्च उपादानरहिता, तदा कथं तया सहाविद्या तिष्ठेत्? स्थिता वा किमिति पश्चान्नावतिष्ठते? निवृत्तिरपि ब्रह्मव्यतिरिक्तत्वैकप्रयोजकप्रयुक्तमिथ्यात्ववशान्निवर्तिष्यत इति निश्शेषाविद्यावृत्तिरिति चेन्न; निवृत्तिनिवृत्तौ तन्मिथ्यात्वे च निवर्त्योन्मज्जनतत्सत्यत्वयोः प्रसङ्गात् । प्रागभावनिवृत्तिरूपस्य घटस्य निवृत्तावपि प्रागभावानुन्मज्जनवत्, जागरदशायां स्वाप्नान्धकारनिवृत्तिरूपस्य स्वाप्नप्रदीपस्य निवृत्तावपि स्वप्नान्धकारमिथ्यात्ववच्चानुन्मज्जनमिथ्यात्वयोस्सिद्धिरिति चेन्न; घटतत्प्रागभावनिवृत्त्यात्मकस्य प्रध्वंसस्य स्वाप्नतेजस्तमोबाधकस्य जागरस्य च विद्यमानत्वेन तद्द्वयानुन्मज्जनमिथ्यात्वयोरुपपत्तेः । अत्र त्वविद्यातन्निवृत्त्योर्द्वयोरपि प्रत्यनीकमन्यन्न परिशिष्यते । अस्ति ब्रह्मस्वरूपमिति चेन्न; तस्य तदुभयप्रत्यनीकत्वे तस्यानादित्वात्तयोः प्रागप्यारोपाभावप्रसङ्गात् । तथा च सति भेदप्रतिभासादेर्निर्मूलत्वे सर्वप्रमाणविरोधो मोक्षशास्त्रानारम्भश्च, पूर्वं तदविरोधित्वे पश्चादपि तद्वैरासंभवात् । कैवल्येन रूपेण पश्चाद्विरोध इति चेन्न; कैवल्यस्य स्वरूपमात्रत्वे दत्तोत्तरत्वात् । स्वरूपातिरिक्तत्वे सत्यत्वे सद्वितीयत्वप्रसङ्गात्, तन्मिथ्यात्वे तत एवाविद्यास्थित्यवश्यंभावात् । एतेन प्रयोजकं यदुक्तम्, तदपि दत्तोत्तरम् । अतएव न द्वितीयः, अनध्यासरूपाया निवृत्तेस्स्वरूपान्तर्भावादिविकल्पदुःस्थत्वात् । अन्तर्भावे ब्रह्मणोऽनादित्वेनाविद्याया नित्य-

निवृत्तिप्रसङ्गात्। यद्यपि घटादेः स्वरूपमेव तत्प्रागभावनिवृत्तिरितिवत् ज्ञानस्वरूपं ब्रह्मैवाज्ञाननिवृत्तिरिति वक्तुं शक्यम्, तथाऽपि स्वप्रागभावनिवृत्तिरूपघटादेरिव स्वाज्ञाननिवृत्तिरूपब्रह्मणोऽपि तदनन्तरत्वावश्यंभावे कादाचित्कत्वादयो दोषास्समुन्मिषेयुः।

ननु पूर्वसिद्धभूतलस्वरूपमेव पश्चिमसिद्धघटादिनिवृत्तिरित्यभावापलापवादिभिरभ्युपगम्यत इति चेत्; किमनेन? अस्माभिस्तत्रापि घटसंसर्गप्रत्यनीकतारूपस्य पराभिमतघटाभावाविनाभूतभावान्तरात्मककालविशेषसंसर्गतन्मूल-परिणामादेः प्रत्यक्षसिद्धस्य भूतलावस्थाविशेषस्य यथायथं घटाभावत्वाभ्युपगमात्तस्य घटसंसर्गोत्तरभावित्वेन पूर्वसिद्ध-त्वासिद्धिः। नन्वभाववादिनोऽपि कार्यप्रागभावस्य कारणाश्रयत्वात्कारणेऽपि कार्यप्रागभावस्य सम्बन्धोऽभ्युपगतः, सम्ब-न्धिनः प्रागभावस्य निवृत्तौ च तत्सम्बन्धनिवृत्तिरास्थेया, सा च सम्बन्धनिवृत्तिः कारणस्वरूपानतिरेकिणीष्टा च, कार्यं तु दृश्यमानं स्वप्रागभावस्यैव निवृत्तिः, एवं कार्यकारणयोस्सम्बन्धोऽपि स्वप्रागभावनिवृत्तिरेवेति परिशेषात् पूर्वसिद्धकारण-स्वरूपमेव कार्यप्रागभावकारणयोस्सम्बन्धनिवृत्तिरिति; तदप्यसत्, कार्यतत्प्रागभावयोः कारणेन सह स्वरूपातिरिक्त-सम्बन्धमनभ्युपगच्छतां पुरतो नेदं चोद्यम्। अभ्युपगच्छतामपि कार्यसम्बन्धप्रागभावः कार्यप्रागभावकारणयोस्सम्बन्ध एवेति तस्य तन्निवृत्तित्वं युक्तम्। कार्यमेव वा स्वप्रागभावतत्सम्बन्धयोरप्यभावो भवतु, विरोधाविशेषात्। यथैक एव प्रध्वंसः कार्यतत्प्रागभावयोः प्रतिपक्षः, इत्यादि स्वयमूह्यम्।

ननु भवतामप्यविद्यानिवृत्तिः पूर्वसिद्धजीवस्वरूपाविर्भाव एव, *स्वेन रूपेणाभिनिष्पद्यत इति श्रुत्यनुसारात्, तद्वद्ब्रह्मस्वरूपाविर्भाव एवास्माकमविद्यानिवृत्तिरस्त्विति चेन्न; संसारदशायामनाविर्भूतानेकाकारगोचरस्याविर्भावशब्दार्थस्य धर्मभूतज्ञानविकासविशेषस्य पूर्वं कर्मणा प्रतिबद्धस्य पश्चात्तन्निवृत्तौ स्वरूपानुबन्धित्वादनिवर्तनीयस्यास्माभिरभ्युपगमात्। भवतस्तु निराकारे ब्रह्मणि नित्याविर्भूतज्ञप्ति [व्यक्ति] मात्रस्वरूपे नापूर्वः कश्चिदाविर्भावः। ननु ब्रह्माकारविवर्तान्तःकरण-वृत्त्युपलक्षितस्वरूपेणापूर्वेण ब्रह्म स्वाज्ञाननिवृत्तिः, कारणविनाशाच्चोपलक्षकान्तःकरणवृत्तिनाशे तदुपलक्षणाभावेन न सद्वितीयत्वादिप्रसङ्गावकाश इति चेत्; तदप्यतिमन्दम्, उपलक्षणस्वरूपस्यैव निष्कर्षवशान्निवृत्तिरूपत्वप्रसङ्गेनाध्यासरूप-विकल्पानुप्रवेशात्, तस्य च दूषितत्वात्। उक्तानां च विकल्पोत्तराणां तथाविधान्तःकरणवृत्तिनाशे तन्मूलोपलक्षणनाशे च तुल्यप्रसरत्वात्। बहिर्भावे तु सद्वितीयत्वापत्तेः। समुच्चये विरोधात्। आकारभेदकल्पनेऽनवस्थानात्। आकारैक्ये भेदाभेदयोरैक्यप्रसङ्गात्। किंच बहिर्भावे च सा किमनादिरुतादिमती? पूर्वत्र नित्यमविद्यानिवृत्तिप्रसङ्गः। उत्तरत्र कारणाभावात् कार्याभावः, न हि मिथ्याभूतमविद्यादिकं सत्यभूतायास्तस्याः कारणं संभवति, असत्यात् सत्योत्पत्तेरन्यत्र दूषणात्। न च सत्यं ब्रह्मैव तत्कारणमस्त्विति वाच्यम्; तदनादित्वप्रसङ्गेन प्रागुक्तोपद्रवात्। नहि विगलितशबलभावं ब्रह्मैव तत्कारणम्, शबलभावविगलनस्यैव कारणान्वेषणेनात्माश्रयप्रसङ्गात्। नन्वविद्यानिवृत्तिर्न सती, ब्रह्मव्यतिरिक्त-त्वात्; नापि सदसदात्मिका, व्याघातादिदोषशतोन्मेषात्; नच सदसद्विलक्षणा, सदसद्विलक्षणनिवृत्त्यात्मकत्वव्याघा-तात्; अतः परिशेषादसती वा, तामपि कोटिं परित्यज्य पञ्चमप्रकारो वा। भावाभावयोरेव हि सदसदादिप्रकारा निवृ-त्तयः। सदसद्विलक्षणञ्चाज्ञानम्, तन्निवृत्तिश्च प्रमाणसिद्धेति सदसदनिर्वचनीयाज्ञानानुसारेण यक्षानुरूपो बलिरिति न्यायात् सदसदादिसर्वप्रकारविलक्षणा तन्निवृत्तिः कल्प्यत इति किं नोपपन्नमिति चेत्; अहो परापादनीयमात्मनः परि-वादमात्मनैवाविष्कृत्य वैदग्ध्यमभिनयसि। तथा हि—कोटित्रयस्य भवतैव दूषितत्वात् अल्पशेषं कृतं शत्रुकार्यम्।

यत्त्वसतीवेत्युक्तम् , तत्र भावान्तराभावनयेन भावान्तरविवक्षायां सद्वितीयत्वप्रसङ्गः । अतिरिक्ताभावविवक्षायां च सद्वितीयत्वं तेनैव भावेन तत्प्रतियोगिना च सत्यत्वेन दुस्त्यजम् । अभाववादिनां सत्यस्यैवाभावप्रतियोगित्वात् । निरुपाख्यविवक्षायां च तस्याश्शशशृङ्गादिवदकादाचित्कत्वप्रसङ्गः । ततश्च पूर्ववत्सर्वदैवाविद्यानिवृत्तिरनिवार्येत्यसंसारः । तस्यास्संसारस्य चाविरोधे अनिर्मोक्षः । परमार्थतस्सर्वदा संसाराभावात् तत एव परमार्थमोक्षाभावश्चेति नानिष्टप्रसङ्गाविमाविति चेन्न ; व्यावहारिकबन्धमोक्षव्यवस्थाभङ्गस्यैव प्रसज्यमानत्वात् । तामपि व्यवस्थां परित्यजतः लौकिकवैदिकसर्वव्यवहारविलोपप्रसङ्गः । किं च अविद्यानिवृत्तेरसत्त्वे नित्यमविद्यासद्भावप्रसङ्गः । ननु घटप्रध्वंसस्यासद्रूपत्वेऽपि घटादेः कादाचित्कत्ववदविद्याप्रध्वंसस्यासद्रूपत्वेऽप्यविद्याकादाचित्कत्वमुपपद्यत इति चेन्न ; घटप्रध्वंसस्यासद्रूपत्वाभावात् । स ह्यभावात्मकोऽपि तत्कालीनतया प्रमाणतस्सिद्धः । अन्यथा घटनित्यत्वस्यापि दुर्निवारत्वात् । असद्रूपमेव घटप्रध्वंसमभ्युपेत्य दूषणं ब्रूया इति चेन्न ; शमलं भक्षय शापितोऽसि गुरुणेत्यादिवदशक्यत्वात् । शक्यत्वाभ्युपगमे वा त्वयैव दूषणमनुमतमिति किमस्माकं तत्समर्थनेन? पञ्चमीं कोटिमाटीकमानस्यापि ते न काचिद्गतिः । साहि माध्यमिकगोष्ठीमध्ये भवन्तमध्यारोप्यानिर्वचनीयाग्रहविशिष्टं च सदद्वितीयं ब्रह्म विलुपन्ती त्रय्यन्तवादवारवाणमवधूयान्तर्गतं प्रकाशयेत् । ते ह्येवमाहुः * न सन्नासन्न सदसन्न चाप्यनुभयात्मकम् । चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः ॥ इति । न चैकदेशवैषम्याद्विशेषः, पञ्चमकोटिपरिग्रहस्य भिक्षुपादप्रसरणन्यायेन समस्तभवत्सिद्धान्तावस्कन्दात् । व्यवस्थाहेतूनामपि व्यावहारिकत्वेनाव्यवस्थितत्वस्यैव व्यवस्थितत्वात् । नच यक्षानुरूपो बलिरिति न्यायस्यात्रावकाशः, आनुरूप्यस्याविरोधित्वरूपत्वे सदसदनिर्वचनीयाज्ञाननिवृत्तेरप्यनिर्वचनीयरूपत्वप्रसङ्गात् । विरोधिरूपत्वे त्वनिर्वचनीयत्वप्रत्यनीकत्वस्य निर्वचनीयत्वेन सदसत्त्वसमुच्चयकोटिबहिर्भावायोगात् । तस्याश्च दूषितत्वात् । यदा च भवदभिमता सदसद्विलक्षणकोटिरपि निशिततर्कशूलकोटिमारोपिता तदा कैव कथा निर्विशेषपरब्रह्माधिष्ठानानिर्वचनीयभावरूपाज्ञानविक्षेपात्मकव्यतिरिक्तजडरूपाहमर्थाहङ्कारवृत्तिविशेषरूपमिथ्यास्वरूपतत्त्वमस्यादिवाक्यलक्षणप्रभवब्रह्मात्मैक्यविज्ञानकृतसदसदनिर्वचनीयविश्वनिवृत्तिरूपाया गन्धर्वनगरगोपुराधिरूढगगनारविन्दमकरन्दपानमदभरमन्थरवन्ध्यासुतशुभकरतलकलितखरविषाणकोदण्डकोटिघटितकमठरोमशिञ्जनीनिर्यत्नैन्द्रजालिकशरशलाकाकृतभविष्यद्देवदत्तपुत्रशिरश्छेदसोदराया दुरभिलपकारकज्ञापिकायाः पञ्चम्याः कोटेरित्यलमपरिणतभणितिपरिहसनेनेति ॥

॥ इति शतदूषण्यां निवृत्त्यनुपपत्तिवादः चतुश्चत्वारिंशः ॥ ४४ ॥

॥ अथ शब्दावेद्यत्वानिरासवादः पञ्चचत्वारिंशः ॥ ४५ ॥

यन्नामानि परोरजांसि गृणतां यादृच्छिकैर्हेतुमिः दुर्लङ्घोऽप्युपयाति गोष्पदतुलां संसारवारां निधिः ।
दूरे नित्यमसीमभूमकतया वाचां यदाचक्षते तद्वन्देमहि सर्वशब्दविषयं त्रय्यन्तवेद्यं महः ॥

यदूचिरे—निर्धूतनिखिलकल्पनाजाले स्वप्रकाशचिन्मात्रे ब्रह्मणि न कस्यचिच्छब्दस्य वृत्तिस्संभवति । नहि निमित्तमन्तरेण शब्दाः प्रवर्तेरन्, न चावेद्ये वेदकानामवकाशः । न च सर्वेषामात्मसाक्षिकं प्रकाशमाने प्रकाशकापेक्षा । न चैवमुपदेशनैरर्थक्यम्, स्वत एव प्रकाशमानेऽपि स्वरूपे कल्पितोपप्लवप्रशमनमात्रार्थतया प्रतिपन्नार्थप्रतिष्ठापनार्थप्रत्य-

भिज्ञापकतया वोपदेशसाफल्यात् । अतएव वेदान्तानां ब्रह्मणि प्रवृत्तिरपि व्याख्याता । यद्यप्यविद्योपाधिकोपरागप्रशमनपरेषु वाक्येषु सद्ब्रह्मात्मज्ञानादिशब्दैर्ब्रह्म निर्दिश्यते, तथाऽप्युपलक्षणभूतैस्तैश्चन्द्रमस इव शाखया न ब्रह्मणस्संस्पर्शः । अत एव न ब्रह्मादिशब्दनिर्देशेन स्ववचनविरोधः । न च नामकीर्तनविधीनां विरोधः, सगुणब्रह्मविषयत्वात्तेषाम् । अत एव हि परस्मिन् ब्रह्मणि * मौनं मन्त्रजप इत्याचार्याः । अन्यथा कथमसंप्रज्ञातोऽपि समाधिस्स्यात् । न च विचित्रनामरूपभाक्त्वश्रुतिविरोधः, तस्यास्तत्कार्योपहितविषयत्वस्य युष्माभिरप्यङ्गीकारात् । न च शब्दतत्त्वमेव ब्रह्मेति स्वप्रकाशत्वे स्ववाच्यतया शब्दवाच्यता, शब्दब्रह्मणोऽपि ब्रह्मविवर्तमात्रत्वात् । अत एव स्मरन्ति * शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति । आह च साम्बः * शब्दार्थत्वविवर्तमानपरमज्योतीरुचो गोपतेरिति । नच ब्रह्म शब्दवाच्यं वस्तुत्वात् घटवदित्यनुमानोदयः, काल्पनिकवाच्यत्वेन सिद्धसाधनात् । तदतिरिक्तस्य तु दृष्टान्तेऽप्यस्मन्मतेनासिद्धेः । घटादिषु च वस्तुत्वानभ्युपगमेन साधनविकलत्वाच्च । न च प्रकाशमानत्वादिमात्रं वस्तुत्वमिति विवक्षितमिति वाच्यम्; तथाऽपि प्रकाशमानैश्शुक्तिरजतादिभिश्शशविषाणादिभिश्चानैकान्त्यात् । नहि तेषां पारमार्थिकं वाच्यत्वं वोऽपीष्टम्, स्वयमसतः परमार्थधर्मानाधारत्वात् । किंच यदि वाच्यत्वं वाच्यम्, ततस्तस्यापि वाच्यत्वान्तरमेवं तस्यापीत्यनवस्था । यदि पुनरवाच्यं तेनैवानैकान्त्यं दुष्परिहरम् । ब्रह्म न शब्दवाच्यं निर्विशेषत्वादिति प्रत्यनुमानं च । आगमे च परिपन्थिनि कथमनुमानगन्धः । तथाहि * यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, * न शब्दगोचरो यस्य योगिध्येयं परं पदमित्यादिश्रुतिस्मृतिशतैर्बाधस्स्फुट एव । न च सामान्यपरत्वम्, ब्रह्मस्वरूपोपदेशपरतयैव प्रवृत्तेः । न च कतिपयशब्दनिषेधपरतया सङ्कोचः, तथा सति सर्ववस्तुसाधारण्येनातिशयासिद्धेः । असङ्कोचे चास्मदुक्तविषयव्यवस्थायास्सङ्ग्राह्यत्वात् । तदेतत्सर्वमभिप्रेत्य भगवान् पराशरः * प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् । वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥ इति । अतो न ब्रह्म कस्यचिदपि शब्दवाच्यमिति ।

अत्रोच्यते—यदुक्तं समस्तविशेषरहिते ब्रह्मणि निमित्ताभावेन न शब्दप्रवृत्तिरिति; तत्र सविशेषत्वोपपादनादेव हेतुरसिद्धः । यथा च निमित्तं निमित्तान्तरमन्तरेण शब्दवाच्यं भवति तथा स्वरूपमपीति निरूप्यतां त्वया । येषां शब्दानां यत्र यन्निमित्तद्वारेण प्रवृत्तिः तेषामेव हिं तत्र तदभावे निवृत्तिः । अन्यादृशस्तु शब्दो ब्रह्मणि न दृश्यत इति चेत्; किं कुर्मः? सङ्केत्यतां व्यवहाराय तथाविधश्शब्दोऽपि । यच्च अवेद्ये वेदकानां नावकाशः, नच स्वयंप्रकाशो प्रकाशकापेक्षेति, तच्च स्वप्रकाशस्यापि ज्ञानान्तरवेद्यत्वस्थापनादेव परिहृतम् । यच्चोपदेशानां वेदान्तानां च कल्पितोपप्लवप्रशमनमात्रार्थत्वमुक्तम्, तदपि तदा शोभते, यदि स्वरूपमनिर्दिश्योपरागाश्शमयितुं शक्येरन् । अन्यथा ब्रह्मणो निर्विशेषत्वमपि नोक्तं स्यात् । ननु किं ब्रह्मणो निर्देशेन, विशेषा एव प्रतीयमाना मिथ्यात्वेन ज्ञाप्यन्ते, ब्रह्म तु स्वप्रकाशं तिष्ठत्येवेति चेत्; तदपि न, * निर्गुणं निरञ्जनमित्यादीनां ब्रह्मणो विशेषणतयैव प्रयोगात् । प्रकाशमानमात्रनिषेधे च ब्रह्मणोऽपि निषेधप्रसङ्गात् । यदि ब्रह्मव्यतिरिक्तमिति विशेष्येत, तदापि सिद्धस्तन्निर्देशः । प्रतियोगितयेति तु विशेषः । यच्चोपदेशादेः प्रत्यभिज्ञापकत्वमिति; ततः किमायातमवाच्यत्वस्य? पूर्वप्रतिपन्नेऽपि शब्दप्रवृत्तिमात्रस्यानभ्युपगमात् । यत्तु शाखाचन्द्रन्यायेन सद्ब्रह्मादिशब्दैरुपलक्षणभूतैर्न ब्रह्मणस्संस्पर्श इति, तदप्यसत् । उपलक्ष्योपलक्षणयोरपि बोध्यबोधकभावलक्षणसंस्पर्शस्य सर्वत्र दुस्त्यजत्वात् । तावतैव च शब्दवेद्यत्वसिद्धेः । लक्षणामात्रं तु तत्र, नतु वाच्यत्वमिति चेत्; किमतः? तावताऽपि शब्दवेद्यत्वस्य स्थितत्वात् । मुख्यार्थसम्बन्धादेश्च लक्षणानिमि-

त्तस्य लाक्षणिकशब्देनाप्यपेक्षणीयत्वाच्च । एतावन्मात्रं शब्दवेद्यत्वमिष्यत इति चेत् ; किमन्यन्नेष्यते ? न तावन्निमित्ताभावादेरित्युक्तम् । न च वाङ्मनसनिषेधश्रुतिर्लक्षणामनुजानातीति नियामकं पश्यामः । विरोधपरिहाराय वृत्तिविशेषविषयत्वेन व्यवस्था क्रियत इति चेत् ; तर्हि लक्षणावृत्तिरेव निषिद्ध्यताम्, नियामकाभावात् । असन्नयेन सर्वप्रमाणाविरुद्धेनापरिच्छेद्यमाहात्म्यं तदर्थमातिष्ठस्व । अतस्सर्वप्रकारशब्दवेद्यत्वनिषेधस्य दुश्शकत्वात् स्ववचनविरोधो दुष्परिहरः । यत्तु नामकीर्तनविधीनां सगुणब्रह्मविषयतेति ; तत्तावत्सत्यम्, यदि तदतिरिक्तं ब्रह्म नाभिसन्दध्याः । यश्चासौ * मौनं मन्त्रजप इति व्याहतोपदेशः, सोऽपि मौनप्रशंसापरश्चेदुपपद्यते, नतु मन्त्रजपं विहितं प्रतिषेद्धुं क्षमते । न चाधिकारिविशेषेण विषयव्यवस्था, समाधिनिष्ठमधिकृत्यैव तद्विधानात् । असंप्रज्ञातसमाधिरपि न शब्दवाच्यताविरोधी, अपितु केवलं तदातनशब्दानुसन्धानपरिपन्थीति समाधिशास्त्रविदः । यत्तु विचित्रनामरूपभाक्त्वश्रुतिस्तत्कार्योपहितविषयतयेति, तदस्माभिरपीष्यत एव, तथाऽपि तत्तदुपहितब्रह्मण्यपि तत्तन्नामपर्यवसानविवक्षा दुर्वारा । अन्यथा * बहुस्यामिति सङ्कल्पस्य, * तन्नामरूपाभ्यां व्याक्रियतेत्यादेश्च दुर्निर्वहत्वात् । शब्दतत्त्वस्य ब्रह्मव्यतिरेकसाधनं त्विष्टमेव । विवर्तता तु प्रकृतानुपयोगिनी पराकृता च । यत्तु शब्दवाच्यत्वसाधने काल्पनिकवाच्यत्वाभ्युपगमात् सिद्धसाधनत्वमुक्तम्, तदपि स्वबाधपर्यवसितम्, घटाद्यविशेषप्रसङ्गात् । घटादीनां शब्दवाच्यत्वमभ्युपगम्य ब्रह्मणि तन्निषेधप्रवृत्तत्वात् । घटादितुल्यशब्दवाच्यत्वाभ्युपगमे च विवादाभावात् । न हि वयं ब्रह्मणि लोकसिद्धातिरिक्तप्रकारं वा वाच्यत्वमिच्छामः, येन तन्निषेधसिद्धिः । न च वाच्यत्वमात्रस्य दुर्निरूपतया ब्रह्मणि तदभावः ; सामान्यतो दुर्निरूपत्वप्रक्रियायाः प्रपञ्चमिथ्यात्वसाधकानां च निरस्तत्वात् । अत एव वस्तुत्वादिहेत्वसिद्धिरपि परिहृता ।

यत्तु प्रकाशमानत्वादिति हेतोश्शुक्तिरजतादिभिरनैकान्त्यमिति ; तत्रापि प्रकाशमानस्य सर्वस्याधिष्ठानारोप्यसम्बन्धादेश्शब्दवाच्यत्वसिद्धेः, तदतिरिक्तस्य कस्यचिदस्माभिः प्रकाशमानत्वानभ्युपगमात् । असद्व्यवहारप्रसङ्गस्यान्यत्र निस्तीर्णत्वात् । यत्तु वाच्यत्वधर्मेणानैकान्त्यमुक्तम् ; तदप्यसत्, तस्यापि वाच्यत्वशब्देन वाच्यत्वात् । अन्यथा वाच्यत्वमिति वक्तुमशक्यत्वात् । न चानवस्था, घटादिगतवाच्यत्वस्य वाच्यत्वगतवाच्यत्वस्य च वाच्यत्वशब्दवाच्यसामान्यरूपेणैकतया तदतिरिक्तगवेषणाभावात् । प्रतिवस्तुनियतशब्दव्यापारभेदेऽपि दोषाभावात् । स्वपरनिर्वाहकसमाधिं च स्वप्रकाशवादादौ परिगृहीतं किमत्र विस्मरसि ? यत्तु निर्विशेषत्वादिति प्रत्यनुमानम् ; तत्र केषांचित् स्वरूपासिद्धिः । सिद्धानामपि स्वयंप्रकाशत्वादीनां स्ववचनविरोधादिभिर्निरासः । ब्रह्मेति धर्मिनिर्देशात्तत्पर्यवसितसाध्यहेतुनिर्देशाच्च । अन्यथा आश्रयासिद्ध्यनन्वयस्वरूपासिद्ध्यादिदोषप्रसङ्गात् । मुख्यवृत्तिनिषेधस्साध्यते, लक्षणया तु धर्मिस्वरूपादिनिर्देश इति चेन्न ; ब्रह्म न लक्ष्यं निर्विशेषत्वादित्यपि वक्तुं शक्यत्वात् । सर्वस्य च ब्रह्मव्यतिरिक्तस्य येनकेनापि शब्देन लक्ष्यत्वसिद्धेर्न सपक्षत्वप्रसङ्गः । माभूल्लक्ष्यत्वमपीति चेत् ; तर्हि धर्मिनिर्देशादित्यागे कथमनुमानकथा ? * यतो वाचो निवर्तन्ते इत्यादिकं तु न ब्रह्मणश्शब्दवाच्यतां बाधते, तस्य शतगुणितोत्तरक्रमेण ब्रह्मगुणानन्त्यं प्रतिपाद्य तथाविधापरिच्छेद्यत्वनिबन्धनवाङ्निवृत्तिप्रतिपादनपरत्वात् । * आनन्दं ब्रह्मणो विद्वानिति व्यतिरेकनिर्देशेन च गुणविषयत्वं व्यक्तम् । अन्यथा वाच्यत्वमात्रनिषेधे त्वत्रत्ययच्छब्दादेस्समुद्घोषत्वप्रसङ्गः । एवं च यत्र गुणप्रकर्षप्रसङ्गमन्तरेणैव शब्दवाच्यत्वं निषिद्धं तत्राप्ययमेव शास्त्रार्थोऽनुगमयितव्यः । न चैवंविधा वाचोनिवृत्तिर्वस्त्वन्तरेषु विद्यते, येन कतिपयशब्दमात्रागोचरत्वे अतिशयासिद्धिं शङ्केथाः । या पुनस्तवासंकोचेन विषयव्यवस्थाऽभिमता, साऽप्याशामात्रसिद्धा, लक्षणावृत्तेर्ब्रह्मणि

काल्पनिकवाच्यत्वस्य वा दुस्त्यजत्वात्। अन्यथा स्ववचनविरोधादेः प्रतिपादितत्वात्। अवाच्यमिति वाच्यं चेत् ब्रह्म वाच्यत्वमृच्छति। अवाच्यमित्यवाच्यं चेत् ब्रह्म वाच्यत्वमृच्छति॥ यत्तु * प्रत्यस्तमितभेदमित्यादि; तदपि परिशुद्धात्मस्वरूपोपदेशपरमिति प्रकरणानुसारेण व्याख्यातं भाष्ये। भवतु वा तस्य परब्रह्मविषयत्वम्, तथापि न सर्वशब्दवाच्यत्वनिषेधशङ्का, स्ववचनविरोधादेरत्रापि दुर्निरासत्वात्। येन महर्षिणैवमुक्तम्—* शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते। मैत्रेय भगवच्छब्दस्सर्वकारणकारणे॥ तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः। शब्दोऽयं नोपचारेण ह्यन्यत्र ह्युपचारतः॥ एवमेष महाशब्दो मैत्रेय भगवानिति। परमब्रह्मभूतस्य वासुदेवस्य नान्यगः॥ इति, स कथं ब्रह्मणश्शब्दवाच्यत्वं प्रतिक्षिपेत्? नच त्वदुक्ता एव श्रुतिस्मृतयः; * बृहति बृंहयति तस्मादुच्यते परं ब्रह्म, * तस्योदिति नाम, * तस्योपनिषदहरित्यधिदैवतम्, * तस्योपनिषदहरित्यध्यात्मम्, * सर्वाधारं धाम विष्णुसंज्ञमित्यादिश्रुतिशतैस्तत्तच्छब्दानां ब्रह्मणश्च नामनामिभावेनैव व्यपदेशात्। * ओमिति ब्रह्मेत्यादिना प्रणववाच्यत्वम्। स्मरन्ति च * नतास्स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती, * वचसां वाच्यमुत्तमम्, इति। आह च स्वयमेव * वेदैश्च सर्वैरहमेव वेद्यः, * सर्वे वेदा यत्पदमामनन्तीत्यादि। अतस्सर्वश्रुत्याद्यविरोधाय स्ववचनविरोधादिपरिहाराय मुमुक्षूपादेयब्रह्मनामवर्गसंरक्षणायापरिच्छेद्यमाहात्म्यादिनिबन्धनैव ब्रह्मणि वाचोनिवृत्तिश्श्रुतिस्मृतिभिर्विवक्षितेति न ब्रह्मणि शब्दवाच्यत्वमात्रं प्रतिक्षेप्तुं शक्यमिति।

॥ इति शतदूषण्यां शब्दावेद्यत्वनिरासवादः पञ्चचत्वारिंशः॥ ४५॥

॥ अथ निष्प्रपञ्चीकरणनियोगभङ्गवादः षट्चत्वारिंशः॥ ४६॥

आविर्भावतिरोभावजन्मनाशविकल्पवत्। यस्यैतदक्षयं नित्यं जगत्तं विष्णुमाश्रये॥

ये पुनस्सर्वशब्दानां कार्यपरत्वं वदतां मतमपि कटाक्षयन्तस्सिद्धरूपे ब्रह्मणि स्वतो निरतिशयपुरुषार्थरूपे ज्ञानजननमात्रेण प्रयोजनपर्यवसाने वेदान्तानां संभवत्यपि प्रत्यक्षाद्यबाधितनिरतिशयपुरुषार्थरूपब्रह्मज्ञाने स्वतः प्रामाण्यमपि विस्मरन्तस्तथाविधपरिनिष्पन्नब्रह्मस्वरूपशुद्ध्यर्थं तस्य निष्प्रपञ्चताकरणनियोगविषयतामाहुः, तेषां तथाविधनियोगविधिवाक्यासंभवात् सपरिकरनियोगासिद्धेश्च निर्मूलः प्रलापः। तथा हि—न तावन्निष्प्रपञ्चं ब्रह्म कुर्यादिति विधिवाक्यमधीमहे। नच फलकरणदर्शनादिभिः कल्प्यते। नच स्मृत्याद्यनुसारेण तथाविधश्रुतिरनुमीयते। नच नित्यानुमेया श्रुतिरुपपद्यते। नच तदनुमितिलिङ्गतया निष्प्रपञ्चताकरणाचारः केनचित् क्वचिदपि दृष्टपूर्वः। नच निष्प्रमाणकोऽपि विधिरस्तीति वाङ्मात्रेणापि सिध्यति। ननु किमनेन कदर्थनेन? नानात्वदर्शननिन्दावचनैर्नानात्वनिषेधवचनैर्निर्गुणादिश्रुतिभिर्मायोपादानत्वान्यथानुपपत्त्यादिभिश्चानुगृहीतो * न दृष्टेर्द्रष्टारं पश्येरित्येवमादिको विधिरुपलक्षणपरस्सन् द्रष्टृदृश्यादिसमस्तभेदशून्यं दृशिमात्रं ब्रह्म कुर्यादिति नियुञ्जानः प्रकृतार्थे परिपूर्णं प्रमाणम्, नित्यसिद्धस्यापि ब्रह्मणो निष्प्रपञ्चतारूपेण साध्यत्वमप्यविरुद्धमिति चेन्न; अनुग्राहकत्वेनाभिमतानां सर्वेषां प्रत्येकं विस्तरतो दूषणात्। विधिस्वरूपमपि न पश्यामः—कोऽत्र ब्रह्मवाचकशब्दः, कश्च तस्य निष्प्रपञ्चताकरणवाचीति। दृष्टिमतिश्रुत्यादयश्शब्दाः संविद्रूपब्रह्मवाचकाः, द्रष्टृमन्तृप्रभृतिदर्शननिषेधो निष्प्रपञ्चताकरणवाचीति चेत्; किं व्युत्पत्तिसिद्धोऽयमर्थः? उत तदनुपपत्त्या लक्षणादिवशादङ्गीक्रियते? किंवा भवत्सैद्धान्तिकसङ्केतादिति? न प्रथमः, दृष्टिमतिश्रुत्यादिशब्दानां तावत् ब्रह्मशब्दपर्यायत्वाभावात्।

तत्तत्करणायत्तबुद्धिविशेषा एव तैरभिधीयन्ते। अन्यथा पुनरुक्तिस्स्यात्। द्रष्टृप्रभृतिदर्शननिषेधोऽपि तत्तज्ज्ञाननिवृत्तिमेव वदति, नतु तत्तन्निवृत्तिम्। नापि द्वितीयः, अनुपपत्तेरदर्शनात्। उचितार्थान्तरादर्शनमेवानुपपत्तिरिति चेन्न; तथाप्यनुचितार्थान्तरकल्पनायोगात्। दृश्यते चार्थान्तरमुचितम्। तथा हि—यदा दृष्टेरतिरिक्तं द्रष्टारं न पश्येरित्यतिरिक्तपदाध्याहारेण योजना। तदा द्रष्टुः पुरुषस्यापि स्वयंज्योतिषः स्वधर्मभूतदृष्टिमत्यादिशब्दाभिलप्यज्ञानसाजात्येन तदतिरिक्तत्वनिषेधोपपत्तेः, न कस्यचिदपि मिथ्यात्वसिद्धिः। अनध्याहारे तु दृष्टेर्द्रष्टेति जीवात्मा निर्दिश्यते, ओदनपाकं पचतीतिवत्कर्तृत्वमात्रविवक्षया द्रष्ट्रादिशब्दः, तत्तत्करणायत्तज्ञानकर्तारं जीवात्मानं नोपासीथाः; अपि तु तदन्तर्यामिणं करणनिरपेक्षस्वाभाविकनिरतिशयज्ञानादिगुणगणम् अशेषदोषवैदेशिकं परमात्मानमुपास्स्वेत्युक्तं भवति। नच जीवस्यापि विशेषणतया उपास्यत्वाभ्युपगमात्तद्दर्शननिषेधानुपपत्तिरिति वाच्यम्; करणप्रवृत्तिलिङ्गिस्वाभाविकविकासशालिपरिशुद्धस्वरूपजीवविशिष्टस्य परमात्मन उपास्यत्वात्। एवमर्थान्तराण्यपि कर्तृत्वाभिमानत्यागादिरूपाणि प्रत्यक्षाद्यविरुद्धानि समुचितानि कल्पयितुं शक्यानि। अतो नानुपपत्तिलेशः। नापि तृतीयः, अतिप्रसङ्गात्। परसिद्धान्तसिद्धसङ्केतवशादपि भवत्पक्षस्य कार्त्स्न्येन भङ्गप्रसङ्गात्।

एवं विधिवाक्यासंभवो दर्शितः। अथ सपरिकरनियोगासिद्धिं ब्रूमः। तथा हि—नियोगवाक्यार्थवादिना नियोगो नियोज्यः तद्विशेषणं विषयः करणमितिकर्तव्यता प्रयोक्ता च वक्तव्याः। तत्रासौ नियोगस्तावत्सामान्यतो विशेषतोऽपि प्रमाणादर्शनादेव निरस्तः। कश्चात्र नियोज्यः? न तावद्ब्रह्म, त्वन्मते तस्याज्ञत्वात् अनियोज्यत्वात्। अस्मन्मते तु सर्वज्ञत्वादेव नियोक्तव्यत्वाभावात्। अत एव नाप्यविद्या। नाप्यहङ्कारादिकम्, तत्प्रतिफलितचैतन्यादिकं वा, तेषामपि विमृश्यकारिणां स्वोच्छेदकरणे नियोक्तुमशक्यत्वात्। अविमृश्यकरणे तु न शास्त्रयोग्यता। नच निर्विशेषानुभूतिस्थितये निरूपको बालो वा कश्चित् स्वोच्छेदमनुमन्यते। अत एव तेषामधिकारित्वप्रयोक्तृत्वाद्यवस्थान्तरमपि भग्नम्। न च शास्त्रं वायूदकादिवद्विवक्षामनुत्पाद्यैव प्रवर्तयति, अशास्त्रत्वप्रसङ्गात्। ततोऽपि नियोगस्य मूलोच्छेदः। किं तावन्नियोज्यविशेषणम्? ब्रह्मस्वरूपयाथात्म्यानुभव इति चेत्; तत्किं निमित्ततया स्थित्वा नियोज्यं विशिनष्टि, उत फलतया? नाद्यः, जीवनपुत्रजन्मादिवत्तस्यासिद्धत्वात्, सिद्धत्वे वा किं नियोगेन, तत एव तत्फलसिद्धेः? अथ श्रवणजन्यः परोक्षानुभवस्सिद्धस्सन् विशेषणमिति चेन्न; श्रवणेन तथाविधानुभवजननस्यैव निष्प्रपञ्चीकरणरूपत्वात्। नहि ततोऽतिरिक्तं किंचिदत्र पुरुषव्यापारविषयं पश्यामः। साक्षात्कारज्ञानं तद्विषय इति चेन्न; साक्षात्कारस्य नियोगसाध्यत्वाभ्युपगमात् ततः पूर्वं तदसिद्धेः। तत्सिद्धौ वा किं नियोगेनेत्युक्तम्। अथ यदि नित्यब्रह्मस्वरूपप्रकाश एव निमित्तमित्युच्येत, न तर्हि तत्कस्यचिद्विशेषणम्, अनन्यनिष्ठत्वात्। तस्य च निमित्तत्वे तन्नित्यत्वेन जीवननिमित्ताग्निहोत्रवन्नित्यं विषयानुष्ठानप्रसङ्गः। नापि द्वितीयः, तथापि हि याथात्म्यानुभवश्शब्दजन्यो वा, अक्षजन्यो वा, स्वरूपभूतानुभव एव वा? आद्ये नियोगात्पूर्वं सिद्धस्य कथं नियोगफलत्वम्? द्वितीये त्वसंभवः, न हि निष्प्रपञ्चतायां सिद्धायामक्षाणि तज्जन्यं वा ज्ञानं संभवति। संभवे वा कथं निष्प्रपञ्चता? तृतीये तु कथं नित्यसिद्धस्य फलत्वम्? स यदि साध्यः, तदा स्वर्गादिवदनित्यस्स्यात्। प्रपञ्चनिवृत्तिरूपेण साध्यत्वमिति चेत्; नह्यन्यरूपेणान्यस्साध्यस्स्यात्। अतः प्रपञ्चनिवृत्तिरेव साध्येत्युक्तं भवति। ततश्च हेतुसाध्ययोरैक्यप्रसङ्गः। कश्चात्र नियोगविषयः? किं ब्रह्मैव, उत निष्प्रपञ्चब्रह्म, अथ प्रपञ्चनिवृत्तिरेव? न प्रथमः, तस्य नित्यत्वेनाभाव्यत्वात्, अभावार्थत्वाच्च।

अत एव न द्वितीयः, नहि निष्प्रपञ्चमपि ब्रह्म भावार्थः। तथापि तस्य साध्यत्वं संभवतीति चेत्; किं ततः? न हि स्वर्गादिकं साध्यमित्येतावता विधिविषयो भवति। अतोऽत्रापि केवलं फलत्वमात्रं संभाव्येत, तत्र च प्राप्ताप्राप्तविवेकेन विशेषणस्यैव साध्यत्वमिति कथं ब्रह्मस्वरूपस्य विधिविषयत्वम्? अत एव न तृतीयः, तस्याः फलत्वाच्च। न हि प्रपञ्चनिवृत्त्यतिरिक्तो मोक्षो नाम भवन्मते। किमर्थं च तया नियोगस्साध्यते? न हि नियोगसाध्यं तदतिरिक्तं किंचित्। कथं च सर्वप्रपञ्चनिवृत्तौ नियोगस्वरूपलाभः? तस्याश्च नियोगविषयत्वे तया नियोगः, तेन च सेति परस्पराश्रयणं च। उक्तन्यायेन प्रपञ्चनिवृत्तेः करणत्वमपि निरस्तम्, विषयकरणयोरतीव भेदाभावात्। स चायं नियोगः किं स्वयमेव प्रपञ्चं निवर्तयति, उत तत्त्वज्ञानमुत्पाद्य? पूर्वत्र किं मिथ्याभूतस्य प्रपञ्चस्य ज्ञानबाध्यत्वं परित्यज्य नियोगबाध्यत्वमङ्गीकरोषि? तथा सति प्रायश्चित्तनिवर्त्यदुरितवत्सत्यता प्रपञ्चस्य। अन्यथा तत्त्वज्ञानेनैव बाध्यत्वे नियोगकृत्यं न पश्यामः। उत्तरत्राप्याकाङ्क्षादित्रयवता वाक्येनैव तत्त्वज्ञानं जायत इति किं नियोगात्? तेनैव च तत्त्वज्ञानेन ब्रह्मव्यतिरिक्तसमस्तबाधात्कथं सपरिकरनियोगोत्पत्तिश्च? परोक्षापरोक्षनिवर्तकज्ञानयोरविशेषोपपादनादिकमन्यत्र ग्राह्यम्। किंच प्रपञ्चनिवर्तकोऽयं नियोगो न तावद्ब्रह्मस्वरूपम्, निवर्तकस्य नित्यतया नित्यं प्रपञ्चाभावप्रसङ्गात्; नित्यस्य विषयानुष्ठानसाध्यत्वायोगाच्च। अतो ब्रह्मस्वरूपव्यतिरिक्त एष्टव्यः। स च कृत्स्नप्रपञ्चनिवृत्तिरूपविषयानुष्ठानेन प्रयोक्तुरपि नष्टत्वान्निराश्रयः कथमुत्पद्येत? आश्रयस्थितौ वा कथं विषयलाभः? निराश्रयोत्पत्तावपि नियोगाख्यमिथ्यापदार्थस्थितौ कथं कृत्स्नप्रपञ्चनिवृत्तिः? सिद्धावपि किमन्यन्नियोगसाध्यं मोक्षाख्यं फलमिति।

किंच करणभूतायाः प्रपञ्चनिवृत्तेः का नामेतिकर्तव्यता? न काचिदिति चेन्न; अनुपकृतस्य करणत्वायोगात्। यथाहुः—* नहि तत्करणं लोके वेदे वा किंचिदीदृशम्। इतिकर्तव्यतासाध्ये यस्य नानुग्रहेऽर्थिता॥ इति। अस्तु वा काचिद्भावरूपेति चेन्न; सा हि सन्निपत्योपकारिका वा स्यात्, आरादुपकारिका वा? नाद्यः, कृत्स्नप्रपञ्चनिवृत्तिरूपकरणशरीरनिवर्तकस्य कस्यचिददर्शनात्। अद्वैतज्ञानं दृश्यत इति चेन्न; तेनैव प्रपञ्चनिवृत्तिरूपमोक्षसिद्धौ करणादिनिष्पाद्यासिद्धिप्रसङ्गात्। नापि द्वितीयः, कृत्स्नप्रपञ्चनिवृत्तिरूपकरणस्वरूपासिद्धेः, तत्सिद्धौ तदनुग्राहकांशानवस्थानमित्युभयतःपाशा रज्जुः। अथाभावरूपानुग्राहकस्थितौ न विरोध इति मन्यसे; तन्न; तस्य कृत्स्नप्रपञ्चनिवृत्त्यन्तर्गतत्वेन करणेतिकर्तव्यताभेदासिद्धेः। तदेतदभिप्रेत्याह—* अभावरूपत्वे चाभावादेव न करणशरीरं निष्पादयति, नाप्यनुग्राहकमिति। अभावात्—कृत्स्नप्रपञ्चनिवृत्त्यन्तर्गतत्वेन करणात्पृथगभावाभावादित्यर्थः। केचित्तु अस्य भाष्यस्यैवमर्थमाहुः, अभावत्वादेव न हेतुत्वमित्युच्यत इति, तत्र शब्दास्वारस्यार्थानौचित्यादिकं च द्रष्टव्यम्। तदेवं विधायकादर्शनात् सपरिकरनियोगानुपपत्तेश्च निष्प्रपञ्चब्रह्मविषयो विधिर्न संभवतीति सिद्धम्॥

॥ इति शतदूषण्यां निष्प्रपञ्चीकरणनियोगभङ्गवादः षट्चत्वारिंशः॥ ४६॥

———

॥ अथ विकल्पप्रामाण्यभङ्गवादः सप्तचत्वारिंशः ॥ ४७ ॥

संसारसागरोत्तारकारणं वारणाचले । अविकल्पविकल्पाभ्यामध्यक्षितमुपास्महे ॥

यदुच्यते––विप्रतिपन्नो विकल्पो मिथ्याविषयः विकल्पत्वात्, यथा शुक्तिरजतविकल्पः, नासौ जात्यादिविशिष्टप्रत्यय इति सर्वस्यापि भेदस्य विकल्पविषयतया मिथ्यात्वे परिशेषादद्वैतसिद्धिरिति ; तदेतत् सविकल्पकमपि प्रत्यक्षविभागतयोदाहरद्भिर्भाष्यकारैर्निरस्तप्रायम् । तद्विस्तृणीमहे । तत्र तावत्पक्षादयो न निर्विकल्पकविषयतया सिद्धाः, तथा सत्यभिलापसम्बन्धानर्हत्वप्रसङ्गात् । विकल्पविषयतया सिद्धौ तु, य एते पक्षादिग्राहिणो विकल्पाः, किं तेऽपि पक्षीक्रियन्ते, उत तद्व्यतिरिक्ताः ? इति । न प्रथमः, व्याघातात् । विकल्पानां विसंवादित्वविकल्पस्य विसंवादे पुनस्तेषामपि संवादपर्यवसानात् आश्रयाद्यसिद्धिप्रसङ्गात् । अविसंवादातिरिक्तायाश्च तत्सिद्धेरनिरूपणात् । विसंवादेऽपि वा तत्सिद्धौ सर्वत्र विशिष्टार्थसिद्धेर्दुर्निवारत्वात् । नापि द्वितीयः, तैरेवानैकान्त्यात् । अविसंवादोऽपि तेषामनिश्चित इति चेन्न ; तथाऽपि सन्दिग्धानैकान्त्यस्य स्थितत्वात् । अन्यतस्तेषां विसंवादसाधनेऽप्युक्तदोषानुधावनात् । यदि च सर्वे विकल्पा विसंवादिनः, कथमनुमानादिविकल्पास्ते प्रमाणं भवेयुः ? परम्परया अर्थप्रतिबन्धादिति चेत् ; तुल्यं विकल्पेऽपि । माभूत्तेषां प्रामाण्यमिति चेत् ; तथाऽपि कथमेतदनुमानं समीहितसाधनायोदाहरसि ? लोकव्यवहारसिद्धतया परमतसिद्धतयेति चेन्न ; आत्मघातिनामीदृशानां बालिशैः परीक्षकैश्च साध्यसिद्ध्यङ्गत्वानभ्युपगमात् । किंच निर्विकल्पकस्यापि संवादः किं विकल्पगृहीतः, उत निर्विकल्पकगृहीतः ? नाद्यः, निर्विकल्पकस्य विसंवादित्वप्रसङ्गात् । अन्यथा क्वचिद्विकल्पप्रामाण्यानभ्युपगमेऽनैकान्त्यादिदोषात् । न द्वितीयः, स्वस्यापि संवादित्वग्रहणे तस्यानधिकारात् । अधिकारे वा विकल्पत्वप्रसङ्गात् । तेन विकल्पवन्निर्विकल्पकस्यापि प्रामाण्यनिर्मूलनादप्रयत्नविजयिनो माध्यमिकाः ।

कश्चायं विसंवादः ? किं संवादिज्ञानान्तरराहित्यम् ? आहोस्वित् अर्थक्रियास्थित्यभावः ? बाधकज्ञानान्तरोदयो वा ? यद्वा अनर्थभूतत्वम् ? अथवा अनर्थविषयत्वम् ? यद्वा अन्यस्यान्यात्मनोल्लेखः ? अन्यद्वा किंचित् ? इति । न प्रथमः, क्वचिद्बाधात् ; क्वचिदिष्टप्रसङ्गात्, अकिंचित्करत्वाच्च । संवादकाभावे कथमध्यवसाय इति चेत् ; यथा संवादकस्येति पश्य । परस्परसंवादादुभयाध्यवसाय इति चेन्न ; शुक्तिरजतबोधधारावाहिकसन्ततौ तदसिद्धेः । अर्थक्रियाविरहव्यवसायविसंवादात्तत्र सर्वत्राप्रमात्वमिति चेत् ; एतेन द्वितीयः कल्पः परिजिघृक्षितः । सोऽपि न, सर्वासामर्थक्रियाणां विकल्पोपज्ञत्वात् । नहि निर्विकल्पकेन कश्चित्प्रवर्तते । न च विकल्पतः प्रवृत्तस्यार्थक्रिया न संभवति ; मणिप्रभाविषयमणिविकल्पप्रवृत्तस्येव स्वलक्षणप्रसूतनिर्विकल्पकजनिततदारोपितार्थोल्लेखविकल्पप्रवृत्तस्यापि पारम्पर्येणार्थसम्बन्धात् । निर्विकल्पकनिदान एव संवाद इति चेन्न ; नियामकाभावात् । बाधितत्वमिति चेत् ; ततस्तृतीयः पक्षः स्वीकृतः । सोऽप्यसारः, असिद्धेः । अत एवानुमानात्तत्सिद्धिरिति चेन्न ; अद्यापि तत्प्रामाण्यानिश्चयात् । अर्थजत्वात्तत्सिद्धिरिति चेन्न ; साक्षादसिद्धेः । परम्परया त्वविशेषात् । अत एव न चतुर्थः । न च जात्यादिविशिष्टस्य जात्यादिविशेषणस्य वा दृढोपलम्भसिद्धस्याबाधितस्याप्यनर्थत्वं निश्चिनुमः, यतस्तत्प्रसूतस्य विकल्पस्यानर्थत्वम् । अतएव न पञ्चमः, अनुमानादिनिर्मूलनाच्च । षष्ठोऽपि स्वलक्षणाकारतयैव जात्यादिसिद्धेर्निरस्तः । न चाशब्दात्मार्थः शब्दात्मना विकल्पे भातीति वाच्यम् ; सर्वेषु विकल्पेषु शब्दानुवेधाभावात् । यत्र च शब्दानुवेधः तत्रापि शब्दोऽर्थात्मना प्रतिभाति, अशब्दात्मनैव पूर्वमेवाध्यवसायात् । नच

गौरित्यत्र गकारौकारविसर्जनीयात्मकोऽयमिति मन्यते, अपि तु गोशब्दप्रवृत्तिनिमित्तभूतगोत्वाश्रय इति। एकार्थानेकशब्देष्वनेकार्थैकशब्देषु च शब्दानामर्थानां च परस्परविरोधादेव नैकतादात्म्याध्यवसायसंभवः। न चात्र साम्यसन्निकर्षादिकमध्यासनिमित्तं पश्यामः। नच चाक्षुषनीलादिप्रत्यये श्रावणनीलादिशब्दात्मनोल्लेखो युक्तः। नच विकल्पास्सर्वे समानाः, मानसबाह्येन्द्रियव्यापारान्वयव्यतिरेकानुविधानविरोधात्। न च गोशब्दात्मना खण्डशब्दात्मना च गोव्यक्तौ विकल्पितायां जातिव्यक्तिशब्दविभागनिमित्तं संभवति। न च जातिशब्दो व्यक्तौ नाध्यस्यत इति वाच्यम्; गौरयमित्येव प्रतिभासात्। तथा च व्यक्तिशब्दस्यापि तुल्यन्यायतया नाध्यासः। अतस्तटस्थ एव शब्दस्स्वविषयमावेदयति, वस्त्वन्तराच्च व्यवच्छिनत्तीति न शब्दाध्याससंभवः। नापि सप्तमः, बाधपर्यवसितस्य कस्यचिदन्यस्यानुपलम्भात्, अन्यादृशस्य साधनेऽपि विरोधाभावादिति। न च संस्कारप्रसूततामात्रेण विकल्पस्याप्रामाण्यम्, स्मृतिप्रामाण्यवादिषु तस्य दुर्वचत्वात्, संस्कारमात्रासाधारणकारणस्य स्मृतित्वात्। स्मृत्यनुभवात्मकपक्षेऽप्यंशे स्मृतित्वलक्षणमप्रामाण्यं प्रसज्येत, न पुनर्विसंवादित्वलक्षणम्। विकल्पत्वादिति हेतुश्च विशिष्टप्रत्ययत्वमात्रम्? तद्विशेषो वा? नाद्यः, निर्विकल्पकस्याप्यस्मन्मतेन यत्किंचिद्विशिष्टप्रत्ययत्वेनानैकान्त्यात्; तस्यापि पक्षीकारे तदतिरिक्तनिर्विकल्पकस्यानुपपत्त्या सर्वप्रत्यक्षोच्छेदप्रसङ्गात्। नापि द्वितीयः, प्रथमाक्षसन्निपातजविशिष्टप्रत्ययादुपरितनविशिष्टप्रत्ययस्य कारणदोषादिविशेषाभावात्; संसारसंभेदादेश्चादोषरूपत्वस्थापनात्। अतो विशिष्टप्रत्ययमात्राप्रामाण्यवादिना सर्वप्रत्यक्षनिर्मूलने, परिशेषोऽपि शून्यतत्त्वमुपस्थापयेत्, न पुनरद्वैतम्। किंच कल्पितबाह्यविषयनिर्विकल्पकस्य त्वन्मतेन मिथ्याविषयत्वात् तद्दृष्टान्तेनाद्वैतविषयनिर्विकल्पकस्यापि मिथ्याविषयत्वमनुमेयमिति। किंच—विकल्पाविषयत्वं चेत् ब्रह्मणः प्रतिपाद्यते। श्रोतव्यादिविधीनां स्यादश्रोतव्यत्वमेव ते॥ अतो न निर्विशेषस्यापि ब्रह्मणो विकल्पाविषयत्वमपीति॥

॥ इति शतदूषण्यां विकल्पप्रामाण्यभङ्गवादः सप्तचत्वारिंशः॥ ४७॥

॥ अथ उपबृंहणवैघट्यवादः अष्टचत्वारिंशः॥ ४८॥

गुणविभूतिविशेषविचित्रितं निगमसीमनि यत्समधीमहे।
स्मृतिपुराणशतैरुपबृंहितं तदिदमस्तु सदा हृदयेषु नः॥

यदुच्यते—निर्विशेषचिन्मात्रब्रह्मात्मैक्यं त्र्य्यन्तसिद्धं स्मृतिपुराणादीन्युपबृंहयन्तीति; तत्र तावत् तत्तत्प्रकरणादिपरामर्शेन भाष्यकारैरेव तेषां यथावस्थितोऽर्थः प्रदर्शितः। सामान्यतः किंचिदुच्यते। यदा शब्दमात्रस्य निर्विशेषबोधनसामर्थ्यं नास्तीत्युपापीपदाम तदा कैव कथा तद्विशेषाणाम्? यदा च श्रुतिपरिषदशेषाऽपि विशिष्टविषयेति निरणैष्म, तदा कथं तदुपबृंहणानि तत्प्रतिपादकानि प्रतिपद्येमहि? यदा पुनः निर्विशेषपरा सेति पश्यसि, तदा तत्रोपबृंहणं नाम किं यथोक्तानुवादमात्रम्? उत तद्व्यक्तीकरणम्? अथानुक्तवस्त्वन्तरवर्णनम्? अन्यद्वा किंचित्? इति। न प्रथमः, अनुवादमात्रेषूपबृंहणत्वप्रसिद्ध्यभावात्; प्रयोजनाभावाच्च। ज्ञातस्थिरीकरणं प्रयोजनमिति चेन्न; श्रुतिप्रामाण्ये तदर्थे च यथावन्मीमांसिते तदनुवादमात्रेण तदतिरिक्तस्थिरीकरणासंभवात्। यदि तत्रानाश्वासः, तदा कैव कथा संभवद्भ्रमप्रमादादिदोषेषु पौरुषेयेषु वाक्येषु? नच साक्षात्सौगतमतमाश्रित्य संवादात्प्रामाण्यमनुमन्तुमर्हसि। नचैवमुप-

बृंहणान्तरसापेक्षम्, अनवस्थाप्रसङ्गात्। न च तन्निरपेक्षम्, श्रुतिवदेव तव तत्राप्यनाश्वासप्रसङ्गात्। परस्परसंवादादुभयत्राश्वास इति चेत्; मास्तु, असकृदनुसंहितैकश्रुतिवाक्यमात्रजन्मनि तत्प्रत्ययप्रवाहेऽपि तस्य कर्तुं शक्यत्वात्, अतिप्रसङ्गश्च तदेति। नापि द्वितीयः, निर्विशेषपक्षे तदयोगात्। तथा हि—यन्निर्विशेषं श्रुतं तच्छ्रुत्यैव व्यक्तम्। तदतिरिक्तप्रकाशने तु सविशेषत्वावश्यंभावादुपबृंहणोपबृंहणीयवैघट्यम्। मिथ्याभूतातिरिक्ताकारबोधनेऽपि कथं तत्त्वावेदकस्यातत्त्वावेदकमुपबृंहणं स्यात्? अथ श्रुतौ कस्यचिदप्रतिपन्नं कस्यचित्प्रतिपन्नं ब्रह्मस्वरूपमेवात्र व्यज्यत इति मन्यसे; तदपि न; श्रुतिं प्रत्यनङ्गत्वप्रसङ्गात्। तदाभिमुख्यजननात्तदङ्गत्वमिति चेत्; तत्फलसिद्धौ किं तदाभिमुख्येन? असिद्धौ वा कुतस्तत्? नापि तृतीयः, अनुपबृंहणत्वप्रसङ्गादेव। अन्यथा परस्परभिन्नार्थानां वेदभागानामेव परस्परोपबृंहणत्वप्रसङ्गात्। नापि चतुर्थः; अत्यन्तभिन्नार्थत्वस्याभिन्नार्थत्वेऽप्यन्यूनानतिरिक्तविषयत्वस्यातिरिक्तविषयत्वेऽपि सत्यमिथ्यार्थत्वयोर्दूषितत्वात् न्यूनबोधनमवशिष्यते। नच तदाऽप्युपबृंहणता, उक्तांशस्य तुल्यतया नैरपेक्ष्यात्। अनुक्तांशेऽनुक्तेरेवोपबृंहणत्वगन्धाभावादिति। किंच, यच्चाधिकं श्रुतौ बोध्यते तत्सत्यत्वे सविशेषता, तन्मिथ्यात्वे श्रुतिरतत्त्वावेदिका, पुंवाक्यं तु न तथेत्यापन्नम्। नच माभूदुपबृंहणमिति वाच्यम्; शारीरकाधिकरणेषु तत्रतत्र स्मृतिसंवादोदाहरणादिविरोधात्। अन्यथा चेदनुग्राहकतर्कस्यापि प्रहाणप्रसङ्गात्। तत्प्रहाणे पुनः * आर्षं धर्मोपदेशमित्यादिमहर्षिवचनविरोधः। न चैवमस्मन्मते प्रसङ्गः, श्रुतिप्रतिपन्नस्यैव ब्रह्मणोऽनन्तगुणविभूतेरप्रतिपन्नानेकगुणविभूतिवैशिष्ट्यबोधनेन व्यक्तीकरणोपपत्तेः। न चाप्रतिपन्नस्यांशस्यावेदार्थत्वम्, [वि]प्रकीर्णानन्तशाखे महति वेदवृक्षे यत्र क्वचित्कोटरे तस्यापि लीनत्वात्, तस्य चाल्पभागश्राविभिरयोगिभिरधिगन्तुमशक्यत्वात्, तत्कृते च योगिभिरुपबृंहणप्रणयनोपपत्तेः। कति कति च न दृश्यन्ते अधीयमानास्वपि शाखास्वप्रतिपन्नाः संशयिताश्च उपबृंहणाधीनाध्यवसायाः सारार्थाः? अन्यथा कथं वेदार्थे वादिनां मतभेदसमुत्थानम्? न चोपबृंहणानां मिथो विरोधान्निर्णयासिद्धिः; उपबृंहणीयविरोधाविरोधाभ्यां विशेषात्। अत एव हि शारीरकस्मृत्यधिकरणे कपिलादिस्मृतेर्निरासः। उपबृंहणीयाविरुद्धमन्वादिस्मृतिसन्निधौ तद्विरुद्धकपिलादिस्मृतेरप्रमाणत्वान्न तैरुपबृंहणं नाप्युपबृंहणीयबाध इति हि तत्रार्थः। तेन तामसराजससङ्कीर्णपुराणादिभिर्वेदोपबृंहणं पुराणविवेकपरिज्ञानशून्यानामविवेकितानिबन्धनमिति तन्नाद्रियामहे। उक्तं हि मात्स्ये * अग्नेश्शिवस्य माहात्म्यमित्यारभ्य, * सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः। तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम्॥ इत्यन्तम्। तदेतत्सर्वमर्थतो निदर्शितं भाष्ये—* उपबृंहणं नाम विदितसकलवेदतदर्थानां स्वयोगमहिमसाक्षात्कृतवेदतत्त्वार्थानां वाक्यैः स्वावगतवेदवाक्यार्थव्यक्तीकरणम्, सकलशाखानुगतस्य वाक्यार्थस्याल्पभागश्रवणदुरवगमत्वेन तेन विना निश्चयायोगादुपबृंहणं हि कार्यमेवेति। एवंच सामान्यतो निर्विशेषतया उपबृंहणासंभवेऽनुपबृंहितेन वेदेनार्थनिश्चयायोगाद्वेदविप्लावक एव निर्विशेषवादः। स्मरन्ति च—

* इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति॥ इति॥

॥ इति शतदूषण्याम् उपबृंहणवैघट्यवादः अष्टचत्वारिंशः॥ ४८॥

॥ अथ ऐक्यापदेशान्यथानुपपत्तिभङ्गवादः एकोनपञ्चाशः ॥ ४९ ॥

त्रिविधचिदचिदन्तर्यामितां प्राप्य तिष्ठन्निखिलनिगमनिष्ठैर्नित्यमैक्योपदेशैः ।
भ्रमममलधियां यो वारयत्येकभक्त्या भवतु शरणवाणी तत्पदे शाश्वती नः ॥

यदाहुः, * तत्त्वमसि, * क्षेत्रज्ञं चापि मां विद्धीत्याद्यैक्योपदेशान्यथानुपपत्त्या परिशुद्धे ब्रह्मण्येवाज्ञानं भेदभ्रमश्चावश्यं कल्पनीयम् । नचात्रैक्यं न प्रतीयते, न चाविवक्षितम्; सामानाधिकरण्यस्य तन्निष्ठत्वात्, विशिष्टैक्यवादिनाऽप्यैक्यमात्रस्यास्थितत्वाच्च । नचेदमारोपवृत्त्या सामानाधिकरण्यम्, तत्त्वोपदेशप्रकरणविरोधात् । न च सम्बन्धादिद्वारोपचारः, बाधकाभावात् । यद्यप्यस्मन्मतेऽपि लक्षणा, तथाऽपि प्रधानभूतसामानाधिकरण्यप्रतिपाद्यस्य मुख्यस्यैक्यस्यापरित्यागात्, तत्संरक्षणाय च स्वरूपोपलक्षणभूतनिमित्तमात्रप्रहाणादिकं न दोषाय भवति । न च भेदाभेदसमुच्चयः, व्याघातात् । अत एव नोभयत्यागः, तात्पर्यविरोधस्योक्तत्वाच्च । अन्यथा शून्यतैव पर्यवस्येत् । नचैष दृष्टिविधिः; उपासनैकवाक्यत्वाभावात्; तत्सद्भावेऽपि तल्लिङ्गाभावाच्च । अतो जीवपरयोरैक्ये तद्भेदे च प्रतीयमाने द्विचन्द्रदर्शनमूलभूतदोषवदात्मभेददर्शनहेतुरविद्याऽभ्युपगन्तव्या, तन्मूलभेदभ्रमोन्मूलनेन सप्रयोजन एवैक्योपदेशः यथैकश्चन्द्र इतीति ॥

अत्र ब्रूमः—यद्यैक्योपदेशोऽन्यथानुपपन्नः स्यात्तदैवं परिशुद्धे ब्रह्मण्यज्ञानभेदभ्रमादयः कल्प्येरन्, स त्वन्यथाऽप्युपपन्नः, अन्यथैवोपपन्नश्च । तथा हि—शरीरात्मभावनिबन्धनं सामानाधिकरण्यं व्युत्पादितमन्यत्र । नचात्र द्वयोः स्वरूपैक्यं विवक्षितुं शक्यम् । विरुद्धयोस्तदसंभवात् । अन्यथा यूपादित्यैक्यवाक्येऽपि भेदभ्रमहेतुदोषकल्पनप्रसङ्गात् । विरोधादेश्च समानत्वात् । न च लाक्षणिकसामानाधिकरण्येऽप्यैक्यं परित्यक्तम्, ययाकयाचिद्वृत्त्या एकस्मिन्नेव वृत्तेरङ्गीकृतत्वात् । अतः सामानाधिकरण्यस्य संभवति गत्यन्तरे परिशुद्धब्रह्मणि तन्मूलविरुद्धाज्ञानादिपरिकल्पनं निर्मूलम् । अज्ञानमूलभेदभ्रमवादे च उपदेश एव नोपपद्यत इति स्थितमन्यत्र । नचानुपपन्नत्वस्योपपादकतया स्वयमनुपपन्नान्तरं कल्प्यम्, नचाविद्यादेः स्वरूपमुपपत्तिमदिति दर्शितम् । यदि च दूरं गत्वा दुर्घटत्वमेव भूषणमिति वल्गसि तर्ह्यैक्योपदेशमेवादौ दुर्घटमभिमन्येथाः । अप्रामाण्यं तर्हि तस्य स्यादिति चेत्; अस्मन्मतप्रतिपादितप्रकारेण प्रामाण्यस्य सिद्धत्वात् । यदि वा माभूत्प्रामाण्यम्, यदज्ञानादिपरिकल्पनेऽप्यन्ततः फलति तच्चेदादौ तदप्रामाण्यं सिध्यति, किं दूरं धावसि ?

किंच भेदोपदेशान्यथानुपपत्त्या परमार्थभिन्नेऽप्यात्मन्यैक्यभ्रममूलमज्ञानं किं न कल्प्यते ? ऐक्यश्रुतीनामतत्त्वावेदकत्वप्रसङ्गभयादिति चेत्; तर्हि भेदश्रुतीनां तत्प्रसङ्गभयात् भेदभ्रममूलाज्ञानमपि न कल्पय । नचैका श्रुतिरितरस्या दासी, येन तदर्थं तामुपद्रवेम । प्रत्यक्षादिसंवादाच्च भेदश्रुतेरेव बलीयस्त्वम् । न च भेदस्वरूपं दुर्निरूपमिति तदप्रामाण्यस्वीकारः, अभेदस्वरूपस्यापि तथाविधयुक्तिभिर्दुर्निरूपतया तत्प्रतिपादकानां तत्स्वीकारप्रसङ्गात् । किंच त्वदुक्तयैवानुपपत्त्या नास्त्येव भेदप्रतीतिरिति किं न कल्प्यते ? प्रत्यक्षादिविरोधादिति चेत्; तर्हि निरवद्यभेदश्रुतिविरोधे दृष्टिं पातय । भ्रान्तिसिद्धे भेदेऽप्यैक्योपदेशो द्विचन्द्रादिष्विव घटत इति चेत्; अज्ञानादिरहितेऽपि ब्रह्मणि भ्रान्तिसिद्धैक्येन तदुपदेशोऽपि संभवत्येव । भिन्ने ब्रह्मण्यभिन्नत्वभ्रमः किमर्थमुत्पाद्यत इति चेत्; अभिन्ने ब्रह्मणि भिन्नत्वभ्रमः किमर्थ-

मुत्पाद्यते ? अथोपासनेन फलविशेषार्थमिति चेत् ? तुल्यम् । उपासनविध्येकवाक्यत्वं दृष्टिलिङ्गं वाऽत्र न दृश्यत इति चेत्तुल्यम् । दूरानुकर्षात्तत्र दृश्यत इति चेत् न किमत्रापि ? अपि च ब्रह्मणः शुद्धत्वान्यथानुपपत्त्यैव तस्य जीवैक्योपदेशो नास्त्येवेति वा सन्नप्यन्यपर इति वा तत्परोऽपि भ्रान्तिमूल इति वा कल्पयितुं युक्तम् । नचाशुद्धिमिथ्यात्वेनाविरोधः, उपदेशमिथ्यात्वेन तदुपपादकाभावेऽप्यविरोधप्रसङ्गात् । यश्चासौ * क्षेत्रज्ञं चापि मां विद्धीति तत्त्वपरिज्ञानसापेक्षस्तदुपदेशः, तेनैव च तदज्ञानं कल्प्यत इति चित्रम् ! तदेतच्छ्रीमद्गीताभाष्येऽपि स्पष्टमाह । तथा भाष्येऽप्यदर्शयत्, * नाप्यैक्योपदेशान्यथानुपपत्त्येत्यादिना ॥

॥ इति शतदूषण्याम् ऐक्योपदेशान्यथानुपपत्तिभङ्गवादः एकोनपञ्चाशः ॥ ४९ ॥

॥ अथ परमते शास्त्राधिकारिभङ्गवादः पञ्चाशः ॥ ५० ॥

हताशेषक्लेशा निरवधिमहानन्दधनिनो वयं भूयास्मेति स्थिरमनघवर्त्मन्यधिकृताः ।
अनाघ्रातद्वन्द्वा हयमुखपदद्वन्द्वरुचयः स्वदन्तां मे सन्तः श्रुतिजलधिमुष्टिन्धयधियः ॥

साधनचतुष्टयं पूर्ववृत्तमिति वदद्भिर्मुमुक्षुत्वं तावदधिकारिविशेषणमित्यङ्गीकृतम् । सा च मुमुक्षा मोक्षो मे स्यादित्येवमाकारा । तथाविधा सा कस्याधिकारिणो विशेषणमिति कथयन्तु कथयन्तु कलिब्रह्ममीमांसकाः, किं नित्यमुक्तस्वभावस्य संविदात्मनः ? उत तस्यैवाविद्यासाक्षितामापन्नस्य ? उतान्तःकरणप्रतिफलितचिदाभासस्य ? तद्वृत्तिसमारोपितक्रियात्वस्य वा चैतन्यस्य ? अन्तःकरणस्यैव वा ? अथ यस्यकस्यचिदनभिलप्यस्य ? न वा कस्यचित् ? इति । न प्रथमः, विरोधात्; तस्य नित्यमुक्तत्वादेव मोक्षेच्छाविरहात्; अन्यथा नित्यमपि तत्प्रसङ्गात् । मुक्तमप्यात्मानं बद्धमिवाभिमत्य मुमुक्षतीति चेन्न; तस्य तथाविधाभिमानेऽप्यनधिकारात्, तत्सद्भावे वा नित्यमुक्तत्वव्याघातात् । भ्रान्त्या वस्तुवृत्त्या च द्वयोरविरोध इति चेन्न; भ्रान्तेरेव तद्विरोधितया तदनधिकारस्योच्यमानत्वात् । साऽपि भ्रान्तिसिद्धेत्यविरोध इति चेन्न; दूरं गत्वाऽपि तद्भ्रान्तेर्दुस्त्यजत्वात् । न द्वितीयः, भवत्पक्षे साक्षित्वानुपपत्तेः, अविद्यानुभवानुपपत्तेश्च पृथगुपपादनात् । अस्तु वा साक्षित्वम्, तस्याप्यत्यन्तमव्यवस्थतयोदासीनस्वभावस्यानुकूलप्रतिकूलपक्षपातविरहात् संसारोद्वेगतन्मूलमोक्षेच्छातदायत्तश्रवणमननादिप्रयत्नासंभवात्, नतरामधिकारः । सर्वसाक्षिणश्च तस्य मुमुक्षायां युगपत्सर्वात्ममोक्षश्च प्रसजति । नचैतन्नानाजीववादिभिरिष्यते । एकजीववादिनोऽपि शुको मुक्तो वामदेवो मुक्त इत्यादि प्रतिनियतमोक्षोपदेशः प्रतिनियतमोक्षेच्छाधीनः; सा चेच्छा यदि साक्षिणः, तदा शुकादिमोक्षदशायामेव सर्वमोक्षे संसारानुवृत्त्यसंभवः । अथ स्वप्नदृष्टस्येव साक्षितया कल्पितस्य कस्यचित्; तर्हि मिथ्याभूतस्य मोक्षो नामात्यन्तभवनिवृत्त्यात्मा स्वरूपनिवृत्तिपर्यवसित इति साधु मोक्षस्समर्थितः । अथ स्वस्मिन् विनष्टे अज्ञाने स्वसाक्षीभूतायाः संविदः साक्षित्वेऽप्यतिक्रान्ते स्वप्रकाशानन्दमात्ररूपा संविदवतिष्ठत इति तदर्थमयमपवर्गारम्भ इति चेत्; प्रेक्षावत्प्रवृत्तेस्तथात्वासंभवात् । तदाहुः—* निरस्ताखिलदुःखोऽहमनन्तानन्दभाक् स्वराट् । भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते ॥ अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति । अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः ॥ मयि नष्टेऽपि मत्तोऽन्या काचिज्ज्ञप्तिरवस्थिता । इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति ॥ इति । अत एव न तृतीयः; तस्यापि चिदाभासत्वादेव विनाशावश्यंभावात् ।

प्रतिबिम्बस्य नाशेऽपि बिम्बात्मनाऽवस्थानवदन्तःकरणप्रतिफलितरूपविनाशेऽपि ब्रह्मात्मना स एव तिष्ठतीति चेन्न; प्रतिबिम्बस्य मिथ्याभूतस्य सत्यबिम्बात्मनाऽवस्थानासंभवात्। बिम्बप्रतिबिम्बयोर्भेदनिषेधे स्वरूपमेकमेव भवतीति चेन्न; सत्यमिथ्यार्थयोर्भेदनिषेधस्यैवासंभवात्। संभवे वा सर्वसत्यत्वं सर्वशून्यत्वम् अनैकान्तवादो वा प्रसज्येरन्। अस्तु वाऽत्र भेदनिषेधः, तदा प्रतिफलितचिदाभासस्य ब्रह्मणश्च स्वरूपैक्ये ब्रह्मण एव सर्वोपरागप्रसङ्गात् प्रतिफलनादिक्लृप्तिरपि निरर्थिका। प्रतिफलनादिकं च दुरुपपादमिति स्थितमन्यत्र। न चतुर्थः, तस्य क्रियात्वेनैव प्रकाशमानस्य मोक्षेच्छातदर्थप्रयत्नाद्याश्रयत्वस्य तद्भ्रमस्य वा दूरनिरस्तत्वात्। अत एव वृत्तिमदन्तःकरणभेदाग्रहणात्तस्य तदभिमान इति निरस्तम्। न पञ्चमः, अपवर्गेऽन्तःकरणस्यापि स्वरूपोच्छेदाभ्युपगमात् सुषुप्तिप्रलयादिषु स्वयमेव नश्वरतयाभ्युपगतस्य किं मोक्षार्थेन महता प्रयासेन? नचान्तःकरणाख्यस्य द्रव्यस्य ज्ञानेच्छादिसंभवः। ज्ञातृत्वाध्यासश्च न संभवतीति सिद्धमन्यत्र।

नापि षष्ठः; तस्यापि मिथ्यात्वेन विनाशावश्यंभावात्, सत्यत्वे ब्रह्मस्वरूपान्तर्भावबहिर्भावयोरनधिकारत्वसद्वितीयत्वादिप्रसङ्गात्। नचानभिलपनीयं मोक्षाधिकारिस्वरूपमपरिज्ञायैव स्वयमधिकरोतीति वाच्यम्; अविदिताधिकारिस्वरूपाय क्वचिदप्यनधिकारात्। विदितत्वेऽपि इक्षुक्षीररसादिवद् दुरभिलपत्वं तस्येति चेन्न; अहमर्थातिरिक्तस्य कस्यचिन्मुमुक्षोः स्वात्मसाक्षिकोपलम्भादर्शनात्। उक्तं हि * निरस्ताखिलदुःखोऽहमित्यादिना। नापि सप्तमः, अधिकारितद्विशेषवर्णनप्रयासनैष्फल्यात्, तन्मूलश्रवणादिप्रवृत्त्यनुपपत्तेः, शास्त्रारम्भभङ्गप्रसङ्गाच्च। नास्त्येव वस्तुतः कश्चिदधिकारी, तथाऽपि सन्निव भातीति तस्य मुमुक्षा विशेषणमिति चेत्; कस्यासौ सन्निव भातीति वक्तव्यम्। न कस्यचिदिति चेत्; तर्हि कथं सन्निव भातीति? ब्रह्मण इति चेन्न; तस्य परानुसन्धानादिसामर्थ्यविरहस्योक्तत्वात्। तत्सद्भावेऽपि ब्रह्मैवेदं विशेषणमित्यनुसन्दध्यात्। स्वयमनुसन्धानाभावे च न प्रवृत्तिः। अधिकारतन्मूलप्रवृत्त्यादिविशिष्टतयैव ब्रह्मणा तदनुसन्धानमिति चेत्; किमतः? नहि तावताऽपि स्वनाशरूपेऽपवर्गे ब्रह्मदृष्टस्य तस्य मुमुक्षोपपादिता भवति। स्वनाशमविदित्वैव स्वावस्थानाभिमानेन तस्य मुमुक्षाऽपि जायत इत्येवंरूपोऽयं ब्रह्मणस्संमोह इति चेन्न; एवंरूपस्य संमोहस्यापि शास्त्रतोऽवसाये स्वनाशवेदनसिद्धौ पुनरप्रवृत्तिप्रसङ्गात्। ननु यदि स्वनाश एवापवर्ग इति तत्त्वम्, तदा तदपेक्षायां को विरोध इति चेन्न; माध्यमिकवदौपनिषदैः स्वनाशापत्तिर्मोक्ष इत्यनभ्युपगमात्। अभ्युपगमे वा कथमस्य पुरुषार्थत्वमुपपादयिष्यसि? दुःखात्यन्तनिवृत्तिरूपत्वादिति चेन्न; * रसं ह्येवायं लब्ध्वाऽऽनन्दीभवतीत्यादिश्रुतिशतकोपप्रसङ्गात्। अस्तु वा स्वनाशः पुरुषार्थः, तथाऽपि तदर्था प्रवृत्तिरस्य न संभवति, ब्रह्माज्ञाननिवृत्तिमन्तरेण तत्कल्पितस्वरूपनिवृत्तेर्दुस्साधत्वात्। ब्रह्माज्ञानमपि तत्प्रवृत्त्यैव निवर्तत इति चेत्; तर्ह्येकमोक्षे सर्वमोक्षप्रसङ्गात् ब्रह्मदृष्टेषु जीवेषु बद्धमुक्तव्यवस्थाभङ्गः। तत एव च प्रतिनियतमुमुक्षाद्यसम्भवः। स्वभावतः कश्चिदेव मुमुक्षादिसंमोहः कदाचिद्ब्रह्माज्ञानं निवर्तयतीति चेत्; तर्हि किमर्थमिदानीं भवद्भिः प्रत्येकमुमुक्षादिपूर्वकं शास्त्रमारभ्यते। न वयं वस्तुतश्शास्त्रमारभामहे, किंतु अस्मदारम्भात्मना ब्रह्मण एवायं संमोह इति चेन्न; ब्रह्मण एव शास्त्रारम्भतज्जन्यज्ञानादिपरिज्ञाने तावतैवापवर्गसिद्धौ पुनस्संसारानुवृत्त्यभावप्रसङ्गादिति दुर्वचस्ते शास्त्राधिकारी। ननु भवतोऽपि समानोऽयं दोषः, ईश्वरस्य कारणावस्थस्य कार्यावस्थस्यावताराद्यवस्थस्य च नित्यमुक्तत्वादेव तस्य मुमुक्षाद्यसंभवात्, जीवस्यापि स्वतोऽपहतपाप्मत्वादिस्वभावत्वाभ्युपगमेन तस्यापि तदसंभवादिति चेन्न; स्वत उष्णस्य वह्नेर्मणिमन्त्रादिवशात्प्रतिबन्धवत् स्वतश्शुद्धियोगिनोऽपि जीवस्य कर्मवशात्संसारे तन्निवृत्त्यपेक्षोपपत्तेः। नहि वयं तन्निवृत्तिर्नित्येति वदामः, येन नित्यमुक्तत्वादिचोद्या-

वकाशः । नचात्मानं ज्ञप्तिमात्ररूपं, येनेच्छाप्रयत्नाद्यनुपपत्तिस्स्यात् । नच सर्वदा सर्वज्ञं, येन क्षुद्रपुरुषार्थाद्यभिलाषासंभवे कर्मशास्त्रस्य निर्मूलता भवेत् । अतो नित्यमुक्तब्रह्मात्मैकत्ववादे दुर्लभो मोक्षशास्त्राधिकारीति ॥

॥ इति शतदूषण्यां परमते शास्त्राधिकारिभङ्गवादः पञ्चाशः ॥ ५० ॥

॥ अथ मुक्तसंविन्निर्विषयत्वभङ्गवादः एकपञ्चाशः ॥ ५१ ॥

अनुकूलतया सर्वं पश्यन्त्या मुक्तसंविदः । आन्ध्यं निर्विषयत्वेन वदतोऽर्थान्निरुन्ध्महे ॥

* धीसन्ततिस्स्फुरति निर्विषयोपरागेति सौगतोपदिष्टमेव सन्ततिशब्दप्रहाणमात्रेण संगृह्णन्तः श्रुतिभिस्ताबद्बाह्यतया ख्याप्यन्ते । तथा हि * ब्रह्मविदाप्नोति परमित्युपक्रम्य * सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चितेति ब्रह्मवेदनफलत्वेन विभूतिगुणविशिष्टब्रह्मानुभव एव प्रपञ्च्यते । * यदा पश्यः इत्यादौ * निरञ्जनः परमं साम्यमुपैतीतीश्वरपरमसाम्यापत्तिवचनाच्च सार्वज्ञ्यादिकं मुक्तस्य सिद्धम् । * मम साधर्म्यमागताः इति च भगवान् स्वयमेवाह । * ब्रह्म वेद ब्रह्मैव भवतीत्यादिकमपि * वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेत्यादाविव साधर्म्यमात्रविषयमेव । न हि स्पर्धमानस्य यागविशेषमात्रेण साक्षाद्विष्णुत्वापत्तिः । जयरूपञ्च फलान्तरं स्फुटमभिधीयते । * इववद्वैवमेवेति च नैघण्टुकाः । प्रकारैक्ये च तत्त्वव्यवहारो मुख्यवत्प्रसिद्ध एव । एवकारादिश्च साधर्म्यातिरेकादमुख्ये मुख्यार्थोपचारद्योतको द्रष्टव्यः । यथा—* नेदं मुखमिदं पद्मं न नेत्रे भ्रमराविमौ । एतानि केसराण्येव न च दन्तार्चिषस्तव ॥ इत्यादिषु । नच तद्रूपस्य तद्रूपतापत्तिः फलम्, सिद्धत्वात् । नाप्यतद्रूपस्य, अपसिद्धान्तात्; अशक्यत्वाच्च । यथोक्तं भगवता पराशरेणापि * परमात्मात्मनोर्योगः परमार्थ इतीष्यते । मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ॥ इति । अत्र योग इति तादात्म्यमुच्यते । * नैति तद्द्रव्यतां यत इति तादात्म्यस्योत्तरत्र निषेधात् । न चादिभरतमृगत्ववत् तज्जातीयतापत्तिः, तथाऽपि साधर्म्यमात्रे पर्यवसानात् । वस्तुतश्च ब्रह्मणस्सर्वविजातीयत्वात् । न च तद्रूपस्यैव सतस्तद्रूपताप्रादुर्भाव इह विवक्षित इति वाच्यम्, तथाऽपि वाक्यस्यामुख्यार्थतात्पर्याविशेषात् । अतो वरं साम्यश्रुत्याद्यविरोधेन यथोक्त एवार्थः । * तत्केन कं पश्येत्; * न दृष्टेर्द्रष्टारं पश्येरित्यादिकं तु भाष्य एव सुव्यक्तं व्याख्यातम् । * सर्वं ह पश्यः पश्यतीत्यादिश्रुतयश्च मुक्तस्य साक्षात्सर्वज्ञतां स्फुटतरमुपपादयन्ति । * यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः । इत्यारभ्य * तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥ इति च स्मर्यते । तथाच * पश्चादुद्भूतबोधाश्चेत्यादि । सूत्रं च * जगद्व्यापारवर्जमित्यादौ * भोगमात्रसाम्यलिङ्गाच्चेति । अतः श्रुतिस्मृतिसूत्रानुवर्तिनामीश्वरपरमसाम्यापत्त्या सार्वज्ञ्यमेव मुक्तस्य स्फुटम् ।

किंच स्वप्रकाशैकस्वरूपस्य ब्रह्मणः कदाचित्स्वेतरविषयत्वं कदाचिच्च निर्विषयत्वमिति [त्यत्र] उभयमपि किं तत्त्वम्? उभयमप्यतत्त्वम्? उतान्यतरत्तत्त्वम्? अन्यतरदतत्त्वम्? इति । न प्रथमः; विषयविषयितत्सम्बन्धादिभेदस्य सत्यत्वप्रसङ्गात् । न द्वितीयः, उभयस्वरूपमात्रनिषेधे व्याघातात्; कालोपश्लेषेण निषेधो द्वयोरपि नित्यतामापादयेदिति पुनरपि व्याघातः । अथ कालावच्छिन्नान्यतरनिषेधार्थोऽन्यतरानुवाद इति मन्यसे, तदा तृतीयः पक्षः परिशिष्यते । सविषयत्वस्य कालानवच्छेदेन तात्त्विकत्वे प्रागुक्तदोषाः प्रादुष्युः । निर्विषयत्वस्य नित्यत्वे संसाराभाव-

प्रसङ्गात् उपलम्भविरोधोपदेशवैयर्थ्यशास्त्रानुद्धारापसिद्धान्तस्ववचनविरोधवादानधिकारादिदोषशतसाम्राज्यम् । वस्तुतो विषयाभावेऽपि सविषयता भातीति संसारादिसमुद्भवान्न दोष इति चेन्न ; विषयाभावेऽपि सविषयत्वं तात्त्विकमिति त्वयाऽभ्युपगन्तव्यत्वात् । अन्यथा निर्विषयख्यातिप्रसङ्गात् । नहि शुक्तिकारजतादिसंविदां रजतविषयतामपि बाधन्ते बाधकाः । अबाधितस्यापि मिथ्यात्वमित्यतिसाहसम् । अस्त्वेवं मिथ्याविषयगोचरत्वलक्षणं सविषयत्वं ब्रह्मणस्तात्त्विकम्, किं नश्छिन्नमिति चेन्न ; तन्नित्यत्वे नित्यसंसारप्रसङ्गात् । तदनित्यत्वे तात्त्विकत्वपरिग्रहायोगात् । न ह्यनित्यमपि किंचित्पारमार्थिकं भवन्तो मन्यन्ते । स्वरूपानुप्रवेशात्तात्त्विकमिति न दोष इति चेन्न ; स्वरूपस्याप्यनित्यत्वप्रसङ्गात् । तन्नित्यतया तदात्मना तन्नित्यत्वे पुनर्नित्यसंसारप्रसङ्गात् ।

किञ्चानादिकालं सविषयायाः संविदो निर्विषयता कुत आगता ? विषयग्रहणसामग्रीसन्तानात्यन्तोच्छेदादिति चेत् ; किं नित्यायास्सामग्र्यपेक्षया ? संविदन्तरसिद्ध्यर्थं सेति चेत् ; किं संविद्भेदमङ्गीकरोषि ? विषयावगाहनार्थं सेति चेत् ; किमिदमवगाहनं संवित्स्वरूपम् ? उतान्यत् ? पूर्वत्र नैरपेक्ष्यमेव ; उत्तरत्र किमसौ विषयिधर्मः, उत विषयधर्मः, उतोभयधर्मः, यद्वा विषयस्वरूपमेव ? आद्ये सविशेषत्वम् । मिथ्याधर्मप्रलापदूषणं तु स्थलान्तरेऽनुसन्धेयम् । द्वितीये तदुत्पत्तावपि रूपाद्युत्पत्ताविव संविदस्तत्सम्बन्धाभावेन तादवस्थ्यमेव । तृतीयेऽपि सविकारत्वमवर्जनीयमेव । चतुर्थे सम्बन्धासिद्धिः । विषयग्रहणसामग्र्या विषयोत्पादनमिति हास्यत्वं च । सिद्धे हि विषये प्रकाशार्थं सा । भ्रान्तौ तु तदुत्पत्तिस्तद्ग्रह इति न भेद इति चेन्न ; आत्मख्यातिवादप्रसङ्गात् । प्राक्सतामेव हि विषयाणां ग्रहणार्थं प्रमाणकल्पनं व्यावहारिकमपि भवत्परिगृहीतम्, अन्यथा क्षणभङ्गनिराकरणस्याप्ययोगात्, अतस्सामग्रीनिरपेक्षसंवित्स्वरूपप्रकाशवादिनस्ते न निर्विषयदशा सिध्यति । अस्तु तर्हि विषयविनाशादेव निर्विषयतासिद्धिरिति चेन्न ; नष्टस्यापि विषयत्वाविरोधात् । अन्यथा अतीतादिविषयस्मृत्यनुमानादिभङ्गप्रसङ्गात् । तद्विषयत्वे स्थितेऽपि तन्नाशान्न संसारादिप्रसङ्ग इति चेत् ; किमसौ नाशोऽप्रकाशात्मा ? उत प्रध्वंसात्मा ? आद्ये तद्विषयत्वे स्थितेऽपि तन्नाशादिति स्ववचनविरोधः । द्वितीये निवर्त्यसत्यत्वम्, निवृत्त्या सद्वितीयत्वमित्यादिदोषप्रसङ्गः । निवृत्तान् निवृत्ततया विषयीकरोतीति न दोष इति चेत् ; विषयीकरणं किं स्वरूपम् ? उत तदतिरिक्तम् ? स्वरूपपक्षे संसारदशायामपि नित्यं निवृत्ततया विषयीकारप्रसङ्गः, सर्वत्र स्वरूपस्य तदानीमपि विद्यमानत्वात् । अतिरिक्तपक्षे तत्किं सत्यम् ? उत मिथ्या ? सत्यत्वे सद्वितीयत्वादिप्रसङ्गः । मिथ्यात्वे तु तस्यैव दृगधीनसिद्धेः प्रकाशात्तत्कारणाविद्यानुवृत्त्यवश्यंभावाच्च पुनरपि संसारानुच्छेदः । तावन्मात्रं क्षम्यत इति चेन्न ; तस्य तस्याश्चानिवर्त्यत्वेन सत्यत्वप्रसङ्गे सद्वितीयत्वादिप्रसङ्गात्, तुल्यन्यायात् प्रपञ्चबाधादिमूर्खप्रलापानां निरोधप्रसङ्गात् । अतस्संविदि नित्यायाम्, सामग्रीनिवृत्त्या विषयनिवृत्त्या वा निर्विषयत्वापादनं त्वया वक्तुं न शक्यम् । ननु भवतामात्मस्वरूपस्य संविद्रूपत्वेऽपि यथा निर्विषयत्वं तथाऽस्माकमपि स्यात् । न स्यात्, अस्माकमात्मस्वरूपस्य प्रतीचः कदाचिदपि बाह्यार्थगोचरत्वानभ्युपगमात् । भवतस्तद्विषयाया एव तद्विषयत्वनिवृत्तेर्दुर्वचत्वात् ।

अस्तु तर्हि भवतां धर्मभूतज्ञानवत्कदाचित्सविषयत्वम्, कदाचिच्च निर्विषयत्वमिति चेन्न ; अस्माभिः परमार्थाकारान्तरापत्त्यभ्युपगमात्, भवतां तु तदनभ्युपगमात्तदयोगात् । अतो नित्यसंवित्स्वरूपप्रकाशमात्राधीनसिद्धीनां सर्वेषामपि पदार्थानां नित्यत्वमपि प्रसज्येत । तदधीनसिद्धित्वाभावे तु सिद्धिनिषेधे तुच्छत्वम् । तादधीन्यनिषेधे तु सत्यत्वम् । अतस्तन्मात्राधीनसिद्ध्यभ्युपगमे तद्वदेव तदधीनस्यापि नित्यत्वमवर्जनीयमेव । तथा च सति सर्वप्रपञ्चस्सत्य

इति जितं यथार्थवादिभिः। तद्भयात्संविन्नित्यत्वपरित्यागे साक्षात्सौगतत्वादिप्रसङ्गः। अत एव स्वापमदमूर्च्छादिषु निर्विषया संविदित्यपि भवद्भिर्दुर्वचमेव, निर्विषयनिराश्रयसंवित्प्रकाशस्तदानीमनुभूयत इति कस्यचिदपि सावधानस्यापि समस्तसंस्कारतिरस्कारकदेहविगमादिक्लेशाभावेऽपि न परामर्शोऽस्ति। किंतु अहमपि न विनष्टः, विषया अपि स्थिताः, प्रकाश एव सुषुप्त्यादौ निवृत्त इति सर्वे प्रत्यवमृशन्ति। * नाह खल्वित्यादिश्रुतिरपि ज्ञाननिषेधपरैव, न जानामीत्यत्रैव तात्पर्यात्। अस्माभिस्तु विषयप्रकाशलक्षणावस्थाविशेषरहितज्ञानद्रव्यमात्रसत्ता *न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इत्यादिश्रुतिबलादभ्युपेयते। न चास्ति तत्र प्रत्यक्षविरोधः, विषयप्रकाशव्यतिरिक्तदशायां तस्याः स्वप्रकाशायोग्यत्वात्, ज्ञानान्तरस्य तु तदानीं सामग्र्यभावादेवानुदयात्, तावताऽपि तदातनज्ञाननिषेधश्रुतेश्चरितार्थत्वात्। अतस्त्वत्पक्षे ज्ञानस्य कदाचिदपि निर्विषयदशा दुरुपपादा। मुक्तौ तु सुतरामिति यथाश्रुति सार्वज्ञ्यमेव तदा स्वीकार्यम्। अन्यपरास्ताः श्रुतय इति चेन्न; परब्रह्मोपासनप्रकरणात् तत्फलप्रतिपादनपरत्वेन च सांसारिकफलित्वायोगात्, तत्रतत्रैव च निवृत्तसमस्तपुण्यपापत्वादिप्रतिपादनात्, विध्यपेक्षिते फले समर्प्यमाणे केवलार्थवादत्वकल्पनायोगात्। अन्यथा श्रुतहानाश्रुतकल्पनादिदोषसमुद्भवात्। अतस्सिद्धं न कथंचिदपि मुक्तिदशायां सर्वविषयवैमुख्यलक्षणमान्ध्यं संविदश्शङ्कनीयमिति॥

॥ इति शतदूषण्यां मुक्तसंविन्निर्विषयत्वभङ्गवादः एकपञ्चाशः॥ ५१॥

॥ अथ सगुणनिर्गुणश्रुतिव्यवस्थावादः द्विपञ्चाशः॥ ५२॥

सत्त्वानीव विरुद्धजातिजनुषां सिद्धानि सिद्धाश्रमे वैरं यत्र मिथस्त्यजन्ति विधयस्सर्वे निषेधैस्सह।
तद्रङ्गेशयमङ्गसङ्गिकमलालक्ष्येश्वरप्रक्रियं शान्तावद्यमनन्तमङ्गलगुणं ब्रह्म प्रपद्येमहि॥

निर्गुणश्रुतिभिः केचिद्बाधन्ते सगुणश्रुतीः। तासामन्योन्यसौहार्दमाहुर्यतिवराश्रयाः॥

अस्ति तावदुपनिषत्सु ब्रह्मण्येव सगुणवादो निर्गुणवादश्च। यथा—* यस्सर्वज्ञस्सर्ववित्, * पराऽस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च, * सत्यकामस्सत्यसङ्कल्पः, * ब्रह्मणा विपश्चितेत्याद्याः परस्सहस्रास्सगुणश्रुतयः। एवं * निर्गुणं निरञ्जनं निष्कलं निष्क्रियं शान्तम्, * अपहतपाप्मा विजरः, * यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्रं तदपाणिपादम्, * अस्थूलमनण्वित्याद्याः निर्गुणश्रुतयः। आसामन्योन्यविरोधस्तावदापाततः प्रतीयते। नच सिद्धे वस्तुनि विकल्पसंभवः। तत्र विरोधस्थिरीकरणेन बाध्यबाधकभाव इति नीचाः, विषयव्यवस्थया सन्धिरिति साधवः। ननु कथं विषयव्यवस्था? सा ह्याश्रयभेदेन वा शीतोष्णवत्? देशभेदेन वा चित्रे नीलपीतादिवत्? कालभेदेन वा पाकजपरमाणुगुणवत्? समुच्चयेन वा प्रदेशवर्तिसंयोगतदभाववत्? प्रतिसम्बन्धिभेदेन वा पितृत्वपितृव्यत्ववत्? ग्राहकभेदेन वा रूपस्पर्शवत्? गृहीतृभेदेन वा जातिव्यवस्थितभोगादिवत्? विधेयनिषेध्यभेदेन वा ब्रह्महत्याग्नीषोमीयादिवत्? अन्येन वा केनचित् श्वेतपीतादिबोधवत्? इति। न तावदाद्यः; परमेव ब्रह्माधिकृत्य सगुणनिर्गुणश्रुत्योरुदयात्; नच जीवविषयाः काश्चित्, अन्यास्तु परविषया इति विवेक्तुं शक्यम्, विशेषाभावात्। नच सर्वज्ञत्वादिश्रुतीनां जीवविषयत्वम्, प्रत्यक्षविरोधात्, संसारोच्छेदप्रसङ्गाच्च। नचेदं यौगिकं सार्वज्ञ्यम्, नित्यसर्वज्ञत्वोक्तेः। नापि निर्गुणश्रुतीनाम्, तत एव; उपलभ्यते हि बुद्धिसुखादिमत्तया जीवः; तदभावे च तस्य संसरणं निर्बीजम्।

न द्वितीयः ; स हि सम्बन्धिदेशभेदो वा स्यात्, स्वप्रदेशभेदो वा? आद्ये रूपाद्यवच्छिन्नप्रदेशभेदेन सगुणत्वनिर्गुणत्वयोर्व्यवस्थेति स्यात्; तत्र तावदेकस्यैव पुंसः क्वचित्सर्वज्ञत्वं क्वचिदान्ध्यमिति स्यात्; तत्तु व्याहतम्, धर्मिभेदाभावात्। प्रदेशवर्तिगुणोत्पत्तिवदेवेति चेन्न; प्रदेशवर्तिनोऽपि ज्ञानस्य सर्वविषयीकरणे तद्धर्मिणः कार्त्स्न्येन सर्वज्ञत्वानपायात्; यद्यपि प्रदेशान्तरे तस्य समवायो नास्ति, तथापि तत्र भ्रान्त्यादियोगित्वं क्वाचित्केनापि सार्वज्ञ्येन विरुद्धमेव; यथावत्प्रकाशमाने अध्यासाद्यसंभवात्। औपाधिकब्रह्मभेदाभेदवादनिराकरणेन चायमर्थो व्यक्तमनुसन्धेयः। प्रादेशिकगुणसमवायाभावकथनेन च न ब्रह्मणः कश्चिदतिशयः, सर्वद्रव्यसमत्वात्। एतेनैव स्वप्रदेशभेदोऽपि निरस्तः। स ह्यौपाधिकस्तावन्निरस्त एव; स्वाभाविकोऽपि तुल्यन्यायतया निरस्त एव। नच स्वाभाविकोंऽशस्तत्र संभवति, निरवयवत्वश्रुतिविरोधात्; निरवयवत्वमंशभेदेन संभवत्विति चेत्; अंशनिरवयवत्वादंशिनोऽपि निरवयवत्ववचने सर्वस्याप्यवयविनो निरवयवत्वाविरोधेन सावयवत्वलक्षणनिषेध्यासिद्धौ निषेधासिद्धेः। समुदायेषु सांशतया तत्सिद्धिरिति चेन्न; अत्रापि तत्सम्भवात्तन्निषेधासिद्धेः। एकदेशस्य त्वेकदेशत्वनिषेध इति निरर्थोक्तिः।

नापि तृतीयः; प्रागुक्तविकल्पायोगात्; पूर्वमत्यन्तनिर्गुणत्वे पश्चादपि कारणाभावेन गुणोत्पत्त्ययोगात्; पश्चान्निर्गुणता हेतुतः संभवन्त्यपि सर्वविशेषमिथ्यात्वाभावेनात्यन्ताय स्यात्, वस्त्वन्तरसत्यत्वे तत्संयोगादिलक्षणस्यावर्जनीयत्वात्, वस्त्वन्तराणां च मिथ्यात्वमन्तरेणात्यन्तोच्छेदासंभवात्; सत्कार्यवादसमर्थनेन निरन्वयविनाशादिनिराकरणात्। अत एव चतुर्थोऽपि निरस्तः, प्रत्येकपक्षोक्तदोषस्य समुच्चये समुच्चयस्याप्यपरिहार्यत्वात्। न हि ब्रह्मांशस्य कदाचित्संसरणं कदाचिदपवर्ग इति भास्करयादवप्रकाशमताद्वयीयः। दूषितं चैतत् कालावच्छिन्नसार्वज्ञ्यदूषणादिना; यथोक्तम्—* सार्वज्ञ्यसर्वशक्त्यादिगुणकः केन सिध्यति। नेश्वरस्यापि विज्ञेयः स्वतः सर्वगुणश्रुतेः॥ सार्वज्ञ्यादिस्वतस्त्वे तु विवादो यदि कल्प्यते। सत्यत्वादौ विवादः किं न स्यान्निर्गुणवादिनाम्॥ इति। न पञ्चमः; पितृव्यपितृत्वादिवत्सगुणनिर्गुणत्वयोः प्रतिसंबन्ध्युपाधिकत्वाभावात्; नीलपीतादिवन्निरपेक्षत्वेनैवोपलम्भात्। न हि तत्त्वतो नीलमेव कञ्चित् प्रति पीतम्, पुरुषभेदेनानुष्णश्च कृष्णवर्त्मा कदाचिद्भवतीति चेन्न; तत्रानुष्णत्वाभावात्, प्रतिबन्धकबलेन तु कश्चिदुष्णत्वं नोपलभते, तत्कार्यं च स्फोटादिकं तदा न जायते। * शीतो भव हनूमतः, * तत्रैष वह्निः पवनेरितोऽपि न मां दहत्यत्र समन्ततोऽहम्। पश्यामि पद्मास्तरणास्तृणानि शीतानि सर्वाणि दिशां मुखानि॥ इत्यादि कथमिति चेत्; इत्थम्—तत्र हि प्रभावविशेषप्रतिबद्धतया दाहकत्वाभाव एव हि तात्पर्यम्; यद्वा चान्द्रमसमहस इव देवताप्रभावोपनीतसलिलाद्यवयवनिवहसंवलनवशादनुद्भूतौष्ण्यस्य दहनस्योपलभ्यमानशीतिमारोपेण शीतव्यपदेशः।

नापि षष्ठः; ग्राह्यभेदस्य ग्राहकभेदाधीनत्वे रूपस्पर्शादिभेदविलयप्रसङ्गात्; हिंसाहिंसावाक्ययोरेकस्मिन्नेव क्रतावन्वयेऽपि विरोधाभावप्रसङ्गाच्च। न च भिन्नकरणग्राह्यरूपस्पर्शयोरिव सगुणत्वनिर्गुणत्वयोरविरोधः, भावाभावरूपत्वात्; रूपस्पर्शयोस्तु सहानवस्थानहेतोः कस्यचिदप्यदर्शनात्। नापि सप्तमः; आनुकूल्यप्रातिकूल्यादेः सप्रतिसम्बन्धिकत्वेन जातिव्यवस्थितभोगाद्युपपत्तेः। सगुणत्वनिर्गुणत्वयोस्तु तदभावेनानुपपत्तेः; उपपत्तौ वा ब्रह्मणोऽव्यवस्थितस्वभावत्वप्रसङ्गात्। नचाष्टमः; निर्गुणश्रुतीनां सर्वगुणनिषेधपरत्वेन विधेयगुणविशेषपरिशेषासिद्धेः; गुणविधिवशादेव निर्गुणश्रुतयः सङ्कोचमर्हन्तीति चेन्न; असङ्कुचितनिर्वाहे सति सङ्कोचानुपपत्तेः। तथा सति सगुणश्रुतीनामप्रामाण्यं प्रसज्येतेति चेन्न; अपच्छेदनयेन प्रमाणत्वेऽपि बाध्यत्वोपपत्तेः। पौर्वापर्यायोगेनापच्छेदनयानवतार इति चेन्न; अपच्छेदनये प्रमाण-

पौर्वापर्यस्य निमित्तपौर्वापर्यमात्राधीनत्वात्, अत्राप्यर्थतो विधिनिषेधयोः पौर्वापर्यसिद्धेः । विधिर्ह्यन्यानपेक्षतया पूर्वो भवति, निषेधस्तु निषेध्यप्रसङ्गसाकाङ्क्षतया परः । एवं सति हिंसाविधिनिषेधवाक्ययोरप्यपच्छेदनयावतार इति चेन्न; तत्र विधिवाक्यस्यात्यन्ताप्रामाण्यप्रसङ्गात्; अत्र तु सगुणवाक्यानां विद्यादिविषयाणामपि दृष्टिविशेषणोक्तिन्यायेन तत्तत्फलाभिलाषबम्भ्रम्यमाणपुरुषविशेषविषयोपासनविधिशेषतयाऽपि प्रामाण्योपपत्तेः । अतः उभयोः प्रामाण्येऽपि बाध्यबाधकव्यवस्था । अत एव तत्त्वतो निर्गुणत्वं च सिध्यतीति न निर्गुणश्रुतीनां सङ्कोचहेतुमुपलभामहे । अत एव नवमोऽपि दत्तोत्तरः; अस्मत्सिद्धान्तनीतिमन्तरेणोभयप्रामाण्यनिर्वहणासिद्धेः । उभयाप्रामाण्यस्य वैदिकैः सामान्यतस्तावदनभ्युपगमात्; उभयोरप्यान्यपर्यवादिनां निरीश्वरमीमांसकनिगमतरुवन्दकानां सिद्धार्थतात्पर्यसमर्थनादिभिरुन्मूलितत्वात् । अन्यतराप्रामाण्यपक्षेऽप्यन्ततोऽस्मन्नयमन्तरेण गत्यभावात् । न हि निर्गुणवाक्यमेव बाधितुं युक्तम्, तदुपदेशनैष्फल्यप्रसङ्गात् । न च स्वरूपपराणां वाक्यानामुपासनविधिशेषत्वेन यथाकथञ्चन नेयता शङ्क्या, त्र्यन्तराद्धान्तापराधप्रसङ्गात् । अतः पारिशेष्यान्निर्गुणवाक्यैः सगुणवाक्यानामेव बाधः । यद्यपि सत्यज्ञानादिवाक्यं स्वरूपपरमपि सामानाधिकरण्यं पदसाधारण्यं शरणयद्भिः भवद्भिस्तत्तत्प्रवृत्तिनिमित्तविशिष्टस्वरूपपरमित्युपपादितम्, तथापि ज्ञानानन्दादिशब्दावगतं ब्रह्मस्वरूपं न ज्ञातृत्वानन्दित्वादिविशेषसहमित्युपपनीपद्यते । न हि ज्ञानस्य ज्ञानमानन्दस्यानन्दो वा गुणपक्षपातिभिरपि भवद्भिरभ्युपजिगमिष्यते; अतः शब्दादर्थाच्च गुणनिषेधसिद्धिः । न च वाच्यं सुखमात्ररूपत्वे तद्भावापत्तेर्मोक्षस्य पुरुषार्थता न स्यात्, न हि सुखं स्यामिति कश्चिदिच्छति, अपि तु सुखी स्यामित्येव । अतः सुखसंबन्धेन वैशिष्ट्यमवर्जनीयमिति सुखापरोक्षमात्रेण पुरुषार्थतासिद्धौ सम्बन्धस्याप्रयोजकस्य कल्पनायोगात् । द्रव्यत्वोपादानत्वादिभिस्सगुणत्वमनुमीयत इति चेन्न; द्रव्यशब्देन वस्तुत्वादिमात्रविवक्षायां मुख्यामुख्यविकल्पेन दोषात्, अन्ततस्तयोरपि परिहरणीयत्वात् ।

एतेनोपादानत्वमपि निरस्तम्; आत्मत्वमप्यात्मभेदानभ्युपगमात् दृष्टान्तहीनम् । तथा आत्मशब्देन आत्मत्वजातिचैतन्यादिगुणविशिष्टाकारविवक्षायामसिद्धिः । ज्ञानत्वविवक्षायामप्रयोजकत्वं विरोधो वा । एवमन्यदपि दूष्यम् । न च वाच्यम्, अहं जानामीत्यादिप्रत्यक्षेणैव बुद्धिसुखादिविशिष्ट एवात्मा प्रतीयत इति; तत्तद्वृत्तिविशेषविशिष्टस्यैवाहङ्कारस्य तथा प्रतीतेः । अन्यथा स्थूलोऽहमित्यादिप्रत्यक्षेण स्थौल्यादिगुणवैशिष्ट्यस्यापि प्रसङ्गात्; देहव्यतिरेकसाधनात्तन्निषेधे अहङ्कारव्यतिरेकसाधनात्तद्धर्मनिषेधस्यापि सिद्धेः; अतः प्रत्यक्षाद्यप्राप्तार्थप्रतिपादकनिर्गुणश्रुतिसामर्थ्यादेव निर्गुणे ब्रह्मणि सिद्धे, मायावच्छिन्नमिथ्यागुणविशिष्टेश्वरगोचराः सगुणश्रुतय इति ।

अत्रोच्यते । यदुक्तं सगुणनिर्गुणश्रुतीनामाश्रयभेदादिना निर्वाहे दूषणम्, तदस्माकमपीष्टमेव । यत्तु विधेयनिषेध्यभेदेन विषयव्यवस्थायामुक्तम् असंकुचितनिर्वाहे सति सङ्कोचोऽनुपपन्न इति; तत्तदा शोभेत यदि सगुणश्रुतिबाधमन्तरेणासंकुचितनिर्वाहः स्यात् । बाधात् सङ्कोच एव न्याय्यः । सङ्कोचोऽपि क्वाचित्कबाध एवेति चेत्; सत्यम्, न तु सार्वत्रिकः, तत एव तस्य संग्रहणीयता । अन्यथा उत्सर्गापवादनय एव निर्मूलः स्यात् । यच्चोक्तमपच्छेदनयेन प्रमाणत्वेऽपि बाध्यत्वमुपपद्यत इति; तदपि मीमांसामांसलितचेतसां जुगुप्सनीयम् । अनियतविरोधपौर्वापर्ये ह्यपच्छेदनयः, अन्यतरापच्छेदे बाधकाभावेन प्रामाण्यसिद्धेः, युगपदपच्छेदे विकल्पत उभयोः प्रामाण्यसंभवात्; क्रमेणापच्छेद एव केवलं * पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यतीति न्यायेन पूर्वबाधः । तथापि प्रयोगान्तरे प्रामाण्यं सिध्यत्येव, नियतविरोधपौर्वापर्ये तूपक्रमाधिकरणन्यायेन परानुत्पत्तिरेव । ततश्चोत्सर्गापवादन्यायस्यैव सगुणनिर्गुणश्रुत्यो-

विषयता, अतो विहितव्यतिरिक्तगुणविषयो निषेधः। यच्चोक्तं सगुणवाक्यानां मिथ्याविषयाणामपि दृष्टिविधिवत् फलविशेषार्थोपासनार्थतया प्रामाण्यमिति; तदपि न, तत्रैव मोक्षाख्यस्य फलस्य बहुलमुपलब्धेः। पुण्यपापप्रहाणपूर्वकस्वाभाविकरूपाविर्भावरूपफलविशेषस्य सांसारिकत्वोक्तिः साहसिकेभ्य एव स्वदते। अस्तु तर्हि मिथ्यार्थविषयसगुणोपासनेनापि विधिबलान्मोक्ष इति चेन्न; तथा सति निर्गुणवाक्यानामेव मिथ्यार्थविषयत्वकल्पनं किं न स्यात्? तत्त्ववेदनस्यैव मोक्षहेतुत्वमिति नियमनिष्कासनात्। तथा च तत्त्वोपदेशश्च निष्प्रयोजनस्स्यात्, अन्यथापि मोक्षसिद्धेः। अतो विषयव्यवस्थयैवोभयप्रामाण्यसिद्धिः। अतो नवमस्य कल्पस्यानवतार एव।

यत्पुनरुक्तं न ज्ञानस्य ज्ञानमानन्दस्यानन्दो वा जाघटीतीत्यर्थतो गुणनिषेधसिद्धिरिति; किं तत्र धर्मस्य धर्मान्तराभ्युपगमेनानवस्थादिरभिप्रेतः? उतैकजातीययोर्धर्मधर्मिभावो नोपपद्यत इति? यद्वा ज्ञानानन्दाद्यवान्तरजातीयस्य तत्तदवान्तरजातीयाधारत्वं न दृष्टमिति? अथ ज्ञानानन्दयोरज्ञानानन्दरूप एवाश्रयो दृष्ट इति? अथवा ज्ञानानन्दरूपस्यात्मनो ज्ञानानन्दादिकं शशादेरिव शृङ्गादिकमुपलम्भबाधितमिति? नाद्यः, अनुक्तोपालम्भरूपत्वात्। न हि वयं धर्मभूतचैतन्यादेश्चैतन्यान्तरादिकं ब्रूमः। धर्मस्य चोपलम्भादेव धर्मान्तराभ्युपगमे कथमनवस्था? नापि द्वितीयः, धर्मधर्मिणोः सर्वत्र सत्तादिभिर्यथाकथञ्चिदेकजातीयत्वावश्यंभावात्। प्रभाप्रभावदादिषु विशेषतोऽपि सजातीययोर्धर्मधर्मिभावो दृष्टः। अवयविवादे च परमाणुद्व्यणुकादिष्वाश्रयिषु पार्थिवत्वादिविशेषसाजात्यमिष्टम्। नापि तृतीयः; अन्यत्रादृष्टेरन्यत्र निषेधकत्वाभावात्। अन्यथाऽतिप्रसङ्गात्। तत्र दृष्टान्तेनानुमाने तु श्रुत्यादिबलेन कालात्ययापदेशात्।

नापि चतुर्थः, असिद्धेः। ननु किं ज्ञानतया आनन्दतया च ज्ञातोपलभ्यत इति चेत्; किं वा जडतया दुःखतया चोपलभ्यते? तदपि नास्तीति चेत्; कस्तर्हि विरोधः? सन्दिग्धस्वरूपत्वमिति चेन्न; तावता विरोधहेतुत्वासिद्धेः। शास्त्रादिभिस्तु विशेषनिष्कर्षात्। पञ्चमस्तु प्रत्यक्षश्रुतिभ्यामेव प्रतिक्षिप्यत इति नानुपपत्तिं पश्यामः। यत्तूक्तं सुखापरोक्ष्यमात्रेण पुरुषार्थ[ता] सिद्धौ सम्बन्धस्याप्रयोजकस्य कल्पनमयुक्तमिति; तदपि निजहृदयविसंवादि जल्पितम्। तथा हि—न हि परस्य सुखापरोक्ष्यमात्रेण स्वयमपि लब्धपुरुषार्थो भवति, तथा सत्येकस्य सुखस्य दुःखस्य सर्वार्थत्वप्रसङ्गेन प्रत्यक्षानुमानशास्त्रादिसमस्तप्रमाणक्षोभप्रसङ्गात्। स्वरसतश्च परोपकारापकारयोरपि प्रवृत्तिनिवृत्तिप्रसङ्गात्। अतः स्वसम्बन्धितयैव सुखमपरोक्षतयार्थनीयं भवति। स्वरूपस्य तर्हि भवतां कथं सुखत्वमिति चेत्; सच्चिदानन्दरूप आत्मेति वदता भवता नैवं चोदनीयम्। स हि सदात्मा सुखत्वविशिष्टाकारेण प्रकाशात्मतया संबध्यत इति निपुणं चिन्तय। यत्तु सगुणत्वानुमाने दूषणमुक्तम्; न तेनास्माकं चेतसि चमत्कारः। जीवेश्वरयोः प्रत्यक्षागमाभ्यां सगुणत्वसिद्धेः। यत्तु अहं जानामीत्यादिप्रत्यक्षस्य वृत्तिविशेषविशिष्टाहङ्कारविषयत्वमुक्तम्, तत्तु अहमर्थात्मत्वसमर्थनादौ परिहृतं द्रष्टव्यम्। अतो जीवस्य सर्वगुणशून्यत्ववचनं प्रत्यक्षादिसर्वप्रमाणविरुद्धम्। ईश्वरस्य तु आगमैकसमधिगम्यस्यागमविरुद्धम्।

एतदुक्तं भवति—निर्गुणश्रुतिवदेव सगुणश्रुतयोऽपि तत्त्वविषयाः प्रमाणभूताश्च। अत एव न तासां मिथो बाध्यबाधकभावः। उत्सर्गापवादनयाच्च विहितव्यतिरिक्तविषयोऽत्र निषेधः, अतो भिन्नविषयत्वान्न विरोधगन्धः। विरोधाभावाच्च न बाध्यबाधकभावः। तदभावाच्चोभयप्रामाण्यं यथार्थरूपं स्वतः प्रतीयमानमनपोदितमिति। उक्तं च श्रीवरद-

गुरुभिस्तत्त्वसारे—*यद्ब्रह्मणो गुणशरीरविकारजन्मकर्मादिगोचरविधिप्रतिषेधवाचः । अन्योन्यभिन्नविषया न विरोधगन्धमर्हन्ति तत्र विधयः प्रतिषेधबोध्याः ॥ इति ।

॥ इति शतदूषण्यां सगुणनिर्गुणश्रुतिव्यवस्थावादः द्विपञ्चाशः ॥ ५२ ॥

—————

॥ अथ ब्रह्मोपादनत्वान्यथानुपपत्तिभङ्गवादः त्रिपञ्चाशः ॥ ५३ ॥

सद्ब्रह्मादिमुखैः पदैः श्रुतिषु यत्तत्त्वं समुद्घोषितं स्यामित्येव चराचरं जगदिदं सृष्ट्वा प्रविश्याभवत् ।
तस्मै विस्मयनीयमङ्गलगुणस्थेम्ने सदा स्थायिने सर्वावस्थसमस्तवस्तुवपुषे धाम्ने परस्मै नमः ॥

अस्तु तर्हि ब्रह्मोपादानत्वान्यथानुपपत्त्या विश्वमिथ्यात्वसिद्धिः । तथा हि—केवलनिमित्तेश्वरवादप्रतिक्षेपेण [मुखेन] ब्रह्मण एवोपादानत्वमपि *प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादित्यादिभिः समर्थितम् । तदेतदुपादानत्वं किं मृद्घटादिवत् स्वरूपतः ? उत बालयुवादिवत् सूक्ष्मचिदचिद्विशिष्टवेषेण ? अथवा रज्जुसर्पादिवदविद्यावैचित्र्यनिबन्धनभ्रान्त्यैवेति । न तावत् प्रथमः, निर्विकारत्वनिरवद्यत्वश्रुति [कोप] क्षोभप्रसङ्गात् । नचांशभेदेन कालभेदेन वा विषयव्यवस्था, निरवयवत्वाकालकाल्यत्वादिस्वभावविरोधप्रसङ्गात् । नच सावयवत्वादिकमपि तथैव व्यवस्थाप्यम्, तथाऽपि तदात्मके ब्रह्मण्येव समस्तदोषप्रसङ्गस्य दुष्परिहरत्वात् । नच ब्रह्मांशानां ब्रह्मणोऽत्यन्तभेदं वा ब्रह्माध्यस्तत्वं वा स्वप्नेऽप्यङ्गीकरोषि । श्रुतिबलादेव ब्रह्मणि सर्वात्मके सावयवत्वनिरवयवत्वसदोषत्वनिर्दोषत्वोपादानत्वादि सर्वमभ्युपगच्छाम इति चेन्न; व्याघातोत्सादे पूर्वपक्षस्यापि अप्रतिक्षेप्यत्वात् । तथा चालं ब्रह्ममीमांसानिरूपणक्लेशेन । नापि द्वितीयः, विशिष्टस्योपादानत्वे प्राप्ताप्राप्तविवेकेन विशेषणस्यैवोपादानत्वापातात् । यदि पुनर्विशिष्टमुपादानमित्यत्र विशेषणं विशेष्यं चेत्युभयमप्युपादानमिति विवक्षितम्, तदा विशेष्यस्यापि सविकारत्वप्रसङ्गो दुर्वारः । तथा च किं विशेषणवैशिष्ट्यवृथाग्रहेण ?

किंच, यदि चिदचिदीश्वरैः संभूय जगदाख्यं कार्यमारभ्यते, तदा कार्याणां सर्वेषां त्रिस्वभावत्वप्रसङ्गः, यथा शुक्लकृष्णरक्ततन्त्वारब्धे पटे शुक्लकृष्णरक्तस्वभावत्वम् । सीसताम्रारब्धकार्यस्येव वा त्रितयोत्तीर्णस्वभावत्वप्रसङ्गः । लाक्षारसावसिक्तकार्पासकुसुमरागवत्, रुमाप्रक्षिप्तकाष्ठलावण्यवद्वा विश्वस्याप्यनभिभवनीयेश्वरस्वभावत्वापत्तिः । किंच विशिष्टस्योपादानत्वं किं श्रौतमुत कल्पितम् ? न पूर्वः; कारणवाक्यस्थसद्ब्रह्मात्मादिशब्दानां ब्रह्मस्वरूपमात्रे रूढत्वात् । उक्तं च भवतां भाष्येऽपि *शरीरिभूतपरमात्माभिधायिभिः सद्ब्रह्मादिभिश्शब्दैरिति । न च स्वरूपे च विशिष्टे च शक्तिरित्यनेकार्थताक्लृप्तिः; कल्पकाभावात्, कल्पनागौरवोपहतत्वाच्च । एवं *ब्रह्म वनं ब्रह्म स वृक्ष आसीत्; *तदात्मानं स्वयमकुरुत, *यद्भूतयोनिं परिपश्यन्ति धीराः, इत्यादिभिरपि ब्रह्मस्वरूपस्यैवोपादानत्वं श्रूयते । नाप्युत्तरः, कल्पकाभावात्; प्रत्युत समस्तभेदरहितस्यैकस्यैव कारणवाक्येऽवधारणात् तद्विरोधिविशेषणकल्पनं वाक्यतात्पर्यविरुद्धं च । अतः इदमिति निर्दिष्टकृत्स्नप्रपञ्चरूपेण *बहु स्यामिति स्वरूपस्यैव बहुभवनसङ्कल्पपूर्वकोऽयं विश्वारम्भः । मृद्घटादिदृष्टान्तानुसाराच्च स्वरूपस्यैवोपादानत्वं सिद्धमिति स्वरूपनिर्विकारश्रुतिविरोधपरिहारे तृतीयपक्षः परिशिष्यते । यथा चैकैव रज्जुः सर्पभूदलनाम्बुधारादिरूपेण भ्रमादनुवर्तते, यथा चैकस्मिन्नेव निरवयवे गगने युगपदनन्तभेदभिदुरगन्धर्वनगरारम्भः, यथा च मुखचन्द्रादेः दर्पणतरङ्गाद्युपाधिभेदेन मुखचन्द्रगतनानात्वोपलम्भः, तथा निरंशेऽपि निर्विशेषस्वप्रकाशे स्वत-

श्शुद्धे ब्रह्मण्यसंभवद्विकारे दुर्निरूपदोषमूलविकल्पासहविचित्रचिदचिदात्मकजगदध्यास इत्यभ्युपगन्तव्यमिति तत्त्वावेदक-निर्विकारजगदुपादानश्रुतितात्पर्यम् । अविद्यया च सर्वमन्यत्प्रपञ्चसत्यत्वग्राहकं ग्रहवन्निग्राह्यमिति ।

अत्र प्रतिविधीयते—स्वरूपपरिणामपक्षदूषणं तावदस्माकमपि सम्मतमेव । तथापि बहुप्रमाणोपस्थापितबहु-मुखव्याघातशतसादिताद्भवन्मतात् त्रिचतुरविरोधसितासितभास्करादिमतानुरोधेन कार्यकारणसंरक्षणमेव समुचितम् । यत्तु विशिष्टपक्षे प्राप्ताप्राप्तविवेकेन विशेषणस्यैवोपादानत्वमापन्नमिति; तत्र विशेषणस्य साक्षाद्विकाराश्रयत्वप्रसङ्ग इष्टः । विशे-ष्यस्यापि परम्परयाश्रयत्वेऽप्याश्रयत्वमात्राविशेषादुपादानशब्दवाच्यत्वप्रतिक्षेपस्त्वशक्यः । यथा भवतोऽप्यविद्याया एव साक्षाद्विवर्ताश्रयत्वेऽपि तस्या एव साक्षिभूतब्रह्माधीनसत्ताकत्वात् ब्रह्म विवर्तत इत्युक्तिः; तथा परिणामस्यापि साक्षात् ब्रह्मशरीरभूतद्रव्यगतत्वेऽपि तस्य तदारब्धतया तदधीनतामात्रात् ब्रह्म परिणमतीति वक्तुं शक्यम् । नैतावता विशेष्यस्य साक्षाद्विकाराश्रयत्वप्रसङ्गः । परम्परयाश्रयत्वं तु भवत इवास्माकमपि संमतमदोषावहं च । यथा बालो युवा जात इत्यादौ विशेष्यभूतात्मस्वरूपस्य निर्विकारत्वे विशेषणे साक्षाद्बालत्वाद्यवस्थायोगेन आत्मपर्यन्तो बालयुवशब्दप्रयोगः, तद्वदत्रा-प्युपादानकार्यशब्दयोः प्रयोग इति न दोषः । एवं विशेष्यस्य निर्विकारत्वं विशिष्टग्रहणशक्तिश्चेत्युक्तं भवति । अन्य-थाऽष्टवर्षत्वब्राह्मणत्वादीनामात्मासंबन्धेनोपनयनादिविधीनामप्रवृत्तिरिति कर्मब्रह्ममीमांसयोरारम्भ एव कापेयकल्पः स्यात् । तथाऽपि कथमवस्थाद्वयरहितस्वरूपे कस्यचिदुपादानोपादेयवाचोयुक्तिश्चित्तमारोहेदिति चेन्न; विशेषणवद्विशेष्येऽप्यवस्था-द्वययोगात्, तत्तदवस्थतत्तद्वैशिष्ट्यानामागन्तुकत्वेनावस्थात्वात्, मिथो भिन्नत्वाच्च; आत्मनो बालयुवदेहवैशिष्ट्यवत् । आगन्तुरपृथक्सिद्धो धर्मोऽवस्थेति कीर्त्यते । विशेष्येऽपि च वैशिष्ट्यभेदोऽवस्थान्तरायते ॥ एतेन स्वभावसङ्करादयो दोषा न प्रसङ्गमर्हन्ति । न हि बालस्य युवभावे देहदेहिनोः प्रतिनियताः स्वभावाः सङ्कीर्यन्ते । न च शुक्लकृष्णरक्त-तन्त्वारब्धे स्वभावसङ्करः । विभक्तदशायामिव संसर्गदशायामपि शौक्ल्यादीनां यथास्वं प्रतिनियतांशविषयत्वात् । एव-मत्रापि विशिष्टकार्ये यथास्वमंशप्रतिनियतत्रिस्वभावत्वे प्रसज्यमाने अस्माकमिष्टप्रसङ्गः । अत एवोत्तीर्णस्वभावत्वोद्भूत-स्वभावत्वमित्यादिचोद्यमपि परिहृतम्; ब्रह्मस्वरूपस्य निर्विकारत्वात्, जगदात्मकपरिणामदशायामपि व्यवस्थितस्वभाव-त्वात् । न च दृष्टान्तमात्रेणार्थसिद्धिः; नचात्र व्याप्तिसंभवः, अन्यथा त्वत्पक्षेऽप्यविद्याविशिष्टब्रह्मविवर्ते स्वभावसङ्करा-दयस्तदवस्थाः ।

यदुक्तं विशिष्टस्योपादनत्वं किं श्रौतमुत कल्पितमिति; तत्र क्वचिच्छ्रौतं क्वचित् श्रुतार्थापत्तिकल्पितमिति वाक्यशेषशाखान्तरनयसिद्धमिति वा विभागः । तथा हि—* तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियतेत्यादिषु कारणवाक्येष्वव्याकृतादिशब्देन न ब्रह्मस्वरूपमात्रं प्रतिपाद्यते, ब्रह्मादिशब्दवत् ब्रह्मस्वरूपे रूढ्यभावात्; * तन्नाम-रूपाभ्यां व्याक्रियतेत्यनेनैव योगविवक्षायाः स्पष्टत्वाच्च । अतः इदमर्थस्यैव प्रलयकाले नामरूपव्याकरणनिवृत्तिमात्रं विवक्षितम् । इदमर्थश्चिदचिदात्मकः प्रत्यक्षादिसिद्धः, स एव कदाचित् सूक्ष्मावस्थाप्राप्त्या व्यष्टिसमष्टिरूपविकाररहित इत्युक्तं भवति । एवं स्थिते प्रलयदशायामपि सूक्ष्मयोश्चिदचिद्वस्तुनोः सद्भाव उक्तो भवति । तर्हि ब्रह्मणस्तत्र कथं प्रसङ्ग इति चेत्; * तम एकीभवतीत्यादिप्रतिपन्नस्य सूक्ष्मतमसोऽपि * यस्य तमश्शरीरमित्यादिभिः ब्रह्मशरीरत्वप्रतीतेः कारण-वाक्यान्तरेषु ब्रह्मावस्थानप्रतीतेश्च अव्याकृतशब्द एवाव्याकृतचिदचिद्विशिष्टब्रह्मपर इति निश्चीयते । एवम् * असद्वा इदमग्र आसीत्, *असदेवेदमग्र आसीत्, इत्यत्राप्यसच्छब्देन स्थूलाकारप्रध्वंसायमानसूक्ष्माकारविशिष्टचिदचिच्छरीरकं

ब्रह्माभिधीयते, नतु केवलं ब्रह्म, असत्त्वविरोधात् । नापि प्रागभावमात्रम्, * तदसदेव सन्मनोऽकुरुत स्यामिति, *तदात्मानँ स्वयमकुरुतेत्यादिवाक्यशेषविरोधात् । सूत्रितं च * असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेश्शब्दान्तराच्चेति । अत एव *तदात्मानँ स्वयमकुरुतेत्यत्रापि नात्मशब्दो ब्रह्मस्वरूपमात्रविषयः, असच्छब्दनिर्दिष्टसूक्ष्मद्रव्यविशिष्टविषयत्वात् । यथा खल्वव्यतिरेकविवक्षया विशेष्ये स्वशब्दपर्यायोऽयमात्मशब्दः, तथा धर्मविशिष्टेऽपि विशिष्टव्यतिरेकविवक्षया तत्प्रयोगो युज्यते । अत एव हि शरीरविषयेऽप्यात्मानमवलोकयतीत्यादिरभियुक्तानां प्रयोगः । न चात्र भ्रमो निदानम्, परिशुद्धात्मवेदिभिरपि तथा प्रयोगात् । नच तत्रोपचारः, निमित्तैक्ये संभवति तत्कल्पनानुपपत्तेः ।

अस्तु वा ब्रह्मस्वरूपवाची तत्रात्मशब्दः, तथापि वैशिष्ट्यं दुस्त्यजम्, यथा भगवान् श्वेत इत्यत्र विग्रहद्वारा सिध्यति, तथाऽत्रापि * अकुरुतेत्यादिसामार्थ्याच्छरीरद्वारेति सिध्यत्येव । अतः * ब्रह्म वनमित्यादिनोपादानत्वोद्देशोऽपि विशिष्टविषयः । मृत्तत्कार्यदृष्टान्तादिकं च विशिष्टप्रदर्शनार्थमेवेति न ततोऽपि विरोधः । एवं च सति ब्रह्मस्वरूपवाचिब्रह्मात्मादिशब्दैः कारणनिर्देशेऽपि निर्विकारश्रुत्यन्यथानुपपत्त्या विशिष्टस्योपादानत्वं कल्प्यताम् । यद्वा वाक्यशेषशाखान्तरादिसिद्धानुप्रवेशसर्वशरीरत्वादिवशेनात्रापि इदमिति निर्दिष्टस्य अग्र इति निर्दिश्यमानकालविशेषोपलक्षितसूक्ष्मावस्थस्य तदानीमब्रह्मात्मकत्वप्रतिक्षेपाय ब्रह्मादिशब्दसमानाधिकरणनिर्देश इति सिध्यतीति न स्वरूपपरिणामवादस्य विवर्तवादस्य वा कश्चिदवकाशो दृश्यते । यत्तु समस्तभेदरहितस्यैकस्यैव कारणवाक्ये अवधारणात् तद्विरुद्धं विशेषणकल्पनमित्यादि ; तदपि स्वपक्षमपरामृश्योक्तम्, प्रलयदशायामपि अविद्यायाः सूक्ष्मोपाधेः शक्तेर्वा ब्रह्मसम्बन्धित्वेन त्वया त्वदासन्नैश्च स्वीकारात् । वयं तु वाक्यान्तरानुसारेण निर्विकारनिरवद्यश्रुतिविरोधपरिहारार्थं च प्रपञ्चोपादानभूतब्रह्मविशेषणं तच्छरीरमित्यनुमन्यामह इति विशेषः । अविद्यामिथ्यात्वपक्षे अवधारणमसङ्कुचितमिति चेन्न; अग्र इत्यादिवैयर्थ्यस्य सद्विद्यानिरूपणे स्थापनात् ।

किंच, ब्रह्मात्मादिशब्देषु स्वरूपपरेष्वपि वैशिष्ट्यलाभो दर्शितः । सच्छब्दं तु विमृशामः—इदमग्रे सदेवासीदिति इदमर्थसत्ताविधिपरे वाक्ये न तावत्सच्छब्देन ब्रह्मस्वरूपमात्रं प्रतिपाद्यम्, अनन्तरवाक्यविरोधात्; अनन्तरमेव हि * तद्धैक आहुस्सदेवेदमग्र आसीदिति । तत्र * कुतस्तु खलु सोम्यैवं स्यात्....कथमसतः सज्जायेतेति सत्त्वेव सौम्येदमग्र आसीदित्युच्यते । अत्र हि कार्यद्रव्यस्य पूर्वमविद्यमानत्वपक्षः प्रतिक्षिप्यते, न पुनरब्रह्मात्मकत्वपक्षः । तथा सति * कथमसतः सज्जायेतेति लोकदृष्ट्या व्याप्तिप्रदर्शनायोगात् । अतः * सदेवेत्यत्र वाक्ये प्रपञ्चस्यैव * बहु स्यामिति वक्ष्यमाणबहुत्वावच्छिन्नसत्ताप्रतिपक्षभूतैकत्वावच्छिन्नसत्तायोग एव प्रतिपाद्यते । अतो ब्रह्मैवात्र मृग्यं न तु सूक्ष्मचिदचिद्वस्तुसद्भावः । ननु सच्छब्दनिर्दिष्टस्यैव * बहु स्यामिति, * तदैक्षत बहु स्यामिति बहुभवनसङ्कल्परूपेक्षणश्रवणात्, अचेतने प्रतिसंहृतकरणग्रामे चेतनेऽप्ययोगात्, उत्तरत्र सर्वत्र * सन्मूलाः सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः, * सता सोम्य तदा संपन्नो भवति, * सति संपद्य न विदुरित्यादिषु सच्छब्दस्य नामवत्प्रयोगाच्च * सदेव सोम्येत्यत्रापि सच्छब्देनानवच्छिन्नसत्ताविशिष्टब्रह्मस्वरूपमेव विवक्षितमिति चेत्; सत्यम्, तथापि पूर्वोक्तानुपपत्त्या स्वरूपमात्रविषयत्वासंभवेऽनुपपत्त्यन्तरेण ब्रह्मस्वरूपपरत्वे चावश्यंभाविनि अगत्या श्रुत्यर्थापत्तिबलेन सूक्ष्मचिदचिद्वैशिष्ट्यव्यवहितसत्तावच्छिन्नं ब्रह्मात्र सदिति प्रतिपाद्यत इति निश्चीयते । तथा सति * तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत, * आत्मा वा इदमेक एवाग्र आसीदित्यादिश्रुतिभिरपि सङ्गतिः सिध्यति । अस्तु वा * सदेव

सोम्येदमग्र आसीदित्यत्र सच्छब्देन ब्रह्मस्वरूपनिर्देशः, तथापि * तद्धैक आहुरित्यादिना असत्कार्यवादप्रतिक्षेपात्, कार्यद्रव्यस्य पूर्वं विद्यमानत्वप्रतीतेः, तद्विशिष्टं ब्रह्मैवात्र सच्छब्दार्थ इति शक्यतेऽवगन्तुम्। अत एव * शरीरिभूत-परमात्माभिधायिभिः सद्ब्रह्मादिशब्दैरिति भाष्यमपि सुघटितम्। न चात्र शक्तिद्वयकल्पनागौरवम्, विशिष्टपरत्वे पर्यव-सानेन ब्रह्मणि सच्छब्दवृत्तेः; स्वरूपपरत्वे तु श्रुता[त्य]र्थापत्त्या शाखान्तरानुसारेण वा चिदचिद्वैशिष्ट्यस्यापि क्रोडी-कारोपपत्तेः। नचात्र लक्षणा दोषः, तथापि सर्वशब्दलक्षणापक्षादस्यैवोपादेयतमत्वात्। यः पुनः सर्वपदार्थानुवृत्तसत्ता-मात्रमेवात्र सच्छब्दार्थः, स एव च ब्रह्मेत्याह; तत्पक्षे तु सकलश्रुतिस्मृतिन्यायविरोधः, प्रपञ्चमिथ्यात्वप्रसञ्जकाभावेना-प्रकृतत्वात्; इदानीं तत्रोदास्महे। तत्रापि हि प्रपञ्चस्यैव सत्त्वं प्रतीयमानं कार्यदशायां कारणदशायां च दशाद्वयविषय-सच्छब्दद्वयेन प्रतिष्ठितं भवति।

किंच यदिदं विशिष्टस्योपादानत्वं श्रौतं कल्पितं वेति; तत्र भवन्तमपि पृच्छामः, अविद्याविशिष्टस्योपा-दानत्वं श्रौतं कल्पितं वेति। न प्रथमः, सद्ब्रह्मादिशब्देष्वविद्यासौरभस्याप्यनाघ्राणात्। नाप्युत्तरः, कल्पकाभावादेर-विशेषात्। तत्सद्भावेऽपि प्रत्यक्षादिसमस्तप्रमाणप्रत्यनीकदुर्घटिताभिमतार्थक्लृप्तेरपि सहृदयसंवादिसमीचीनप्रक्रियाकल्प-नस्योपपन्नत्वात्। मृद्घटादिदृष्टान्तेन स्वरूपोपादानत्वप्रतिपादनप्रसङ्गं तु यदि भास्करादयः शृणुयुः तदा ते प्रथम-प्रतीतनिर्विकारतादिमात्रव्याघातरक्षणकल्पितव्याघातक्षतिशतविशारुणा भवन्मतेन नन्देयुः। नन्वविद्याविशिष्टं ब्रह्मास्माकं जगदुपादानम्; भवतां तु सूक्ष्मप्रकृतिपुरुषविशिष्टमिति व्यवहितविकाराश्रयत्वाविशेषादावयोः को विशेष इति; अहो महदिदमवधानम्, यत्प्रत्यक्षादिप्रमाणगणदृढावधारितचिदचिदात्मकप्रपञ्चबाधाबाधाभ्यामावयोर्विशेषः प्रदर्शित इति। नन्वेवमपि व्यवहितोपादानप्रतिपादनप्रयासमुत्सृज्य प्रपञ्चसत्यत्ववृथाग्रहानुरूपे स्वारसिके स्वरूपोपादानपक्षे स्थीयतामिति चेत्; मैवम्, सर्वतादात्म्ये समस्तविकाराद्याश्रयत्वावश्यंभावेन निर्विकारनिरवद्यत्वश्रुतिविरोधस्य दुष्परिहरत्वात्। स्वारस्यमपि मरीचिकासलिलकल्पम्। तथा हि—तत्र भास्करमतं तावत्पृच्छामः, ब्रह्मस्वरूपमेव परिणमतीत्यत्र किमी-श्वरो ब्रह्मशब्दवाच्यः? उत तदंशभूतः सूक्ष्मोऽचिदुपाधिः? उत समुदायः? उत तदुभयानुवृत्तसद्द्रव्यमात्रम्? यद्वा ब्रह्म-धर्मभूतः शक्तिविशेष एवेति। व्यतिरेकादिपक्षस्त्वत्यन्तदूरस्थतया नोपक्षिप्यते। तत्र तावन्न प्रथमः, ईश्वरांशस्य विकारा-नभ्युपगमात्। न द्वितीयः, ब्रह्मोपादानत्वप्रहाणप्रसङ्गात्। न तृतीयः, समुदायस्य समुदायिभ्यां भिन्नत्वे सति न ब्रह्मोपा-दानत्वसिद्धिः, अभिन्नत्वे पक्षद्वयोक्तदूषणस्य पुनरुन्मज्जनम्। चतुर्थेऽपि पक्षे सन्मात्रस्य सर्वतादात्म्ये चेतनाचेतनात्मक-विश्वप्रपञ्चस्थदोषाधारत्वेन तदात्मकस्य ब्रह्मणो निर्दोषत्वश्रुतिविरोधः। पञ्चमस्तु पक्षः परिशिष्यते। तत्रापि शक्तेः ब्रह्मा-व्यतिरेके पुनः स एव श्रुतिविरोधः! व्यतिरेके ब्रह्मोपादानत्वभङ्गप्रसङ्गः। व्यतिरेकाव्यतिरेकपक्षस्तु दुःस्थत्वादेव दूर-परिहरणीयः। स्वाभाविकभेदाभेदवादश्च सर्वलोकविरुद्धत्वात् दुर्विचारमूल एव। तेन पक्षद्वयप्रतिक्षेपे मृषावादः परि-शिष्यते। सोऽपि स्वतः प्रतिक्षेप्य एव, प्रस्फुटदोषसङ्करविघटितत्वात्। अवस्थान्तरयोगित्वमुपादानत्वमुच्यते। मृत्पिण्ड-घटदृष्टान्तस्तत्रैव ह्युपपद्यते॥ सर्पभूरन्ध्रमालादिरूपावस्थान्तरान्वयः। रज्जौ न विद्यते तस्मान्नोपादानत्वमिष्यते॥ इत्थमध्यस्त-विश्वस्य ब्रह्मोपादानभाषणम्। लोकवेदविरुद्धत्वात्स्वयमेव निरुध्यते॥ अतः उपादानत्वानुपपत्तिरद्वैतवादिन एवेति॥

॥ इति शतदूषण्यां ब्रह्मोपादनत्वान्यथानुपपत्तिभङ्गवादः त्रिपञ्चाशः ॥ ५३ ॥

———

॥ अथ मायोपादनत्वान्यथानुपपत्तिभङ्गवादः चतुःपञ्चाशः ॥ ५४ ॥

यत्प्रपत्तिं विना सर्वैर्यस्य माया दुरत्यया । धनञ्जयरथोत्तंसं तत्प्रपद्ये परं महः ॥

यदुच्यते—* मायां तु प्रकृतिं विद्यादिति विश्वस्य मायोपादानकत्वश्रवणात्, मायाशब्दस्य च मिथ्यार्थत्वात् मिथ्योपादानकस्य च सत्यत्वायोगाद्विश्वमिथ्यात्वं सिद्धमिति ; तदपि स्तनन्धयकथितम् । तत्र तावत् श्रुतौ वचनव्यक्तिर्विपर्यासिता । नहि तत्र प्रकृत्यनुवादेन मिथ्यात्वं विधीयते, अपि तु मायानुवादेन प्रकृतित्वम् । तुशब्दोऽपि तस्यैवानुकूलः । पूर्वस्मिन्वाक्ये * अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः इति प्रसक्तयोर्मायामायिशब्दयोरर्थमविदुषस्तज्ज्ञानोपजननायैव हि * मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्युच्यते । अतो मायेत्युक्ता सा जगदुपादानतयोपनिषत्प्रसिद्धा प्रकृतिरेव । यश्च मायीति निर्दिष्टः स च प्रकृत्यधिष्ठाता चिदचिच्छरीरको महेश्वर एवेति वचनव्यक्तिः । स्ववाक्येऽपि यच्छब्दाद्यभावेऽपि प्रथमचरमभावेनोद्देश्योपादेयव्यवस्था सिद्धा । तथा ह्याहुः—* यद्वृत्त [च्छब्द] योगः प्राथम्यमित्याद्युद्देश्यलक्षणमिति । अस्त्वेवं वचनव्यक्तिः, तथाऽपि प्रकृतेर्मायाशब्दवाच्यत्वसिद्धेर्मिथ्यात्वमपि सिध्यतीति चेन्न ; मायाशब्दस्य मिथ्यार्थपरत्वेऽप्युपचारतोऽपि तत्र तत्प्रयोगसंभवेन वाच्यत्वनिर्णयासिद्धेः । नहि प्रकृतिर्मायाशब्दवाच्येति श्रुत्यर्थः, अपि तु अत्र मायाशब्देन प्रकृतिर्विवक्षितेति । तथाऽपि मुख्यार्थे बाधकाभावादुपचारवृत्तिरत्रानुचितेति चेन्न ; प्रकृतित्वान्यथानुपपत्त्यैव बाधात् । कारणसत्यत्वं च बहुशो मृद्दृष्टान्तादिभिर्निदर्शितम् । * अचेतनापरार्था च नित्या सततविक्रिया । * गौरनाद्यन्तवती सा जनित्री भूतभाविनी इत्यादिभिः प्रकृतिनित्यत्वसिद्धेश्च तन्मिथ्यात्वं निरस्तम् । सत्यत्वेऽपि केन मिथ्यात्वोपचारः किमर्थश्चेति चेत् ; अस्थिरतरभोगप्रसाधकत्वेन स्वप्नार्थतुल्यतया जिहासितत्वज्ञापनार्थ इति मन्वीथाः । न च मायाशब्दो मिथ्यार्थवाची, विचित्रसृष्ट्युपकरणभूतार्थाभिधायित्वात् । सर्वप्रयोगानुगतनिमित्तसंभवे नानारूपार्थोपादानस्य निरस्तत्वात् । नच मिथ्यार्थेष्वेव तत्प्रयोगः येन तत्रैव तच्छक्तिः कल्प्येत, अपि तु सत्येष्वपि ; यथा * यावन्तः पांसवो भूमेस्संख्याता देवमाययेति । न हि मिथ्याभूतस्य कस्यचित्संख्यानकरणत्वं प्रतीमः । * माया वयुनं ज्ञानमिति नैघण्टुकानुसारात् अर्थौचित्याच्च ज्ञानविषयत्वमेव तत्रोचितम् । तथा * मायया सततं वेत्ति प्राणिनां तु शुभाशुभमिति च । तथा * तेन मायासहस्रं तच्छम्बरस्याशुगामिना । बालस्य रक्षता देहमेकैकश्येन सूदितम् ॥ इति । नहि मिथ्याभूतस्य कस्यचिच्छस्त्रच्छेद्यत्वम् ; अपि तु तत्त्वोपदेशादेव तन्निवृत्तिः । तथाऽप्यनेकशक्तिकल्पनायां गौरवात्तत्रौपचारिकोऽयं प्रयोग इति चेन्न ; विपर्यासस्य दुर्वारत्वात् । प्रसिद्धिप्रकर्षान्मिथ्यात्वे [र्थे] शक्तिरङ्गीक्रियत इति चेन्न ; मिथ्यापर्यायत्वेन मायाशब्दस्य प्रसिद्धेरेवाभावात् । न हि स्वदृग्दोषादिमात्रमूलभ्रमविषयेषु शुक्तिरजतरज्जुसर्पादिषु मिथ्याशब्दप्रयोगविषयेष्वपि क्वचित् कदाचिदपि मायाशब्दप्रयोगो दृष्टचरः । अतो यत्रेन्द्रजालादिमूलभ्रान्तिविषयेषु मायाशब्दप्रयोगः तत्रापि मिथ्यात्वमन्तरेण निबन्धनान्तरमस्तीति निश्चीयते । तच्च किमिति निरूप्यमाणेऽप्यैन्द्रजालिकवदिन्द्रजिदादौ मायाविशब्दप्रयोगात् तत्र चालीकत्वस्याविवक्षितत्वात् सत्यस्य वाऽसत्यस्य वा विचित्रार्थस्य सृष्टौ प्रकाशने वा सामर्थ्यवानित्येव मायाविशब्दार्थः । तच्च सामर्थ्यं सत्यो मन्त्रौषधादिरेव, तदनुबन्ध्यतीन्द्रियशक्तिविशेषो वा । ततश्च मायाजन्यज्ञानविषयतया मिथ्याभूतेष्वप्यर्थेषु लक्षणया मायाशब्दप्रयोग उपपद्यते । मायोत्थज्ञानवेद्येऽर्थे युक्ता मायेति लक्षणा । मिथ्यासम्बन्धरहिते नास्त्रादौ

सत्यकारणे ॥ नहि पर्वतसमुद्रपावकादिहेतुष्वस्त्रविशेषेषु, मिथ्यासम्बन्धगन्धरहितेषु मायाशब्दोपचारस्संभवति । मिथ्यार्थसादृश्यात् तत्र गौणोऽयं प्रयोग इति चेन्न ; विपरिवर्तप्रसङ्गस्य प्रागेवोक्तत्वात् । लक्षणापेक्षया गौणवृत्तेर्जघन्यत्वाच्च । मुख्यलक्षणावृत्तिभ्यां प्रयोगनिर्वाहे संभवति मुख्यगौणवृत्तिभ्यां निर्वाहस्यानुचितत्वात् । अतो विचित्रसृष्ट्युपकरणभूतार्थविशेष एव मायाशब्दशक्तिः ।

नन्वेवमपि सर्वप्रयोगानुगतं निमित्तं न सिध्यति, * मेघोदयस्सागरसन्निवृत्तिः इत्यारभ्य * विष्णोर्विचित्राः प्रभवन्ति मायाः इति प्रयुज्यते । तथा * देवमायेव निर्मिता, * संख्याता देवमायया, * मायया सततं वेत्तीत्यादिषु निर्दिष्टनिमित्तासिद्धेरिति चेन्न ; आद्ययोर्मायाकार्यतया लक्षणयाऽपि प्रयोगोपपत्तेः । मुख्यत्वेऽपि तत्र न दोषः, मेघोदयादीनामपि विचित्रवर्षादिस्रष्टुरीश्वरस्य तत्तत्सृष्ट्युपकरणत्वाविशेषात् । * देवमायेव निर्मितेत्यत्रापि स्त्रीरूपेण परिणता देवानां मायेत्यर्थः । न चात्र कस्यचिदपि शब्दस्य लक्षणा, अभूतोपमामात्रस्य विवक्षितत्वात् । * संख्याता देवमाययेत्यत्र तु निघण्टुनुसारादौचित्याच्च ज्ञानमेव विवक्षितम् । तथाऽपि घटज्ञानमित्यादिषु घटमायेति प्रयोगादर्शनादाश्चर्यावहत्वमात्रेण तत्र मायात्वोक्तिः । नैघण्टुकाश्च शक्तिविषयमनादृत्य प्रयोगविषयमात्रं संगृह्णन्तीति बहुलमुपलभ्यते । संभवति चास्मदुक्तं मुख्यनिमित्तमत्रापि, इतराशक्याश्चर्यतरभूमिपांसुसंख्यानसर्वप्राणिशुभाशुभविवेकादिहेतुत्वात् । अस्तु वा ज्ञानपर्यायत्वं क्वचिन्मायाशब्दस्य, तथाऽपि तद्व्यतिरिक्तविषयेषु पूर्वोक्तमेव निमित्तम् । न हि गत्यभावात् क्वचिच्छक्तिभेदकल्पनेत्यत्रापि तथा क्लृप्तिः, गौर्वाहीक इत्यत्रापि शक्त्यन्तरक्लृप्तिप्रसङ्गात् । किंच मिथ्यारूपमायोपादानत्वेऽपि तदुत्पन्नमात्रस्य प्रपञ्चस्य मिथ्यात्वं न सिध्यति, न विलक्षणाधिकरणन्यायेन विलक्षणादपि विलक्षणकार्योत्पत्तिसंभवात् । असत्यात्सत्योत्पत्तेर्युष्माभिरेव स्वीकारात् । असत्यस्य सत्यनिमित्तत्वमात्रमुदाह्रियते, न तु सत्योपादानत्वमिति चेन्न ; तुल्यन्यायत्वात् । न ह्यस्ति राजशासनं मिथ्याभूतेन निमित्तेनैव भाव्यं न तूपादानेनेति । उपादानोपादेययोस्तादात्म्यादुपादानस्य मिथ्यात्वे कार्यस्य सत्यत्वे च सत्यमिथ्यात्वयोरेकताप्रसक्तिरिति चेन्न ; उपादानत्वोपादेयत्वादिवत्सत्यत्वमिथ्यात्वयोः क्रमेणाविरोधात् । नन्वेकस्य पूर्वापरीभूतावस्थाभेदवत्त्वमुपपन्नम् , एतावता कथं स्वरूपतो मिथ्याभूतमुत्तरस्मिन् काले सत्यं भवेदिति चेन्न ; पूर्वस्मिन् काले स्वरूपेणासत एव द्रव्यस्यावस्थाविशेषस्येवोत्तरकाले सत्त्ववदविरोधात् । तयोरुत्तरकालवर्तित्वेन सत्त्वं पूर्वकालेऽप्यस्तीति चेन्न ; तस्य तत्कालेऽपि प्रामाणिकत्वमात्रस्यात्रापि समानत्वात् । तत्कालसंसर्गविवक्षायां विरोधात् । अतः उपादानमिथ्यात्वे श्रुतिसिद्धेऽपि न कार्यमिथ्यात्वसिद्धिः । उपादानसत्यत्वमेव च सद्विद्यादिष्वसत्कार्यवादनिरासपूर्वकं * मृत्तिकेत्येव सत्यमिति * सन्मूलास्सोम्येमा इत्यादिभिरभिधीयते । एवमुपादानमिथ्यात्वेऽपि कार्यसत्यत्वाविरोधोपपादनन्यायेन कार्यमिथ्यात्वेऽप्युपादानसत्यत्वाविरोधोऽप्युपपादित एवेति मिथ्याभूतस्य मिथ्याभूतमेवोपादानं भवितुमर्हतीत्यनिर्वचनीयाज्ञानकल्पनमपि निरस्तमिति ॥

॥ इति शतदूषण्यां मायोपादानत्वान्यथानुपपत्तिभङ्गवादः चतुःपञ्चाशः ॥ ५४ ॥

———

॥ अथ कार्यान्यथानुपपत्तिभङ्गवादः पञ्चपञ्चाशः ॥ ५५ ॥

बालः क्रीडनकैरिव स्थिरचरैः स्वेनैव निर्वर्तितैस्सङ्कल्पैकवशंवदो विहरति ब्रह्मादिभिर्जन्तुभिः ।
जिज्ञास्याय मुमुक्षतामिह पुनः प्राप्याय मुक्तात्मनां लक्ष्मीकौस्तुभलक्ष्मणे नम इदं तस्मै परब्रह्मणे ॥

यदाहुः—प्रत्यक्षसिद्धं श्रुत्यादिसिद्धं च सर्वं कार्यं मिथ्यैव, विकल्पासहत्वात् । तथा हि—किं कारणेन कार्यं सम्बद्धमारभ्यते, उतासम्बद्धम्? आद्ये सम्बन्धाश्रयतया द्वयोरपि सत्त्वाविशेषात्सव्येतरविषाणयोरिव किं कस्य कारणं कार्यं वा? असंबद्धत्वे तु असंबन्धाविशेषात् सर्वं सर्वस्य कारणं भवेत् न वा किंचित् कस्यचित् । तथाऽभिव्यक्तिवादिभिरुक्तम् * असत्त्वान्नास्ति सम्बन्धः कारणैस्सत्त्वसङ्गिभिः । असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः ॥ इति । तथा कार्यं कारणाद्भिन्नमभिन्नं वा? पूर्वत्र भिन्नत्वाविशेषात् सर्वं सर्वतः स्यात्; न वा कुतश्चित् । उत्तरत्रात्माश्रयप्रसङ्गः । नियतपूर्वसत्कारणं नियतोत्तरसत्कार्यमिति विभजसे, तथा च स्वप्रागभावकाले स्वयमेव नास्तीति कथं ब्रूयाः? तथा विकृतादविकृताद्वा उपादानात् कार्योत्पत्तिः? पूर्वत्रापि विकृतिरपि विकृतादविकृताद्वेति विकल्पेनानवस्था । उत्तरत्राविकृतत्वाविशेषात् यावदुपादानसत्त्वमुपादेयारम्भप्रसङ्गः । सहकारिसंबन्धादिति चेन्न; तत्सम्बन्धोत्पत्तिरपि विकृतस्य वा अविकृतस्य वेति विकल्पदुःस्थत्वात् । अस्तु च विकृतं कार्यारम्भकम् । तत्र किं रुचकादिविकृतिविशिष्टं हेमादि स्वस्तिकारम्भकम्? उत रुचकादिमात्रम्? अथ हेमादिमात्रमिति । नाद्यः, स्वस्तिके रुचकादिविकृतिविशिष्टहेमानुपलम्भात् । अत एव न द्वितीयः, हेमानुवृत्तिदर्शनविरोधाच्च । नच तृतीयः, आरम्भकहेमातिरिक्तादर्शनात्, तत्प्रत्यभिज्ञानाच्च । वदन्ति हि स्वस्तिकमपि तदेवेदं हेमेति । न च व्यवस्थितबुद्धिशब्दसंख्यापरिमाणकार्यकारणकालादिभेदात्पिण्डघटयोर्नष्टत्वानष्टत्वभेदात्कारकव्यापारवैयर्थ्यप्रसङ्गान्नित्यानित्यविभागानुपपत्तिप्रसङ्गाच्च कारणातिरिक्तकार्यसिद्धिरिति वाच्यम्; रज्ज्वाद्यधिष्ठानसर्पभूदलनाम्बुधारादिबुद्धिशब्दान्तरादिभिरनैकान्तिकत्वात् । न चाबाधितत्वे सतीति विशेष्टव्यम्; विशेषणासिद्धेः; प्रत्युत तन्निषेधात्—विगीता बुद्धिशब्दान्तरादयो भ्रान्तिसिद्धभेदावलम्बनाः, दुर्निरूपबुद्धिशब्दान्तरादित्वात्, कम्बुकलधौतबुद्धिशब्दान्तरादिवत्; मध्येऽप्यसत् कार्यम्, आद्यन्तयोरसत्त्वात्, शुक्तिकारजतवत्; विवादगोचरो भेदव्यवहारः स्वविषयसर्वभेदानुगतैकवस्तुमात्रावलम्बनः, भेदव्यवहारत्वात्, रज्ज्वादिविषयसर्पभूदलनादिभेदव्यवहारवदित्यादिभिः । न चैषां प्रत्यक्षबाधः, तर्कानुगृहीतानुमानात्तस्य दुर्बलत्वात् । अन्यथा ज्वालैक्यप्रत्यक्षविजयप्रसङ्गात् ।

किंच यदि कारणे पूर्वं कार्यमसत्, कथं तेन जनयितुं शक्यम्? न हि प्रलयोदकावसिक्तेष्वपि प्रस्तरेषु अङ्कुराः प्ररोहन्ति । न च पीते विश्वकर्मणाऽपि नीलमुत्कीर्यते । अथ पूर्वमेव तत्र सत्, सिद्धत्वादेव न साध्यं स्यात् । तत एव कारकव्यापारनैरर्थ्यं च । व्यङ्ग्यत्वमस्त्विति चेन्न; व्यक्तिसदसद्भावयोरप्यनुयोगावतारात् । व्यक्तेरपि व्यङ्ग्यत्वेऽनवस्थानात्, नित्यव्यक्तत्वे घटादेरपि नित्यव्यक्तिप्रसङ्गात् । किंच भावादभावाद्वा घटाद्युत्पत्तिः? नाद्यः, अनुपमृदितापिण्डादेर्घटाद्युत्पत्त्यदर्शनात् । न द्वितीयः, घटादेरप्यभावात्मकत्वप्रसङ्गात् । एवमन्येऽपि परश्शता विकल्पास्सुलभाः ।

एवं जन्मनि निरस्ते विनाशोऽपि निरस्त एव, तुल्यन्यायत्वात् । सदसद्व्यावृत्तविनाशोपलब्ध्ययोगाच्च तदुभयकोटिविलक्षणतया मिथ्यात्वं स्वध्यवसानम् । स्मरन्ति च * अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते । तत्तु नाशि

न सन्देहो नाशिद्रव्योपपादितम् ॥ इति । * यच्चान्यथात्वं द्विज याति भूयो न तत्तथा तत्र कुतो हि तत्त्वम् ॥ इति च । श्रुतिश्च तदुपबृंहिता * वाचारम्भणं विकारो नामधेयमित्यादिका । नच * मृत्तिकेत्येव सत्यमित्यादिना ब्रह्म-व्यतिरिक्तस्य कार्यभूतस्यापि मृत्तिकादिद्रव्यस्य सत्यत्वमिह कण्ठोक्तमिति भ्रमितव्यम् , भिक्षुपादप्रसरणन्यायेन व्याव-हारिकसत्यत्वानुपमर्देन घटादिमिथ्यात्वप्रतिपादने तात्पर्यात् । अन्यथा दार्ष्टान्तिकप्रतिकूलत्वप्रसङ्गात् । मृत्तिकातिरेकि-तद्विकारमिथ्यात्ववन्मूलकारणातिरेकिमृत्तिकादिसमस्तसद्विकारमिथ्यात्वे हि वाक्यतात्पर्यम् । एतेन * प्राणा वै सत्य-मिति श्रुत्यन्तरमपि निर्व्यूढम् । तत्रापि हि * अथ नामधेयं सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यमिति पूर्वोत्तर-वाक्यांशपरामर्शेन मध्यगतप्राणविषयसत्यतोक्तिः व्यावहारिकीं सत्यतामभिसन्धायेति गम्यते । तदेवं श्रुतिस्मृत्यनुमानतर्कैः सिद्धं कार्यमिथ्यात्वम् । नश्वरत्वाच्च जगतो मिथ्यात्वं निपुणधियां स्वध्यवसानमिति ।

तत्र ब्रूमः—यदुक्तं कारणेन कार्यं सम्बद्धमारभ्यते उतासम्बद्धमिति, तत्रासम्बद्धमित्येव पक्षः । नहि कार-णानां मिथस्सम्बन्धमन्तरेण कार्येणापि सह सम्बन्धः कार्योत्पत्त्यङ्गतया दृष्टचरः, येन तदङ्गीकुर्मः । यत्तु असंबन्धा-विशेषात्सर्वं सर्वस्य कारणं भवेदिति ; तत्तदा स्यात् , यद्यसम्बद्धत्वमेव कार्यारम्भप्रयोजकं स्यात् । नच तदस्ति, तत्त-द्वस्तूनां प्रतिनियतशक्तीनां प्रतिनियतकार्यारम्भकत्वस्यान्वयव्यतिरेकसिद्धत्वात् । यदि कारणानां कार्यसंबन्धोऽपि कार्या-रम्भाङ्गमिष्यते, तदाऽनङ्गाङ्गीकारः, अविषयवृत्तित्वं वा, कारणानां परस्परदृष्टस्य संबन्धस्य कार्ये संचरणात् ; युक्ताङ्ग-त्यागो वा, असिद्धत्वेनासंबन्धस्य साध्यतां प्रत्युपयुक्तस्य त्यागादिति । एतेन भिन्नत्वाभिन्नत्वविकल्पोऽपि निरस्तः, दण्डचक्रादिविलक्षणस्यैव घटादेस्तत्र उत्पत्तिदर्शनात् । उपादानेऽपि हि कार्यकारणयोरत्यन्तभेद एव दृश्यते । अव-यविवादिनां तु द्रव्ययोरपि । एवमपि चेदभेदोऽभ्युपगम्येत, तर्हि युक्ताङ्गत्यागः, कार्यकारणभावोपयुक्तस्यैव भेदस्य परि-त्यागात् । अयुक्ताङ्गस्वीकारो वा, तद्विरोधिन एवाभेदस्य स्वीकारादिति । अन्यथा स्वव्याघातः सार्वभौमः । एव-मुत्तरेष्वपि विवेक्तव्यम् । यत्तु विकृतादविकृताद्वोपादानात्कार्यारम्भ इति ; तत्र विकारशब्देन यत्किंचिदागन्तुकधर्म-विवक्षायां विकृतादिति ब्रूमः, सहकारिसम्बन्धोऽपि हि विकार एव । अथ कार्यरूपेण विकृतत्वं विवक्ष्यते, तदा त्वविकृतादिति वदामः ; अन्यथा आत्माश्रयप्रसङ्गात् । यत्तु अविकृतत्वाविशेषात्सर्वदोत्पादकत्वप्रसङ्ग इति, तन्न ; अवि-कृतस्यैव सहकारिचक्रसन्निपातेन कालविशेषनियतकार्यारम्भोपपत्तेः । यत्तु सहकारिसम्बन्धोऽपि विकृतस्य वाऽविकृतस्य वेति विकल्पितम् , तदपि सहकार्यन्तरसम्बद्धस्यैवेति परिहृतम् । न चात्रानवस्थादोषः, सिद्धानवस्थारूपत्वात् । नहि पूर्वं पूर्वं कारणं नास्तीत्युत्तरोत्तरासिद्धिः । नच पूर्वपूर्वभावे प्रमाणमस्ति, प्रत्युत कार्यमेव प्रमितं सत् कारणप्रवाहे प्रमाणं भवति । अन्यथा कार्यानुदयप्रसङ्गात् । न च नोपलभ्यते कार्यम् ; उपलभ्यमानमपि वा किं बाध्यते ? सर्व-कार्यबाधे स्वप्रवृत्तिविरोधात् । कतिपयकार्यबाधे त्वबाधितकार्यान्तरसद्भावेन कार्यकारणभावमात्रस्यापलपितुमशक्यत्वात् । अन्ततो बाधस्यापि कार्यत्वेन कर्तुमेवाशक्यत्वप्रसङ्गः । बाधस्यापि बाधे व्याघातस्यादिति ।

यत्तु रुचकादिविकृतिविशिष्टं हेमादि, रुचकादिमात्रं वा, हेमादिमात्रं वा स्वस्तिकारम्भकमिति विकल्पितम् , तत्रारम्भकमिति किं स्वस्तिकनिर्माणोपयुक्ताकारविशिष्टं विवक्षितम् ? उत तदुपयुक्ताकार एव ? अथवा रुच [स्वस्ति] का-श्रयमात्रमिति ; आद्ये रुचकादिविकृतिविशिष्टमिति ब्रूमः । न च स्वस्तिके रुचकाकाराकारितहेमानुपलम्भविरोधः, कार्यो-पयुक्ताकाराणां कार्येऽप्यनुवृत्तेरनपेक्षितत्वात् । तदपेक्षणे चानङ्गाङ्गीकारप्रसङ्गात् । केचन कारणाकाराः कार्येऽप्यनुवर्तन्ते,

केचित्तु निवर्तन्त इति यथादर्शनमङ्गीकार्यत्वात् । द्वितीये तु रुचकादिमात्रमिति वदामः । नच हेमानुवृत्तिदर्शनविरोधः, उक्तोत्तरत्वात् । कारणदशावच्छेदकाकारनिवृत्तावप्याश्रयतयोपयुक्तस्य द्रव्यस्य तदाकारविशेषस्य च नाशकाभावादनुवृत्तत्वस्य दुर्निवारत्वात् । तृतीये तु हेममात्रमित्येव तत्त्वम् । न चारम्भकहेमातिरिक्तं न दृश्यत इति वाच्यम्; स्वहृदयविसंवादात्; अन्यथा आरम्भकमपि न दृश्यत इति वक्तुं शक्यत्वात् । अतिरिक्तं तु दृश्यते, तत्किमवयविद्रव्यान्तरम्? उत तदारम्भकतयाऽभिमतावस्थान्तरमात्रम्? उत विवर्तविशेष इत्येवमादिको हि विवादः । हेमप्रत्यभिज्ञानं तु न स्वस्तिकप्रतीत्यपह्नवक्षमम् । हेम्न एव स्वस्तिकविशेषितत्वेन प्रत्यभिज्ञोपपत्तेः । अन्यथा पूर्वानुभूतातिरिक्ताकारमन्तरेण कथं सा प्रत्यभिज्ञा? नहि यत्किंचिद्देशकालावस्थादिविशेषमन्तरेण सोऽयमित्युल्लेखः । अन्यथा स इत्येव वा स्यादयमित्येव वा । यत्तु बुद्धिशब्दान्तरादौ कारकव्यापारवैयर्थ्यप्रसङ्गे नित्यानित्यविभागानुपपत्तिप्रसङ्गे च रज्ज्वाद्यधिष्ठानसर्पादिकं निदर्शितम्; तदपि देशकालादिप्रतिपन्नोपाधौ बाधाभावादेव परिहृतम् । बाधकतया अभ्युपगताश्च प्रत्येकं परिह्रियन्त एव । अत एव दुर्निरूपबुद्धिशब्दान्तरादित्वादिति हेतुरपि निरस्तः । यत्तु मध्येऽप्यसत् कार्यम् आद्यन्तयोरसत्त्वादिति प्रयुक्तम्, तदप्यबाधितसत्त्वोपलम्भेन बाधितम् । अन्यथा मध्येऽप्यनारोपितं कार्यम्, आद्यन्तयोरनारोपितत्वादिति वक्तुं शक्यत्वात् । अस्य चोपलम्भानुवर्तित्वेन प्रबलत्वादनेन पूर्वस्य बाध एव वा । अपि च कार्यमाद्यन्तयोः सदध्यस्तं वा, मध्ये सत्त्वात् मध्येऽध्यस्तत्वाद्वेति सांख्यनयेन त्वन्नयेन वा प्रयोगे किं वक्ष्यसि? उपलम्भविरोधादिकमिति चेत्तुल्यम् ।

यच्च विवादगोचरो भेदव्यवहारः स्वविषयसर्वभेदानुगतैकवस्तुमात्रालम्बन इति प्रतिज्ञातम्, तत्र किं मृत्पिण्डाद्येकैकोपादानकघटशरावादिभेदव्यवहारमात्रं पक्षीक्रियते? उत सर्पभूदलनादिभेदव्यवहारविलक्षणः सर्वोऽपि? पूर्वत्र श्रुतिनिदर्शितमृत्पिण्डलोहमणिनखनिकृन्तनादिभेदव्यवहारैरनैकान्त्यम्, न हि तत्र मृदादिकमनुवर्तते । पृथिव्यादिकमनुवर्तत इति चेत्; तदाऽस्तु पृथिव्यादिभेदव्यवहारैः । अथ तत्रापि प्रकृतिभूताविद्यानुवृत्तिं पश्यसि, तथापि ब्रह्माविद्ययोः भेदव्यवहारेणानैकान्त्यं दुस्त्यजम् । न हि ब्रह्माविद्यानुगतं वस्त्वन्तरमिष्यते । न च ब्रह्मैवोभयत्रानुवर्तते, ब्रह्मणि ब्रह्माध्यासानभ्युपगमात्, ब्रह्मभेदानभ्युपगमाच्च । अभ्युपगमे च तद्भेदव्यवहारेण तदेव स्यात् । एतेनोत्तरः कल्पोऽपि दत्तोत्तरः । ब्रह्माविद्याभेदस्यापि पक्षीकारे बाधात्, तद्बहिष्कारे तु तेनैवानैकान्त्यादिति । किंच, वस्तुशब्देन परमार्थविवक्षायां दृष्टान्तासिद्धिः, न हि रज्ज्वादेः सत्यत्वमिच्छसि । अथ प्रतीयमानमात्रविवक्षा, तदा वस्तुमात्रावलम्बन इति वक्तुं न शक्यते । आरोपितस्यापि घटादेरालम्बनत्वस्यावर्जनीयत्वादिति । यत्तु तर्कानुगृहीतानुमानात् प्रत्यक्षस्य दौर्बल्यं ज्वालैक्यप्रत्यक्षे निदर्शितम्, तदप्यसत्; अनुग्राहकतयाऽभिमतानां तर्काणामपाकृतत्वात् । ज्वालैक्यप्रत्यक्षं तु सादृश्यादिदोषसंभवात्, निर्वापितारोपितेऽपि तथैव प्रत्यभिज्ञानदर्शनात्, अनन्यथासिद्धसामग्र्यनुवृत्त्यादिहेतुबलात्तत्र च स्वोपजीव्यविरोधादिप्रसङ्गाभावाच्च बाध्यतामनुभवतीति युक्तम् । इह तु विपरीतमिति विशेषः ।

यत्पुनः कारणे कार्यं पूर्वं सदसद्वेति, तस्य कोऽर्थः? किं कार्यद्रव्यं कारणावस्थायां द्रव्यरूपेण विद्यते न वेति? तदा सदित्यङ्गीकुर्मः । तथाऽपि न साध्यत्वविरोधः, अवस्थापत्तिरूपेण तदुपपत्तेः । तत एव कारकव्यापारसाफल्यं च । एतावानेव च नस्सत्कार्यवादः । अथ कार्यावस्था कारणदशायामस्ति न वेति पृच्छसि, तदा नास्त्येव सा । कथमसती तेन जनयितुं शक्येतेति चेत्; किं पूर्वं सतीमेव दशां पश्चादुत्पद्यमानां पश्यसि, येनैवं विरोध-

माशङ्कसे ? तथा चायुक्ताङ्गस्वीकारः ; अवस्थासत्त्वस्य जन्यत्वविरोधिनः स्वीकारात् । असत उत्पत्तौ प्रस्तरादयोऽप्यङ्कुरेयुः, शशादयोऽपि शृङ्गादिमन्तः स्युरिति चेत् ; किमियं राजाज्ञा ? उत शापः ? न हि नियतशक्तिकेषु कारणेषु देशकालस्वरूपप्रतिनियतकार्यविशेषारम्भकेषु परिदृश्यमानेषु तच्छक्तिविधुरादपि तदुत्पत्तिराशङ्कितुमपि शक्यते । प्रागसतीं दशां पश्चात्सतीमिच्छतोऽवयविद्रव्ये कः प्रद्वेष इति चेत् ; न कश्चित्, अदर्शनादेव तु नाङ्गीकुर्मः । यत्तु भावादभावाद्वा घटाद्युत्पत्तिरिति, तत्र किं विद्यमाने द्रव्ये घटाद्यवस्था जायते, उताविद्यमान इति प्रश्नार्थः ? तदा विद्यमान एवेति मन्वीथाः । न हि घटाद्यवस्थोत्पत्तौ मृदादिकं नास्ति । उपमर्दितेऽपि हि पिण्डे पिण्डत्वमेव निवृत्तं न तु द्रव्यम् । अनुपमृदितेभ्यश्च तन्त्वादिभ्यः पटाद्युत्पत्तिरपि दृश्यते । अथासतो घटाद्युत्पत्तिः, सतो वेति पृच्छसि, तदा सत एवेत्युत्तरम् । पूर्वं सतः पिण्डात्तदानीं सत एव वा मृदादेः घटाद्युत्पत्तिदर्शनात् । अथ कारणविशेषावच्छेदकावस्था कार्योत्पत्तिदशायां निवृत्ता न वेति पृच्छसि ? तदा पिण्डादौ निवृत्ता, तन्त्वादौ त्वनुवृत्तेति सान्दृष्टिकमिदम् । नचाभावादुत्पत्तौ कार्यस्याभावात्मकत्वप्रसङ्गः, कार्यकारणयोरत्यन्तसालक्षण्यस्य नविलक्षणत्वाधिकरणे निरस्तत्वात् । भावान्तराभाववादिन इष्टप्रसङ्गाच्च । घटत्वादिकमपि हि पिण्डाद्यपेक्षया प्रध्वंसकोटिघटितम्, कपालाद्यपेक्षया तु प्रागभावपक्षनिक्षिप्तम्, कुड्याद्यपेया त्वन्योन्याभावायत इति ।

ये चान्ये पश्यतोहराणां प्रलापाः, * न चेदुत्पत्तिरुत्पत्तेर्नित्यत्वमनवस्थितिः । उत्पत्तावप्यतः कार्यं कारणं च निरूपितम् ॥ इत्येवमादयः, तेऽप्यनयैव दिशा प्रशमनीया इति । सिद्धानवस्थितिः सामग्र्यात्मकोत्पत्तिसंग्रहे । अन्यथा स्वपरत्राणान्न काचिदनवस्थितिः ॥ इति । यत्तु सदसद्व्यावृत्तविनाशोपलब्ध्ययोगात्तदुभयकोटिविलक्षणतया मिथ्यात्वमिति, तदपि मन्दम् ; उपलब्धिविनाशाभ्यामपि कादाचित्कत्वमात्रसिद्धेः । न ह्युत्तरकालीनो विनाशः स्वकालेऽप्यसत्त्वं साधयितुमलम् । अथ नित्यमेव सच्छब्दार्थतया परिगृह्य तद्वैलक्षण्यान्मिथ्यात्वमिष्यते, तथाऽप्यनित्यत्वमेव मिथ्यात्वमिति विवक्षितं स्यात्, तथा च वस्तुनो न काचित् क्षतिः । अत एव * अनाशी परमार्थश्चेत्यादिस्मृतिरपि निर्मूला । * वाचारम्भणं विकारो नामधेयमित्यादिका तु श्रुतिरवयविद्रव्यान्तरनिरासपरेति सद्विद्यानिरूपणे व्यक्तमनुसन्धेयम् । अत एव * मृत्तिकेत्येव सत्यमित्यादावपि परमार्थसत्यत्वमेव विवक्षितमिति सिद्धम् । अतः प्रत्यक्षादिशरणैः श्रुतिशरणैरपि कार्यजातस्य सर्वस्य सत्यत्वमेष्टव्यम् । अन्यथा प्रागुक्ततर्काभासैः कारणमपि किं न खण्ड्यते ? प्रत्यक्षश्रुत्यादिबलादिति तु समानम् । अथ यदि कारणस्यापि भङ्ग इष्ट इत्याशयः, तथा सति कारणसत्यत्वमत्यादरेण प्रतिपादयन्ती श्रुतिर्बाध्येत । एतेन कारणसामान्यं तद्विशेषांश्च खण्डयतां वेदबाह्यत्वं तावत्सुव्यक्तम् । विशेषदूषणानि तु स्वावसरे ग्राह्याणि ।

यश्चासौ व्यामोहः—नश्वरत्वादेव विश्वमिथ्यात्वमिति, स किं नाशबाधविवेकाभावात् ? उत तयोर्व्याप्यव्यापकभावाभिमानात् ? न प्रथमः, उभयोरपि विवेकस्य सुप्रसिद्धत्वात् । स्वकाले सत एवार्थस्य स्वोत्तरकालासत्त्वं नाशः, बाध्यत्वं तु स्वप्रतीतिकालेऽप्यसत्त्वलक्षणमिति । असत्त्वमेव नाश इत्येतावता पर्याप्तौ किं विशेष्यत इति चेन्न ; प्रागभावेऽपि विनाशशब्दप्रयोगप्रसङ्गात् । तथाऽप्युत्तरकालासत्त्वमित्येतावताऽलमिति चेन्न ; गगनकुसुमादावपि प्रसङ्गात् । स्वकाले सत एवार्थस्यान्यापेक्षयोत्तरकाले स्वप्रागभावकालेऽप्यसत्त्वसंभवात् तद्व्यवच्छेदार्थं स्वोत्तरकालासत्त्वमिति विशेष्यते । एतावदेव निष्कर्षलक्षणम्, पूर्वं तु वैशद्यार्थम् । यदि वस्तुनो यथाकथञ्चिदसत्त्वं मिथ्यात्व-

मिति विवक्षितम्, तदास्माकमिष्टापादनम्। परस्पराभावादिमत्तया केनचिदाकारेण सर्वेषामसत्त्वाभ्युपगमात्, कार्याणां च विनाशाभ्युपगमात्। तावन्मात्रमेव मिथ्यात्वशब्देनोपचर्यमाणमपि नास्माकमनिष्टमापादयति। नापि द्वितीयः, व्याप्तेरभावात्। रज्जुसर्पादिषु व्याप्तिस्सिध्यतीति चेन्न; तत्र विनाशस्यानभ्युपगमात्। अर्थबाध एव हि तत्र व्यक्तः। गन्धर्वनगरादिषु विनाशोऽपि प्रत्यक्षसिद्ध इति चेन्न; तत्रापि मिथ्यात्वपक्षे बाध एव। विनाशभ्रमस्तु स्यात्, सत्यत्वभ्रमवत्। तत्सत्यत्वपक्षे तु कथं तत्र विनाशमिथ्यात्वयोः व्याप्तिर्ग्राह्या? अतः उत्पत्तिविनाशयोरपि सर्वं कार्यं स्वकाले सदेवेति सिद्धम्॥

॥ इति शतदूषण्यां कार्यानुपपत्तिभङ्गवादः पञ्चपञ्चाशः॥ ५५॥

॥ अथ आनन्त्यनिरूपणवादः षट्पञ्चाशः॥ ५६॥

देशानामपि देशतामुपगतं स्वाभाविकाद्वैभवात् कालस्यापि कलाद्युपाधिकलनात्काल्यत्वहेतुं स्तुमः।
निश्शेषेऽपि विभूतिकोटिघटिते निम्नोन्नते वस्तुनि स्वाच्छन्द्येन जहत्समाधिककथासंभावनं तन्महः॥

यत्पुनः परिभाषन्ते—अनन्तपदसामर्थ्यादेव ब्रह्मव्यतिरिक्तानन्तवस्तुमिथ्यात्वं सिध्यति। तथा हि—अनन्तशब्देन असङ्कोचात्सर्वविधपरिच्छेदाभावोऽप्युच्यते; परिच्छेदश्चतुर्धा—देशतः कालतो वस्तुतः स्वरूपतश्चेति। तत्र गगनकुसुमादिवत् स्वरूपपरिच्छेदः सद्रूपत्वेन प्रतिक्षिप्यते, तच्च सत्यपदेनैव सिद्धमित्यनन्तपदेन तद्विवक्षा भवतु वा मा वा, त्रिविधपरिच्छेदाभावस्तावद्विवक्षित एव। तत्र सर्वदेशसर्वकालव्यापित्वादत्र देशे नास्ति, अत्र काले नास्तीत्येवंरूपयोर्देशकालपरिच्छेदयोरभावः सिद्धः। वस्तुपरिच्छेदस्तु इदमिदं न भवतीत्येवंरूपः। आश्रयप्रतियोगिविशिष्टस्य भेदस्याभावो [भवन्] भेदतत्प्रतियोगितदाश्रयाणां सर्वेषामभावाद्वा अन्यतमाभावाद्वा? आद्ये शून्यवादावतारः। द्वितीयेऽपि सर्ववस्तुतादात्म्याद्वा, स्वव्यतिरिक्तसमस्तमिथ्यात्वाद्वा, स्वस्य तुच्छत्वाद्वा संभवति; तत्राद्यः पक्षोऽभ्यर्हितविरोधानामर्हन्मतार्हाणां भास्करादीनामेव युज्यते। अन्तिमस्त्वर्थो लोकायतिकानां निरीश्वरमीमांसकादीनाम्। अतो मध्यमः पक्षः परिशिष्यते। न च वाच्यं वस्त्वन्तराभावे तन्निरूपितपरिच्छेदाभावेन तन्निरूपणीयवस्तुपरिच्छेदाभावो दुर्वच इति; वस्तुपरिच्छेदाभावेन वस्तुपरिच्छेदाभावो दुर्वच इति स्ववचनव्याघातात्। ननु प्रत्यक्षाद्यविरोधेन वस्तुपरिच्छेदाभावो वर्णनीयः, अन्यथा प्रागुक्तपक्षयोरपि प्रतिक्षेपायोगात्, शक्यते चाविरोधेन निर्वहणम्; तथा हि—वस्तुना परिच्छेदो वस्तुपरिच्छेदः, यथा कुड्यादिभिरालोकादेः, स चास्य नास्तीति वस्तुपरिच्छेदरहितं ब्रह्मेति; तदसत्, देशपरिच्छेदादीदृशस्य वस्तुपरिच्छेदस्य विशेषाभावात्। स्वतः परिमितदेशा घटादयः, आलोकादयस्तु प्रसृमरतया स्वतोऽनेकदेशव्यापिनोऽपि कुड्यादिभिरुपाधिभिः परिच्छिद्यन्ते, इह तु कथं परिच्छेद इति चेन्न; तथाऽप्यदूरविप्रकर्षेण पृथक्प्रतिपादनप्रयोजनाभावात्। एतेन वस्तुपरिच्छेदो वस्तुनः परिमाणम्, देशपरिच्छेदस्तु तत्कार्यम् इति विभागोऽपि प्रत्युक्तः। न च वाच्यम्, इदमिदं न भवतीति [प्रतिषेधो] परिच्छेदो वस्तुपरिच्छेदः, स च सर्वशरीरिणो न संभवतीति; * अस्थूलमनण्वह्रस्वमित्यादिनिषेधशतश्रवणात्। अन्यथा चिदचिदीश्वरस्वरूपविवेकाद्यनुपपत्तेश्च। न च सर्ववस्तुसामानाधिकरण्ययोग्यत्वेनेदमिदं न भवतीति निषेधैकान्त्याभावाद्वस्तुपरिच्छेदाभाव इति वाच्यम्; अमुख्यसामानाधिकरण्य-

स्यान्यत्रापि संभवात्, *आपो वा इदँ सर्वमित्यादिवत्। मुख्यसामानाधिकरण्यस्य तु ब्रह्मणोऽपि सर्वत्रासंभवात्। न हि शरीरं ब्रह्मेत्यादिसामानाधिकरण्यं दृष्टमिष्टं श्रुतं वा। एवमूहान्तरेष्वपि दूषणमूहनीयम्। ततश्च स्वव्यतिरिक्तसमस्तवस्तुमिथ्यात्वादेव ब्रह्मणो वस्तुपरिच्छेदाभाव इति॥

अत्रोच्यते। शास्त्रप्रत्यक्षयोर्विरोधे प्रत्यक्षप्राबल्यं तावत् स्थितमन्यत्र। अत एव अनन्तपदश्रुत्यन्यथानुपपत्त्याऽपि न प्रत्यक्षादिविरुद्धं प्रपञ्चमिथ्यात्वं सुसाधम्। अतो भवदभिमतवस्तुपरिच्छेदाभावो दुरुपपादः। भास्करादिपक्षेऽपि सर्ववस्त्वैक्ये सत्यपि भेदस्यापि विद्यमानत्वात्परिच्छेदनिषेधोऽनुपपन्नः, अन्यथा भेदाभेदस्यापि विलयप्रसङ्गात्। केवलाभेदपक्षस्तु सर्वव्यवहारविलोपप्रसङ्गेन यौक्तिकाभासैरपि नाभ्युपगम्यते। अभेदमात्रमस्तीत्येतावता वस्तुपरिच्छेदाभाववचनं त्वमुख्यम्। यत्तूक्तं वस्तुना परिच्छेद इति पक्षे वस्तुपरिमाणपक्षे च देशपरिच्छेदात् पृथग्व्यपदेशप्रयोजनं नास्तीति; तदयुक्तम्, विरुद्धार्थप्रतिपादनादल्पप्रयोजनार्थप्रतिपादनस्यैव वरिष्ठत्वात्। भवत्पक्षेऽपि वस्तुपरिच्छेदाद्देशकालपरिच्छेदयोरनतिभेदेन पृथग्व्यपदेशप्रयोजनाभावप्रसङ्गः। यदा हि स्वव्यतिरिक्तसमस्तवस्तुमिथ्यात्वेन वस्तुपरिच्छेदाभावः, तदा देशकालयोरेवाभावात्तदधीनपरिच्छेदस्याप्रसक्तत्वेन तन्निषेधो निरर्थकः। यदि पुनः त्रयाणां परिच्छेदानां स्वरूपभेदात् घटादिषु च दृष्टेरत्र तन्निषेध इति, तत्परोक्तयोरप्यर्थयोः समानमेव।

यच्चोक्तं सर्ववस्तुसामानाधिकरण्ये मुख्यामुख्यविकल्पेन दूषणम्, तदपि मन्दम्; स्वव्यतिरिक्तसमस्तद्रव्यशरीरिणस्तद्द्रव्यवाचिभिरनिष्कर्षकैः शब्दैः प्रतिपादने विवक्षिते दोषकथाभावात्। ततश्चात्र वस्तुपरिच्छेदो नाम स्वस्मात्पृथक्सिद्धाद्वस्तुनो भेदः, स च सर्वप्रकारस्य ब्रह्मणो न संभवतीति, स्वरूपभेदमात्रस्य निषेधो निषेधशतदुःस्थत्वादविवक्षित एवेति विवेकानुपपत्तिचोद्यं नावतरति। अयं त्वर्थः प्रत्यक्षाद्यविरुद्धश्रुतिस्मृतिसूत्रानुगृहीतश्चेत्ययमेवारम्भणाधिकरणभाष्ये प्रदर्शितः। यथा—*भेदवादिनस्तु सर्वचिदचिद्वस्तुशरीरत्वेन ब्रह्मणः सर्वप्रकारत्वात् स्वतः परतः परिच्छेदोऽपि न विद्यत इति। नन्वेवमपि सर्वविधपरिच्छेदनिवृत्तिर्न सिध्यति, स्वरूपविवेकदशायामिदमिदं न भवतीति परिच्छेदस्य विद्यमानत्वादिति चेत्; सत्यम्, तथाविधवस्तुपरिच्छेदस्य श्रुतिभिरेव प्रतिपाद्यमानत्वात्, विश्वमिथ्यात्वपक्षेऽपि ततः परिच्छेदोक्तेः त्वयाऽभ्युपेतत्वाच्च तन्निषेधो न शक्यः। यदि च वस्त्वन्तराभावाद्वस्तुपरिच्छेदाभाव उच्यते, तर्हि भवत्पक्षे घटादेरपि वस्त्वन्तराभावात्तत्सिद्धिः स्यात्। ब्रह्माख्यं वस्त्वन्तरं तस्य विद्यत इति चेन्न; तत्स्वरूपसद्भावेऽपि तयोर्भेदस्य मिथ्यात्वेन तस्य वस्त्वन्तरत्वायोगात्। व्यावहारिकं वस्त्वन्तरत्वं तस्य विद्यत इति चेत्तद्ब्रह्मापेक्षया घटादेरपि समानम्। नच तदपेक्षया ब्रह्मणः परिच्छेदोऽपि मिथ्याभूतः; जडाजडैक्यप्रसङ्गादेरन्यत्रोक्तेः। स्वसजातीयवस्त्वन्तरसद्भावो वस्तुपरिच्छेद इति विशेष इति चेन्न; यथाकथञ्चित्सजातीयत्वविवक्षायां प्रकाशमानत्वादिरूपेण ब्रह्मणः सजातीयस्याविद्यादेर्विद्यमानत्वात्। नचाविद्यादेरवस्तुत्वेन परिहारः, घटादेरपि समानत्वस्योक्तत्वात्। न हि घटाद्यपेक्षया वस्तुतः सजातीयत्वादिकं ब्रह्मणः। घटादिस्वरूपस्यापि मिथ्यात्वाद्विशेष इति चेत्, किमतः? मिथ्यात्वेऽपि घटादेः पटत्वाद्यभाववद्वस्तुपरिच्छेदाभावस्यापि सिद्धेः। अस्त्वेवम्, तथाऽपि सत्यस्य ब्रह्मणोऽपि तत्सिद्धिरस्त्येवेति चेन्न; इतरवैलक्षण्यार्थानि सत्यज्ञानानन्तपदानीति स्वसिद्धान्तभङ्गप्रसङ्गात्। सर्वथा सजातीयवस्त्वन्तरसद्भावो वस्तुपरिच्छेद इति तदभावविवक्षायां प्रपञ्चसत्यत्वेऽपि न कश्चिद्दोषः। ब्रह्मणस्तद्विभूतिप्रपञ्चेन अत्यन्तसाजात्याभावस्य ब्रह्मलक्षणादिवशादेव सिद्धेः।

किंच देशकालपरिच्छेदाभावोऽपि न घटादिव्यावर्तकः, सत्यदेशकालपरिच्छेदस्य घटादावप्यभावात्; मिथ्यादेशकालपरिच्छेदस्य ब्रह्मण्यपि विद्यमानत्वस्य भवतैव स्वीकारात्। किंच देशकालपरिच्छेदाभावो न देशकाल्योः स्वरूपनिषेधगर्भः वस्तुपरिच्छेदाभावेनैव तत्सिद्धेः। तद्वद्वस्त्वन्तरस्वरूपे सत्येव तत्प्रयुक्तपरिच्छेदाभावो वर्णनीयः, अन्यथा वैरूप्यात्। संभवतश्चैकरूपस्य परित्यागायोगात्, संभवति तदस्मत्पक्षे सर्वेषु वस्तुषु यथाप्रमाणमवस्थितेष्वेव प्रतिघातपरिणामपृथक्सिद्ध्यादिलक्षणपरिच्छेदस्य प्रतिक्षेपात्। किंच अनन्यथासिद्धानेकश्रुतिगणप्रतिपन्नस्य ब्रह्मविभूत्या-देरनेकार्थसाधारणैकानन्तपदस्वारस्यानुरोधाय [धेन] बाधो न युक्तः। तदनुरोधेनैव त्वेकानन्तपदस्वारस्यं सङ्कोचनीयम्। ततश्च प्रत्यक्षाद्यविरुद्धत्रिविधपरिच्छेदाभाव एवात्र विवक्षित इत्यङ्गीक्रियताम्। अन्यथाऽनन्तपदश्रुत्यसङ्कोचाय संख्या-तोऽपि परिच्छेदाभावस्वीकारेण ब्रह्मबहुत्वप्रसङ्गात्। एकत्वश्रुतिवशाद्वस्तुपरिच्छेदाभावेनान्योन्यव्याघाताच्च तत्परित्याग इति चेत्तर्हि प्रपञ्चसत्यत्वप्रतिपादकप्रत्यक्षश्रुत्यादिवशात्तत एव व्याघाताच्चैद्देशवस्तुपरिच्छेदाभावोऽपि परित्याज्य एव। यदि च त्रिविधपरिच्छेदाभावेऽवश्यमभिसन्धिः, तर्ह्यविरुद्धः परिच्छेदाभावोऽत्र स्वीक्रियताम्। संभवन्ति चान्येऽपि व्यवच्छेद्याः परिच्छेदभेदाः वस्त्वन्तरप्रतिघातवस्तुपरिमाणस्वतन्त्रवस्त्वन्तरसद्भावादयः। एवं वस्तुपरिच्छेदाभावः; उत्कृ-ष्टेन वस्तुना उत्तरावधिभूतेन परिच्छिन्नं ह्यपकृष्टं वस्तु, तथाविधोऽपकर्षो ब्रह्मणो नास्तीति। अस्मिंश्चार्थे विवक्षिते तस्य सर्ववस्तुशरीरित्वेन सर्वात्मकत्वमप्यन्तर्गतं भवति। एवं सति *उलङ्घितत्रिविधसीमसमातिशायिसंभावनं तव परिव्रढिम-स्वभावमिति भगवद्यामुनाचार्यवचनं गोबलीवर्दन्यायेन फलफलिनिर्देशेन वा नेतव्यम्। आरम्भणाधिकरणभाष्यमप्येत-त्परमेव योजनीयम्। अतः सिद्धं सत्यैरेव देशकालवस्तुभिरपरिच्छिन्नं सर्वदेशकालव्यापि सर्वान्तरात्मभूतं सर्वैर्मङ्गल-गुणैः समस्तहेयप्रतिभटतया च सर्वस्मात्परं ब्रह्मानन्तपदनिर्दिष्टमिति नातः प्रपञ्चमिथ्यात्वसिद्धिरिति॥

॥ इति शतदूषण्याम् आनन्त्यनिरूपणवादः षट्पञ्चाशः ॥ ५६ ॥

॥ अथ निर्विशेषब्रह्मण आनन्दत्वभङ्गवादः सप्तपञ्चाशः ॥ ५७ ॥

ब्रह्मण्यानन्दशब्देन दर्शितां गुडजिह्विकाम्। निर्विशेषगृहीतानां वादिनां विलुनाम्यहम्॥

श्रूयते हि—*विज्ञानमानन्दं ब्रह्म, *आनन्दो ब्रह्म, *कं ब्रह्म खं ब्रह्मेत्यादि। तत्र किमिदं ब्रह्मण आनन्दत्वं नाम? सुखत्वमिति चेत्तदपि किमिति विचारयामः। किमनुकूलवेदनीयत्वम्? उतानुकूलवेदनत्वम्? अथानुकूलत्वमात्रम्? यद्वा दुःखनिवृत्तिरूपतामात्रम्? उत ज्ञानात्मकत्वमेव? किञ्चिद्धर्मान्तरं वा? न प्रथमः, वेदनी-यत्वस्यानभ्युपगमात्। व्यावहारिकं तदस्त्विति चेत्तर्हि ब्रह्मण आनन्दत्वं व्यावहारिकमिति ब्रह्मणोऽनानन्दत्वमेव परमार्थः स्यात्। ततश्च व्यावहारिकदशायामनुकूलत्वं तन्निवृत्तिदशायां तन्निवृत्तिरपीति संसारस्यैव ग्राह्यत्वं मोक्षस्य दूरपरिहरणीयत्वमिति स्यात्। यदा कदाचिदनुकूलवेदनीयत्वं यावद्द्रव्यभाविन आनन्दत्वस्य उपलक्षणमिति चेत्तर्हि सांसारिकस्य सर्वस्यापि वस्तुजातस्य *वस्त्वेकमेव दुःखाय, *तदेव प्रीतये भूत्वेति श्लोकद्वयोक्तप्रकारेण कदाचि-दनुकूलवेदनीयत्वस्य सद्भावाद्यावद्द्रव्यमानन्दत्वं स्यात्। ततश्च सप्रपञ्चतयैवानुभव उपादेयः स्यात्, सहस्रवतः पञ्च-शतं किमधिकमिति न्यायात्। विषयानुकूल्यानुभवदशायां ब्रह्मानन्दानुभवो न सिध्येदिति चेन्न; तस्य नित्यस्वयं-

प्रकाशत्वाभ्युपगमात् । वैशद्यावैशद्यादिदूषणं त्वन्यत्रैव । एवं वेदितुरभावादपि वेदनीयत्वासिद्धेः । व्यावहारिकदशायां तत्सद्भावमात्रमपि दत्तोत्तरमेव ।

नापि द्वितीयः ; वेदनरूपत्वातिरिक्तानुकूलत्वाभ्युपगमे निर्विशेषवादापक्रमात् ; तदनभ्युपगमे व्यर्थविशेषणत्वात्, पर्यायत्वादिप्रसङ्गाच्च । भिन्नार्थत्वे विशेषणत्वाभावे च घटः पट इतिवत् अनन्वयात् । न तृतीयः, आनुकूल्यस्यापेक्षिकत्वेन किञ्चिदपेक्ष्येत्यभ्युपगम्यत्वात् भवतश्च तदयोगात् । स्वात्मानं प्रतीदमानुकूल्यमिति चेन्न ; प्रतिसंबन्धित्वलक्षणस्वभावविशेषाभ्युपगमेऽपसिद्धान्तात्, अनभ्युपगमे तदुपाधिकानुकूलत्वस्यापि विनिवृत्तेः । अविद्याशबलितं स्वात्मानं प्रतीति चेत् ; तर्हि तन्निवृत्तिदशायामानुकूल्यनिवृत्तिप्रसङ्गः प्राग्वदेव । नापि चतुर्थः, औपनिषदमर्यादाबहिष्कारात्, अभावात्मकत्वप्रसङ्गाच्च । ब्रह्मणो दुःखनिवृत्तिरेव सुखशब्दवाच्यं भावान्तरमिति चेन्न ; उदासीनावस्थायाः सर्वसम्मतत्वात्, पूर्वं निर्दुःखस्यापि शर्करादिरसास्वादजन्यसुखानुभवदर्शनाच्च । अन्यथा सुखनिवृत्तिरेव दुःखमिति वदन्तं प्रति किमुत्तरं भवेत् ? अभ्युपगम एवोत्तरमिति चेन्न ; द्वयोरपि भावरूपत्वासिद्धिप्रसङ्गात् । भावान्तराभाववादिना नैवं चोदनीयमिति चेन्न ; भिन्नोपाधिक्रोडीकारेणोदासीनावस्थासङ्ग्रहसिद्धेः, स्वरूपत एव निरूपण [1] सिद्धेश्च । किंच, समस्तदुःखनिवृत्तिरूपां सुषुप्त्यवस्थामुद्दिश्य, नाहमत्र भोग्यं पश्यामीति वदन्तं प्रति भोग्यात्मस्वरूपोपदेशदर्शनाद्दुःखनिवृत्त्यतिरिक्तसुखरूपमात्मस्वरूपमिति ज्ञायते । नापि पञ्चमः, * विज्ञानमानन्दं ब्रह्मेति सहप्रयोगेण व्यतिरेकसिद्धेः ; न हीदं निघण्टुवत्पर्यायबोधनोपक्षीणं सङ्कीर्तनरूपं वा वाक्यम्, येन सहप्रयोगः सह्येत । यावता च विज्ञानत्वं ब्रह्मणः समर्थितं तावतैव हि भवताऽप्युपरन्तव्यम्, किमानन्दत्वोपपादनप्रयासेन । अपर्यायताबोधनिवृत्त्यर्थोऽयं प्रयास इति चेन्न ; तथाविधविवादाभावात् । तत्सद्भावेऽपि महता प्रयासेनापि सर्वलोकप्रसिद्धस्यापर्यायत्वस्यापि दुरपह्नवत्वात् । दुःखरूपाणि च कानिचिद्विज्ञानान्युपलभ्यन्ते, तदपि ज्ञानमात्रस्य सुखरूपत्वे विरुद्धम् । भ्रान्त्या तदुपलम्भ इति चेन्न ; विरोधिनि विज्ञानात्मकत्वे प्रकाशमाने तद्विरोधिनो दुःखरूपत्वस्यारोपासंभवात् । न हि सुखरूपतया प्रकाशमाने दुःखरूपत्वं कदाचिदध्यस्यति । नापि षष्ठः, बहिष्कृतानुकूल्यस्य तस्यानन्दशब्दवाच्यत्वायोगात् । तत्प्रतीकारे उक्तदूषणानुवृत्तेरेव दुष्टत्वात् । ज्ञानात्मकत्वातिरेकानतिरेकविकल्पेनापि दत्तमेवोत्तरं मन्तव्यमिति । अतो न कथञ्चिदपि निर्विशेषचिन्मात्रवादिनस्तदानन्दत्वसिद्धिरिति ॥

॥ इति शतदूषण्यां निर्विशेषब्रह्मण आनन्दत्वभङ्गवादः सप्तपञ्चाशः ॥ ५७ ॥

॥ अथ निर्विशेषब्रह्मणो नित्यत्वभङ्गवादः अष्टपञ्चाशः ॥ ५८ ॥

पूर्ववृत्तचतुष्केऽपि पूर्वत्वेनोपवर्णिते । नित्यानित्यविवेकेऽत्र नित्यत्वं वो निरस्यते ॥

श्रूयते हि—* नित्यं विभुं सर्वगतम्, * नित्यो नित्यानामित्यादिभिरात्मतत्त्वनित्यत्वम् । तद्भवत्पक्षे नोपपद्यते, ब्रह्मव्यतिरिक्तमविद्याकालादिकं स्वरूपतोऽपि सर्वमनित्यं ब्रह्मैकमेव नित्यमिति हि वः सिद्धान्तः । तदेतत् ब्रह्मासाधारणनित्यत्वं किं सर्वकालसत्तारूपम् ? उत कालावच्छेदनिवृत्तिरूपम् ? अथवा प्रध्वंसरहितत्वम् ? आहोस्विदबाधितत्वम् ? उत निर्विकारत्वम् ? यद्वा उभयावधिरहितत्वम् ? किञ्चिद्धर्मान्तरं वा ? नाद्यः, अविद्याया अपि नित्यत्व-

प्रसङ्गात् । साऽपि हि सर्वेण कालेन सम्बध्यत एव, सर्वस्यापि कालस्य तत्कार्यत्वाभ्युपगमेन तदसम्बन्धानुपपत्तेः । साऽपि कदाचिन्निवर्तिष्यत इति चेत्; किमनेन? तन्निवृत्तौ तदुपादानकालावस्थानायोगात् तदसम्बद्धकालासिद्धेः । सर्वकालसम्बन्धे सत्यपि सर्वकालसत्ता नास्तीति विशेष इति चेत्तर्हि नित्यत्वलक्षणे सर्वकालपदवैयर्थ्यम्, सत्तैव नित्यत्वमित्येतावतैव ब्रह्मव्यतिरिक्तसर्वव्यवच्छेदात् । नचैवमस्त्विति वाच्यम्; सच्छब्दनित्यशब्दयोरपर्यायत्वेनैव प्रसिद्धेः । अतः सर्वस्मिन् काले स्वरूपलाभमात्रमेव नित्यत्वं वक्तव्यम्, तच्चाविद्यायामपि समानमिति न ततो विवेकः । न द्वितीयः, कालस्यापि तत्सद्भावेन ततो विवेकासिद्धेः । न हि कालः कालान्तरेणावच्छिद्यते, तथा सत्यनवस्थानात् । नापि स्वेन, कर्मकर्तृविरोधात् । न च स्वतः पूर्वापरभावेनावस्थितैः स्वांशैरवच्छिद्यत इति वाच्यम्; तथा सति वस्तूनामिव कालस्यापि क्षणिकत्वादिप्रसङ्गात् । समस्तस्वांशसमुदायावच्छेदान्न दोष इति चेत्; तत्र कोऽयमवच्छेदो नाम? किं तत्सम्बन्धित्वमात्रम्? किं वा तत्पूर्वोत्तरकालयोरविद्यमानत्वम्? उत तत्समकालभावित्वम्? यद्वा तदात्मकत्वमेवेति । आद्ये ब्रह्मणोऽप्यनित्यत्वप्रसङ्गः, तत्सम्बन्धस्यावर्जनीयत्वात्; तन्मिथ्यात्वात्तत्परिहारे घटादेरपि नित्यत्वप्रसङ्गात् । द्वितीये पूर्वोत्तरकालशब्दार्थासिद्धिः । न हि कालात्पूर्वं पश्चाच्च कालोऽस्तीति बालिशोऽपि ब्रूयात् । एवं नास्तीति न ब्रूयादेव, स्ववचनविरोधप्रसङ्गात् । अत एव च कालस्यानाद्यन्तत्वसिद्धिरिति कुतस्ततो विवेकः? तृतीयेऽपि कालान्तराभावेन समकालशब्दार्थासिद्धिः । चतुर्थे तु घटादेर्नित्यत्वप्रसङ्गः, कालांशतादात्म्यलक्षणकालावच्छेदाभावात् ।

नच तृतीयः, प्रध्वंसस्य प्रध्वंसाभावेन नित्यत्वप्रसङ्गात् । ततः किमिति चेत्; ब्रह्मव्यतिरिक्तानन्तप्रध्वंसनित्यत्वेन ब्रह्मैकमेव नित्यमिति निर्बन्धानुपपत्तिः । नापि चतुर्थः, अबाधिततया लोकाभिमतेषु स[त्यर] म्यग्रजतादिषु नित्यशब्दप्रयोगादर्शनात् । नच लोकमन्तरेण शब्दार्थसम्बन्धसिद्धिः । न च बाधबुद्ध्या घटादिष्वनित्यशब्दप्रयोगो दृश्यते, भवदीयमुपदेशमविदुषां लौकिकानां तेषु तद्बुद्ध्यभावात् । नापि पञ्चमः, विकाराणां निर्विकारत्वेन नित्यत्वप्रसङ्गात् । तेषामपि सविकारत्वेऽनवस्थानात् । विकारान्तरोपादानत्वे च तेषां द्रव्यत्वप्रसङ्गाच्च । ततश्च द्रव्याणामनित्यत्वं तद्विकाराणां नित्यत्वमिति सर्वलोकविरोधादिप्रसङ्गः । ब्रह्मणश्च निर्विकारत्वानुपपत्तिः स्वावसरे द्रष्टव्या । नापि षष्ठः, व्यावहारिकोभयान्तवत्त्वस्य संविदात्मके ब्रह्मण्यपि समानत्वात् । पारमार्थिकस्य तस्य प्रपञ्चेऽप्यभावेन तस्यापि नित्यत्वप्रसङ्गात् । अत एवाबाधितमुभयान्तराहित्यमित्यपि निरस्तम्, प्रपञ्चगतोभयान्तराहित्यस्याप्यबाधितत्वात् । नापि सप्तमः, तत्किं नित्यशब्दप्रवृत्तिनिमित्ततया लोकव्युत्पत्तिसिद्धमुत नेति विचारणीयम् । आद्ये लोक एव प्रतिपक्षः । द्वितीये तु ब्रह्मण औपचारिकनित्यत्वमेव वा पारिभाषिकं वा नित्यत्वमिति अनित्यतायामेव पर्यवसानम् । तथा च कुतो नित्यानित्यवस्तुविवेकः? किंच संविदनित्येति वदतः सौगतादीन् प्रति किं लोकोपलम्भसिद्धाया विषयग्राहिण्या एव संविदस्त्वया नित्यत्वं साध्यते? उत लोकोत्तीर्णायाः कस्याश्चित्? आद्ये प्रत्यक्षादिविरोधः, विषयनित्यत्वप्रसङ्गश्च । अस्मदादिप्रत्यक्षज्ञानं तावत् घटादिकं स्वसत्ताकाले सन्तं साधयति न पुनः पूर्वोत्तरकालसत्तां विद्यमानामपि गृह्णाति । तत्कस्य हेतोः? स्वकालाकलितवस्त्ववभासित्वनियमात् । ततश्च यदि स्वयं कालानवच्छिन्ना संवित् स्यात् विषयस्यापि कालानवच्छेदेन प्रकाशप्रसङ्गः । तेनैवाबाधितेन तन्नित्यत्वमवर्जनीयम् । यदि पुनर्विषयिकालानवच्छेदेन विषयो गृह्यत इति मन्यसे, तथाऽप्येकयैव अस्मदादैन्द्रियकसंविदा विषयस्य यावत्सत्त्वं प्रकाशप्रसङ्गो दुर्वारः । एवं वर्तमानतया वस्तु गृह्णन्तीष्वनुमानादिसंवित्स्वपि विषयनित्यत्वप्रसङ्गः समानः । याश्चातीततयाऽनागततया च स्वसंवेद्यं गृह्णन्ति ता अपि स्वकालापेक्षयाऽतीततयाऽना-

गततया च वस्तु गृह्णन्तीति स्वयं कालानवच्छेदे स्वविषयाणामप्यतीतत्वागामित्वलक्षणकालावच्छेदो न स्यात् । द्वितीये त्वाश्रयासिद्धिः । शास्त्रसिद्धा सेति चेन्न ; नित्यतया तत्सिद्धौ अनुमाननैरपेक्ष्यात्, अनित्यतया तत्सिद्धौ तु बाधात् । संविन्मात्रस्य च लोकसिद्धत्वेन शास्त्रागोचरत्वात् । किञ्च नित्यत्वं किं स्वरूपम्? उत धर्मः? पूर्वत्र स्वप्रकाशेनैव नित्यमित्युपलम्भप्रसङ्गः । धर्मत्वेऽपि किं स्वप्रकाशैकवेद्यम्? उत ज्ञानान्तरवेद्यम्? पूर्वत्र स एव प्रसङ्गः । उत्तरत्रापि किं संविन्निष्ठतया ग्राह्यम्? उतान्यथा? आद्ये संविदोऽपि ज्ञानान्तरवेद्यत्वसधर्मत्वादिप्रसङ्गः । अन्तिमे संविन्नित्यत्वासिद्धिः । न हि नित्यत्वं कस्यचित्सिद्धमित्येतावता संविदो नित्यता सिध्येत् । तथासत्यविशेषेण सर्वेषामपि नित्यत्वप्रसङ्गः ।

एवमानन्दत्वादिधर्मेष्वपि विकल्पदूषणानि निपुणैरनुसन्धेयानि । एवंच सति संविन्नित्या अनुत्पन्नत्वात्, यदनित्यं तदुत्पन्नं यथा घट इत्यनुमानमपि निरस्तम्, प्रागभावेनानैकान्त्यात् । भावत्वे सतीति विशेषणेऽपि भवदभिमताविद्यायामनैकान्त्यं दुर्वारम् । सा ह्यनादिरन्तवती च भवन्मते । किंच संविच्छब्देन किमहमिति प्रत्यक्त्वेन प्रतीयमानमात्मस्वरूपं पक्षीक्रियते? उत सकललोकप्रसिद्धा विषयग्राहिणी वित्तिः? उत सैव सकलविषयाश्रयविरक्ता भवद्भिः सह प्रव्रज्यां गतेति । न प्रथमः, सिद्धसाधनात् । न द्वितीयः, सकललोकविरोधात् ; हेतोश्च स्वरूपासिद्धेः ; करणानां चेन्द्रियादीनाम्, एतस्य चानुमानप्रयोगप्रयासस्य निष्प्रयोजनत्वप्रसङ्गात् । तदभिव्यक्त्यर्थं तदपेक्षेति चेन्नित्यमभिव्यक्त्वाभ्युपगमे [न] तदभिव्यक्तेस्तदनपेक्षणात् ; अन्यथाऽस्मन्मतप्रसङ्गात् । भवदभिमतनित्यस्वयंप्रकाशात्मस्वरूपस्यैव संविद्वैशद्यार्थं तदपेक्षेति चेन्न ; वैशद्यासंभवात् ; स्थलान्तरे तस्यानुसन्धेयत्वात् । न च तृतीयः, आश्रयासिद्ध्यादेः प्रागेवोक्तत्वात् । अनेनैवानुमानेन तत्सिद्धिरिति चेन्न ; अन्योन्याश्रयणात् तादृशसंवित्सिद्धौ तत्पक्षीकारेणैतदनुमानप्रवृत्तिः, तत्प्रवृत्तौ च तादृशसंवित्सिद्धिरिति । अनेनैव न्यायेन, अनुत्पन्नत्वात् निर्विकारेत्यादिसाध्यप्रयोगो दूषणीयः । तदेवं ब्रह्मासाधारणनित्यत्वासिद्धेर्न नित्यानित्यवस्तुविवेकः । नित्यमुपादेयमिति सामान्यविवेकमात्रमपि निपुणनिरूपणेन निष्फलमापन्नमिति । आनन्त्यानन्दनित्यत्वप्रभृतीनां स्वरूपतः । विभागे सविशेषत्वमविभागे त्वसत्यता ॥ सौगतोक्तेऽपि विज्ञाने स्वरूपं विद्यते ततः । नित्यत्वादिवि[वाद]वेकस्ते नैरर्थक्येन जायते ॥

॥ इति शतदूष्ण्यां निर्विशेषनित्यत्वभङ्गवादः अष्टपञ्चाशः ॥ ५८ ॥

॥ अथ परमते अद्वितीयश्रुतिविसंवादवादः एकोनषष्टितमः ॥ ५९ ॥

स्वतस्सर्वजगत्सूतेस्संवित्सिद्ध्यादिभिः स्फुटम् । अद्वितीयपदोक्त्यैव साधिता सविशेषता ॥

अत्र हि अनन्तपदवदद्वितीयपदेनापि सविशेषतैव । तथा हि—अद्वितीयपदे किं तत्पुरुषः? उत बहुव्रीहिः? यदा तत्पुरुषः, तदाऽपि किं द्वितीयादन्यत्वम्, तद्विरुद्धत्वम्, तदभावमात्रं वा स्यात्? पूर्वत्र द्वितीयादन्योन्याभावमात्रं वा विवक्षितम्? उत अब्राह्मणादिनयात्तत्सादृश्यपरत्वं वा? द्विधापि न द्वितीयहानिः । नतरां ब्रह्मणो निर्विशेषत्वम् । द्वितीयत्वाभावे प्रथमत्वादिमात्रं स्यात्, विशेषनिषेधे शेषाभ्यनुज्ञानसिद्धेः । अन्यथा प्रथमत्वादेरपि सामान्यतो विशेषतो वा निषेधे निर्विशेषत्वस्य निषेध्यत्वात् । तथा च न किञ्चिदित्युक्तं स्यात् । अनन्तरेऽपि विरोधः किं भावाभावात्मकतया? सहानवस्थित्या? वध्यघातुकभावेन वा? न प्रथमः, द्वितीयस्य ब्रह्माभावरूपत्वे तत्प्रतियोगितया ब्रह्मण एव तुच्छ-

त्वापातात् । अभावप्रतियोगित्वमेव हि सर्वत्र तुच्छत्वम् । देशकालादिभेदात्सदपि स्यादिति चेन्न ; अदेशकालव्यवच्छेदनीयत्वोपगमात् । प्राक् प्रध्वंसादिविकल्पेनापि ब्रह्मणः कार्यत्वानित्यत्वतुच्छत्वप्रपञ्चान्तरसद्भावादिदोषो द्रष्टव्यः । अयमेव ब्रह्मण एव द्वितीयाभावरूपत्वेऽपि । किंच स्वाभावे ब्रह्मणि द्वितीयं कथमध्यस्येत ? तद्भानाभानयोस्तदयोगात् । अविशदभाने सविशेषत्वभानावश्यंभावात् । दोषवैचित्र्यात् सर्वमुपपन्नमिति चेन्न ; विरुद्धाकाराग्रहणमन्तरेण क्वचिदप्यध्यासादृष्टेः । तदग्रहेऽप्यध्यासे नित्यमध्यासप्रसङ्गात् । सहानवस्थानविरोधे सतः परिच्छिन्नत्वापत्तेः, शीतोष्णादिवद्भिन्नाश्रयत्वनियमविवक्षायां धर्मधर्मिणोरेकाश्रयत्वाभावात् ब्रह्मणः सधर्मकत्वाविरोधः, स्वनिष्ठताभङ्गश्च । एकाश्रयत्वाभावमात्रे वक्तव्ये सर्वस्य ब्रह्माश्रयत्वं श्रुत्यन्तरसिद्धं सिध्यत्येव । न तृतीयः, द्वितीयस्य घातुकत्वे सदनित्यत्वादिप्रसङ्गात् । सतो घातुकत्वेऽपि न द्वितीयात्यन्ताभावः, हन्तव्यस्यादौ स्वरूपलाभावश्यम्भावात् । अध्यासनिवर्तकत्वमेव अस्मदिष्टं घातुकत्वमिति चेत् ; अस्तु सदध्यासघाति, अनध्यस्तात्मना द्वितीयस्थितेर्न क्षतिः । तथा तस्य न प्राप्तिरिति चेन्न ; सगुणादिश्रुत्यैव तत्प्राप्तेः । कल्पितविषया सेति चेन्न ; अद्यापि तद्बाधादृष्टेः । सतोऽध्यासविरोधित्वे च अविद्यासहस्रैरपि न स्यादध्यासः ; सत्यादित्ये सन्तमसवत् । अध्यस्यति हन्ति चेति चेन्न ; नैरपेक्ष्यविरोधात् । अन्यथाऽन्यस्यैवान्ततो घातुकत्वात् । साधारणहेतुत्वे सिद्धे विशेषोक्तिरियमिति चेन्न ; तस्यैव त्वदभिमतस्येतःपूर्वमसिद्धेः । प्रथमतृतीयादिभावमात्रेण द्वितीयविरोधवाचोयुक्त्या सुस्थं द्वितीयम् । तदभावमात्रपरे तु समासे न सदादिशब्दैः सामानाधिकरण्यं स्यात्, नञर्थस्य स्वतन्त्रत्वात् । तस्य तदात्मकत्वविवक्षायोगस्योक्तत्वाच्च । न च संभवन्त्यां गतौ वाक्यभेदाध्याहारादिर्न्याय्यः ।

नापि बहुव्रीहिः, तत्र द्वितीयं यस्य नास्तीति किं प्रथमादिविधिकटाक्षेण ? सर्वनिषेधाभिप्रायेण वा ? न पूर्वः, सर्वनिषेधासिद्धेः । नोत्तरः, बहुव्रीहिविरोधात् । * अनेकमन्यपदार्थे इति हि सः । किंच, द्वितीयनिषेधवत्त्वं च धर्मं ब्रह्मण उपस्थापयन्त्यां वृत्तौ कथं निर्विशेषत्वसिद्धिः ? अनुपस्थापयन्त्यां च कथंतरां नास्त्यर्थसंबन्धे यस्येति विग्रहः ? न च स्वरूपमेवात्र नास्तिशब्दार्थः । अन्यपदार्थत्वायोगात्, स्वस्य स्वसंबन्धायोगाच्च । भेदक्लृप्त्युपचार इति चेत्तथापि द्वितीयाभाव एव ब्रह्मेति निष्कर्षः स्यात् । तत्र चोक्तमध्यासानुपपत्त्यादि । अपि च अविद्यातद्विकाराणां ब्रह्मव्यतिरेके कथमद्वितीयत्वम् ? तन्मिथ्यात्वेऽपि तेषां द्वितीयत्वस्य दुस्त्यजत्वात् । सत्यमिथ्यार्थयोरव्यतिरेके विरोधात् । न च यूयं जैननयनिष्ठाः । तन्निष्ठाश्च तत्तामिव द्वितीयतां वाञ्छन्ति । ब्रह्मणो निर्विशेषत्वविवक्षायां च न किञ्चिदपि लक्षणं तत्र स्यादिति तदुदाहरणविरोधः । व्यवच्छेद्यायोगाच्चेति । अस्मत्पक्षे तु वृत्तिद्वयमपि सम्यक् । द्वितीयव्यतिरेकोक्त्या सतः स्यादग्रगण्यता । द्वितीयशून्यतोक्त्या च तत्समाननिषेधनम् ॥ न ह्यपरं कुतश्चित् सर्वकारणं ब्रह्म, येन तस्य द्वितीयता स्यात् । न चास्य किञ्चिदैश्वर्येण समं, येन द्वितीयगणनां सहेत । * न तत्समश्चाभ्यधिकश्च दृश्यत इत्यादिश्रवणात् । तेनात्र सदृशद्वितीयनिषेधपरं वचः । आहुश्च—* यथैक एव सविता न द्वितीयो नभस्स्थले । इत्युक्त्या नहि सावित्रा निषिध्यन्तेऽत्र रश्मयः ॥ तथा च, * यथा चोलनृपः सम्राडद्वितीयोऽत्र भूतले । इति तत्तुल्यनृपतिनिवारणपरं वचः । नतु तत्पुत्रतद्भृत्यकलत्रादिनिवारणम् ॥ इति । भाष्ये तु प्रकरणस्थमृत्पिण्डादिष्विवैकशब्देनाविभक्तनामरूपावस्थाविशेषविशिष्टबोधनादुपादानत्वसिद्धौ पिण्डादिष्विवाधिष्ठात्रन्तरशङ्कायां तन्निषेधपरोऽयमद्वितीयशब्द इति स्थापितम् । एतदेव * बहु स्यामिति बहुभवनतत्सङ्कल्पयोराश्रयतयाऽनन्तरमेव स्थाप्यते * सोऽकामयत, बहु स्या-

मिति श्रुत्यन्तरैश्च । एतदर्थमेव प्रकृत्यधिकरणम् । अतोऽद्वितीयश्रुतिरेव विश्वातिशायित्ववाचिनी गुणविभूतिश्रुतिशतविदितबहुविधविशेषजातातिशयितविशेषान्तरतत्परा निर्विशेषवादिनां विसंवादिनीति नीतिविदः ।

॥ इति शतदूषण्यां परमते अद्वितीयश्रुतिविसंवादवादः एकोनषष्टितमः ॥ ५९ ॥

———

॥ अथ सत्त्वासत्त्वविवेकवादः षष्टितमः ॥ ६० ॥

अस्ति नास्तीति बोधाभ्यामभिव्याप्तेषु वस्तुषु । सदेव सदसद्बुद्धिनिमित्तत्वेन साध्यते ॥

यदेव हि प्रामाणिकत्वेन सदिति प्रतीतिगोचरतां भजते, तदेव रूपान्तरेण नास्तीत्यपि प्रतिक्षेपं भजते । तत्रासत्त्वमेव तत्त्वमिति सौगतोपदेशिनः, सदा सत्त्वमिति सांख्याः, सत्त्वासत्त्वसमुच्चय इति जैनाः, उभयप्रहाणमित्यद्वैतिनः, उपाधिभेदादुभयव्यवस्थेत्यपरे, तत्रैव नास्तीति व्यपदेशोऽपि भावान्तरनिमित्त इति निष्कर्षकाः । नन्वसत्त्वमेव सर्वत्र युक्तम्, असतोऽपि शुक्तिरजतखरविषाणादेः भ्रान्तिहेतुवैचित्र्यादस्तीति धीविषयत्वदृष्टेरिति चेन्न ; बाधाभावात् । नास्तिधीरेव बाध इति चेन्न ; उपाधिभेदेन विरोधाभावात् । मध्येऽप्यसत् कार्यम् आद्यन्तयोरसत्त्वात्, खपुष्पवदिति चेन्न ; धर्मिहेतुग्राहकाभ्यां विरोधात् ; स्ववाग्व्याघाताच्च । अस्तिबुद्धेर्नास्तिबुद्धिरपच्छेदनयेन बलीयसी, प्रतिषेधस्य प्राप्तिसापेक्षतया परत्वात्, * पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यतीति मीमांसकैरेवोच्यत इति चेन्न; दुष्टहेतुजन्यत्वाविशेषे बलाबलविभागायोगात् । हेतुवैचित्र्ये पौर्वापर्यानियमाच्च । परत्वमात्रेण निषेधे त्वन्मतं नास्तीत्युक्तिमात्रेण तद्विरुद्धानां सर्वेषां विजयप्रसङ्गात् । तदुपरि जल्पेऽप्यव्यवस्थितिप्रसङ्गात् । नन्वस्तु तर्हि सर्वस्य सदा सत्त्वम्, असद्धियः सत्त्वप्राप्तिसापेक्षत्वात्, प्राप्तस्य च निर्बाधत्वादिति चेन्न; उपाध्यन्तरेण बाधाबाधविवेकस्य वक्तुं शक्यत्वात् । अन्यथा घटादिषु असद्व्यवहारस्य निर्विषयत्वप्रसङ्गात् । अनभिव्यक्त्या सविषयत्वमिति चेन्न; अभिव्यक्तेरपि सदा सत्त्वेन तत्रापि नञर्थासिद्धेः । तत्कार्यत्वे तद्वत्सर्वत्र सत्कार्यवादविलयात् । अभिव्यक्त्यन्तरस्वीकारेऽनवस्थादिदोषात् । उक्तं च * अभिव्यक्तेरनादित्वे कारणानामनर्थता । तदागन्तुकतामिच्छन् किं नान्यत्रैवमिच्छति ॥ इति । पूर्वोत्तरकालाद्युपाधिद्वयसंबन्धेन सत्त्वासत्त्ववर्णने संबन्धिन उभयानुवृत्तेः सदातनत्वम्, असतः शशशृङ्गादेर्देशकालभेदेन सत्त्वाभावाच्चेति चेन्न; स्वस्य स्वप्रतियोगिनश्चाधारतया पूर्वोत्तरकालसंबन्धव्यपदेशात्, नित्यासद्वस्तुनः क्वचिदपि कथञ्चिदभावात् । * आदावन्ते च यन्नास्ति नास्ति मध्येऽपि तत्तथेति चेन्न; शशशृङ्गादाविष्टत्वात्, घटादौ बाधात् । तत्प्रसङ्गेऽपि तत्तत्कार्योपाधिकाद्यन्तग्राहकैरेव व्याप्तिग्रहणनिरोधात् । तद्विपर्यये च हेत्वात्मनि बाधादेव । असतः कथं जन्म ? सतो वा कथम् ? अभिमानमात्रमिति चेत्; दूषणमप्युक्तमेव । प्रागसत्त्वं च जन्मोपकारीति न तत्र विरोधचोद्यावकाशः । प्रागसतः खपुष्पस्य कथमनुत्पत्तिः ? प्राक् सतो वा प्रत्यगात्मनः कथं नित्यव्यक्तिरिति चेत्; खपुष्पे नित्यासत्त्वादेवेति निपुणं पश्य । नित्यविशेषणं प्रयुञ्जानेन च स्वीकृतमनित्यमिति स्ववाग्विरोधः । ननु प्रागसतः उत्पत्तिकालेऽपि कारणादुत्पत्तिर्न घटत इत्युक्तम् ; *असत्त्वान्नास्ति संबन्धः कारकैः सत्त्वसङ्गिभिः । असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः ॥ इति चेत्; अत्रोत्तरं दत्तमाक्षपादैः * घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेध इति । अस्यान्यत्र विस्तरो द्रष्टव्यः । अतोऽसतो नित्यासत्त्वं सतश्च नित्यसत्त्वमिति सांख्यवादः सुहृद्भिर्द्रव्यविषये योज्यः ।

यत्पुनः सत्त्वासत्त्वसमुच्चय इत्युच्यते, तद्देशकालादिभेदेन चेद्द्वयमनुमन्यामहे । अन्यथा चेदत्यन्तविरोधान्नाद्रियामहे । तथा च दूषणभूषणादिव्यवस्थाविलयेन व्यवहार एव निष्फलः स्यात् । तेन परस्परविरुद्धोऽयं पक्षः । ये पुनरुभयप्रहाणवादिनस्तेषामेव पक्षं परिशोधयामः । परस्परविरुद्धोभयाङ्गीकारवत्तदुभयप्रहाणस्यापि विरोधकुक्षिनिक्षेपमेवोपलभामहे । न हि घटत्वाघटत्वसमुच्चयवत् घटाघटविलक्षणयोरपि समुच्चयः संभवति, विरोधस्याविशेषात् । उपलम्भ एव विरोधोपशमने प्रभवति, स तु घटत्वाघटत्वसमाहारवत्तदुभयवैलक्षण्येऽपि परिपन्थी । न हि घटाघटविलक्षणं किञ्चित्पश्यामः । घटविलक्षणस्याघटत्वात् अघटविलक्षणस्य च घटत्वात् । उभयविलक्षणं पुनर्न किञ्चिदुपलभामहे । उपाधिभेदादुभयव्यवस्थेति पक्षमदूरविप्रकर्षात्परिगृह्णीमहे । उपाधिभेदस्तु स्वात्मना सत्त्वमन्यात्मना पुनरसत्त्वम्, स्वकाले सत्त्वमन्यकाले पुनरसत्त्वम्, तथा स्वदेशे सत्त्वमन्यदेशे पुनरसत्त्वमिति । इह तादात्म्यं संसर्गो वा सत्त्वमिति व्यपदिश्यते, तद्विरुद्धवेषेण वस्तुन्येवासद्व्यपदेशः । षष्ठे तु पक्षे विरुद्धधर्मयोग एव वस्तुन्यसद्व्यवहारहेतुतया व्यपदिश्यते, घटो हि घटात्मना सन् पटात्मना पुनरसन्निति निर्दिश्यते । सन्नेव स्वदेशकालयोः स्वविरोधिदेशकालयोरसन्निति । उपलम्भानुकूलत्वाल्लाघवाच्चेदमेवाद्रियन्ते वृद्धाः इति ॥

॥ इति शतदूषण्यां सत्त्वासत्त्वविवेकवादः षष्टितमः ॥ ६० ॥

॥ अथ जीवैक्यभङ्गवादः एकषष्टितमः ॥ ६१ ॥

पयोधितनयान्वितं परमधाम्नि यद्वर्तते सदा यदवलोकनं विदधते फणीन्द्रादयः ।
अकृत्रिमसरस्वतीवदनसन्ततास्वादितैर्गुणैरधिगुणं महः स्वयमनन्तमालक्ष्यते ॥

विगीतं मदविद्याकल्पितम्, विवादाध्यासितं चेतनजातमहमित्यादिषु किं सर्वत्राहमर्थैक्यं सिषाधयिषितम्? उत तद्धर्मसंविदैक्यम्? यद्वा तदुपलक्षितसन्मात्रैक्यम्? न प्रथमः, अपसिद्धान्तप्रत्यक्षादिविरोधप्रसङ्गात् । न ह्यहमर्थं सत्यमात्मानमनुमन्यसे, न चाहङ्काराणां स्वरूपैक्यम् । न च परदुःखादेः स्वदुःखादित्वमभिमन्यसे । *एको बहूनामित्यादि च न स्मरसि । अत एव न द्वितीयः, सर्वेषां सर्वदा सर्वज्ञत्वस्यासर्वज्ञत्वस्य वा प्रसङ्गाच्च । न तृतीयः, सर्वानुयायिसदैक्येऽप्यात्मैक्यासिद्धेः । नहि कस्यचित्सद्बुद्धिविषयमात्रे स्वात्माभिमानः, आत्माभिमानमात्रं वा; तथा सति देहात्मभ्रमादेर्विशेषतः परिहारे निदानाभावात् । आत्मनः सत्त्वं त्वयापीष्यत इति चेत्; सत्यमेतत्, नतु सतः सर्वस्यात्मत्वम् । आत्मव्यतिरिक्तस्य न सत्त्वमिति चेन्न; *तदनुप्रविश्य, सच्च त्यच्चाभवत्* कथमसतः सज्जायेतेत्यादिविरोधात् । किंच सतामैक्यं सर्वमानविरुद्धम्, सत्त्वैक्यं तु जात्यैक्यमात्रं स्यात् । सत्त्वैव महानात्मेति चेन्न; तस्यान्यधर्मत्वायोगात् । सतां हि भावः सत्ता, नतु सा स्वतन्त्रा । उक्तं च संवित्सिद्धौ *स्वैः स्वैर्व्यवस्थितै रूपैः पदार्थानां तु या स्थितिः । सा सत्ता न स्वतन्त्रा स्यात्तत्राद्वैतकथा कथम् ॥ इति । पारतन्त्र्यभ्रमोऽयमिति चेत्; स किं सत्ताया उत सतः? आद्ये विरोधः, सतां हि भावः सत्ता । द्वितीयेऽपि विरोधः, न हि सतां स्वधर्मभूता धीरस्ति । न चैतावता तेषामैक्यसिद्धिः ।

अपि च जीवैक्यं सत्यं मिथ्या वा? पूर्वत्रापसिद्धान्तः, अविद्यातत्सबन्धिजीवभावतदेकत्वादीनां मिथ्यात्वाभ्युपगमात् । उत्तरत्र जीवबहुत्वमपि तथैवेति किमन्यतरपक्षपातेन तत्साधनेन वा? प्रतीत्यनुसारेण जीवभेदपक्षे वा किं

न पतसि ? न च जीवैक्यं प्रातिभासिकम्; सर्वधीव्यवहारविरोधात्। नापि यौक्तिकम्; धर्मधीविरोधात्? प्रवृत्त्यादि-भेदैर्हि परानुमानम्। नच स्वात्मपरात्मधीन्यायः, * वैधर्म्याच्च न स्वप्नादिवदिति सूत्रोक्तन्यायविरोधात्। स्वात्मनश्च ते तथैव प्रसङ्गात्। स्वात्मनश्च परं प्रति परात्मित्वात्। नहि दृश्यवद्द्रष्टापि ते मिथ्याभूतः। व्यावहारिकसत्यत्वं तस्यास्तीति चेत्? स्वीकृतं तर्हि व्यावहारिकजीवबहुत्वं तदैक्यं चेति नैकत्र पक्षपातो युक्तः। यथा दृष्टवह्नेर्लिङ्गतो वह्न्यन्तरानुमितिः तथैव ह्यत्र आत्मान्तरानुमितिः। यद्यत्रैक्यं साध्यते, तर्हि वह्न्याद्यैक्यमपि किं न साध्यते? विरुद्धधर्मविहतेरिति चेत्तुल्यम्। न चैकाश्रयतया सर्वदुःखादीनां प्रतिसन्धानमस्ति। अन्तःकरणाद्युपाधिभेदादप्रतिसन्धानमिति चेन्न; देहा-वयवबाह्येन्द्रियादिभेदेऽपि प्रसङ्गात्। स्वेच्छया विशेषवर्णनेऽप्यतिप्रसङ्गात्। महाप्रलयान्तरभाविनां महात्मनां केषाञ्चि-दन्तःकरणभेदेऽपि पूर्वकल्पानुभूतप्रतिसन्धानदर्शनाच्च। अद्यतनानां प्राग्भवीयाननुसन्धानवत् स्यादिति चेन्न; प्रायेण नरकक्लेशप्रसूतिव्यसनकालविप्रकर्षादिभिः संस्कारविलयात्। न चेह तथा, स्वस्याप्यस्मरणापातादिति॥

॥ इति शतदूषण्यां जीवैक्यभङ्गवादः एकषष्टितमः॥ ६१॥

॥ अथ परमते अपशूद्राधिकरणविरोधवादः द्विषष्टितमः॥ ६२॥

स्वे स्वे कर्मणि युञ्जानो मुखबाहूरुपादजान्। स्वयं नस्संप्रकाशेत स्वान्ते स्वच्छन्दसारथिः॥

यत्तु भगवता बादरायणेन सूत्रितं शूद्रस्य ब्रह्मविद्यायामनधिकारित्वम्; तद्भवन्तः कथं निर्वहन्ति? किं शूद्रैर्निर्विशेषज्ञानस्य दुःसम्पादत्त्वात्, तत्सम्पत्तिसद्भावेऽपि वा ततः तेषामविद्यानिवृत्त्यसंभवादिति। न प्रथमः, स हि तथाविधस्य ज्ञानस्य वेदैकजन्यत्वाद्वा? अवेदजन्यत्वेऽपि वेदसापेक्षत्वाद्वा? वेदावेदयोः शूद्रादिषु ज्ञानजनकत्वा-शक्तेर्वेति? आद्यस्तावदधिगतत्वत्सिद्धान्तेन त्वया नाङ्गीकर्तव्यः। आत्मघातुकतर्कानुगृहीतानुमानादिनापि निर्विशेष-त्वस्य प्रपञ्चमिथ्यात्वादेश्च भवद्भिः साध्यमानत्वात्। न च निर्विशेषे श्रुतिसमधिगम्यं विशेषान्तरं संभवति। श्रुतेरपि भवद्भिरध्यस्तातद्रूपनिवृत्तिमात्रपरत्ववर्णनात्। आनन्दत्वादेरपि स्वरूपानुप्रवेशनिर्णयात्। नचानुमानादिषु सर्वत्र शूद्र-स्यानधिकारश्शङ्क्यः, लोकसिद्धान्वयव्यतिरेकमूलेषु त्वदुक्तेष्वाचण्डालमधिकारात्। यत्र च तिरश्चामप्यधिकारः तत्र द्विपदां कः परिपन्थी। अन्यथा तेषां सार्वलौकिकव्यवहारोच्छेदप्रसङ्गात्। निर्विशेषं तत्त्वमित्यादिलौकिकवाक्येन च तेषां तत्त्वज्ञानं सुलभमेव। न च ततस्तेषां निवर्तकं ज्ञानं नोपलभ्यत इति वाच्यम्; त्रैवर्णिकानां वैदिकवाक्येनापि तुल्य-त्वात्। श्रवणमनननिदिध्यासनजनितविकल्पवैमुख्यानां दृश्यत इति चेत्; एवं लौकिकवाक्येऽपि तान्येव सहकारीकृत्य तत्सिद्धिं पश्य। न च सामग्र्यां सत्यां क्वचित् ज्ञानं क्वचिन्नेति नियन्तुं शक्यम्, अनीश्वरेच्छया तन्नियमासिद्धेः। भवतु वा वेदैकमूलत्वम्, तथापि न शूद्रादेस्तत्रानधिकारः; व्युत्पन्नपदपदार्थानां तेषां ततोऽपि ज्ञानसंभवात्; उत्पन्नेऽपि तत्त्वज्ञाने वेदश्रवणतदर्थानुसन्धानादिमूलप्रत्यवायस्य भवन्मते प्रसङ्गाभावात्। यदा विश्वभ्रमोन्मूलनं ज्ञानमुदेष्यति तदा तदन्तःपातिनः कस्यचित् प्रत्यवायभ्रमस्य का वार्ता? नचानुपनीतस्यानधीतवेदस्याश्रुतवेदान्तवाक्यस्य * न शूद्राय मतिं दद्यादिति वचनबलान्निषिद्धाचार्यलाभस्य शूद्रादेः कथं ततो ज्ञानमिति वाच्यम्; दग्धाधिकारतया वेदशिरसि वर्तमानै-र्भवद्भिर्वेदान्तानां तदर्थस्य च तेभ्योऽपि यथावदुपदेशसंभवात्। न हि वो विधिनिषेधकिङ्करता। यथा ब्रूथ—

* दग्धाखिलाधिकारत्वात् ब्रह्मज्ञानाग्निना मुनिः । वर्तमानः श्रुतेर्भूम्नि नैव स्याद्वेदकिङ्करः ॥ इति । यद्यपि * त्यजधर्ममधर्मं चेत्यादिबलाद् दुर्बलबुद्धिभिर्युष्मत्सयूथ्यैर्निषिद्धवर्जनमनुज्ञायते, तथाऽप्यन्यैः कैश्चिदुन्मर्यादैरर्थादिलिप्सया तेभ्यस्तदुपदेशः संभवत्येव । नचैवमस्मन्मते प्रसङ्गः, वक्तुरिव श्रोतुरपि प्रत्यवायेन तन्मूलोपासनादेः तेष्वसंभवात् । उपासनविधीनां च उपनयनाद्यङ्गकाध्ययनविधिसिद्धस्वाध्यायसंपन्नज्ञानत्रैवर्णिकाधिकारिलाभेन कर्मविधीनामिव तदितरेषु स्वसिध्यर्थं ज्ञानान्तरकल्पनौदासीन्यात् । तत एवोपबृंहणभूतेतिहासपुराणजन्यज्ञानस्यापि विधिभिरनादृतत्वात् । तच्छ्रवणानुज्ञानस्य पापक्षयादिमात्रफलत्वात् । उपास्यस्य च ब्रह्मणोऽनन्तविशेषस्यानुमानाद्यगोचरत्वात् । उपासनस्यैव वाक्यार्थज्ञानातिरिक्तस्य बन्धनिवर्तकत्वात्, बन्धस्य च सत्यत्वेनादृष्टद्वारा तन्निवृत्त्युपपत्तेरिति ।

एतेन द्वितीयोऽपि पक्षो निरस्तः, वेदसापेक्षत्वेऽपि तेषां तदधिगमोपायस्योक्तत्वात् । कथं वाऽनुमानादेर्वेदसापेक्षता ? न तावत् तदङ्गतया तर्कादिवत् ; कैश्चिदपि तथाऽनभ्युपगमात् । नापि कारणतया ; वेदस्यैव व्युत्पत्त्यादावनुमानादिसापेक्षत्वेन वैपरीत्यात् । नापि नैसर्गिकलोकव्यवहारमूलतया तत्त्वबुभुत्साशून्यानां तद्भ्रान्तत्वसमर्पणमूलतत्त्वबुभुत्सोत्पादनद्वारेण ; सांख्यसौगतादिभिः प्रत्याक्षादिवृत्तपरीक्षाप्रवृत्तैस्तदुत्पत्त्युपपत्तेः, उत्पन्नायां च तस्यां भवदभिमतप्रत्यक्षानुमानादिभिर्निर्विशेषज्ञानसम्पादनोपपत्तेः । तिष्ठन्तु सांख्यादयः, त्वदभिमततत्त्ववित्संप्रदायागतलौकिकवाक्यादपि तद्बुभुत्सा जायत एव । पश्यामश्चैतदद्यतनेषु । न च वेदानुवचनस्य विविदिषासाधनत्वश्रुत्या तत्सापेक्षता ; यज्ञादेरिव जन्मान्तरानुष्ठितस्यापि तस्यादृष्टद्वारा तद्धेतुत्वोपपत्तेः । अत एव न तृतीयः, व्युत्पत्त्यन्वयव्यतिरेकादिशालिषु त्रैवर्णिकेषु शूद्रादिषु च प्रमाणानां पक्षपातविरहात् । भवतु वा शूद्रादीनां यतः कुतश्चित्तत्त्वज्ञानम्, त्रैवर्णिकानां तु वेदत एवेति नियमार्थमधिकरणमिति चेन्न ; नियामकाभावात । अधीतवेदत्वमेव नियामकमिति चेत् ; त्यज तर्हि अध्ययनक्लेशम्, शूद्रादिवल्लघीयसैवोपायेन तत्प्रयोजनसिद्धेः । अत एव चान्ततो वेदान्तोच्छेदः प्रसज्येत । नचाधीतवेदैरन्यतस्तदर्थो ज्ञातुं न शक्यः ; तस्य तत्प्रतिबन्धकत्वाभावात् । नापि तेऽन्यतो न जानीयुरिति निषेधः । न च निषेधोल्लंघनेऽपि वः प्रत्यवाय इत्युक्तम् । नापि द्वितीयः, अन्यूनानतिरिक्तविषयत्वे कस्यचिद्बाधकत्वं कस्यचिन्नेति नियामकाभावात् । नचादृष्टद्वारा वैषम्यम्, भवद्भिस्तथाऽनभ्युपगमात् । न च बाधे तत्त्वज्ञानातिरिक्तमपेक्ष्यते, नापि बाधातिरिक्ता निवृत्तिरिष्यते, यत्रादृष्टादिसापेक्षता स्यात् । अत एव हि ध्याननियोगवादिनोऽपि भवद्भिर्दूरीकृताः । न च प्रत्यक्षानुमानपुंवाक्यानां बाधकत्वमेव नास्ति, रज्जुसर्पादिभ्रमानुच्छेदप्रसङ्गात् । न च तानि ब्राह्मणादेरेव रज्जुसर्पादिभ्रमबाधकानि न पुनः शूद्रादेरिति नियमं पश्यामः । न च विश्वबाधकैस्तदन्यबाधकैरपि न दृश्यत इति वाच्यम्, वैदिकवाक्येष्वपि तथा प्रदर्शितत्वात् । भवत्वेवं तत्त्वज्ञानतत्फलयोः संभवाच्छूद्रादीनामपि ब्रह्मविद्याधिकारः, तस्य मिथ्यात्वमात्रेण त्वनधिकारवाचोयुक्तिरिति चेत् ; हन्तैवं त्रैवर्णिकानामप्यसौ मिथ्येति किं विशिष्याभिधीयत इति । तदेतत्सर्वं तत्रैवाधिकरणे प्रपञ्चितम् । शास्त्रोपक्रमेऽपि सन्मात्रस्य ब्रह्मणः प्रमाणान्तरगोचरत्वे तद्विषयस्यागमस्यानुवादत्वं प्रसञ्जयता सूचितम् ।

॥ इति शतदूषण्याम् अपशूद्राधिकरणविरोधवादः द्विषष्टितमः ॥ ६२ ॥

॥ अथ अधिकारिविवेकवादः त्रिषष्टितमः ॥ ६३ ॥

कर्मज्ञानादिनिष्ठासु कर्तृत्वं योगिनां यतः । स सर्वकर्ता स्वमतं नित्यं कारयिताऽस्तु नः ॥

अपशूद्राधिकरणप्रसङ्गादुत्पन्नतत्त्वज्ञानस्य कर्मयोगानधिकारो भगवद्गीतादीन् व्याचक्षाणैः पैर्जल्पितः प्रतिक्षिप्यते । तत्र तावत् सम्यगात्मदर्शनेन निरस्तमिथ्याज्ञानस्य प्रव्रज्यां प्रविष्टस्यापि सांख्यसंज्ञस्य त्वदुक्ताधिकारिणः * शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषमित्यादिभिः लौकिकवैदिकसमस्तकर्मन्यासो नास्तीति त्वदुक्तवाक्यैरपि सुव्यक्तम् । अथापि ब्रूमः—उत्पन्नतत्त्वज्ञानस्य कर्मयोगेऽनधिकारः किं तस्य कर्मयोगवेदनाभावात्? तत्सत्त्वेऽपि सामग्र्यसंभवात्? तत्संभवेऽपि वा तस्य निष्फलत्वात्? उत तत्सफलत्वेऽपि तत्फलनैरपेक्ष्यात्? तत्सापेक्षत्वेऽपि वा अन्यतस्तत्सिद्धेः? अन्यस्माद्वा कुतश्चिदिति । न प्रथमः, दीर्घकालनैरन्तर्यादरसेवितकर्मयोगलब्धज्ञानस्य प्रबलसन्निपाताद्यभावे झडिति तत्प्रमोषासंभवात् । तीव्रतरात्मानुभवसुखसन्दोहेन स्यादिति चेन्न; निषिद्धपरिहारसंस्कारस्याप्युच्छेदप्रसङ्गेन त्वदुक्तधर्माधर्मत्यागसमुच्चयविरोधप्रसङ्गात् । आगमिकसंस्कारप्रध्वंसेऽपि स्वात्मानुभवानन्दमग्नतया निषिद्धेषु न कटाक्षोऽपि विक्षिप्यत इति चेत्; हन्तैवं तर्हि शारीरककर्मस्वपि न विक्षिप्येत; न चैवमिच्छसि । यस्तु तथाविधात्मानुभवेन शारीरस्यापि कर्मणः प्रस्मरति न तस्य वयमपि सुषुप्तस्येव तदानीं कर्मानुष्ठानं ब्रूमः । न चासौ यावच्छरीरं तथाऽवतिष्ठत इति दृष्टं श्रुतमिष्टं वा ।

न द्वितीयः, दृष्टादृष्टविकल्पानुपपत्तेः; न ह्यन्धपङ्ग्वादिवत् दृष्टसामग्र्यां किंचिदस्योपघातं पश्यामः । न च तस्यां सत्यामदृष्टवैकल्यादशक्तिरिशङ्क्या; दृष्टसामग्र्युपनयनार्थत्वात्सामान्यतोऽदृष्टस्य । अन्यथा सैव निष्फला स्यात् । सम्यक् प्रयुक्ता च सा तत्फलं नोत्पादयेत् । इष्ट एवायं कचिदर्थः * सुरक्षितं दैवहतं विनश्यतीत्यादिस्मरणादिति चेन्न; तत्रापि यत्किञ्चिद्वैकल्यमुत्पाद्यैव तथात्वस्थितेः; अन्यथाऽतिप्रसङ्गात् । ननु कर्तृत्वाभिमानमन्तरेण कर्मणि नाधिकारः, स चास्य निश्शेषविनष्ट इति कथं सामर्थ्यमिति चेन्न; शारीरकर्मप्रतिबन्द्यैव दत्तोत्तरत्वात् । तत्रापि नासौ कर्ता निष्क्रियत्वादात्मस्वरूपस्येति चेत्; तर्हि कः कर्ता? प्रकृतिरेवेति चेत्; कस्संख्यावस्थस्य विशेषः? अभिमाननिरोध इति चेत्; एवं कर्मयोगेऽपि किं न स्यात्? तथैव हि फलसङ्गकर्तृत्वादित्यागेन तदनुष्ठानमनुशिष्यते । यत्र चायमधिकरोति ज्ञानयोगे स किंरूपः? किं निष्क्रियात्मस्वरूपमात्रावस्थानलक्षणः; उत तस्मिन्नस्य सम्यग्दर्शनरूपवृत्तिज्ञानेनावस्थानमिति । पूर्वत्र ज्ञानयोगस्य सदातनत्वप्रसङ्गः । उत्तरत्र ज्ञानयोगेऽप्यनधिकारः, द्रष्टृत्वस्यापि कर्तृत्वविशेषत्वात् । दृशिक्रियाकर्तृत्वमेव द्रष्टृत्वमिति ज्ञातुरनात्मत्वं प्रतिपादयता त्वयाऽपीष्यते । द्रष्टृत्वमप्यन्तःकरणधर्मत्वेन मिथ्यात्वेनैवानुसन्धीयमानमात्मविदं न लिम्पतीति चेत्; यज्ञादिकर्तृत्वेऽपि तथात्वे किं वैषम्यम्? बाह्याभ्यन्तरत्वाभ्यां वैषम्यमिति चेन्न; वैषम्यमात्रस्याप्रयोजकत्वात्, यागादेरपि च द्रव्यत्यागात्मकबुद्धिवृत्तिविशेषत्वात्, शरीरक्रियादिरूपेष्वपि कर्मसु प्रयत्नस्यैवान्तरस्य पुरुषव्यापारत्वात्तत्रैव तत्पर्यन्ते स्वव्यापारे तस्य नियोगात् ।

ननु न ज्ञानयोगः स्वेच्छयाऽनुष्ठीयते, अपि तूच्छ्वासनिश्वासनिमेषोन्मेषादिवत्सांख्यस्यासौ स्वरसवाहीति चेन्न; युष्मद्गुरुवंशस्य सर्वकर्मपरित्यागरूपज्ञानस्य विधेयत्ववाचोयुक्तेरनर्थकत्वप्रसङ्गात्, शास्त्रजन्यज्ञानमात्रस्याविधेयत्वात्,

तथाचाभ्युपगमात्; तन्मूले तु सर्वकर्मसंन्यासलक्षणे ज्ञानयोगे कर्तव्ये विधेरवकाशात्। स्वरसवाहिस्वात्मदर्शनरूपमहाजागरस्य सुषुप्तावपि नाधिकारः, प्रबुद्धस्यापि न बहिर्मुखी दृष्टिरिति शारीरकर्मस्वपि नावकाशः। तथापि निष्क्रियमात्मानमात्मत्वेनाभिमन्यमानस्य कर्तृत्वाभिमानपुरस्सरक्रियात्मस्वरूपावस्थानरूपकर्मयोगे कथमधिकारः? कथंच विदितकर्ममिथ्यात्वस्तत्र प्रवर्तते? इति चेन्न; उक्तोत्तरत्वात्। ज्ञानयोगो हि क्रियाविशेष एवेति दर्शितम्। नच तस्य मिथ्यात्वमविदितम्। सोऽपि स्वरूपभूतसंवित्तिमात्रादन्यः। तस्य च मिथ्यात्वं संवित्स्वरूपादन्यन्मिथ्यैवेति संमतप्रयोजकश्रवणवेलायामेव सिद्धम्। नचात्यन्तनिष्क्रियत्वमात्मनो वयमिच्छामः, आत्मन एव कर्तृत्वस्य *कर्ता शास्त्रार्थवत्त्वादित्यादिभिः स्थापनात्; उत्पत्तिनाशादिलक्षणक्रियानिवृत्तेश्च सम्यग्ज्ञानशरीरप्रेरणादिक्रियावत्त्वेन सह विरोधाभावात्, भावेऽपि वा ज्ञानयोगेऽपि समत्वात्। भ्रान्तिलेशमुपजीव्यैव ज्ञानयोगेऽपि प्रवृत्तिरिष्यत इति चेत्; तथाऽन्यत्रापि किं नेष्यते? ननु भवत्येवमधिकारे युक्तिसाम्यम्, तथाऽपि शास्त्रेण पर्युदस्तत्वान्नसांख्यः कर्मयोगेऽधिकरोतीति चेत्; स्ववर्णाश्रमोचितेषु कर्मसु शास्त्रेण पर्युदासाभावात्; प्रत्युत तत्संग्रहणस्योक्तत्वात्। अत एव प्रव्रजितस्यापि यज्ञादिनिरपेक्षेषु प्राणायामादिकर्मयोगेष्वधिकारः संभवति, आदिश्यते च। अन्यथा *कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहमित्युक्तलोकसंग्रहार्थकर्मण्यपि प्रवृत्तिर्निषिद्धानुष्ठानं स्यात्। अतो न कथंचिज्ज्ञानयोगे शक्तस्य कर्मयोगे सामर्थ्यासंभवः।

न च तृतीयः, परित्यक्तस्वर्गादिफलस्यापि पापक्षयादिफलसद्भावात्, नित्यकाम्यज्योतिष्टोमादिवदेकस्यैव विनियोगपृथक्त्वेन फलभेदोपपत्तेः। अन्यथा मुमुक्षुविषयकर्मयोगस्यैव अननुष्ठानप्रसङ्गात्। नापि चतुर्थः, कल्मषनिवृत्तेः सर्वदाऽपेक्षितत्वात्। कर्मयोगफलभूतस्थिरप्रज्ञतासिद्धौ कर्मयोगादभ्युत्थानं त्वयापीष्यत इति चेत्; सत्यम्, तथाऽपि तत्रानधिकारं न ब्रूमः। अत एव हि ज्ञानयोगयोग्यस्यापि अनुविधेयानुष्ठानस्य शिष्टतया व्यपदेश्यस्य सुकरनिष्प्रमादोपायशक्तस्य च कर्मनिष्ठैव श्रेयस्त्वेनानुशिष्यते। न च कर्मयोगाभ्युत्थितस्यापि ज्ञानयोगिनः स्ववर्णाश्रमकर्मनिवृत्तिं ब्रूमः। वर्णाश्रमधर्मा हि सर्वासु निष्ठासु इतिकर्तव्यतात्वेनावतिष्ठन्ते, न तु स्वयमेव कर्मयोगादिरूपाः। अत एव हि भक्तियोगावस्थस्यापि तदनुवृत्तिः। न च पूर्वकृतैः कर्मभिर्मृदितकषायस्य किमिदानीन्तनैरिति वाच्यम्; अमुक्तस्यात्यन्तमृदितकषायत्वाभावात्। आत्मदर्शनसिद्धौ किं तदर्थेनेति चेन्न; अनिश्चितासद्भावपूर्वोत्तरज्ञानावरणहेतुविनिवारणाय तदुपादानोपपत्तेः। न ह्यसंभवदावरणं सांख्यस्य ज्ञानम्; तथा सति तमःप्रयुक्तसुष्वापाद्यसंभवप्रसङ्गात्। न च नास्ति सुष्वापः; *युक्तस्वप्नावबोधस्येति वचनात्। अत आत्मज्ञाने सिद्धेऽपि उत्तरोपचयसिद्ध्यर्थमपचयपरिहारार्थं वा ज्ञाननिष्ठैरपि स्ववर्णाश्रमोचितं कर्मोपसंहर्तव्यम्। न च पञ्चमः, इतिकर्तव्यताभूतनित्यनैमित्तिकांशेषु तावदकरणनिमित्तप्रत्यवायपरिहारादेः करणमन्तरेणान्यतोऽसंभवात्। पवित्रतमं ज्ञानमेव तमपि प्रत्यवायं निरुन्ध्यादिति चेत्; इदमपि *नाविरतो दुश्चरितादित्यादिभिः प्रागेव दूषितम्। *यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते इत्यादिभिः ज्ञानयोगशक्तस्यापि तदेकफलत्वेन विकल्पिते कर्मयोगेऽपि सुकरोपायसङ्गादिवशादधिकारोपपत्तेश्च। षष्ठे तु चार्वाकादिसम्मतविस्रंभान् शिष्यानेकान्ते शिक्षयत। तदेतदपि वर्णाश्रमधर्माणां यावज्जीवानुष्ठेयत्वप्रतिपादकेन भाष्येण व्यञ्जितम्।

आशरीरं प्रवृत्तत्वात्स्वभावप्राप्तकर्मणाम्। किमर्थं क्रियते द्वेषः शास्त्रप्राप्तेषु कर्मसु ॥ इति।

॥ इति शतदूषण्याम् अधिकारिविवेकवादः त्रिषष्टितमः ॥ ६३ ॥

———

॥ अथ यतिलिङ्गभेदभङ्गवादः चतुःषष्टितमः ॥ ६४ ॥

श्रितान् परमहंसतां परमहं स इत्युक्तितः त्रयीपथमसौगतान् कपटसौगतान् खण्डयन् ।
मुनिर्जयति लक्ष्मणो मुदमुदञ्चयन्नञ्चतां मुकुन्दगुणमौक्तिकप्रकरशुक्तिभिः सूक्तिभिः ॥

ये पुनः शङ्करादयोऽर्वाचीनपरमहंसाः, ते बाह्यवेषपरिग्रहमधिकृत्य पृच्छ्यन्ते—किमिति परमहंसैः ब्रह्मसूत्रमुत्सृज्यते ? किं तेषु तत्प्रापकाभावात् ? उत सामान्यतः प्राप्तस्यापि विशेषतो बाधात् ? यद्वा वैकल्पिकतया परित्यागेऽपि प्रत्यवायविरहात् ? उताङ्गिनिवृत्तेरेवार्थात्तदङ्गस्यापि निवृत्तेः ? अथवा पूर्वानुष्ठानमात्रात् ? इति ।

न प्रथमः ; श्रुतिस्मृतिभिः सामान्यतो विशेषतश्च तत्प्राप्तेः । द्विजसामान्यतः प्राप्तिस्तावत्सहजा निर्विवादैव । परिव्राजकसामान्यतः प्राप्तिस्तावदभिधीयते । यथाह वसिष्ठः—* यज्ञोपवीत्युदककमण्डलुहस्तः इति । अङ्गिराः—* यतीनां त्रीणि शुक्लानि भवन्त्येतानि नित्यशः । यज्ञोपवीतं दन्ताश्च तथा जन्तुनिवारणम् ॥ इति । शौनकः—* अथ युवा सुवासा इति काषायवासः, सखा मे गोपयेति त्रिदण्डं गृह्णाति, तच्छंयोरावृणीमह इति यज्ञोपवीतम् । इति । दत्तात्रेयः—* मोक्षाश्रमे स्मृतं वस्त्रं रक्तं यद्धातुरञ्जितम् । कार्यं यज्ञोपवीतं तु सितं नवगुणान्वितम् ॥ इति । सामान्यतः यज्ञोपवीतत्यागं निषेधन्ति । यथाह मेधातिथिः—* गृहीतं यत् त्रिदण्डादेरविनष्टं तु न त्यजेत् । समुद्रं गच्छ स्वाहेति विनष्टं प्रक्षिपेज्जले ॥ प्रक्षिप्य चान्यदादद्याद्गायत्र्या प्रणवेन वा । तच्छंयोरित्युपवीतमब्लिङ्गाभिः कमण्डलुम् ॥ इति । अङ्गिराश्च—* यतेर्लिङ्गं प्रवक्ष्यामि येनासौ लक्ष्यते यतिः । ब्रह्मसूत्रं त्रिदण्डं च वस्त्रं जन्तुनिवारणम् ॥ शिक्यं पात्रं ब्रुसी चैव कौपीनं कटिवेष्टनम् । यस्यैतद्विद्यते लिङ्गं स यतिर्नेतरो यतिः ॥ इति । उपवीतपरित्यागे प्रत्यवायं स्मरन्ति च । यथाह अत्रिः—* ब्रह्मसूत्रं त्रिदैवत्यं ब्रह्मविष्णुशिवात्मकम् । परित्यजन्ति विप्रा ये मोहात्तर्कोपजीविनः ॥ स्वर्गापवर्गमार्गाभ्यां प्रच्युतास्ते न संशयः । इति । यद्यप्यत्र विप्रशब्दः सामान्यवचनः, तथाऽपि पारिव्रज्यमेवाधिकृत्य प्रवृत्तत्वात् विशेषार्थ एव । सामान्यतो निर्देशस्तु सर्वेषां प्रत्यवायसाम्यात् । तथा हि उशनास्तत्परित्यागे सर्वेषामाश्रमिणां पतनमेवाह—* ब्रह्मसूत्रपरित्यागाद्ब्रह्मचारी गृही वनी । परिव्राट् चापि पतति तस्मात्तन्न परित्यजेत् ॥ इति । तत्परित्यागे बहूनि प्रायश्चित्तानि सस्मरुः । यथा अत्रिरेव—* त्यक्त्वा यज्ञोपवीतं तु षट् कृच्छ्राणि समाचरेत् ॥ इति । वृद्धजाबालिश्च—* हीनो यज्ञोपवीतेन यदि स्याद्ध्यानभिक्षुकः । तस्य क्रिया निष्फलाः स्युः प्रायश्चित्तं विधीयते ॥ गायत्रीसहितानेव प्राजापत्यान् षडाचरेत् । पुनस्संस्कारमाहृत्य धार्यं यज्ञोपवीतकम् ॥ इति । हारीतः—* विना यज्ञोपवीतेन यत्कृतं भोजनादिकम् । तत्पापप्रशमायालं प्रायश्चित्तं ब्रवीमि वः ॥ तेषां तु भोजनादीनां प्रत्यहं सुसमाधिभिः । सहस्राद्यैरसुयमैर्विधिपूर्वकृतैश्शुचिः ॥ इति । असमीक्षितदशापरित्यक्तब्रह्मसूत्रैश्च यादवप्रकाशैः समीक्ष्य संजातानुशयैः सप्रमाणमनुयुक्ताः वासुदेवयात्रोत्सवसमागताः नानादिगन्तवास्तव्याः शिष्टाश्च प्रायश्चित्तमेवोत्तरं ददुः । भ्रष्टस्तर्ह्यसाविति चेन्न ; प्रायश्चित्तात्पूर्वमेव तथात्वस्य प्राचीनैर्निश्चितत्वात् । तत्समुच्चितस्यैव यतिधर्मस्याद्यापि मानवादिवत् अविगीतशिष्टपरिग्रहात् ।

एवं परिव्राजकानां सामान्यतः प्राप्तं ब्रह्मसूत्रम् । परमहंसेष्वेव विशेषतोऽपि प्राप्तिर्दृश्यते । तथा हि शाट्यायनकोपनिषदि समाम्नायते—* अथ ह यद्ब्रह्म परमं सनातनं ये श्रोत्रिया अकामहता अधीयुः । शान्तो दान्त

उपरतस्तितिक्षुर्योऽनूचानो ह्यभिजिज्ञास्यमानः । त्यक्तैषणो ह्यनृणस्तद्विदित्वा मौनी वसन्नाश्रमे यत्र तत्र । अथाश्रमं चरमं संप्रविश्य स च द्वितीयममृतं संप्रयाति । अखिलं विश्वं ब्रह्मभावनया निचाय्य चरेत्पृथिव्यां विष्णुलिङ्गी निगूढः । परमहंसमाश्रमं संप्रविश्य यथोपपत्ति पञ्चमात्रां दधानः । तदत्र श्लोकौ भवतः—त्रिदण्डमुपवीतं च वासः कौपीनवेष्टनम् । शिक्यं कवचमित्येतद्बिभृयाद्यावदायुषम् । त्रिदण्डं वैष्णवं लिङ्गं विप्राणां मुक्तिसाधनम् । निर्वाणं सर्वधर्माणामिति वेदानुशासनम् ॥ इति । अथ खलु सौम्य कुटीचको बहूदको हंसः परमहंस इत्येते चतुर्विधाः परिव्राजका भवन्ति । सर्वे विष्णुलिङ्गिनः सदा स्वात्मानमात्मना ब्रह्मभावं भावयन्तः सुशीलिनः पुण्यश्लोका भवन्ति । इति । इमामेवोपनिषदमुपबृंहयन् भगवान् पराशरः स्मरति—* तत्र परिव्राजकाश्चतुर्विधा भवन्ति, कुटीचको बहूदको हंसः प्ररमहंसश्चेति । तत्र कुटीचका नाम—पुत्रादिभिः कुटीं कारयित्वा कामक्रोधलोभमदमात्सर्यादीन् परित्यज्य विधिवत्सन्न्यासं कृत्वा त्रिदण्डजलपवित्रकाषायवस्त्रोपवीतधारिणः स्नानशौचाचमनजपस्वाध्यायब्रह्मचर्यज्ञानतत्पराः पुत्रादेरेव भिक्षाकालेऽन्नं देहयात्रामात्रमुपयुञ्जानाः तस्यां कुटौ नित्यं वसन्त आत्मानं मोक्षयन्ते । बहूदका नाम—त्रिदण्डकमण्डलुजलपवित्रशिक्ययज्ञोपवीतिनो वेदान्तार्थावबोधकाः साधुवृत्तेषु ब्राह्मणकुलेषु भैक्षचर्यां चरन्त आत्मानं मोक्षयन्ते । हंसा नाम—त्रिदण्डजलपवित्रशिक्ययज्ञोपवीतरक्तकाषायवाससो गोमूत्रगोमयाहारा एकरात्रं त्रिरात्रं षड्रात्रं मासोपवासपक्षोपवासकृच्छ्रातिकृच्छ्रचान्द्रायणसान्तपनपराकतुलापुरुषादीनि व्रतानि चरन्तो गोद्विजाढ्येषु पुण्येषु देशेषु वसन्त आत्मानं मोक्षयन्ते । परमहंसा नाम—त्रिदण्डजलपवित्रशिक्ययज्ञोपवीतिनोऽन्तर्वासबहिर्वासधारिणो ग्रामैकरात्रवासिनो नगरतीर्थजनपदेषु पञ्चरात्रं षड्रात्रं क्षारलवणवर्जं भिक्षाकाले शीर्णपर्णपुटं कृत्वा ब्राह्मणकुलादेव भैक्षं गृहीत्वा अष्टौ ग्रासानेव भुञ्जानाः सन्ध्योपासनतत्परा नित्यं वृक्षमूले वसन्त आत्मानं मोक्षयन्ते इति । एवं शाट्यायनकश्रुत्या पराशरस्मृत्या च सुप्रसिद्धमर्थमत्रिप्रभृतयोऽपि वृत्तिभेदभिदुराणां चतुर्णां परिव्राजकानां लिङ्गभेदनिषेधद्वारा सामान्यतो दर्शयन्ति । यथा—* चतुर्विधा भिक्षवस्तु स्मृतास्सामान्यलिङ्गिनः ॥ तेषां पृथक्पृथङ्नाम वृत्तिभेदात् कृतं श्रुतौ । कुटीचको बहूदश्च हंसश्चैव तृतीयकः ॥ चतुर्थः परमो हंसो यो यः पश्चात्स उत्तमः । लिङ्गं तु वैष्णवं तेषां त्रिदण्डं सपवित्रकम् ॥ इति । वृत्तिभेदश्च पराशरस्मृत्या प्रागेव दर्शितः । एवं परमहंसानां विशेषत एव प्राप्तेः, तत्परित्यागनिषेधाच्च द्वितीयः पक्षो निरस्तः ।

यद्यपि सामान्यमात्रं विशेषबलात्सङ्कोचमाप्नोति, तथाऽपि न विशेषाद्विशेषः पराभवमर्हति ; अविशेषाद्विपरिवर्तप्रसङ्गाच्च । दृष्टश्चास्मदुक्तो विशेषः । त्वदभिमतस्त्वद्यापि न दृश्यते । ननु * नखानि निकृत्य यज्ञोपवीतं विसृजेदिति दृश्यत इति चेन्न ; * नखानि निकृत्य पुराणवस्त्रयज्ञोपवीतकमण्डलून् त्यक्त्वा नवान् प्रगृह्याश्रमं प्रविशेदिति श्रुत्यैव त्यागग्रहणयोः पुराणनूतनविषयत्वस्य न्यायनिरपेक्षमेव व्यवस्थापनेन विरोधप्रशमनात्सामान्ययज्ञोपवीतस्य पुराणत्वविशेषिते पर्यवसातुमुचितत्वात् , सामान्यनिषेधस्य नूतनविशेषविधिना स्पर्धितुमशक्तेः ; * न हिंस्यादित्यादिवत् । नच विसृजेदित्यस्य न गृह्णीयादित्यर्थः, येन नूतनग्रहणपरतया विषयव्यवस्था दुःस्थिता स्यात् । नच तद्युक्तम् , उपचारप्रसङ्गात् । यद्यपि गृहीतागृहीतविषयं विसर्जनं कथंचित्पश्यसि, तथाऽपि पूर्वधृतविषयत्वमेव स्वारसिकम् । * नवान्प्रगृह्येत्यस्यानादरे च दण्डादेरसंग्रहसिद्धिः । अन्यथा पूर्वोदाहृतविशेषश्रुतिविरोधश्च । अत एव * बहिस्सूत्रं त्यजेद्बुधः इत्येतदपि पुराणब्रह्मसूत्रत्यागविषयं मन्तव्यम् । ननु * ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वेति ब्रह्मचारिणोऽपि

पारिव्राज्यं विधीयते, न च तस्य द्वितीयं ब्रह्मसूत्रमस्ति, ततश्च कथं तद्विषये *बहिस्सूत्रं त्यजेदिति वचनं योजनीयमिति चेत्; कथं वा छन्दोगब्रह्मचारिणां परिव्रज्यायां *सशिखं वपनं कृत्वेति शिखावपनं योजयिष्यसि? संभवद्विषयं शिखावपनमिति चेत्; तर्हि संभवद्विषयोऽयं बहिस्सूत्रत्यागविधिरपीति किं न पश्यसि?

किंच, प्रमाणान्तरविरोधपरिहारार्थं बहिस्सूत्रमित्यर्थान्तरं वर्णयन्ति। बहिः सूत्रमित्यव्ययीभावः। तेन सूत्राद्बहिर्भूतं समस्तमपि परित्यजेदित्यर्थः। सन्न्यस्यतो ब्रह्मसूत्रातिरिक्तं सर्वमपि परित्याज्यमित्यनेन सन्न्यासानुगुणं समस्तनैरपेक्ष्यमुच्यते; तेन न ब्रह्मसूत्रपरित्यागसिद्धिः। *सशिखं वपनं कृत्वेत्यपि *सविष्टरमन्नं भुञ्जीतेत्यादिवत्कर्तव्यसाहित्येनान्वयः। तेन शिखासहित एव शेषवपनं कुर्यादित्यर्थः। न पुनः *सघृतमन्नं भुञ्जीतेत्यादिवत्, बहुप्रमाणविरोधात्। ननु *यदक्षरं परं ब्रह्म तत्सूत्रमिति कल्पयेत्। यमिनो ज्ञानशिखिनः शिखायज्ञोपवीतिनः॥ इत्यादि वचनबलात् सामान्यतः पुराणनूतनसमस्तप्रतिषेध एवाभिप्रेत इति गम्यत इति चेत्; मैवम्, अन्यपरत्वादस्य वाक्यस्य। तथा हि—इदं वाक्यं विद्वद्विषयं वा, विविदिषुविषयं वा, परमहंसविषयं वा? पूर्वत्र विद्यास्तुत्यर्थता युक्ता। तथा च *कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः, *न कर्म लिप्यते नरे इति वाक्यमधिकृत्य सूत्रितं भगवता बादरायणेन *स्तुतयेऽनुमतिर्वेति। तेन ब्रह्मविदां शिरसि हृदि च यावदायुषं धार्यं शिखायज्ञोपवीतं ज्ञानान्वितमत्यन्तं प्रशस्तमित्यर्थः। द्वितीये तु अवधानविधिपरतैव *यदक्षरमित्यादिना व्यक्ता, दृष्टोपकारे संभवत्यदृष्टोपकारकल्पनायोगाच्च। अनयोश्च पक्षयोरस्यार्थस्य नाश्रमविशेषाङ्गत्वसिद्धिरपि। तृतीयस्तु स्यादपि, यद्याश्रमकर्मोक्तिः स्यात्, नच तत्र तत्पश्यामः। सत्यप्याश्रमप्रसङ्गे गृहस्थावस्थागतद्वितीयसूत्रत्यागमुपदिश्य विहितत्यागजातानुशयं प्रति अर्थवाद इति युक्तम्, अर्थवादलिङ्गभूयस्त्वात्। न ह्यत्र विधिरनुश्रूयते, अन्यथा पूर्वोक्तश्रुत्यादिविरोधस्य दुष्परिहरत्वादिति। भवतु वैतद्वाक्यमनन्यपरम्, तथाऽपि प्रागुक्तश्रुत्यादिबलाद्विकल्प एव स्यात्, न त्वेकान्ततो निषेधः, अन्यथा कुटीचकादीनामपि एकान्ततस्तन्निषेधप्रसङ्गात्। न चैतद्वचनं परमहंसमेवाधिकृत्य प्रवृत्तम्, नियामकाभावात्।

ननु यदि परमहंसमेवाधिकृत्य काचिच्छ्रुतिः स्मृतिर्वा ब्रह्मसूत्रपरित्यागमेवान्ततो विदधीत तदा पूर्वोक्तश्रुतिस्मृत्यादिकं सर्वं यथाकथंचित् कुटीचकादित्रयान्तर्भूतव्यक्तिविशेषविषयं योजनीयमिति चेत्; अहो महर्षित्वं देवानां प्रियस्य! यतस्त्वम्, आप्ततमबहुतरस्मृत्येककण्ठप्रत्यक्षश्रुतिविरुद्धार्थां क्वचित् कैश्चिदप्यनधीयमानां त्वत्पक्षपातिना विकल्पवादिना विज्ञानेश्वरेणानाघ्रातां तत्पक्षं विस्तरेण प्रतिक्षिपद्भिः भास्कराचार्ययादवप्रकाशमस्करिप्रभृतिभिरुद्धृत्यापरिहृतामन्यादृशीं श्रुतिं द्रष्टुमिच्छसि। यदि च साऽपि स्यात्, कथं सर्वस्मर्तॄणां ब्रह्मसूत्रधारणविधानैककण्ठ्यम्? यच्च त्यागार्थं व्यासादिवचनमिति कैश्चित्पठ्यते, तदपि तत्तत्कोशेषु न पश्यामः, न चोदाहरन्ति पूर्वे निरूपकाः। नच प्रत्यक्षश्रुतिविरोधे वैदिकपरिगृहीतबहुस्मृतिविरोधे चाप्रसिद्धस्मृतिमात्रस्य जीवितमस्ति। लब्धजीवितत्वेऽपि आन्यपर्यमलेपकमतभङ्गे प्रपञ्चयिष्यते। अतः तद्वचनकारिषु व्यासादिसमाख्यां सङ्केतेन प्रक्षिप्य धर्मसूनुरिव सत्यवादी भव। एतेन पञ्चरात्रादिमूलः परमहंसस्य ब्रह्मसूत्रपरित्याग इति निरस्तम्, प्रमाणभूतेषु तेषु तथाविधवचनादेरसंभवात्। संभवे चान्यपरत्वस्य गृहीतुं युक्तत्वात्। परब्रह्मभूतभगवत्प्रीणनतत्तदर्थविशेषप्रपञ्चने हि पञ्चरात्रस्यैदम्पर्यम्, न सदाचारेषु। तत्र तु औदासीन्यमेव तस्येति न श्रुत्यादिविरोधे तत्र प्रगल्भतेति मध्यस्थदृष्ट्या पश्यामः। न च पञ्चरात्रमूलत्वेन भागवत-

परिगृहीते नैरुक्तेऽपि वेदभागे परिव्राजकप्रकरणे भवदभिमतं यज्ञोपवीतादिप्रहाणं दृश्यते । नच शाण्डिल्यः सूत्रयति । न च सात्वतादिषु सुरक्षितकोशासु संहितासु तथाविधवचनप्रसङ्गः । अतो युष्मत्कूटस्थपक्षपातिनां प्रक्षेपस्तथा स्याद्वा न वेति समीचीनदृष्ट्या भावय । अतः परमहंसेष्वपि द्विजसामान्यतः परिव्राजकसामान्यतस्तदवान्तरविशेषतश्च प्राप्तं ब्रह्मसूत्रं न विशेषतो बाधमर्हतीति सिद्धम् ।

नापि तृतीयः; विषयव्यवस्थापनयोग्यानां वाक्यानां विरोधाभावादेवाष्टदोषदुष्टविकल्पपर्यवसानायोगात् । अन्यपरतया निश्चितानां तु दुर्बलत्वादेव । विरोधे बलसाम्ये च सति हि गत्यन्तराभावाद्विकल्पः स्वीक्रियते । न च गुरुलघुनोर्विकल्पस्संभवति, गुरुविधायकस्य शास्त्रस्याननुष्ठानलक्षणाप्रामाण्यप्रसङ्गात् । न हि लघौ सति गुरौ कश्चिदपि प्रवर्तते । मुख्यामुख्यतया तु विभागः संभवेदपि, यद्यनन्यथासिद्धो लघुविधिस्सिध्येत् । न च तदस्तीत्युक्तम् । न चामुख्यं भवद्विशेषमङ्गीकरोषि । न च मुख्यकल्पशक्तानाममुख्यकल्पस्वीकारो युक्तः । न च तेषां प्रत्यगात्मप्रावण्येन बाह्येष्वौदासीन्यादमुख्यकल्पपरिग्रह इति युक्तम्, शक्तस्यौदासीन्ये प्रत्यवायात् । नच वः कांचिदशक्तिं भास्करीयादयः सूक्ष्मनिरूपणेऽपि पश्यन्ति । यथाऽऽहुः—* कन्थां वहसि दुर्बुद्धे गर्दभेनापि दुर्भराम् । शिखायज्ञोपवीताभ्यां कस्ते भारः प्रसज्यते ॥ सन्ध्यावन्दनवेलायां मुक्तोऽहमिति मन्यसे । खण्डलड्डुकवेलायां दण्डमादाय धावसि ॥ इति । यत्तु न्यायविदाऽपि विज्ञानेश्वरेणाऽप्युक्तम्—* यज्ञोपवीतधारणं वैकल्पिकम्, * यज्ञोपवीतं विसृजेदिति श्रुतेरिति ; तदपि विकल्पासंभवस्योक्तत्वात् स्वपक्षसंरक्षणाभिनिवेशकारितमित्यनादरणीयम् ।

नापि चतुर्थः, ब्रह्मविदामप्यत्यन्तकर्मनिवृत्तेर्दूषितत्वात्; युष्माभिरपि प्रणवजपाचमनादिकर्मणामद्यापि क्रियमाणत्वात् । * तस्माद्यज्ञोपवीत्येवाधीयीतेत्यादेर्दुर्लङ्घत्वात्, अर्थप्राप्तभोजनादिकर्मणां च अयज्ञोपवीतिनाऽनुष्ठाने प्रायश्चित्तविधानात् । नापि पञ्चमः; श्रुत्यादिविरुद्धस्याचारमात्रस्यानुपादेयत्वात् । पञ्चशिखदुर्वासःप्रभृतिपरिगृहीतपरिव्राजकस्तोमेषु ब्रह्मसूत्रपरित्यागस्य पुराणेष्वदर्शनात् । परिव्राजकानुकारिधनञ्जयादिषु ब्रह्मसूत्रपरित्यागाश्रवणात् । भवदीययूथ्यभास्कराचार्ययादवप्रकाशभगवन्नाथमुनिपारम्पर्यविघटितत्वाद्भवत्पक्षप्रवेशितविसंवादैक्याच्चानुविधेयाचारत्वासंभवादिति । अतस्सिद्धं परमहंसैरपि यज्ञोपवीतमवश्यं धार्यमिति ।

एवमुपवीतोक्तन्यायेन परिव्राजकसामान्यतः प्राप्तेः, तथा परमहंसमेवाधिकृत्य त्रिदण्डविधानात्, चतुर्णामपि लिङ्गभेदनिषेधाच्च तस्यैकदण्डधारणे नियमोऽपि निरस्तः । अथ स्यात्—* न चात ऊर्ध्वं शुक्लमंबरं बिभृयात् एकदण्डी त्रिदण्डी वेति बोधायनादिवचनात् त्रिदण्डैकदण्डधारणयोर्विकल्प इति ; भवत्वेवम्, तथाऽपि परमहंसस्य एकदण्डधारणमेव, इतरेषां त्रिदण्डधारणमेवेति नास्ति नियमः, अविशेषेण तेषां प्रसक्तेः । भवत्वेवं का नो हानिरिति चेत्; नियमाभिमानहानिः । गुरुलघुनोस्तुल्यविकल्पानुपपत्तिं चात्र यादवप्रकाशादयः प्राहुः । अतो मुख्यामुख्यतयैवायं विकल्पस्स्यात् । तदेतद्भगवान् व्यासः स्पष्टयति * त्रिदण्डधारणं शस्तमिति । बोधायनादिसामान्यवचनविकल्पितैकदण्डधारणस्य त्रिदण्डालाभरूपापद्विषयता हारीतमेधातिथिभ्यां व्यवस्थापिता । * त्रिदण्डं वैणवं सौम्यं सत्वचं समपर्वकम् । वेष्टितं कृष्णगोवालरज्ज्वा तु चतुरङ्गुलम् ॥ नष्टे जलपवित्रे च त्रिदण्डे वा प्रमादतः । एकं तु वैणवं दण्डं पालाशं बैल्वमेव वा ॥ गृहीत्वा विचरेत्तावद्यावल्लभ्यं त्रिदण्डकम् । यत्नेनान्वेषयेन्नित्यमप्रमत्तः समाहितः ॥ इति हारीतः ।

मेधातिथिस्तु—* यावन्न स्युस्त्रयो दण्डास्तावदेकेन पर्यटेत् इति । न चैतत्प्रक्रान्तत्रिदण्डधारणपुरुषविशेषविषयमिति नियन्तुं शक्यम्, एकदण्डी त्रिदण्डी वेत्यस्याद्यापि तुल्यत्वनिश्चयाभावात् । यद्यपि च प्रथममेव कस्यचित्त्रिदण्डालाभादेकदण्डग्रहणं संभवति, तथाऽपि न तत्र प्रक्रमपरिनियतिरङ्गीकर्तुं शक्या, अमुख्यत्वात् । * यावन्न स्युस्त्रयो दण्डास्तावदेकेन पर्यटेत् इत्यस्य चाविशेषेण प्रक्रमेऽपि प्रवृत्तेः ।

किंच, प्रत्यक्षश्रुतिसिद्धं त्रिदण्डधारणम्, स्मार्तस्तु विकल्पः, पूर्वं तु श्रुतिस्मृत्युभयसिद्धम्, उत्तरत्र तु स्मृतिरेव । * यद्वै किंच मनुरवदत्तद्भेषजम्, * मन्वर्थविपरीता तु या स्मृतिस्सा न शस्यते इत्यादिश्रुतिस्मृतिभिराप्ततमत्वेन परिगृहीतमन्वादिस्मृतिसिद्धं त्रिदण्डधारणम्, विकल्पस्तु यत्किंचित्स्मृतिसिद्धः । भूयस्यः स्मृतयस्त्रिदण्डधारणे पूर्वोपात्ता उपाधास्यमानाश्च; विकल्पे तु द्वे तिस्रः सन्ति न वेति न जानीमः । तथा हि दक्षबृहस्पती—* मेखलाजिनदण्डेन ब्रह्मचारीति लक्ष्यते । गृहस्थो यष्टिवेदाद्यैर्नखरोमैर्वनाश्रितः ॥ त्रिदण्डेन यतिश्चेति लक्षणानि पृथक् पृथक् ॥ इति । शाण्डिल्यः—* दण्डाणि त्रीणि संगृह्य धारयेद्विधिपूर्वकम् । अत्रिः—* लिङ्गं तु वैष्णवं तेषां त्रिदण्डं सपवित्रकम् । त्रिदण्डेन यतिश्चेति लक्षणं वै श्रुतं स्मृतौ ॥ दत्तात्रेयः—* त्रिदण्डिरूपधृग्विप्रः साक्षान्नारायणः स्मृतः । त्रिदण्डी पूज्यते येन विष्णुस्तेन प्रपूजितः ॥ अष्टाक्षरेण मन्त्रेण नित्यं नारायणात्मना । नमस्यो भक्तिभावेन विष्णुरूपी त्रिदण्डधृक् ॥ त्रिदण्डं लिङ्गमाश्रित्य जीवन्ति बहवो द्विजाः । यो हि ब्रह्म न जानाति त्रिदण्डार्हो न स स्मृतः ॥ अत्रिदत्तात्रेयौ—* काणादशाक्यपाषण्डैस्त्रयीधर्मो विलोपितः । त्रिदण्डधारिणा पूर्वं विष्णुना रक्षिता त्रयी ॥ हारीतः—* विष्णुरूपं त्रिदण्डाख्यं सर्वदा धारयेद्यतिः । कुर्यात्त्रिदण्डग्रहणं कालक्षेपं न कारयेत् ॥ वृद्धदक्षः—* केशमात्रान् समग्रन्थीन् त्रिदण्डान् वैणवान् यतिः । धारयेदिति शेषः । इत्थं परश्शतास्स्मृतयः विस्तरभयान्न लिख्यन्ते । अतो गुरुलघुविकल्पानुपपत्तेः शस्ताशस्तत्वकण्ठोक्तेः त्रिदण्डालाभदशाविषयत्वप्रतिष्ठापनात्, त्रिदण्डधारणस्य प्रत्यक्षश्रुतिसिद्धत्वात्, आततमबहुस्मृत्युपबृंहितत्वात्, त्रिदण्डधारणमेव चतुर्णां परिव्राजकानामविशेषेण मुख्यम्; एकदण्डधारणं त्वमुख्यम्; तच्च आपद्दशायां चतुर्णामपि संभवति, इति सिद्धम् ।

अनेनैव न्यायेन परमहंसस्य शिखावर्जनमप्यनुपपन्नम्; चतुर्णामपि लिङ्गभेदनिषेधस्य दर्शितत्वात्, विशेषविधायकासिद्धेः । * मुण्डः शिखी वेत्यादिविकल्पस्यापि त्रिदण्डैकदण्डधारणविकल्पवन्मुख्यामुख्यतयैव निर्वाह्यत्वात् । संभवति हि केषांचिच्छिरसि व्याध्यादिवशात्केशानुत्पत्तिः । शौनकलिखितगालवात्रिप्रभृतिभिः शिखाधारणस्यैव स्मरणाच्च । गालवेन तु * त्रिस्थानलोमवपनं कृत्वा प्राजापत्यं कृत्वा प्राणायामशतं चरेत् इति शिखावपने प्रायश्चित्तविधानात् विकल्पवाक्यस्य मुण्डनवाक्यस्य च यथाकथंचिद्योजनीयतया समुच्चयार्थतां शिखाव्यतिरिक्तमुण्डनविषयतां शिखासम्बन्धमात्रविषयतां च यतिलिङ्गसमर्थने परमाचार्याः प्राहुः । शिखावपनमन्तरेण वपनेऽपि मुण्डशब्दस्तत्रैव दर्शितः । यथाह लिखितः—* पौर्णमास्यां शिखावर्जं मुण्डयेत शिरो यतिः । अलाभे व्याधिपीडायां राजचोराद्युपद्रवे ॥ वापयेत्पौर्णमास्यादि यावत्स्यात् कृष्णपञ्चमी । इति । मेधातिथिः—*कक्षोपस्थशिखावर्जं मुण्डयेत शिरो यतिः । इति । एवमन्यैरपि * कक्षोपस्थशिखावर्जमृतुसन्धिषु वापयेत् । न त्रैमुण्ड्यमतिक्रामेद्द्विसुस्संवत्सरे क्वचित् ॥ इत्यादिषु शिखाव्यतिरिक्तांशवपनेऽपि मुण्डशब्दस्य प्रयोगान्मुण्डनवपनशब्दयोः पर्यायवदविशेषतोपपादनाच्च सामान्यो मुण्डशब्दश्शिखाव्यतिरिक्तविषय इति स्वारसिकम्, विकल्पाङ्गीकारे त्वमुख्यत्वं दर्शितमस्माभिः । वाशब्दश्चार्थ इति

परमाचार्या व्याचख्युः । अतः परमहंसैरप्येकमुपवीतमवश्यं धार्यम्, त्रिदण्डशिखे च मुख्यतया परिग्राह्ये इति सिद्धम् । तदेतत् * वर्णाश्रमोचितेत्युचितशब्देन भाष्यकारैरपि सूचितमिति ॥

॥ इति शतदूषण्यां यतिलिङ्गभेदभङ्गवादः चतुःषष्टितमः ॥ ६४ ॥

॥ अथ अलेपकमतभङ्गवादः पञ्चषष्टितमः ॥ ६५ ॥

अशेषाश्रमबाह्यानामीश्वराज्ञाभरश्रमात् । अलेपकदशाभाजामवलेपोऽत्र लुप्यते ॥

इह जगति केचिदवधूतसकलवर्णाश्रमधर्माश्चार्वाकसधर्माण आचण्डालमेकराशीभूय विधिनिषेधयन्त्रणामतन्त्रयन्तः पारिभाषिकब्रह्मविदो विश्वमाविलयन्ति, तैस्सह [वास] वादरूपसंभाषणादिकमपि निरयपातनमिति मन्वानास्तद्दर्शनेऽपि सर्वलोकलोचनमवलोकयन्तो दूरीभवन्ति सन्तः । उक्तं हि महर्षिभिः—* पुंसां जटाभरणमौण्ड्यवतां वृथैव मोघाशिनामखिलशौचबहिष्कृतानाम् [निराकृतानाम्] । तोयप्रदानपितृपिण्डविवर्जितानां संभाषणादपि नरा नरकं प्रयान्ति ॥ इति । तत्र यद्यपि तदभिमतशूद्रादि [चि] जातीयब्रह्मविदां त्रैवर्णिकब्रह्मविदामिव तथाविधपतनं न संभवति, तथाऽपि तत्त्वमस्यादिवाक्यश्रवणोपदेशधर्मोपप्लवादिभिः तेषामप्यसंभाष्यता । स्मर्यते हि— * कपिलाक्षीरपानेन ब्राह्मणीगमनेन च । शूद्रे वेदाक्षरेणैव निष्कृतिर्न विधीयते ॥ इत्यादि । तथाऽपि धर्मोपप्लवप्रशमनाशया युगमात्रविप्रकृष्टा वदामः । आचार्यवचनादिभिरीदृशमप्यनुमतम्—* यत्किञ्चिदपि कुर्वाणो विद्वद्गुरुनियोगतः । तेषां वचनसामर्थ्यात् प्रायश्चित्तीयते नच ॥ इति ।

सर्वशिष्टबहिष्कृतेयं युष्मदवस्थितिराश्रमरूपा, अनाश्रमरूपा वा? पूर्वत्र चतुर्भ्योऽन्या अनन्या वा? न तावदन्या, श्रुतिस्मृतीतिहासपुराणादिषु पञ्चमाश्रमविधानादर्शनात् । * अथाश्रमं चरमं सम्प्रविश्येत्यादिरपि पारिव्रज्यविषयः प्रसिद्धः । अन्तिममात्रं हि चरमशब्दार्थः, न पुनः प्रसिद्धव्यतिरिक्तः । षोडशविधाश्रमप्रतिपादनं तर्हि कथमिति चेन्न; चतुर्णामेव चतुर्धा विभागेन तथा विधानात् । नाप्यनन्या, प्रथमं तावदनभ्युपगमात्, श्रुतिकिङ्करत्वप्रसङ्गाच्च । श्रुत्या ज्ञानविधानेन वयमप्याश्रमविशेषनिष्ठा भवामेति चेत्; श्रोत्रियाणां पुरतो मन्दं प्रभाषेथाः, नह्यकृतप्रायश्चितानां भवतामाश्रमप्रवेशमनुमन्यन्ते धार्मिकाः । न च युष्माभिरनेककालानुवृत्तदुर्वचस्वैरोचितप्रायश्चित्तं कर्तुं शक्यम् । स्वैररूपमेव किञ्चिदाश्रमविशेषनियतमिदमस्माकं महद्व्रतमिति चेन्न; तथाविधविध्यदर्शनात् । किञ्चास्मिन्महति सर्वलोकस्वरससिद्धे व्रते सति किमर्थमपुरुषार्थैरनन्तैर्नियमैः परिक्लेशयन्त्यागमाः । कश्चायमाश्रमो भवता वाङ्मात्रेणापि स्वीक्रियते? परमहंसाभिधानः पारिव्रज्यविशेष इति चेन्न; परमहंसादिविशेषमपि विविच्य प्रतिपादयन्तीषु शाट्यायनकाद्युपनिषत्सु पाराशर्यदत्तात्रेयादिस्मृतिषु भवत्परिगृहीतवेषाचारविपरीतोपदेशात् । अत एव मन्वादिषु त्रिविष्टपपात्रपवित्रकमण्डलुशिखायज्ञोपवीतत्रिदण्डानां सामान्येन विधानं न व्यवस्थितविषयमिति वक्तुं शक्यम् । ततश्च परित्यक्तयज्ञोपवीतादिकेष्वेकदण्डिकेष्वप्यद्याप्यायुष्मती विप्रतिपत्तिर्भास्करयादवप्रकाशादिग्रन्थरसायनसेवया निवर्तते । किं पुनर्विशेषतोऽपि वेदबाह्यसाम्यमङ्गीकुर्वत्सु भवादृशेषु? त्रिदण्डैकदण्डादिष्वपि च मुख्यामुख्यतया विकल्प इत्यपि स्मृतिभिरेव सिद्धमिति प्रागेवोक्तम् ।

ननु द्विविधाः परमहंसाः, विवृतवेषाचारा गूढवेषाचाराश्चेति ; तत्र जाबालिकौषीतकादिश्रुतिषु तन्मूलबोधायनशौनकक्रतुकापिलविश्वामित्रादिस्मृतिषु महाभारते ब्राह्मादिषु च पुराणेषु परमहंसस्य दण्डादिविधानात् विवृतवेषाचारास्सिद्धाः, वाजसनेयतैत्तिरीयकाथर्वणबाष्कलादिश्रुतिषु तन्मूलभगवद्गीतादिस्मृतीतिहासभागवतादिपुराणादिषु च सर्वत्यागमात्रविधानात् गूढवेषाचारास्सिद्धा इति चेन्न ; त्यागोक्त्यादीनां फलसङ्गकर्तृत्वादित्यागविषयत्वस्य वक्ष्यमाणत्वात् ।

ननु मैत्रायणीयब्राह्मणे तन्मूललोकाक्षिगृह्ये च परमहंसस्य दण्डग्रहणाग्रहणयोर्विकल्पो दृश्यते, तथाहि— * परिव्राडेकशाटीपरिहितो मुण्डोदरपाण्यरण्यनित्यो भिक्षार्थी ग्रामं प्रविशेदासायं प्रदक्षिणेनाविचिकित्सं सार्ववर्णिकं भैक्षाचरणमभिशस्तपतितवर्जमयज्ञोपवीती शौचनिष्ठः काममेकं वैणवं दण्डमादधीत इति मैत्रायणीयब्राह्मणम् । अत्र कामशब्दाद्दण्डग्रहणे विकल्पो दर्शितः ; लोकाक्षिगृह्ये च * अथातः परमहंसपरिव्रज्याविधिं व्याख्यास्यामः इत्युपक्रम्य, * सशिखान् केशान् निकृत्य विसृज्य यज्ञोपवीतमित्याद्युक्त्वा, पुनरप्याह—मौनी जातरूपधरः प्राचीमुदीचीं वा दिशं व्रजेत् तिष्ठ भगवन् दण्डं गृहाणेत्यध्वर्युणा दत्तं मस्तकप्रमाणं सत्वचमृजुं सौम्यमेकं वैणवं दण्डम् * इन्द्रस्य वज्रोऽसि, * सखा मे गोपायेति यदीच्छेदादधीतेति ; अत्रापि यद्युपबन्धेनेच्छाश्रवणाद्विकल्पसिद्धिः । तथा वैखानससूत्रे चतुर्विधचतुराश्रमवर्णनावसरे * परमहंसा नाम वृक्षैकमूले शून्यागारे श्मशाने वा आसीना वा साम्बरा दिगम्बरा वा न तेषां धर्माधर्मौ सत्यानृते शुद्ध्यशुद्ध्यादि द्वैतं सर्वसमास्सर्वात्मानः समलोष्टाश्मकाञ्चनाः सर्ववर्णेषु भैक्षाचरणमित्यादि । अत्र * साम्बरा दिगम्बरा वेति विकल्पो विवृतगूढाचारभेदाभिप्रायेण । परमहंसोपनिषदि तु काष्ठदण्डनिन्दनेन परमहंसानां ज्ञानदण्डत्वं विधीयते । तस्माद्दण्डधारणं न मुख्यम् । तर्हि को मुख्य इति चेत् ; अयं मुख्यः * न दण्डं न शिखां न यज्ञोपवीतं नाच्छादनं चरति परमहंसः । * ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते ॥ काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः । स याति नरकान् घोरान् महारौरवसंज्ञकान् ॥ इत्यादि । आह च विष्णुः—* अन्नार्थं लिङ्गमुद्दिष्टं न मोक्षार्थं विधीयते इति । मोक्षधर्मे च * यतेः सत्यपि लिङ्गेऽस्मिन् ज्ञानमेव हि कारणम् । निर्मोक्षायेह दुःखस्य लिङ्गग्रामो निरर्थकः ॥ काषायधारणं मौण्ड्यं त्रिविष्टब्धं कमण्डलुः । लिङ्गान्यन्नार्थमेतानि न मोक्षायेति मे मतिः ॥ अन्यत्र च—* लिङ्गाभावात्तु कैवल्यमिति ब्रह्मानुशासनम् । एवमन्यान्यपि लिङ्गनिन्दापराणि वाक्यानि द्रष्टव्यानि । * अव्यक्तलिङ्गोऽव्यक्ताचार इत्यादीन्यपि लिङ्गपरित्यागाभिप्रायाण्येव । तदेवमस्ति परमहंसद्वैविध्यमिति ।

तदिदमपेशलम्, गन्धर्वभाषितप्रायैरासत्वेऽप्यनिदम्परैः वाक्यैः परमहंसस्य न त्वदिष्टभिदासिद्धिः । इह तावत्त्वत्पक्षपातिविज्ञानेश्वराद्यनुदाहृतत्वात्, त्वत्पक्षप्रतिक्षेपकैर्यादवाचार्यभास्करप्रभृतिभिर्बहुश्रुतैरुपन्यस्य दूषितत्वाभावाच्च । सन्दिग्धश्रुतित्वादिषु केषुचिद्वचनेषु अप्रत्ययादेव परिहारः, अन्येषु त्वन्यपरतयेति संग्रहः । तत्र यदुक्तं मैत्रायणीयब्राह्मणे तन्मूललोकाक्षिगृह्ये च परमहंसस्य दण्डग्रहणाग्रहणयोर्विकल्पो दृश्यत इति । तदसत्, तत्रापि स्मृत्यन्तरादिसम्प्रतिपन्नस्यैकदण्डत्रिदण्डविकल्पस्यैव विवक्षितत्वात् । काममेकं वैणवं दण्डमाददीत यद्वा त्रिदण्डमिति हि तत्राभिप्रायः । एवं * यदीच्छेदाददीतेत्यत्रापि यद्येकं दण्डं गृहीतुमिच्छेत् तदैकम्, अन्यथा त्रिदण्डमिति । अन्यथा कथं जातरूपधरस्यैव दण्डग्रहणाग्रहणविकल्पः ? विद्वदविद्वद्विषयसन्न्यासभेदसिद्धावविद्वद्विषयं दण्डग्रहणं विद्वद्विषयं तदग्रहणमिति चेत् ; किमिदं कर्णे स्पृष्टः कटिं चालयसि ? जातरूपधरस्य कथं तद्ग्रहणमित्येतदेव ह्यनुयोगास्पदम्, न हि वैणवं दण्डं धारयन् कश्चिज्जायते, न च दिगम्बरो विकीर्णमूर्धज एकदण्डधारी कश्चिद्भवतामपीष्टो दृष्टो वा ।

दण्डग्रहणकाले, काषायमपि गृह्णीयादिति चेत्; किमत्र प्रमाणम्? स्मृत्यन्तरादिकमिति चेत्; तर्हि तदनुसारादस्मत्प्रदर्शितमेवार्थमङ्गीकुरुष्व। अत्रस्तत्र सन्न्यसनवेलायां प्रागुदग्गमनावसर एव तथा वेषः, अनन्तरं तु यथालाभं यथेच्छं वा त्रिदण्डैकदण्डयोरन्यतरस्य काषायादेर्ग्रहणमेवाभिमतमिति भावय। यच्चाविद्वद्विषयं दण्डग्रहणमिति, तदपि साहसिकप्रलपितम्; विद्वांसमधिकृत्यैव तद्विधानात्। कथं चातिशयितविवेन भवता इतिहासपुराणादिपठितकाषायदण्डशिखाधारिणः कपिलपञ्चशिखदुर्वासःप्रभृतयो महर्षयश्शङ्करादयश्च भवत्सिद्धान्तप्रतिष्ठापकाः, भगवन्नाथमुनिमिश्रभास्करयादवप्रकाशादयश्चाविद्वांस इत्युन्नीतम्? तदेतदवैदिकसिद्धान्तसारस्यमन्तरेण न कस्यचिद्रोचेत। यत्तु विखनस्सूत्रे * साम्बरा दिगम्बरा वेति विकल्पो विवृतगूढाचाराभिप्रायेणेति, तदपि न; तदसिद्धेरेव तद्विषयत्वासिद्धेः। तत्र हि निस्सङ्गत्वप्रतिपादनाय तथातथा व्यपदेशः, यथा * वृक्षमूले शून्यागारे श्मशाने वा वासिन इत्यत्र न व्यवस्थितविषयो विकल्पस्तद्वदत्रापि। * न तेषां धर्माधर्मौ सत्यानृते शुद्ध्यशुद्ध्यादि द्वैतं सर्वसमा इत्यत्रापि नह्यधर्मासत्याद्यनुमतिः क्रियते। तथासति तेषामित्यविशेषेण परामृष्टानां विवृतवेषाणामपि तदनुमतिप्रसङ्गात्। न च तदिच्छसि। अतस्तत्राप्यधर्मासत्यादेः स्वाश्रमाङ्गभूतकतिपयधर्मव्यतिरिक्तधर्मादीनां च स्वरूपतः प्रहाणमुच्यते।

यत्तु परमहंसोपनिषदि काष्ठदण्डनिन्दनेन ज्ञानदण्डविधानमित्युक्तम्, तदपि * न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु निन्दितादितरत्प्रशंसितुमिति न्यायेन ज्ञानदण्डविधानादरादेव। यथा अनुदितहोमनिन्दा उदितहोमप्रशंसार्था, तथेहापि। अन्यथा काष्ठदण्डधारिणः कथं महारौरवादिप्राप्त्यभिधानम्? तथा च सति काष्ठदण्डधारणस्य महापातकत्वप्रसङ्गेन तद्धारिणां दूरपरिहरणीयत्वप्रसङ्गात्। तत्र शिखायज्ञोपवीताच्छादनपरित्यागोक्तिरपि तत एवान्यपरेति सिद्धम्। विवृतवेषादिविषयतया च वक्ष्यमाणप्रकारेण यथासंभवं तन्निर्वाहस्सर्वत्र। एवं लिङ्गनिन्दापराण्यपि सर्वाणि स्मृतिवचनानि लिङ्गमात्रवतां तत्तद्धर्मविकलानां निन्दापराणीति तत्र तत्रैव पूर्वापरपरामर्शेन सुव्यक्तम्। * अव्यक्तलिङ्गोऽव्यक्ताचार इति वाक्यं तु लिङ्गाचारयोर्गोपनमवमन्तव्यतार्थं विदधातीति प्रतीयते, न ह्यलिङ्गोऽनाचार इत्युच्यते। अतो नास्ति भवदभिमतं परमहंसद्वैविध्यम्। त्रिदण्डैकदण्डादिविकल्पास्तु संभवन्ति। ननु श्रीभागवते * न्यासे कुटीचकः पूर्वं बहूदो हंसनिष्क्रियाविति परमहंसस्य निष्क्रियत्वमुक्तमिति चेत्; किमतः? गूढाचारसिद्धिरिति चेन्न; कुटीचकादित्रयेण सह परमहंसावान्तरविशेषस्य निर्देशायोगात्। न हि पृथिव्यादिद्रव्यवर्गपरिगणने घटः पट इत्यपि परिगण्यते। परमहंसमात्रोपादाने तु न त्वदभिमतसिद्धिः। तस्य निष्क्रियत्वोक्तिस्तु पूर्वपूर्ववत्कर्मप्राचुर्याभावात्, अल्पधने पुरुषे दरिद्रशब्दवत्। न च सर्वे परमहंसास्सर्वक्रियाशून्या इति त्वयापि स्वीकृतम्। विवृतगूढवेषाचारविभागाभावप्रसङ्गात्। ननु करतलामलकीकृतसकलनिगमस्मृतीतिहासपुराणार्थैस्समस्तन्यायसार्थवाहैः परमहंसपरिव्राजकपरिबृढैर्भगवच्छङ्कराचार्यैरशेषोपनिषत्स्मृतिजलधिसुधायामुपदेशसाहस्रिकायां सर्ववर्णाश्रमधर्मत्यागरूपो गूढाचारधर्मः स्वपक्षतयाऽभीक्ष्णं सयुक्तिकं प्रदर्शित इति चेत्; अहो भवान् महीयोभिराचार्यवर्णनादृष्टैरनिष्टान् विजिगीषते। ये पुनर्यत्प्रतिपादिते निर्विशेषात्माद्वैते प्रपञ्चवञ्चनादौ च प्रमाणसरणिमनुसरन्तो विवदन्ते, ते कथं तत्समर्थितेऽप्यन्यसिन्नपार्थे चरितार्थधियो भवेयुः। ये चात्राशरीरत्वादयो युक्त्याभासा वर्णाश्रमधर्मत्यागाय वर्णिताः, तेऽपि जीवन्मुक्तिजीवघातेन विनिहता वेदितव्याः। शरीरतत्प्रयुक्तसुखदुःखाद्यनुषङ्गस्य प्रत्यक्षादिसिद्धत्वेन तन्निषेधस्य तद्बाधितत्वात्। स्वरूपेण वर्णाश्रम-

रहितस्याप्यात्मनश्शरीरविशिष्टाकारेण तद्वत्तामुपजीव्य प्रवृत्तैश्शास्त्रैरेव तत्प्रयुक्तानुष्ठानसिद्धेः। न हि देहात्मभ्रमोपजीवनेन पारलौकिकशास्त्रोदयः। अतो न कथंचिदपि युष्मदनुष्ठीयमानं स्वैरकर्मसहं पारमहंस्यं नाम किमपि दृश्यते।

ननु ये बहिर्विषयविमुखतया निषिद्धनिवृत्तविरक्तलिङ्गधारिणः त एव साक्षात्परमहंसाभिधानब्रह्मविदः, वयं तु नाममात्रधारिण इति चेन्न; तैरप्याश्रमविशेषनियतलिङ्गविशेषस्य धर्मविशेषस्य चापरित्यागात्। यश्च तेषां विषयवैमुख्यं निषिद्धनिवृत्तिकारणमुक्तम्, तदपि किं निश्शेषशब्दस्पर्शादिवैमुख्यरूपम्, उत कतिपयवैमुख्यरूपमिति? नाद्यः, कबलग्रहणादौ कस्यचिदप्यंशस्य न्यूनत्वादर्शनात्। मिथ्यैतदिति चेत्; शान्तं पापम्, कृतघ्नोऽसि। ये भवत्सु ब्रह्मवित्त्वेन बम्भ्रम्यमाणाः प्रतिदिनमन्नासने कृत्वा यथाभिलाषं चतुर्विधमन्नमुपहरन्ति, ते पुनरेवंविधं वाक्यमाकर्ण्य कथं न परिदूयेरन्? येन च प्रमाणेन ब्रह्मविद्भोगानां मिथ्यात्वापादनं तेनैवाब्रह्मविद्भोगानामपीति सर्वेषामनायासेन विषयवैमुख्यं समर्थितम्। द्वितीयेऽपि यत्किंचिद्विषयवैमुख्यमात्ररूपम्, उत निषिद्धवैमुख्यरूपमिति। पूर्वत्रान्येषामपि तत्संभवेन पुनरप्यविशेषः। उत्तरत्रापि तन्निषिद्धवैमुख्यं किमनिष्टत्वमात्रात्, उत शास्त्रसिद्धानर्थहेतुत्वाध्यवसायेन? नाद्यः, विकल्पासहत्वात्। अनिष्टत्वमपि शस्त्राग्निकण्टकादिवत्सर्वप्रतिकूलत्वोपलम्भाद्वा, ब्रह्मवित्प्रतिकूलत्वोपलम्भाद्वा, आनुकूल्यानुपलम्भनमात्राद्वा? न प्रथमः, सर्वलोकोपलम्भविरोधात्। अत एव नापरः, ब्रह्मविदां स्वात्मप्रत्यक्षविरोधात्। न हि मांसादिषु संस्कृतेषु ब्रह्मविदामपि निम्बादिवत् प्रातिकूल्यादिबुद्धिः। परेषां तु चेष्टाकारलिङ्गकानुमानविरोधः। शैलूषादिचेष्टादिवदिहापीति चेन्न; परविप्रलम्भपरानन्दजननादिप्रयोजनायोगेन तथाविधबुद्धिपूर्वकत्वानुपपत्तेः। स्वार्थताबुद्धिपूर्वकत्वे तु वैमुख्यासिद्धेः, भक्षणाद्यर्थप्रवृत्तेरबुद्धिपूर्वकत्वायोगात्। निषिद्धार्थप्रवृत्तिरेव तेषां नास्तीति हेत्वसिद्धिरिति चेत्; प्रामादिकनिषिद्धप्रवृत्तेर्ब्रह्मविदामपि संभवात्। बुद्धिपूर्वकनिषिद्धप्रवृत्त्यभावस्तु शास्त्रसिद्धानर्थहेतुत्वाध्यवसायेनैवेति द्वितीयः कल्पस्स्यात्। तथा च निषेधशास्त्रकिङ्करत्वेनाविशेषात् विधिशास्त्रमप्यनुबध्नातीति दुरन्तता। नचैतदुभयं भवतामिष्टम्। यदाहुः *दग्धाखिलाधिकारत्वात् ब्रह्मज्ञानाग्निना मुनिः। वर्तमानः श्रुतेर्मूर्ध्नि नैव स्याद्विधिकिङ्करः॥ इति। अत्याश्रमपक्षोऽयम्, आश्रमपक्षे तूभयमपीष्टमिति चेत्; तर्हि यथाविधि लिङ्गाचारावनुवर्तस्व। तदा तु न विवदामहे। शास्त्रवश्यत्वाभावेऽपि ज्ञानिनोऽत्यर्थनिषिद्धनिरोधवासनाबलादेव बुद्धिपूर्वनिषिद्धनिवृत्तिरिति चेन्न; निषिद्धनिरोधवासना हि निषिद्धे प्रवृत्तिं निवर्तयति। नचाब्रह्मविदो निषिद्धं ब्रह्मविदोऽपि निषिद्धं भवति, अतिप्रसङ्गात्। अतश्चानिषिद्धत्वात् प्रवृत्तिरेव स्यात्। अन्यथा ब्रह्मचर्यावस्थानिषिद्धतत्सन्निरोधवासनया उत्तरेषामाश्रमाणामनारम्भप्रसङ्गात्। विधिवशात्तत्र पुनः प्रवृत्तिरिति चेन्न; ब्रह्मचारिनिषिद्धेषु गृहस्थादीनामविहिताप्रतिषिद्धेषु केषुचिदन्तर्माल्यादिष्वप्यप्रवृत्तिप्रसङ्गात्। यदि च प्राङ्निषिद्धत्वमात्रेण तदानीमनिषिद्धेऽपि वासना निरोधिका, तदा ब्रह्मविदो न काचिदपि प्रवृत्तिः स्यात्, सर्वेषामपि कर्मणामधिकारिभेदेन देशकालादिभेदेन वा निषिद्धत्वात्। अस्तु तादृशो निरीहोऽस्माकं ब्रह्मविदिति चेन्न; समाधिं स्वापादिकं वाऽन्तरेण तादृगवस्थत्वासिद्धेः। नच समाधिस्थं तथाविधं प्रतिक्षिपामः। तस्याप्युत्थानकाले विधिनिषेधौ गलग्राहिणावेव। अस्तु तर्हि लोकसंग्रहार्थं निषिद्धवैमुख्यमिति; तर्हि न वैमुख्यमपि तु बलान्निरोधः। तथा च विहिताभिमुख्यमप्यभिमुखीभवति। लोकसंग्रहोऽपि लोकक्षोभजन्यपापभयादेवेति तदेव शास्त्रवश्यत्वम्। ब्रह्मानुभवरसवशादेव निषिद्धक्षुद्ररसवैमुख्यमस्त्विति चेन्न; अविहिताप्रतिषिद्धेऽप्यप्रवृत्तिप्रसङ्गात्। साच सत्यपि समाधिदशैवेति

प्रागेवोक्तम् । एतेन जरठवद्भोक्तृत्वशक्तिवैकल्यात् ब्रह्मविदो भोगवैमुख्यमिति च प्रत्युक्तम् । अलाभान्निवारकराजादि-भयाद्वा तद्वैमुख्यमिति तु स्यात् । तदेतत्तुरङ्गमब्रह्मचर्यम्, निर्विघ्नलाभदशायां तु स्वैरमेव ह्यायातम् ।

एतेनात्याश्रमपक्षेऽपि निषिद्धवैमुख्यं दूषितम् । अनाश्रमित्वावस्था च किं विधायकशास्त्रबलादङ्गीक्रियते, लिङ्गदर्शनमात्राद्वा, तदशक्त्या वा, अन्यतो वा कुतश्चिदिति । न प्रथमः, विधायकादर्शनात्; प्रत्युत * अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः इत्यादिस्मृतिशतैर्निषेधात् । नचैतदविद्वद्विषयं मन्तव्यम्, सङ्कोचकाभावात् । अनाश्रमित्वविधि-दर्शने हि तत्सङ्कोचः । ज्ञानिनामपि नाश्रमो निषिध्यते, अपि तु स्वैराचारः । यथा—* नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् इति ।

ननु * तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते, * अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् । भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥ इति श्रुतिस्मृतिभ्यां ज्ञानिन उत्तराघाश्लेषः श्रूयत इति चेन्न; दुश्चरितविरतिपरश्रुतिबलादेवाश्लेषश्रुत्यादेरबुद्धिपूर्वविषयत्वात्, आपद्विषयत्वाच्च । सूत्रितं च * सर्वा-न्नानुमतिश्च प्राणात्यये तद्दर्शनादिति * शब्दश्चातोऽकामकार इति च । * कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः, इत्युक्त्वा * न कर्म लिप्यते नरे इति वचनात् बुद्धिपूर्वकर्मणाऽप्यश्लेषः श्रुत इति चेन्न; तस्य वाक्यस्य विद्याङ्गभूता-सङ्गकर्मविषयत्वात् । विद्यास्तुत्यर्थत्वाद्वा । तथा चासूत्रयत् *नाविशेषादिति, *स्तुतयेऽनुमतिर्वेति च । अन्यथा पूर्वोक्त-विरोधात् । दुश्चरितविरतिश्रुतिरेव किमन्यपरतया न निरूप्यत इति चेन्न; तस्यास्तात्पर्यविषयस्यान्यस्यादर्शनात् । विज्ञान-विरोधादेव तत्रापि तात्पर्यमिति चेन्न; ज्ञानस्य दुश्चरितविरामाद्यभावे स्वसाध्यसाधकत्वाभावलक्षणवैकल्यप्रतिपादनमुखेन दुश्चरितादिनिन्दारूपतया तदभावविशिष्टत्वेन विशेष एव वाक्यस्य तात्पर्यात् । ज्ञाननिष्पत्त्यर्थं दुश्चरितादिनिवृत्तिः, निष्पन्नज्ञानस्य तु निरपेक्षतया स्वैरानुमतिरिति चेन्न; दुश्चरितप्रभृतीनां ब्रह्मप्राप्तिविरोधित्वेन * नैनमाप्नुयादिति प्रति-पादनात् । नह्यत्र, नाविरतो दुश्चरितात्, प्रज्ञानमाप्नुयादित्युच्यते । * नागुस्सम्पन्नमश्नातीत्यत्र क्षीरादिसम्पद्रूपविशेष-निषेधवत् प्रज्ञाननिषेधे तात्पर्यमिति चेन्न; पूर्वापरभावसहकृतकरणश्रुतिबलादेव सिद्धत्वप्रतीतेः साध्यत्वविवक्षायास्तद्विरु-द्धत्वात्, स्वारस्याभावाच्च । अत एव * नागुः क्षीरेण भुङ्क्त इतिवदिति प्रत्युक्तम्, भोजनवत् ब्रह्मप्राप्तेरन्यतः प्राप्त्यभावाच्च । साध्यत्वविवक्षायामपि ज्ञानस्याप्रयाणादनुवर्तनीयत्वस्य प्रतिपादितत्वात् । प्रतिदिवसमुपचीयमानानुवृत्त-ज्ञानसिद्ध्यर्थं दुश्चरितविरामादेरप्यामोक्षादनुवर्तनीयत्वस्य प्रतिपादितत्वात् । अतो यावज्जीवं स्वैरनिषेधे अनन्यथासिद्धे सति * कुर्वन्नेवेत्यादिकं ज्ञानस्तुत्यर्थं ज्ञानाङ्गकर्मविधिपरं वेति नेतव्यम् ।

अत एव * अपि चेदसि पापेभ्यस्सर्वेभ्यः पापकृत्तमः । सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते । हत्वापि स इमाँल्लोकान्न हन्ति न निहन्यते ॥ इत्यादीन्यपि क्रियमाणे कर्मणि फलसङ्गकर्तृत्वादिप्रतिषेधपरतया वा ज्ञानविशेषमाहात्म्यप्रतिपादनादि-परतया न स्वैरानुमतिलिङ्गानि । अत एव *अपिचेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यस्सम्यग्व्यवसितो हि सः ॥ इत्युक्त्वा, अनन्तरमेव * क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं स गच्छतीत्यादिना समाधीयते । * तस्माद्ब्राह्मणः

पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदिति विदुषो बाल्यविधिबलात्कामचारवादकामभक्षत्वादिप्राप्तिरिति चेत्; नहि तत्र बाल्यशब्दो बालभावपरः, स हि वयोवस्थाविशेषरूप उपादातुं न शक्यते। अतः स्वमाहात्म्यानाविष्काररूपं बालकर्म उपादातुं शक्यत इति तद्विषयोऽयं विधिः; अन्यथा प्रागुक्तविरोधात्। सूत्रितं च * अनाविष्कुर्वन्नन्वयादिति। योगिनां च स्वमाहात्म्यानाविष्कारेण जडवदाचरणं योगोपकारकतया स्मर्यते यथा—*जानन्नपि हि मेधावी जडवल्लोकमाचरेत्। सम्मानना परां हानिं योगर्धेः कुरुते यतः॥ इत्यादि। सनत्सुजातोऽपि—* य इमं सर्वदा भूतेष्वात्मानमनुपश्यति। अन्यत्रान्यत्र युक्तेषु किं नु [स] शोचेत्ततः परम्। अहमेवास्मि वो माता पिता पुत्रोऽस्म्यहं पुनः। आत्माऽहमस्य सर्वस्य यच्च नास्ति यदस्ति च। पितामहोऽस्मि स्थविरः पिता पुत्रश्च भारत॥ ममैव यूयमात्माथ न मे यूयं च नाप्यहम्। आत्मैव स्थानं मम जन्मचात्मेत्यादिना सर्वान्तरात्मभूतब्रह्मसाक्षात्कारिणं सर्वजननिरुपाधिकसुहृदं ब्रह्मनिष्ठं प्रस्तुत्य, * तस्य सम्यक् समाचारमाहुर्वेदविदो जनाः। नैवं मन्येत भूयिष्ठं बाह्यमाभ्यन्तरं जनम्॥ इत्यादिना तस्य स्वाकारगोपनं विधाय, * यर्ह्येवमन्तरात्मानं ब्रह्मणो हन्तुमर्हति। निर्लिङ्गमचलं सिद्धं सर्वद्वन्द्वविवर्जितम्॥ इत्यादिना परिशुद्धात्मस्वरूपानुसन्धानं च विधाय, * योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चोरेणात्मापहारिणा॥ इत्यथाभूतात्मवेदिनं विनिन्द्य, * अश्रान्तस्यावनावात्मा सम्मतो निरुपद्रवः। शिष्टो नशिष्टवत्स स्याद्ब्राह्मणो ब्रह्मवित्कविः॥ इति विशिष्टस्यैव सतस्तस्यावमानसिद्ध्यर्थमविशिष्टवदभिनय एवाभिधीयते। व्यज्यते हि तत्रैव—* सम्मानपरिहारार्थं स्ववीर्यस्य हि गोपनम्। ये यथा वान्तमश्नन्ति बाला नित्यमभुङ्क्तये॥ एवं ते वान्तमश्नन्ति स्ववीर्यस्योपभोजनात्। नवै मानं च मौनं च सहितौ चरतस्सदा। अयं मानस्य विषयो ह्यसौ मौनस्य तद्विदुः॥ इति। उक्तं हि तैत्तिरीयके—* तस्मादेवं विद्वान्। वीव नृत्येत्। प्रेव चलेत्। व्यस्येवाक्ष्यौ भाषेत। मण्टयेदिव। क्राथयेदिव। शृङ्गायेतेव। उत मोपवदेयुः। उत मे पाप्मानमपहन्युरिति। इति। अत्रापि पापनिवृत्त्यर्थं परिभवनीयत्वसिद्ध्यर्थमुन्मत्तत्वादिसमानव्यापार एव हि विधीयते; न पुनः परमहंसानां परदारादिगमनरूपनिषिद्धकरणम्, नापि नित्यनैमित्तिकत्यागः। उक्तं च मनुना—* सम्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव। अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा॥ इति। अयमेवार्थः स्मृत्यन्तरेष्वप्युच्यते—* यन्न सन्तं नचासन्तं नाश्रुतं न बहुश्रुतम्। न सुवृत्तं न दुर्वृत्तं वेद कश्चित्स वै द्विजः॥ गूढं समाश्रितो विद्वानज्ञातश्चरितं चरेत्॥ अन्धवज्जडवच्चापि मूकवच्च महीं चरेत्। स्वाचारस्यापरित्यागः स्वप्रभावस्य गोपनम्॥ अपरिग्रहशीलत्वं पावनानि प्रचक्षते। इत्यादिभिः।

एतेन द्वितीयोऽपि हेतुः प्रत्युक्तः, प्रत्यक्षश्रुतिविरोधे प्राप्त्यभावे च लिङ्गदर्शनमकिञ्चित्करमेव। न च तदस्ति। आदिभरतोऽपि हि योगसिद्ध्यर्थं जडवदाचारमात्रे प्रवृत्त इति तत्रैव व्यक्तम्। तथाहि श्रीविष्णुपुराणे आदिभरतोपाख्याने—* तत्र चोत्सृष्टदेहोऽसौ जज्ञे जातिस्मरो द्विजः। सदाचारवतां शुद्धे योगिनां प्रवरे कुले॥ सर्वविज्ञानसम्पन्नस्सर्वशास्त्रार्थतत्त्ववित्। अपश्यत्सच मैत्रेय आत्मानं प्रकृतेः परम्॥ आत्मनोऽधिगतज्ञानो देवादीनि महामुने। सर्वभूतान्यभेदेन स ददर्श सदाऽऽत्मनः॥ न पपाठ गुरुप्रोक्तां कृतोपनयनश्श्रुतिम्। न ददर्श च कर्माणि शास्त्राणि जगृहे न च॥ उक्तोऽपि बहुशः किञ्चिज्जडवाक्यमभाषत। तदप्यसंस्कारगुणं ग्राम्यवाक्योक्तिसंश्रितम्॥ अपध्वस्तवपुस्सोऽथ मलिनाम्बरधृग्जटी। क्लिन्नदन्तान्तरस्सभ्यैः परिभूतस्स नागरैः॥ सम्मानना परां हानिं योगर्धेः कुरुते यतः। जनेनावमतो योगी योगसिद्धिं च विन्दति॥ तस्माच्चरेत वै योगी सतां वर्त्म न दूषयेत्। जना

यथाऽवमन्येरन् गच्छेयुर्नैव सङ्गतिम् ॥ हिरण्यगर्भवचनं विचिन्त्येत्थं महामतिः । आत्मानं दर्शयामास जडोन्मत्ताकृतिं जने ॥ भुङ्क्ते कुल्माषवाट्यादि शाकं वन्यफलान् कणान् । यद्यदाप्नोति सुबहु तत्तत्ते कालसंयमम् ॥ पितर्युपरते सोऽथ भ्रातृभ्रातृव्यबान्धवैः । कारितः क्षेत्रकर्माणि कदन्नाहारतोषितः ॥ सरूक्षपीनावयवो जडकारी च कर्मणि । सर्वलोकोपकरणं बभूवाहारचेतनः ॥ तं तादृशमसंस्कारं विप्राकृतिविचेष्टितम् । क्षत्ता सौवीरराजस्य विष्टियोग्यममन्यत ॥ इति । तथोत्तरत्र * योगिनो विविधै रूपैर्नराणामुपकारिणः । भ्रमन्ति पृथिवीमेतामभि[वि]ज्ञातस्वरूपिणः ॥ इति । न ह्यत्राधर्मानुष्ठानं किंचिदुक्तम्, न च धर्मोपप्लवः । कर्माणि तु यज्ञादीनि ब्रह्मचारित्वादेव नाग्रहीत् । अत एव तत्र * सतां वर्त्म न दूषयन्नित्यप्युक्तम् । भागवते च तस्य यज्ञोपवीतादिधारणादिकथनादाश्रमित्वमेव प्रतीयते । यथोक्तम्—* कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूत इति । अत्र निगूढश्चरसीति स्वमाहात्म्यानाविष्कारो व्यक्तः । अत एव * न पपाठ गुरुप्रोक्तां कृतोपनयनः श्रुतिमित्यत्रापि कृतोपनयनत्वं न निषिध्यते । अनूच्चारणपरित्यागोऽपि जन्मान्तरसंस्कारोद्बोधनादिना वेदानां स्वतःप्रकाशात् । अथवा एकवारश्रवणमात्रेण वेदधारणात् । दुर्वासःप्रभृतीनामुन्मत्तव्रतादिकमपि कादाचित्कमाश्रमधर्मनिष्ठानामेव लोकोपहास्यतादिफलावसितम् । न पुनः सर्वाश्रमत्यागात्मकम् । अत एव दुर्वाससः पश्चात्सन्न्यासानुप्रवेशः काषायदण्डादिमत्त्वं च स्मर्यते । ऋभुशुकसंवर्तादिषु नग्नचर्यादिदर्शनादनाश्रमित्वमवगम्यत इति चेन्न; नग्नचर्याया अपि वर्षवातातपादितितिक्षालक्षणकम्बलकबलिताशेषविशेषाकारपुरातनाधिकारिविशेषविषयव्रतविशेषरूपत्वात् । आश्रमित्वाभावे कथं वाताशनस्यैव संवर्तस्य महीभृता ऋत्विक्त्वेन वरणम्? अतस्सर्ववर्णाश्रमसाधारणव्रतविशेष एव नग्नचर्या । गृहस्थस्यैव ह्यार्त्विज्यादिकम् । पूर्वं विधुरस्यापि कार्यार्थं दारक्रियादिपूर्वकमार्त्विज्यं युज्यते ।

ननु * पुरः पञ्चशतं नार्यो वारमुख्याः समाद्रवन्नित्यादिना * तस्य भुक्तवतस्तात तदन्तःपुरकाननम् । सुरम्यं दर्शयामासुरेकैकश्येन भारत ॥ इति तस्य ब्रह्मविदो महर्षेः शुकस्य वारमुख्यासु गणिकासु भोजनमप्युक्तमिति चेन्न; ब्राह्मणादिपरिपक्वोपनीतान्नभोजनेन तासां परिजनतया भोजनानन्तरं तालवृन्तादिग्रहणादिमुखेनावस्थानेऽपि तद्व्यपदेशोपपत्तेः । शुकस्य ब्रह्मचर्यादिपरीक्षणमात्रे हि तत्र तात्पर्यमिति सुव्यक्तम् । नैतन्निषिद्धान्नभोजनलिङ्गम् । उत्तरत्र च—* विज्ञाते तु परे तत्त्वे प्रत्यक्षे हृदि शाश्वते । किमवश्यं हि वस्तव्यमाश्रमेषु वनेषु च । एतद्भवन्तं पृच्छामि तद्भवान् प्रब्रवीतु मे ॥ इति शुकेन पृष्टे, जनकेन तेषामेवाश्रमधर्माणां सङ्गत्यागपूर्वकमनुष्ठानमेव ह्युक्तम् ।

यच्च तत्र * न विना ज्ञानविज्ञानान्मोक्षस्याधिगमो भवेत् । न विना गुरुसम्बन्धात् ज्ञानस्याधिगमः स्मृतः ॥ आचार्यः प्लाविता तस्य ज्ञानं प्लव इहोच्यते । विज्ञाय कृतकृत्यस्तु तीर्णस्तदुभयं त्यजेत् ॥ त्यज धर्ममधर्मं च त्यज सत्यानृते अपि । उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज ॥ इत्युक्तम् । तत्र * तीर्णस्तदुभयं त्यजेदित्यनेन आमोक्षात्तदुपायभूतज्ञानाचार्ययोरनुवर्तनीयत्वमेवोक्तम् । * त्यज धर्ममधर्मं चेति श्लोकस्तु * त्यज धर्ममसङ्कल्पात्त्यजाधर्ममहिंसया । उभे सत्यानृते बुद्ध्वा बुद्धिं परमनिश्चयाम् ॥ इत्यनेन श्लोकेन व्याख्यातार्थत्वात् नासौ त्वदनुगुणः । यत्पुनः श्रीभागवते शुकस्य परमहंसस्य वेषानुक्त्वा * तत्रागमत् भगवान् व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः । अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः ॥ तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाहंसकपोलगात्रम् । चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननं कम्बुसुजातकण्ठम् । निगूढजत्रुं पृथुतुङ्गवक्षसं सावर्तनाभिं वलिवल्गूदरं च । दिगम्बरं वक्त्रविकीर्णकेशं

श्यामं सदा पिच्छिलयाऽङ्गलक्ष्म्या ॥ स्त्रीणां मनोज्ञं रुचिरस्मितेन प्रलम्बबाहुं सुकुमारोत्तमाङ्गम् । प्रत्युत्थिता मुनयस्स्वासनेभ्यः इत्यादि, अत्र नग्नचर्यापरत्वाल्लिङ्गस्य निगूहनमलक्ष्यलिङ्ग इत्युक्तम् । यत्पुनराश्वमेधिके प्रोक्तं * राजन्नाङ्गिरसः पुत्रस्संवर्तो नाम धार्मिकः । दिशश्चङ्क्रमते सर्वा दिग्वासा मोहयन् प्रजाः ॥ उन्मत्तवेषं बिभ्रत्स चरन् वै तु यथासुखम् । वाराणसीं तु नगरीमभीक्ष्णमुपसेवते ॥ नैव धर्मी न चाधर्मी नचापि हि शुभाशुभी ॥ इत्यादि, तत्रापि धार्मिक इत्युपक्रमात् पुण्यक्षेत्रनिरन्तरसेवनरूपधर्मविशेषनिष्ठत्वस्य चाभिधानात् उन्मत्तवेषधारणमात्रमेवोच्यते ।

यत्पुनरजगरोपाख्यानं स्वैरानुरूपमुपवर्णयन्ति ; तदप्यसत् । तथा हि—* केन वृत्तेन वृत्तज्ञ वीतशोकश्चरेन्महीम् । किञ्च कुर्वन्नरो लोके प्राप्नोति परमां गतिम् ॥ इति युधिष्ठिरेण पृष्टो भीष्मः प्रत्याह—* अत्राप्युदाहरन्तीममितिहासं पुरातनम् । प्रह्लादस्य च संवादं मुनेरजगरस्य च । चरन्तं ब्राह्मणं कञ्चित्तुल्यचित्तमनामयम् ॥ पप्रच्छ राजन् प्रह्लादो बुद्धिमान् प्राज्ञसत्तमः । प्रह्लादः—* स्वस्थः शुक्लो मृदुर्दान्तः निर्विवित्सोऽनसूयकः । सुवाग्बहुमतो लोके प्राज्ञश्चरसि बालवत् ॥ इत्यादिना पूर्वं प्रह्लादप्रश्नेन ब्राह्मणस्य मुमुक्षूपादेया गुणाः प्रदर्शिताः । यत्पुनस्तत्रोक्तम् * धर्मार्थकामकार्येषु कूटस्थ इव लक्ष्यसे । नानुतिष्ठसि धर्मार्थौ न कामे चापि वर्तसे ॥ इति ; तदपि काम्यकर्मादिविषयमेव, अन्यथा उत्तरत्र धर्मोपभोगप्रतिग्रहवचनविरोधात् । प्रह्लादानुयुक्तो हि ब्राह्मणस्तत्र सर्वपदार्थानामनित्यत्वमुक्त्वाह—* उत्पत्तिनिधनज्ञस्य किं कार्यमवशिष्यते । सर्वभूतानि संपश्यन्ननुरक्तानि मृत्युना । सर्वं सामान्यतो विद्वान् कृतकृत्यस्सुखं स्वपे ॥ सुमहान्तमपि ग्रासं ग्रसे लब्धं यदृच्छया । शये पुनरभुञ्जानो दिवसानि बहून्यपि ॥ आस्रवत्यपि मामन्नं पुनर्बहुगुणं बहु । पुनरल्पं पुनस्स्तोकं पुनर्नैवोपपद्यते ॥ कणान् कदाचित्खादामि पिण्याकमपि च ग्रसे । भक्षये शालिमांसानि भक्ष्यांश्चोच्चावचान् पुनः ॥ धारयामि च चीराणि शाणक्षौमाजिनानि च । महार्हाण्यपि वासांसि धारयाम्यहमेकदा ॥ शये कदाचित्पर्यङ्के भूमावपि पुनश्शये । प्रासादे वापि मे शय्या कदाचिदुपपद्यते ॥ न सन्निपतितं धर्म्यमुपभोगं यदृच्छया । प्रत्याचक्षे न चाप्येनमनुरुन्धे सुदुर्लभम् ॥ अनियतफलभक्ष्यभोज्यपेयं विधिपरिणामविभक्तदेशकालम् । हृदयसुखमसेवितं कदर्यैर्व्रतमिदमाजगरं शुचिश्चरामि ॥ सुखमसुखमनर्थमर्थलाभं रतिमरतिं मरणं च जीवितं च । विधिनियतमवेक्ष्य तत्त्वबुद्ध्या व्रतमिदमाजगरं शुचिश्चरामि ॥ * अनियतशयनासनप्रकृत्येत्यादि—अत्र यथालब्धवृत्तित्वेऽपि प्रपञ्च्यमाने धर्म्यमिति धर्मादनपेतत्वमेव सावधानेनोक्तम्, उत्तरत्रापि निरपेक्षत्वमात्रेण यथालब्धवृत्तित्वं सम्माननपरिहरणमात्रं चोपदिश्यते । * निस्तुतिर्निर्नमस्कारो निर्द्वन्द्वो निष्प्रतिग्रहः । अरण्ये विचरैकाकी येन केनचिदाश्रितः ॥ येन केन चिदाच्छन्नो येन केनचिदाशितः । यत्र क्वचन शायी स्यात्तं देवा ब्राह्मणं विदुः ॥ निराशिषमनारम्भं निर्नमस्कारमस्तुतिम् । अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः ॥ येन पूर्णमिवाकाशं भवत्येकेन सर्वदा । शून्यं यस्य जनाकीर्णं तं देवा ब्राह्मणं विदुः ॥ यस्मिन् वाचः प्रणश्यन्ति कूपे प्रास्ताश्शिला इव । वक्तारं न पुनर्यान्ति तं देवा ब्राह्मणं विदुः ॥ अनुत्तरीयवसनमनुपस्तीर्यशायिनम् । बाहूपधानं शाम्यन्तं तं देवा ब्राह्मणं विदुः ॥ योऽहेरिव गणाद्भीतस्सम्मानान्मरणादिव । कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः ॥ इत्यादि । * गृहीतमौनव्रतस्तूष्णींबभूवेत्यादिना जडादिवद्भावनामात्रमभिधीयत इति सुव्यक्तम् ।

यच्च तत्र विपरीतमिव किंचिदुक्तम्, * यर्हि वा व स भगवान् लोकमिमं योगस्यद्धाप्रतीपमिह चक्षाणस्तत्प्रकृतकर्मबीभत्सितमाजगरं नामावस्थितश्शयान एवाश्नाति पिबति खादत्यवमेहतीत्यादि, यच्चैवं गोमृगकाकचर्यया व्रज-

स्तिष्ठन्नासीनः काकमृगगोवच्चरति पिबत्यत्ति मेहतीत्यादि, तदप्यखिलमजगरगोमृगचर्यारूपलोकावज्ञाहेतुभूतयोगोपकारकव्रतविशेषविषयम् । तत एव च तथाविधस्यैव ऋषभस्य विधिनिषेधकिङ्करत्वमेव ज्ञापितमिति न विरोधः । अत एव हि भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यं * धर्ममुपशिक्षमाण इत्युपक्रमेऽप्युक्तम् । यच्चोत्तरत्र—* अवधूतं द्विजं कञ्चिच्चरन्तमकुतोभयम् । कविं निरीक्ष्य रमणं यदुः पप्रच्छ धर्मवित् ॥ कुतो बुद्धिरियं ब्रह्मन् अकर्तुस्सुविशारदा । यामासाद्य भवांल्लोकं विद्वांश्चरति बालवत् ॥ प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः । हेतुनेह समीहन्ते आयुषो यशसश्श्रियः ॥ त्वं तु कल्पः कविर्दक्षस्सुभगो मितभाषणः । न कर्तुमीहसे किंचिज्जडोन्मत्तपिशाचवत् ॥ जनेषु मुह्यमानेषु कामलोभदवाग्निना । न तप्यसेऽग्निना मुक्तो गङ्गाम्भस्स्थ इव द्विपः ॥ त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्यानन्दकारणम् । ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ॥ इति पृष्टेनावधूतेन ब्राह्मणेन—* सन्ति मे गुरवो राजन् बहवो बुद्ध्युपाश्रिताः । यतो बुद्धिमुपादाय मुक्तोऽहमिह तान् शृणु ॥ पृथिवी वायुराकाश आपोऽग्निश्चन्द्रमा रविः । इत्युपक्रम्य, * एते मे गुरवो राजन् चतुर्विंशतिराश्रिताः । इति गुरुवर्गमुक्त्वा, * विषयेष्वाविशन् योगी नानाधर्मेषु सर्वतः । गुणदोषव्यपेतात्मा न विषज्येत वायुवत् ॥ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः । सर्वभक्षोऽपि युक्तात्मा नाधत्ते मलमग्निवत् । क्वचिच्छन्नः क्वचित् स्पष्ट उपास्यः श्रेय इच्छताम् । भुङ्क्ते सर्वत्र दातॄणां दहन्प्रागुत्तराशुभम् ॥ इत्याद्युक्तम्, तदप्युक्तेनैव न्यायेन योगनिष्ठप्रशंसारूपातिवादात्मकमिति अपिशब्दादिभिरेव लिङ्गैर्व्यक्तम् । उपक्रमे प्रश्नवाक्येनापि निष्परिग्रहत्वनिरभिमानत्वादिकं हि दर्शितम्, तदेव ह्युत्तरेणाप्यभिप्रेतम् । अतो यादृच्छिकसगुणविगुणान्नविवेकत्यागे सर्वभक्षोक्तेस्तात्पर्यम् । यच्च यादृच्छिकान्नव्यतिरेकेणापि पाणिपात्रभोजनमपि दृष्टमित्युच्यते, यथा—* स्तोकं स्तोकं ग्रसेद्ग्रासान् देहो वर्तेत यावता । गृहानहिंसन्नातिष्ठेद्वृत्तिं माधुकरीं मुनिः ॥ सायन्तनं श्वस्तनं वा न संगृह्णीत भिक्षितम् । पाणिपात्रोदरामात्रो मक्षिकेव न संग्रही ॥ गुणैर्गुणानुपादत्ते यथाकालं विमुञ्चति । न तेषु सज्जते योगी गोभिर्गा इव गोपतिः ॥ इत्यादि ; तदपि स्थास्नुपात्रपरित्यागादौ तत्परम् । परिव्राजां भिक्षाकाले शीर्णपर्णपुटेनापि भिक्षणस्य कैश्चिदनुमतेः । यच्च तदुत्तरत्रेत्युपात्तम्—* ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वाऽनपेक्षकः । सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ॥ बुधो बालकवत् क्रीडेत् कुशलो जडवच्चरेत् । वदेदुन्मत्तवद्विद्वान् गोचर्यां नैगमश्चरेत् ॥ यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतावरम् । तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः ॥ इत्यादि ; तदपि क्रियमाणेष्वेवाकर्तृत्वानुसन्धानविधौ तत्परमिति प्रागुक्तनयेन नेतव्यम् । अन्यथा तत्रैव कथम् * अविधिगोचरश्चरेदित्यादिविधिर्घटेत ?

यत्तु वाररुचे स्वरूपग्रन्थ इत्युपात्तम्—* देहजात्यादिसम्बन्धान् वर्णाश्रमसमन्वितान् । भावानेतान् परित्यज्य स्वं भावं भावयेद्बुधः ॥ सर्वोपाधिविनिर्मुक्तं चैतन्यं यन्निरन्तरम् । तद्ब्राह्मणमिति ज्ञात्वा कथं वर्णाश्रमी भवेत् ॥ इति । तदपि वररुचेः ऋषिभावनयोपदेशपरं चेत् परिगृहीततमऋष्यन्तरस्मृत्यन्तरादिवचनाविरोधेन यथावस्थितपरिशुद्धात्मस्वरूपानुसन्धानपूर्वकवर्णाश्रमधर्मविशेषविधिपरतया योज्यम् । उपपत्तिपरं चेत् सर्वधर्मोपप्लवमूलकुतर्ककल्ककल्पितत्वेन प्रामाणिकैर्बीभत्सनीयम् । बृहस्पतिप्रणीतलोकायतादिग्रन्थवत् । विदुरवृत्तान्तोऽपि प्रागुक्तन्यायेन व्याख्यातः ।

यद्यपि * जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम् । देवताराधनं चेति स्त्रीशूद्रपतनानि षट् ॥ इत्यादि स्त्रीशूद्रादिषु भर्तृत्रैवर्णिकशुश्रूषाबहिर्भूतजपतपःप्रभृतिषु पतनस्मृतिः, तथाऽपि क्षत्रियविशेषस्य सन्न्यासाभ्यनुज्ञानवच्छूद्रादेरपि केषुचिद्व्रतेष्वनुज्ञानमस्ति । न च तस्य यज्ञोपवीतादिपरित्यागलक्षणदोषावकाशः, प्रागेव तदभावात् । ये

च नग्नचर्यामातिष्ठन्ते महात्मानः ते हि ब्रह्मचर्यकाष्ठामधिष्ठाय तथा भवन्ति । * ऋषयो वातरशनाः, * वातरशना ह वा ऋषयश्श्रमणा ऊर्ध्वमन्थिनः इति हि श्रूयते । न पुनर्भवन्त इव पट्टांशुकादिभाण्डागारशालिनः क्षितिसुरचण्डालक्षीरसुरादिभेदत्यजः परकलत्रशरणाः पशुमृगसधर्माणः प्रजननसन्तताः श्रूयन्ते । सनत्कुमारादीनां नग्नता नित्यबाल्यावस्थतया, केवलब्रह्मभावनाभावितात्मानः कुमारा हि ते महात्मानः श्रूयन्ते । पशुपतेर्नग्नचर्या तु पाशुपतव्रतविशेषाङ्गरूपत्वात् तत्र धर्मत्वसदसद्भावयोरपि त्रयीधर्मनिष्ठैरनुपादेयैव । यत्पुनर्मुग्धेन्दुशेखरस्य मुनिधर्मदारमोहनादिकमवैदिकाचारजालम्, तत्र वैराग्यशालिनस्तस्य मोहनाभिसन्धिविरहः प्रस्पष्टं पठितः । अन्यथाऽपि तस्येश्वरत्वमभ्युपगच्छतामीश्वरत्वादेव परिहृतम् । * न देवचरितं चरेदिति ह्याहुः । लोकवेदविरुद्धयोरप्यलेपः स्वतन्त्रश्चेति हि महापाशुपताः प्राहुः । अनीश्वरत्वपक्षे तु तेजोविशेषेणैव सोढव्यम् । स्मरन्ति हि * दृष्टो धर्मव्यतिक्रमः साहसं च पूर्वेषां तेषां तेजोविशेषेण प्रत्यवायो न विद्यते तदन्वीक्ष्य प्रयुञ्जानस्सीदत्यवरजः इत्यादि ।

एतेन सर्वेश्वरस्य भगवतो वसुदेवनन्दनस्य स्वच्छन्दलीलया गोपवधूदर्शनव्याकुलीकरणं व्याख्यातम् । परिहृतं चैतदकर्मवश्यतया भगवत्पराशरादिभिः ; * कामाद्गोप्य इति भगवत्यनुरागानुवृत्तिरपवर्गायैव जायत इति चोक्तम् । ननु धर्मसंस्थापनार्थाय संभवस्तत्क्षोभकरणं चेति कथमिदमुपपद्यते ? न, उक्तोत्तरत्वात् । नन्दगोपनन्दनत्वाभिमानमभिनयतस्तस्य न तावत्तदानीं वर्णाश्रमाचारानुवृत्तिनियमः । आभीरकन्यका अपि भगवन्तमेव भर्तारमभ्यर्थ्य जन्मान्तरचरितव्रता दिव्यप्रकृतय एवेति तास्वप्सरस्समाधिरनुसन्धेयः । तत्तदभिमतफलप्रदानं चेश्वरस्यादोषायेति । यदा तु भगवान् वसुदेवतनयतया प्रतिबोधमभिनयन् यदुवंशोदितं क्षत्रधर्ममनुप्राविशत्, तदा सावधान एव सर्वदा सर्वान् धर्मानन्वपालयत् । तथाहि सर्वत्र कथ्यते—* न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन । नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ इति । तथा, * कृतोदकः कृतजपो हुताग्निस्समलंकृतः । तत उद्यन्तमादित्यमुपातिष्ठत माधवः ॥ इति । तथा अश्वत्थामास्त्रपावकप्लुष्टविराटतनयागर्भसञ्जीवनावसरे साधिकषोडशस्त्रीसहस्ररसिको बृन्दावनविहारी वल्लवीबृन्दनिविष्टयौवनारम्भो भगवान् स्वयमेवावोचत्—* यदि मे ब्रह्मचर्यं स्यात् सत्यं च मयि तिष्ठति । अव्याहतं ममैश्वर्यं तेन जीवतु बालकः ॥ इति ।

ननु श्वेताश्वतरोपनिषदुपसंहारे तदधिकारितया अत्याश्रमित्वोपपादनादप्राप्तार्थत्वेन तद्विधिरिति चेन्न ; अतिशयिताश्रमविशेषनिष्ठ इति वा, ब्रह्मचर्यादित्रयातिक्रान्ताश्रमविशेषनिष्ठ इति वा, अन्येन वा केनचिदविरुद्धेन निमित्तेन तन्निर्वाहात् । अन्यथा स्फुटतरार्थश्रुतिस्मृतीतिहासादिशतकोपप्रसङ्गः । * शारीरं केवलं कर्म कुर्वन्, * सर्वारम्भपरित्यागी, * सर्वधर्मान् परित्यज्येत्यादिभिस्सर्वधर्मपरित्यागोक्त्या चानाश्रमित्वसिद्धिरिति चेन्न; फलसङ्गकर्तृत्वादिविषयतया वा विधीयमानधर्मव्यतिरिक्तविषयतया वा यथासंभवं तद्व्यवस्थापनस्य तत्र तत्रैवोपक्रमादिभिर्व्यक्तत्वात् । * सन्न्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् । इति सन्न्यासत्यागतत्त्वबुभुत्सयोपसेदुषे धनञ्जयायोक्तं भगवता—* एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च । कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ नियतस्य तु संन्यासः कर्मणो नोपपद्यते । मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ इति । एतेन, * यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः । आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते ॥ नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन । नचास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥

इत्यादीन्यपि वाक्यानि सर्वकार्यस्वरूपनिषेधपराण्यपि मुक्तदशां समाधिदशां वाऽऽश्रित्य निर्वाह्याणि । अतो यथायथमाश्रमविशेषविषयो वा फलसङ्गकर्तृत्वादिविषयो वा सन्न्यासपरित्यागादिवादः, न पुनस्स्वैरपर्यवसित इति सिद्धम् ।

एतेन * न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः, * न्यास एवात्यरेचयत्, * तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः इत्यादि, *किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे किं प्रजया करिष्यामः येषां नोऽयमात्मा ब्रह्मलोक इत्यादिकमपि धर्मविशेषादिविषयतया तत्रत्यात्मसमर्पणादिविषयतया वा यथायथं निर्वोढव्यम् । अतस्सर्वाश्रमपरित्यागोक्तिसंभवेऽपि प्रागुक्त एव न्यायः । न च तथाऽस्ति, अपि तु * त्रयो धर्मस्कन्धाः इत्याश्रमान्विधाय * ब्रह्मसंस्थोऽमृतत्वमेतीत्याश्रमनिष्ठानामेव ब्रह्मविदाममृतत्वं श्रूयते । * स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते इति यावज्जीवं गृहस्थधर्मनिष्ठस्य ब्रह्मविदोऽपुनरावृत्तिराम्नाता । * यो वा एतदक्षरं गार्गीत्यादौ च ज्ञानरहितकर्मणामन्तवत्फलसाधनत्वं ज्ञानपूर्वककर्मणां स्थिरफलसाधनत्वं चोक्तम् । अतो न कदाचिदपि यावज्जीवं स्ववर्णाश्रमोचितधर्मस्वरूपत्यागसंभवः । यानि चान्यानि वाक्यानि सम्प्रतिपन्नश्रुतिस्मृतिष्वदृश्यमानानि स्वाचारानुरूपमतपरिचर्यया केषुचिदप्रसिद्धेषु वा नष्टकोशेषु वा अनिरूपितमूलाग्रेषु वा पुराणेषु प्रक्षिप्य पठन्ति पापिष्ठाः ; तानि प्रत्यक्षश्रुत्यादिपरिशीलनशालिनीषु गरिष्ठगोष्ठीषु नावकाशं लभन्ते । तत्प्रामाण्येऽपि प्रसिद्धाविरोधेन नेतव्यमित्यत एवैतान्यपि निर्व्यूढानि ।

न च तृतीयः, अनाश्रमित्वाक्षेपकवचनादर्शनात् । जीवन्मुक्ते श्रुत्यर्थापत्त्यैवानाश्रमित्वसिद्धिरिति चेन्न ; तद्दूषणादेव तदसिद्धेः । अस्तु नित्यमुक्तिवशात्सर्वाश्रमत्याग इति चेन्न ; तस्या अपि मोक्षोपायोपदेशकशास्त्रादेव विस्तरतस्तत्प्रकरणे निषेधात् । चतुर्थस्तु विपरीत एव । अथ गौडपादहरिप्रभृतिभिराचरितत्वात्सर्वाश्रमपरित्यागोऽस्माभिः स्वीकृत इति चेत् ; हन्त सदाचारनिदर्शनतया महान्त इमे दुर्ब्राह्मणशूद्रसन्तानादयः शिष्टा निर्दिष्टाः, यदनुविधायिनोऽपि यूयं शिष्टैर्बहिष्क्रियन्ते । हन्तैवं सति धर्मकीर्तिप्रभृतिभिः परिगृहीतत्वात्सौगतलोकायतिकादिसमय एव किं न स्वीक्रियते ? न च वस्तत्परिग्रहेऽपि मुक्तिः प्रतिबध्यते । सत्यम्, तथाऽपि येनाकारेण यावज्जीवं जीवनाय लोको रञ्जयितुं शक्यः तेन यथायथं वर्तामह इति चेत्, सत्यमिदमन्तर्गतमुद्गीर्णं भवता, तदेव चार्वाकसमयरहस्यमिति तत्प्रहारेण प्रहृतमिदम् । न हि चार्वाकान् भवन्तोऽपि गोष्ठीषु व्यक्तमन्तर्भावयन्ति । भजन्तु वा प्रकाशं चार्वाकाभिख्याम् । ननु ब्रह्मविच्छब्दोऽस्मासु प्रयुज्यमानो दुरपह्नव इति चेत् ; सत्यम्, भ्रान्तिमूलतया निरर्थकोऽयमिति ब्रूमः । दिगम्बरादिष्विदानीमृष्यादिशब्दप्रयोगवत् । तत्त्वविद इति भवता स्वयं स्थानेषु समाहूयामह इति चेत् ; किमतः ? तत्त्ववित्त्वमेवेति चेन्न ; तस्य विडम्बनपरत्वात्, भवदधीनकार्यलाभकालप्रतीक्षणाद्वेति ।

नापि पञ्चमः, अधर्मत्वप्रसङ्गात् । यद्यपि स्वाश्रमधर्मानुष्ठानक्लेशादात्मानुसन्धानविच्छेदभयेन सर्वधर्मपरित्याग इति तु यथाहृदयं सत्यं वचः, तथापि श्रुतिस्मृत्यादयः शक्तानां धर्मलोपे प्रकुप्येरन्निति प्रायश्चित्तेन प्रतिसन्धानं वा निरयपतनं वाऽवश्यंभावीति निश्चीयताम् । अयं हि राजसस्त्यागः । यथोक्तं * दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् । स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् इति ।

षष्ठस्तु हेतुस्तदा शोभते, यद्यशक्तिरनाहार्या परमार्थभूता स्यात् । नह्यशक्तमधिकृत्य शास्त्राणि प्रवर्तन्ते । न च तत्त्वतोऽशक्तिः, अन्येभ्यश्शक्तेभ्योऽनुतिष्ठद्भ्यो विशेषादर्शनात् । स्वहृदयविसंवादाच्च । सन्ति च धर्मसाक्षिणोऽन्येऽपि *आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् ॥ इति । विधुरत्वादिदशास्वपि सर्वसामान्यधर्मादेरनुवर्तनीयत्वं तच्चलने च प्रायश्चित्तं तदकरणे प्रत्यवायश्चेति ।

नापि सप्तमः, सामान्यनिर्देशमात्रेण तदसिद्धं विशेषतस्तदनिरूपणादिति न कदाचिदपि बुद्धिपूर्वपापानामलेपसंभव इति ।

ननु भवन्तोऽप्यन्त्यजपर्यन्तान्भगवद्भक्ता इति धावन्तस्समाचारविप्लवाय जायन्त इति समोऽयम्, अस्माकं पुनः को विशेष इति चेत्; मैवम्; किं त्वया मुक्तानां तेषां प्रतिष्ठार्चनादिरूपसंभावनमुपप्लवकारणतयोपन्यस्तम्, उत जीवतामेवावज्ञादिपरिहारेणान्येभ्य उत्कर्षभावनमिति । न प्रथमः, तेषां भगवदुपासनप्रभावविशेषनिश्शेषिताविद्याकर्मवासनादेहसंबन्धादीनामाविर्भूतभगवत्साम्यानां जातिविशेषसंबन्धाभावेऽपि भक्तप्रतिष्ठार्चनशास्त्रैः पुरुषान्तरव्यावर्तनाय पूर्वाकारमुपलक्षणीकृत्य तत्समाने बिम्बे सन्निधाप्य सभाजनविषयतया प्रतिपादितानां तत्तच्छास्त्रप्रामाण्यानुसारेण तत्तदुचितसभाजनं विधीयमानं कथं पुनरुपप्लवकारणमुन्नीतं भवता? मुक्तावनन्तगरुडविष्वक्सेनतुल्या *इमाँल्लोकानिति श्रुत्या भगवदनुसञ्चरणादिकं कुर्वन्तीति सिद्धम् । नापि द्वितीयः, अनेनैव शरीरेण विद्यमानेषूपप्लवपर्यन्तसंभावनस्य तेष्वभावात् । तथाविधेभ्योऽन्येभ्यस्तेषु भगवद्भक्त्या संजातमतिशयमाद्रियामहे, न पुनर्जात्यादिभेदमेव भवन्त इव स्वरूपतो निह्नवामहे, येनाचारविप्लवस्स्यात् । न च जात्याद्यनुरूपसंबन्धादिवर्जनाद्भगवद्भक्तेष्वपि तेष्ववज्ञादिप्रसङ्ग इति वाच्यम्; तत्कालोचितस्पर्शवर्जनेऽपि स्त्रीधर्मिण्यामात्मजनन्यामिव मानसिकवाचिकसंभावनासामर्थ्यवैभवेन पुराणेतिहासभगवद्वाक्यशतनिर्णीतेन शास्त्रानुसारिणामवज्ञाप्रसङ्गाभावात् । उक्तं च भगवता *मद्भक्तान् शूद्रसामान्यान्नावमन्येत बुद्धिमानिति। यथा, मतङ्गजतुरङ्गमविहङ्गमगोमृगादिषु पुरोहितामात्यसामन्तान्तःपुरकुब्जकिरातवामनबधिरादिषु च महीपतिसमाश्रयणमहनीयतां गतेषु विशेषादनवमन्तव्येषु तत्तज्जातिगुणानुगुणवैषम्यव्यवस्थितमेवानुपाल्यते तथा भगवत्समाश्रितेष्वपीति न कश्चिद्दोषः । राजाधिराजस्य भगवतो राजवदुपचार इति न्यायात् । आदिभक्तानामनन्तगरुडादीनामिच्छावतारभेदा इति पुराणप्रसिद्धम् । तेन तेषां प्रतिष्ठार्चनादिकं रामकृष्णादिभगवदवतारादीनामिवेति भक्तप्रतिष्ठाशास्त्रानुसारेण निर्णेतव्यमिति ॥

॥ इति शतदूषण्याम् अलेपकमतभङ्गवादः पञ्चषष्टितमः ॥ ६५ ॥

॥ अथ परमते सूत्रस्वारस्यभङ्गवादः षट्षष्टितमः ॥ ६६ ॥

नमोऽस्तु ब्रह्मणे तस्मै बादरायणरूपिणे । यस्यैव ब्रह्मसूत्राणां रचना सगुणायते ॥
अद्वैतमतनिष्ठानामनुष्ठानमपाकृतम् । ब्रह्मसूत्रार्थवैरूप्यं तेषामथ निरूप्यते ॥

यदाहुः—आपादचूडं ब्रह्मसूत्रेषु निर्विशेषं ब्रह्मैवार्थः प्रपञ्चमिथ्यात्वं च स्पष्टमुपपाद्यते, तथा हि—यद्ब्रह्म जिज्ञास्यतया प्रक्रान्तं तदेव हि नाना नास्तीति श्रुतिप्रामाण्यप्रागल्भ्यात्तदनुसारिसूत्रस्वारस्याच्च निर्विशेषमिति निश्चिन्वन्ति

महान्तः। तत्र बहुषु सूत्रेषु तद्विषयभूतासु श्रुतिषु च एकवचनान्तनिर्देशादात्मैक्यं स्वरसतः प्रतीयते। सचात्मा पुनः * न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हीत्यादिभिस्सूत्रकलापैर्निर्गुणत्वेन निर्णीतः। * भेदादिति चेन्न प्रत्येकमतद्वचनात्, * अरूपवदेव हि तत्प्रधानत्वात्, * आह च तन्मात्रमित्यादिभिरनेकेष्वधिकरणेषु भेदप्रसङ्गो निराकृतः। ब्रह्मव्यतिरिक्तानां पदार्थानां कार्त्स्न्येनानभिव्यक्तस्वरूपत्वं * मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादित्यादिभिर्निपुणतरमुपपादितम्। * संपद्याविर्भावस्स्वेन शब्दादिति मुक्तस्य स्वरूपाविर्भावमुपपाद्य, * अविभागेन दृष्टत्वादिति ब्रह्मस्वरूपाविभाग एव फलतया निर्दिष्टः; इत्थमापादचूडं शारीरकशास्त्रे बहुषु सूत्रेषु निष्प्रपञ्चनिर्विशेषब्रह्मात्मैक्यस्य प्रतिपन्नत्वादुपात्तकतिपयसूत्रव्यतिरिक्तानि सूत्राण्यपि निर्विशेषमेव परं ब्रह्मोपपादयन्तीति नीतिविदां निर्णयः। यानि पुनस्सगुणब्रह्मप्रतिपादकानि वाक्यानि, तानि गरुडमात्मानं जानीयादित्यादिष्विव तत्तदुपासनार्थकल्पिताकारविशिष्टब्रह्मपराणि क्रममुक्तिन्यायेन परम्परया मोक्षविश्रान्तानि। क्वचित्तु कल्पितेनाकारेण शाखाचन्द्रोपदेशन्यायेन उपलक्षणतया दर्शनेन ब्रह्मस्वरूपोपदेशपराणि। व्यास एवास्माकमादिगुरुरुपनिषदनुसारिभिस्सर्वैरेवास्माभिरनुसर्तव्यः। न च प्रमाणविरोधात् ब्रह्मसूत्राणामप्रामाण्यमन्यपरत्वं वा, तद्विरुद्धानामेव प्रमाणानामप्रमाणत्वात्; अन्योन्यतस्तेषामाभिमानिकप्रमाणानां विरोधाच्च। अभिमानप्रतिष्ठितं हि तत्तत्सिद्धान्तपरिगृहीतानां प्रमाणानां प्रामाण्यम्; अन्यथा स्वसिद्धान्तविरोधप्रसङ्गात्। ततश्च प्रमाणविरोधेऽप्यविरोधेऽपि सूत्रस्वारस्यानुरोधेन बादरायणसिद्धान्तोऽयमिति निश्चिते तिष्ठ वा तत्र हृदयाक्रोशेन, तत्परित्यागेन वा हृदि विन्यस्तहस्तः पक्षान्तराण्यधिशेष्वेति।

अत्रोच्यते, * अथातो ब्रह्मजिज्ञासेति सूत्रमेव तावदद्वैतिनां न घटते, चिन्मात्रस्य स्वप्रकाशत्वेन ज्ञानाविषयतया जिज्ञास्यत्वायोगात्। आरोपितगुणविग्रहादिविशिष्टस्याविद्यापरिणतिरूपत्वेन सुतरां जिज्ञास्यत्वायोगात्; ब्रह्मशब्दार्थानुपपत्तेः प्रागेव प्रपञ्चितत्वाच्च। तथा * जन्माद्यस्य यतः इति सूत्रमपि ब्रह्मस्वरूपलक्षणोपदेशपरम्, लक्षणं चासाधारणधर्मः, स कथं निर्विशेषे संघटते? उपलक्षणत्वेऽपि सुतरां सविशेषत्वमेव। उपलक्षणाकारोपलक्ष्याकारपूर्वप्रतिपन्नाकारविभागविरहात् निर्विशेषस्योपलक्ष्यत्वमपि न संभवतीति प्रागेव प्रपञ्चितम्। सामानाधिकरण्यस्य सविशेषार्थनिष्ठत्वस्य न्यायप्राप्तत्वात् सत्यज्ञानादिवाक्ये स्वरूपलक्षणवर्णनापटाटोपोऽप्युत्पाटनीय इत्युक्तं प्रागेव। शास्त्रयोन्यधिकरणमपि शास्त्रगम्यत्वाभावादेव निरस्तम्, तद्गम्यत्वे वा प्रमाणविषयत्वात् दृश्यत्वमेव पार्ष्णिं गृह्णाति। व्यावहारिकशास्त्रगम्यत्वं तु व्यावहारिकानुमानगम्यत्ववदपध्वस्तम्। भवता च प्रमाणप्रमेयखण्डनात् शास्त्रप्रामाण्यमपि पाषण्डवादैस्सपिण्डीकृतमेव। वेदान्तशास्त्रस्यापि तर्कात्मकत्वात्तर्काणां स्वरूपलक्षणादिखण्डनप्राचण्ड्यमेव शरणयतां कस्तर्कः, किं वा तदधीनार्थतत्त्वव्यवस्थापनम्, कथंच तत्त्वावेदकता तत्त्वमस्यादिवाक्यानामिति परिपश्य। तथाच सर्वशास्त्रकुक्षिंभरिमाध्यमिकोक्तिरेव विजयते। समन्वयसूत्रं च समन्वयमेव हेतुत्वेनोपाददाति, अन्वयस्तु भेदस्य प्राणबन्धुरिति सर्वलोकविदितमेतत्। आनन्दमयाधिकरणे प्राचुर्यार्थमयट्प्रयोगादानन्दाभ्यासस्य हेतुत्वेनोपादानाच्च भेदवाद एव साम्राज्यमाटीकते। ईक्षत्यधिकरणेऽपि तदेवानुविदधाति, ईक्षणादिगुणयोगस्य मुख्यतयाऽभिधानात्। आकाशप्राणाधिकरणयोरपि ब्रह्मलिङ्गमेव पुरस्क्रियते, लिङ्गं पुनरसाधारणधर्मः; निर्विशेषे किं लिङ्गं किंच वा साध्यमिति स्वयमेव विचारय। ज्योतिरधिकरणे चरणाभिधानं मरणायते मृषावादस्य, निर्विशेषस्य कश्चरणः, का वा दीप्तिरनुत्तमेषु लोकेषु? इन्द्रप्राणाधिकरणेऽपि * प्राणस्तथानुगमादित्युपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गोपेतमहावाक्यसामर्थ्यादिन्द्रान्तर्यामिणो महा-

पुरुषस्यैव प्रसाधनात्सविशेषपरत्वमेव । वाक्यं तावदन्विताभिधानेऽप्यभिहितान्वयेऽपि सविशेषपरमेवेति तत्र तत्र क्रियासमभिहारेण साधितम् । वाक्यार्थोऽपि प्राणेन्द्रादिवैशिष्ट्यात्मकत्वात्सविशेषरूप एवेति निरूपितः ।

एवं शारीरोपक्रमसूत्राणां सगुणब्रह्मैदम्पर्ये समर्थिते त्रिपाद्यामपि अनेनैव न्यायेनार्थतत्त्वं निर्णेतव्यमधिगुणैरन्तेवासिभिः; स्थालीपुलाकन्यायानुसारस्य न्याय्यत्वात् । अविरोधाध्यायसूत्राणामादिमाध्यायशेषत्वान्न पृथगभिधेयं तात्पर्यमवशिष्यते । वैराग्योभयलिङ्गपादयोस्संसरतो जीवस्य संसारनिवर्तकस्य च परमात्मनो मिथो वैषम्यमुच्यते; स एव भेदवादः । गुणोपसंहारपादस्य नामैव निर्गुणवादस्य हृदयशूलम् । अङ्गाङ्गिभाववादोऽपि तस्यैव कर्णज्वरः । तेन त्रिभिरध्यायैस्सगुणमेव निर्णीयते । फलाध्याये तु फलनिर्देश एव निर्गुणवादिनां निष्फलं प्रलापमाविष्करोति, परमात्मसेविनो जीवस्यैव सांसारिकफलसाधनपुण्यपापरूपकर्माश्लेषविनाशौ देहादुत्क्रमणमर्चिरादिना देवयानेन गमनं परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पत्तिरपुनरावृत्तिश्चेति, शारीरकपञ्चमाध्याये निर्गुणमशरीरमलक्ष्मिकमपरिवारकमविभूतिकं चिन्मात्रमिति पारिभाषिकं ब्रह्म प्रतिपाद्यताम् ।

यदुक्तं जिज्ञास्यतया प्रक्रान्तं ब्रह्मैव * नात्मा श्रुतेरित्यादावपि प्रतिपाद्यत इति, तदसत्; * ज्ञोऽत एव, * कर्ता शास्त्रार्थवत्त्वात्, * परात्तु तच्छ्रुतेरित्यादिभिस्तत्रत्यैस्सूत्रैरात्मशब्दनिर्दिष्टस्य तस्य ज्ञातृत्वकर्तृत्वपरमात्मायत्तत्वादिप्रतिपादनात्, तस्य च सर्वस्य त्वदभिमतेऽस्मदभिमते वा ब्रह्मण्यसंभवात् । भ्रान्त्या संभवतीति चेन्न; परिशुद्धस्वरूपोपदेशदशायां प्रतिपक्षप्रतिक्षेपपूर्वकस्य भ्रान्तिसिद्धाकारसमर्थनस्य विरुद्धत्वात् । अन्यथा * नात्मा श्रुतेरित्यधिकरणेऽपि यथालोकमुत्पत्तिविनाशयोरेव समर्थनप्रसङ्गात् । यदि तत्र लोकसिद्धाकारप्रतिषेध उपचिकंसितः तदा लोकसिद्धं कर्तृत्वादिकमपि नास्तीत्येवोपदेष्टुं युक्तम् । यदि तत्रैव सूत्राणां तात्पर्यमिति मनुषे, तदा प्रारब्धं त्वयैव सूत्रान्यथाकरणम् । अप्रस्तुतमात्मान्तरमिह कथं परीक्ष्यत इति चेन्न; * अथातो ब्रह्मजिज्ञासेत्यत्रैव विषयतया ब्रह्मण इव अधिकारितया मुमुक्षोः प्रकृतत्वात्, तस्य च स्वरूपज्ञानावश्यम्भावित्वेन क्वचित्स्वरूपस्यावश्योपदेष्टव्यत्वात् । व्यवच्छेद्यतया प्रधानमिव जीवोऽपि प्रथमाध्याये सर्वत्र प्रकृतः । यदि विषयत्वेनाप्रकृतत्वादपरीक्षणीयता, तदा वियत्प्राणादेरप्यपरीक्षणप्रसङ्गः । धर्मं जिज्ञासमानस्य तत्सम्बन्धिनिरूपणम् । यथैवं ब्रह्मजिज्ञासेत्युक्ते जीवनिरूपणम् ॥

किंच * असंभवस्तु सतोऽनुपपत्तेरित्यत्रैव सच्छब्दवाच्यस्य परस्य ब्रह्मण उत्पत्त्यादिप्रतिषेधात् * नात्मा श्रुतेरिति निरर्थकः पुनरारम्भः । अतो नात्र जिज्ञास्यतया प्रक्रान्तं ब्रह्मात्मशब्दनिर्दिष्टम्, अपि तु जिज्ञासाकर्तृतया प्रस्तुतो जीवः । यत्पुनरुक्तं एकवचनान्तनिर्देशादात्माद्वैतस्वारस्यमिति, तदपि न; *श्रेष्ठश्चेत्यादिसूत्रेष्विव जात्यैक्यविवक्षया तत्प्रयोगसंभवात् । तदुक्तमंशाधिकरणे * नात्मा श्रुतेरित्यत्राप्येकवचनं जात्यभिप्रायमिति । याश्च तत्सूत्रविषयतया * नित्यो नित्यानां चेतनश्चेतनानामित्यादिश्रुतय उपादीयन्ते, ताभिरपि सौत्रस्यैकवचनस्य जात्यभिप्रायत्वं व्यक्तम् । यद्युद्देश्यगतत्वेन बहुत्वमविवक्षितम् । य एक इति निर्दिष्टमेकत्वं किं विवक्ष्यते ॥ अत एव * अजो नित्य इत्यादिश्रुत्यन्तरमपि निर्व्यूढम् ।

यत्तूभयलिङ्गाधिकरणे समस्तविशेषशून्यत्वं प्रत्यपादीति; तदप्यसत्, तत्र हेयगुणनिषेधेन समस्तमङ्गलगुणविशिष्टस्यैव प्रतिपिपादयिषितत्वात्, तदाह—* सविशेषं ब्रह्मेत्येव हि तत्र वक्ष्यतीति । वाक्यस्योभयलिङ्गशब्दा-

नादरेणासन्निहितदोषाख्यनिषेध्याध्याहारो न युक्त इति चेन्न; स्ववाक्यस्थस्यापि गुणस्य स्वरूपत एव निषेधानुपपत्तेः। न हि गुणो गुणत्वादेव निषेध्यः, वैपरीत्यात्। न च दोषकोटिनिक्षेपेण तन्निषेधः, सर्वज्ञत्वादेर्दोषत्वस्य प्रमाणाभावात्। अतः पारिशेष्याद्दोष एव निषेध्य इति स्थिते जागरितस्वप्नाद्यवस्थासु जीवस्य ये दोषाः पूर्वेष्वधिकरणेषु प्रकृताः त एवात्र निषेध्यतया सूत्रकृदभिप्रेता इति स्पष्टमेव ज्ञातुः। ततश्च * भेदादिति चेन्न प्रत्येकमतद्वचनादित्यादिसूत्रेष्वपि नाप्रस्तुतानुपयुक्तत्वदभिमतार्थसिद्धिः। अन्यथा * प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः इति समनन्तरसूत्रविरोधः। न हि तत्र प्रकृतं प्रतिषेधतीत्युक्तम्, अपि तु प्रकृतैतावत्त्वमिति। एतेन निषेधानां सर्वेषां विहितानुरोधेन विषयव्यवस्था कर्तव्येति दर्शयति। सामान्यस्य निषेधस्य विहितव्यतिरेकतः। निर्वाहस्सुप्रसिद्धश्च निगमेष्ववगम्यते॥

अत एव सन्ध्यादिकरणेऽपि *मायामात्रं त्वित्यादिना न प्रपञ्चमिथ्यात्वं विवक्षितमिति गम्यते। मायाशब्दस्य च न मिथ्यात्ववाचित्वमिति स्थलान्तरे विशदं द्रष्टव्यम्। आह च—* मायामात्रं त्विति च स्वाप्नानामप्यर्थानां जागरितावस्थानुभूतपदार्थवैधर्म्यमात्रेण मायामात्रत्वमुच्यते इत्यादि। * मेघोदयस्सागरसन्निवेशः इत्यारभ्य * विष्णोर्विचित्राः प्रभवन्ति मायाः इत्यादिषु मायाशब्दस्य विचित्रसृष्टिविशेषपरत्वमेवेति सुव्यक्तमुपपादितम्। अस्तु वाऽस्य मिथ्यार्थवाचित्वम्, तथाऽप्यस्मिन् सूत्रे स्वाप्नार्थानामेव मिथ्यात्वमुच्यते, *सन्ध्ये सृष्टिराह हि, *निर्मातारं चैके पुत्रादयश्चेति पूर्वपक्षसूत्राभ्यां स्वाप्नार्थानामेव प्रकृतत्वस्य भवद्भिरपि व्याख्यातत्वात्। सत्यं स्वाप्नार्थमिथ्यात्वमधिकरणसाध्यम्, तत्र कैमुत्यलाभाय जागरितानामपि मिथ्यात्वं * कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादित्यनेन प्रदर्श्यत इति चेन्न; विश्वमिथ्यात्वसिद्धौ स्वाप्नार्थसत्यत्वपूर्वपक्षानुत्थानात्। अथ विश्वमिथ्यात्वमेव स्वाप्नार्थमिथ्यात्वप्रदर्शनद्वारा अत्रैव प्रसाध्यत इति मन्यसे; तदप्यसत्, प्रपञ्चमिथ्यात्वं प्रस्तुत्य स्वाप्नार्थनिदर्शनस्योचितत्वात्। प्रथमसूत्र एव विश्वमिथ्यात्वप्रसाधनमुखेन विश्वस्य ज्ञानबाध्यतया ज्ञानप्रधानं शास्त्रमारम्भणीयमिति भवद्भिस्समर्थनाच्च। अथ वक्ष्यमाणोपजीवनेन शास्त्रारम्भमात्रं तत्र समर्थ्यत इति पश्यसि; तदा नीतिनिबन्धनात्मकस्य सूत्रस्य व्युत्पाद्यमतिमन्दं स्यात्। किंच * कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादित्यत्र न जागरगन्धं पश्यामः। कार्त्स्न्यशब्देन तस्यापि संग्रह इति चेन्न; प्रकृतैकदेशाबहिष्कारे तस्य व्युत्पत्तेः, ततश्च स्वाप्नार्थानां सर्वेषामेव मिथ्यात्वं विवक्षितं स्यात्; अन्यथा स्वाप्नार्थमिथ्यात्वं प्रतिज्ञाय जागरितार्थानामनभिव्यक्तस्वरूपत्वं हेतुरुच्यत इति व्यधिकरणं स्यात्। अतः स्वाप्नार्थमिथ्यात्वसाधनाय तन्निष्ठमेवानभिव्यक्तस्वरूपत्वं हेतुतया सूत्र्यत इति नात्रापि विश्वमिथ्यात्वप्रतिपादनकथाऽपि।

यत्पुनः मोक्षोपायोपदेशदशायाम् * आत्मेति तूपगच्छन्तीति ब्रह्मात्मैक्यानुसन्धानं सूत्रितमिति, तदपि न पश्यामः, आत्मशब्दस्य नानार्थरूढत्वात्, शरीरप्रतिसम्बन्धिनि रूढिप्रकर्षाच्च; ततश्शरीरीत्यनुसन्धानं सूत्रितं स्यात्। युक्तं चैतत्, ब्रह्मणस्सर्वशरीरित्वेनान्तर्यामिब्राह्मणादिषु प्रपञ्चितत्वात्। यद्यपि स्वपर्यायोऽयमात्मशब्दो भाष्येऽन्वारूढः, तथाऽप्यन्ततोऽयमेवार्थः प्रपञ्चयिष्यते। अत्राप्यधिकरणे वक्ष्यति * इदमेव शरीरात्मभावलक्षणं तादात्म्यम् * आत्मेति तूपगच्छन्तीति वक्ष्यतीति। विपरीतश्चायं व्यपदेश आयुष्मतः, अहं ब्रह्मास्मीत्यनुसन्धानं ह्यत्र व्याख्यायते, तच्च भ्रान्तिरूपमिति भवतेष्टव्यम्, विलुप्ताहंभावादिविप्लवसंविन्मात्ररूपत्वाभ्युपगमात् ब्रह्मणः; ततश्च मोक्षोपायतया भ्रान्तिरेव सूत्रितेत्यायातम्। शालामालादिन्यायेन विवक्षितपर्यवस्थापनं तु सूत्रस्वारस्योपन्यासदशाविरुद्धम्। किंच, इतिकरणस्वारस्यादत्र दृष्टिविधिसूचनमेव स्वरसम्, तथैव हि श्रुतिरपि * आत्मेत्येवोपासीतेति, वाक्यं च * आत्मेत्येव तु गृह्णीयादिति।

प्रसिद्धश्चायमर्थः स्मृतिष्वपि * ब्रह्माहमिति भावयेदित्यादिषु, तन्त्रेषु च * देवोऽहमिति भावयेदिति। अतोऽत्र इतिकरणस्वारस्यात् * मनो ब्रह्मेत्युपासीतेत्यादाविव दृष्टिविधित्वमात्रसिद्धौ उपास्यस्य दृष्टिविशेषणस्य चात्यन्तभेदस्य सार्वत्रिकत्वात् अत्रापि जीवब्रह्मणोर्भेद एवान्ततस्सूत्रितस्स्यादिति नात्र भवतः कश्चिदवकाशः।

यत्तु फलदशायाम् * अविभागेन दृष्टत्वादित्यविभागानुभवस्सूत्रित इति, तदपि मन्दम्; अविभागशब्दस्य स्वरूपैक्यनियतत्वाभावात्। विभागो हि परस्परसम्बन्धपरिपन्थिधर्मविशेष इति विदुषां प्रसिद्धिः, तेनाविभागोऽप्यपृथक्सिद्धिरेवेति सिध्यति, न पुनः स्वरूपैक्यम्, तत्र तद्व्यवहारश्चौपचारिकः। अस्तु वा मुख्यः, तथाऽप्यनियतत्वादन्यथासिद्धः, वाङ्मनःप्रभृतिसंपत्तिवदवस्थाविशेषमात्रविवक्षया * अविभागो वचनादित्यसूत्रयत्, अत्र तु यथाप्रमाणमपृथक्सिद्धत्वविवक्षयाऽयमविभागशब्दः, अन्यथा प्रमाणविरोधादुपपत्तिविरोधाच्च। प्रयुञ्जते च मध्यस्था दण्डो देवदत्ताद्विभक्तः जातिगुणादिकं त्वविभक्तमिति च। यद्वा विभागो भेद एवास्तु, अविभागश्च भेदनिवृत्तिः, तथापि स्वरूपभेदोऽत्र निषिध्यत इत्यत्र न प्रमाणं पश्यामः, प्रत्युत पूर्वापरसूत्रशतपरामर्शात् * भोगमात्रसाम्यलिङ्गाच्चेति उपान्त्यसूत्रसंवादाच्च किंचिज्ज्ञत्वसर्वज्ञत्वपरिमितसुखत्वनिरतिशयानन्दत्वादिवैधर्म्यलक्षणभेद एव निषिध्यत इति स्वरसतः प्रतीयते। तत्क्रतुन्यायोऽपि कृशोदरीनीडनिहितकीटवदादिभरतमृगत्वादिवच्च साम्यापत्त्यैव समञ्जसयितुं शक्यः। अन्यथा दृष्टान्त एव तत्र प्रतिदृष्टान्ततामश्नुते।

तदेवं भूयसां न्यायमसन्तमिव कृत्वा त्वदुपन्यस्तानि कतिपयानि सूत्राणि त्वदभिमतप्रतीपानि निदर्शितानि। ततश्चान्यपरानन्यपरविभागोऽपि विलीनः। अत एवान्येषां भूयसां सूत्राणां कल्पिताकारपरत्वमुपलक्षणपरत्वं वा नोत्प्रेक्षितुं शक्यम्। अन्यानि तु सूत्राणि सगुणं सविभूतिकं च ब्रह्म प्रतिपादयन्तीत्ययमर्थस्त्वयाऽपि दुरपह्नवः। अर्थवत्त्वेऽपि सूत्राणामन्योन्यार्थविभागतः। सगुणं ब्रह्म वेद्यं स्यान्न चेत्सूत्रकथा मुधा॥

आह च जन्माद्यधिकरणे—* ये तु निर्विशेषं वस्तु जिज्ञास्यमिति वदन्ति तन्मते * ब्रह्मजिज्ञासा, * जन्माद्यस्य यतः, इत्यसङ्गतं स्यात्, * निरतिशयबृहद्बृंहणं च ब्रह्मेति निर्वचनात्, तच्च ब्रह्म जगज्जन्मादिकारणमिति वचनाच्च; एवमुत्तरेष्वपि सूत्रगणेषु सूत्रोदाहृतश्रुतिगणेषु चेक्षणाद्यन्वयदर्शनात् सूत्राणि सूत्रोदाहृताः श्रुतयश्च न तत्र प्रमाणमित्यादि। अयमभिप्रायः—प्रथमाध्याये सर्वत्र * ईक्षतेर्नाशब्दम्, * आनन्दमयोऽभ्यासात्, * अन्तस्तद्धर्मोपदेशात् इत्यादिषु ब्रह्मणस्तद्धर्मविशेषैर्वैशिष्ट्यं प्रतिपाद्यते; एवं जीवादिभ्यो भेदश्च प्रतिपाद्यते। * भेदव्यपदेशाच्चान्यः, * कर्मकर्तृव्यपदेशाच्च, * उभयेऽपि हि भेदेनैनमधीयते, * विशेषणभेदव्यपदेशाभ्यां च नेतरौ, * भेदव्यपदेशात्, * आकाशोऽर्थान्तरत्वादिव्यपदेशात्, * सुषुप्त्युत्क्रान्त्योर्भेदेन इत्यादिषु सूत्रेषु तत्तच्छ्रुतिगतो भेदनिर्देश एव स्वशब्देन सूत्र्यते। * जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्, * न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च, * नानुमानमतच्छब्दात्प्राणभृच्च, * जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम्, इत्यादिषु प्रधानादिवत् जीवः स्वशब्देनोपादाय व्यवच्छिद्यते; * गुहां प्रविष्टावात्मानौ हि तद्दर्शनादित्यादिषु स्फुटः। अतः प्रथमाध्याये सर्वत्र जिज्ञास्यतया प्रक्रान्तं ब्रह्मानन्दगुणविशिष्टं प्रकृतेरिव पुरुषादपि विलक्षणं च प्रत्यपादि। अयमेवार्थः स्थूणानिखननन्यायेन द्वितीयाध्याये स्थिरीकृत इति सोऽपि तद्विषय एवेत्युक्तम्। तत्र च * इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः इति जीवैक्यव्यपदेशमूलानेकदोषानाशङ्क्य, * अधिकं तु भेदनिर्देशात्, * अश्मादिवच्च तदनुपपत्तिः

इति सूत्राभ्यां पर्यहार्षीत् । तत्र चाभाष्यत—* ये पुनरस्यैव जीवस्याविद्यावियुक्तावस्थामभिप्रेत्य इमं भेदं वर्णयन्ति, तेषामिदं सर्वमसङ्गतं स्यात् । न हि तदवस्थस्य सर्वज्ञत्वं सर्वेश्वरत्वं समस्तकारणत्वं सर्वात्मत्वं सर्वनियन्तृत्वमित्यादीनि सन्ति । अनेनैव रूपेण ह्याभिः श्रुतिभिः प्रत्यगात्मनो भेदः प्रतिपाद्यते, तत्सर्वं ह्यविद्यापरिकल्पितं त्वन्मते । न चाविद्यापरिकल्पितस्याविद्यावस्थायां शुक्तिकारजतमरीचिकाजलादिभेदवत्परस्परभेदोऽत्र सूत्रकारेण * अधिकं तु भेदनिर्देशादित्यादिषु प्रतिपाद्यते । ब्रह्मजिज्ञासा कर्तव्येति जिज्ञास्यतया प्रक्रान्तस्य ब्रह्मणो जगज्जन्मादिकारणस्य वेदान्तवेद्यत्वं तस्य च स्मृतिन्यायविरोधपरिहारश्च क्रियते इति स्पष्टम् । अतोऽध्यायद्वयं विशिष्टपरमिति स्थितम् ।

तृतीयाध्यायेऽपि वैराग्यपादे तावत्प्रतिनियतकर्मफलभोक्तॄणामनन्तानां कर्मिणां गमनागमनप्रकारचिन्तनादात्मभेदोऽर्थलब्धः । उभयलिङ्गपादे तु शोध्यं शोधितम् । शिष्टमपि विशिष्टानुगुणमेव । गुणोपसंहारपादस्तु तत्तद्विद्यानियतानियतगुणोपाधिकविद्याभेदाभेदचिन्तनात्कार्त्स्न्येन गुणविशिष्टपर इति स्वरूपतोऽपि सुप्रसिद्धम्, न केवलं नाममात्रेण । पुरुषार्थपादोऽपि विद्याया वर्णाश्रमधर्मेतिकर्तव्यताकत्वप्रतिपादनान्निर्विशेषात्माद्वैतवाक्यार्थविज्ञानपक्षप्रतिपक्षः । तद्वदावृत्तिपादोऽपि, असकृदावृत्तोपासनादिप्रतिपादनेन फलाङ्कुरस्यैवोपपादनात् । उत्क्रान्तिपादेऽपि स्थूलदेहादुत्क्रान्तिरूपफलप्रादुर्भावप्रपञ्चनम् । अर्चिरादिपादेऽपि तथेति सगुणब्रह्मोपासकानां तत्प्राप्त्यर्थमिति भवद्भिरेव व्याख्यातम् । फलपादेऽपि स्वरूपाविर्भावपूर्वकं परब्रह्मसमानस्वच्छन्दभोगप्रपञ्चनं व्यक्तमिति न बादरायणस्य क्वचिदपि त्वदभिमतानुपपन्नार्थविवक्षां प्रत्यक्षयामहे । उक्तं च भास्कराचार्यैः—* सूत्राभिप्रायसंवृत्त्या स्वाभिप्रायनिवेशनात् । व्याख्यातं यैरिदं सूत्रं व्याख्येयं तन्निवृत्तये ॥ इति । तदभिप्रायेण भाष्यकारैरप्युक्तम्—* भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्यास्सञ्चिक्षिपुः ; तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्त इति ।

यत्पुनरुक्तं प्रमाणविरुद्धत्वेन सूत्रार्थानामन्यथाकथनमयुक्तमिति ; तन्नूनमश्रुतस्वसिद्धान्तेनोक्तम् ; सूत्राण्यपि यथाकथञ्चिद्योजयितव्यानीति क्वचिद्भवत्कूटस्थैर्व्याख्यानात् । दृश्यते च जैमिनिपतञ्जलिकणभक्षाक्षपादादिसूत्रेष्वपि तत्तद्व्याख्यातृभिरध्याहारादिकल्पना । तदाह—* लोके येष्वर्थेषु प्रसिद्धानि यानि पदानि तानि सति संभवे तदर्थान्येव सूत्रेष्वपीति । अध्याहारादिभिः स्वाभिमतार्थपरतया निर्वाहो वेदसंवादभूयस्त्ववैदिकपरिग्रहविशेषादिभिराप्तोक्तत्वनिश्चये मन्वादिप्रणीतधर्मशास्त्रादिष्वपि । क्वाचित्कवेदविरोधादेर्यथाकथञ्चिदुपशमयितव्यत्वात् । अत एवाह सति संभव इति । श्रुतिसूत्रयोरविरोधे सूत्रेष्वध्याहारादिकमन्याय्यम् । विरोधप्रसङ्गे पुनरध्याहारादिभिस्सूत्रं श्रुत्यनुगुणतया नेतव्यम् । नचासौ विभ्रम इति शङ्कितुमपि शक्यम्, सकलवेदशाखाप्रवर्तनाधिकृतत्वात्क्वचिदपि प्रमाणविरुद्धार्थादर्शनात् परिग्रहातिशयाच्च । अतस्तदुक्तेषु सूत्रेषु यत्र क्वचित्प्रमाणविसंवादे यथाकथञ्चित्समाधातव्यम्, नचास्ति विसंवाद इति दर्शितमिति ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु

शतदूषण्यां परमते सूत्रस्वारस्यभङ्गवादः षट्षष्टितमः ॥ ६६ ॥

॥ समाप्ता च शतदूषणी ॥

॥ श्रीरस्तु ॥

श्रीमद्वेदान्तदेशिकग्रन्थमालायां

[वेदान्तविभागे प्रथमसम्पुटम्]

॥ अधिकरणसारावली शतदूषणी च ॥

परिष्कारकः पर्यवेक्षकश्च

॥ श्रीकाञ्ची प्रतिवादिभयङ्करः अण्णंगराचार्यः ॥

प्रकाशनादि सर्वाधिकारी :

विद्वान् अ. संपत्कुमाराचार्यः, M. A.

२९, सौथ माडवीधी, कञ्जीवरम् ।

[इदमेव पुस्तकप्राप्तिस्थानम्]

मदरास्—लिबर्टी मुद्रणालये समुद्रित ।

1940

एतन्मूल्यं प्रापणव्ययसहितं

Price : 3—0—0] ॥ रूप्यत्रयमात्रम् ॥ [With Postage

॥ श्रीः ॥

॥ जाहीर सूचना ॥

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

कवितार्किकसिंह सर्वतन्त्रस्वतन्त्र श्रीमद्वेदान्तदेशिकस्वामीजी महाराजसे निर्मित सभीग्रन्थ अच्छीतरह शोधित होकर सुन्दरदेवनागरी अक्षरों में प्रकाशित होजानेवाले हैं। १२० पृष्ठ-वाली (१५ फारमवाली) सञ्चिका डबलक्रौन सैज में प्रतिमास प्रकाशित हो जायगी। श्रीकाञ्ची वेदवेदान्त वैजयन्ती विद्यालयाध्यक्ष. श्री प्रतिवादिभयंकर. अण्णङ्गराचार्यस्वामीजी परिष्कारक और पर्यवेक्षक है। एक सञ्चिकाका मूल्य केवल एक रूपिया है। वी. पी. द्वारा भेजनेमें आठ आणे अधिक खर्च होता है। जो सज्जन मनियार्डरद्वारा रू. १-२-०. भेजेंगे, उनको जलदी ही सञ्चिका बुकपोस्ट द्वारा भेजी जायगी।

पहिले ही तीस रूपये भेजने वाले महानुभावोंको क्रम से सञ्चिकायें भेजी जायंगी। तीस (३०) रूपये देनेवाले "पोषक" पचास (५०) रूपये देनेवाले "राजपोषक" सौ (१००) रूपये देनेवाले "महाराजपोषक" करके प्रकाशित किये जायंगे।

इस बातको सभी विद्वान लोग जानते हैं. कि श्रीवेदान्तदेशिकस्वामीजी महाराजसे हरेकवि भागोंमें ग्रन्थ बनाये गये हैं। वे विभाग पाँच तरहके हैं।

१—वेदान्तविभाग इसमें अधिकरण सारावली, सर्वार्थ सिद्धिसमेत तत्वमुक्ताक-लाप, शतदूषणी, सेश्वरमीमांसा, मीमांसापादुका, न्यायपरिशुद्धि, न्यायसिद्धाञ्जन, ये ग्रन्थ सामिल हो जायंगे।

२—स्तोत्रावलीविभाग श्रीहयग्रीवस्तोत्रसेलेकर पादुकासहस्रान्तसमीस्तोत्र इस विभागमें सामिल हो जायेंगे।

३—व्याख्यानविभाग इसमें, ईशावास्योपनिषद्भाष्य, गीताभाष्यतात्पर्यचन्द्रिका, तत्वटीका, स्तोत्रभाष्य, चतुःश्लोकीभाष्य गद्यभाष्य, गीतार्थसंग्रहरक्षा, सञ्चरित्ररक्षा, पाञ्चरात्र-रक्षा, निक्षेपरक्षा ये ग्रन्थ सामिल हो जायंगे।

४—काव्यनाटकविभाग यादवाभ्युदय, हंससन्देश, सुभाषितनीवी, संकल्पसूर्योदय ये ग्रन्थ इसमें सामिल हो जायंगे।

५—संप्रदायविभाग सभीरहस्यग्रन्थ, "देशिकप्रबन्ध" नामसे प्रसिद्धद्राविडगाथायें इसमें सामिल हो जायंगे और ये ग्रन्थ आन्ध्राक्षरोंमें छपकर प्रकाशितहो रहेहै।

सभी श्रीवेदान्तदेशिकस्वामिप्रणीत दिव्यग्रन्थोंको अलग अलग खरीदनेमें सौसे अधिक-रूपय लगेंगे इसमें सन्देह नही है। अभीतो सभी देशिकग्रन्थ थोडे ही मूल्यमें सुलभ मिलजानेवाले हैं। संचिका तैयारहै।

इति निवेदक

प्राप्तिस्थान—श्रीयुत. गणेशराममुरलीधर
श्रीरामानुज बिल्डिंगज्, सोलापुर

महन्त. गरुडध्वजाचार्य,
रामानुजकोट रामघाट, उज्जयिनी.

4

Book No. 3. ॥ श्रीरस्तु ॥ पुस्तकांकः-३.

॥ श्रीहस्तिशैलशिखरोज्ज्वलपारिजाताय नमः ॥

श्रीमद्विशिष्टाद्वैतसिद्धान्तप्रवर्तनधुरंधर–कवितार्किकसिंह
सर्वतन्त्रस्वतन्त्र श्रीमद्वेदान्ताचार्य विरचित
सकलग्रन्थबृन्द प्रकाशनी

॥श्रीमद्वेदान्तदेशिकग्रन्थमाला॥

पर्यवेक्षकः परिष्कारकश्च
श्रीकाञ्ची प्रतिवादिभयङ्करमठाधीश
जगद्गुरु-श्रीकृष्णमाचार्यस्वामी, तथा
श्रीकाञ्ची वेदवेदान्तवैजयन्ती विद्यालयाध्यक्षः
प्रतिवादिभयङ्कर-अण्णङ्गराचार्यः

Srimath Vedantadesika Granthamala

GENERAL EDITOR
SRI KANCHI. P. B. ANNANGARACHARYAR

प्रकाशनादि सर्वाधिकारी
विद्वान्. ति, अ. संपत्कुमाराचार्यः एम् ए., कञ्जीवरम्.
प्राप्तिस्थानम्–ग्रन्थमाला आफिस्, ३९. सन्निधिवीथी कञ्जीवरम् ।

Address:—
Granthamala Office, 39, Sannidhi Street,
CONJEEVERAM. [S. I. Ry.]
1940 NOVEMBER.

एतन्मूल्यं रूप्यत्रयम् ।

श्रीः ।

ग्रन्थमालानिर्वाहकसमितिनिविष्टा एते महानुभावाः—

१. श्रीजगन्नाथपुरीवास्तव्य (एमारमठ) श्रीराजगोपालमठाधीश श्रीयुत गदाधर रामानुजमहन्त महोदयः (प्रधानाध्यक्षः)

२. श्रीरामानुजबिल्डिङ्गधिपति, सोलापुर श्रीयुत सेठजी "गणेशरामभुरलीधर" श्रीनारायणदास -नरसिंहदास-रघुनाथदास -राजगोपालदास श्रेष्ठिनः (उपाध्यक्षाः)

३. कलकत्तानगरनिवासी, श्रीयुत सेठजी किसनलाल बांगडमहोदयस्य पुत्ररत्नम् श्रीमान् रामनिवासबांगड सेठ. (उपाध्यक्षः)

अस्या ग्रन्थमालाया अभिनन्दनकर्तारः—

१. श्रीमत्परमहंसेत्यादि. श्रीमदहोबिलमठाधिपति संयमिसार्वभौमाः (श्रीरङ्गनगरी)

२. श्रीमत्परमहंसेत्यादि. मैसूरु श्रीपरकालमठाधीश संयमिसार्वभौमाः ।

३. श्रीकुम्भघोणनगरीय. महामहोपाध्याय. अभिनवभट्टबाण. रा.च.वि. कृष्णमाचार्याः ।

४. तिरुच्चिनाप्पळ्ळि. वावदूकाग्रगण्याः ए. वि. गोपालाचार्यमहाशयाः ।

५. मद्रासनगरीय. वावदूकचूडामणि. वि. वि. श्रीनिवासय्यङ्गारमहोदयाः ।

६. पुदुक्कोट संस्थान. दानाधिकारि. विद्वद्वरिष्ठ. काळी. रङ्गाचार्यमहाभागाः ।

—अन्ये च बहवो लौकिकवैदिक विद्वद्वरेण्याः ।—

॥ श्रीरस्तु ॥

श्रीमद्वेदान्तदेशिकग्रन्थमालायां

[वेदान्तविभागे द्वितीयसम्पुटम्]

मीमांसापादुका, सेश्वरमीमांसा, न्यायपरिशुद्धिः, न्यायसिद्धाञ्जनं च ॥

पर्यवेक्षकः परिष्कारकश्च

श्रीकाञ्ची प्रतिवादिभयङ्करमठाधीश जगद्गुरु

गादि श्रीकृष्णमाचार्यस्वामी, तथा

॥ श्रीकाञ्ची प्रतिवादिभयङ्करः अण्णंगराचार्यः ॥

प्रकाशनादि सर्वाधिकारी :

विद्वान् अ. संपत्कुमाराचार्यः, M. A.

२९, सौथ माडवीधी, कञ्जीवरम् ।

[इदमेव पुस्तकप्राप्तिस्थानम्]

मदरास्—लिबर्टी मुद्रणालये सममुद्यत ।

1940

Price : 3—0—0] ॥ मूल्यं रूप्यत्रयमात्रम् ॥ [Postage Extra.

Printed at
THE LIBERTY PRESS,
G.T., Madras.

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः। श्रीमते रामानुजाय नमः।

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

[वेदान्तविभागे द्वितीयसम्पुटम्]

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेदान्ताचार्यविरचिता

॥ मीमांसापादुका ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी। वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

यस्य श्रीर्नित्यहृद्या निरुपधिगृहिणी नन्दति च्छन्दवृत्त्या यस्यापत्यं प्रजेशप्रभृति विहरणं यस्य विष्वक्परार्थम् ।
लीलाभोगापदेशव्यतिभिदुरमिदं यस्य विश्वं विभूतिः सत्तासिद्ध्यानुकम्पानिधिरवतु स नस्सप्तलोकीगृहस्थः ॥ १ ॥

यस्मादस्माभिरेतद्यतिपतिकथितप्राक्तनप्रक्रियोद्यत्कर्मब्रह्मावमर्शप्रभवबहुफलं सार्थमग्राहि शास्त्रम् ।
तं विष्वग्भेदविद्यास्थितिपदविषयस्थेयभूतं प्रभूतं वन्देयात्रेयरामानुजगुरुमनघं वादिहंसाम्बुवाहम् ॥ २ ॥

वेद्यं वेदैरशेषैर्विधितदितरयोर्विश्वमाज्ञापयन्तं धर्मैराराधनीयं पितृसुरमुखतश्शाश्वतं धर्ममेकम् ।
साङ्गाधीताक्षरौघस्वरससमुदितापातधीजातरागान्मीमांसेमह्यनन्तं व्यवहितवपुषं कञ्चुकैरुज्झितं च ॥ ३ ॥

निर्दोषाध्यक्षसिद्धं कथककुहनयापह्नवार्हं न किंचिन्न्यायैः कस्यापि क्लृप्तिः कथमपि न भवेदन्यथासिद्धिमद्भिः ।
निर्बाधान्नापि वाक्यादवगतमनृतं निश्चितेऽप्यान्यपर्ये त्रिस्थूणेऽस्मिन्प्रमाणैस्स्थिरमतिभवने माति मीमांसितोऽर्थः ॥ ४ ॥

मीमांसेत्येकमेतच्छ्रुतिविषयनयस्तोमसंग्राहि शास्त्रं षट्काध्यायांघ्रिभेदैर्भिदुरतरंतनुस्सा त्रिभिः काण्डभेदैः ।
सङ्गत्या च त्रयाणां क्रमनियतिरपि स्यादिहौचित्यवत्या विंशत्या लक्षणैः खल्वियमवयविनी वृत्तिकारोपदिष्टा ॥ ५ ॥

विद्यास्थानानि चत्वार्यगणिषत पृथग्वेदरूपत्वसाम्ये द्वे चाप्यन्ये विभक्ते ह्युपपदघटितं बृंहणत्वं दधाने ।
मीमांसाशास्त्रसाम्येऽप्यत इह घटते भिन्नविद्यापदत्वं मैवं मन्वादिभिस्तत्पृथगनुपठनाभावतस्तत्प्रहाणात् ॥ ६ ॥

काले कौमारिलादिष्वधिकबहुमतौ कस्त्वदिष्टं ग्रहीता कस्मै रोचेत पूर्वश्रुतहृतमनसे क्लृप्तिरन्येति चेन्न ।
स्वीकुर्वन्त्यस्मदुक्तं स्वमतगुणतिरस्कारकप्रत्यनीकं प्रत्यग्विद्याधुरीणप्रथितबहुमहावंशजाता महान्तः ॥ ७ ॥

किंचित्केनापि दृष्टं प्रतिहतविषयं तेन तत्ते च तैस्तैर्द्वे चोपादायिषातां द्वितयमपि सदित्यप्रमत्तो न वक्ता ।
इत्थं सत्येकभक्तैरितरपरिहृतौ न व्यवस्थानसिद्धिः प्रत्येतव्यं तदर्थ्यं पटुतरमतिभिः प्राक्तनं नूतनं वा ॥ ८ ॥

शिष्याचार्यौ विरुद्धं न तु मतमधुना साधयन्तौ प्रसिद्धौ स्वाभीष्टाच्छास्त्रमन्यत्सुरसचिवमुखैः कल्पितं किं न विद्मः ।
तस्माद्ब्रह्मज्ञजैमिन्युपरचितमिदं त्याज्यमेतन्निरीशं मैवं व्याघातहानौ मुनिवचसि मुधा बाह्यवद्दृष्टिदौस्स्थ्यम् ॥ ९ ॥

सूत्राणामैदमर्थ्यं स्वरसगतिवशात्सम्प्रदायाच्च सिध्येद्वह्वीयोभिः प्रमाणैः क्वचन बहुशिरःप्रत्ययश्शान्तिमेति ।
सन्दिग्धे वाक्यशेषप्रभृतिरभिदधे निर्णयोपायभूतष्षड्भिस्तात्पर्यलिङ्गैरपि खलु निखिलं दुर्णयं निर्णयन्ति ॥ १० ॥

सूत्रोक्तं नूनमन्यद्विदुरथ च मिथो व्याहतं वृत्तिकाराः प्राज्ञैर्नारायणार्यैस्तदिह विदधिरे सम्मतास्सूत्रभेदाः ।
सामाचार्योक्तिरेषा समरमुखगता तत्र सत्सङ्गृहीतेर्नत्वा नुत्वैनमाह द्रमिडगुरुरपि ब्रह्मविद्वाक्यभाष्यम् ॥ ११ ॥

आदौ कृत्स्नप्रतिज्ञा ह्यधिगमसुभगा धीसमाधायकत्वात्कर्माश्लिष्टां प्रतिज्ञामपि खलु घटयेत्तन्त्रमावर्तनं वा ।
यद्वा भागप्रतिज्ञाप्रणयनफलिता कृत्स्नचिन्ताप्रतिज्ञा त्रेधाऽपि ह्यत्र सौत्री गतिरियमुदिता सूत्रकृद्भावविद्भिः ॥ १२ ॥

सूत्रे भाष्यादिके च क्वचिदुपचरणावृत्तितन्त्रानुषङ्गाध्याहाराः कल्पनीयास्तदिदमनुमतं पण्डितैस्तत्रतत्र ।
सत्यामक्लिष्टवृत्तौ ह्यनुचितमितरन्नैव सर्वत्र तस्मादसत्सिद्धान्तवर्त्मन्यवहितमतिभिर्व्याहृतं न प्रणोद्यम् ॥ १३ ॥

निर्दिष्टा सूत्रकर्त्रा प्रथमत इह चेत् कृत्स्नवेदार्थचिन्ता किं पश्चाद्ब्रह्मचिन्ता पृथगनुपठिता संमतं चैकशास्त्र्यम् ।
सत्यं कृत्स्नप्रतिज्ञाकरणकबलितास्तत्तदर्थाः पुरस्तादध्यायादौ विभज्य स्फुटमभिदधिरे तद्वदत्रेति पश्य ॥ १४ ॥

योऽसौ शारीरकांशे निरवधिमहिमा साध्यते विश्वकर्ता यो वा को वा स भावी तदितरसदृशस्सोऽपि यष्टव्य इष्टः ।
निर्धारस्तस्य पश्चादथ तु परमिहानागतावेक्षणं स्यात् कर्मैवं किं न पश्चात्तनमिति न विभोश्शुद्धधीर्नात्र मृग्या ॥ १५ ॥

अन्तर्यन्तारमेकं निखिलदिविषदां प्राप्यबुद्ध्यैव केचित्तज्जातीयं च बुद्ध्वा कतिचन यदि वा सन्दिहाना यजन्ते ।
तेषामस्त्यन्तवत्तु स्मृतमिह हि फलं नैवमध्यात्मशास्त्रं तत्त्वे बुद्धे यथावस्थितभजनदशालब्धितस्तत्पदाप्तेः ॥ १६ ॥

चिन्तारम्भ्यत्वसूत्रे किमपि हि तदुपस्थापकं ख्यापनीयं तेनातश्शब्द उक्तो न खलु स विफलः पूर्वसंपिण्डितो वा ।
नासावार्षोपदेशो नयपदमनुसंधित्सतां सूत्रसृष्टेस्तस्माच्चिन्तार्थचिन्तास्पदमधिकरणं स्यादुपोद्घात एषः ॥ १७ ॥

निष्पन्नापातबुद्धेर्विषयविशयनाभ्यूहनिर्धारणार्थान्न्यायः पञ्चाधिकुर्वन्नधिकरणमिति व्याहरन्त्यार्यवृद्धाः ।
तस्मादेकैकशः प्रत्यधिकरणमितं पञ्चकं प्रेक्षमाणश्शुद्धाङ्गन्यायदृष्टिश्श्रुतिगणविषयभ्रान्तिभेदं प्रमार्ष्टि ॥ १८ ॥

स्वेन ख्यातिं विवृण्वन्विषय इह मतिस्संशयो निश्चयान्या तेनाभ्यूहो विचारः प्रमितिरभिदुरा निर्णयस्तर्कमानैः ।
तत्साध्यं कर्तुरिष्टं फलमनितरजं तानि पञ्चाधिकुर्वन्न्यायो बाधं विपक्षे प्रथयति विविधं स्वाङ्गदोषो न दृष्टे ॥ १९ ॥

आहुश्चान्ये दशाङ्गान्यधिकरणगणे वेद्यमाद्यं तथाऽर्थे संशीतिं तन्निदानं विविधमपि तथा संगतेश्च प्रकारम् ।
तादर्थ्यार्थं विचारं फलफलिभवनं पक्षयोर्न्याययुग्मं निर्णीतिं तत्फलं चाप्ययमपि निपुणन्यायवित्संप्रदायः ॥ २० ॥

अत्राहुः केचिदाद्याध्ययनविधिरसावक्षराणां गृहीत्यै तस्मादर्थे विवक्षा न भवति न ततस्तस्य चिन्तेति पूर्वैः ।

पक्षोऽन्यस्तु स्वशक्त्या प्रभवति निगमः स्वार्थबोधे सतर्कस्तेनाधीतार्थचिन्ता स्फुरितबहुफला स्यादिति स्थापनेति ॥ २१ ॥

अन्येऽनाघ्रातदोषान्मिषति निगमतश्शक्यहेतौ पुमर्थे मानत्वे निर्विशङ्केऽप्यवसरफलयोर्हानितो नार्थचिन्ता ।
इत्युद्यत्पूर्वपक्षप्रशमनमनसा सूत्रमाद्यं प्रणीतं कल्प्या तत्कालसिद्धिः फलमिह विशयभ्रान्त्यबोधव्युदासः ॥ २२ ॥

आनन्तर्योक्तिरत्र ह्युचितमवसरं शक्तितो वक्तुमीष्टे धर्मप्राथम्यसिद्ध्यै त्वथ पदमिति यद्योजनाभेदतस्तत् ।
हेतूक्तिर्निर्णिनीषावधिरिह गमयेर्न्निर्णयाप्तेः फलत्वं तस्मात्तत्क्षेपणीयस्त्वयमुचिततया दर्शितः पूर्वपक्षः ॥२३ ॥

वेदाधीतेर्न पूर्वं न च सह घटते वेदवेद्यार्थचिन्ता पश्चात्तु स्नानपूर्वैरवसरहरणं तत्कथं सेति चेन्न ।
स्नानादेः प्राग्विचारस्तदनुगुणधनाद्यार्जनन्यायतस्स्यादूर्ध्वं च श्रावयित्राद्यवसरनयतोऽमुष्य लभ्योऽवकाशः ॥ २४ ॥

ज्ञातं किंचिन्न चिन्त्यं न च तदविदितं तत्क चिन्तेति चेन्न ज्ञाताज्ञातांशभाजि स्वपरमतजुषां चिन्तनस्य प्रवृत्तेः ।
सामान्यात्तन्निरासे विहतिरविहता को विशेषो विशेषे विंशत्यध्यायतोऽसावविशदविशदीकारसाफल्यकल्प्या ॥ २५ ॥

ख्यातस्तर्कोऽप्रतिष्ठस्त्वयमिह मुनिना सूत्रितं चैवमेतत्तस्मान्मीमांसमानैरपि निगमगतिर्दुर्निरूपेति चेन्न ।
तर्कस्य ह्यप्रतिष्ठां क्वचिदभिदधता दर्शितो यस्तु पन्थास्तत्संवादेन सर्वं न भवति शिथिलं शिक्ष्यमाणं सुधीभिः ॥ २६ ॥

नास्तिक्यारम्भकत्वं मुनिभिरभिहितं यत्तु मीमांसकानां तत्प्रायो हैतुकेषु प्रविशति यदि वा पूर्वपक्षप्रवृत्तौ ।
शास्त्रज्ञानं च बुद्धेश्चलनजनकमित्युक्तिरन्याशया स्यान्नोचेद्रोचेत शङ्काकबलितमनसे केवलः क्वोपदेशः ॥ २७ ॥

धर्मज्ञानां मुनीनां मतमिह भिदुरं धर्मविद्वाक्यसिद्धं स्वोक्तार्थाद्वैपरीत्यं स्वयमभिदधते तत्क चिन्तेति चेन्न ।
कर्तव्यानां विकल्पे मुनिवचनमिते धर्मतैवोभयत्र व्याख्याभेदाद्विकल्पे त्वनवगतिभवे शिष्टमेवैकशेष्यम् ॥ २८ ॥

न्यायाख्यं धर्मविद्यास्थितिपदमुदितं तत्रतत्राप्तशास्त्रे तेनैवालं तदन्यद्भवति कृतकरं नीतिमात्रप्रवृत्तेः ।
इत्येतन्नानुयोज्यं नयपथविषयो मानतर्कादिमात्रं मीमांसायां तु तत्तच्छ्रुतिगतिविषया नीतिभेदा निरूप्याः ॥ २९ ॥

वेदार्थव्यक्तिरस्तु स्मृतिगणसहितैस्सेतिहासैः पुराणैरङ्गैरन्यैश्च किं तद्वद पुनरपि यत्तत्र मीमांसितव्यम् ।
तन्न स्मृत्यादिकेऽपि ह्यवितथसरणिर्नीतिशुद्ध्यैव साध्या सद्भिस्साफल्यविद्भिस्तदिह बहुफला कल्पितेयं त्रिकाण्डी ॥ ३० ॥

शिक्षां वर्णस्वरादेस्सुपदविभजनं तन्निरुक्तं विचित्रां छन्दोवर्गव्यवस्थां समयनियमनं साध्वनुष्ठानक्लृप्तिम् ।
स्मृत्याद्यैर्भागयुग्मप्रथनमथ नयस्थापनं च श्रयन्ती मीमांसा वेदवाक्ये व्यपनयदमनी वृत्तिमर्थ्यां व्यनक्ति ॥ ३१ ॥

मीमांसासूत्रवृत्तिप्रभृति निगमवन्न स्वरूपेण नित्यं विच्छेदश्च प्रवाहे नियत इतरथा पूर्वहानाद्ययुक्तेः ।
तस्मात्तन्मध्यकालेष्विव भवतु सदा नैरपेक्ष्यं श्रुतीनां तन्न प्रज्ञापराधप्रशमनरुचिभिस्सूरिभिस्सूत्रक्लृप्तेः ॥ ३२ ॥

धर्मादेर्निर्णये हि श्रुतिरिह करणं सा च नित्यानपेक्षा मीमांसा कोपकुर्यादिति नुयत इदं सेतिकर्तव्यताकम् ।
न स्यादत्रानवस्था विधिषु चरमविध्यन्तवन्नैरपेक्ष्यात्सिंहारण्यादिनीत्या मिथ उपकुरुतो मानतर्कौ यथार्हम् ॥ ३३ ॥

नित्याम्नायप्रसाध्ये न खलु करणनिष्पादकं किंचन स्यान्निष्पन्ने चानपेक्ष्यं करणमिति वदन्वक्ति च स्वेष्टभङ्गम् ।
योग्यत्वादेर्विमर्शो न हि भवति मुधा तर्कतोऽस्यापि तद्वत्स्यादेवं सन्निपत्योपकृतिरितरथा वेति चिन्त्यं यथार्हम् ॥ ३४ ॥

श्रुत्यङ्कौ शब्दतद्वच्छकनमथ सहव्याहृतिर्व्याक्यमन्यैराकाङ्क्षा प्रक्रियाङ्गेष्वथ पुनरुदितस्संनिधिस्संनिधानम् ।
नामाप्याध्वर्यवादि स्फुरदवयवशक्त्यन्वितं नामधेयं तेषामेषां विरोधे प्रथममधिगुणं तेन पाश्चात्यबाधः ॥ ३५ ॥

सर्वं स्रष्टा स देवः प्रकृतिपुरुषतत्कर्मपूर्वैस्सहायैस्तद्वानुक्तस्तदन्ये किमुत जनिमतां किं न सामग्र्यधीनम् ।
तर्केणानुग्रहोऽतः प्रमितिजनकतां प्राणयेत श्रुतीनां स्पष्टे तर्कानपेक्षा क्वचिदपि न तथाभाक्सार्वत्रिकत्वम् ॥ ३६ ॥

केनेदानीं सुसाधा जगति मितधिया कृत्स्नवेदार्थचिन्ता मध्यः काण्डश्च लुप्तस्थितिरिह निगमैरल्पशेषैरभावि ।
प्रज्ञातव्ये सशेषे प्रमितमपि खलु स्यादनाश्वासपात्रं तच्चिन्त्यं कल्पसूत्रप्रभृति कृतधियः शक्यचिन्ता न दुष्येत् ॥ ३७ ॥

आदत्ते ब्रह्मचारी स्वविहितमनघं न स्वयं चिन्तितार्थस्तद्वत्कुर्याद्गृहस्थप्रभृतिरपि मुधा तत्र मीमांसनं चेत् ।
तन्नाशेषैः परोक्त्या स्वचरितचरणं श्रद्दधानाभिनन्द्यं मूलं जिज्ञासमानैः स्वयमधिगतये निर्विशङ्को विचारः ॥ ३८ ॥

स्वीकृत्यानर्थतां तद्विरहमपि विधेरान्यपर्येतराभ्यां पक्षौ पूर्वापरौ ये परिजगृहुरिह स्वोक्तिबाधादयस्स्युः ।
व्युत्पत्त्यादिस्वभावात्स्वत उपजनितापातधीतः प्रवृत्तौ मीमांसाक्षेपतत्स्वीकरणकथनयोर्न क्वचिद्व्याहतिस्स्यात् ॥ ३९ ॥

स्वाध्यायस्यार्थवत्वाच्छ्रवणमभिदधेऽधीतवेदस्य भाष्ये तत्खल्वापातबोधप्रजननशकनव्यक्तिसिद्ध्यैव भाष्यम् ।
नैरर्थक्यं तु शङ्कास्पदमिह न भवेत्सद्भिरध्यापितानां नो चेच्छुश्रूषणादिप्रयतनकथनं दुस्सहं कस्सहेत ॥ ४० ॥

प्राच्यं स्वाध्यायलाभं स्वयमिह तु फलं स्वान्यसिद्धं विहाय व्यर्था कौमारिलानामनियतगतिमद्विश्वजिन्न्यायशङ्का ।
चिन्तावैधत्वभङ्गे त्ववसरविहितिः स्नानशिष्ट्येति मन्दं स्यात्कालश्श्रावयित्राद्यवसरवदिति स्थापितं पूर्वमेव ॥ ४१ ॥

अव्युत्पन्नस्य शब्दः कथमिव जनयेत्काञ्चिदापातबुद्धिं स्वाङ्गैश्चेत्तत्र चैवं ग्रह इह तु स किं साङ्ग इत्यल्पमेतत् ।
साङ्गेष्वापातबोधं स हि सह जनयेत्संस्कृतप्रायदेशे दृष्टश्चाङ्गोपकारस्तदनुगुणमतस्तद्गृहं केचिदूचुः ॥ ४२ ॥

तत्साम्ये त्वर्थचिन्ता क्रमनियतिगतिर्नेक्ष्यतेऽङ्गाङ्गिवर्गे दौष्कर्यं यौगपद्ये तत इह कथमारम्भ इत्यप्यचिन्त्यम् ।
सौकर्ये तारतम्यात्स्वयमुपनिपतच्छ्रावकादिक्रमाद्वा स्वेच्छावैचित्र्यतो वा क्रम इति सकलारम्भसंपूर्तिसिद्धेः ॥ ४३ ॥

सिद्धं साध्यं च धर्मं प्रभवति गदितुं धर्मशब्दोऽथवाऽर्थादाराध्यादेर्विचारः स्फुरतु निगदितः कृत्स्नचिन्तोद्यमश्च ।
स्वाध्यायत्वाविशेषे स्थितवति निखिलेऽधीतनानांशचिन्ता केषांचित्त्वेकदेशाध्ययनमगतितस्ते तु नात्र प्रसक्ताः ॥ ४४ ॥

धर्मस्सूत्रे द्वितीये ननु परिपठितश्चोदनालक्षणोऽर्थस्तेनास्मिन् सिद्धधर्मग्रहणमनुचितं तन्न तल्लक्षणैक्यात् ।
शास्त्रोक्तेष्टाभ्युपायस्स इति खलु समं लक्षितौ सिद्धसाध्यौ स्वीकार्यस्स्वेष्टसिद्ध्यै य इह स तु भवेत्तस्य तस्मिन्नुपायः ॥

आसंसारं प्रसिद्धे भगवति सहसा बिभ्यतोऽपह्नवोक्तेर्नेशानः क्षिप्यते किं त्वनुमितिरिति ये भक्ततां भावयन्ति ।
भद्रास्ते भारतादिप्रणिहितमनसां नास्तिकत्वं कुतस्स्यान्नित्यं धर्मं जहुर्ये विचिनुम इह तान्वेदवादान् कुवाचः ॥ ४६ ॥

सद्वाराद्वारवृत्तिद्वितयनियतया वाचकानां प्रवृत्त्या सर्वश्रुत्यर्थभूतः श्रुतिभिरभिहितस्तस्य चोक्त्या तथाऽन्यैः ।
तस्मादीशो वितन्वन्निजमहिमबलाद्विश्वमेकातपत्रं प्रख्यातस्सार्वभौमः पशुभिरिव न संवेद्यते मोहनिघ्नैः ॥ ४७ ॥

धर्मद्वारा विचार्यं निखिलमनुसृतं छत्रिनीत्याऽथवा स्यात्तात्पर्यारोहि सर्वं प्रथयितुमजहल्लक्षणेयं समीची ।

आपातस्फूर्तिसाम्यादनभिमतपरीहारनित्योन्मुखानां हेयप्रख्यापनार्थं ध्रुवमियमखिलैरत्र निर्धारणीया ॥ ४८ ॥

धर्मादेव प्रयुक्तादभिदधति सतां धर्मकामार्थमोक्षान्नान्यार्थौ काममोक्षौ धनमबहुफलं दोषवर्गान्वितं च ।
सिद्धानेकाधिकारैर्धृतिकृदयमतस्सेव्यते सावधानैरादावेतं निबध्नन्विषयफलयुतं शास्त्रमाविश्चकार ॥ ४९ ॥

तत्तत्कर्मप्रवाहप्रभवरुचिभिदातारतम्यानुरोधाद्वेदे वात्सल्यभाजि व्यतिषजति चतुर्वर्गचर्योपदेशः ।
उक्तं मोक्षप्रधाने त्रिकमितरदपि ह्यादितो भारतादौ विस्रम्भार्थं तु मुक्तेस्तदितरकथनं कीर्तितं सात्वते च ॥ ५० ॥

अस्यासौ ग्रन्थराशेर्विषय इति मतिः प्रेक्षितॄणां स्वतस्स्यान्मोघा पूर्वं तदुक्तिर्नतिरिव न हि सा भाविनी भद्रचर्या ।
उद्देशोऽप्यर्थसिद्धस्तदुचितवपुषो लक्षणस्य प्रणीतौ सत्यं संक्षिप्तदृष्टेर्मतिरवदधती संदिदृक्षेत शेषम् ॥ ५१ ॥

आप्तत्वं ग्रन्थकर्तुर्यदि विमतमिह स्वेन किं तत्फलोक्त्या तन्निर्धारे ततस्तत्फलमनुमिमते निष्फला सेत्यसारम् ।
सन्देहेपि प्रवृत्तिं [सफलयितु] प्रजनयितुमियं कल्पते विश्वदृष्ट्या निश्शङ्कानां निजेष्टं प्रमुखयति ततो धुक्षयेत्संजिघृक्षाम् ॥

सूत्रेऽस्मिन्नास्ति नीतिर्विषयफलकथामात्रमेवोपजीव्यं यत्साम्नां वक्ष्यमाणं तदनुसरणतोऽधीतिरध्यायशेषः ।
इत्याहुः केचिदेतन्मृदुफलमपि चाधर्मचिन्ताऽप्यकारोपश्लेषात्कल्पनीयेत्यपि परिजगृहुः क्लिष्टगत्यन्तरं तत् ॥ ५३ ॥

वक्तुं कश्चित्प्रबन्धं यदि विषयफले तस्य पूर्वं ब्रवीति स्पष्टः सम्बन्धवर्गः किमिति पुनरिमं वर्णयेतेत्यवर्ण्यम् ।
तत्तत्सम्बन्धवर्गप्रमथनकथनोद्दण्डवैतण्डिकोक्तिव्यामुग्धच्छात्रषण्डभ्रमभिदुरगिरामानृशंस्यं न शास्यम् ॥ ५४ ॥

काम्यं कर्मैव धर्मस्सुखजनकतया दुःखहेतुस्त्वधर्मो धर्मोऽधर्मश्च न स्यादनुभयजनकं नित्यमित्याहुरेके ।
मन्दं तन्नित्यवर्गेऽप्यनभिमतनिवृत्त्याद्यभीष्टार्थवत्त्वाद्धर्मत्वे दुर्निवारे पृथगभिलपनं गोबलीवर्दवत्स्यात् ॥ ५५ ॥

ज्ञानं सूत्रे विचारस्तदधिकरणतो निर्णयस्त्वर्थलभ्यश्चिन्तायां सन्प्रयोगो विधिपरिहरणाद्रागसिद्धिं व्यनक्ति ।
धर्मस्येत्यत्र षष्ठी प्रतिपदविहिता यद्यपि स्यात्तथाऽपि प्रोक्ता कृद्योगजेयं समसनविषयश्शाबराकूतमन्यत् ॥ ५६ ॥

जिज्ञासां निर्णिनीषां विदुरिह कतिचित्तत्र गम्यो विचारस्तस्यैवारम्भयोगादिह स तु भवतु ज्ञानमिच्छाधिरूढम् ।
सामान्योक्तिर्विशेषे प्रकरणवशतो विन्दते स्वां प्रतिष्ठां नोचेद्विश्रान्तिरस्याः कथमिह भवतां निर्णयाख्ये विशेषे ॥ ५७ ॥

रागप्राप्तो विचारो यदि वितथमिदं तद्विधानाय सूत्रं मैवं विध्यन्तरत्वान्नहि तदकरणे पापमत्र प्रकाश्यम् ।
प्राप्ता रागात्प्रवृत्तिस्त्ववसदनवती पूर्वपक्षोक्तयुक्त्या प्रत्यापद्येत सिद्धान्त्यभिहितनयतस्सेष्टहेतुः प्रसिद्धा ॥ ५८ ॥

सम्यङ्न्यायैः परीष्टिः करणमवगतं लोकतस्तत्त्वबोधे नैवास्मिन्विध्यपेक्षा न यदि कथमसौ नेष्यते भोजनादौ ।
रागप्राप्ते हि तस्मिन्नियमयति विधिः प्राङ्मुखत्वादिमात्रं तद्वन्मीमांसमाने स्वयमथ नियमाः केवलं सन्तु केचित् ॥ ५९ ॥

कृत्ये रागं वितन्वन्विधिरपि पुरुषं प्रेरयेत्तत्र काम्ये रागाभावान्निवृत्तो न भवति फलभाक्तेन न प्रत्यवेयात् ।
नित्ये स्यादन्यथाऽत्र त्वविधिसमुदिताद्रागतस्संप्रवृत्तौ शुद्धां विन्देत बुद्धिं तदभवन इह प्रत्यवायस्त्वनुक्तः ॥ ६० ॥

स्वेच्छाया हेतुतायामनियतिरिति चेत्तन्न दत्तोत्तरत्वात्काचित्क्या त्वप्रवृत्त्या ऋतुगमननयात्सन्ततिं सा न जह्यात् ।
वैधत्वस्थापनेऽपि ह्यलसजडविधित्यागिनो न प्रवृत्तास्तस्मादास्माकदृष्ट्या स्वयमिह यतनं तत्क्षमे स्थापनीयम् ॥ ६१ ॥

अध्येतुस्स्वोपयुक्तावगतिरथ मनाक्तद्बुभुत्सुः प्रवत्स्यन् संरुद्धः पूर्वयुक्त्या परत इह पुनः प्रस्थितः प्राप्स्यतीति ।
ज्ञात्वोत्स्वप्नायिताद्वा किमपि नयविविक्त्या हि तत्र व्यतिस्ते रागादेव प्रवृत्तिः प्रथममिह विधिप्रेरणाकाङ्क्षिणोऽपि ॥ ६२॥

व्याप्तत्वासन्नताद्यैर्ग्रहणमिह फलं तेनचावृत्तिसिद्धिर्वैतुष्यन्यायतस्स्यात् फलति च नियमोऽप्यन्यतस्तद्वदेव ।
वर्णैस्सामर्थ्यवद्भिस्त्रिभिरिति विधयस्स्वर्गकामादिनिष्ठास्संप्राप्ता नैरपेक्ष्यं न तदितरसहा द्रव्यभाग्ये यथा हि ॥ ६३ ॥

$[प्रत्यक्षादिप्रमाणैर्निजविषयमितौ विध्यपेक्षा ह्यसिद्धा शब्दोऽन्यार्थस्स्वमर्थं प्रकटयितुमलं भद्रदीपादिनीत्या ।
शक्तिर्नार्थे स्वकीया यदि नियमविधिर्दृष्टहानेर्न सिध्येत् वाक्ये विध्युक्त्यभावेऽप्यवगतिरुचिता व्यर्थवाक्ये यथा हि ॥

स्वर्गे वाऽऽचार्यके वा फल इह कथिते जायते स्वार्थबुद्धिः न ह्यन्यत्रोपयोगे विधिवचनबलाद्धार्यते शब्दशक्तिः ।
बाधो हेतोश्च दोषो न भवति निगमे मानताऽन्यानपेक्षा तस्मान्नाम्नायभागे क्वचिदपि घटते पूर्वपक्ष्युक्तक्लृप्तिः ॥

स्वाध्यायप्राप्तये ह्यध्ययनमभिहितं पावकाधानसाम्यात् व्रीह्यादिप्रोक्षणादिः स्वकृतिषु गदिता संस्कृतिर्वादिमुख्यैः ।
सिद्धस्संस्कार्यभावो निजनिगमगिरां भाविकार्योपयोगादृष्टान्यार्थो विभक्तेर्विपरिणतिवशात्सक्तुहोमस्स्वगत्या ॥]

दृष्टार्था संस्क्रियेयं न भवति घटते ह्यन्यथाऽप्यत्र दृष्टं नादृष्टार्थाऽपि वैधप्रकरणविरहे न ह्यसौ स्यात्तदर्था ।
तस्मात्स्वाध्यायसाध्याध्ययनविधिरसौ सक्तुहोमादिवत्स्यान्नस्यादुक्तोत्तरत्वान्न कथमितरथाऽऽधानमर्थ्यं न योज्यम् ॥ ६४ ॥

अध्येतुस्संस्क्रियैषाऽध्ययनमिति किल स्यान्नियोगार्थतायां तामेव प्रोक्षणादिष्वपि गतिमवदन् केचिदेतत्तुवार्तम् ।
भावार्थैर्द्रव्यनिष्ठैरतिशय उचितः कर्मभूतेष्वबाधे तस्मात्स्वाध्यायसंस्कृत्युपपदनगतिर्भाष्यकारैरभाषि ॥ ६५ ॥

स्वाध्यायं संस्क्रियार्हं कथमिव कथयेच्छब्दमद्रव्यमिच्छन्द्रव्यं संस्कारमर्हेदिति हि नयविदस्तत्र तात्पर्यभेदात् ।
आराध्यप्रीतिरेव ह्यतिशय उ[चि]दितो नैगमैश्चोदितेषु स्वाधीतस्स्यादसौ तद्विषय इति दशा तादृशी संस्क्रियाऽत्र ॥

नित्यं चेन्निष्फलं स्याद्भवति तु फलवत्काम्यभावादनित्यं मैवं त्यागेन तादृग्ग्रहणफलवतः प्रत्यवायानुशिष्टेः ।
नैष्फल्यं सर्वथाचेत्कथमिव मतिमांस्तत्र बुद्ध्या प्रयस्येत्तस्मान्नित्येऽप्यपूर्वं तदितरदपि वा स्यात्फलं तत्रतत्र ॥ ६७ ॥

दुःखाभावस्सुखं वा तदुभयकरणं तस्य चोपक्रियार्हं पुंसः प्रेप्सोः पदं स्यात्कथय तदितरत्कार्यमित्थं कथं ते ।
तत्सिद्ध्या कर्मयोग्यो यदि भवति तथा स्याद्गृहीत्याऽक्षराणां वेदानध्यायपूर्वं तदितरयतने शूद्रतादि स्मरन्ति ॥ ६८ ॥

सूत्रात्सम्माननादेरुपगत इह तः कर्त्रभिप्रायबाधी त्रेधाऽन्योक्तां गतिं तु क्षपयति वरणाधानसाध्यावमर्शः ।
स्पष्टं कर्तर्यकर्तर्यपि हि फलमिदं पूर्वसूत्रप्रसूतं संवेदित्रोर्द्वयोश्चाव्यवहितमपि तद्दृश्यतेऽकर्तृगामि ॥ ६९ ॥

निर्णीतं याजयेदित्यपि यजनविधौ तत्परं नीतिविद्भिस्तत्प्रायाध्यापनोक्तावुपनयनमपि ह्यन्तरङ्गावरुद्धम् ।
तस्मादध्येतृसंस्कृत्युपनयनफलं तत्फलार्थक्रियार्थं नो खल्वाचार्यकाख्यं किमपि फलमिहालौकिकं शक्यशङ्कम् ॥ ७० ॥

शिष्यः किञ्चोपनीतो वरमथ गुरवे किंनिमित्तं प्रयच्छेदाचार्यत्वं वरश्चेत्युभयमपि फलं कल्पयन् भ्रान्तकल्पः ।
वृत्त्यर्थाध्यापनं च स्मृतिभिरधिगतं क्वापि नाचार्यकार्थं नो चेन्नानाप्रकारा विधय इह तथा तत्रतत्राविलाः स्युः ॥ ७१ ॥

$ कुण्डलितं श्लोकत्रयं व्याख्यानोपात्तम् ।

तत्तत्कामोपनीतावुपनयनफलं कर्तृगामीत्ययुक्तं तत्सामान्यात्तदेकाश्रयफलजहनस्त्वष्टवर्षोपनीतौ ।
सिद्धेऽन्यत्र प्रधाने गुणफलमुचितं तस्य नाद्यापि सिद्धिः नित्यं काम्यप्रयोगे घटितमिति पृथक्कालिकत्वं तु सह्यम् ॥ ७२ ॥

यन्नित्यं ब्रह्मचारिण्यपरमपि कथं तस्य तस्मिन्प्रबोधः पित्राद्यैश्शिक्षितत्वादिति तु सममिदं सर्वहानं न चेत्स्यात् ।
संस्कर्तारं तमीप्सेत्तत उचितमधीयीत चेत्यादिदृष्ट्या नेत्थन्तायाः प्रबोधोऽस्त्यविदितनिगमेऽप्यष्टवर्षादिमात्रे ॥ ७३ ॥

शिष्यस्य ब्राह्मणत्वप्रभृति तव मते यद्वदाचार्यकार्थं शिष्योत्कर्षाय तद्वद्विधिरयमिह नस्तादृगाचार्यधर्मः ।
ऋत्विग्धर्मादयो वा कतिकति विहिता यायजूकादिसिद्ध्यै तस्माद्योग्योपनीतः सनियमकमधीयीत चेत्येव योज्यम् ॥ ७४ ॥

यच्चात्राध्यापयेदित्यभिदधति पदे स्वेष्टसिद्ध्यानुगुण्यं तच्चोन्नीतं प्रमादाण्णिच इह न किलाकर्तृगामित्वमर्थ्यम् ।
विद्यादानाददृष्टं यदपि निजगदुस्तेन नाचार्यकं स्याच्चत्वारश्चाश्रमास्तद्विधिमनुसरतां संप्रदानीभवन्ति ॥ ७५ ॥

आचार्याख्यानिवेशे तदितरवदिह स्मृत्युपात्तं निमित्तं सिद्धिर्या चानुषङ्गान्न हि किमपि तदुद्देशतः स्याद्विधानम् ।
स्नानोत्कर्षस्मृतेश्चेत्यसदुपनिषदि स्मृत्युपात्तक्रमोक्तेः श्रौताधीत्योरसाम्यं स्मृतिगतमपि चापोह्य तौल्यार्थ्यमूह्यम् ॥ ७६ ॥

आचार्यायेत्यधीतिं वदसि परमते निर्निमित्तां परस्तादाचार्यस्येत्यधीतिस्तव किमु सनिमित्तत्वमभ्येति पूर्वम् ।
भाव्येऽर्थे लक्षणां चेत्कथयसि विहितेस्संभवात्सा जघन्या भूते तु ज्यायसीयं तदिह सनियमाध्यापने शब्द एषः ॥ ७७ ॥

धर्मश्चोद्दिश्यतेऽर्थास्त्वयमिह मुनिना तद्विचारार्थसूत्रे लक्ष्मादृष्टेरचिन्त्यश्रममिह नुदता चोदनासूत्रमूचे ।
तत्र स्वार्थं प्रमाणं तत इह न भवेद्वाक्यभेदप्रवृत्तिर्मानप्राधान्यपक्षान्तरमपि कतिचिद्वैभवादाश्रयन्ति ॥ ७८ ॥

कश्चित्सित्रादिकल्पं प्रथयति पुरुषं चोदनायुक्तिरर्थाद्वाक्यादेश्चोदकत्वग्रहणमनुचितं शास्त्रसिद्धोज्झनं च ।
त्याज्योपादेयवर्गत्यजनभजनविध्युन्मुखाज्ञाभ्यनुज्ञाकिम्मीरो वेदराशिः किमिति न विदितश्शासनं विश्वगोप्तुः ॥ ७९ ॥

नित्यत्वादीश्वराज्ञा न भवति निगमः पौरुषेयोऽन्यथा स्यादित्येतत्क्षुद्रहृद्यं नियतनिजगिरा नित्यमाज्ञाप्रवृत्तेः ।
तन्त्रन्यायादमन्त्रेष्वपि [विविध] हि निजभिदां विश्वकर्ता विधित्सेदाचार्यत्वं च वेदेष्वगणि भगवतः कर्तृता चेतरेषु ॥

वेदार्थः कार्यरूपस्त्विति जगति मिथः कश्चिदाचष्ट धार्ष्ट्याद्विध्युद्देशांशमात्रे तदलमिह यतो वक्ष्यते सिद्धभागः ।
शक्तिं संरुद्ध्य शाब्दीं श्रुतिमुनिवचसोश्छन्दवृत्तिं निरुद्ध्य व्रीडानाघ्रातचित्तो वितथमिति वदन्वैदिकैरुज्झनीयः ॥ ८१ ॥

यत्कार्यं तद्धि सर्वं निगमविषय इत्येतदव्याप्तिदुःस्थं यो वेदार्थस्सकार्यात्मक इति च तथा तत्रतत्रातिचारात् ।
उद्देश्यादेर्विभागे बहुरिह विहतिर्दर्शिता वाक्यविद्भिः किंचास्मिन्नर्थशब्दत्यजनभजनयोः स्यादयुक्तिर्विचित्रा ॥ ८२ ॥

निष्कृष्टं चोदनार्थं यदि नियमयति स्पष्टमेतन्न पाठ्यं तस्माद्धर्मस्वरूपप्रभृतिकथनतस्सार्थकं सूत्रमेतत् ।
प्रामाण्यं कार्यशेषं प्रथयति यदि तत्प्रापितार्थे परस्तादप्रामाण्यं तु सिद्धे वदति यदि तदप्युत्तरत्रोपरोध्यम् ॥ ८३ ॥

व्याकुर्वन्ति क्रियाप्रेरकमिह वचनं चोदनायुक्तिवेद्यं तस्यानाम्नायसाम्यान्नियतमिदमतिव्यापि धर्मस्य लक्ष्म ।
मैवं वेदत्वयोगे सति खलु पुरुषप्रेरकं वाक्यमेतद्वेदोक्तार्थे तु धर्मे कथय कथमतिव्याप्तिरव्यापनं वा ॥ ८४ ॥

यश्चाहिंसादिधर्मश्श्रुतिभिरभिहितस्सोऽपि ताभिः प्रतीतस्स्याद्धर्मो बाह्यतन्त्रैस्तदवगतिरवस्थाप्यते निष्फलेति ।

स्वाध्यायाधीतिसिद्धग्रहणफलधिया धर्मसिद्धिर्नियाम्या तस्माद्बौद्धागमाद्यैरिह तदवगतिर्गोपनिर्मन्थ्यवत्स्यात् ॥ ८५ ॥

धर्मोऽधर्मश्च लक्ष्यौ समुपनिपततश्चोदनालक्षणोक्त्या तत्राधर्माद्विभागं प्रकटयितुमसावर्थशब्दः प्रयुक्तः ।
अर्थ्यत्वादार्यभावादभिमतफलनिष्पादकत्वाच्च तस्मिन्नर्थत्वं भाति केचिद्विदुरभिचरणाक्षेपकं त्वर्थशब्दम् ॥ ८६ ॥

न भ्रातृव्यस्य हिंसा मरणमभिमतं मारणं श्येनपूर्वं तच्चाभीष्टाभ्युपायश्श्रुतिविहित इति क्वार्थशब्दोऽत्र सार्थः ।
सत्यं हिंसा पशूनां सुहिततममतस्सा चिकित्सोपमा स्यान्नैवं शत्रोरतस्तद्धननिरसने सार्थको ह्यर्थशब्दः ॥ ८७ ॥

धर्मे वेदः प्रमाणं तदितरदपि वा नोभयं वोभयं वेत्येवं सन्देहडोलाविहरणविहितानेकदिक्क [सृप्त] प्रसक्तान् ।
जिज्ञासून्वेद एवेत्यवधृतिनियतावस्थितीन्कल्पयिष्यंश्चक्रे सूत्रं तृतीयं चटुलमतिदशावारणारम्भणार्थम् ॥ ८८ ॥

अत्रायोगान्ययोगौ प्रशमयितुमियं चोदनामानतोक्तिस्सत्सूत्रादौ स्फुटं तत्समसनविषयक्षेपणीयक्रमेण ।
अध्यायस्थाप्यसिद्ध्यै प्रथममभिदधे तन्निमित्ते परीष्टिः कर्तव्या नेति वा स्यादिह विनिगमना सूत्रकृत्काकुभेदात् ॥८९॥

मानं धर्मे न चिन्त्यं दुरपलपतयेत्युत्थितस्यास्तिकस्य प्रज्ञाचोरप्रसूतभ्रमपरिहृतये चिन्त्यमित्युत्तरं स्यात् ।
चिन्त्ये याऽस्मिन्प्रयुक्ते प्रथनकथनतस्तत्परीष्टिर्निषेद्धया छेकोक्तिस्साऽपि यस्मादकरणमिषतस्तत्परीष्टिं करोति ॥ ९० ॥

सामान्यान्नप्रमाणं क्षममपलपितुं स्वोक्तिबाधादिदोषात्तत्सिद्धिश्च प्रमाणात्स्वपरघटनतो नानवस्थाद्यतः स्यात् ।
धर्मे मानं तु चिन्त्यं प्रथितमपि बहिर्वादसंक्षोभशान्त्यै नो चेन्नास्तिक्यनिष्ठैः प्रमितिपथजुषामत्र पार्ष्णिग्रहस्स्यात् ॥ ९१ ॥

वेदो धर्मे निमित्तं स्वयमपि भविता तद्विधानात्तथाऽपि प्रामाण्यं हि प्रसाध्यं प्रथमसमुदिते लक्षणे पादभेदैः ।
तस्माद्धर्मप्रमायां करणमिति धिया तन्निमित्तत्वमुक्तं भक्त्या चोक्तिः प्रशस्तिं प्रथयति महतीं मुख्यभावानुरूपाम् ॥ ९२ ॥

धर्मस्तत्तत्क्रियादि श्रुतमिदमिह खल्वस्मदाद्यक्षवेद्यं तस्माच्छास्त्रैकमानस्सकथमिति यदि स्थूलमेतच्छलत्वात् ।
धर्माख्यानं क्रियादौ धृतिजनकतया सा च नाध्यक्षवेद्या दुर्दर्शार्थोपदेशान्निगमसफलता तेन सत्सूत्रसाध्या ॥ ९३ ॥

धर्मे प्रत्यक्षतोक्तिर्भवति च सुगमा सिद्धसाध्यानुवृत्ता सत्सूत्रं साध्यमात्रप्रवणमिति च ते कल्पना निष्प्रमाणा ।
ज्ञानं तस्योपदेशस्त्विति च सममिदं द्विप्रकारेऽपि धर्मे सर्वं तात्पर्यवृत्त्या सुघटितमिह नः पश्यतां वृत्तिकारम् ॥ ९४ ॥

धर्मं जिज्ञासमाने भवभृति करणायत्तबोधे प्रसिद्धे तस्याध्यक्षस्स नेति प्रथयितुमुदितं लौकिकाध्यक्षलक्ष्म ।
नो चेत्पश्यत्यचक्षुःप्रभृतिबहुविधश्रुत्यनीकावमर्दैर्लुण्टाकी हन्त लोकायतगतिरघृणा रुध्यतां चोदनाभ्यः ॥ ९५ ॥

आत्मा देहाक्षबुद्धिप्रभृतिसमधिको धर्मचिन्ताधिकृत्यै निर्द्धार्यस्त्वन्यथा चेत्सुरगुरुसमयस्वैरजल्पास्स्वदेरन् ।
इत्थं निश्चित्य सूत्रे व्यधिकरणविभक्त्यादिभिस्तत्तदर्थव्यावृत्तो धर्मकर्ता तदुचितफलभुक्सूचितस्सूत्रकारैः ॥ ९६ ॥

अन्यैरात्मावसाये भवति विफलता तत्र वेदान्तवाचां नोचेद्देहादितोऽन्यस्स कथमिह मतश्श्रूयतां सावधानम् ।
यद्यन्यैरस्य बोधो भवतु विशदतावाप्तिराम्नायवाक्यैस्तैरेवास्यावसाये परमिह कथितस्तर्कतोऽनुग्रहस्स्यात् ॥ ९७ ॥

पाठे चार्थे च भेदं विदधति कतिचिद्वृत्तिकारानुशिष्टास्स्यादत्रातिप्रसक्तिः क इह निपुण इत्येतदप्यत्र चिन्त्यम् ।
प्रख्यातो वृत्तिकारो मुनिरनृतमसौ व्याचकारेति मन्दं बाधे सत्यान्यपर्यं क्वचिदिति तु मतिर्मत्सरातङ्कमुक्ता ॥ ९८ ॥

पाठादत्रौपवर्षादनुपचितफला ह्यन्यथा पाठक्लृप्तिस्स्वच्छन्दस्त्वात्तसारो विषयविषयिवत्संप्रयोगोक्तिलभ्यः ।
यद्वृत्तं पूर्ववाक्ये न पठितमथ च न्यासि तद्वृत्तमन्यत्पाठश्चार्षो न भेत्तुं क्षम इति विदुषां वृत्तिकारोऽनुवर्त्यः ॥ ९९ ॥

वृत्तौ षट् चेत्प्रमाणान्यगणिषत न सा मानसंख्या ततस्स्यात्त्यक्तं षष्ठं च कैश्चिद्भवति च फलिनी गोबलीवर्दनीतिः ।
धर्मे मानान्तराणां गतिमिह नुदतो नात्र संख्याभिसन्धिर्मानानि त्रीणि शोध्यान्यमनुत च मनुः प्रेप्सतां धर्मसिद्धिम् ॥

प्रत्यक्षादिर्न हेतुर्जिनसुगतमुखैः कल्पितानां कथानामित्येतत्सिद्धमत्र श्रुतिरपि न हि तन्मूलमूह्यं विरोधात् ।
इत्यप्येतद्विरोधाधिकरणविदितं तेन मोहादिरन्यैरन्यैर्बाधोपरोधौ न तु निगमगिरामित्युपक्रान्तसिद्धिः ॥ १०१ ॥

नन्वेवं क्वापि रामायणपरिपठिता युक्तयष्षट् कथं स्युर्मन्वादेस्त्रित्ववादोऽप्यथ भवतु परं न्यूनसंख्यानिवृत्त्यै ।
मैवं तत्तद्विशेषैः पृथगनुपठितैरर्थवैशद्यसिद्ध्यै मानैस्तत्तद्विशेषास्सहपरिपठितास्सन्तु तत्रान्यथा वा ॥ १०२ ॥

प्रत्यक्षं सांख्यबौद्धप्रभृतिभिरुदितं भावनोत्थं न विघ्नस्संस्काराणां प्रकर्षस्स्मृतिमुपजनयेद्दृष्टमात्रे प्रकृष्टाम् ।
तस्माद्धर्मे निमित्तं भवति न सुगताद्यागमः क्षिप्तमूलः श्रद्धेया चोदनैवेत्यवधृतिरियमित्यत्र तात्पर्यसिद्धम् ॥ १०३ ॥

प्रत्यक्षादिप्रमाणं स्वविषयनियतं दर्शयन् सूत्रकारः प्रत्याचष्ट प्रवृद्धान् प्रमितिपरिभवे विश्वलुण्टाकवादान् ।
पश्यन्तो वृत्तिमार्षीं तत इह शबरस्वामिमुख्यास्समीचीं चिन्ताव्याघातभीताश्चिदचिदनुगतां सत्यतां साधयन्ति ॥ १०४ ॥

प्रत्यक्षप्रत्यपेक्षान्वयतदितरयोरत्र भङ्गात्तदुत्थं मानं नात्रानुमानं तदनुविहिततितो वाक्यमत्राप्रमाणम् ।
इत्याशङ्कां निरोद्धुं परमिह विदधे सूत्रमौत्पत्तिकाद्यं कर्ता शारीरकस्य स्वगुरुरपि वदत्येतदित्याह भक्त्या ॥ १०५ ॥

निर्बाधास्सन्ति बोधाः कतिकति जगति त्यक्तदोषप्रसङ्गा दोषोपेतेऽपि धर्मिप्रभृतिषु नियतः स्थापितस्सत्यभावः ।
तस्मादौत्सर्गिकत्वं मुनिरमत धियां मानभावस्य युक्त्या वेदोत्पन्नेऽपि नित्येश्वरमतिनयतो दोषहान्येव तत्स्यात् ॥ १०६ ॥

पाणिन्यादिप्रवाहैरसदितरतया स्थापितश्शब्दराशिश्शब्दस्येत्युद्गृहीतो न खलु सहजसंबन्धशाली तदन्यः ।
गावीगोण्यादिशब्दास्त्वलसजडमुखैरर्भकालापनीत्या कीर्त्यन्ते तत्तदर्थेष्विति न खलु ततस्तत्र तच्छक्तिसिद्धिः ॥ १०७ ॥

बन्धश्चेद्बन्धशून्यः कथमिव घटयेद्बन्धवत्त्वेऽनवस्था मैवं संबन्धमात्रस्थितिमपलपतस्स्वोक्तिबाधादिदोषात् ।
इष्टश्चेद्दूषकत्वप्रभृतिरपि मृषा सिद्धमिष्टं परेषां दृष्टः कल्प्यश्श्रुतो वा न तदपलपितुं शक्यते संप्रयोगः ॥ १०८ ॥

वेदे तच्चोदिते च त्यजदुपधि महालोकसंगृह्यमाणे मानत्वं धर्मता च स्थितमपि कुरुतां नाम नित्यं तथाऽपि ।
एतस्येत्येतदित्थं हितमहितमिदं त्वेवमित्यादिबोधस्तत्तद्वेदोपदेशप्रभव इति वदत्यत्र तस्यादिशब्दः ॥ १०९ ॥

नित्यप्रत्यक्षसिद्धं निगममितरदप्याह चेद्विश्वकर्ता स्मर्तृत्वं तस्य न स्यात्क्वचिदितरसमं तद्गिरां च स्मृतीनाम् ।
माभूदेतत्तथाऽपि स्मरतिरिह भवेत्क्षेत्रसामादिनीत्या वेदार्थव्यञ्जकत्वात्स्मृतिरिति च वचस्तेन सञ्जाघटीति ॥ ११० ॥

किञ्चाम्नाया न भिन्नक्रमनियमतयाऽध्यापयेच्छात्रपूर्वान् गीतादिग्रन्थराशिं क्रमविघटनया तत्रतत्र प्रयुङ्क्ते ।
तस्माद्विष्णुस्मृतिर्या तदितरदपि यन्नित्यसर्वज्ञशास्त्रं प्रख्यातं भारतादौ भवति तदखिलं वेदराशेर्विभक्तम् ॥ १११ ॥

सन्दर्भो यस्त्वपूर्वस्मृतिरिव कविभिः कल्प्यते सावधानैर्नित्यं सर्वज्ञबुद्धौ निहितवपुरसौ नैगमात्को विशेषः ।

सत्यं पुंसां विशेषादुपनमति भिदा तत्र मानेतरात्मा निर्बाधत्वेतराभ्यां भवति कवयतां कर्तृभावोऽपि कश्चित् ॥ ११२ ॥

बुद्धार्हन्तौ कणादः कपिल इति यथाकाममुद्गृह्यमाणास्सर्वज्ञास्सन्त्यनेके कलितमपि च तैस्संगृहीतं ततः किम् ।
वेदादित्यप्रकाशप्रतिहतगतिभिर्दृष्टिभिस्तादृशानां धर्माधर्मव्यवस्था दुरधिगमतमा दोषमालाविलाभिः ॥ ११३ ॥

प्रत्यक्षादन्यदेव स्मृतिजनकतया वर्णयन्तोऽनुमानं तस्माच्छास्त्रं विभक्तं न कथमकथयन् बाधनाक्षेपसाम्यात् ।
प्रत्यक्षेऽप्यप्रमाणं त्ववधृतिविरहान्निर्विकल्पं वदन्तश्शास्त्रेऽप्येवं जजल्पुस्स्वहृदयविहतं तत्स्वतोऽन्यैश्च वार्यम् ॥ ११४ ॥

वश्याकृष्ट्यादिषट्कप्रतिकृतिलपनप्रस्तरस्फोटनाद्यं दृष्टं जैनादिशास्त्रेष्विति कुहकपथः क्षुद्रविस्रम्भयोग्यः ।
बाधे दोषे च दृष्टे बलिशवदनवर्त्यामिषन्यायविद्भिर्मन्वाद्याप्तोपदेशप्रणिहितमतिभिस्तेषु वाचाऽपि नार्चा ॥ ११५ ॥

त्यक्तानां वेदनिष्ठैरगतिपरवतां त्यागडम्भास्थितानां मूढानां क्षुद्रतर्कैर्मुनिसमघटिकाभोजनौत्सुक्यभाजाम् ।
तत्तद्बाह्यागमेषु भ्रमदनुगधियां भण्डसम्मोहितानां स्वैराचारार्थिनां च स्वकहृदयविसंवादशारः प्रवेशः ॥ ११६ ॥

पाषण्डत्वप्रसिद्धिश्चतुरुदधिपरिष्कारवत्यां पृथिव्यां पापानां षण्डमन्यन्मतमखिलपरिभ्रष्टमाविष्करोति ।
प्रत्यन्तक्षुद्रभाषाविहितमनियताशेषवृत्त्यर्हमेतत्तत्प्रत्यर्थिस्वभावश्रुतिपरिषदवध्वस्तमस्तं प्रयाति ॥ ११७ ॥

साधूनां त्राणमिच्छुस्तदहितदमने दत्तदृष्टिर्मुकुन्दो मायानिष्पन्नदैत्यप्रमुखकुहनया मोहयामास पापान् ।
मिथ्यादृष्ट्यैव शास्त्राण्यपि कतिचिदसौ निर्ममे निर्ममेभ्यस्त्वाचष्टानन्यशेषश्रुतिनिकरशिरस्सारसंग्राहकाणि ॥ ११८ ॥

बाधे वेदोदितानां भवति विफलता सिद्धिरस्त्यन्यतश्चेन्नैष्फल्यं वेदवाचां दिनकरकिरणैर्दर्शिते किं प्रदीपैः ।
तस्माद्बाधोपलम्भव्यपनयनवचस्सार्थकं वेदवेद्ये द्वेधा बाह्यान्प्रवृत्तान्दमयितुमनसस्संग्रहो ह्येष सारः ॥ ११९ ॥

नित्ये वेदे न वक्तुर्गुण इति स कथं मानमित्यप्ययुक्तं वक्तुस्सत्त्वे हि वाचामपवदनभिया तद्गुणोऽन्वेषणीयः ।
नित्यज्ञानं च हेतोर्न भवति गुणतस्स्वीकृतं तच्च मानं तादृग्विज्ञानमात्मन्यवितथविषयं वर्णितं क्वापि बोधे ॥ १२० ॥

चित्रादीनां समाप्तौ न भवति पशुवृष्ट्याद्यभीष्टं नियत्या स्वर्गादेः का कथा स्यादिति किल कलयन्त्यत्र लोकायतस्थाः ।
दृष्टोपाये फलानामनियतिवदिहाप्यस्तु किं नस्ततस्स्याद्धर्माणां कर्मकर्तृप्रभृतिविगुणता तत्फलानाप्तिहेतुः ॥ १२१ ॥

यागस्वर्गादिमध्ये यदि भवति किमप्यास्तिकानामपूर्वं चित्रापश्वादिमध्ये न तदिह घटते तत्क्षणोत्पत्तियोगात् ।
नो खल्वन्यत्र देहे परमिह पशुवृष्ट्यादिलाभाय यत्नो बाधे चैवं समस्ता श्रुतिरनृतवचस्तन्न बाधव्यपोहात् ॥ ॥ १२२ ॥

सद्यस्सिद्धिर्यदा स्यादिह न खलु तदा बाधशङ्कावकाशो विघ्नैस्सिद्धौ विलम्बः कृषिवदिह भवेदन्यथाऽतिप्रसङ्गात् ।
तेनैवापूर्वमन्तर्भवति नरपतिप्रीणनन्यायदृष्ट्या वैगुण्योत्थे विलम्बे विहतिविहतता शेषमप्येवमूह्यम् ॥ १२३ ॥

नानाभूतैर्निजाङ्गैः क्रमसमुपनतैरङ्गिसिद्धावपूर्वं तत्तन्निष्पादनीयं करणसमुदयात्पूर्वमेवाभ्युपेत्यम् ।
भोगश्चित्रादिसाध्यो बहुदिवससमासादनीयश्च मध्ये त्यक्त्वाऽपूर्वं न सिध्येदपि च सुनियताऽदृष्टहेतूपनीतिः ॥ १२४ ॥

ग्राव्णां चैतन्यकृत्यं श्रवणमभिदधे सत्रचर्या पशूनामन्येऽपि ह्यर्थवादप्रभृतिषु विहतास्तत्कथं मानतेत्थम् ।
व्याघातो यत्र दृष्टश्श्रुतिषु बहुविधस्तत्रचाप्तोक्तनीत्या मुख्यादन्यत्र वृत्तेः प्रमितिकरणता स्थापनीया यथार्हम् ॥ १२५ ॥

यस्मिन्मूलप्रमाणं न भवति न भवेत्तत्र शब्दः प्रमाणं धर्मे मानं च नान्यत्तत इह वचसो मानता मानशून्या ।
इत्युत्प्रेक्षाविलानां क्षम इह तु परं मूलदोषव्यपोहस्सोऽयं निर्धारणीयस्त्रिभिरधिकरणैर्दुस्तरैरुत्तरत्र ॥ १२६ ॥

एकस्सर्वैन्द्रियाणां विषयमनुभवन्बुद्धितश्चातिरिक्तस्सत्सूत्रे भाति हस्ताद्यपघनघनतोऽप्यर्थतस्तुल्यनीत्या ।
तस्मात्स्वर्गादिदृष्टेतरदपि हि फलं देहभेदात्स भोक्ता बाधे चैवं विधूते भवति फलवती चोदनाऽतीन्द्रियार्था ॥ १२७ ॥

स्वप्ने देहान्तरेणाप्यनुभवति सुखाद्येष पश्चात्तु जाग्रत्स्वाप्ने देहे व्यतीते स्मरति किमपि तच्छैशवादौ च तद्वत् ।
नानाभूतेषु पाणिप्रभृतिषु च परामृश्यतेऽसावभिन्नस्तद्वन्नानाशरीरो युगपदयुगपच्चैष भुङ्क्ते फलानि ॥ १२८ ॥

न ज्ञानं बाह्यशून्यं किमपि परमतिप्रत्ययात्स्वप्रवृत्तेर्न ज्ञेयं स्वप्रकाशं प्रकटतदितरावस्थयोस्तस्य तत्त्वात् ।
न ज्ञाता चेतरस्स्याद्बहुविषयिगणग्राह्यधीस्तोमवत्त्वात्त्रिभ्यस्सिद्धे त्रिकेऽस्मिन्नवहितमतिभिर्भाव्यमित्यत्र भावः ॥ १२९ ॥

न स्याद्धर्मः क्रियात्वाद्विहितमितरवन्नाप्यधर्मो निषिद्धं तस्मादेवेति यावज्जिगदिषति मुधा तन्त्रनासीरवीरः ।
तावद्दुष्कम्पकौतस्कुतमहितमहामोहमातङ्गयूथक्रीडासंहारसिंहारव इह निगमस्स्वार्थरोधं रुणद्धि ॥ १३० ॥

यस्यासिद्धं निषेध्यं कथमनुमिनुयात्तादृशस्तन्निषेधं सिद्धं वा यस्य मानैस्स च निरुपधिकं न क्षमस्तन्निषेद्धुम् ।
साध्यं मानैरबाध्यं किमपि यदि तदा सिद्धसाध्यत्वदोषो यश्चाप्रत्यक्षमात्रं न सदिति कथयेत्स्वेष्टभङ्गात्स भग्नः ॥ १३१ ॥

नित्यं विज्ञानमेकं क्षणभिदुरमुतास्थाय शेषं विमृद्नन् स्वव्याघातादिदोषैरपहृतविषयो दोषतैषां त्वखण्ड्या ।
मर्यादा स्वा परा वा न खलु नियमयेत्तादृशैरर्थसिद्धिं मूलच्छिद्वादक्लृप्तौ मुखरितपटहो मोहमूर्धाभिषिक्तः ॥ १३२ ॥

प्रत्यक्षश्शब्दराशिर्मतिरपि हि ततो दृश्यते नात्र बाधः क्लृप्तिश्चातिप्रसक्त्यै कथमिह विमुखी मानता जानतां वः ।
लिङ्गं व्याप्तिस्तदुत्थानुमितिरपि तथा तेन चेष्टास्तवेष्टास्तस्मादेकं प्रमाणं परिगणितवतोऽक्लृप्तपच्यं ततोऽन्यत् ॥ १३३ ॥

किंचित्सूत्रे प्रमाणं किल नियमयता किंचिदिष्टं ह्यमानं मानामानव्यवस्थात्यज इह विविधाः प्रापितास्तेन हानम् ।
निर्बाधैव प्रमेत्यप्यवगमितमिदं तेन तत्त्वानुभूतौ माने ग्राह्येऽनुभूतिः प्रमितिरिति वदन्त्यप्रमादूर [भू] भीताः ॥ १३४ ॥

वेदस्यार्थानुभूतिप्रजननशकनस्थापने किं फलं स्यात्किं वा बुद्धार्हदाद्यैः परुषमभिहितं प्रत्युतेष्टं हि शिष्टम् ।
मन्वानः पीतशङ्खभ्रममनुभवनं तद्व्यवच्छेदसिद्ध्यै विन्यस्यन्भेदकोक्तिं विहरतु विमतव्यूहभेदे वियातः ॥ १३५ ॥

आपातादन्यथाधीरखिलहृदयसंवादिनी येऽत्र रुष्टास्तेऽपि च्छायामिव स्वामतिपतितुमिमां कुत्रचिन्न क्षमन्ते ।
तत्सामग्र्यैव तत्तद्व्यवहरणमिति स्थापयन्तस्त्विहान्ये प्रध्यायन्तो लघुत्वं गुरुमतकथकाः प्राणिता देशिकैर्नः ॥ १३६ ॥

शब्दस्यार्थेन बन्धस्सहज इति वचोमात्रमत्र प्रसक्तं साकाङ्क्षं ह्यत्र शब्दाधिकरणमुदितं नित्यताप्त्यै पदानाम् ।
वर्णस्थैर्योक्तिपक्षे वितथविफलते स्तः पदस्थैर्यपक्षे सूत्राणां योजनं च स्वरसगति भवत्पक्षवन्नातिखेदः ॥ १३७ ॥

व्युत्पत्तिर्वाच्यवर्गे ह्यतिविषमतमा जातियोगान्निरूढा शिक्षेयं वाचकेऽपि प्रथयितुमुचिता शीलितन्यायवृत्तैः ।
किं चोदात्तादिभेदा अपि विलयभृतो वाचकेष्वप्रयुक्तास्तादृक्त्वेनैव तेषां यदि नियमवचस्तद्वदत्रेति भाव्यम् ॥ १३८ ॥

वर्णा नित्या यदि स्युस्तदपि भवति किं मानताऽनाप्तवाक्ये ते चानित्या भवेयुः क्रमवदथ च सा किं न निर्दोषवाचि ।

वेदप्रामाण्यसिद्ध्यै तदिह बत मुधावर्णनित्यत्वक्लृप्तिर्वेदानित्यत्वशङ्कां प्रजनयति पदानित्यताऽतो निषेध्या ॥ १३९ ॥

शब्दस्पर्शादिहीनात्त्रिगुणजलनिधेरूर्मिजालैकदेशे श्रोत्रादिग्राह्यतत्तद्गुणगणघटितश्श्राविता भूतवर्गः ।
शब्दस्याकाशनाशे लय इति कतिचित्प्रत्यभिज्ञानुरोधात्तैरप्यास्थायि नित्या पदनियतिरसौ वर्णसाजात्ययुक्ता ॥ १४० ॥

वर्णेभ्यः क्वापि वर्णान्तरजनिवचसामन्यथासिद्धिरस्तु प्रत्यक्षं त्वन्यतुल्यं प्रथयति जननं तच्च नात्राप्रमाणम् ।
सूक्ष्मा पश्यन्त्यसौ वाक्क्रमसमुदयनान्मध्यमा वैखरीति प्राप्ताभेदं विचित्राकृतिरुदयति तत्सुस्थितं वर्णजन्म ॥ १४१ ॥

एकाक्षग्राह्यवर्गे सहकृतिनियमो भाति निम्बत्वगादौ तद्वद्वर्णप्रभेदप्रतिनियतमरुद्भेद इत्यप्यपास्तम् ।
व्यक्तिर्निम्बत्वगादेर्न भवति परमुद्भूतिमात्रोपयोगात्तादृक्चेद्व्यक्तिहेतुर्न कथमिह भवेदन्यथाऽतिप्रसङ्गः ॥ १४२ ॥

गन्धादौ प्रत्यभिज्ञा भवति न च तया तत्र नित्यत्वमिष्टं सादृश्यात्तत्प्रक्लृप्तिस्समगतिरुभयोराग्रहीतिर्न चेत्स्यात् ।
व्यक्त्यानन्त्यं च दृष्टं सममिदमुभयोर्लाघवोक्तिश्च लघ्वी तस्माद्वैयात्यमात्रादयमुपनिहितो वर्णनित्यत्ववादः ॥ १४३ ॥

नित्यश्शब्दो यदीष्टस्सकथमभिमतो दृश्यमानातिरिक्तः प्रत्यक्षे शब्दवर्गे ध्वनिभिरपि परं तादृशैर्व्यक्तिरस्तु ।
अश्रद्धेयाऽत्र वैयाकरणसरणिरित्यर्थमर्थापयद्भिर्नित्यत्वं वर्णनिष्ठं भवतु च कथितं लाघवं लक्षयद्भिः ॥ १४४ ॥

वायोरेके विकारं कतिचन जगदुस्स्पर्शभाजां चतुर्णां पञ्चानां केचिदूचुः कतिचिदभिदधुः पञ्चमस्यैव धर्मम् ।
नित्यं तत्रापि केचिज्जनिलयभिदुरं शब्दमन्ये परे तु द्रव्यं वर्णाख्यमेतद्गतफलमखिलं शब्दमानत्वसिद्धौ ॥ १४५ ॥

कृत्वा रूपाणि नामान्यपि च वितनुते नाथ इत्यागमोक्त्या नानित्यत्वं पदानां पुनरपि हि यथापूर्वमेव प्रयुङ्क्ते ।
बाह्यक्षेपाय सूत्रैरिह कथयतु वा वर्णनित्यत्वमाप्तः क्लृप्तं तद्वैभवात्स्यान्न कथमितरथा नैगमानां प्रकोपः ॥ १४६ ॥

उत्पत्त्यैव क्रमार्तिं कतिचिदकथयन्बोधके वर्णवर्गे व्यक्त्यैकेऽन्ये तु तत्तद्व्यवहृतिकृदभिप्रायभेदाद्वदन्ति ।
युक्तं तद्यौगपद्यं न कथमपि ततस्संस्क्रियाजालजन्यस्मृत्यारूढेषु वर्णेष्ववगतिकरणं कल्प्यमेकं यथार्हम् ॥ १४७ ॥

वर्णान्यः कोऽपि वैयाकरणनिगदितस्स्फोटसंज्ञस्तु शब्दो न प्रत्यक्षो न कल्प्यो न च वचनमितो नान्यतोऽपि प्रसिद्धः ।
वर्णैर्युक्तेषु बोधे भजति हि कलहः स्फोटबोधेऽपि साम्यं शब्दव्युत्पत्तिसिद्धौ न च भवति मुधा स्फोटसिद्ध्यैव योगः ॥

वाक्यस्फोटोऽवक्लृप्तः प्रतिफणिति पदस्फोटनीत्या निरस्तो वाक्ये तद्गोचरे वा कथमपि हि न निर्भागता जाघटीति ।
यद्भेदाङ्गप्रयुक्तिप्रभृति तदपि हि त्वन्मते दुर्घटं स्याच्छब्दादर्थो विभातीत्यपि समुदितधीमूल एकत्ववादः ॥ १४९ ॥

शुद्धे सिद्धान्तसूत्रे फलवति न तथा वर्णपक्षोक्तबाधौ पक्षाणां च त्रिकालप्रभवमतिभुवां का चिकित्सेति चेन्न ।
छद्मप्रक्षोभणीयच्छलगतिरमु[धु]ना शिक्षितश्चात्र गुप्त्यै दुष्टोपन्यासतन्निस्तरणकथनतस्तादृशान्योपरोधात् ॥ १५० ॥

दृष्टौ तद्वैक इत्याद्यकृतकफणितौ पूर्वपक्षोक्तिभङ्गौ तत्र स्वाध्यायपाठः फलमिति तु न सद्दृष्टहानादिदोषात् ।
सूत्रेऽप्येषैव रीतिर्भवति फलवती नान्यथाऽतिप्रसङ्गात् कः पूर्वः कश्च पक्षः पर इति नियमः स्वारसिक्या प्रवृत्त्या ॥ १५१ ॥

वाक्याद्वाक्यार्थबुद्धौ बहुविधकुहकक्षोभतो बाधितायां तत्प्रत्यापत्तिसिद्ध्यै परमिह मुनिना न्यासि वाक्याधिकारः ।
दृष्टापह्नुत्ययोगादृढतरविदितात्कार्यतो हेतुसिद्धौ दन्तादन्तिप्रयासः पुनरिह विदुषां दर्पसङ्घर्षतन्त्रः ॥ १५२ ॥

वाक्यादज्ञातयोगादविदितकथनेऽतिप्रसङ्गप्रसङ्गो मैवं व्युत्पन्नशब्दस्तंबकमहिमतस्तत्तदर्थोपलब्धेः ।
संबन्धस्स्याद्गृहीतः कथमपि न तु वा तत्तदर्थैः पदानां वाक्यं वाक्यार्थयुक्तं न तु विदितचरं काव्यक्लृप्त्यादिदृष्टेः ॥

यद्वाक्यं गोपदादिव्यतिकरितमिदं वक्ति गोत्वादिमद्भिर्युक्तान्वाक्यार्थभेदानिति सकृदखिलव्यापिसंबन्धबोधात् ।
वाक्यं वाक्यार्थबोधे प्रभवति तदिहातिप्रसङ्गो न शक्यः पुंवाक्येऽप्येवमेव स्थितिरिति न ततो वेदवाचां विशेषः ॥

वाक्यं नान्यत्प्रतीमः किमपि पदसमाहारतस्तान्यमानं वाक्यस्यार्थः पदार्थादनधिक इति नापूर्वरूपोपपत्तेः ।
अन्योन्योपक्रियादिप्रणिधिमति पदान्येव वाक्यं भवेयुर्वाक्यार्थत्वं पदार्थेष्वपि भवति मिथःश्लिष्टरूपातिरेकात् ॥ १५५ ॥

वाक्यं चेदप्रमाणं निखिलमभिलपेन्नास्य वादाधिकारः किंचिच्चेन्मानमिष्टं तदितरदपि ते तादृशं किं न मानम् ।
एतद्यो वा न मानं व्यपदिशति स चाबाधतो मानमिच्छेत्तस्मादाम्नायवाक्यैरकलुषधिषणोत्पत्तिरक्षोभणीया ॥ १५६ ॥

वाक्याद्वाक्यार्थबुद्धिर्न घटत इति यद्वाक्यमुक्तं भवद्भिस्तच्चेत्स्वार्थप्रतीतिं जनयति जनयेत्तद्वदन्यच्च वाक्यम् ।
नो चेद्भङ्गस्त्वदुक्त्या न कथमपि भवेदस्मदिष्टस्य तस्मादप्राप्ते वेदवाक्यान्यपि निजविषये मानतां न व्यतीयुः ॥ १५७ ॥

स्वव्याघातप्रसक्तौ स्वपरघटकवद्भावनं भ्रान्तकृत्यं मूर्खाणां पण्डितानामपि न हि विहतं वाक्यमिष्टं प्रतीत्यै ।
दृष्टं बोधं पदाद्यैरपलपितुमवश्यायकल्पान्विकल्पानल्पप्रज्ञाभिनन्द्यानभिदधतु ततस्स्वोक्तिरेवापकृत्ता ॥ १५८ ॥

कर्तृप्रत्यायकास्स्युश्श्रुतिषु सुविदिताः काठकाद्यास्समाख्यास्तेनेमाः पौरुषेय्यास्तदिह कुशलिनी विप्रलिप्सादिशङ्का ।
मैवं शारीरकोक्तां सरणिमवयतां नित्यसिद्धेषु वेदेष्वाविष्कारेऽधिकारात् कतिचन पुरुषाः कर्तृनिर्देशमापुः ॥ १५९ ॥

कल्पेकल्पे दयालुः स्थिरचरकृदधिष्ठाय रूपं कठाद्यं शाखाभेदान्विचित्रान् समतनुत ततोऽध्यापयामास चर्षीन् ।
इत्युक्तं न्यायभक्तैरिदमपि च परं भक्तिमात्रप्रसूतं निर्माणाध्यापने द्वे किमिति निगदिते पश्चिमेनैव लभ्ये ॥ १६० ॥

वाक्यत्वात्कर्तृमत्त्वे सति निगमगिरां कर्तृभेदे तु चिन्त्ये वृद्धव्याहारसिद्धास्तदवधृतिकृतः काठकाद्यास्समाख्याः ।
इत्येषा मुग्धभाषा बहुनिगमहता बाधशून्या विपक्षे नासौ वाक्यत्वहेतुर्निगमकृतकतां संप्रयोक्तुं क्षमेत ॥ १६१ ॥

वेदानां यच्च शाखाविभजनमुदितं द्वापरान्ते चतुर्णां नानित्यत्वं ततः स्यात्समुदितपृथगाम्नानमात्रप्रवृत्तेः ।
कृत्स्नाम्नानक्षमाणामुपचिततपसां गोचरः कृत्स्नमादौ पश्चात्तु ज्ञानशक्त्योरपचयनियमाद्व्यासक्लृप्तिस्समीची ॥ १६२ ॥

वेदाद्द्वेधाऽप्रधृष्यात् भवति विमृशतां वेदनित्यत्वसिद्धिर्मन्वादीनां च वाक्यैरवितथवचसां बाधदोषातिवृत्तैः ।
अङ्गोपाङ्गैरशेषैरपि कथितमिदं सद्गृहीतैस्तदस्मिन्प्रादुर्भावादिमात्रं प्रजनयति विभुस्सोऽपि पारम्यरम्यः ॥ १६३ ॥

कर्ता दृष्टः श्रुतो वा न हि परकथितस्तापसादि श्रुतीनां प्रद्विष्टोक्तिर्न तत्त्वस्थितिमवगमयेन्नातिशक्ता नियोक्तुम् ।
श्रद्धेयैरन्यथोक्त्या भजति च विहतिं शङ्कनेऽतिप्रसक्तिश्शङ्का सार्वत्रिकी च स्वजनिविहतिकृत्सर्वचेतःप्रतीपा ॥ १६४ ॥

अन्या मन्वन्तरेषु श्रुतिरिति च वचः कालयोगप्रवाहाज्जप्यश्रुत्यादिनीत्या न कथमितरथा द्रव्यपूर्वेण भेदः ।
दिष्ट्या यत्रानधीते मुनिभिरनघता तत्र तत्कर्तृतोक्ता प्रोक्तं ब्रह्म स्वयंभ्वित्यपि जनिविलयाभावमत्र स्मरन्ति ॥ १६५ ॥

कल्पादावेवमीशः कथयति निगमान्पूर्वयैवाऽऽनुपूर्व्या तद्वन्मन्वन्तरादिष्वपि शिथिलसमाधानमात्रं क्रमैः स्यात् ।
नित्यश्रुत्यैव बाधादुपजनिविलयौ नानुमानैः प्रसाध्यौ मीमांसाप्राच्यपादप्रस्तुतिरविहता देशिकैर्दर्शितेयम् ॥ १६६ ॥

अन्यैरप्यर्थवादप्रभृतिषु निहितैरादिमाध्यायभेदैर्मानं तत्तत्प्रवृत्त्या निगममिह मुनिस्सूत्रयामास साध्व्या ।
इत्थं प्रामाण्यसिद्धिं व्यवहरणदशाभाविनीं भावयन्तस्स्वाभीष्टस्थापकानामपि खलु वचसां मूलवातं सृजन्ति ॥ १६७ ॥

ग्राह्यं सर्वत्र मानं परभजनविधौ भेदतादात्म्यचर्चा तत्रैवाङ्गप्रयुक्ती परिकरघटने मार्गभेदक्रमाप्तिः ।
कर्ता वैराग्यपादप्रभृतिषु विविधावस्थितिस्स्थापनीयश्शेषं चाशेषमीदृग्विलगति बहुषु ब्रह्मकाण्डस्थलेषु ॥ १६८ ॥

श्रीमद्रामानुजोक्तां स्मृतिमनुसरतामैकशास्त्र्यादिसिद्धेरव्याजोपायविद्यापथिकगतिविधौ न्यासि दिङ्मात्रमेतत् ।
शेषं चाशेषमित्थं शितमतिभिरनुप्रेक्ष्य संरक्षितव्यं क्षुद्रक्षोभार्हतर्कोदितकुहककथावर्णिदुर्नाटकेभ्यः ॥ १६९ ॥

संक्षिप्तं विस्तृतं वा सरसबहुमतं सावधानप्रियं वा प्राधान्येन प्रणीतं परफणितिपरिष्कारवृत्त्या स्थितं वा ।
शिक्षासौकर्यतुष्टिप्रचितगुरुजनानुग्रहेद्धं सुधीभिश्श्रद्धेयं नाथजुष्टश्रुतियुवतिशिरोभूषणं भाषणं नः ॥ १७० ॥

तत्तत्प्रत्यर्थिवर्गप्रचकितनिगमस्तोमतत्त्वार्थचिन्ता विष्वग्वैघट्यघट्टोन्मथनपटुधिया वेङ्कटेशेन क्लृप्ता ।
अक्षोद्या तर्कलोष्टैरतिमहति पदेऽप्यत्यजन्ती स्वसीमां मीमांसापादुकेयं मितिपथगतिकृन्मृद्गती कण्टकौघम् ॥ १७१ ॥

विख्यातो वेदघण्टापथ इति विततिं प्रस्तुतां प्रस्तुतार्थामुत्पद्यन्तां पृथिव्यामुपनिषदगदङ्कारवाचः प्रवाचः ।
मिथ्यादृष्टिप्रवाहोदितकुमतिकथाकन्दलीकन्दलीनां दृष्ट्यैवालोकलिप्सादृढनिहितमतिं दैत्यरोधी रुण[द्धु]द्धि ॥ १७२ ॥

शाक्योलूक्याक्षपादक्षपणककपिलामर्त्यवन्द्यप्रधानैरन्यैराम्नायचर्चाकवचधृतिकनद्दोमुखद्वीपिभिश्च ।
बंहीयः क्षोभिताऽपि श्रुतिरिह बहुधा जायमानेन गोप्त्रा कालेकालेऽभिगुप्ता कलहमतितरन्त्यक्षता रक्षतान्नः ॥ १७३ ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु

॥ मीमांसापादुका समाप्ता ॥

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेदान्ताचार्यविरचिता

॥ सेश्वरमीमांसा ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

विहितमनवमर्थं यः पुमर्थैश्चतुर्भिस्सफलयति वदान्यस्स्वप्रसादेन देवः ।
निखिलनिगमवेद्ये सिध्यतु श्रीसखेऽस्मिन् भगवति निरवद्ये भक्तिरात्यन्तिकी नः ॥

स जयति जैमिनिरादौ जयति पुनः काशकृत्स्नोऽपि । नारायणावतारो जयति परं बादरायणः श्रीमान् ॥

निर्मत्सरा निशमयन्त्विदमादरेण कर्माधिकारनयसूत्रगतिं समीचीम् ।
शारीरकेण घटयत्ययमस्मदुक्त्या देवस्तुरङ्गवदनो जगदन्तरात्मा ॥

॥ अथ धर्मजिज्ञासाधिकरणम् ॥ १ ॥

* अथातो धर्मजिज्ञासा—इत्यारभ्य *अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्—इत्येवमन्तं विंशतिलक्षणं मीमांसाख्यमेकं शास्त्रम् । सा हि मीमांसा वेदवाक्यार्थविचारात्मिका तद्विशेषनिर्णयार्था साङ्गाध्ययनसंगृहीतस्वाध्यायशब्दवाच्यवेदाख्याक्षरराश्यापातप्रतीतिविषयसप्रयोजनार्थविशेषविविदिषाप्रेरितपुरुषाधिकर्तव्या च । एवमेकरूपप्रयोजनविशेषोद्देशप्रवृत्तपुरुषव्यापारगोचरन्यायसंघातनिबन्धनात्मिकायाः त्रिकाण्ड्याः सामान्यतो विषयप्रयोजनप्रवृत्तिप्रकारविशेषविशेषिताधिकार्यैक्यादेकविद्यास्थानत्वमिति नातिप्रसङ्गः ; प्रतिविद्यास्थानमवान्तरोपकारादिभेदस्य व्यवस्थितत्वात् । न तथाऽपि भेदो दरीदृश्यते । काण्डभेदस्तु स्यात्, षट्कादिभेदन्यायात् । स्मृतिपुराणवन्महर्षिभिः पृथगपरिसंख्यानाच्च । ऐकप्रबन्ध्यं तु संगतिविशेषैर्विशिष्टक्रमत्वादिति भगवता **भाष्यकारेणैवाभाषि** । नच निरूप्यविशेषसद्भावं समीक्ष्य सङ्कर्षारम्भः, वैयासिको वा शारीरकप्रणयनप्रयासः । * संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिरिति वृत्तिग्रन्थश्च प्रतिबन्ध्यादियुक्तिगर्भः । अर्थविरोधस्तु न सौत्रः, आन्यपर्यात्सूत्राणाम् । उक्तं ह्यागमप्रामाण्ये—* भगवतो जैमिनेः कर्मणः फलोपन्यासः कर्मश्रद्धासंवर्धनाय इति । वेदार्थसंग्रहेऽपि—* अश्रुतवेदान्तानां कर्मण्यश्रद्धा माभूदिति

देवताधिकरणेऽतिवादाः कृताः कर्ममात्रे यथा [श्रद्धा स्यात्] श्रद्धां कुर्यादिति सर्वमेकं शास्त्रमिति वेदवित्सिद्धान्तः इति। द्रव्यदेवतासामान्ये द्रव्यबलीयस्त्वं च प्रमाणमुखेन, न पुनर्वस्तुसदसत्त्वाभ्याम्। तच्च स्वावसरे निर्वक्ष्यामः। अन्यदपि सर्वमविरुद्धत्वेन निर्णेतव्यम्।

अध्य[स्य]स्त व्याक्रियादो[षान्]षं ये सूत्रमपि तत्यजुः। प्रायः स्फटिकमध्येते जह्युरेव जपाभ्रमात् ॥

तेन **नारायणार्यै**स्सूत्राणामन्यथाकरणं प्रौढिप्रकाशनमात्रमेव। वयं तु सामगाचार्यसूत्राणां व्याख्यादोषं प्रतिक्षिप्य सम्यञ्चमेवार्थं प्रतिपादयिष्यामः।

दर्शयति च भगवान् बादरायणो जैमिनेरपि ब्रह्मतद्गुणाभ्युपगमम् *साक्षादप्यविरोधं जैमिनिः, *सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति, *मध्वादिष्वसंभवादनधिकारं जैमिनिः, *अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके, *परं जैमिनिर्मुख्यत्वात्, *ब्राह्मेण जैमिनिरुपन्यासादिभ्यः इत्यादिषु। *धर्मं जैमिनिरत एव, *शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः इत्यादिषु क्वाचित्कविसंवादानुवादस्त्वन्यपरोक्तिमूलकमन्दमतिमोहशान्त्यर्थः। अथवा परकलितसौधादिशेषपूरणवत् विरुद्धैकदेशोद्धारेण संहितत्वपक्षेऽपि नार्थैक्यविरोधः। कर्तृभेदस्तु न शास्त्रं भिन्द्यात्, तदभेदश्च न तदेकीकुर्यात्; एककर्तृकानेकवदनेककर्तृकैकदृष्टेः लोकसिद्धत्वात्। परस्परसम्मत्या कृतशेषपूरणेन वा तात्पर्यपरिशोधनपूर्वकतदेकदेशप्रवृत्त्युपपत्तेश्च। अतो विद्यास्थानान्तराननुवृत्ताव्यवहिताविरुद्धपरस्परसापेक्षांशवद्विषयाचैक्यात् प्रबन्धैक्यं च सिद्धम्। कर्मादिकाण्डभेदव्यपदेशश्च तदैक्यं व्यनक्ति। एतौ राहुकबन्धमीमांसकपक्षौ प्रतिचिक्षिपाते। काण्डक्रमोऽप्यध्यायादिक्रमवदर्थप्राप्तः। वेदप्रामाण्यमन्तरेण हि विचारस्सर्वोऽपि न सेत्स्यतीति प्रमाणलक्षणेन प्रागेव भाव्यम्। अथ च कर्मोपक्रमतया प्रायो वेदानां तदितिकर्तव्यताभागयोरपि सारस्वताङ्गन्यायेन मुख्यक्रमानुसारात्, अनाद्यभ्यस्तत्रिवर्गप्रथमप्रावण्यरूपार्थक्रमात्, अनन्तस्थिरफलापातप्रतीत्यादेश्चोभयत्राविशेषात्, कर्ममात्रेण चामृतत्वसंभावनायाम् *अर्के चेन्मधु विन्देतेति न्यायात्, पदार्थवाक्यार्थभावदृष्टान्तदार्ष्टान्तिकभावादेश्च, पौर्वापर्यनियामकप्रमाणविशेषात्, कर्मविचारः पूर्वभावी। तत्र भेदाङ्गप्रयुक्तिक्रमकर्तृभिः सामान्यातिदेशविशेषातिदेशतदनुबन्ध्यूहबाधतन्त्रप्रसक्तिभिश्च प्रकृतिविकृतिरूपकर्मचिन्तानुक्रमे नान्यावकाशः। तदुद्देश्यदेवताविषयतया तु संकर्षानन्तर्यं समुचितमेव। अथ तु सर्वकर्मसमाराध्यं सर्वदेवतान्तर्यामि परदैवतं चिन्तयिष्यते।

विभूतिशक्तिमन्त्राख्यागुणाकारादिचित्रितैः। देवताकञ्चुकैर्भिन्नं यदेकं ब्रह्म चक्षते ॥

किंच यदि कर्मत एवामृतत्वं स्यात् किं तदङ्गकेनोपासनेन? अथ न, तदा तादर्थ्येनापि स्वरूपतः कर्मोपयुज्येतेत्यापातधीमतस्संदिहानस्यापि कर्मणि विचिचारयिषा दुर्वारा। तावन्मात्रात्तदसिद्धिनिश्चये तु निष्प्रत्यूहश्शारीरकारम्भ इति ॥

विंशतिलक्षण्यां वक्ष्यमाणं कृत्स्नवेदार्थविचारं सहेतुकं प्रतिजानाति—

.1 सू०—अथातो धर्मजिज्ञासा ॥ १. १. १. ॥

अथशब्दोऽत्रायमानन्तर्यार्थ एव, प्रसिद्धिप्रकर्षस्यानपवादत्वात्। मङ्गलार्थत्वं त्वथधर्मशब्दयोरन्यार्थत्वेऽपि प्रदीपादिवत्स्यात्। यद्यप्यत्र पूर्वं न किंचिदपि निर्दिष्टम्, तथाऽप्यतःपदोपादानेन स्वरसतस्सामान्येन कस्यचिद्वृत्तस्य

हेतुतोक्तेस्तस्य धर्मजिज्ञासापदसमभिव्याहारसामार्थ्यात्तदपेक्षिततया विशेष्यमाणत्वाच्च साङ्गवेदाध्ययनरूपवृत्तविशेषसिद्धिः। नहि वेदाध्ययनात्पूर्वमन्यस्माद्वा नियतपूर्ववृत्तादनन्तरं वेदार्थविचारस्तदुक्तिर्वाऽवकल्पते। अत एवात्रातश्शब्दोऽपि वृत्तस्य हेतुभावार्थ एव। धर्मस्य जिज्ञासा धर्मजिज्ञासा। कर्मण्यत्र षष्ठी, संबन्धसामान्यषष्ठीमङ्गीकृत्य तेन तत्र कर्मसापेक्षजिज्ञासासामर्थ्यतः कर्मार्थत्वक्लृप्तेर्विलम्बितत्वात्, *कर्तृकर्मणोः कृतीति विशेषविधानात्, कर्त्रर्थताया इहानन्वयात्, कर्मणश्चेप्सिततयाऽभ्यर्हितत्वात्, अन्यपरेऽपि सूत्रे विषयप्रयोजनसूचनोपयोगात्, आनुषङ्गिकविवक्षान्तरस्यात्रादोषत्वात्, प्रतिपदविधानषष्ठीसमासनिषेधस्य कृद्योगषष्ठ्यां प्रतिप्रसवेन, *ज्ञोऽविदर्थस्य करणे इत्यादिसूत्रविषयत्वस्थापनाच्च। यद्यपि सर्पिषो ज्ञानमित्यत्र कृद्योगोऽप्यस्ति, तथाऽपि न कृद्योगजेयं षष्ठी, अपि तु *ज्ञोऽविदर्थस्य करणे इति जानातेर्धातोरविदर्थस्य प्रवृत्त्यर्थत्वे सर्पिरादेष्षष्ठ्यन्तस्य करणार्थत्वे च विधीयते, सर्पिषो जानीते, मधुनो जानीत इत्यादिषु कृद्योगमन्तरेणापि षष्ठीप्रयोगदर्शनात्। तेन तत्र न समासः।

धर्मशब्दोऽत्र चोदनालक्षणश्रेयस्करवाची, तेनाजहदभीप्सितस्वार्थेनाधर्मादिरपि कृत्स्नो वेदार्थो लक्ष्यते। अत एव च सिद्धपरभागार्थस्यापि संग्रहः। कर्मोपासनात्मकस्य धर्मस्य स्वरूपसाधनाधिकाराराध्यसाध्यादिकं तथा। तद्गोचरजिज्ञासासामर्थ्याद्वा कृत्स्नसिद्धिः। उक्तं च शारीरकाद्ये वेदस्य कार्यार्थत्वमन्वारुह्य भाष्यकारैः—*उपासनविषयकार्याधिकृतफलत्वेन *ब्रह्मविदाप्नोति परमित्यादिभिर्ब्रह्मप्राप्तिश्श्रूयत इति ब्रह्मस्वरूपतद्विशेषणानां दुःखासंभिन्नदेशविशेषस्वर्गादिवद्रात्रिसत्रप्रतिष्ठादिवदपगोरणशतयातनासाध्यसाधनभाववच्च कार्योपयोगितयैव सिद्धेः, इति। तथा तत्रैव *धात्वर्थस्य च यागादेरग्न्यादिदेवतान्तर्यामिपरमपुरुषसमाराधनरूपता, समाराधितात्परमपुरुषात्फलसिद्धिश्चेति *फलमत उपपत्तेरित्यत्र प्रतिपादयिष्यते इति।

ननु *फलमत उपपत्तेः, *श्रुतत्वाच्च, इति सूत्राभ्यां परमपुरुषस्यैव त्रिवर्गापवर्गरूपफलप्रदत्वमुपक्षिप्य, *धर्मं जैमिनिरत एवेति तद्विरुद्धतया जैमिनिमतमनूद्य *पूर्वं तु बादरायणो हेतुव्यपदेशादिति पुनः परमपुरुषस्यैव फलप्रदत्वं स्वमततया सूत्रितम्। एवमर्थमेव च तत्र भाष्यम्। अतः कथमिह *धर्मजिज्ञासेति जैमिनिवाक्ये जिज्ञासासामर्थ्यादिना धर्माराध्यत्वाद्याकारेण ब्रह्मादिसिद्धिर्विवक्षितेत्युन्नीयते? मैवम्। तत्र तावज्जैमिनेर्ब्रह्मतद्गुणाद्यभ्युपगमस्सौत्रो दर्शितः। इयं च कृत्स्नवेदार्थविचारप्रतिज्ञा, अन्यथा अत इति हेत्वनन्वयात्। नहि वेदैकदेशार्थजिज्ञासायां कृत्स्नवेदाध्ययनं हेतुतयोपादीयते। न चैकदेशाध्ययनं वृत्तम्, साङ्गसशिरस्कस्वाध्यायाध्ययनस्य विहितत्वात्। अत एव शास्त्रान्तरात् ब्रह्मभागविचार इति पक्षोऽपि निरस्तः। एवं च सति, *धर्मं जैमिनिरत एवेत्यस्यायमभिप्रायः—क्षणिकक्रियायाः कालान्तरभाविस्वर्गसाधनत्वमनुपपन्नमिति वदतो नास्तिकस्य गूढाभिप्रायेण जैमिनिना मुखमपिहितम्। न तावत् कर्मणामव्यवधानेन फलप्रदत्वनियमः, लोके मर्दनादिषु कृष्यादिषु च साक्षाद्वा परम्परया वा स्वयमेव फलप्रदत्वदर्शनात्। एवं च वेदेऽपि यागादीनां साक्षात्फलसाधनत्वाभावेऽपि यत्किंचिदपूर्वं द्वारीकृत्य परम्परया फलसाधनत्वमुपपद्यते। तथा सति *यजेत स्वर्गकाम इत्यादिशास्त्रं स्वर्गकामस्य कर्तव्यतया यागाद्यभिदधत्तदन्यथानुपपत्त्या अपूर्वद्वारेणैव फलसाधनत्वमवगमयति। तच्चापूर्वमतीन्द्रियत्वान्नाध्यक्षबोध्यम्। अतो न शास्त्रप्रामाण्यविरोध इति। तदेतदनूद्य तस्यापि हृद्गतं स्वमतमवसरे दर्शयन् भगवान् बादरायणस्तदुक्तमपूर्वं देवतानुग्रहरूपं प्राचीकशत्। अतो न विरोध इति। अत्र धर्ममुखेन समारम्भो विधिवाक्यानां क्रियाप्रधानत्वात्। यष्टव्यानां तु देवतानां राज्ञ इव सेवाविधिवाक्ये प्राधान्यमार्थम्, तत्पूजात्मक-

त्वाद्यागादेः । ततश्च शब्दतो यत्प्रधानं शास्त्रं प्रतीमः, तत्र प्रथमं विचारोऽवतरति, पश्चात्तत्तदाराध्ये, ततः परं तत्पर्यवसानभूमाविति प्रातीतिकोऽयं पर्वक्रमावतारः ।

यद्यपि ब्रह्मस्वरूपपरवाक्यानि सिद्धप्रधानानि समन्वयसूत्रे समर्थयिष्यन्ते, तथाऽप्यन्ततो निधिसत्तादिवाक्येष्विव पुरुषस्य बुभुत्साक्रमेणोपायविधायिवाक्यावधिर्विश्रमो भाष्योक्तः—* एवंभूतं ब्रह्म कथं प्राप्यत इत्यपेक्षायां * ब्रह्मविदाप्नोति परम्, * आत्मानमेव लोकमुपासीत, इति वेदनादिशब्दैरुपासनं ब्रह्मप्राप्त्युपायतया विधीयते । यथा स्ववेश्मनि निधिरस्तीति वाक्येन निधिसद्भावं ज्ञात्वा तृप्तस्सन् पश्चात्तदुपादाने प्रयतते, इति । अतः पूर्वोत्तरभागयोरनुवृत्तं कर्तव्यस्य शाब्दं प्राधान्यम्, सिद्धस्य तु पूर्वत्रार्थसिद्धमिति सर्वभागानुवृत्तशाब्दप्राधान्यशालिकर्तव्यमुखेनोपलक्षणमाक्षेपो वा युक्तः । देवतानां च फलप्रदत्वे सिद्धे तासां द्रव्यक्रियागुणादिवद्धर्मतयैव संग्रहः, चोदितरूपेण श्रेयस्साधनत्वाविशेषात् । **भगवद्गुणदर्पणे** हि फलोपायं प्रस्तुत्योक्तम् * स च सिद्धस्साध्यालम्बनरूपश्च । सिद्धस्त्वाराध्यमानतया फलप्रदा देवता इत्यादि । एवमपि विंशतिलक्षण्यर्थसंग्रहः ॥

यद्वा, सङ्गतिविशेषवशात्प्रथमप्राप्तविशेषप्रतिज्ञायामेव सामान्यप्रतिज्ञानमर्थसिद्धम् । तदनुगुणश्च सारग्रन्थः— * अधीतवेदस्य हि पुरुषस्य कर्मप्रतिपादनोपक्रमाद्वेदानां कर्मविचारः प्रथमं कर्तव्य इति * अथातो धर्मजिज्ञासेत्युक्तम् । कर्मणां च प्रकृतिविकृतिरूपाणां धर्मार्थकामरूपपुरुषार्थसाधनतानिश्चयः * प्रभुत्वादार्त्विज्यमित्यन्तेन सूत्रकलापेन सङ्क्षेपेण कृतः इति । तत्पूर्वग्रन्थे तु कृत्स्नवेदार्थविषयो विचारप्रारम्भस्सूचितः—* आरिप्सितस्य ब्रह्मज्ञानस्य वेदार्थविचारैकदेशत्वादिति । तथा भाष्येऽपि * अध्ययनगृहीतस्येत्यारभ्य * वेदवाक्यविचाररूपमीमांसाश्रवणेऽधीतवेदः पुरुषस्स्वयमेव प्रवर्तते इति । यद्यपि ज्ञातुमिच्छा जिज्ञासा, तथाऽपि च पुरुषतन्त्रत्वान्न स्वयं विधेया, ततश्चेष्यमाणं ज्ञानमर्थतः प्रधानमिति विचारारम्भसूत्रे तदेव विधेयम् । तस्य विचाररूपस्य रागप्राप्तत्वज्ञापनाय सन्प्रयोगः । साङ्गाध्ययनादापातधीस्थस्वोपयुक्तवेदार्थस्याध्येतुस्तन्निर्णिनीषया स्वत एव जातस्य मीमांसौन्मुख्यस्य पूर्वपक्षनयेन जातां प्रतिहतिमपाकुर्वताऽध्ययनानन्तरं तत एव हेतोर्वेदार्थविचारः कर्तव्यतया सूत्रितः । अत्र मीमांसाशास्त्रमेव विषयः । तत्किमारम्भणीयमुतानारम्भणीयमिति संशयः, तदर्थं विचार्यते, मीमांसावसरोऽस्ति न वेति । यदा नास्ति तदा नारम्भणीयम् । यदाऽऽस्ति तदा आरम्भणीयमिति ।

अत्रैवं पूर्वपक्षः—अधीतसाङ्गवेदस्यैव मीमांसाधिकार इति न ततः पूर्वं तदवसरः । अत एव न सह । पश्चात्तु * अधीत्य स्नायादिति स्नानविध्यवरोधान्नावसरः । न च * समानकर्तृकयोः पूर्वकाले इत्यनुशासनात् पूर्वतामात्रोक्तिरिति वाच्यम्, व्यवधायकादर्शने स्वारसिकनैरन्तर्यस्यानपवादात् । प्राणिधर्मैर्व्यवधानं तु न सर्वव्यवधानमनुजानाति । न चार्थज्ञानार्थाध्ययनविध्याक्षिप्ते मीमांसाशास्त्रे श्रुतिबलादेव स्मृतिबाध इति युक्तम्; प्रत्यक्षश्रुतिविरुद्धाया अपि स्मृतेर्मूलान्तरमिच्छतां तदयोगात् । अनिच्छतामपि प्रत्यक्षश्रुत्यैव मूलवत्त्वे का तस्याः क्षतिः ? तथा चामनन्ति छन्दोगाः—* आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेण अभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधत् इत्यादि । न चायमनुवादः, अप्राप्तेः । प्राप्तावपि प्रापकेन मूलवत्त्वसिद्धेः । न च श्रुत्या स्मृत्यर्थानुवादः, वैपरीत्यापातात् । तदनुमतेरेव च स्मृतिबाधायोगात् । न च न्यायस्समावृत्तिश्रुतिस्मृतिभ्यामनू-

घते, वचनविरोधे न्यायश्च न प्रभवतीति वाच्यम्; तद्विरोधिनो वचनस्यैवात्रासिद्धेः। यदि ह्यसौ विधिरर्थज्ञानपर्यन्तस्स्यात्, तदा तद्वैशद्याय स्यादेव मीमांसापेक्षा; न चैतदस्ति। स ह्यक्षरग्रहणपर्यन्तः, तावताऽपि जपाद्युपयोगात् तस्यैव होमाद्यभिव्याप्तेः। प्रथमभावितया शीघ्रबुद्धिस्थत्वाच्च। न चास्यापुरुषार्थत्वादफलतेति वाच्यम्, अर्थज्ञानेऽपि तुल्यत्वात्। तन्मूलानुष्ठानतस्स्वर्गादिसिद्ध्या परम्परया तस्य प्रयोजनवत्त्वमिति चेत्तुल्यम्। तथाऽप्यर्थज्ञानमन्तर्भावनीयमापन्नमिति चेन्न; जपाध्यापनस्वरूपधारणादिनाऽपि पुरुषार्थपर्यवसानात्। तदन्तर्भावेऽपि तस्यैव कुतः प्रयोजनता, यावता स्वर्गादेरिति तस्यैव कल्प्यताम्, तस्यैव साक्षात्प्रयोजनत्वात्। व्यवधानान्नैवमिति चेत्; आगतोऽसि पन्थानम्। एवं चाव्यवहितमक्षरग्रहणमेव प्रयोजनमनुमन्यस्व। न चाक्षरग्रहणस्य लौकिकेऽध्यापनादौ अलौकिके जपादौ च साधारण्यान्नाध्ययनरूपसंस्कारफलतेति वाच्यम्। अर्थज्ञानस्यापि लौकिके प्रवचनादावलौकिके यागाद्यनुष्ठाने च साधारण्याविशेषात्। अनध्ययनसिद्धेनापि ज्ञानेनार्थप्रवचनं शक्यमिति चेत्; अध्यापनमपि तथैव। तत्तथा निषिद्धमिति चेत्; अन्यदपि तथैव। अतोऽध्ययनविधेरक्षरग्रहणपर्यन्तत्वान्न ततोऽर्थज्ञानाय मीमांसाक्षेपः। न चाध्ययनशब्देन तव्यप्रत्ययेन स्वाध्यायशब्देन च मीमांसाऽपि गृह्यते, येन विधिस्पर्शसंभवः।

न च * अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेदिति तदपेक्षितविधायिन्यां श्रुतौ,

* श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि। युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान्॥

अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्। वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेत्॥

इत्यादिस्मृतौ वा व्याकरणादिवत् मीमांसायाः प्रसङ्गः। अतस्सपरिकराध्ययनविधिनिरूपणे सत्सन्तानप्रसूतसदाचारनिष्ठात्मगुणोपेतवेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्याचार्योच्चारणानूच्चारणरूपाध्ययनविधिर्मन्त्रवन्नियमवदक्षरराशिग्रहणमात्रे पर्यवस्यतीति यथाभाष्यं न वैधी मीमांसा। ननु रागादेव भवतु मीमांसारम्भः, तथा च **भवनाथेन** पराभिमतसूत्रार्थं प्रतिक्षिपतोक्तम्—*साङ्गवेदाध्येतुस्स्वोपयुक्तमात्रार्थधीर्मनागिति तत्सम्यक्त्वेच्छोस्तदुपायोन्मुखस्यानर्थपरत्वधिया विमुखतापत्तावर्थपरत्वोक्त्या तन्निवृत्त्यर्थं विषयप्रयोजनज्ञानं प्रत्येव सूत्रम्, न त्वाद्यप्रवृत्त्यर्थमिति। तन्न, रागो हि तत्र प्रतिघातान्न प्रवर्तयितुं क्षमः, स्नानात्पश्चात्तु रागोऽनुवृत्तोऽपि निरन्तरविहितनित्यादिकर्मनिरूढावसरतया पूर्ववदेव। अतोऽध्ययनाङ्गसमस्तब्रह्मचारिधर्मनिवृत्तावपि गुरूपसदनादिमात्रात् पूर्ववन्मीमांसतामित्यपि दत्तोत्तरम्। न च—

* यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम्। तावुभौ पुरुषौ लोके पङ्क्तिपावनपावनौ॥

इति पावनार्थमीमांसाविधानात् कदाचिन्मीमांसाया भवितव्यत्वे कश्चिदवश्यं विधिर्निरुध्यत इति प्रथमातिक्रमे कारणाभावात् स्नानविधिरेव निरोद्धुमुचित इति वाच्यम्; तत्र विधेरश्रवणात्, स्मृतिमात्रतयाऽपि साधनतोक्तिसंभवात्। काम्यस्य चानुष्ठेयत्वनियमासिद्धेः। न चाकामोपनिबन्धविधिप्रत्ययवती काचित् स्मृतिर्मीमांसां विधत्ते, अदर्शनात्। दर्शनेऽपि तस्याः स्मृतेर्न्यायमूलत्वश्रुतिमूलत्वसन्देहे तन्निबन्धनावसरक्लृप्त्ययोगात्।

* अधीत्य वेदान् साङ्गांस्तु यो विचारमुपेक्षते। स्वप्रयासञ्च विस्मृत्य प्रभ्रष्टस्स्यात्प्रयोजनात्॥

इति ह्यत्र न्यायो मूलं भवति। न चानेनैव न्यायेनावसरक्लृप्तिश्शक्या, वचनविरोधे न्यायस्यानवतारात्। अतो वेदा-

ध्ययनात्पूर्वमनधिकारात्, पश्चाद्गुरुकुलवासादिनिवर्तकस्नानविध्यवरोधात्, ततः परमपि तत्तद्धर्मनैरन्तर्यात्, सर्वदाऽनवसरतया, साङ्गाध्ययनादेवापेक्षितज्ञानाच्च, मीमांसाशास्त्रमनारम्भणीयमिति ॥

सिद्धान्तस्तु—अमीमांसितेऽर्थे तावत् संशयादिसंभवान्न यथावदर्थनिश्चयसिद्धिः । ततश्च यद्यपि रागप्राप्ता मीमांसा, तथाऽपि न स्नानविधिना तदवसरोपरोधः, क्त्वाश्रुतावव्यवहितनैरन्तर्यस्याशाब्दत्वात्, स्वारस्यमात्रस्य मीमांसाश्रवणजन्यज्ञानसापेक्षोत्तरकालभावितत्तद्विध्यनुज्ञातरागादेव निरासात् । विधिर्हि स्वोपयोगिद्रव्यार्जनादेरिव मीमांसाश्रवणस्याप्यवसरं दातुमर्हति ; तदभावेऽर्थज्ञानासिद्धेस्तेन विना चानुष्ठानासंभवात् ।

वैधेऽप्यधीतवेदस्य गुरुगेहान्निवर्तने । इत्थं विधिरसौ प्रोक्तो मीमांसावसरप्रदः ॥

यदा तु न्यायतः प्राप्ता समावृत्तिस्तदा तु नः । न्यायेन प्रबलेनायं समुत्कृष्येत दुर्बलः ॥

अतो राग एवाध्ययनविधिनाऽप्यनुज्ञातस्सन् पूर्वसिद्धां गुरुकुलस्थितिं धारयति । तत एव न स्थित्यन्तरप्रयुक्तिप्रसङ्गः । यद्यपि पूर्वैव स्थितिरनुवर्तते, तथाऽपि तदनुवृत्तेरध्ययनप्रयुक्तत्वाकारापगमेनार्थप्राप्तस्थित्याद्यतिरिक्तधर्मान्तरनिवृत्तिः । अध्ययनविधेरक्षरग्रहणोपायनियमार्थत्वात्तदनुबन्धिधर्मनियमानां च तद्गुणावधिकत्वात् । अधीताद्वेदात्स्वयमेव जायमानस्यार्थज्ञानस्याध्ययनानन्तर्भाविनस्तद्धर्मप्रयोजकत्वे प्रमाणाभावात् । उदकाहरणादिनिवृत्तावपि ख्यातिलाभार्थं गुरोः प्रवृत्त्युपपत्तेश्च ; एवं च स्नातस्यापि स्थितिस्संभवत्येव । न च स्नातस्यानन्तरमेव दारक्रियाविधानादनवसर इति वाच्यम्, अलब्धदाराणां केषांचित्केवलस्थितिसंभवात् । कृतदारमप्यविचारितकर्माणमविद्वत्त्वेनानधिकारिणमग्निहोत्रादिविधयो न सहसाऽधिकुर्वन्ति, अपि तु स्वसिद्ध्यर्थं द्रव्यार्जनादिकमिव कर्मविचारमप्यनुमन्यन्ते । यस्तु दारक्रियातः पूर्वमेव विचारितकर्मा पुरुषस्तमधिकृत्यैव *दशमेऽहन्यादधीत इत्यादिनियमः । यथा दृष्टसामग्र्यन्तररहिते नायं नियमः, तद्वदत्रापि । यद्वा ब्रह्मचारिधर्मवद्धितैषिवाक्यानुसारेण भवत्वविचारितकर्मणोऽपि प्रथममग्निहोत्रादिप्रवृत्तिः । हितैषिवाक्यादनुष्ठानेऽपशूद्रनयविरोध इति चेन्न ; अगृहीतमन्त्रादेरनधिकारात् ; तत्परिग्रहस्य च त्रैवर्णिकविषयोपनयनाङ्गकाध्ययनसाध्यत्वात् । *न शूद्राय मतिं दद्यादित्यादिनिषेधाच्च । सूत्रितं च शारीरके—*श्रवणाध्ययनार्थप्रतिषेधात् इत्यादि । अन्योक्त्याऽनुष्ठानेऽपि न मीमांसानारम्भः ; उत्तरोत्तरानुष्ठानेषु परनैरपेक्ष्यश्रद्धया ख्यात्याद्यर्थप्रवचनादिरागेण च पश्चादपि विचारोपपत्तेः, श्रावयितृवच्च तस्याप्यवसरसंभवात् । न हि ब्रह्मचारिणश्श्रावकत्वम्, तस्य श्रोतृदशापन्नत्वात्, अन्यस्य तु यदि श्रवणावसरः, कस्तस्य श्रवणे विरोधः ? वृत्त्यर्थं तस्याध्यापनादिकं विहितमिति चेत् ; तर्हि श्रोतुरपि यदृच्छालब्धैः कुलक्रमागतैर्वा धनादिभिर्लब्धवृत्तेस्स एवावसर इति न कश्चिद्विरोधः । अतस्साङ्गवेदाध्येतुः स्नानात्पूर्वम्, स्नातमात्रस्य, कृतदारस्य, आहिताग्नेश्च यथायोगमवसरसंभवादारम्भणीया मीमांसेति ॥

चतुर्वर्गफलोपायविचारोऽध्ययनादनु । तत एव बुभुत्सातः प्राप्तोऽवसरलाभतः ॥

विचारात्पूर्वमेवात्र प्राप्तमध्ययनं विधेः । अतोऽनधीतवेदस्य विचारश्शास्त्रबाधितः ॥

क्रमो विंशतिलक्षण्यां न वैधः किंतु लौकिकः । अतो व्युत्क्रमचिन्तायामनौचित्यं प्रशिष्यते ॥

ये पुनराहुः—*स्वाध्यायोऽध्येतव्य इति विधेस्स्ववाक्ये फलादर्शनात्, कामाधिकारत्वे च प्रवृत्तिशैघ्र्येण कस्यचित्फलस्यावश्यंभावादपुरुषार्थस्याध्ययनस्य विध्यवरुद्धया भावनया भाव्यत्वेनान्वयानुपपत्तेस्स्वाध्यायार्थबोधयोस्तु

भाव्यत्वे विध्यानर्थक्यप्रसङ्गाद्विश्वजिन्न्यायेन स्वर्गं वा भाव्यं परिकल्प्य शब्दभावनायाः स्तुतिरूपोपकारजनकतयाऽध्ययनचोदनालिङ्गकातिदेशागतजपाध्ययनार्थवादोक्तपितृदेवतृप्तिद्वारकं सार्वकाम्यं फलमुपादाय फलभावनाकरणाध्ययनार्थस्य स्वाध्यायस्यार्थपरत्वासंभवेन विषयप्रयोजनाभावादनारभ्यं शास्त्रमिति पूर्वपक्षं कृत्वा, व्युत्पन्नार्थाविरोधेन तव्यप्रत्ययावगतकर्मभावस्य स्वाध्यायस्यैव भाव्यताप्रतीतेरर्थज्ञाने दृष्टे संभवत्यदृष्टकल्पनायोगात्तस्य क्रत्वनुप्रवेशकल्पनया विधिवैयर्थ्याभावाच्च स्वाध्यायस्यार्थपरत्वे निश्चिते सति विषयप्रयोजनसद्भावादारम्भणीयं शास्त्रमिति ।

तान् प्रति ब्रूमः—यदि फलभावनाकरणाध्ययनार्थस्स्वाध्यायः, कथं तावन्मात्रेणाविवक्षितार्थता स्यात्? न ह्यन्यत्र विनियोगेन स्वशक्तिरपैति, अन्यथा कृत्स्नस्यापि वेदस्यार्थज्ञानव्यतिरिक्तफलान्तरार्थे जपादौ विनियुक्तस्य कथमर्थपरतां सिद्धान्तयिष्यसि? किंच, अयं पूर्वपक्षी किमध्ययनविधिं विवक्षितार्थं मन्यतेऽविवक्षितार्थं वा? न प्रथमः, स्ववचनविरोधात्, तदविशेषेण कृत्स्नस्यापि विवक्षितार्थत्वप्रसङ्गाच्च । नापि द्वितीयः, फलभावनाकरणाध्ययनविध्यसिद्धेरेव मूलाभावेन पूर्वपक्षानुत्थानात् । ननु पूर्वपक्षिण एवायमाशयः—अध्ययनविधेर्विवक्षितार्थत्वे कृत्स्नस्यापि विवक्षितार्थत्वप्रसङ्गः, अविवक्षितार्थत्वे त्वध्ययनाभावादेव तन्मूलसमस्तासिद्धिरिति; तन्न, दत्तोत्तरत्वात् । नहि फलार्थमप्यध्ययनं वस्तुशक्तिं प्रतिरुणद्धि । मङ्गलार्थमारोपितस्यापि हि दीपस्य न प्रकाशकत्वमपैति । तथा च भाष्यम्—* अध्ययनगृहीतस्य स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबोधित्वदर्शनात् इति । अन्यथा प्रसञ्जकप्रसञ्जनीययोर्व्याघातस्तद्विपर्ययश्च । नन्वयमनुयोगस्तवापि समानः, अमीमांसितस्यानुष्ठानस्यासंभवात्, तदर्थं मीमांसापेक्षायां च तदनारम्भपक्षानुत्थानादिति । मैवम्, आपातप्रतीत्यैवावसरोपेतस्य स्फुटतरप्रतीतेस्तत्र मीमांसानपेक्षणादिति । यच्च सिद्धान्तेऽर्थज्ञानमध्ययनफलत्वेनोपादाय विवक्षितार्थत्वं साधितम्, तदप्यध्ययनविधेरक्षरग्रहणपर्यवसायित्वस्थापनेन निरस्तम् ।

यत्तु, * स्वाध्यायस्यार्थपरत्वेनाधीतवेदः पुरुषः प्रयोजनवदर्थावबोधित्वदर्शनात्तन्निर्णयाय स्वयमेव श्रवणे प्रवर्तेत इति श्रवणस्य प्राप्तत्वात्—इति भाष्यम्, तदपि नानर्थपरत्वपूर्वपक्षाभिप्रायम्, अपि त्वर्थपरत्वं सिद्धं कृत्वा श्रवणस्य पूर्वपक्षसिद्धान्तसाधारणविधिनिरपेक्षत्वज्ञापनपरम् । यदि च व्याघातमवधीर्यार्थविवक्षायां विवादस्ते रोचते, तदाऽपि विधेरक्षरग्रहणपर्यवसायितयाऽर्थविवक्षां पूर्वपक्षे प्रक्षिप्य विधिनिरपेक्षया स्वशक्त्यैवार्थपरत्वं सिद्धान्तयितव्यम् । एतेन गुरुमतमपि लघूकृतम् । अपि चाचार्यकरणार्थाध्यापनविधिप्रयुक्तिमुपजीव्य हि तदर्थतया स्वाध्यायस्यार्थपरत्वाभावः पूर्वपक्षितः, तत्राध्यापनविध्यसंभवादेव तदनुत्थानम् । तथाहि—*अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेदित्यत्र, *द्वादशाहेन प्रजाकामं याजयेदिति यजनविधिवद्वृत्त्याद्यर्थप्राप्ताध्यापनानुवादेनाध्ययनविधावेव तात्पर्यात् । नच कामपदश्रुत्यभावाद्विशेषः, * निषादस्थपतिं याजयेदित्यत्र तदभावेऽपि यजनपरतयैव योजनात् । तेनाष्टवर्षो ब्राह्मण उपनीतोऽधीयीतेति विधीयते । उपनयनं च * ब्राह्मणमिति द्वितीयाश्रुत्या माणवकसंस्कार इत्युभयसम्मतम् । अतस्तच्छेषभूतमुपनयनमन्त्रगतलिङ्गात्तद्गताध्ययनाङ्गमिति युक्तम् ।

* उपनीय तु यश्शिष्यं वेदमध्यापयेद्द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥

इति क्त्वाश्रुत्या लिङ्गबाध इति चेन्न । अनुवादसरूपतया स्मृतिगततया च विलम्बद्वयसहितया क्त्वाश्रुत्या श्रुतिगतलिङ्गबाधायोगात् ।

किंच—

क्त्वाश्रुत्या तुल्यकर्तृत्वं तेन चैकप्रयोगता । तया त्वङ्गाङ्गिभावस्स्यादित्यपि स्याद्विलम्बनम् ॥

न हि क्त्वाश्रुतिरङ्गाङ्गिभावं साक्षादाचष्टे, द्वितीयाश्रुतिस्तु माणवकस्योपनयनं प्रति प्राधान्यं साक्षादेवाभिदधाति । सा च द्वितीयाश्रुतिर्न केवलं श्रुतिगता, *उपनीय तु यश्शिष्यमिति स्मृतावपि दृष्टत्वात् । तेन भवदुक्ता स्मृतिरप्यस्माकं पक्षमुत्तम्भयति, द्रव्यनिष्ठस्य भावार्थस्य द्रव्यशेषत्वस्यैव न्याय्यत्वात् । न चोपनयीतेत्यात्मनेपदं कर्त्रभिप्रायार्थम्, येनोपनयनमुपनेतृगताध्यापनाङ्गं स्यात् । अकर्त्रभिप्रायार्थेन *संमानन इत्यादिसूत्रेण ह्येतदात्मनेपदम् । न च वाच्यं कर्त्रभिप्रायत्वं कर्तर्येव फलान्वयः ; नियमनिवृत्त्यर्थं तु संमाननादिसूत्रम् ; अतः कर्तर्यकर्तरि च फलान्वयसंभवेनोपनयनस्योपनेतृगतत्वसंभवादुपनयनमुपनेतृगताध्यापनाङ्गमिति । *अग्नीनादधीतेत्यादौ *स्वरितेत्यादिसूत्रविहितेऽप्यात्मनेपदे फलस्य कर्तर्यकर्तरि चान्वयदर्शनेन तस्य नियमार्थत्वायोगात् । चेतनान्तरे फलान्वयनिवृत्त्यर्थो नियम इति चेत्तन्न ; *ऋत्विजो वृणीत इत्यादौ कर्तर्यकर्तरि च चेतने फलान्वयदर्शनात् ।

यत्तु **भवनाथेनोक्तं**—*क्रियाफलं तदुच्यते यत्कारकावस्थायां जातमीप्सितं च, न चोपनयनात्कारकावस्थायामाचार्यकरूपफलोत्पत्तिः, उपनेये तु कारकावस्थायामेव संस्कारः, ईप्सितश्चासाविति कर्मगतमेवात्र फलमित्यकर्त्रभिप्रायतैवेति ; तदप्यसत् ; *अग्नीनादधीतेत्यत्र कारकावस्थायां जातस्येप्सितस्य च संस्कारस्याग्निगतत्वेन *स्वरितेत्यादिनैवात्मनेपददर्शनात् । अतो व्यवहितमव्यवहितं वा फलं यत्र कर्त्रभिप्रायं तत्र *स्वरितेत्यात्मनेपदं, तदुभयनिवृत्तावेव *सम्माननेत्यादिना । उद्देश्यस्य प्रधानफलस्य कर्तृगामित्वे कर्त्रभिप्रायत्वम्, तस्याकर्तृगामित्वे पुनरकर्त्रभिप्रायत्वमिति वचनं परेषामेव विपरीतफलम्, *सम्माननादिसूत्रविहितात्मनेपदविषयोपनयनफलस्य कर्तृनिष्ठस्य स्वयमेव साधनात्—इत्येषा दिक् । भवतु वाऽध्यापनविधिसंभवः, तथाऽप्याचार्यकार्थत्वेऽप्यध्ययनस्य नार्थपरता स्वाध्यायस्य भज्यते, प्रागुक्तन्यायेन स्वशक्तेरनपायात् । अबाधितप्रत्ययोत्पत्तावनपेक्षत्वलक्षणप्रामाण्यस्य वक्ष्यमाणत्वाच्च । यच्च सिद्धान्तेऽध्यापनविधिप्रयुक्तावप्यध्ययनस्य तदङ्गत्वं प्रतिक्षिप्यापूर्वार्थत्वोपपादनेनार्थज्ञानमपि विधिनाऽनुज्ञाप्य विवक्षितार्थत्वमुक्तम्, तदप्यपूर्ववादस्य निराकरिष्यमाणत्वादपास्तम् । किंच, अध्ययनसाध्यमपूर्वं किं स्वतः पुरुषार्थभूतम्? उतान्यसाधनम्? नाद्यः, अर्थज्ञानकटाक्षणासंभवात् । अथ स्वसिद्ध्यर्थमेवार्थज्ञानमनुजानीयात् ; तन्न, स्वाध्यायस्यार्थज्ञापनशक्त्यभावे तदनुज्ञाया एवासंभवात् । स्वतश्शक्तौ सत्यां किमन्यानुज्ञया? न हि विधिमन्तरेणादित्यो विश्वं न प्रकाशयति । नचान्यार्थविनियोगोऽन्यविषयां वस्तुशक्तिं प्रतिरुणद्धीत्युक्तम् । नापि द्वितीयः, अध्ययनसाध्यापूर्वस्य स्वर्गादिफलान्तरसाधनत्वेन त्वदनभ्युपगमात् । अर्थज्ञानादेस्तु दृष्टफलस्यापूर्वमन्तरेण स्वसामग्र्यैवोत्पत्तेः, विषयफलत्वेन भवद्भिरपि स्वीकारादिति ।

विवक्षितार्थदा युक्तिः परेषां कल्पिता परम् । अथेत्यवसरोद्देशात् सौत्रमसदभीप्सितम् ॥
विधिसामर्थ्यमाश्रित्य हेतुताध्ययनस्य वः । स्वसामर्थ्येक्षयाऽस्माकमिति शैघ्र्यमतःपदे ॥
योग्यावसरसम्पत्तेर्विशेषे च बुभुत्सनात् । नाकार्या धर्मचिन्तेति शुद्धा नस्सूत्रयोजना ॥
सम्प्रयोगश्च भवतां विफलोऽस्मन्मते पुनः । सोपयोगो विचारस्य रागप्राप्तत्वसूचनात् ॥

॥ इति धर्मजिज्ञासाधिकरणम् ॥ १ ॥

॥ अथ धर्मलक्षणाधिकरणम् ॥ २ ॥

2 सू०—चोदनालक्षणोऽर्थो धर्मः ॥ १. १. २. ॥

मीमांसाशास्त्रमारम्भणीयमित्युक्तम् । तदिदानीमारभ्यते, कर्मोपासनात्मककर्तव्यरूपकृत्स्नशास्त्रप्रधानार्थस्वरूपप्रतिज्ञा हीयम् । कोऽसौ जिज्ञास्यतया प्रतिज्ञातो धर्मः ? किंच तत्र प्रमाणमिति तत्स्वरूपप्रमाणयोर्बुभुत्सायां स्वरूपप्रश्नोत्तरमेव प्रमाणकोडीकारेण प्रवृत्तमिति श्रुत्यर्थाभ्यामुभयमिह सूत्रितम् । अन्तरङ्गत्वात् स्वरूपप्रश्नोत्तरमेव श्रौतम्, इतरत्त्वार्थमिति विवेकः । तदभिप्रायेण चोक्तं शाबरे—* को धर्मः कथंलक्षण इत्येकेनैव सूत्रेण व्याख्यातम्—इति । प्रमाणप्रश्नोत्तरत्वे तु, चोदनालक्षणो धर्मो नेन्द्रियलक्षणः, अर्थश्च धर्मो नानर्थ इति वाक्यभेदमाशङ्क्य, पौरुषेयतया अन्यतोऽवगतार्थविषयस्य सूत्रस्य भिन्नयोरेव वाक्ययोरिमावेकदेशावेकदेशान्तरसूचकाविति क्लिष्टनिर्वाहानाश्वासादाह—* अथवाऽर्थस्य सतश्चोदनालक्षणस्य धर्मत्वमित्येकार्थत्वमेवेति—इति । चोदनेति विधिनिषेधात्मकश्श्रौतो विध्युद्देशस्संगृह्यते । स हीश्वराज्ञारूपतया प्रवृत्तिनिवृत्तिरूपपुरुषव्यापारप्रयोजकत्वात्तदाकारविवक्षया चोदनेत्युच्यते । तथाच शाबरमुत्स्वप्नायितम्—* आचार्यचोदितः करोमीति हि दृश्यते इति । आह च भगवांश्चोदकस्स्वयमेव—* श्रुतिस्मृतिर्ममैवाज्ञेति । तथाच भाष्यम्—* स्वशासनावबोधि शास्त्रं च प्रदिश्येति । उक्तं चानेकाभिप्रायं शासनमभियुक्तैः—

* आज्ञा ते सनिमित्तनित्यविधयस्स्वर्गादिकाम्यद्विधिस्सोऽनुज्ञा शठचित्तशास्त्रवशतोपायोऽभिचारश्रुतिः ।
सर्वीयस्य समस्तशासितुरहो श्रीरङ्गसर्वस्व ! ते रक्षाकूतनिवेदिनी श्रुतिरसौ त्वन्नित्यशास्तिस्ततः ॥

इति । अत्र साक्षाच्छास्ति श्रुतिः, तदनुविधानात्तु स्मृतिरपि तदन्तर्गतैव । नित्यं श्रुतिमुखेनैवेश्वरो नियुङ्क्त इति नित्याऽपि श्रुतिस्तदाज्ञा । श्रुत्यर्थोपदेशरूपतया गीतादेरपि प्रवृत्तिः । लक्ष्यते प्रमीयते येन तल्लक्षणम्, प्रमाणमित्यर्थः । चोदना लक्षणं यस्य सः—चोदनालक्षणः प्रवृत्तिनिवृत्त्यात्मकः; उभयमपि चोदनयैव कर्तव्यतया बोध्यते । अर्थग्रहणमनर्थानुबन्धव्यवच्छेदार्थम् । ततश्च प्रभूतानर्थानुबन्धिश्येनादिव्यवच्छेदः ।

यद्यपि श्येनादयोऽपि चोदिता एव, तत एवार्थसाधकाश्च, तथाऽपि क्वचिद्विषये प्रयुज्यमानानां तेषां प्रभूतानर्थहेतुतयाऽनर्थत्वमित्येके । अन्ये त्वाहुः—कथं विहितस्यानर्थत्वमिति ? निषिद्धसंस्पर्शादिति चेन्न, तदसिद्धेः; न तावत्तदङ्गपशुहिंसानिषेधः, अग्निषोमीयतुल्यत्वात् । अग्नीषोमीयादेश्च सांख्यापादिताशुद्धियोगः * अशुद्धमिति चेन्न शब्दात् इति शारीरके परिहरिष्यते । न च श्येनादिस्वरूपनिषेधः, श्येनादि न कुर्यादित्यश्रवणात् । न चाभिचारनिषेधात्सामान्यतस्तन्निषेधः, अभिचारमात्रस्य निषिद्धत्वाभावात्, * षट्स्वनभिचरन्पतेत् इति हि तदकरणे पतनं स्मरन्ति; न हि तत्करणे तदकरणे च पतनमिति शास्त्रार्थस्संपद्यते । नच श्येनादिरभिचारशब्दार्थः, * श्येनेनाभिचरन्यजेतेति तत्फलत्वेन तन्निर्देशात् । नच फलद्वारा निषेधः, फलस्य निषेधादधर्मत्वेऽपि स्वरूपस्य विहिततया धर्मत्वात् । अतोऽर्थशब्दो न श्येनादिव्यवच्छेदार्थः; अपि तु निषिद्धहिंसादिव्यवच्छेदार्थः । निषिद्धानां चोदनालक्षणत्वमस्त्येव, निषेधचोदनयाऽनर्थसाधनत्वेन लक्षितत्वात् । न हि निषिध्यमानस्यानर्थसाधनत्वमन्तरेण निषेधचोदना प्रवर्तेत; तेन श्येनादिष्वपि फलमात्रं व्यवच्छिद्यते । नच प्रभूतानर्थसाधनभूतस्य फलस्योपायोपदेशो रक्षाकूतविरोधीति वाच्यम्; अन्यथा तदर्थिनस्तदुपायेषु दृष्टेषु स्वतः प्रवृत्तेस्तेषां चातिशयितानर्थपर्यवसानात् । श्येनादिना तु परहिंसायां प्रत्यवायलाघवात्;

लघुप्रायश्चित्तोपदेशात् । अभिचारानुव्यवहारावपतनीयावित्यपि हि केषांचिन्मतं महर्षयः पूर्वपक्षयन्ति । अतश्श्येनादिषु धर्मलक्षणाक्रान्तेष्वपि फलतः प्रभूतानर्थपर्यवसानादधर्मत्वोपचारः । मुमुक्षुं प्रति तु पुण्यविशेषाणामपि पापानामिवालौकिकानिष्टफलसाधनत्वाविशेषादधर्मत्वम् । यथोक्तं भाष्ये—* ज्ञानविरोधि च कर्म पुण्यपापरूपम् ; ब्रह्मज्ञानोत्पत्तिविरोधित्वेनानिष्टफलतयोभयोरपि पापशब्दाभिधेयत्वम्, इति । धृतिः प्रीतिः, तत्साधनमिष्टसाधनं धर्म इत्यर्थः । नचातिप्रसङ्गः, शास्त्रैकवेद्ये श्रेयस्साधने रूढत्वात् । तदभिव्यक्त्यर्थमेव हि सूत्रितम्—चोदनालक्षणस्य सतोऽर्थस्य धर्मत्वमिति । इह चार्थाच्चोदनालक्षण इति समासेन धर्मे चोदनैव प्रमाणम्, प्रमाणमेव चोदनेति प्रतिज्ञाद्वयमन्तर्गतम् । सति सामर्थ्ये तस्य चात्र विशेषणविशेष्यभावमुखेन परस्परव्यवच्छेदपर्यवसानात् । तत्र चोदनैवेति प्रतिज्ञा प्रत्यक्षसूत्रे समर्थयिष्यते । प्रमाणमेवेति तु * औत्पत्तिकसूत्रादौ । नचात्र चोदनैवेति प्रतिज्ञयाऽर्थवादादीनामपि व्यवच्छेदस्स्यादिति भ्रमितव्यम् । तेषां चोदनाङ्गतया तन्मूलतया च धर्मे प्रामाण्यस्य वक्ष्यमाणत्वात । इह चावधारणस्य तुल्यजातीयविषयतया चोदनावत्स्वातन्त्र्येण धर्मे प्रमाणीबुभूषतां प्रत्यक्षादीनामेव व्यवच्छेदात् । न हि देवदत्त एवात्र तिष्ठतीत्युक्ते वसनाभरणादेर्व्यवच्छेदः, अपि तु तत्तुल्यस्य पुरुषान्तरस्य । एतत्सूत्रं प्रतिज्ञामात्रपरमित्येके ; तत्तु मन्दम्, न्यायनिबन्धनात्मके शास्त्रे सर्वत्र कस्यचिन्न्यायस्यावश्यं सूचनीयत्वात् । ये तु कार्यमात्रव्युत्पत्तिसमर्थनं पुरस्कृत्य कार्यरूपो वेदार्थ इति सूत्रवाक्यार्थमाहुः, तेषां तु सूत्राक्षरवैघट्यम्, अव्याप्तिश्च । सिद्धार्थव्युत्पत्त्या तत्र तात्पर्यसंभवेन सिद्धरूपस्यापि ब्रह्मणो वेदार्थत्वस्य शारीरके समर्थयिष्यमाणत्वात् ।

तदिह चायं विचारः । योऽसौ कृत्स्नवेदार्थानुबन्धी जिज्ञास्यतयोद्दिष्टो धर्मः तस्य च केनचिल्लक्षणेन विविक्तप्रतिपत्तौ सत्यामेव हि परीक्षा घटेत, न ह्यसाविक्षुक्षीरादिवन्निर्विवादस्फुटप्रतीतिविषयः, येनाधर्मव्यवच्छेदे लक्षणान्तरापेक्षा न स्यात् । प्रतिसमयमन्यमन्यमेव च धर्ममभिलपन्ति । यथा—अन्तःकरणवृत्तिविशेष इति सांख्याः । शुभा चित्तवासनेति सौगताः । पुण्याः पुद्गला इत्यार्हताः ; गतिमतां गतिभूतो जगद्व्यापीति वा । विहितक्रियासाध्यः पुंगुणविशेष इति वैशेषिकाः । धर्मशब्दश्च चैत्यवन्दनादावपि तत्तत्सामयिकैः प्रत्युक्तो दृष्टः । अतस्सामान्येन धर्मजिज्ञासायां प्रतिज्ञातायां कस्य परीक्षा वर्तिष्यत इति न विद्मः । अथाध्ययनानन्तरं तत एव हेतोर्धर्मजिज्ञासा कर्तव्येति प्रतिज्ञातेऽर्थाज्ज्योतिष्टोमादीनामेव विचार्यत्वमापतितमिति मन्यसे ? तन्न, धर्मशब्दार्थे निश्चिते सति तदपेक्षपूर्वपक्षनिष्कर्षः, तेन च तन्निष्कर्ष इत्यन्योन्याश्रयणात् । अतो धर्मविवेकार्थं तल्लक्षणं वक्तव्यम् । ततश्च धर्मो लक्षणेन व्यावृत्ततयाऽवगन्तुं शक्यते न वेति संशयः । तदर्थं विचार्यते—धर्मशब्दस्य निरुक्त्या रूढ्याऽन्यतो वा किंचित्तल्लक्षणं संभवति न वेति । किं प्राप्तम् ? न संभवतीति । तथा हि—यदि धृतिसाधनं धर्म इत्युच्येत, तदा लौकिकानां प्रीतिसाधनानामपि धर्मत्वं स्यात् ; तथा चानुत्थानं निषेधशास्त्रस्य । अथानर्थपर्यवसानात्तेषामधर्मतेति मन्यसे ? तन्न, अविहिताप्रतिषिद्धेषु तदभावात्, श्येनादेः स्वरूपतोऽप्यधर्मत्वप्रसङ्गाच्च । नचायमिष्टप्रसङ्गः, अधर्मस्य विध्यसंभवात् । अथ चोदनालक्षणत्वे सति धृतिसाधनं धर्म इति रूढिराश्रीयेत ; तन्न, रूढेः प्रयोगशरणत्वात् ; प्रयोगस्य चासंसारमनुवर्तमानैस्तत्तत्सिद्धान्तैर्विगानात् । स्मृत्याचारप्राप्तश्रेयस्साधनेष्वीश्वरप्रत्यक्षमूलपञ्चरात्रधर्मादिष्वव्याप्तेश्च । नच पञ्चरात्रादिषु चोदनाशब्दमुपचरन्ति ! एवं * वेदोऽखिलोधर्ममूलं स्मृतिशीले च तद्विदामित्यादिमहर्षिवाक्यैरपि न धर्मस्य लक्षणं किंचित्प्रतीमः । अतो धर्मस्य लक्षणासंभवान्न व्यावृत्तप्रतीतिरिति ।

तत्रेदमुत्तरम्—* **चोदनालक्षणोऽर्थो धर्म** इति । अयमभिप्रायः—चोदनालक्षणत्वविशेषितमेवार्थसाधनत्वं धर्मलक्षणम्, तत्रैव च धर्मशब्दस्य रूढिः । नचान्यत्र बाह्यैः प्रयोगस्तत्र रूढिं विहन्ति । न हि भ्रान्तैश्शुक्त्यादिषु रजतादिशब्दः प्रयुक्त इति रजतादौ तस्य रूढिर्विहन्येत । अयं चार्थोऽन्यप्रमाणकत्वव्युदासेन सेत्स्यति । स्मृत्यादिकं तु मूलश्रुत्यनुमानेन धर्मे प्रमाणमिति तत्रापि चोदनालक्षणत्वसत्त्वान्नाव्याप्तिः । ये पुनरीश्वरप्रत्यक्षमूलपञ्चरात्रधर्माः, तेऽपि श्रुत्यर्थतया चोदनालक्षणा एव । यथाऽऽह भगवान् व्यासः—

* इदं महोपनिषदं चतुर्वेदसमन्वितम् । सांख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितम् ॥
इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमम् । ऋग्यजुस्सामभिर्जुष्टमथर्वाङ्गिरसैस्तथा ॥
भविष्यति प्रमाणं वा एतदेवानुशासनम् ॥ इति ।

तथा * वेदपाठेषु पठितं व्रतमेतत्सुदुश्चरम् । इति । तथा—*महतो वेदवृक्षस्य मूलभूतो महानयम् ॥ इति ।

किंच—* यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च । गृणन्ति सत्यकर्माणं सत्यं सत्येषु सामसु ॥

इति वदन् पाञ्चकालिकधर्मासाधारणनिषद्वाकसंज्ञितनिगमभागमन्वमंस्त । तथा च * अलाभे वेदमन्त्राणां पञ्चरात्रोदितेन वा । इति स्मृतिः श्रुतिमूलैवाभ्युपगन्तव्या ; तत एव च धर्मोऽपि श्रौत एव फलितः । तत्र शास्त्रे श्रुत्यर्थतैवोच्यते, यथा—

* वेदान्तेषु यथासारं संगृह्य भगवान् हरिः । भक्तानुकम्पया विद्वान् संचिक्षेप यथासुखम् ॥ इति,

* श्रुतिमूलमिदं तन्त्रं प्रमाणं कल्पसूत्रवत् । इति च । आगमान्तरोक्तधर्मास्तु श्रुतिमूलतया न तत्कर्तृभिरुच्यन्ते, न तत्सैद्धान्तिकैः, नापि महर्षिभिरिति विशेषः । सांख्यादिधर्मेष्वप्यविरुद्धांशश्चोदनार्थ एव । अतो नाव्याप्तिः । तदेवं धर्मस्य लक्षणसिद्धेस्तस्य व्यावृत्तिप्रतीतिस्सिद्ध्यतीति । एवमुपादेयस्य धर्मस्य लक्षणकथनेन हेयस्याधर्मस्यापि लक्षणं सूत्रितं भवति ; अर्थपदस्य व्यवच्छेद्यतया तत्प्रतीतेः शास्त्रैकवेद्यमनर्थसाधनमनर्थ इत्युक्तं भवति ।

सूचितश्चोदकः कश्चिच्चोदनापदसूत्रणात् । यदभिप्रायभेदेन धर्माधर्मौ फलिष्यतः ॥
प्रमाणे लक्षणपदं प्रयुञ्जानेन सूचितम् । विशेषणमुपादाय लक्षणं च तदेव नः ॥
अर्थसाधनमत्रार्थशब्देन प्रतिपादयन् । फलतुल्यमुपायं च नैः श्रेयसमसूचयत् ॥
चतुर्वर्गफलोपायविषयैश्चान्यदीदृशम् । धृतिसाधनशब्देन मोक्षेऽपि प्रीतिमक्षताम् ॥

॥ इति धर्मलक्षणाधिकरणम् ॥ २ ॥

॥ अथ धर्मप्रमाणपरीक्षणाधिकरणम् ॥ ३ ॥

3. सू०—तस्य निमित्तपरीष्टिः ॥ १. १. ३. ॥

प्रस्तुतयोस्स्वरूपप्रमाणयोस्स्वरूपं प्रमाणमुखेनैवान्वेष्टव्यम्, तदर्थमिदमध्यायार्थविभजनम् । यथा वक्ष्यमाणेष्वध्यायेषु पृथक्पृथक् तत्तदध्यायार्थप्रतिज्ञा क्रियते, तद्वदत्रापि । अन्यथा कस्यांशस्य सदादिसूत्रैर्हेतुर्वक्ष्यत इति न ज्ञायेत । **तस्य**—धर्मस्य, **निमित्तम्**—प्रमाणम्, तत्प्रमानिमित्तत्वान्निमित्तमित्युपचर्यते ; परम्परया वा तन्निमित्तत्वम् । **परीष्टिः**—पर्येषणा । *इषु गतावित्यस्माद्धातोः * इषेरनिच्छार्थस्य इति युचि, *परेर्वा इति परिपूर्वात्तस्मात् क्तिन्युचोर्विकल्पोऽनुशिष्यते । तेन युचि पर्येषणेति रूपम्, क्तिनि तु परीष्टिरिति । धर्मप्रमाणस्य परीक्षणमस्मिन्नध्याये कर्तव्य-

मित्यर्थः । इदमपि सूत्रं न केवलं प्रतिज्ञापरम्, अपितु प्रमाणस्यापरीक्षणीयत्वपूर्वपक्षप्रतिक्षेपार्थम् । तथा हि—किं धर्मे प्रमाणं परीक्षणीयम्, उत स्वरूपमेवेति संशयः । तदर्थं विचार्यते—किं प्रमाणनिरूपणमन्तरेण धर्मस्वरूपनिरूपणं युज्यते न वेति । तत्र युज्यत इति प्राप्तम् । लोके तावत्प्रत्यक्षादिप्रमाणनिरूपणमन्तरेण मधुराम्लसितरक्तशीतोष्णादिविभागमवधार्य हानोपादानादिव्यवहाराः पुंसां प्रवर्तन्ते । तद्वदिहापि शब्दान्तराभ्यासश्रुतिलिङ्गादिभिर्भेदाङ्गाङ्गिभावादिनिरूपणमुखेन धर्मस्वरूपमेवानुष्ठानार्थं निरूपणीयम्, किं तदर्थेन प्रमाणपरीक्षणेनेति ।

तत्र प्रतिपद्यते * **तस्य निमित्तपरीष्टिरिति** । प्रकृतपरामर्शोऽत्र हेत्वभिप्रायः । **तस्य**—धर्मस्य । प्रमाणपरीक्षणं कर्तव्यम्, अलौकिकार्थत्वात्तस्य । न हि मधुराम्लादिविभागवज्ज्योतिष्टोमादेश्चैत्यवन्दनादेश्च विभागमुपलभामहे, येनेतरप्रहाणेनेतरमुपाददीमहि । अतो यावद्धर्मे चोदनानां प्रामाण्यमितरेषां चाप्रामाण्यं नावधारितं भवति, न तावद्धर्मविशेषोपादानं युज्यते । प्रमाणमविचार्य चेत्प्रवर्तेत, अन्धवदनर्थे पतेदर्थं वा न विन्देत् । अतो वेदस्यैव धर्मे प्रामाण्यमवधार्य तदर्थस्यैव धर्मत्वे निश्चिते सति तद्भेदाभेदतदाराध्यादिचिन्तावकाश इति विंशतिलक्षण्यां द्वितीयाध्यायमारभ्य क्रमशो यद्यत्प्रतिपाद्यं कर्मदेवताब्रह्मतदनुबन्धिभेदभिन्नम्, तत्सर्वं प्रमाणेनैव निरूपणीयतया स्वायत्तसर्वार्थं प्रमाणलक्षणमेव प्रथमं प्रवर्तते ।

एवंच [चै] तत्परीक्षाक्रमः । लोकायतमतेन धर्मे न किंचित्प्रमाणमस्तीति ; सत्त्वेऽपि सांख्याद्युक्तविषयानुरूपफलप्रदानरूपालोचनविकल्पाभिमानाध्यवसायादिनयेन न्यायोक्तसंप्लववादेन च किं चोदनाऽन्यच्चेति समुच्चयोऽस्ति न वेति ; असमुच्चयेऽपि संशयसारसंवित्तेरन्वयादलौकिकार्थेषु कालभेदेन वा तद्भेदमन्तरेणापि प्रमाणभेदप्रवृत्तिदर्शनेन वा किं चोदनाऽन्यद्वेति विकल्पोऽस्ति न वेति ; अविकल्पेऽपि सौगतादिमतेन किं प्रत्यक्षादिकमेव उत चोदनैवेति । तदेवं नियमविकल्पसमुच्चयोभयापलापेषु प्रत्यक्षसूत्रे तु चोदनाव्यतिरिक्तानां धर्मे प्रामण्यनिरासात्समुच्चयविकल्पचोदनेतरनियमानां प्रतिक्षेपः, औत्पत्तिकसूत्रादिना तु पादशेषेण चोदनाप्रामाण्यसमर्थनादुभयापलापपक्षः प्रतिक्षिप्यते । त्रिपाद्या त्वर्थवादपादेन मन्त्रार्थवादानां विध्युपयोगेन प्रामाण्यप्रकारकथनम् । स्मृतिपादे चाप्तस्मृतिशिष्टाचारमात्रप्राप्ताष्टकादिकर्तव्यतामूलभूतदेशकालान्तराधीतवेदोपपादनम् । नामधेयपादे तूद्भिदादिनामधेयानां नामधेयतयैव स्थित्वा विशेषसमर्पणमुखेन चाटुना राजानं प्रीणयेदितिवद्यजिनिर्दिष्टदेवताराधनसामान्यस्य विशेषतोऽवच्छेदाद्विध्युपयोगस्समर्थ्यत इति कृत्स्नेनाध्यायेन धर्मे प्रमाणमेव परीक्ष्यते । एवमयोगान्ययोगव्यवच्छेदेन धर्मे चोदनैव प्रमाणमित्युपदिष्टे तदर्थस्यैव धर्मस्य निरूपणं भेदलक्षणादिषु वक्ष्यति । अतो धर्मे प्रमाणं परीक्षणीयमिति स्थितम् ॥

यत्तु **उपवर्षवृत्तौ**—तस्य निमित्तपरीष्टिर्न कर्तव्येति नञमध्याहृत्यातिमहता क्लेशेन व्याख्यातम्, तदप्यनेन निरस्तम् ; निमित्तपरीक्षाभावे प्रत्यवायस्य दर्शितत्वात् । यच्चापरीक्षणीयत्वे प्रमाणस्य प्रसिद्धत्वं हेतुरुक्तः, तदपि संशयविपर्ययाक्रान्तत्वप्रदर्शनेन निरस्तम् । अतो यद्यपि प्रमाणस्य स्वत एव विषयोपस्थापनसामर्थ्यम्, तथाऽप्यपवादशङ्कानिराकरणाय कारणदोषबाधकप्रत्ययनिरासः कर्तव्य इति युक्तं तस्य परीक्षणीयत्वमेव । यत्तु प्रमाणपरीक्षायामनवस्थानमुक्तम्, प्रमाणं परीक्ष्यमाणमन्येन परीक्ष्येत, तच्चान्यत्ततोऽन्येनेति, तदपि मन्दम् ; सन्दिग्धविषये परीक्षाप्रवृत्तेः, उत्तरोत्तरेषु च सन्देहनियमानभ्युपगमात् । आशङ्कायाश्च व्याघातावधिकत्वाद्यावदाशङ्कमेव च तर्कप्रवृत्तेः । स्वपरनिर्वाहके वा कस्मिंश्चित्प्रमाणादौ विश्रमात् । न चात्र प्रथमे पर्वणि निस्सन्देहत्वे तद्युक्तम् । अन्यथा सौगतादयोऽपि

वैयात्यादिमामेवानवस्थां पुरस्कृत्य यदि स्वाभिमतैर्ग्रन्थैरपरीक्षितप्रामाण्यैश्चैत्यवन्दनादिकं धर्ममेव परीक्षणीयमुपक्षिपेयुस्तदा कस्ते निस्तारः? अतो भगवानप्युपवर्षोऽपरीक्षणीयत्वपूर्वपक्षमन्वारुरोह । भक्त्या चोदनाप्रामाण्ये प्रसिद्धिमनुसृत्य प्रसङ्गाच्छिष्यशिक्षणार्थं प्रत्यक्षतदाभासादेरपि प्रसिद्धिं दर्शयंस्तल्लक्षणादिकमपि व्याचकारेति मन्यामहे । अन्यथा कथमपरीक्षणीयत्वमपि केनचित्प्रमाणेन समर्थयेत्? तस्याप्यपरीक्ष्यत्वाय प्रमाणान्तरापेक्षयाऽनवस्थाप्रसङ्गात् । अथ यदि प्रसिद्धत्वेन स्वपरनिर्वाहकेणानवस्थां प्रतिबिभत्ससि, तदा प्रमाणपरीक्षणेऽप्येवंविधमिदं प्रमाणं भवितुमर्हतीति साधयतः प्रमाणस्याप्येवंविधत्वोपाध्याक्रान्ततया तद्वदेव समाधिं कटाक्षय[सि] । यदि तस्य तदुपाधिज्ञानायान्यापेक्षा, तदा प्रसिद्धत्वस्यापि प्रसिद्धत्वपरामर्शायान्यापेक्षेति तुल्यम् । किंच यदि प्रसिद्धत्वादपरीक्षणीयत्वमेवात्र विवक्षितं तदा शब्दनित्यत्ववेदापौरुषेयत्वार्थवादोपयोगादिप्रतिपादनार्थो वृथैवायं ग्रन्थविस्तरस्स्यात् । ततोऽपरीक्षणीयत्वमुखेनापि सामर्थ्यात्परीक्षणमेव क्रियत इति तज्ज्ञानमेवाध्याहारादिदोषाभावादध्यायार्थविभजनादिना सोपयोगत्वाच्च युक्तमुत्पश्याम इति ॥

सर्वस्समञ्जसोऽर्थस्स्यात्प्रमाणे परिशोधिते । अतः प्रमाणवृत्तान्तपरिचिन्तनमर्थवत् ॥
धर्मप्रमाणचिन्तेति सामान्येनाभिधानतः । मन्त्रार्थवादस्मृत्यादिचिन्ताऽप्यन्तर्भविष्यति ॥
निषेधचोदनारूपधर्ममानस्य चिन्तने । निषेध्या धर्ममानस्य चिन्ताऽप्यन्तर्गतैव हि ॥
ननु स्वरूपविश्रान्तब्रह्मवाक्येषु केषुचित् । न धर्ममानता तेषामिह न स्याद्विचिन्तनम् ॥
मैवं वेदार्थमात्रस्य जिज्ञासोपक्रमादिह । कृत्स्नवेदप्रमाणत्वमुपक्षेप्तव्यमादितः ॥
अतो धर्मप्रमाणस्य वक्तृदोषाद्यभावतः । मानत्वे ब्रह्मवाक्येऽपि सामान्यान्मानता स्थिता ॥
स्वरूपमात्रविश्रान्तिर्वाच्या शारीरके परम् । तदनुक्तावपि ह्यत्र प्रामाण्यं साधयिष्यते ॥
तावता विधिशेषत्वस्वरूपातत्परत्वतः । उत्थानमाप्यते पश्चान्न तु मानत्वसाधनम् ॥

॥ इति धर्मप्रमाणपरीक्षणाधिकरणम् ॥ ३ ॥

॥ अथ अन्यप्रमाणकत्वनिरासाधिकरणम् ॥ ४ ॥

4. सू०—सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ॥ १. १. ४. ॥

अप्रमाणकत्वान्यप्रमाणकत्वादिमुखेन धर्मपर्येषणायां प्रक्रान्तायां चोदनालक्षणेत्यंशसमाससामर्थ्यसिद्धावधारणद्वयक्रमानुसारेण प्रथममिहान्यप्रमाणकत्वं निरस्यते । तदत्र किं धर्मे प्रमाणं संभवति नेति विचारः । किं युक्तम्? संभवतीति । तथा हि—इह तावद्धर्मशब्दाभिलप्या द्रव्यक्रियागुणादयः प्रत्यक्षसिद्धा इति सर्वसम्मतम् । तेषां श्रेयस्साधनत्वं तु यद्यप्यस्मदादीनां सहसा दुर्दर्शम्, तथाऽपि रत्नतत्त्वमिव ताच्छील्यशालिनां संस्कारोपचयसहकृतेन प्रत्यक्षेण सुग्रहम् । कामातुरकामिनीसंदर्शनादिष्विव भावनाप्रकर्ष एव वा प्रत्यक्षां धियमुत्पादयितुमलम् । काकोलूकगृध्रादिषु चेन्द्रियप्रकर्षतारतम्यं दृश्यते । तारतम्यवतां च काष्ठाप्राप्तिरुपलब्धा । ततश्च, प्रकर्षतारतम्यं क्वचिद्विश्रान्तम्, तारतम्यरूपत्वात्, परिमाणतारतम्यवदित्येवं प्रतीन्द्रियं वा, प्रत्यक्षप्रकर्षतारतम्यमिति सामान्येन वा, प्रयोक्तव्यम् । एवं स्थिते तद्विश्रमस्य सर्वविषयतामन्तरेणानुपपत्तेरतीन्द्रियं सर्वं कस्यचिदैन्द्रियकमिति सिध्यति । प्रकृते विशेषतश्च तदेवा-

नुमातुं शक्यम् । धर्मादयः कस्यचिदिन्द्रियग्राह्याः, प्रमेयत्वात्, करतलवदिति ; तस्यामेव वा प्रतिज्ञायां मीमांसकानां प्रत्यक्षत्वादस्मत्सुखादिवदिति । महर्षीणां योगिनां च धर्मवीर्यप्रसूतं प्रत्यक्षं महर्षिभिरेवोच्यते । * तत्सर्वं धर्मवीर्येण यथावत्संप्रपश्यतीत्यादि । अतः प्रत्यक्षग्राह्यत्वं धर्मस्य युक्तम् । एवमानुमानिकत्वमपि । सेवाध्ययनादिदृष्टहेत्वविशेषे फलभेदो न निमित्तान्तरमन्तरेण घटेत । तदेवं प्रत्यक्षानुमानगम्य एव धर्मेऽर्थशास्त्रायुर्वेदादिवत्पौरुषेयागमोऽपि [हि] संभवत्येव । अतो यद्येभिः प्रमाणैश्चोदनार्थ एव धर्मतयोपस्थाप्येत, तदा बह्वायासग्राह्यचोदनानैष्फल्यम्, चोदनैवेत्यवधारणानुपपत्तिश्च । अथ चोदनानुक्तः कश्चित्तदविरुद्धोऽर्थः, तदा चोदनैवेति प्रतिज्ञा न स्यात् । यदि पुनस्सौगताद्यर्थवत्तद्विरुद्ध एव कश्चित्, तदाऽपि तद्बाधाच्चोदना प्रमाणमेवेत्यवधारणानुपपत्तिरिति सर्वथा * चोदनालक्षणार्थो धर्म इत्येतत् दुर्वचमिति ।

तदेतत्परिहरति—* **सत्सम्प्रयोग** इत्यादिना । अत्रायमन्वयक्रमः—धर्मे प्रत्यक्षमनिमित्तम् ; कुतः ? विद्यमानोपलम्भनत्वात्—वर्तमानार्थग्राहकत्वादित्यर्थः । एतदपि कुत इत्याकाङ्क्षायामुच्यते । तत्खल्विन्द्रियाणां प्रयोगः । तद्भवतु प्रत्यक्षं ततः कथं धर्मे नापि निमित्तम् ? विद्यते हि धर्मः क्रियमाणः कृतश्च यावत्फलम्, ततस्तदुपलम्भनं प्रत्यक्षं भवतु । मैवम् ; यदि तावदयं घट इतिवदयं धर्म इति द्रव्यादिस्वरूपं धर्मतया प्रत्यक्षेण दृश्यते ; तत्र च यत्फलसाधनतया योऽर्थो निर्दिष्टस्तदनन्तरमेव तस्योत्पत्तिं यदि नियमेनोपलभेमहि, तदा भूयोदर्शनसहकृतेन प्रत्यक्षेण श्रेयस्साधनमिदमिति निश्चिनुमः । स्वर्गादेः फलस्य देहान्तरभावितयेदानीमुपलम्भायोग्यत्वान्न तत्साधनमिति गृहीतुं शक्यम् । न च यावत्फलानुभवं क्रिया तिष्ठति । क्रियासाध्यमपूर्वं स्थिरमपि नास्मदादिप्रत्यक्षम् ; तद्धि देवतानुग्रहात्मकम् । न हि पराभिप्रायः परस्य प्रत्यक्षतामियात् । अतः फलदशायां कर्मणोऽभावात् कर्मदशायां फलस्याभावादुभयनिष्ठस्य साध्यसाधनभावसंबन्धस्यास्माभिर्ग्रहीतुमशक्यत्वात्, प्रत्यक्षस्य धर्मग्राहित्वाभावे विद्यमानोपलम्भनत्वं हेतुरिति साधीयः ।

एतेन रत्नतत्त्वदृष्टान्तोऽपि निरस्तः, न हि सहस्रशश्शीलितेऽपि रत्नतत्त्वे गुरुत्वं चक्षुषा गृह्यते । वर्णादिवैषम्यं तु पूर्वं सादृश्यतिरस्कृतमैन्द्रियिकतया पश्चान्निपुणनिरूपणेन प्रकाशत इति युक्तम् । यत्तु भावनाप्रकर्ष एव प्रत्यक्षयतीति, तदसत् ; न हि भावनया प्रत्यक्षं जायते, अपि तु स्मृतिवैशद्यमात्रमेव । संस्कारोपचयो हि स्मृतावेव पाटवमादधीत । कामातुरकामिनीसन्दर्शनादिष्वपि न पूर्वगृहीताभ्यधिकं किंचित्प्रकाशते । यच्च—

* वृक्षेवृक्षे च पश्यामि चीरकृष्णाजिनाम्बरम् । गृहीतधनुषं रामं पाशहस्तमिवान्तकम् ॥

इत्यादिष्वधिकं प्रकाशते, तत्त्वन्यथाऽवभासान्न प्रत्यक्षम्, अपि तु तदाभासः । यत्तु इन्द्रियप्रकर्षतारतम्यादेर्विश्रान्तिसाधनम्, न तेनाप्येकस्येन्द्रियस्य सर्वविषयता सिध्यति, किंतु तदिन्द्रियग्राह्यजातीयत्वे सति तत्संप्रयुक्तसर्वविषयत्वम् । न हि लोके प्रकृष्यमाणमिन्द्रियपाटवमिन्द्रियान्तरविषयेषु मात्रयाऽपि प्रवर्तमानं दृष्टम्, स्वविषये वा भूते भविष्यति वा । असन्निकृष्टस्य च नैन्द्रियिकत्वमित्युक्तम् । यच्च प्रमेयत्वादिना धर्मादीनामैन्द्रियकत्वसाधनम्, तदपि बाधकाभावेन निरस्तम् । अन्यथा धर्मादयो रूपादयश्च कस्यचिद्घ्राणग्राह्याः, प्रमेयत्वात्, गन्धवदित्यपि किं न साध्येत ? विषयविशेषनियततया तच्छक्तिनिश्चयादिति चेत् ; प्रकृतेऽप्येतदनुसन्धत्स्व । घ्राणादेरपि कचित्सर्वविषयत्वमिच्छाम इति चेन्न ; उक्तोत्तरत्वात् । इच्छामात्रेण च तदसिद्धेः । यत्तु धर्मवीर्यप्रसृतमृषीणां योगिनां च प्रत्यक्षं शास्त्रबलादभ्युपगतम्, तन्न तेषामनुष्ठानार्थम्, आगमावधारितानुष्ठानजन्यत्वात्, आगमार्थतयैव धर्मादिप्रत्यक्षीकरणात् । नाप्यस्मदादीनामनु-

ष्ठानार्थम्, परप्रत्यक्षस्य परानुष्ठानानुपकारित्वात्। तदुपदेशस्य त्वागमायमानस्यापि पौरुषेयतया श्रोतॄणां मूलपरामर्शसापेक्षत्वेन धर्मवीर्यप्रसूतप्रत्यक्षमूलत्वपरिशेषे तस्मिन् धर्मे प्रमाणान्तरमन्वेषणीयम्, तच्च नान्यच्छास्त्रात्। यद्यपीश्वरनित्यप्रत्यक्षमूले पञ्चरात्रशास्त्रे श्रुत्यर्थविषयेऽपि न मूलश्रुत्यपेक्षा, तथाऽपि नित्यप्रत्यक्षविशिष्टोऽयमीश्वर इति तत्स्वरूपसिद्धौ तन्मूलवक्तृदोषनिराकरणे च श्रुतिरेव शरणमिति श्रुतिप्रामाण्यमुपजीव्यैव तत्प्रामाण्यं निरूपणादि। चोदनार्थोऽयमित्येव च भगवता तदर्थं उपदिश्यत इति श्रीविष्णुस्मृतिगीतादिन्यायेन तदुक्तार्थेऽपि चोदनाप्रामाण्यमायातम्। तदेवमस्मदादिभिर्धर्मस्य श्रेयस्साधनरूपेणाध्यक्षयितुमशक्यत्वादन्वयव्यतिरेकसापेक्षमनुमानमपि धर्मे न प्रमाणमिति सिद्धम्॥

यत्तु सेवाध्ययनादितुल्यत्वेऽपि फलभेददर्शनादतीन्द्रियनिमित्तभेदकल्पनमिति, तदपि न; सूक्ष्मस्य सेवाध्ययनादिभेदस्य दृष्टस्यैव संभवेन निमित्तान्तरनैरपेक्ष्यात्। सामान्यतश्च कल्पिते निमित्तभेदे किं तद्दर्शनादिसिद्धमुत चोदनासिद्धमिति विवेकासिद्धेरनुष्ठानं प्रत्यनुपकारित्वात्। ततश्च सेतिकर्तव्यताकधर्मानुष्ठाने श्रुतिरेव शरणम्। तदेवं प्रत्यक्षानुमानयोर्धर्मप्रमाणत्वनिरासेन तन्मूललौकिकागमस्यापि न धर्मप्रमाणतासिद्धिः। उपमानार्थापत्तिसंभवादीनि तु प्रमाणान्तराणि न सन्त्येव, यथायथं त्रिष्वन्तर्भावादिति **न्यायपरिशुद्धौ तत्त्वमुक्ताकलापे** च समर्थितमस्माभिः। बहिर्भावेऽपि तुल्यन्यायतया धर्मविषयत्वाभाव एव। तदेवं चोदनाव्यतिरिक्तैः प्रमाणैः कैश्चिदपि तन्निरपेक्षैश्चोदनोक्तस्य तदन्यस्य तद्विरुद्धस्य वा कस्यचिद्धर्मत्वेनाग्रहणाच्चोदनैवेत्यसाधारणमुपपन्नमिति।

अनुष्ठातृदशापन्नपुरुषापेक्षया त्विदम्। सत्संप्रयोगजन्यत्वमैशाध्यक्षादिसुस्थितम्॥
प्रत्यक्षमस्मदादीनां पक्षोऽत्राभिमतस्ततः। न भागासिद्धता नापि बाधो हेत्वोरिहोक्तयोः॥
पुरुषस्येन्द्रियाणामित्येकानेकत्वकीर्तनात्। देहेन्द्रियादिसङ्घातादन्य आत्मा प्रदर्शितः॥
अक्षैरपघनैर्वाऽर्थानुपलब्धान्पृथक्पृथक्। य एकः प्रतिसन्धत्ते स तान्येवेति दुर्वचम्॥
सङ्घातिनोऽधिकं तत्त्वं सङ्घातो नाम नेष्यते। न चावयवसङ्घातादन्योऽस्त्यवयवी पुनः॥
न चात्र ग्रामवद्बोद्धृनानात्वमुपलभ्यते। न च पाणिरहं चक्षुरहमित्यभिजल्प्यते॥
प्राणाख्यात्पवनस्कन्धादप्यन्यत्वमवस्थितम्। प्रत्येकसमुदायादिविकल्पानुपपत्तितः॥
व्यतिरिक्ता मतिश्चास्ति कायप्राणेन्द्रियादिषु। पुरुषस्येति सम्बन्धकथनात्तच्च सूचितम्॥
बुद्धितो व्यतिरिक्तत्वमत एव च सूत्रितम्। तद्धर्मित्वेन सकलैः प्रमाणैरुपलम्भनात्॥
बुद्धिजन्मेत्यनेनैव बुद्धेर्जन्मप्रदर्शनात्। अजातः प्रतिसन्धाता प्रोक्तः पुरुषशब्दतः॥
श्रुत्या धीनित्यभावेऽपि सूचितैवात्र तद्विदा। नामान्तराभिलापार्हविकारसदसत्त्वतः॥
देहादिभ्योऽतिरिक्तस्य परलोकफलार्थिनः। वेदितुस्स्थापने धर्मप्रमाणान्वेषणं क्षमम्॥
अतोऽन्यपरवाक्येऽपि कृत्स्नशास्त्रोपयोगिनम्। अधिकारिणमात्मानमादावेव न्यवीविशत्॥
स्वर्गयागादिवाक्येऽपि परीचिक्षिषिते पुनः। प्रत्यक्षप्रतिरुद्धत्वं परिहर्तुमिहेप्सितम्॥
पारलौकिकतामात्रमिह तावदपेक्षितम्। शारीरके तु नित्यत्वं वाच्यं नित्यफलार्थिनः॥
प्रत्यक्षलक्षणाद्यं तु वक्तव्यं न्यायविस्तरे। इह तत्सूच्यतां मा वा पारम्पर्योपयोगतः॥
प्रत्यक्षमनिमित्तं चेदनुमानादिकं तथा। इति पश्यन्नुपारंस्त किमेतत्कीर्तनश्रमात्॥

5. सू०—औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ॥ १. १. ५. ॥

धर्मस्यान्यप्रमाणकत्वं निराकृतम्; अथाप्रमाणकत्वमाशङ्क्य निराक्रियते पादशेषेण। तत्रास्मिन्नधिकरणे चोदनानामप्रामाण्यद्वाराणि बहूनि विकल्प्य कश्चिदंशो निराक्रियते। तदयं विचारः—किं चोदनानां धर्मे प्रामाण्यं संभवति न वेति। तदर्थं च किं तासां प्रामाण्यं प्रमाणान्तरसापेक्षं न वेति। सापेक्षत्वे तदभावस्योक्तत्वादप्रामाण्यम्। निरपेक्षत्वे तदभावस्याकिंचित्करत्वात् प्रामाण्यमिति। तत्रैवं पूर्वपक्षी मन्यते—यदि प्रमाणान्तराणि धर्मे न प्रमाणम्, कथं तत्र शब्दः प्रमाणं भविष्यति? स हि नियमेन स्वप्रामाण्ये प्रमाणान्तरसापेक्षः, तथा दर्शनात्। अन्यथा बालोन्मत्ताप्रबुद्धादिवाक्यानामपि प्रामाण्यप्रसङ्गात्। प्रमाणान्तरसापेक्षत्वाभ्युपगमे तदभावस्योक्तत्वात्कथं तदधीनं प्रामाण्यम्? निरपेक्षत्वाभ्युपगमस्तु दृष्टव्याप्तिविरोधादशक्यः। अतो धर्मे चोदनानां प्रामाण्यं न संभवतीति। राद्धान्तस्तु—

असामर्थ्याद्धीदृष्टेर्बाधनादफलत्वतः। परतन्त्रतया वा स्यादप्रामाण्यं श्रुतेर्न तत् ॥

तथाहि—चोदनानामप्रामाण्यं वदतः प्रमाणान्तरासंभवे पदानां पदार्थेन सम्बन्धायोगात्किं बोधनसामर्थ्यमेव न स्यादित्यभिप्रेतम्? उत सामान्यतस्तत्सद्भावेऽपि प्रकृतार्थे चोदनवाक्यात्प्रत्ययो न जायत इति? जातोऽपि बाध्यत इति? अबाधितोऽपि वा निरर्थक इति? सार्थत्वेऽपि वा प्रामाण्यहेतुरहित इति? तत्र प्रथमं दूषयति—***औत्पत्तिकस्तु शब्दस्यार्थेन संबन्ध** इति। अयमर्थः—पदस्य स्ववाच्येन सह वाच्यवाचकसम्बन्धः, **औत्पत्तिकः**—नित्यः। उत्पत्तिः स्वभावः। औत्पत्तिकः—स्वाभाविकः। अतः पदपदार्थयोर्वाच्यवाचकसम्बन्धस्यैव स्वाभाविकत्वान्न सम्बन्धान्तरविरहेणासमर्थत्वमित्यभिप्रायः। यद्वा शब्दार्थयोरुत्पत्तिदशासिद्ध इत्यौत्पत्तिकस्संबन्धः, न ह्यसावसंबन्धतयोत्पन्नयोः पश्चादीश्वरादिभिः संकेतान्निर्वर्त्यत इति शब्दाधिकरणे समर्थयिष्यते। द्वितीयं दूषयति—**तस्य ज्ञानमुपदेश** इति। **तस्य**—प्रत्यक्षाद्यगोचरस्य। **उपदेशः**—हिताहितप्राप्तिपरिहारोपायविषयश्चोदनात्मा नित्यः परमात्मोपदेशो यः। **ज्ञानम्**—ज्ञायतेऽनेनेति व्युत्पत्त्या ज्ञानकरणमित्यर्थः। ज्योतिष्टोमादिवाक्यपाठे प्रत्ययोत्पत्तिर्दुरपह्नवा, अन्यथा प्रत्यक्षादिष्वपि धार्ष्ट्यात्प्रतिपत्त्यपह्नवप्रसङ्ग इति। तृतीयं दूषयति—**अव्यतिरेकश्चेति**। प्रमाणान्तरेणास्यार्थस्य व्यतिरेकश्च नास्ति। व्यतिरेकोऽन्यत्वम्, प्रतीयमानादाकाराच्छुक्तिकारजतादिवद्विरुद्धाकारान्तरयोगित्वमित्यर्थः। यद्वा अव्यतिरेकश्चेत्युपदेशो विशेष्यते। **व्यतिरेकः** स्वार्थानन्वयः, प्रमाणान्तरेणापहृतविषयत्वम्, तद्रहित इत्यर्थः। तथा हि—प्रत्यक्षं तावज्ज्योतिष्टोमादीनां देहान्तरानुभाव्यस्वर्गादिश्रेयस्साधनत्वं नास्तीति न प्रतिपादयति, अलौकिके फले साध्यसाधनभावग्रहणवत्तदभावग्रहणस्याप्यशक्यत्वात्। नाप्यनुमानम्; तत्किं साक्षाज्ज्योतिष्टोमादीनां श्रेयस्साधनत्वं प्रतिषेधति, यथा विगीतं न श्रेयस्साधनं क्रियात्वात् गमनक्रियावत्, इति? विप्रतिपन्ना हिंसा न धर्मः, हिंसात्वात् ब्राह्मणहिंसावदित्यादि? अथवा चोदनाप्रामाण्यप्रतिषेधद्वारेण—यथा विगीतं न प्रमाणम्, प्रत्यक्षाद्यवगतार्थवाक्यत्वात्, बुद्धादिवाक्यवत्? आप्ताप्रणीतवाक्यत्वात्, बालोन्मत्तादिवाक्यवदित्यादि? तत्र तावज्ज्योतिष्टोमादीनां किं लौकिकश्रेयोपेक्षया साधनत्वं निषिध्यते? अलौकिकापेक्षया वा? सामान्यतो वा? नाद्यः, सिद्धसाधनत्वात्। न द्वितीयः, अलौकिकश्रेयस्सिद्ध्यसिद्धिभ्यां तत्साधनत्वनिषेधस्याशक्यत्वात्। न तृतीयः, भोजनक्रियादिभिरनैकान्त्यात्। यच्च हिंसात्वादधर्मत्वसाधनम्, तदपि

न; अधर्मत्वस्य हि व्यापकस्य ग्रहणं धर्मतया कस्यचिद्ग्रहणमन्तरेण न घटते, तद्ग्रहणं च प्रागुक्तरीत्या न चोदनातोऽन्यतस्सिध्यतीति व्याप्तिग्राहकप्रमाणबाधः। ततश्च चोदितत्वं धर्मत्वे प्रयोजकं पाप्मत्वे निषिद्धत्वमिति सोपाधिकता च।

यत्तु सांख्यैरुच्यते—हिंसाविधिनिषेधयोर्नास्ति विरोधः, आलम्भनवाक्यं हि हिंसायाः क्रतूपकारकत्वं बोधयति, निषेधवाक्यं तु हिंसायाः प्रत्यवायसाधनत्वम्; अतो वैधी हिंसा पुरुषस्य दोषमावक्ष्यति, क्रतोश्चोपकरिष्यति। नच प्रत्यवायहेतोर्विधानानुपपत्तिः, दुःखस्पर्शस्य भेषजादेरिव प्रभूतसुखसाधनतया विध्युपपत्तेः। उक्तं च **पञ्चशिखाचार्यैः**—* स्वल्पस्संकरस्सुपरिहरस्सप्रत्यवमर्शः—इति। निषिद्धत्वं साधनव्यापकमिति। तदसत्, शास्त्रैकवेद्ये सुखे दुःखे च किं प्रभूतमिति नियामकाभावात्। विधिबलात्सुखाधिक्यं कल्प्यत इति चेत्; निषेधबलाद्दुःखाधिक्यं किं न कल्प्येत? अल्पदुःखसाधनेऽपि सुखाधिक्याल्लोके विधिर्दृश्यत इति चेत्; अल्पसुखसाधनेऽपि दुःखाधिक्यान्निषेधोऽपि। अतो यावन्निषेधाविषयत्वं न साध्यते न तावदयं विधिर्जीवति। तदविषयत्वं च चिकित्सकशल्यादिप्रयोगन्यायेन; यथाश्रुति हिंसालक्षणानाक्रान्तत्वाद्वा; तल्लक्षणयोगेऽपि * अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्य इति सङ्कोचाद्वा। अतो नास्य व्यापकत्वम्। यच्च प्रमाणत्वप्रतिषेधायोक्तं प्रत्यक्षाद्यवगतार्थविषयवाक्यत्वादाप्तप्रणीतवाक्यत्वादिति, तदपि कारणदोषस्योपाधित्वान्निरस्तम्। नहि बुद्धादेरुन्मत्तादेर्वा वाक्यं दोषमन्तरेणान्यतः कुतश्चिदप्रमाणं जातम्, स्वभावाद्वा। नचात्र कारणदोष इति वक्ष्यते। अत ईदृशान्यनुमानान्यसन्दिग्धाविपर्यस्तज्ञानजनकेनानेनैवागमेन बाधमर्हन्ति, न तु तैस्तद्बाधः। अन्यथा प्रत्यक्षस्यापि कैश्चिदाभासैर्बाधप्रसङ्गात्। अस्त्वेवम्, तथाऽपि योगाचारमाध्यमिकादिभिरभ्युपगम्यते; एवमपि चोदनानां न प्रामाण्यं सिध्यतीति चेत्; तदपि न, बाह्यविषयप्रतीत्युदयस्य स्वारसिकबाधाभावस्य च दुरपह्नवत्वात्। स्तम्भादिप्रत्ययो निरालम्बनः, प्रत्ययत्वात्, स्वप्नादिप्रत्ययवत्, इत्यादीनां स्ववचनविरोधबाधानैकान्त्यसोपाधिकत्वसाध्यविकलत्ववादानधिकारप्रसङ्गादिभिर्निर्मूलत्वात्। तदेतदविरोधलक्षणे तर्कपादे प्रपञ्चयिष्यते। **न्यायविस्तरे** प्रत्यक्षादेरागमस्य च सामान्यतः प्रामाण्यसिद्धेरिहोदास्महे। एवमागमेनापि न चोदनानां बाधः, बौद्धाद्यागमानां सहेतुकपरिग्रहाणां संभवद्वक्तृदोषाणां चोदनाभिः स्पर्धितुमशक्तेः। चोदनामूलानां तु मन्वाद्यागमानां तदविरोधात्। विरुद्धांशे च दुर्बलतया तत एव बाधात्। स्मृत्यागमयोस्तु कार्यविषययोर्मीमांसाविरोधे [सकृत्सम्मितत्वे] विकल्पात्। तत्त्वविषययोस्तु तात्पर्यभेदेन निर्वाहात्। एवमौपनिषदसर्वज्ञानुभवमूलागमस्यापि श्रुत्यैकार्थ्यस्थापनात्। प्रमाणान्तरैस्तु सद्भिरपि तुल्यन्यायतया न बाधः। असद्भिस्तु नतराम्। तदेवमव्यतिरेकस्सिद्धः।

चतुर्थं दूषयति—***अर्थेऽनुपलब्धे तत्प्रमाणमिति***। श्रेयस्साधनतया प्रत्यक्षादिभिः प्रागुक्तन्यायेनानुपलब्धे, **अर्थे**—धर्मे। **तदिति** प्रमाणशब्दानुसारेण नपुंसकनिर्देशः। ज्ञानशब्दनिर्दिष्टं शास्त्रं वा परामृश्यते। तदेवं तत्र प्रमाणान्तरज्ञातविषयत्वाधीनं नैष्फल्यं नास्तीत्यभिप्रायः। **अर्थेऽनुपलब्धे** इत्येतावतैव वा प्रकृतपरिहारः। पञ्चमं दूषयति—**अनपेक्षत्वादिति**। अयमभिप्रायः—व्युत्पत्त्या हि शब्दानां बोधकत्वं गृह्यते। नच प्रमाणान्तरदृष्टत्वमपि वाच्यतया व्युत्पत्तिसिद्धम्, येन तदपेक्षा स्यात्। न च प्रमाणान्तरमेतज्ज्ञप्त्युत्पत्त्योः कारणमिति। अत्रैवाधिकरणस्य निर्भरः। शिष्टं तु पूर्वोत्तराधिकरणैस्सामान्यतो न्यायविस्तरेण च सिद्धं प्रतिपत्तिसौकर्यायोपस्थापितमिति मन्तव्यम्। नन्वत्र प्रमाणान्तरानपेक्षत्वं प्रामाण्यस्यासिद्धम्। तद्धि लोके कारणगुणादेव जायते, संवादकारणगुणार्थक्रियाज्ञानैश्च ज्ञायते। अत उत्पत्तिज्ञप्त्योः पराधीनं प्रामाण्यम्। नित्ये तु वेदकर्तृगुणस्तावन्नेष्टः। प्रमाणान्तरागोचरार्थविषयतया च न संवादः।

नच कालान्तरभाविस्वर्गादिसाधनेष्वर्थक्रियाज्ञानम् । नच कारीर्यादिदृष्टान्तेनाश्वासः, तेष्वपि फलनियमादर्शनात् । कर्मकर्तृसाधनवैगुण्यात्कदाचित्फलानुत्पत्तिरिति चेत्; को जानाति फलोत्पत्तिर्यदृच्छया वा फलानुत्पत्तिर्वैगुण्याद्वेति? किंच, चित्रादीनामवहितैरनुष्ठितानामपि मर्दनादिजन्यसुखवत्समनन्तरमेव न पश्वादिकं फलं पश्यामः । नच चित्रादिफलं कालान्तरेऽपि संभवतीति वाच्यम्; लोके क्रियाफलस्यानन्तरभावित्वनियमदर्शनात् । नापि राजसेवादिवदाराध्यदेवताप्रीत्यादिद्वारा कालान्तरे फलं भविष्यतीति वाच्यम्, तथात्वस्य शास्त्रप्रामाण्यसमर्थनात्पूर्वं वक्तुमशक्यत्वात् । पश्वादीनां च दृष्टफलानां तदानीमेव संभावितानां साधनत्वेन चोदिताश्चित्रादयश्शास्त्रार्थनिश्चयदशायामेव देवताप्रीत्याद्यपूर्वप्रणाडीसमाश्रयणे कारणाभावात्स्वरूपेणैव साधनतया शास्त्रेण समर्प्यन्त इति निश्चीयते । यच्च कालान्तरे पश्वादिफलं जायते, तत्र प्रतिग्रहादिदृष्टकारणदर्शने कथं चित्रादिसाध्यत्वमध्यवस्येम? अतो दृष्टफलार्थचोदनानां विसंवादे स्वर्गादिफलार्थचोदनास्वपि सुगमम् । न केवलं चित्रादिष्वर्थक्रियाविरहमात्रात्तुल्यन्यायता, अपि तु * स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं यातीत्याद्यर्थवादपर्यालोचनया विरुद्धार्थक्रियैवोपलभ्यते । * स एष यज्ञायुधी यजमान इति यज्ञायुधसंयोगि शरीरमेव ह्युच्यते; नत्वात्मा । न च धर्मं निष्प्रमाणमातिष्ठमानैः कार्यकारणसंघातातिरिक्तः कश्चिदात्माऽभ्युपगम्यते । यद्यपि यजमानशब्दश्चेतनपर्यन्तः, तथाऽप्यत्र * रावणो निहतश्शेते इत्यादाविव तत्पर्यन्तत्वासंभवाच्छरीरमात्रवचनः । न ह्यत्रात्मनि यज्ञायुधसंयोगः । न च तत्स्वामित्वमात्रं विवक्षितम्, पात्रचयनस्तुत्यर्थत्वाद्वाक्यस्य । नहि प्रागपि सिद्धेन स्वामित्वेन पात्रचयनं स्तुतं भवति । अतस्संयोगवचन एवायं यज्ञायुधिशब्दः । स च संयोगश्शरीरस्थ एव । तच्च शरीरं तदानीं न स्वर्गं गच्छत्पश्यामः । न च पश्चाद्वा गमिष्यति, तद्विरुद्धभस्मसाद्भावदर्शनात् । यास्यतीत्यनिर्देशाच्च । अतो न केवलं चोदनानां संवादाभावमात्रम्, योग्यत्वे सत्यनुपलम्भाद्विपरीतोपलम्भाच्च विसंवाद एवेत्यपौरुषेयीणां चित्रादिचोदनानामप्रामाण्ये तुल्यन्यायतया स्वर्गाद्यलौकिकफलसाधनचोदनास्वप्यनाश्वासः । अतः प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च कारणाभावाद्विपरीतदर्शनाच्च कथं चोदनाः प्रमाणं भवेयुरिति ।

अत्राप्युत्तरम्—* **अनपेक्षत्वादिति** । प्रामाण्योत्पत्तिज्ञप्त्योर्न परापेक्षा । इह तावत्प्रामाण्यमप्रामाण्यं चेत्युभयं स्वत इति सांख्याः । उभयं परत इति वैशेषिकादयः । अप्रामाण्यं स्वतः, प्रामाण्यं परत इति बौद्धाः । तद्विपर्ययेण मीमांसका इति चत्वारः पक्षाः । तत्रोभयं स्वत इति पक्षस्तावन्न संभवति, विरोधात् । न हि विरुद्धमुभयमेकस्य स्वभावस्स्यात् । तथा सति प्रमाणाप्रमाणविभागो न स्यात् । अथ विज्ञानभेदेन प्रमाणाप्रमाणव्यवस्थेति ब्रूयात्, तदा कस्यां विज्ञानव्यक्तौ प्रामाण्यम्, कस्यां चेतरदिति दुर्निरूपम्, ज्ञानस्वभावव्यतिरिक्तस्यान्यस्य नियामकस्याभावात् । भावे वा पराधीनत्वप्रसक्तेः । स्वतोऽसतः कथं साध्यत्वमिति चेत्; स्वतस्सतो वा कथम्? सत्त्वमेव हि साध्यत्वविरुद्धम् । अभिव्यक्तिमात्रं तत्रेति चेत्, साऽप्यभिव्यक्तिस्स्वतस्सती चेन्न साध्या । असती चेत्काऽन्यत्र वस्सती? असतश्शशविषाणादेस्साध्यत्वं न दृष्टमिति चेत्; सतो वाऽऽत्मनः किं दृष्टम्? अतः पूर्वमसत एव मृदादिषु घटत्वपटत्वाद्यवस्थाविशेषस्य दण्डचक्रादिभिस्साध्यत्वदर्शनात्, दृष्टे चानुपपत्त्यभावात्, अन्यथा स्ववचनविरोधादिदोषप्रसङ्गात्, प्रागसतां केषांचिद्द्रव्यावस्थाविशेषाणां हेतुवशात्पश्चात्सत्त्वेति दुष्परित्यजोऽयमर्थः । साङ्ख्यवैशेषिकाभिहितौ सदसत्कार्यवादावारम्भणाधिकरणादिषु विस्तरेण निराकरिष्येते ।

अस्तु तर्ह्युभयं परतः, द्वयोरपि कारणगुणदोषान्वयव्यतिरेकानुविधानदर्शनात्। तथा च प्रयोगः—विगीता प्रमा सम्यङ्मिथ्यावबोधसाधारणकारणादतिरिक्तसहिताज्जायते, कार्यत्वे सति तद्विशेषत्वात्, अप्रमावत्; यदि ज्ञानकारणादेव प्रमा स्यात् अप्रमाऽपि प्रमैव भवेदिति। तदप्यसत्, कार्यत्व इति विशेषणं प्रयुञ्जानेनेश्वरज्ञानस्य प्रमात्वमभ्युपगतम्। तच्च तस्य स्वाभाविकम्, अन्यथा कथमप्रमात्वं तस्य न स्यात्? दुष्टकारणप्रसूतत्वाभावादिति चेत्; तर्हि गुणवत्कारणप्रसूतत्वाभावात् प्रमात्वमपि न स्यात्। उभयपरित्यागे * परस्परविरोधे हि न प्रकारान्तरस्थितिरिति न्यायेन निस्स्वभावत्वप्रसङ्ग इति चेत्; तद्विरुद्धोभयपरिग्रहे वा किंस्वभावस्स्यात्? किं विशेषाभावे सत्यन्यतरस्वभावपरिग्रहश्शक्यः? धर्मिग्राहकात्तस्य नित्यस्य प्रमात्वेनैव सिद्धिरिति चेत्; तर्हि सिद्धं तस्य स्वाभाविकं प्रमात्वम्। ततश्च तद्दृष्टान्तेनेतरास्वपि प्रमात्वं स्वाभाविकमनुमीयताम्। अतस्सप्रतिसाधनस्त्वद्धेतुः। एतेन प्रमा सम्यङ्मिथ्यात्वावबोधसाधारणकारणातिरिक्तजन्या, कार्यत्वात्, घटवदिति प्रयुञ्जानोऽपि प्रत्याख्यायि। सेश्वरस्य सर्वप्रमापक्षीकारेण प्रयोगे भागासिद्धेः। विगीतत्वेन विशेषणे प्रत्यनुमानादेर्दुर्वारत्वात्। एवं निरीश्वरस्यापि मुक्तधीपक्षीकारबहिष्कारयोरुक्तदोषानतिवृत्तिः। विपक्षे बाधकसदसद्भावाभ्यां विशेषः। यत्तु, तावन्मात्राधीनत्वाभावस्योभयसम्मतत्वादप्रामाण्यस्वतस्त्वस्य च त्वयाऽपि निरासात्, तावत एव निमित्तान्तरसंभेदेन विजातीयारम्भकत्वस्यात्रापि सिद्धिरिति; तत् निमित्तान्तरानिर्वचनादयुक्तम्। अप्रामाण्यनिमित्ताभावो निमित्तमस्त्विति चेन्न; कार्यान्तरहेत्वभावस्य कार्यान्तरेण हेतुतयाऽपेक्षणेऽतिप्रसङ्गात्। व्यभिचारादर्शनात्तद्धेतुत्वाभ्युपगमेऽपि चोदनाजनितबुद्धौ कारणदोषाभावमात्रेण प्रमात्वस्य दुस्त्यजत्वात्। कारणगुणनिरपेक्षतत्प्रामाण्यसमर्थनार्थो ह्ययं संरम्भः। दोषाभावोऽपि भावान्तरं भवतः, अभावाभावादभावान्तराणामपि विरोधिभावान्तरमात्रत्वस्वीकारादिति चेत्; सत्यम्, तथाऽपि कारणदोषाभावस्य कारणगुणैकरूपत्वायुक्तेरवक्तृकेऽपि वेदे दोषाभावस्सिद्धः। यथा कारणाभावदशायां कारणदोषाभावे कारणगुणस्याप्यभावो गुणव्यतिरिक्तभावान्तरात्मा, न पुनः कारणदोषात्मा। श्रद्धेयं चैतन्नित्यप्रमायामिति चार्वाकादेः प्रकृतप्रयोगे का वार्तेति चेत्; एषैव विपक्षे बाधकाभावादिमयी। किंच, भवत्पक्षपक्षपातिना **वाचस्पतिना न्यायवार्तिकतात्पर्यटीका**दिषु प्रामाण्यस्थापकानुमाने स्वपरनिर्वाहकसमाधिस्वीकारात् स्वतःप्रामाण्यमाश्रितम्। तच्च * वाचस्पतेर्वचसि न स्खलते य एकः इति वदता **तात्पर्यशुद्धि**कारेणापि स्वीकार्यम्, गत्यन्तराभावात्; स्वपरनिर्वाहगतेस्सर्वविद्वत्परिगृहीतत्वाच्च। अन्यथा प्रमाणलक्षणतर्कादिव्यवहाराणां कर्कशवृत्तित्वेन विश्वापलापप्रसङ्गादिति। तेन कारणदोषाभावादेर्विना प्रामाण्यमिति भवताऽप्यङ्गीकार्यम्। तर्हि गुणान्वयव्यतिरेकौ कथमिति चेन्न; दोषनिराकरणार्थत्वात्। यथा नित्ये कारणाभावाद्दोषनिरासः, तथा कारणगुणादप्यनित्ये तन्निरास एव, अनुवृत्तस्य दोषाभावस्यैव प्रामाण्यप्रयोजकत्वदृष्टेः, अन्यथासिद्धसन्निधेश्च हेतुत्वायोगात्। अत एव न विपरिवर्तप्रसङ्गश्शक्यः। ननु स्वर्गयागादिसाध्यसाधनभावप्रमा न नित्या, जन्यत्वात्, अतस्तत्र दोषनिराकरणाय गुणापेक्षेति चेन्न; अवक्तृकत्वेनैव वक्तृदोषनिवृत्तेः, तदतिरिक्तस्य गुणनिराकरणीयस्य दोषस्यात्रासंभवात्। अवक्तृकत्वस्य च वक्ष्यमाणत्वात्। ईश्वरस्येव जीवानामपि नित्यं ज्ञानं स्वतश्च सर्वविषयं प्रमात्मकं च; तत्तत्कर्मादिदोषवशात् संकुचितविषयम्, संशयविपर्ययाद्यवस्थायोगि च भवति; सर्वत्र दोषनिवृत्तौ तु स्वाभाविकेन सर्वविषयप्रमात्वेनावतिष्ठत इत्यौपनिषदोऽयं घण्टापथः। अतोऽन्यथासिद्धान्वयव्यतिरेकाणां गुणानां न प्रामाण्यं प्रति कारणत्वम्। यथा पाकजावयविनि रसस्योत्पत्तावन्वयव्यतिरेकवतोऽप्यवयवरूपस्याकारणत्वं युष्माभिरेवोक्तमिति। भवतु वाऽत्र गुणाधीनं प्रामाण्यम्। वेदे तु न स्यात्। यथा हीश्वर-

ज्ञाने कारणाभावात्प्रामाण्यस्य न कारणगुणापेक्षा, एवं वेदेऽपि वक्तुरभावादेव वक्तृगुणानपेक्षा स्यात्। तावतैव वक्तृदोषनिवृत्तेरिन्द्रियादिगतकाचादिवच्छब्दस्वरूपगतदोषासंभवाच्च। तथाऽपि दोषाभावो गुण एवेति गुणाधीना प्रामाण्यसिद्धिरिति चेत्; किमतः? न ह्येतावता वेदस्याप्रामाण्यं स्यात्। प्रामाण्यार्थश्चेदानीं विवादः। गुणाभावोऽपि दोष एव स्यादिति नित्यप्रमाऽप्रमैव स्यात्। अहेतोरपि गुणनित्यत्वस्याश्रयनित्यतावन्नियामकत्वोपपत्तिरिति।

अत एवाप्रामाण्यं स्वत इति पक्षोऽपि निरस्तः। अवस्तुत्वादप्रामाण्यं न हेतुसाध्यमिति स्वाभाविकत्वमिति चेन्न; अवस्तुत्वमिति किमभावत्वमभिप्रेतम्? उत तुच्छत्वम्? नाद्यः, प्रध्वंसे व्यभिचारात्। अहेतुकविनाशस्य च तर्कपादे परिहरिष्यमाणत्वात्। न द्वितीयः, असिद्धेः। न ह्यप्रामाण्यमप्रमाणे तुच्छम्, अपि तु प्रामाण्यम्। यन्निष्ठाभावप्रतियोगी यस्स तत्र तुच्छ इति तत्त्वम्। निरुपाधिनिषेधश्च तत्रैव परिहरिष्यते। वेदादुत्पन्ने च ज्ञाने निश्चयात्मके च दृश्यमाने विपर्ययत्वसाधनार्थं हि स्वतोऽप्रामाण्यं सिषाधयिषसि। नच विपर्ययत्वमवस्तु, अयथार्थप्रकाशनरूपत्वात्तस्य। नच यथावत्प्रकाशनाभावो विपर्ययत्वम्, घटादिषु तत्प्रयोगाभावात्, घटज्ञानस्य च पटं प्रति विपर्ययत्वापाताच्च। अतो विपर्ययत्वसंशयत्वयोर्भावत्वेनाहेतुसाध्यत्वं त्वयाऽपि वक्तुं न शक्यम्। ज्ञानोत्पादनशक्त्यभावस्तु तददर्शनादेव निरस्त इति तस्याहेतुसाध्यत्वेऽपि नात्र विरोधः; *तस्य ज्ञानमुपदेश इति ह्युक्तम्। किंच, संविदां स्वात्माकारे स्वाभाविकं प्रमात्वं तैरेवाभ्युपगम्यते, न हि तदधिपतिसहकार्यालम्बनादिकारणगुणेन जन्यते, तद्दोषेण वाऽपोद्यत इति ब्रुवते। अत एव ह्यपवर्गदशायां स्वात्ममात्राभासशुद्धसंवित्सन्तानानुवृत्तिरिष्यते। समनन्तरप्रत्ययगुणात्तत्सिद्धिरिति चेन्न; स्वरूपातिरिक्तगुणानभ्युपगमात्। स्वरूपस्य च कारणमात्रत्वात्। उक्तं च बाह्यैरेव—

*अनुपप्लवभूतार्थस्वभावस्य विपर्ययैः। न बाधो यत्नवत्वेऽपि बुद्धेस्तत्पक्षपाततः॥ इति।

अतोऽप्रामाण्यं स्वत इति न तैरभ्युपगन्तुं शक्यम्। अतः पक्षान्तरासंभवात्परिशेषात्प्रामाण्यं स्वत इति सिध्यति। किंच, यस्य य आकारः प्रचुरतयोपलभ्यते स तस्य स्वभावः, यस्तु तद्विरुद्धः काचित्कः स त्वौपाधिक इति सार्वलौकिकः पक्षः। यथा मल्लिकापुष्पादेः वैशद्यादिकं स्वभावः, किंशुकसंसर्गविशेषाद्युपाधिना तु रागादिकमिति। एवमिहापि ज्ञानानां प्रचुरं प्रमात्वं स्वभावः, इतरत्त्वौपाधिकमिति युक्तम्। प्राचुर्यं च प्रमात्वस्याप्रमास्वप्यधिष्ठानाद्यंशे याथार्थ्यदर्शनेन सिद्धम्। निरधिष्ठानभ्रमाद्यसंभवस्तु तर्कपादे वक्ष्यते। अतः प्रामाण्यस्य कारणगुणानपेक्षत्वादपौरुषेये वेदे प्रमाजननाय वक्तृगुणापेक्षा नास्तीति सिद्धम्॥

यत्तु प्रामाण्यज्ञप्तौ संवादाद्यपेक्षेति, तदसत्। तथा हि—प्रामाण्यनिश्चये संवादादित्रिकं किं सर्वत्रापेक्षितम्? उत नियमेनान्यतमत्? नाद्यः, असंभवात्। नहि प्रामाण्यनिश्चये संवादस्य सार्वभौमत्वम्, स्वात्ममात्रसाक्षिकसुखादौ तदसंभवात्। संवादज्ञानेषु संवादान्तरापेक्षयाऽनवस्थानाच्च। न च परस्परसंवादादाश्वासः, शुक्तिकारजतधारावाहिकबुद्ध्यादावप्याश्वासप्रसङ्गात्। चोदनावाक्ये च बहुशः पठ्यमाने जायमानानां बह्वीनां संविदां मिथस्संवादस्य सुलभत्वात्। कारणान्तरजनितसंवित्संवादस्तु न गन्धादौ सुखादौ च शक्यः। पुरुषान्तरधीसंवादश्चोदनास्वपि सिद्धः। एवं कारणगुणज्ञानव्याप्ते ईश्वरज्ञानस्य नित्यस्य प्रमात्वनिश्चये, कारणगुणज्ञाने तद्धेतौ कारणस्य निर्दोषताज्ञानाधीने, निर्दोषताज्ञानमात्रेणाप्रामाण्यशङ्कानवकाशेन प्रतीतेर्याथार्थ्यसिद्धौ किं गुणैर्विदितैरन्यत्कार्यम्। अत्र च कारणस्य वेदस्य वक्तृदोषासंभव उक्तः। अर्थक्रिया च न व्याप्ता, अशक्यार्थक्रियेष्वनादरपदेषु च प्रतीतेषु पुरुषप्रवृत्त्यभावेन तन्मूलार्थक्रिया-

भावात् । अर्थक्रियाज्ञानस्य वा प्रामाण्यनिश्चयार्थार्थक्रियाज्ञानान्तरापेक्षाप्रसङ्गात् । क्वचित्स्वतःप्रमाणत्वे सर्वत्राप्युपगन्तव्यत्वात् । अविदिताप्रामाण्येन वाऽभिमतसिद्धौ प्रकृतेऽपि चोदनाप्रामाण्यज्ञापकाभावमात्रेणाभिमतसिद्धेः । तत एव नापि द्वितीयः, कारणदोषबाधकप्रत्ययाभावमात्रेणाप्रामाण्यनिराकरणे तेष्वन्यतमस्याप्यनपेक्षणात् । ननु भावान्तराभाववादिनां भवतां दोषाभावो गुण एवेति चेन्न ; अनुष्णाशीतस्पर्शवद्दोषगुणविरहात्मकभावान्तरसद्भावात् । वेदे च दोषासंभवस्योक्तत्वात् । तथाऽप्यप्रामाण्यस्याभावः प्रामाण्यमेव, परस्परविरोधे प्रकारान्तरस्थित्यभावात्, अतोऽप्रामाण्यनिराकरणार्थमन्यापेक्षणे प्रामाण्यसिद्ध्यर्थमन्यापेक्षेत्युक्तं भवतीति चेत् ; सत्यम्, तथाऽपि कारणदोषबाधकप्रत्ययाभावातिरिक्तं संवादादिकं नापेक्षितमित्येतावता स्वतस्त्वं ब्रूमः । किंच, यथा यथावत्प्रतीयमाने सम्यग्रजते कस्यचित्कदाचिदरजतत्वशङ्का जायते, सा च कारणदोषाद्यभावपरामर्शेन निराक्रियते, तथाऽपि पूर्वप्रतिपन्नं रजतमेव स्थितं भवति ; एवमिहापि स्वतः प्रतीयमानेऽपि प्रामाण्ये कस्यचिदप्रामाण्यशङ्कायां कारणदोषाद्यभावेन तन्निरासे पूर्वप्रतीतमेव प्रामाण्यं प्रतिष्ठितं भवति । ननु कथं स्वतः प्रामाण्यप्रतीतिः ? न ह्ययं घट इति वा घटमहं जानामीति वा प्रतियद्भिः पुरुषैस्तदानीमेव ज्ञानं प्रमाणमित्यपि प्रतीयते इति चेन्न ; ज्ञानं हि स्वतः परतो वा प्रकाशमानं प्रथममेव घटादिसद्भावप्रकाशात्मकं दृश्यते, घटोऽस्तीति विषयावच्छेदमन्तरेण तत्प्रकाशासिद्धेः, पश्चादारोपितेनानारोपितेन वाऽर्थत्वेनावच्छिन्नं भासते, तत्रारोपितत्वशङ्का दोषाद्यभावेन निराक्रियत इति स्थिते, चोदनाजनितसंविदपि श्रेयस्साधनार्थप्रकाशात्मिका कारणदोषबाधकप्रत्ययाभावादनपोदितप्रामाण्याऽवतिष्ठत इति ।

ननु, यद्यपि कारणगुणाद्यनपेक्षा, यद्यपि वेदे कारणदोषो न दृष्टः, तथाऽपि दर्शितो बाधकप्रत्ययश्चित्रादिवाक्ये, अतस्सापवादं चोदनाप्रामाण्यमिति ; तत्रापीदमुत्तरं सूत्रकृतैवोच्यते—*अव्यतिरेकश्चेति । चित्रादिचोदनास्वपि न व्यतिरेकः, चित्रायाः फलसाधनत्वमात्रवचनेनानन्तर्यस्याचोदितत्वात् । दृष्टफलार्थराजसेवादिवदेव कालान्तरेऽपि फलसंभवात् । ननु साध्यसाधनभावे गृहीते कालान्तरे कर्माभावात्, पश्चादिफलस्य च तत्कालेऽपि संभवोपपत्तेरदृष्टद्वारकल्पने प्रमाणाभावात्, लोके च मर्दनादिक्रियानन्तरमेव फलदर्शनेन सामर्थ्यादनन्तरमेव फलेन भवितव्यमिति स्यादिति चेत् ; मैवम् ; लोके तावत्क्रियानन्तरमेव फलमिति न नियमः, शरप्रयोगकृष्यादिषु राजोपकारकराजद्विष्टयोश्चावान्तरव्यापारद्वारा द्राघीयसा कालेन फलाविनाभावात् । अतः कालान्तरे कर्माभावेऽपि फलस्य तदानीमेव संभवेऽपि श्रुतसाध्यसाधनभावानुगुण्याय द्वारकल्पनमविरुद्धम् । ननु शास्त्रार्थावधारणपूर्वकमनुष्ठानम्, अनुष्ठानानन्तरं फलानुपलब्धेर्द्वारक्लृप्तया शास्त्रार्थावधारणमिति चेन्न ; परानुष्ठानानन्तरं फलानुपलम्भात्स्वयं शास्त्रार्थनिश्चयदशायां द्वारकल्पनोपपत्तेः, साक्षात्साधनत्वभ्रमेण वाऽनुष्ठाय पश्चात्फलविलम्बेन द्वारं कल्पयिष्यतीति न तावता शास्त्रप्रामाण्यस्यापायः, तत्स्वातन्त्र्यस्य दर्शितत्वात् । अव्यवहितत्वमात्रं तु स्वभ्रमसिद्धं बाध्यते । किंच, चित्रा तावन्न क्षणमात्रभाविन्येका क्रिया, किंतु साङ्गप्रधानकर्मक्षणनिचयात्मिका क्रिया । क्षणानां च क्रमेण चोदितानां न यौगपद्यम् । तस्माददृष्टद्वारमन्तरेण [यौगपद्यं न संभवति । नच क्रियायां क्षणेक्षणे पश्चादि क्रमेणोत्पाद्यते । अपि तर्हि स्वोपभोगार्थम् । स चोपभोगश्चिरकालः । अतो यावदुत्पन्नकालम् । न च क्रियासमुदायानन्तरं चावयवरचनादि दृष्टकारणमन्तरेण ।] न पश्वाद्युत्पत्तिसंभवः । न च पश्वादेरुत्पत्तिमात्रं फलमभिसन्धायोपाय उपदिश्यते, अपि तर्हि स्वोपभोगार्थम् । स चोपभोगश्चिरकालतः । अतो यावदुपभोगकालं स्थास्नुना राजप्रीत्यादिवत्क्रियातिरिक्तेन केनचिद्भवितव्यमिति शास्त्रार्थश्रवणवेलायामेवानुष्ठाताऽध्यवस्यति ।

न चात्र किंचिद्द्वारं कल्पनीयम्, द्वारस्य देवताप्रीत्यादेश्शब्देनैवोपस्थापितत्वात्। तथा च शारीरके वक्ष्यते—*फलमत उपपत्तेः ; *श्रुतत्वाच्चेति। अतस्सपरिकरविधिवाक्यपरामर्श एव प्रत्यक्षमिव विसंवादं प्रशमयति। न च देवताप्रीत्यादिरपि तदानीमेव फलं जनयत्विति वाच्यम्; राजप्रीत्यादिवदेव देशकालावस्थादिनियतफलप्रदानोपपत्तेः। यदा च प्रतिबन्धरहितं सगुणं कर्म भवति, तदाऽनन्तरमेव फलं दृश्यत एव, यथा कारीर्यादौ, यथा चाभिचारादौ। नच तत्र यादृच्छिकं फलमिति वक्तुं शक्यम्, भूयसा दर्शनात्। अतस्तेनैवान्यत्र कर्मकर्तृसाधनवैगुण्यमाश्रीयते। यच्च कालान्तरे प्रतिग्रहादि कारणान्तरं दृश्यत इति; न तावन्मात्रेणादृष्टस्य फलहेतुताभङ्गः, उभयोरपि हेतुतायाः प्रमाणद्वयसिद्धत्वेनान्यतरपरित्यागायोगात्, सर्वत्र सामग्र्यामनेककारणसन्निपातात्; क्षुच्छान्तिकामो देवदत्तगृहं गच्छेदित्यत्र भोजनादिवत्। यत्र चात्यन्तोत्कटमदृष्टम्, तत्र हेत्वन्तरोपनयनमन्तरेण स्वयमेव फलति। इदं च महर्षिप्रभृतीनां वृत्तान्तेषु सुगमम्।

यत्तु यज्ञायुधिवाक्ये प्रत्यक्षविरोध इति ; तदपि न, अपरेष्वर्थवादवाक्येष्विवात्रापि मुख्यार्थबाधस्यादोषत्वात्। तात्पर्यविषयभूतस्य त्वर्थस्याविरुद्धत्वात्। स्वर्गकामो हि चेतनविशेषो यजमानः, तस्य स्वर्गाख्यफलसिद्धिरिह विधिवाक्यसिद्धोऽनूद्यते, न तु निष्प्राणस्याचेतनस्य शरीरस्य। न चात्मनोऽकर्तृत्वाद्यजमानशब्दवाच्यत्वं नास्तीति वक्तुं शक्यम्। न हि वयं वदामः आत्मनोऽत्यन्ताकर्तृत्वम्, *कर्ता शास्त्रार्थवत्वात्, *परात्तिति च शारीरके तत्कर्तृत्वव्यवस्थापनात्। अतो विशेष्यवाचिनि यजमानशब्दे चेतनमभिदधाने यज्ञायुधिशब्दश्शरीरविषयोऽपि चेतनाधिष्ठितपरित्यक्तसङ्घातमेवाभिप्रैति। अत एव *एष इत्यपरोक्षनिर्देशोऽपि न विरुद्धः। एवं यत्रार्थवादेषु प्रत्यक्षादिविरोधस्तत्र सर्वत्राप्यौपचारिकार्थग्रहणेन समाधानं वक्ष्यते।

यत्तु धर्मे प्रमाणमनिच्छद्भिर्देहातिरिक्त आत्माऽपि नेष्यत इति न तन्मूलं समाधानं शक्यमिति ; तत्किमनिच्छामात्रेणात्मा न स्यात्? स तु प्रत्यक्षानुमानागमैरध्यवसीयमानो नापह्नोतुं शक्यः। तथा हि—प्रत्यक्षं तावत्, देहेन्द्रियमनःप्राणधीभ्योऽन्यमेव प्रत्यगात्मानं प्रकाशयति। योऽसौ प्रतिक्षेत्रमहमित्युपलभ्यते, स न तावद्देहः, प्रत्येकसमुदायविकल्पानुपपत्तेः। नह्यत्र पाणिपादादयः प्रत्येकमहमर्थः; पाणिरहम्, पादोऽहमित्यादिसामानाधिकरण्यादृष्टेः। पादे मे वेदना, शिरसि मे सुखमिति व्यतिरेकप्रत्ययदार्ढ्याच्च। नापि समुदायः, अहमर्थस्य चेतनत्वात्पाण्यादिसमुदायस्य शरीरस्य चैतन्यसमवायायोगात्। नहि प्रत्येकमसतश्चैतन्यस्य समुदाये संभवः, तन्त्वादिष्वसतो रूपादेस्तत्समुदायेऽप्यदर्शनात्। न चावयवाः प्रत्येकं चेतयन्ते, प्रत्येकमहंबुद्ध्यभावस्योक्तत्वात् ; अनेकचेतनोपलम्भाभावात् ; एकस्यैव सर्वावयवावच्छिन्नस्य सुखादिप्रतिसन्धानात् ; परस्परपीडाद्यनभिज्ञतया परस्परोपकारभङ्गप्रसङ्गात् ; एकैकावयवच्छेदे तत्तदनुभूतप्रतिसन्धानानुपपत्तेः। न ह्युपदेशादिरत्र हेतुः। नापि वासनासंक्रमः, अन्यगुणस्यान्यत्र संक्रमणायोगात्। न च संसर्गात्तज्जातीयवासनोत्पत्तिः, मातुर्वासनया गर्भेऽपि तदुत्पत्तिप्रसंगात्। न च प्रत्येकं [म] सतस्संयोगस्यैव समुदाये संभवः, अनेकाश्रितत्वानुपलम्भात्। न चैकोऽवयवी चेतयतामिति युक्तम्, व्यतिषङ्गविशेषवदवयवसङ्घातातिरिक्तावयव्यसंभवस्यारम्भणाधिकरणे वक्ष्यमाणत्वात्। तत्संभवेऽप्यवयवगतविशेषगुणमन्तरेणावयवविनि विशेषगुणोत्पत्त्ययोगात्। न चात्र चित्रन्यायः, तत्रापि प्रत्येकावयवगतानां सितरक्तपीतादीनां विशेषगुणानामेव चित्रारम्भकत्वात्। सितादीनां चित्रस्य चावान्तरवैजात्येऽपि रूपत्वेन गुणावान्तरजात्या समजातीयत्वात्। इह चावयवेषु तथाविधविशेषगुणासंभवात्। नच चूर्णहरिद्रासंसर्गजरागवत् प्रत्येकमसतोऽपि संसर्गवशादुत्पत्तिरिति वाच्यम्, चूर्णहरिद्रायोः प्रत्येक-

मविद्यमानस्यापि संसर्गवशात्प्रत्यवयवं पाकजरागोत्पत्तेः । इह चावयवे चैतन्यासंभवस्योक्तत्वात् । अतो यदुक्तं **लोकायते** * पृथिव्यप्तेजोवायवस्तत्त्वानि, तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवदिति, तदपि प्रत्युक्तम्, किण्वादिभ्योऽपि प्रत्यवयवं परिणामविशेषवशान्मदशक्त्युत्पत्तेः । भूयस्त्वाल्पत्वादिभिर्विकारतारतम्योपपत्तेश्च । अतो योऽसौ प्रतिक्षेत्रमहमित्युपलभ्यते स एवात्मा, पाण्यादेस्तत्संघाताच्च विलक्षणः । एवं स्थिते देवोऽहम्, मनुष्योऽहम्, कृशोऽहमित्यादिदेहधर्मोपष्टम्भेन योऽसावहंप्रत्ययः, स पीतशङ्खादिनयेन निर्वाह्यः, संसर्गिणि गृह्यमाणे देहे कर्मादिदोषविशेषेण भेदकधर्माग्रहात्तद्धर्मारोपोपपत्तेः । स्वप्नादिषु चात्मानं व्याघ्रादिरूपमभिमन्यन्ते । एवमत्यन्तदवीयस्स्वर्यमाणारोपसंभवे पृथक्सिद्धद्व्यनर्हप्रत्यक्षीक्रियमाणप्रातिस्विकदेहारोपस्य क इवासंभवं मन्यते । गृहादिष्विव मम देह इति च व्यतिरेकप्रत्ययस्सार्वलौकिकः । न वाऽसौ ,ममात्मेतिवत् स्वरूपविषयः,' आत्मशब्दस्य तत्र स्वरूपपर्यायत्वात्; देहशब्दस्य तदभावात् । शिलापुत्रकस्य शरीरमितिवत्स्यात्, यदि गत्यन्तरं न स्यात्; इह तु देहे चैतन्यासंभवेन गत्यन्तरं दर्शितम् । एवमयमस्मदादीनामपि देहाद्व्यतिरेकेणोपलभ्यमान आत्मा निरुद्धबाह्यकरणार्थस्य प्रत्यक्षकर्तृत्वेनोपलम्भान्मनसोऽप्यन्यः । मनसा स्मरामीति च समनस्काः प्रतिपद्यन्ते । एवं धियोऽप्यतिरिक्त आत्मा, प्रत्यक्षं जनानामिति (?) धर्मधर्मितया प्रतीतेः । क्षणिकज्ञानसन्तत्यात्मत्वपक्षस्य ज्ञानस्यातिरिक्तमिथ्यात्वादेव तर्कपादे निराकरिष्यमाणत्वात् । तत एवाहमर्थात्मकस्याबाधितप्रत्यक्षादिसिद्धस्य दुरपह्नवत्वात् । तदेतत्सर्वमभिप्रेत्य सूत्रितमित्यभ्यधिष्महि पूर्वस्मिन् सूत्रे * पुरुषस्येन्द्रियाणां बुद्धिजन्मेति ।

एवं प्रत्यक्षेणास्यात्मनो देहातिरेकसिद्धेरनुमानैरप्यसंभवद्विरोधैः प्रागुक्तनयेन विपक्षे बाधकवद्भिः, असंभवदुपाधिगन्धैर्व्यतिरेकस्सुसाधः । यथा शरीरं न चेतनम्, भूतत्वात्, नश्वरत्वात्, सावयवत्वात्, घटवदित्यादि । नापि मनःप्रभृतीनीन्द्रियाणि, करणत्वात्, कुठारादिवत् । नच बुद्धिः, क्रियात्वात् प्रमाणा[रूपा] दिवत् । **साङ्ख्यै**रपि संगृहीतम्—

* संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् । पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थिप्रवृत्तेश्च ॥ इति ।

वीतरागजन्मादर्शनाच्चात्मनो भवान्तरं सिद्धम् । तदेवं विसंवादाभावात्संवादकारणगुणादेश्चानपेक्षितत्वाच्चोदनानां स्वतः प्राप्तं प्रामाण्यमनपोदितमिति । एवमनेनैव सूत्रेण चोदनाप्रामाण्यस्य स्वल्पावशेषितो भारः । अत्र स्वोक्तस्य सकलस्यार्थस्य साम्प्रदायिकतां सिद्धान्ततां च ज्ञापयितुं स्वाचार्याभिमतिं दर्शयति * **बादरायणस्येति** । न ह्येतन्मतान्तरद्योतनार्थम्, उक्तस्य प्रामाणिकत्वात्, स्वमतस्यावचनाच्च । जैमिनेर्व्यासशिष्यत्वम्, बादरायणस्य च मीमांसाप्रधानभूतशारीरकसूत्रकृत्त्वेन न्यायसिद्धार्थेऽनुविधेयवचनत्वं च महाभारतादिप्रसिद्धम् ।

* सुमन्तुं जैमिनिं बैल्वं शुकं चैव स्वमात्मजम् । प्रभुर्वसिष्ठो वरदो वैशम्पायनमेव च ॥
वेदानध्यापयामास महाभारतपञ्चमान् । संहितास्तैः पृथक्त्वेन भारतस्य प्रकीर्तिताः ॥

इत्यादिना जैमिनेर्व्यासशिष्यत्वं प्रसिद्धम् ।

* द्वीपे बदरिकामिश्रे बादरायणमच्युतम् । पराशरात्सत्यवती पुत्रं लेभे परन्तपम् ॥

इति बादरायणत्वं सहेतुकमुक्तम् । बादरायणस्य शारीरकशास्त्रकृत्त्वं सर्वसम्मतम् । तदेवं जैमिमिबादरायणयोरेकाशयत्वस्योपक्रमादिसिद्धत्वाद्बादरायणमतविरुद्धैरर्थैर्जैमिनिसूत्राण्युपवर्णयन्तः प्रत्युक्ताः । उभयाभिप्रायवेदी भगवान् **बोधायनो** विंशतिलक्षणीं मीमांसां परस्परसंगमार्थं विस्तरेण व्याख्यादिति वृद्धा विदामासुः । तथा च स्वयमेवाह—* संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिरिति । यत्पुनराहुः—कार्यव्युत्पत्तिस्तु पूर्वाधिकरणे, इह तु

मानान्तरवेद्यार्थताप्रत्युक्तितो वेदस्स्वार्थे प्रमाणमित्युक्तम् । अतो वेदो वेदार्थेऽपूर्वे प्रमाणं नान्यदिति ; तानिह भौत-कल्पान् दूषयितुमप्यपत्रपामहे, चोदनासूत्रस्यान्यपरत्वस्थापनात्, अपूर्वाधिकरणे च पूर्वव्युत्पत्तेर्निराकरिष्यमाणत्वात् । अत एव प्रभाकरशिरश्शृङ्गायमाणे परहितापूर्वे वेदस्य परानपेक्षप्रामाण्यवर्णनस्याशक्यत्वादिति ।

अनुभूतित्वमात्रं च प्रामाण्यं वदतामिह । व्यर्थं वेदप्रमाणे च स्वतःप्रामाण्यसाधनम् ॥
विपर्ययत्वशङ्कायामनुभूतित्वसाधने । अनुस्मृतित्वाद्बुद्ध्या किं वाक्यजा धीर्निरस्यते ॥
सर्वानुभूतिर्मानं चेत्तत्तुल्यविषया मतिः । यथार्थैवं भवेत्सर्वा सा किमर्थं निरस्यते ॥
स्वतो विशिष्टधीप्राप्ता दोषाद्भेदाग्रहो यदि । कथं तत्रोपकुर्वीत त्वदुक्तं मानलक्षणम् ॥
इह चानुपलब्धेऽर्थे प्रामाण्यं यदसूत्रयत् । तन्नापूर्वैकविषयमीश्वरादौ समत्वतः ॥
अतीन्द्रियेऽर्थे प्रामाण्यमनुमित्यैव चिन्त्यते । शारीरके तु सिद्धार्थविशेषे मानता गिराम् ॥ ५ ॥

॥ इति वेदप्रामाण्याधिकरणम् ॥ ५ ॥

॥ अथ शब्दनित्यताधिकरणम् ॥ ६ ॥

6. सू०—कर्मैके तत्र दर्शनात् ॥ १. १. ६. ॥ (पूर्वपक्षसूत्रम् १)

* औत्पत्तिकस्तु शब्दस्यार्थेन संबन्ध इति शब्दार्थसंबन्धस्यानादित्वमुपक्षिप्तम् । तत्र च न कश्चिद्धेतु-रुक्तः । तुशब्दोऽप्यवधारणं वैलक्षण्यं पूर्वपक्षव्यवच्छेदं च द्योतयेत्, न तु हेतुम् । अनपेक्षत्वादिति तु हेतुस्स्वतः-प्रामाण्यार्थः । न चानेकं तत्र साध्यम्, अधिकरणभेदप्रसङ्गात् । न च कथंचित्तदर्थविचारानुप्रवेशः, वेदाधिकरणादे-रप्येकीकरणप्रसङ्गात् । अत एतदधिकरणसिद्धस्य तत्रानुवादमात्रमेव ।

तदिहैवमुत्थानम् । अकारणत्वेन हि वेदस्य स्वतःप्रामाण्यापवादशङ्कानिरासः । अकारणत्वं चासंभा-वितम्, शब्दार्थसंबन्धस्य साङ्केतिकत्वेन साङ्केतिकशब्दसमुदायस्य वेदस्य सङ्केतात् पूर्वं सद्भावायोगात् । तदेतदभि-प्रेत्याह—* **कर्मैके तत्र दर्शनादिति** । एके—वादिनः । शब्दस्य अर्थेन संबन्धम्, शब्दस्येति निर्दिष्टं वाचकत्वमेव वा । कर्म—कार्यम्, साङ्केतिकम् । आहुः । तत्र दर्शनात्—तत्र सङ्केते सति, वाचकत्वदर्शनात् । यदि गवादि-शब्दानां सास्नादिमत्पिण्डादिभिस्संबन्धस्स्वाभाविकस्स्यात्, तदा तेषामेव शब्दानां वस्त्वन्तरेषु सङ्केताद्वाचकत्वं न पश्येम । न हि दाहकस्वभावो वह्निः पुरुषेच्छया सेचनक्रियायां विनियुज्येत । न च रूपग्रहणे शक्तं चक्षुः शब्द-ग्रहणसाधनतया सङ्केत्येत, तथा सत्यन्धबधिराद्यभावप्रसङ्गात्, तत्तच्चिकित्सानैरपेक्ष्यप्रसङ्गात्, अयत्नतः सर्वेषां सार्वज्ञ्य-प्रसङ्गाच्च । अतोऽन्यबोधकस्वभावश्चेच्छब्दो न तदन्यबोधकतया कल्पयितुं शक्यः । अतो न शब्दानां स्वतः केना-प्यर्थेन संबन्धः । तथाऽपि सङ्केत एव तत्रतत्रार्थे धियमादधाति । न हि दृष्टेऽनुपपन्नं नाम । आर्यम्लेच्छादिभाषादिषु चैकस्यैव शब्दस्यानियतिर्दृश्यते । किंच, यदि शब्दार्थयोस्स्वाभाविकस्संबन्धः, तदा व्युत्पत्तेः पूर्वमपि शब्दोऽर्थं गम-येत् । संबन्धज्ञानाभावात्सत्यपि संबन्धे धूमादिवन्न गमयिष्यतीति चेत् ; तत्र कोऽसौ संबन्धः ? न तावत्कार्यकारण-भावादिकम्, असंभवात् । नाप्युपश्लेषलक्षणः, अदर्शनात् । न च तुल्यवद्व्यपदेशेन तदवगमः, प्रत्यक्षतो वर्णाद्यात्मना सास्नादिमदात्मना च भेदावगमेन तदसंभवात् । यदि च शब्दार्थयोरुपश्लेष इष्यते, क्षुरमोदकशब्दोच्चारणे मुखस्य

पाटनपूरणे स्याताम् । नापि स्फोटाख्यश्शब्दो वर्णाद्यात्मना च विवर्तत इति तादात्म्यं संबन्धः, वर्णातिरिक्ते त्वदभिमते शब्दे प्रमाणाभावात् । न तावद्गौरिति शब्दोच्चारणे गकारौकारविसर्जनीयातिरिक्तं कंचन शब्दं शृणुमः । शब्दादर्थं प्रतीम इत्येकवचननिर्देशादेकं पदमिति कण्ठोक्तेरनेकेभ्यो गकारादिभ्योऽधिकं शब्दमुपलब्धवन्तो व्यवहर्तार इति चेत्; तन्न ; परिषदा संभावितोऽहम्, एकेयं परिषदित्यादिष्वपि पुरुषाद्यतिरिक्तपरिषदादितत्त्वपरिकल्पनप्रसङ्गात् । योग्यानुपलब्ध्या तद्बाध इति चेत्तुल्यम् । अयोग्यस्तर्ह्यसावस्त्विति चेत्, तर्हि परिषदादितत्त्वमपि तथाविधं कल्पय । कथं वा अयोग्यमुपलब्धम्? प्रत्येकसमुदाययौगपद्यादिविकल्पानुपपत्त्या वर्णानां वाचकत्वासिद्धौ गत्यभावात्तदतिरिक्तः कश्चिदर्थप्रत्ययहेतुः कल्प्य इति चेत्; तत्रार्थं प्रत्याययिष्यन् किमिति वर्णानुच्चारयसि? अर्थप्रत्यायकस्फोटाभिव्यक्त्यर्थमिति चेत्; स्फोटमभिव्यञ्जयन्तो वर्णाः किमेकैकशः समुदायतो वा, क्रमेण युगपद्वेति परावृत्य पश्य । अतो यादृशैर्वर्णैः स्फोटस्ते अभिव्यङ्क्तुमिष्टः, तादृशैरर्थ एवाभिव्यज्यताम्, किमन्तर्गडुना स्फोटेन? तदेतन्मन्दाकिनीमनादृत्य मरीचिकानुधावनम्, यत्सकललोकप्रत्यक्षां वर्णात्मिकां वाचं विहाय अत्यन्तापरिदृष्टस्यानुपयुक्तस्यार्थतुल्ययोगक्षेमस्फोटाख्यशब्दस्य कल्पनम् । यद्यपि वैखर्यतिरिक्तमवस्थात्रयमाप्तग्रन्थेष्वभ्यधायि, तथाऽपि वाचकत्वे तन्नोपयुज्यते । भावनादिभेदे तदुपयोगात् । यत्तु * स्फोटस्त्वं वर्ण[समुदाय]सङ्घस्थः इति महाभारतवचनम्, तेनापि न प्रत्यक्षविरुद्धं प्रत्यस्तमितसमस्तवाचकविकल्पोपप्लवस्त्वदभिमतस्स्फोटोऽभिहितः, अपि तर्हि वर्णाश्रयार्थस्फुटीकरणशक्तिः । अन्यथा वर्णाध्यासाधिष्ठानभूतो निर्विशेषस्स्फोट इत्युक्ते कथं देवता तमात्मानमभिमन्येत? वर्णानां वाचकत्वशक्तिः त्वदधीनेति तु समञ्जसम् । अत एकेन वक्त्रा क्रमनियमेन समुच्चार्यमाणा वर्णा एव पदम् । न च तद्वा तदर्थो वा क्वचिदध्यस्तः, अबाधितत्वात् । न च तयोस्सङ्केतमन्तरेण संबन्धं पश्यामः । न च बोध्यबोधकभाव एव संबन्धः, तन्निमित्तभूतसंबन्धप्रश्ने स एवेत्युक्तावात्माश्रयप्रसङ्गात् । प्रत्यक्षानुमानयोश्च बोधकयोर्बोधकत्वातिरिक्तस्य संबन्धस्य दर्शनात् । अतः परिशेषात् सङ्केत एव देवदत्तादिशब्देषु बोधनौपाधिकतया दृष्टोऽन्यत्रापि स्वीकर्तव्य इति । अत एव तद्ग्रहणात्पूर्वमर्थप्रत्यायकत्वासंभवादस्य शब्दस्यायमर्थ इति व्युत्पाद्य देवदत्त इति सङ्केतमेव पुरस्कुर्वन्ति । प्रयोगश्च भवति—विप्रतिपन्नाश्शब्दास्साङ्केतिकाः, वाचकत्वात्, डित्थादिशब्दवदित्यादिः । यद्वा तत्र दर्शनादित्यस्यायमर्थः, **तत्र**—कर्मत्वे, **दर्शनात्**—श्रुतेः । तथा ह्युत्पन्नस्यार्थस्य पश्चान्नामकर्म समामनन्ति । यथा—* अनपहतपाप्मा वा अहमस्म्यनाहितनामा नाम मे धेहीति । अतः पदपदार्थसंबन्धः पौरुषेयः ॥ ६ ॥

इतश्च— 7. सू०—**अस्थानात्** ॥ १. १. ७. ॥ (पू. २)

* तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियतेति रूपाणामिव नाम्नामपि, अस्थानं—प्रलयः, श्रूयते । न ह्यत्र वर्णस्वरूपप्रलय उच्यते, नामशब्दस्य वाचकाकारे रूढत्वात् । तदाकारकशब्दस्य च प्रलयो वाचकत्वप्रलय एव । न वात्र वाच्यप्रलयाद्वाचकप्रलयोक्तिः, घटादिषु विनष्टेषु तन्नामप्रध्वंसादर्शनात् । विनष्टेषु नरेषु नामशेषत्वप्रसिद्धेः । अविनष्टे च पुरुषे नामान्तरकरणेन पूर्वस्य नामधेयस्य गतत्वव्यपदेशात् । अतो नाम्नः प्रलयस्तस्य पूर्वाभिधेयपरित्याग एव ॥ ७ ॥

इतश्च—8. सू०—**करोतिशब्दात्** ॥ १. १. ८. ॥ (पू. ३)

* नामानि कृत्वेति करोतिशब्दश्च दृश्यते । न चैष प्राक्तनस्य नाम्नः प्रयोगमात्रे घटादिषु दृष्टः ; अपि

तु देवदत्तादीनां सङ्केतकरणे । तथोपबृंहणेऽपि—

*नाम रूपं च भूतानां कृत्यानां च प्रपञ्चनम् । वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥

इति रूपनाम्नोरविशेषेण करोतिशब्दः प्रयुक्तः । उपबृंहणान्तरेऽपि *निर्ममे इत्यकरोदित्यर्थकम् । ततश्च यथा रूपेषु जगत्कर्तुः स्वातन्त्र्यं तथा नामस्वपीति सकृदुच्चरितात्करोतिशब्दान्निश्चिनुमहे । अपिच *सर्वाणि रूपाणि विचित्य धीरः, नामानि कृत्वेति क्त्वाप्रत्ययबलेन समानकर्तृकत्वं पौर्वापर्यं च ज्ञायते । तस्मादौत्पत्तिकस्संबन्ध इत्ययुक्तम् ॥ ८ ॥

इतश्च—9. सू०—सत्त्वान्तरेच यौगपद्यात् ॥ १. १. ९. ॥ (पू. ४)

सत्त्वम्–जन्तुः । गौरित्येवैकश्शब्दः सास्नादिमद्द्रव्ये ततोऽन्यस्मिंश्च वागादौ युगपद्बुद्धिं जनयति । यद्यपि पदान्तरसमभिव्याहारे प्रतिनियतविषया धीर्जायते, तथाऽप्येकपदोच्चारणदशायां तावन्मात्रश्रवणदशायां वा न विशेषो निर्धार्यते, तत्कस्य हेतोः ? अर्थस्य संबन्धनियमस्तस्यास्तीति । नन्वेकं पदं शृण्वन्ननेकार्थान्न प्रतिपद्यत एवेति चेत् ; तत्किं वर्णक्रमनिर्देशवन्मन्यते, अनेकपदश्रवणे वाऽन्यतोऽर्थमवगच्छति ? स्मरत्यर्थमिति चेत् ; किमहेतुकं स्मरति ? अतोऽभिधत्ते वा स्मारयति वाऽनेकानेवार्थानेकपदम् । सङ्केतोपाधेश्च नियमो दृष्टः । तस्मात्सर्वत्र भवितव्यं सङ्केतेन । अथवा सकृदुच्चरितश्शब्दः पदान्तरसमभिव्याहारपरामर्शी युगपदनेकार्थमभिधत्ते ; यथा—*शर्करां पादजिह्वाभ्या-मक्षिरोगी विवर्जयेदित्यादौ । कथमन्यथा श्लेषकाव्यं कवयितारः परिष्कुर्युः । यद्वा, यदा गां दोग्धीति कश्चित्प्रयुङ्क्ते तदैवान्यो गां कृषतीति, तदयमेक एव गोशब्दो युगपत्परस्परं विरुद्धेष्वर्थेषु प्रयुज्यते । यद्येकेन सत्त्वेनास्य प्रबोधकत्व-लक्षणस्संबन्धस्स्वाभाविकस्स्यान्न तद्विरुद्धे प्रयुज्येत, अस्वाभाविकत्वे तु एकत्र बहुषु वा यत्रयत्र सङ्केतस्तावत्सु प्रयोगो युक्तः । एकमेव च नामानेकेषु सङ्केत्यमानमन्यदपि पश्यामः । आर्यम्लेच्छभाषासु च नियमम् ॥ ९ ॥

इतश्च—**10.** सू०—प्रकृतिविकृत्योश्च ॥ १. १. १०. ॥ (पू. ५)

दधिशब्दस्य इकारो दध्यत्रेति विक्रियत इत्यन्वशिष्यत् । ततो दधिशब्दस्य वर्णविकारेणान्यथाकरणं दृष्टम् । अन्यथाकरणं च नाम्नः पौरुषेयत्वम् । नचात्र गावीगौण्यादिवद्विकृतिरवाचिकेति वाच्यम्, प्रकृतिविकृत्योर्द्वयो-रपि यौगपद्यात् । अभियुक्ता एव हि केचिदत्र दधीति प्रकृतिं प्रयुञ्जते, तत्रैवार्थे दध्यत्रेत्यपरे तदानीमेव विकृतिम् । तदत्र संस्कृतयोनीनां प्राकृतादिभाषाणामिव दधिशब्दप्रकृतीनां दध्यादिशब्दानामनादित्वं दुर्वचम् ॥ १० ॥

इतश्च—**11.** ॥ सू—वृद्धिश्च कर्तृभूम्नाऽस्य ॥ १. १. ११. ॥ (पू. ६)

न केवलं वर्णान्तरभावलक्षणं वैकृतम्, अपि तु [प्रकृतितयाऽभिमतस्य] अस्य—विकृतिशब्दस्य, कर्तृभूम्ना, वृद्धिलक्षणोऽपि विकारो दृश्यते । बहुभिः, प्रबलेन वा केनचिदुच्चार्यमाणः प्रकृतित्वेनाभिमतश्शब्दः उपचिताकार उप-लब्धः । ततश्च व्यापारेणोपचितो यः, सोऽनुपचिताद्भिन्न इति ततो धीर्न शक्तिहेतुका, गाव्यादिवत्सादृश्यमात्रेणाप्युप-पत्तेः । तत्तन्न्यायेन चात्रापि न स्वाभाविकस्संबन्ध इति ॥ ११ ॥

षण्णां क्रमात् षड्भिः परिहारमाह—

12. सू०—समं तु तत्र दर्शनम् ॥ १. १. १२. ॥ (सिद्धान्तसूत्रम् १)

तुशब्दः परिहारपरः पक्षस्य व्यावृत्त्यर्थः। तत्र—सङ्केते। यद्यथाभिमतार्थवाचकत्वदर्शनम्, तत् कस्मिंश्चिदर्थे स्वाभाविकसंबन्धसदसद्भावयोस्समम्। न हि सहकारिविशेषादापद्यमानमर्थक्रियान्तरं सहकारिनिरपेक्षामन्यत्र शब्दशक्तिं प्रतिरुणद्धि। यथा रेखाविशेषस्य सङ्केताद्वर्णविशेषबोधकत्वेऽपि स्वतः परज्ञापनशक्तिर्नापैति, तथेहापि। तेन न दहनदृष्टान्तः। प्रकृते च यथोपलम्भं स्वभावसहकार्यादिनियमात्। अत एव आर्यम्लेच्छादिभाषासु वाचा नियतिरपि निर्व्यूढा। यत्पुनरुक्तम्, शब्दार्थसंबन्धस्य स्वाभाविकत्वे व्युत्पत्तेः पूर्वमपि बोधकत्वप्रसङ्ग इति; तदसत्, संबन्धज्ञानस्य सहकारित्वात्। अन्यथा साङ्केतिकत्वेऽपि क्लृप्तसङ्केतश्शब्दस्सङ्केतज्ञानात्पूर्वमेवार्थं गमयेत्। अन्वयव्यतिरेकाभ्यां तज्ज्ञानस्य सहकारित्वं निश्चितमिति वचनं तुल्यम्। कोऽत्र संबन्धः, कथं चात्र तज्ज्ञानस्यान्वयव्यतिरेकाविति चेत्; बोध्यबोधकभाव एव संबन्धः, तज्ज्ञानस्य सहकारित्वं व्युत्पत्तिपर्यालोचनया सिद्धम्। सा व्युत्पत्तिः कार्यार्थे सिद्धार्थे वा? प्रथमं तावज्ज्ञायमानशब्दस्यार्थविशेषबोधकत्वज्ञानात्पूर्वमर्थविशेषप्रतीतिर्न जायते, बोधकत्वग्रहणात् पश्चादुपदेशादिना वा अयं शब्दोऽस्यार्थस्य बोधक इत्येवंरूपेण तज्ज्ञानसमनन्तरं व्युत्पन्नस्य परप्रयुक्तात्तस्मादेव शब्दात्तदर्थप्रतीतिर्जायते; इन्द्रियलिङ्गयोरिव संबन्धान्तरं च किंचिन्न दृश्यते; अतो बोधकत्वग्रहणमेव अर्थज्ञानौपयिकमन्वयव्यतिरेकावसितम्। साङ्केतिकेष्वसाङ्केतिकेषु वा शब्देषु अस्य शब्दस्यायमर्थ इति व्युत्पादयद्भिरपि न सङ्केतः क्रियते, ज्ञाप्यते वा; अपि त्वयं शब्दोऽस्य बोधक इति व्यपदिश्यते। अन्यथा स्वेच्छया सङ्केतकरणे सर्वस्य शब्दस्य सर्वत्र प्रयोगप्रसङ्गात्। तस्य च लोकैर्निवार्यमाणत्वात्। बहूनां च यथायथं सङ्केते लोकस्य परस्परवार्तानभिज्ञत्वप्रसङ्गाच्च। तथा, अयं गोशब्दवाच्य इति वदन्तः पूर्वममुकेन सङ्केतित इत्यपि न वदन्ति; तथाविधस्य कस्यचित्सङ्केतयितृत्वाप्रसिद्धेः, स्वयं चापरिज्ञानात्। साङ्केतिकेष्वपि भाषाशब्देषु वृद्धप्रयोगमात्रमेव व्युत्पाद्यम्। न तु सन्नपि सङ्केतः, तज्ज्ञानमन्तरेणाऽपि उत्तरोत्तरेषां व्युत्पित्सूनामर्थप्रतीतिदर्शनादविरोधाच्च। तदेवमादिमां द्वितीयां च व्युत्पत्तिं पर्यालोचयद्भिर्बोधकत्वग्रहणमेव शब्दस्य स्वार्थप्रत्यायने सहकारीति निश्चीयत इति ततः पूर्वमर्थानवगतिः परस्ताच्चावगतिरुपपद्यते। यत्पुनस्सर्वशब्दानां साङ्केतिकत्वसाधनमनुमानम्, तत्किं प्रत्युच्चारणं सङ्केतं साधयति? उत प्रतिमर्त्यम्? यद्वा साधारणेनादौ कदाचित्केनचित्पुरुषेण सङ्केतः कृत इति? नाद्यः, अशक्यत्वात्; सङ्केतकरणार्थशब्दप्रयोगस्यापि सङ्केतापेक्षत्वात्। अत एव न द्वितीयः, भाषाणां बहुपुरुषसाधारणत्वभङ्गप्रसङ्गाच्च। नापि तृतीयः, जगदादिसद्भावे प्रत्यक्षानुमानयोरप्रवृत्तेः। शास्त्रतस्तत्सिद्धौ तत एव शब्दार्थसंबन्धानादित्वस्यापि सिद्धेः। नन्वेवं सति म्लेच्छादिभाषासु का वार्ता? न हि तत्रापि प्रत्युच्चारणप्रतिमर्त्यादिसंभवः, अतस्सर्वभाषानादित्वं सर्वसाङ्केतिकत्वं वा प्रसक्तमिति चेन्न; सर्वभाषानादित्वेऽस्मदिष्टस्य साधुभावात्, परेष्टस्य वा पौरुषेयबुद्ध्यादिप्रामाण्यस्यासिद्धेः। पैशाचमागधादिभाषा भवत्वनादिरादिमती वा, तन्मयस्तु बौद्धार्हताद्युपदेशग्रन्थस्तत्तत्कर्तृकृत इति तैरेवोक्तं प्रसिद्धं च। नचेह तथेति वक्ष्यते।

वस्तुतस्तु विशेषं ब्रूमः। संस्कृतयोनितयैव तावत्प्राकृतादीन्यभियुक्तैरनुशिष्यन्ते। न चैवं संस्कृतस्य काचिद्योनिर्दृश्यते। प्रादेशिकानि पामरपरिगृहीतानि च तानि। इदं तु सार्वत्रिकं सत्परिगृहीतं च। अपभ्रंश इत्येव तेषां व्यवहारः, अस्य तु संस्कृतमित्येव। तदा[हु]हुः—*शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितमिति। नचात्र कश्चित्सङ्केतयिता स्मर्यते। तेषु तु सन्नपि न स्मर्यताम्, अवान्तरापभ्रंशपारम्पर्येण स्वरूपनिष्पत्तिरुपपद्यते। इह तु यदि सङ्केतयिता स्यात्, तन्मयस्य वेदसन्दर्भस्यापि स एवान्यो वा कश्चित्कर्ताऽवश्यंभावी, स च स्मर्तव्यत्वे सत्यस्मरणान्नास्तीति वक्ष्यामः।

एवमनादौ संस्कृते वर्तमाने अन्यासामुदयविलयभाजां भाषाणां संभवः। न चैवमिहापि तत्तत्पदविशेषाणामुदयनविलयन-सद्भावात्कालक्रमेण वेदसन्दर्भस्यापि विलव इति शङ्कनीयम्; सर्वतस्संप्रदायाविच्छेदात्, व्याकरणाद्यङ्गोपाङ्गैस्सुरक्षितत्वाच्च। अन्तिमयुगवैयाकुली च न वेदमत्यन्तायास्कन्दति। विशिष्टदेशवासिभिश्च महर्षिभिर्युगान्तरे पुनर्यथावद्वेदः प्रवर्त्यत इति न कश्चिद्दोषः। अतोऽन्यत्र सङ्केतेन बोधकत्वदर्शनेऽपि वृद्धव्यवहारपारम्पर्यव्युत्पन्नस्य सङ्केतयितृपुरुषसंभावनारहितस्य संस्कृतशब्दराशेर्न साङ्केतिकत्वमुत्प्रेक्षणीयमिति। यच्च नाम्नः कर्तृदर्शनमुदाहारि; तदपि तत्तन्नामादिमत्त्वानादि-मत्त्वयोस्समम्, न त्वादिमत्त्वैकान्तम्। यथाभूतसंस्थानविशिष्टस्य पूर्वस्मिन् कल्पे यन्नाम, उत्तरस्मिन्नपि कल्पे तथाभूत-संस्थानविशिष्टस्य तदेव नाम क्रियते। तत्र यद्यपि संस्थानादिनिबन्धनास्तेते शब्दाः, तथाऽपि शोधन (?) संस्कार [रेऽपि] विशेषलाभात् * अनपहतपाप्मा वा अहमस्म्यनाहितनामा नाम मे धेहीत्याम्नातम्। स च संस्कारः पूर्वपूर्वरुद्रादिप्रयुक्तेनैव नाम्ना निर्वर्त्यत इति नापूर्वनामकरणम्। स्मृतिरपि वेदशब्देभ्य एव नामरूपव्याकरणं व्याचष्टे—

* सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक्। वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥

इति। वाचकानुसन्धानपूर्विका च वाच्यसृष्टिराम्नायते—* स भूरिति व्याहरत्, स भूमिमसृजत—इति। अतश्श्रौतं नामकरणदर्शनमपि तत्तन्नाम्नां प्रवाहानादितयाऽप्युपपद्यमानं नैकान्ततस्साङ्केतिकतां स्थापयितुमलम् ॥ १२ ॥

यत्तु नाम्नः प्रलयः श्रूयत इति, तत्राह—

13. सू०—**सतः परमदर्शनं विषयानागमात्** ॥ १. १. १३. ॥ (सि. २)

प्रलयदशायामपि तज्जातीयवाचकतयेश्वरबुद्धौ सत एव नाम्नः केवलमदर्शनम्, वाच्यस्य तदानीमनारम्भात्। यदा तु कल्पान्तरे पुनस्तज्जातीयं वाच्यमारभ्यते, तदा तस्यैव नाम्नः पुनर्दर्शनं स्यात्; यथा कुण्डले विलीने कुण्डल-नाम न दृश्यते, पुनः कुण्डले कृते तदेव नामागच्छति, एवमिहापि। यत्तु घटध्वंस इति, तत्किं घटनाम तदानीं तस्मिन् द्रव्ये वर्तते? निमित्तव्यावृत्त्या तदपि व्यावृत्तमिति चेत्; किं तावताऽतिरिक्तमधीमहे? रूपविभागे हि नामविभाग-स्तदभावे तत्र तन्न प्रयुज्यत इत्यभिप्रेत्य * तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत इत्याम्नातम् ॥ १३ ॥

करोतिशब्दं निर्वहति—**14.** सू०—**प्रयोगस्य परम्** ॥ १. १. १४. ॥ (सि. ३)

केवलं प्रयोगस्य वाचकोऽयं * नामानि कृत्वेत्यादौ करोतिशब्दः, वेदशब्देभ्यो नामानि चक्रेरेत्युप-बृंहणात्। वाचकप्रतिसन्धानपूर्वकवाच्यसृष्ट्याम्नानस्योदाहृतत्वाच्च। नचामुख्यः स्यात्, स्वतन्त्रस्य यथापूर्वकरणेऽपि कर्तृत्ववाचोयुक्तेरनपायात् ॥ १४ ॥

यत्त्वनेकार्थशब्दानां नानार्थप्रत्यायनादियौगपद्यम्, तत्राह—

15. सू०—**आदित्यवद्यौगपद्यम्** ॥ १. १. १५. ॥ (सि. ४)

यथैकस्यादित्यस्य प्रभारूपशक्त्या युगपदेव तत्संबन्धिनानार्थप्रकाशनम्, तथैकस्यैव गोशब्दस्य संबन्धसा-दृश्यपुरस्काराभावेनानन्यथासिद्धप्रयोगवशादनेकेष्वर्थेषु शक्तिभेदसिद्धेर्यथाविवक्षं तत्तदर्थेषु बोधजननं न विरुद्धम्। न ह्येकस्य युगपदनेकसंबन्धमात्रं विरुद्धम्, सर्वत्र दर्शनात्। न चानेकसंबन्धनियमः, आर्द्रेन्धनदहनादिभिरनेकैर्धूमादे-स्संबन्धनियमोपलम्भात्। अत एव नाप्यनेकबोधनम्, धूमादेरादित्यचक्षुरादेश्च युगपदनेकबोधकत्वप्रसिद्धेः। तद्वदेव

विरुद्धानेकबोधकत्वमपि न विरुद्धम् । ननु सामग्रीभेदात्तत्र स्यात्, अत्र तु न तदिति चेन्न ; अत्रापि तत्तद्विवर्ति-पदान्तरसमभिव्याहारादिसामग्रीविशेषमुपजीव्य तत्तदर्थविशेषबोधनात् । यदा त्वेकं पदं श्रूयते, तदाऽनेकार्थे शब्दे विवक्षितविशेषानिश्चयात्सन्देग्धि पुरुषः । नहि वह्निमुपाददाने कस्मिंश्चित्पार्श्वस्थः प्रथमं पाकार्थं प्रकाशार्थं मशकार्थं वेति संदेग्धीति तावता वह्नेस्स्वाभाविक्यस्तास्ताश्शक्तयः पराधीनास्स्युः । विष्फारिताक्षाश्च युगपदेकयैव सामग्र्या प्रदेशभेदनियतान् घटतदभावादीन् विरुद्धान् जानन्ति । नच तत्र सामग्रीभेदः, तदसिद्धेः ; युगपदनेकेषां ज्ञानानामुत्पत्तेश्च । संबन्धग्रहणाग्रहणाभ्यां च पुरुषभेदेन नियतानेकबोधनमनुमानेऽपि दृष्टम् । अतो न साङ्केतिकत्वनिबन्धनमिदं यौगपद्यम् ॥ १५ ॥

यत्तु विकृतिपदानामनादित्वं नोपपन्नमिति तत्राह—

16. सू०—**शब्दा[वर्णा]न्तरमविकारः** ॥ १. १. १६. ॥ (सि—५)

यो विकारत्वेन निर्दिष्टो दध्यादिशब्दः, स तु दधिशब्दाच्छब्दान्तरम् । एतदुक्तं भवति । दधिशब्दो दध्यशब्दश्चो[दधिदध्यशब्दावु]भावप्यनादी, तत्प्रयोगश्च प्रतिनियतविषयः, ततश्चानन्तानां प्रतिपदोपादानस्य दुश्शकत्वात्सौकर्यायौत्सर्गिकापवादकल्पनया प्रकृतिविकृतिवदनुशिष्टम् । एवं पदान्तरेष्वपि । अत एव व्याकरणान्तरेण प्रकृतिविकृतिवैपरीत्यमपि न शङ्कनीयम् । सौकर्योपायभेदेन हि नानाव्याकरणोत्थानम् । नच सादृश्यात्प्रकृतिविकृतिभावश्शङ्क्यः, वैपरीत्यस्यापि प्रसङ्गात् । सदृशेष्वपि दधिकुन्दादिषु तदभावात्, असदृशेष्वपि गोमयवृश्चिकादिषु तत्सद्भावात् ॥ १६ ॥

यत्तु वृद्धिरूपविकारदर्शनम्, तत्राह—

17. सू०—**नादवृद्धि[:] परा** ॥ १. १. १७. ॥ (सि. ६)

अयमभिप्रायः—न ह्यत्र वाचकस्वरूपान्यथाभावलक्षणा वृत्तिः प्रत्यक्षेणोपलभ्यते, अपि तु रसादिष्विव तीव्रत्वादिलक्षणा ; सा च नादशब्दाभिधेया वर्णेष्वेव सामग्रीविशेषाद्भवति । न च तावता बोधकाकारे कश्चिद्विशेषः, मन्दतीव्रादिभावानादरेण वर्णविशेषक्रमनियमादिभिरेव वाचकाकारव्यवस्थापनादिति ॥ १७ ॥

तदेवं षण्णां षड्भिरुत्तरं दत्तम् । अथ वाचकापौरुषेयत्वे हेतव उपन्यस्यन्ते—

18. सू०—**नित्यस्तु स्याद्दर्शनस्य परार्थत्वात्** ॥ १. १. १८. ॥ (सि. ७)

वाचकश्शब्दो नित्यस्स्यात्, न तु साङ्केतिकः । कुतः? दर्शनस्य परार्थत्वात् । दर्शनम्—प्रयोगः । वाचकप्रयोगस्य परप्रत्ययार्थत्वादित्यर्थः । एतदुक्तं भवति । पुरुषो हि समयं कुर्वन्नस्मिन्नर्थेऽयं शब्दो मया सङ्केतित इति परं प्रत्याययेत् । तत्र सङ्केत्यमानशब्दव्यतिरिक्तैस्सर्वैश्शब्दैः प्रागेव सङ्केतितार्थैर्भवितव्यम्, सङ्केत्यानामिव तेषामपि बोधकत्वात् ; एवं तद्व्युत्पादनार्थशब्दान्तरेष्वपीत्यनवस्था । अतो न कदाचिदपि परप्रत्ययो जायेत । अत्र[तो] वृद्धव्यवहारे व्युत्पन्नशब्दान्तरं पुरुषं प्रति कश्चिच्छब्दस्सङ्केत्येत ; कथं तत्र विवदेत? अविरोधात् । नच वृद्धव्यवहारे सङ्केतग्रहः, बोधकत्वग्रहणमात्ररूपत्वादित्युक्तम् । एवं पूर्ववृद्धानामपीति वाचको न साङ्केतिकः ॥ १८ ॥

भवतु केषांचिच्छब्दानामनादिव्यवहारः, केषांचित्सङ्केतस्संभवति, तदुभयसंवलनं च वेदे शङ्कितुं शक्यम् ; तत्राह—

19. सू०—**सर्वत्र यौगपद्यात्** ॥ १. १. १९. ॥ (सि. ८)

सर्वत्र—देशे काले च, सर्वेषां शब्दानाम् । न ह्येनस्मात् कालात्परमयं शब्दः प्रवृत्त इति वयमनुस्सरामः । न च केनचित्सङ्केतितस्यैकस्य शब्दस्य सर्वदेशवर्तिभिर्ग्रहणमुपपद्यते, येन सर्वत्र प्रयुज्येत ॥ १९ ॥

अथ स्यात्, साङ्केतिकेषु शब्देषु लिङ्गवचनविभक्तिकृत्तद्धितसमासादयोऽनुशिष्यन्ते प्रयुज्यन्ते च वृद्धैः, अतस्साङ्केतिकासाङ्केतिकसंवलनं शक्यमिति; तत्राह—

20. सू०—**संख्याभावात्** ॥ १. १. २०. ॥ (सि. ९)

न ह्येते शब्दा नित्याः, एते तु साङ्केतिका इति लौकिकैः परीक्षकैः पाणिनिकात्यायनपतञ्जलिप्रभृतिभिर्वा शब्दमनुशासद्भिस्संख्यानं क्रियते । यच्च साङ्केतिकेष्वपि शब्देष्वप्रकृतिभूतेषु प्रत्ययाद्यनुशासनम्, तदपि तथैव वृद्धव्यवहारपारम्पर्यमुपजीव्य । तच्च यथादर्शनं लोकमात्र एव द्रष्टव्यम् ॥ २० ॥

ननु पाणिन्यादय एवाचार्या मतभेदेन देशभेदेन शब्दान् कांश्चिद्विकल्पयन्ति; * लोपश्शाकल्यस्य, * एङ् प्राचां देशे इत्यादिषु । अतः केषांचिच्छब्दानां पुरुषमतिभेदमूलत्वात्काचित्कत्वात्साङ्केतिकत्वमुन्नयामः, ततश्च सर्वानाश्वास इत्यत्राह—

21. सू०—**अनपेक्षात्** ॥ १. १. २१. ॥ (सि. १०)

विकल्पानुशासनस्य सङ्केतानपेक्षत्वात् । न ह्यत्र शाकल्यादेस्सङ्केत उपदिश्यते, अपि तु मतम् । तच्चानादित्वेऽपि वैकल्पिकेषु केषुचिदभिमतेरुपपद्यते । पूजार्थं च क्वचिदाचार्यान्तरकीर्तनम् । देशभेदोपाधिकोऽपि प्रयोगोऽनादिरेव ज्ञाप्यते, विपर्यये प्रमाणाभावात् । प्राचां देशाभिधानस्य यस्य पदस्याचामादिरेङ् भवति, तद्वृद्धसंज्ञं भवति, तत्र *वृद्धाच्छ इति छप्रत्ययः; तेन च भोजकटीय इत्यादिपदनिष्पत्तिः । तच्च पदं तदर्थविवक्षया सर्वत्र प्रयुज्यते, न केवलं प्राचां देशे । एवमितरत्रापि । अतो नानेन साङ्केतिकसंवलनशङ्का ॥ २१ ॥

अथ स्यात्, योगिनां नानाशरीरपरिग्रहः कीर्त्यते—

* आत्मनो वै शरीराणि बहूनि मनुजेश्वर । प्राप्य योगबलं कुर्यात्तैश्च सर्वां महीं चरेत् ॥

इत्यादिभिः । ततश्च कश्चिद्योगी वा महायोगेश्वरो हरिरेव वाऽनन्तानि शरीराणि परिगृह्याद्यतनप्रयोज्यप्रयोजकवृद्धादिवत्स्वयं व्याजहार, व्यवजहार च । तत्राद्यतना बाला इव जगदादिसंभवास्सर्वाः प्रजा व्युत्पाद्यन्ते । एवमयमीश्वरोपज्ञं प्रवृत्तस्सर्वशब्दव्यवहारः । ते च न्यायाचार्यमायावत्समयादय इति । तत्राह—

22. सू०—**प्रख्याभावाच्च योगस्य** ॥ १. १. २२. ॥ (सि. ११)

ईदृशस्य योगस्य, प्रख्याभावात् । प्रकृष्टा ख्यातिः—प्रख्या, प्रत्यक्षादिभिः प्रसिद्धिरित्यर्थः । न ह्यर्वाचीनेषु नानादेहपरिग्रहपर्यवसितं कञ्चियोगं पश्यामः । अनुमानं च योगिनामीश्वरस्य च नास्तीत्युक्तम्; समर्थयिष्यते च शारीरके । अतः परिशेषात्तथाविधातिशये शास्त्रमेव प्रमाणं स्यात् । तच्चेच्छास्त्रं प्रमाणम्, कृतं प्रामाण्यार्थेन साङ्केतिकत्वसंरम्भेण । अथाप्रमाणम्, कृतं प्रत्यक्षाद्यगोचरासंभावितताद‍ृशातिशयमूलसाङ्केतिकत्वोत्थानेन । यस्तु परमास्तिकपरिग्रहादेव वेदप्रामाण्यं तन्मूलं च पारमेश्वरं योगातिशयं पुरस्कृत्य सर्वशब्दानां साङ्केतिकत्वं ब्रूयात्, न तावत्तेन सह वेदप्रामाण्यादौ विवादः । साङ्केतिकत्वं तु प्रमाणाभावाद्विपर्यये प्रमाणसद्भावाच्च प्रतिषेधामः ॥ २२ ॥

इतश्च—**23.** सू०—**लिङ्गदर्शनाच्च** ॥ १. १. २३. ॥ (सि. १२)

साक्षान्नित्यत्वे लिङ्गदर्शनात्। *तस्मै नूनमभिद्यवे वाचा विरूप नित्यया। वृष्णे चोदस्व सुष्टुतिम्। इत्यन्यपरमपि नित्यत्वमनुवदति। तदेतत्सङ्केताभावे लिङ्गं भवति। न हि वर्णमात्रं वाक्छब्देनोच्यते; कचटतपादिनिर्देशस्यार्थप्रत्यायकत्वाभावात्, तेन रूपेण वाचकत्वाभावे वाक्छब्दावाच्यत्वात्, अनन्वयप्रसङ्गाच्च। अतोऽर्थप्रत्ययजनकं पदं वा वाक्यं वा वाचेति परामृश्यते। तत्राद्यपक्षे सिद्धस्सङ्केताभावः। द्वितीये तु पदस्य साङ्केतिकत्वे वाक्यनित्यत्वासंभवादाक्षिप्तः। ननु श्रुतिप्रामाण्ये सिद्धे तदर्थयाथात्म्यनिबन्धनपूर्वपक्षोत्थानम्, ततश्च तदप्रामाण्यसाधनमिति व्याघातः; श्रुतिप्रामाण्यमनभ्युपगच्छतश्श्रुत्यैवोत्तरं दीयत इत्यात्माश्रयश्च। मैवम्, युक्तिविशेष[स्य]मूले पूर्वपक्षे प्रमाणतया सिद्धान्त्यभ्युपेता श्रुतिरपि संवादिनीत्यनुग्राहकतया श्रुत्युदाहरणात्। तत्परिहारार्थं च सिद्धान्ते श्रुत्युपपादनात्। एवमन्यत्रापि द्रष्टव्यम्। न चात्मनिर्वाहे विशेषः, वेदाधिकरणपूर्वपक्षे एतदधिकरणसिद्धान्ते च परैरपि श्रुत्यनुप्रवेशभाषणादिति। ये तु वर्णनित्यतापरमिदमधिकरणं वर्णयन्ति; तेषां निरर्थकमिदमधिकरणम्। वर्णानामनित्यत्वेऽपि पूर्वपूर्वपुरुषोच्चारितक्रमसजातीयक्रमेणैवोत्तरोत्तरैषामुच्चारणमिति पुरुषस्वातन्त्र्यरहितानादिव्यवहार उपपद्यते। यथा वाच्यस्य घटादेरनित्यत्वेऽपि तज्जातिसंगृहीताकारेणानन्यव्यभिचारपरिहारः, तथा वाचकेऽपि तत्तद्वर्णादिजातीयसंगृहीताकारेण व्युत्पत्तिरविरुद्धा। ननु, वाच्ये वाचके च संस्थानातिरिक्ता जातिर्भवद्भिर्नाभ्युपगम्यते, तत्कथं दृष्टान्तो दार्ष्टान्तिके गतिरिति? उच्यते, यादृशेन संस्थानादिना परेषां जातिरभिव्यज्यते, तादृशेनैव सांदृष्टिकेन तत्तद्व्यवहार इति किमत्र दुष्यति? यस्य तु जातिस्संस्थानातिरेकिणो स कथं तयैव [संग्रहे] वर्णनित्यताममभिनिविशते। तत्तज्जातिकविशेषोच्चारितानां तु तत्तज्जातीयवर्णानां यथाव्युत्पत्ति तदर्थबोधकत्वमिति नार्थप्रत्ययेऽपि वर्णनित्यतोपकरिष्यति। सिद्धान्ते च वर्णस्वरूपनित्यत्वोपपादनमपि न वाचकानादित्वोपपादकम्। म्लेच्छादिभाषास्वद्यतनैश्च यथारुचि क्रियमाणेषु साङ्केतिकेषु शब्देषु वर्णानादित्वमिच्छतामपि पुरुषस्वातन्त्र्यानुप्रवेशस्याभ्युपगमात्। शब्दस्वरूपोत्पत्तिविनाशयोश्च सृष्टिप्रलयप्रकरणादिषु बहुशः प्रपञ्चितत्वेन दुस्त्यजत्वात्। यच्चेदं परेषामाक्षेपवार्तिकम्—

* यद्यनित्यत्वपक्षोऽपि शब्दादेवावगम्यते। अनादिव्यवहारश्च नित्यत्वं किं न साध्यते॥

इति। न तस्याद्यापि सम्यञ्चं समाधिं पश्यामः; * क्रमः क्रमवतामित्यादेः प्रतारणायमानत्वात्। ननु महाप्रलयेन वेदानित्यतां परिचोद्य परिहृतं शारीरके—*समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च इति। तत्र कथं न वर्णानित्यतां परिहरिष्यतीति मंस्यते? उच्यते, नहि तत्र वर्णानित्यतामात्रेण वेदानित्यत्वं शङ्कितम्, अपि तर्हि प्रवर्तकस्य प्रजापतेः प्रलयात्प्रवर्तनीयस्याचित्परिणामविशेषगुणभूतस्य वेदाख्यशब्दराशेस्स्वाधारपरिणतिविशेषविलयेन प्रवर्तयितुमशक्यत्वाच्च वेदानित्यत्वं परिचोदितम्। ईश्वरेण पुनस्तज्जातीयत्वादिसृष्ट्या समाहितमिति।

सङ्केतादर्शनादन्यकालेऽन्यत्रापि संभवात्। धातुर्यथापुरं सर्गान्न साङ्केतिकता गिराम्॥
सजातीयेषु वर्णेषु विजातीयक्रमान्वयात्। व्युत्पत्तिर्दृश्यते तत्र नित्यानित्यकथा वृथा॥
साङ्केतिकेषु शब्देषु वेदानां पौरुषेयता। नान्तरीयकसिद्धेति तन्निरासोऽयमर्थवान्॥
पदनित्यतया वेदनित्यत्वं न प्रशास्महे। तदनित्यतया प्राप्ता निषेद्धव्या त्वनित्यता॥ २३॥

॥ **इति शब्दनित्यताधिकरणम्** ॥ ६ ॥

॥ अथ वेदस्यार्थप्रत्यायकताधिकरणम् ॥ ७ ॥

24. सू०—**उत्पत्तौ चावचनास्स्युरर्थस्यातन्निमित्तत्वात्** ॥ १. १. २४. ॥ (पू. १)

पदपदार्थसंबन्धे पुरुषापेक्षा निराकृता, पदसमुदायरूपसन्दर्भे तु तदपेक्षा निराकरिष्यते । इह तु पदानां पदार्थेषु स्वाभाविकशक्तिसद्भावेऽपि लोकदृष्टविजातीयेऽर्थे प्रमित्युत्पादनशक्तिर्नास्तीत्याशङ्क्य परिह्रियते । यद्यपि पद-पदार्थयोरौत्पत्तिकस्संबन्धः, स च वृद्धव्यवहारेऽध्यवसितः, शब्दप्रामाण्यं च सामान्येन प्रतिष्ठितम्, न च प्रामाण्ये संवादाद्यपेक्षा, अत एव च वेदे पदपदार्थज्ञानं च जायत एव, न च साक्षाद्बाधादिकमपि दृष्टम्, तथाऽपि वेदवाक्यानां लोकोत्तरेष्वर्थेषु प्रामाण्यं न संभवति, विवक्षितविपरीतव्याप्त्यपहतत्वात् । तथा हि—यद्यपि कर्त्रादेश्शरीरादिमत्त्वदर्शना-दशरीरकर्त्रनुमानेऽपि विशेषविरोधादिर्दोषः, तथाऽपि कर्मणां साध्यसाधनभावः आनन्तर्येण वा दृष्टेन वा केनचिद्द्वारेणेति नियमसिद्धौ नापूर्वद्वारफलसाधनत्वं युक्तम् । यथा शशस्य निर्विषाणतयैवोपलम्भाद्विन्ध्याटव्यां शशाश्शृंगवन्त इति वाक्यं साक्षात्प्रत्यक्षादिबाधादर्शनेऽपि विपरीतव्याप्त्या [ना] स्पदं भवति, तथाऽत्रापि । न हि विन्ध्याटव्यां मदमुदितो मातङ्गगणस्तिष्ठतीति वाक्यमिव तत्र शृङ्गवन्तश्शशास्संचरन्तीति वाक्यं विश्वसिमः । अथ राजसेवादिनयेन देवताप्रीतिद्वारा फलप्रदत्वं संभावितमपि ब्रूषे, तत्राप्युक्तन्यायेन देवताशब्दितानां चेतनविशेषाणामलौकिकमतिशयं शब्दः प्रतिपादयितुं न शक्नोति । न हि शशविशेषस्य विषाणवत्त्वादौ, पुरुषविशेषस्य सहस्रनेत्रत्वादौ सर्वज्ञत्वादौ वा कंचन विशेषं पश्यामः । न हि शुक्तिविशेषेषु मुक्तासंभव इव कैश्चिद्दृष्टपूर्वोऽयमर्थः, येन तत्प्रत्ययादाश्वासस्स्यात् । तस्मादयोग्य-पदसमभिव्याहाररूपाणि वेदवाक्यानीत्यनपेक्षत्वलक्षणं प्रामाण्यमनुभवितुं नार्हन्तीति पूर्वः पक्षः । तदेतदभिप्रेत्याह—* **उत्पत्तौ चावचनास्स्युरर्थस्यातन्निमित्तत्वादिति** । उत्पत्तौ च—संबन्धौत्पत्तिकत्वादौ सत्यपि । यद्वा, ज्ञानोत्पत्तौ सत्यामपि । अवचनास्स्युः—शब्दास्त एव सन्तोऽपि वेदवाक्यरूपसमुदाये लोकोत्तरस्यार्थस्य न प्रमापकास्स्युः । अर्थस्या-तन्निमित्तत्वात्—शब्दार्थस्य शब्दमात्रनिमित्तत्वाभावादित्यर्थः । यदि शब्दार्थस्य शब्दमात्रमेव निमित्तं स्यात्तदा शृङ्ग-वन्तश्शशा इति [वाक्यम्] शब्दोऽपि शशशृङ्गसत्तानिमित्तं स्यात् । अथ तत्र शशान्तरदृष्टव्याप्तिरनुसरणीयेत्यलौकिको-ऽतिशयो न वक्तुं शक्यः ? तर्हि शब्दस्य दृष्टानुसारोऽप्यपेक्षणीय इत्यनपेक्षत्वलक्षणप्रामाण्यासंभवादयुक्तं चोदनालक्ष-णोऽर्थो धर्म इति ॥ २४ ॥

तत्र राद्धान्तमाह—

25. सू०—**तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्** ॥ १. १. २५. ॥ (सि. १)

तद्भूतानाम्—तस्मिन्नर्थे भूतानाम्, सङ्केतासंभवाद्बोधकतयैव लब्धसत्ताकानाम् । क्रियार्थेन—अलौकिक-चतुर्वर्गरूपश्रेयस्साधनक्रियार्थेन । समाम्नायः—समुच्चारणम्, सपरिकरक्रियारूपार्थबोधनार्थमेव समुच्चारणम् । उच्चार्य-माणा हि वैदिकाश्शब्दा अलौकिकचतुर्वर्गरूपश्रेयस्साधनरूपक्रियावचना उपलभ्यन्ते । **अर्थस्य तन्निमित्तत्वात्**—विलक्ष-णस्य वाक्यार्थस्य शब्दैकनिमित्तत्वात्, व्याप्तिपरामर्शनिरपेक्षत्वादित्यर्थः । तथा हि—वाक्यादर्थप्रत्यये व्याप्तिपरामर्शा-पेक्षाऽस्तीति वदता किं तदभावे बोध एव नोत्पद्यत इत्यभिप्रेतम् ? उतोत्पन्नोऽपि व्यापकनिवृत्त्या बाधितविषय इति ? नाद्यः, दिनकरबिम्बचौर्यवदशक्यत्वात् । त्वदुक्तं वाक्यमपि न किंचिद्दूषणं बोधयतीति वैयात्यस्य दुर्वारत्वप्रसङ्गाच्च ।

शशविषाणवाक्यादपि बोधो जायत एव। नापि द्वितीयः, असंभावितकारणदोषस्य दृढोत्पन्नस्य ज्ञानस्य वस्त्वन्तरदृष्टासाधारणस्वभावाभाववद्वस्तुविषयतामात्रेण बाधे पावकौष्ण्यप्रत्ययस्यापि भङ्गप्रसङ्गात्। सर्वभावानामपि हि शक्तयः प्रातिस्विकप्रमाणसामर्थ्यसिद्धा नापह्नवमर्हन्ति। शशविषाणवाक्ये तर्हि का वार्ता? वह्निशैत्यवाक्य इव दृष्टबाधः। अदृष्टे तु यदि वक्ता नाप्तः, तदा कारणदोषशङ्काग्रस्ततया दृष्टव्याप्तया बाध्येतैव। यदि तु वक्ता प्रत्ययितः, तदा कस्तत्र ब्रूयात्तद्विषयाप्तवचन [ा] भावादेव तत्परित्यागम्? अन्यथा मुक्ताशुक्तिवृत्तान्तमपि दूरस्थो बाधेतैव। एवं तर्ह्यशरीरकर्तृताविषयं सामान्यतोदृष्टमपि जीवेदिति चेन्न; व्याप्तिपरामर्शमूलत्वादनुमानस्य, व्याप्तेश्च वैपरीत्यग्रस्तत्वात्। वाक्ये त्वाकाङ्क्षासन्निधियोग्यतानामेव परामर्शनीयत्वात्, तावतैव विशिष्टज्ञानोत्पत्तौ बहिरङ्गेनानुमानेन बाधायोगात्। अन्यथा प्रत्यक्षेऽपि बाधप्रसङ्गस्य दर्शितत्वात्। ज्वालैक्यप्रत्यक्षादिकं तु संभवद्दोषजातीयतया बाध्यते। ननु, योग्यतैव विपरीतव्याप्तौ न सिध्यति, यथा अग्निना सिञ्चेदित्यादाविति चेन्न; तत्र प्रत्यक्षेणैव बाधात्। इह तु तदभावात्। यत्र च बाधो दृश्यते यूपादित्यादौ, तत्र चायोग्यत्वं बाधं चेच्छामः। तात्पर्येण तु प्रामाण्यं वक्ष्यामः। एतदुक्तं भवति—यत्र साक्षात्प्रत्यक्षेण बाधः, यत्र वा भिन्नमभिन्नमित्यादाविव भावाभावात्मना साक्षाद्विरोधः, न तस्य प्रमाणता। यत्र तु तथाविधायोग्यत्वरहिते विलक्षणस्वभावे सिद्धे कार्ये वा वस्तुनि शब्दाद्बुद्धिजन्म, न तत्रानुमानेन बाधः। प्रत्युत तेनैव तस्य बाधो युक्तः। अत एवागमबाधितमनुमानाभासोदाहरणमिति ॥ २५ ॥

अथ शशविषाणवाक्यप्रतिबन्दीमुद्धरति—

26. सू०—**लोके सन्नियमात्प्रयोगसन्निकर्षस्स्यात्** ॥ १. १. २६. ॥ (सि. २)

योऽयं लोके सन्नियमात्प्रयोगः—असद्भूतशशविषाणादिवर्जनेन प्रयोगः, स सन्निकर्षस्स्यात्; सन्निकर्षमूलत्वात्, सन्निकृष्यत इति वा। [सन्निकृष्टं वस्तु] प्रत्यक्षादिदृष्टविषयो हि लोके वाक्यप्रयोगः, शशविषाणादिकं तु न केनचित् दृष्टं सदिति न तद्विषयः प्रयोगः। वक्तुश्श्रोतुर्वा योग्यानुपलम्भनिराकृतविषयतया शशविषाणादिवाक्यमप्रमाणम्, नतु विपरीत [मात्र] बलेनेत्यभिप्रायः। यत्तु परैर्भाषितम्, पदसङ्घातात्मानो वेदाः, पदसङ्घाताश्च पुरुषकृता दृष्टाः, यथा नीलोत्पलाद्यर्थविषयाः, अत एतेऽपि कृत्रिमा इति तद्विशेषप्रदर्शनार्थमिदं सूत्रमिति; तत्र तावदस्मिन्नधिकरणे सूत्रमिदमसङ्गतं स्यात्। न ह्यत्र पदसङ्घातस्य पौरुषेयत्वशङ्कयोत्थानं परैरभ्युपगतम्। तादर्थ्ये निवेशश्च न स्पष्टः। तथा च सति वेदाधिकरणमप्यत्र निवेशितव्यम्। व्यवधानं पदद्वयविपरिणामश्च परैरेव कण्ठोक्तः। तथा च **काशिका**—* सन्नियमादितिपदव्यवहितः प्रयोगशब्दो लोक इत्यस्यानन्तरं संबन्धनीयः। तदयमर्थः—**लोके**, प्रयोगः, **सन्नियमः**—सम्यङ्निबन्धनात्मको युक्तः, चक्षुरादिसन्निकर्षात्; नतु वेदे, अतीन्द्रियार्थत्वात्। इदं च विपरिणामव्यवहितकल्पनयोस्साधारणमप्युदाहरणम्, विपरिणामस्योक्तत्वात् व्यवधानमात्रोदाहरणत्वेनोक्तमिति वेदितव्यम्—इति। अध्याहारानन्यगुणकल्पनादिकं कथंचित्सहामहे। विपरिणामं तु सूत्रान्यथाकरणरूपं कथं मृष्येमहि। न च नियमशब्दो निबन्धे प्रसिद्धः। सन्निकर्षशब्दस्य च समनन्तरसूत्रेऽत्र च प्रयुक्तस्य विरूपार्थकल्पनमयुक्तम्। तत्र सन्निकृष्टाः—कालार्वाचीनाः, इति व्याचख्युः, इह तु, लौकिकेष्वर्थेषु प्रत्यक्षेणार्थमुपलभ्येति चक्षुरादिसन्निकर्षविवक्षां प्रत्यविन्दन्। अस्मदुक्तयोजनायां तूपचारमात्रं सह्यमिति।

ये पुनरिह पदतत्सङ्घातपदार्थप्रभृतीनां वाक्यार्थप्रत्ययं प्रति हेतुत्वानुपपत्त्या साङ्केतिकी वाऽमूला वा वाक्यार्थप्रतीतिरिति पूर्वपक्षेण वेदाप्रामाण्यमाशङ्क्य, पदैरभिहिताः पदार्था वाक्यार्थं बोधयन्तीति वाक्यार्थस्य समूलतया वेदप्रामाण्यमाहुः; तेषामिदमधिकरणं मीमांसाशास्त्राद्वहिष्ठमेव स्यात्, न्यायविस्तरसाध्यत्वादस्यार्थस्य। तथा हि— अष्टादशसु विद्यास्थानेषु धर्मविद्यास्थानानि चतुर्दश। अत्रापि द्वादशोपदेशशास्त्राणि। मीमांसा न्यायविस्तर इत्युभे हेतुशास्त्रे। तयोरपि न्यायविस्तरस्सामान्येन लोकव्यवहाराविरुद्धसपरिकरप्रमाणचिन्तायामधिकृतः। आत्मादिप्रमेयचिन्तनं तु शारीरकक्रुत्यमपि शास्त्रस्य परमप्रयोजनप्रदर्शनाय क्रियते। तेनैव प्रत्यक्षादिवदागमाख्यमपि प्रमाणं साधनीयम्। तदर्थं वाक्यार्थस्य समूलताऽपि वक्तव्या। एवं स्थिते धर्माधर्मेश्वरादिप्रमेयेषु वेदाख्यशब्दस्य प्रवृत्तिप्रकारो न्यायविस्तरसिद्धसामान्यलक्षणैस्तर्कविशेषैर्मीमांसया साध्यः। ततश्चास्मिन्प्रमाणलक्षणे सामान्येन शब्दप्रामाण्ये स्थितेऽपि वेदस्याप्रामाण्यं यथा स्यात्तथैव पूर्वपक्षो वक्तव्यः। सिद्धान्तेऽपि वेदप्रामाण्योपयुक्तं वक्तव्यम्, नत्वनधिकृतं सामान्यं शब्दप्रामाण्यादिकम्। यदि परम्परयोपकारमात्रेण तदप्यत्र साधनीयं स्यात्, तदा पृथक्पृथक्संख्यातं न्यायविस्तराख्यं विद्यास्थानं निर्विषयमेव स्यात्, प्रमाणसामान्यादेरपि परम्परयोपकारिणोऽत्र चिन्तनीयत्वापातात्। किंच कार्यकारणभावाद्यभावे श्रेयस्साधनत्वादिकं सर्वं दुर्वचनम्; अतस्तदर्थमप्यधिकरणानि कल्प्यानि स्युरिति। अत इदमधिकरणं न वाक्यमात्रप्रामाण्यार्थम्। तथा चोक्तं **तत्त्वरत्नाकरे** मीमांसाप्रस्तावे *तत्र च प्रथमाध्याये पादे च सर्वप्रामाण्येन अन्येषु च न्यायविस्तरप्रामाण्योपजीवनेन वैदिकेषु वाक्यविशेषात्मकेष्वपौरुषेयत्वनिबन्धनं प्रामाण्यं यथा वर्णितम्, तथा शब्दे प्रादीदृशामेति। स्थापितश्चायमर्थोऽस्माभिर्न्यायपरिशुद्धौ।

अन्ये त्वाहुः—शब्दसंबन्धस्य वृद्धव्यवहारसिद्धत्वेऽपि न वैदिकः पदसमुदायो वृद्धव्यवहारे व्युत्पन्नः, पदसमुदायान्तरस्यैव वृद्धव्यवहारे व्युत्पन्नत्वात्। न चान्यत्र व्युत्पन्नोऽन्यत्रार्थं बोद्धुमलम्। यद्यपि च पदानामावापोद्वापवशात्पदार्थेषु शक्तिनिष्कर्षः, तावतैवाकाङ्क्षादिवशात्समुदायान्तरेऽप्यन्वितप्रतीतेः; तथाऽप्याकाङ्क्षादिनिरूपणे प्रमाणान्तरमन्वेषणीयमिति प्रमाणान्तरागोचरार्थविषयवैदिकपदसमुदायस्य विशिष्टधीजननासामर्थ्यात्, प्रमाणान्तरगोचरत्वे च पौरुषेयतादिशङ्काग्रस्तत्वादनपेक्षत्वलक्षणं प्रामाण्यं न संभवतीति पूर्वः पक्षः। सिद्धान्तस्तु—लोकव्युत्पत्तिमूलैव वेदेऽपि वाक्यार्थावगतिः, पदपदार्थयोरनन्यत्वात्। यद्यपि चावापोद्वापवशात्पदार्थस्वरूपमात्रे शक्तिनिश्चयः, तथाऽप्यन्विताभिधायिपदसमुदायान्तर्गतानां पदानामन्वितैकदेशभूतपदार्थेषु शक्तिनिश्चय इति लौकिकानामेव पदानां वैदिकेऽपि वाक्ये स्थितानां कार्यान्वितबोधनमविरुद्धमिति। अयमपि पक्षो दत्तोत्तरः। तथा हि—शब्दप्रामाण्ये सामान्यतः स्थिते वेदप्रामाण्यमात्रमेव ह्यत्र पूर्वपक्षे प्रतिक्षेप्तुं युक्तम्, नच तदत्र शक्यते। यदि व्युत्पन्नसमुदायात्समुदायान्तरत्वमात्रेणाबोधकत्वमिति शङ्क्यते, तदा प्रतिव्यवहारं पदानामावापोद्वापभेदेन समुदायान्तरत्वसिद्धेः परस्परवार्तानभिज्ञो लोकस्स्यात्। अथ व्युत्पन्नपदसमुदायैकदेशतया प्रागेवावापोद्वापवशाद्गृहीतशक्तीनां पदानां समुदायान्तरेऽप्यन्वितबोधकत्वमिति लोकव्यवहाराविरोधं मन्यसे, वेदेऽप्ययं न्यायः केन वारितः? प्रमाणान्तरायोग्यार्थविषयत्वादिति चेन्न; लोकेऽपि श्रोतुः प्रमाणान्तरागोचरं द्वीपान्तरविशेषं यदि कश्चिद्ब्रूयात्, अन्वितप्रतीतिर्न स्यात्। अथ तत्र प्रमाणान्तरयोग्यत्वमस्ति, वक्तुश्च प्रमाणान्तरसिद्ध इति ब्रूषे? तन्न, अनुपकारकत्वात्। नहि व्युत्पन्नानां पदानां स्वशक्त्याऽन्वितप्रतिपादने श्रोतुर्वक्तुर्वा प्रमाणान्तरयोग्यत्वादिकं क्वचिदुपयुज्यते। आकाङ्क्षासत्तियोग्यतार्थं लोके प्रमाणान्तरम्, वेदे तु तन्नास्तीति चेत्; लोकेऽपि श्रोतुः

प्रमाणान्तराप्रतिपन्नेऽर्थे कथमाकाङ्क्षादिनिश्चयः? पदानां पदार्थानां च प्राचीनत्वादिति चेत्; तुल्यं वेदेऽपि। अथ मतम्, अलौकिकं कार्यमपूर्वाख्यं वेदवाक्यप्रतिपादितम्, तत्र न लोके व्युत्पत्तिः, क्रियाकार्यमात्रविषयत्वात्तस्याः; अतः अन्विताभिधानशक्तानामपूर्वकार्यान्वितं स्वार्थाभिधानं न लोके व्युत्पत्तिसिद्धमित्यबोधकत्वमेव वेदस्येति। एवं तर्हीदृशस्य पूर्वपक्षस्यानुत्तरमेव सिद्धान्तः, देवतानुग्रहादतिरिक्तस्यापूर्वस्य कल्पने प्रमाणाभावात्, तत्कल्पनेऽपि तद्वाच्यत्वक्लृप्ते-र्निरर्थकत्वात्, लिङादीनां च तत्र व्युत्पत्तौ पदान्तराणां तदन्वितप्रतिपादनाविरोधात्। अव्युत्पत्तौ तु तदन्वितशक्तिविचार-स्यानुत्थानात्। अत्रैव च तद्व्युत्पत्तावन्योन्याश्रयणात्। अन्वयवैयर्थ्यपरिहारायापूर्वाख्यवाच्यक्लृप्तिः, ततस्तद्व्युत्पत्ति-समनन्तरमेव तदन्विताभिधानमित्यपूर्वव्युत्पत्तिरपूर्वाधिकरण इति भवद्भिरेवोक्तम्। अतोऽत्रास्मदुक्तावेव पूर्वपक्षसिद्धान्तौ।

सिद्धे शब्दप्रमाणत्वे लोकोत्तीर्णेषु वस्तुषु। तदसंभवमाशङ्क्य साधिता श्रुतिमानता॥
कृत्स्नवेदप्रमात्वाय सामान्यादिह साधितः। न्यायश्शारीरके क्वापि प्रतिसंस्क्रियते पुनः॥
न्यायविस्तरसाध्यं तु नात्र सूत्रयितुं क्षमम्। न च तादर्थ्यमेतेषु सूत्रेषु स्पष्टमिष्यते॥
समुदायान्तरत्वादिशङ्काऽत्यन्तलघीयसी। अतोऽस्मदुक्त एव स्याद्विचारोऽत्र समञ्जसः॥ २६॥

॥ इति वेदस्यार्थप्रत्यायकताधिकरणम्॥ ७॥

॥ अथ वेदापौरुषेयताधिकरणम्॥ ८॥

27. सू०—वेदांश्चैके सन्निकर्षं पुरुषाख्या॥ १. १. २७.॥ (पू. १)

पदानां पदार्थेषु स्वाभाविकीं शक्तिमुपपाद्य पदद्वारकपौरुषेयत्वशङ्का वेदानां निराकृता। पदानामेव यथाव्युत्पत्ति समभिव्याहारविशेषेण वाक्यभूतानां लोकोत्तरार्थप्रमितिजननशक्तिः स्थापिता। इदानीं वाक्यद्वारकपौरुषेयत्वशङ्का निरा-क्रियते। तत्रैवं विचार्यते, किं वेदवाक्यानि पौरुषेयाणि उत नेति। तदर्थं काठकादिसमाख्याविशेषादयः किं सकर्तृ-त्वैकान्ताः उतान्यथासिद्धा इति। एवमिह पूर्वपक्षः, यद्यप्यस्मदादीनां परतन्त्रतयोच्चारणान्न वेदकर्तृत्वम्, यद्यपि चान्यः कश्चित् कर्ता न दृष्टः, तथाऽपि वचनान्तरसामान्यात्कर्ता तावत्सामान्यतस्संप्लवते। वेदवाक्यानि पौरुषेयाणि, वाक्यत्वात्, रथ्यापुरुषवाक्यवदिति। न चात्र स्मर्तव्यस्य कर्तुरस्मरणेन बाधः, कणादप्रभृतिभिः कैश्चित् स्मरणेन सर्वैरस्मर्यमाणत्वा-सिद्धेः। स्मरन्ति चैके महर्षयः—*प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते इति। श्रुतयश्च—*तस्माद्यज्ञात्सर्वहुतः। ऋचस्सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत, *तस्य ह वा एतस्य महतो भूतस्य निश्वसित-मेतद्यदृग्वेदः, *विश्वामित्रस्य सूक्तं भवति, नम ऋषिभ्यो मन्त्रकृद्भ्यः, इत्यादिकाः। काठकं कालापकं पैप्पलादक-मित्यादयस्समाख्याविशेषा दृश्यन्ते। न चैते *तेन प्रोक्तमिति प्रवचननिमित्ताः, बहुषु प्रवक्तृषु सत्सु विशेषनिर्देशा-संभवात्। असाधारणेन हि विशेषणं युक्तम्। नाप्याद्यप्रवचननिमित्ताः, नित्यत्वपक्षे तदयोगात्। नाप्यन्यशाखा-प्रवचनव्यवच्छेदार्थाः, महर्षीणां शाखान्तरप्रवचनाभावे प्रमाणाभावात्। अद्यापि केषुचिदनेकशाखाप्रवचनं दृश्यते। अतः परिशेषात् *कृते ग्रन्थ इति कर्तृविशेषनिमित्ता इति निश्चीयन्ते। कृतेश्चासाधारण्यं युक्तम्। यो यथा पुरुषान्तरोच्च-रितमहमपि तथैवोच्चारयामीत्यभिसन्धिमन्तरेण स्वातन्त्र्येण स्वेष्टक्रमेण पदानि वाक्यतया निबध्नाति स हि वाक्येषु कर्तेत्युच्यते। न चेदृशस्वातन्त्र्यमेकस्मिन्वाक्येऽनेकेषां दृष्टम्। यदृच्छया संभवदपि न महति ग्रन्थराशौ। अतः कर्तृ-

विशेषणं युक्तम् । तदयं सूत्रार्थः । **एके**—वादिनो महर्षयः । **वेदान्**—वेदानपि । कर्मेत्याहुः । *कर्मैके तत्र दर्शनादिति पदानां पौरुषेयत्वप्रक्रमात्समुच्चयशक्त्या चानुषङ्गो ज्ञायते । **पुरुषाख्या च, सन्निकर्षम्**—पुरुषेन्द्रियादिसन्निकर्षम्, वेदार्थस्य ज्ञापयति । सन्निकर्षमूलत्वात्सन्निकर्षः ; कृतक इत्यर्थः । स च काकाक्षिनयेनोभयत्रान्वेतव्यः । सन्निकृष्यत इति वा सन्निकर्षः । तेन अर्वाचीनत्वमर्थलब्धम् ॥ २७ ॥

28. सू०—अनित्यदर्शनाच्च ॥ १. १. २८. ॥ (पू. २)

अनित्याः—उत्पत्तिविनाशवन्तः, वेदार्थतया श्रूयन्ते । तथा च—*बबरः प्रावाहणिरकामयत, *कुसुरुविन्द औद्दालकिरकामयत इत्येवमादयः । प्रवाहणस्यापत्यं प्रावाहणिः, उद्दालकस्यापत्यं औद्दालकिरिति शब्देनैवामीषामुत्पत्तिः प्रतीयते । अत एव चानित्यत्वमर्थलब्धम् । तदिहौद्दालकिप्रभृतीनां जन्मनः पूर्वमयं ग्रन्थो न विद्यते चेत्कथमयं नित्यस्स्यात्? विद्यते चेत्कथमयं वाक्यार्थस्संपत्स्यते ? न हि तदुत्पत्तेः पूर्वं सोऽकामयतेति निर्दिश्यते । न चाकामयतेत्यस्य कामयिष्यत इत्यर्थः । तथात्वेऽपि वा तदुत्पत्तेः पश्चादर्थव्याघातः । न च कालभेदेन शब्दस्यार्थभेदक्लृप्तिर्युक्ता । तदेवमनित्यार्थसंयोगश्रवणादनित्या वेदाः ॥ २८ ॥

नन्वस्तु वेदानामनित्यत्वं सकर्तृकत्वं च ; तथाऽपि महाजनपरिग्रहनिमित्तभूताप्तप्रामाण्येन वेदानामप्रामाण्यशङ्का निराक्रियतामिति चेत् ; नैवम्, शास्त्रमन्तरेणाप्तप्रणीतत्वे प्रमाणाभावात् । शास्त्रप्रामाण्यनिश्चयपूर्वकत्वाच्चाप्तप्रामाण्याध्यवसायस्य । न ह्येवंविधेऽर्थेऽर्वाचीनानामुपलम्भशक्तिरस्तीति संभावयामः । प्रत्युत विप्रलम्भाद्यभिप्रायमूलतयैव संभाव्यते । तत एव परिग्रहोऽपि भ्रान्तिमूल एव स्यात् । ईश्वरस्य चानुमानागोचरत्वं शारीरके वक्ष्यति । अतो यद्यपि वेदवाक्याद्वाक्यार्थप्रत्ययो जायते, यद्यपि च प्रत्ययानां स्वतः प्रामाण्यम्, तथाऽपि सकर्तृकेषु वेदेषु तत्कर्तृदोषशङ्कया बाध्यत इति कथं चोदनालक्षणोऽर्थो धर्म इति ? तत्राह—

29. सू०—उक्तं तु शब्दपूर्वत्वम् ॥ १. १. २९. ॥ (सि. १)

यत्तावद्वाक्यत्वात्पौरुषेयत्वानुमानम्, तद्विपक्षे बाधकाभावेन निरस्तम् । यदि वेदवाक्यान्यपौरुषेयाणि, किं तत्रापहीयते ? कर्तारमन्तरेण रचना कथं स्यादिति चेन्न ; अध्ययनरूपस्य पारतन्त्र्येण रचनस्याद्यत्ववत्सर्वस्योपपत्तेः । स्वतन्त्रपुरुषबुद्धिरचनायास्सिषाधयिषितत्वेन तदभावस्य प्रसञ्जनीयत्वासंभवात् । प्रमाणसिद्धस्य हि परित्यागः प्रसञ्जनीयः । महाजनपरिग्रहाभावस्तस्य प्रसज्यत इति चेत् ; अप्रामाण्यं विवक्षतो महाजनपरिग्रहमूलतया कर्तरि साधिते कथं विवक्षितं सिद्धम् ? यस्तु प्रामाण्यमिच्छन्नाप्तप्रणीतत्वमन्तरेण बहुजनपरिग्रहो न स्यादिति मन्यते ; तं प्रति ब्रूमः, यद्यनादितयैव वक्तृदोषशङ्का निवर्तते, तत एव च परिग्रहस्सेत्स्यति, किमनेनाप्तेन कल्पितेन ? न हि चोदनावाक्यान्न जायते प्रत्ययः । न च संशयात्मा । नच प्रत्यक्षादिभिर्बाधसंभवः । अतः कारणदोषशङ्कामात्रमेव निराकर्तव्यम् । तत्र वक्तुरभावादेव यदि वक्तुर्दोषा न स्युः, किमनेन वक्तृदोषेण कल्पितेन ? यथा हि कारणाभावादेव तद्दोषरहिता परमेश्वरबुद्धिः प्रमेति वस्सिद्धान्तः, एवं वक्तुरभावादेवासंभवद्वक्तृदोषा वेदाः प्रमाणमिति किं न पश्यसि ? एनया दिशा विपक्षे बाधकं नास्ति, अस्ति तु पक्षे बाधकम् । न ह्यसौ कर्ताऽस्मदादिभिरुपलभ्यते । बुद्धादिग्रन्थे तु परम्परया स्मर्यते । न च जीर्णकूपारामादिवदनुपयोगात्कर्तुरस्मरणमिति वाच्यम् ; प्रमाणान्तरागोचरकालान्तरभाविफलसाधनबहुवित्तव्ययकाय-

क्लेशादिपूर्वकप्रवृत्तिसाध्ये वक्तृप्रत्ययमन्तरेण प्रेक्षावतामनुष्ठानासंभवात् । जीर्णकूपादिषु तु देशोच्छेदादिना पुरुषविच्छेदात्प्रयोजनाभावाच्च कर्त्रस्मरणम् । इह त्वनन्तैः पुरुषैरस्खलितमात्रास्वरवर्णसन्दर्भमध्येतृपरम्परयाऽधीयमाने सति प्रयोजनवति च कर्तुर्विस्मरणं न युक्तम् । अतोऽवश्यस्मर्तव्यस्य कर्तुरस्मरणादवगम्यते नासावस्तीति । यत्तु वैशेषिकादिस्मरणम्, न तदनुष्ठानौपयिकमहाजनस्मरणम् [तदनुष्ठानोपेतं महाजनस्मरणम्] । नह्यध्येतृपरम्परया कर्तृविशेषस्य स्मरणं तैरपि वक्तुं शक्यम्, अपि तु केनचित्सामान्यतोदृष्टेनानुमितः कर्ता यौक्तिकैस्तदनुसारिभिश्च कैश्चिदनुस्मर्यते । अत एव हि तेषां कर्तृविशेषविवादः, प्रजापतिर्वा पशुपतिर्वा हिरण्यगर्भो वेति । परम्परया सर्वत्र स्मर्यमाणो हि कर्ता बुद्धादिवन्मन्वादिवच्च न विहीयेत । अतो दृश्यादर्शनबाधितमेवेदमनुमानम् ॥ २९ ॥

यत्तु महर्षयस्स्मरन्तीयुक्तम्, तत्तु विपरीतम् । सर्वैरपि महर्षिभिर्वेदस्य नित्यत्वमेव घुष्यते । तदाह मनुः—

* अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी दिव्या यतस्सर्वाः प्रवृत्तयः ॥ इति ।

अत एव * प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयत इत्येतदप्यनन्तेषु वेदेषु तत्तत्कालानुरूपधर्मभेदोचितवेदांशविशेषप्रकाशनाभिप्रायम् । धर्मश्च कालादिभेदेन मात्रया भिद्यत इति स्मरन्ति—

* अन्ये कृतयुगे धर्मास्त्रेतायां चापरे तथा । अन्ये च द्वापरे धर्मास्तथा चान्ये कलौ युगे ॥

इत्यादि । अतो महर्षयोऽपि कर्तारं न स्मरन्ति; किं तु प्रतिषेधन्ति । कृतज्ञास्सत्यवादिनश्च महर्षयः परमोपकारकं वेदवक्तारं सन्तमपि निषेधन्तीति साहसमिदम् ।

यत्पुनर्वेदा एव वेदानां सकर्तृकत्वमाहुरित्युक्तम्; तदप्यसत्; * अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयंभ्वभ्यानर्षदिति वेदनित्यत्वश्रुतेः । अत एव * ऋचस्सामानि जज्ञिरे इत्यादिकमपि तत्तद्वेदाभिमानिदेवतोत्पत्तिपरम्, तादात्विकप्रादुर्भावपरं वा । न खल्वीश्वरस्य शक्तस्यापि क्रमान्तरकल्पने प्रमाणमस्ति । प्रत्युत * यथापूर्वमकल्पयदिति न्यायस्सर्वत्र सञ्चारणीयः, प्रागुक्तश्रुतिस्मृत्यनुसारात् । अत एव ऋषीणां सूत्रकाण्डमन्त्रकृत्त्वमपि प्राचीनकर्मानुगुणं प्रजापतिप्रदत्तशक्तिविशेषाणां तत्तदधिकारानुगुणमनधीतवेदभागसाक्षात्करणमेव । तदेवं न वेदकर्तेति सर्वदा परतन्त्रपुरुषपरम्पराधीता एव वेदाः । तदेतत्सर्वमभिसन्धाय सूत्रितम्—* **उक्तं तु शब्दपूर्वत्वमिति** । तुशब्दः पक्षव्यावर्तकः । सर्वेषामध्येतॄणां वेदोच्चारणप्रवाहस्य पूर्वपूर्वोच्चारणरूपशब्दपूर्वत्वमुक्तम् । अस्मर्यमाणकर्तृकत्वादीनां पदस्य साङ्केतिकत्वप्रतिक्षेपनयेन दूषणमुक्तप्रायमित्यर्थः । अथवाऽस्मरणबाधितस्य कर्तुरनुमानासंभवाज्जगत्कर्तारमुपस्थापयन्ती श्रुतिरेव कर्तृसद्भावेऽपि प्रमाणमिति स्यात्, ततश्च वेदकर्तृसंभवं साधयता वेदाख्यशब्दस्य पूर्वत्वम्—अनादित्वमुक्तं स्यादिति स्ववचनविरोधः । यद्वा याभिः श्रुतिभिर्वेदानां सकर्तृकत्वं सिषाधयिषसि, ताभिरेव तत्कर्तृतयाऽभिमतेश्वरव्यापारस्य वेदशब्दपूर्वकत्वमुक्तम् । यथा * वेदेन रूपे व्यकरोत् सतासती प्रजापतिः, * स भूरिति व्याहरत् स भूमिमसृजत । स भुव इति व्याहरत् । सोऽन्तरिक्षमसृजत, इत्यादि । तथा—

*सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक् । वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥ इति ॥ २९ ॥

यत्तूक्तं काठकादिसमाख्याविशेषाः कर्तृनिमित्ता इति, तत्राह—

30. सू०—**आख्याप्रवचनात्** ॥ १. १. ३०. ॥ (सि. २)

काठकादिसमाख्या । प्रवचनात्—प्रकृष्टाद्वचनात्, निमित्तादेव । प्रकृष्टं हि वचनमद्यत्व इव कस्यचिदेव भवतीत्यसाधारण्यात्तेन निर्देशः । न हि योग्यानुपलब्धिनिराकृतसद्भावं कर्तारमन्यथाऽप्युपपन्ना श्रुत्याद्यपेक्षया दुर्बला च समाख्या साधयितुमलमिति भावः । किंच कार्तयुगाः पुरुषाश्शक्त्यतिशयात्सर्वान्वेदानधीतवन्तः, ततः कालक्रमेणापचीयमानशक्तीन्पुरुषानालोक्य वेदान्वैदिकं च धर्ममभिरक्षितुकामेन वैयासिकीं व्यक्तिमातिष्ठता भगवता वासुदेवेन व्यस्तशाखा वेदाश्शिष्यानध्यापिताः । एवं प्रतिद्वापरम् । ततश्च यो वेदांशो येनाधीतोऽध्यापितश्च स तेन विशिष्य समाख्यात इति व्यासवृत्तान्तविदां सुगमोऽयमर्थः । तेनात्र शाबरमपि सङ्गतम् । यथाऽऽह—*स्मर्यते च [भगवान्] वैशम्पायनः सर्वशाखाध्यायी, कठस्त्विमामेकां [कठः पुनरिमां केवलां] शाखामध्यापयांबभूवेति, [स] बहुशाखाध्यायिनां सन्निधावेकशाखाध्यायी अन्याः[न्यां] शाखा[म] अनधीयानः, तस्यां च प्रकृष्टत्वादसाधारणमुपपद्यते विशेषणम्—इति । एवं च व्यासादिवत्कठादिप्रवाहोऽप्यनादिरिति नित्यं तेनतेन ससोंऽशो निर्दिश्यते । यत्तु कठादिशब्दाश्चरणविशेषवाचिनः, तत्तच्चरणैः पुरुषैरधीयमानाश्शाखाः काठकं कालापकमित्यादिसमाख्यया निर्दिश्यन्त इति कैश्चिन्निर्व्यूढम् ; तत्रापि तस्य चरणविशेषस्य कठादिसंज्ञकपुरुषविशेषप्रवाहविकारेण कठादिशब्दोपचार इतीतिहासपुराणप्रामाण्यमिच्छद्भिरभ्युपगन्तव्यम् ॥

यत्तु समाख्यायाः कर्तृनिमित्ततामुत्तम्भयितुं प्रावाहणिरौद्दालकिरित्याद्यनित्यार्थसंयोगप्रदर्शनम्, तत्राह—

31. सू०—परं तु श्रुतिसामान्यमात्रम् ॥ १. १. ३१. ॥ (सि. ३)

प्रावाहणिरित्यादयश्शब्दा यद्यप्यपत्यार्थाः, तथाऽपि नानित्यार्थसंयोगः, प्रवाहणोद्दालकतदपत्यप्रवाहस्याप्यनादित्वात् । तत्र परं श्रुतिसामान्यमात्रम्, यथा कौमुदगन्ध इत्यादयश्शब्दा अनित्येष्वर्थेषु प्रयुज्यन्ते, तथा प्रवाहनित्येष्वपि तेषु तेषु पुरुषेषु तत्तदपत्यविशेषात् प्रावाहणिरौद्दालकिरिति केवलं श्रुतिसामान्यमात्रम् । एवं श्रुतिसिद्धेषु सर्वेष्वर्थेषु रूपेष्वपि केनचिन्निमित्तेन व्रीह्यादिष्विवैकशब्दनिवेशोऽनुसन्धेयः । यत्तु परैर्भाषितम्—प्रवहतीति प्रावाहणिः, बबर इति शब्दानुकृतिः, तेन यो नित्योऽर्थः तमेवेमौ वदिष्यतो वायुम् ; अत उक्तम्—*परं श्रुतिसामान्यमात्रमितीति । एषा योजना ह्यर्धचार्वाकेभ्य एव रोचते, अन्यथा कथमकामयतेत्यस्याप्यन्वयः । तत्रापि चेदर्थान्तरं कल्प्यते, किं सर्वत्रैवं न कल्प्येत ? अर्थवादानामपि प्रत्यक्षाद्यविरुद्धानां गुणवादमन्तरेण यथाश्रुतार्थे प्रामाण्यमुपपादयिष्यामः । किंच *भृगुर्वै वारुणिः, वरुणं पितरमुपससार, *श्वेतकेतुर्हारुणेय आस । तं ह पितोवाचेत्यादिष्वपत्यार्थतैव स्वीकर्तव्या, कथमन्यथा पितृपदसमभिव्याहारः ? संवादोदाहरणं वा ? तद्वदत्राप्यपत्यार्थत्वे को दोषः ? अत एकरूपं समाधिं पश्यतामुभयत्र प्रवाहनित्यतया वा सर्वत्रार्थवादतया वा अन्यपरत्वेन वा निर्वाह्य इत्यपत्यार्थविवक्षाभङ्गोऽनुपपन्नः । **शारीरकदेवताधिकरणे** तु *शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्, *अत एव हि नित्यत्वम्, *समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च इति सूत्रत्रयेणानित्यार्थसंयोगपरिहारः, सूत्रकाण्डमन्त्रकृत्त्वाद्यविरोधः, कल्पान्तरेऽपि तस्यैव वेदसन्दर्भस्य प्रवर्तनं चैतदधिकरणाभिप्रेतमेव प्रसङ्गाद्विवरिष्यत इति न किंचिदनुपपन्नम् ॥ ३१ ॥

कथं चोदनाप्रामाण्यम् ? *वनस्पतयस्सत्रमासतेत्याद्युन्मत्तवाक्यप्रायशब्दराशिमध्यस्थत्वाच्चोदनानाम्, नहि वनस्पतिशब्दनिर्दिष्टा भूतसङ्घातविशेषास्सत्रमासीरन् ? तदभिमानिनो वा भवद्भिस्तथा संज्ञिताः ? अतः कथं तत्संज्ञाश्चेतनास्सत्रमासीरन्निति संभावयाम ? अतो जरद्गवादिवाक्यवदुन्मत्तवाक्यमिति, तत एव तदेकराशि चोदनावाक्यमपीति । तत्राह—

32. सू०—**कृते वा विनियोगस्स्यात् कर्मणस्समत्वात् ॥ १. १. ३२. ॥** (सि. ४)

वक्तृशङ्कानिवृत्त्यर्थः। बालोन्मत्तादिकृते चोदनावाक्ये सति, अविनियोगस्स्यात्। विनियोगोऽत्राकाङ्क्षा-योग्यतासन्निधिभिः परस्परेण संबन्धः। एवमिव हि चोदनावाक्यमुपलभामहे—इदं कर्तव्यम्, एभिः करणैः, एत-दर्थम् इति। नह्यत्राग्निना सिञ्चेदित्यादिवल्लोकतो विरोधं पश्यामः। नचालौकिके कालान्तरभाविफलसाधनत्वे बाधसंभा-वनाऽपि। तदेवं परस्परसमन्विताथें पदसमुदाये यद्युन्मत्तादिकृतत्वशङ्का, अयमबाधितो विनियोगो न स्यात्। तदेव-मन्वितार्थचोदनावर्गसन्निधियोगे रुमाप्रक्षिप्तकाष्ठलवणभावन्यायेन *वनस्पतयस्सत्रमासतेत्यादीन्यपि प्रमाणीकृत्याग्नि-ष्टोमादिना सत्रकर्मणस्समत्वात्, तत्स्तुत्यर्थम् वनस्पतयोऽपि नामाचेतनास्सत्रमासत, किं पुनरितरे विद्वांसो ब्राह्मणा इत्युच्यत इति शाबरस्समाधिः। अस्माभिस्तु बादरायणीयमभिप्रायमनुसन्दधानैरुच्यते—*तत्तेज ऐक्षत, *ता आप ऐक्षन्त, *तं पृथिव्यब्रवीत् इत्येवमादीनामभिमानिदेवताविषयत्वम् *अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् इति सूत्रितम्। तदेवमिह *वनस्पतयस्सत्रमासतेत्यादिष्वपि वनस्पत्याद्यभिमानिन्यो देवता एव सत्रकर्तारः प्रशंसार्थमुदा-ह्रियन्ते। देवताभिरप्यनुष्ठितोऽयमर्थः किं पुनरर्वाचीनैरित्युक्ते हि स्तुतिरतिशयिता भवति; वनस्पतिमात्रोदाहरणं तु स्तुतौ मन्दम्। अयथार्थेन प्ररोचना चायुक्ता। देवतानां तु विग्रहादियोगः अर्थित्वं सामर्थ्यमधिकारश्च शारीरके समर्थ-यिष्यते। अतः **कर्मणस्समत्वा**दिति सूत्रखण्डो देवतानां मनुष्याणां च सत्रादिकर्मसाम्यमाह। एवं सत्येवास्मदुक्ता प्ररोचना। यद्वा तिष्ठत्वियमर्थवादाधिकरणसाध्या, पौरुषेयत्वानुमानस्य प्रतिकूलतर्क एवानेन सूत्रेणोच्यते। वेदे, **कृते**, प्रेक्षावतां स्वानुष्ठानप्रमित्यङ्गतया तस्या **विनियोगस्स्यात्**, हेतुदर्शनशून्यैर्ग्रहणधारणार्थानुष्ठानादिर्न स्यादित्यर्थः। कर्मण-स्समत्वात्, अग्निहोत्रादिकमेव हेतुदर्शनरहिता महान्तो जनाः परिगृह्णन्ति। तदवश्यं न कृतो वेदः। अतस्तदन्तर्गतानां चोदनानामपि वक्तृदोषासंभवात्प्रामाण्यं सुस्थितमिति सुप्रतिज्ञातोऽयं चोदनालक्षणोऽर्थो धर्म इति।

आख्याया अन्यथासिद्धेः स्मर्तव्यस्मृत्यभावतः। श्रुतिस्मृत्यादिभिश्चात्र पौरुषेयानुमा हता ॥
वेदांश्च प्रहिणोतीति श्रूयते परमः पुमान्। क्रमान्तरविनिर्माणकल्पना च गरीयसी ॥
कालभेदे च मन्त्राणां न शक्तिरपहीयते। यतस्तत्संपरित्यज्य सृजेन्मन्त्रान्तरं प्रभुः ॥
अत ईश्वरमिच्छद्भिरनिच्छद्भिश्च वादिभिः। इदंप्रथमता वेदेष्वनुमातुं न शक्यते।
श्रूयते नित्यमित्येव श्रुतिशब्दोऽत्र रूढिमान्। आहुश्च सर्वे निगमा न कृत्रिमसरस्वतीम् ॥
अनितरपरिदृष्टेष्वस्तबाधेषु वस्तुष्वखिलनिगमवाचो बुद्धिमुत्पादयन्त्यः।
सहजमनपवादं मानभावं दधानास्समजनिषत विष्णोश्शाश्वतं शासनं नः ॥ ३२ ॥

॥ इति वेदापौरुषेयताधिकरणम् ॥ ८ ॥ इति प्रथमः पादः ॥

॥ अथ द्वितीयपादे अर्थवादप्रामाण्याधिकरणम् ॥ १ ॥

यदाज्ञाव्यतिषङ्गेन यद्वा यस्मिन्समन्वयात् । प्रामाण्यमर्थवादादेस्तमीश्वरमुपास्महे ॥

33. सू०—**आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते** ॥ १. २. १. ॥ (पृ. १)

सशिरस्कवेदप्रतिपाद्यकर्मोपासनात्मकधर्मसमुदाये चोदनानां प्रामाण्यमुपपादितम् । तदर्थोपक्षिप्तकारणदोषाद्यभावाविशेषेणार्थवादानामपि प्रामाण्यमुपन्यस्तम् । तदिदानीं मुखान्तरेणाक्षिप्य समाधीयते । यद्वा वेदानामप्रामाण्यं बाह्यहेतुमूलकं निरस्यते । प्रागुक्तास्तु नैगमिक्यः पूर्वपक्षयुक्तयो बाह्यहेत्वनुग्राहकत्वेन प्रदर्शिता इति मन्तव्यम् । किंच, उद्घटापराधोपेक्षायोगात् पौरुषेयत्वादयस्स्पष्टतरा दोषाः पूर्वं परिहृताः; अथ तथैव स्पष्टास्पष्टतरशङ्काः परिह्रियन्त इति क्रमः । तत्रास्मिन्पादे विध्युद्देशव्यतिरिक्तस्य कृत्स्नस्य वेदभागस्य सप्रयोजनार्थबोधनेन प्रामाण्यमुपपाद्यते । नामधेयानां तु विध्युद्देशान्तर्गततया पादान्तरीयता । तत एवानित्यदर्शनादिभिः प्रस्तुतत्वादर्थवादानां विधिविश्रमेण विधिपरतया च प्रकृतमनुवदन्त्यर्थवादाः, तानधिकृत्य विचार्यते—किं ते प्रमाणं न वेति ।

यदत्र कैश्चिदुक्तम्, अस्मिन्नधिकरणेऽपि विध्यतिरिक्तानां सर्वेषामानर्थक्यं पूर्वपक्षीक्रियते, सिद्धान्ते च स्वाध्यायविधिवशेनार्थवत्तया भवितव्यमित्येतावत्साधारण्येनाभिधास्यते, पश्चात्क्रमेण स्तुत्याद्युपयोगविशेष इति वेदितव्यम् । तत्र प्रथममर्थवादेषु सिद्धान्तकथनात्तावदेवोदाहृत्य चिन्त्यत इति; तदसत्, न हि सामान्येन दूषणानुयोगे विशेषविषयमुत्तरं प्रक्रम्येत । विशेषविषयानुयोगे तु सामान्यतस्समाधानं संभवेदपि । ततश्च * **अतदर्थाना**मिति सामान्यनिर्देशोऽपि विशेषार्थ एव । अन्यथा सामान्यविशेषचिन्ताभ्यामधिकरणभेदप्रसङ्गात् । अध्ययनविधिबलेन सिद्धान्तस्थापनं वारयिष्यते । ततोऽर्थवादा एवाक्षिप्य समाधित्सिताः । असाधारणैस्तु हेतुभिः पश्चान्मन्त्रनाम्नोराक्षेपसमाधाने प्रवत्स्यतः । यच्चान्यैरुक्तम्, यो हि परमते वेदान्तानां सिद्धोऽर्थः, सोऽप्यात्मज्ञानचोदनैकवाक्यतया कार्यप्रधानक इति; तत्समन्वयसूत्रे निराकरिष्यते । यत्पुनरुक्तम्, न वेदान्तानां चोदनैकवाक्यता, न चास्मिन्शास्त्रे तत्प्रामाण्यप्रतिज्ञा, * अथातो ब्रह्मजिज्ञासेति शास्त्रान्तर एव सिद्धेरिति; तत्प्रागेवैकशास्त्र्योपपादनेन निरस्तम् । अयं च कबन्धमीमांसकपक्षो राहुमीमांसकपक्षवदुपेक्षणीयो वेदविद्भिः । आह च **वेदार्थसंग्रहे** *सर्वमेकं शास्त्रमिति वेदवित्सिद्धान्त इति । अतोऽत्रैव लक्षणे कृत्स्नस्य वेदस्य प्रामाण्यं समर्थनीयमिति शास्त्रस्वरूपादिविषयाणामपि वाक्यानां प्रामाण्यं समर्थनीयम् । नन्विहैव यदि तेषां प्रामाण्यं साध्यते, न भवितव्यं चतुस्सूत्र्या; अथ किंनिमित्तं तर्हि शास्त्रभेदमन्तरेण प्रमाणलक्षणादीति ? उच्यते, न शारीरकेऽर्थवादविशेषाणां प्रामाण्यं साध्यते, अपि तु प्रमाणानां सतां ब्रह्मणि प्रामाण्यमात्रसाधनम् । अनिर्धारितविषयविशेषं प्रामाण्यं कथं प्रसाधनीयमिति मावोचः, सर्वत्रैवानुयोगप्रसङ्गात् । सिद्ध एव प्रामाण्ये संशयपूर्वपक्षसिद्धान्तास्तदर्थविशेषेषु वर्तिष्यन्ते । तद्यदि विषयविशेषनियतमेव प्रामाण्यमिह साध्येत, कथं पुनस्संशयसंभवः ? नन्वेवमपि विध्येकवाक्यतयाऽत्रार्थवादानां प्रामाण्यमुपपाद्यते, *विधिना त्वेकवाक्यत्वादित्यादिना, * तत्तु समन्वयादिति प्रवृत्तिनिवृत्तिपरत्वमन्तरेण स्वरूपे विश्रमस्साधयिष्यते; अतः पूर्वापरविरोधो वा तेषामिहानिरूपणं वा प्राप्तमिति । मैवम्; इह हि निष्प्रयोजनमृषावादरूपतयाऽर्थवादानामप्रामाण्ये प्रसक्ते सप्रयोजनसत्यार्थविषयतया प्रामाण्यं वक्तव्यम् । तत्र केषांचिद्विध्येकवाक्यतया स्तुत्याद्यर्थत्वेन केषांचित्स्वतः प्रयोजनभूतब्रह्मप्रतिपादनेनैव सार्थकत्वमिति विभ-

ज्योत्तरे वक्तव्ये गूढाभिप्रायस्सूत्रकारः प्रामाण्यं यावता सर्वत्र कथयितुं शक्यं तदिहासूत्रयत्। विध्येकवाक्यतया तावत्केषांचित्प्रामाण्यं वक्तव्यम्; इतरेषां तूपासनविध्येकवाक्यतया भिन्नवाक्यतया प्रामाण्यानुवचनम्। तत्र यद्येकहेलया वेदाप्रामाण्यवादी निराकर्तुं शक्यः, किमस्य सहसा ब्रह्मणोपदिष्टेनेति मन्वानो विध्येकवाक्यत्वमुखेन सार्थकतां समर्थितवान्। अतो न विरोध इति।

तदिहैवं पूर्वपक्षः—यद्यपि प्रमाणानां स्वतःप्राप्तं प्रामाण्यम्, शब्दार्थसंबन्धश्च स्वाभाविकः, पदानि च लोकोत्तरमर्थं प्रतिपादयितुं शक्नुवन्ति, वक्तृदोषोऽपि वेदे दुर्लभः; तथाऽपि तदेकदेशभूतेष्वर्थवादेषु प्रामाण्यं दुरुपपादम्, निष्प्रयोजनमृषावादप्रायत्वात्। तथा हि—* सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्, *स आत्मनो वपामुदक्खिदत्, *देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्, *वायुर्वै क्षेपिष्ठा देवता इत्येवमादीन्यर्थवादवाक्यानि किं विध्युद्देशेनैकीभवन्ति प्रमाणम्? उत पृथग्भवन्ति? नाद्यः, अनुपयोगात्। यदि हि विध्युद्देश एव स्वार्थं विदधीत पुरुषोऽपि तत एव प्रवर्त्स्यति, कृतमर्थवादैः। न ह्यमी करणेतिकर्तव्यतादिविधेयकोटिघटितं कंचिदर्थमुपस्थापयन्ति। न द्वितीयः, * आम्नायस्य क्रियार्थत्वात्। यद्यपि प्रमाणान्तराणि स्वविषयावबोधपर्यवसितानि प्रवृत्तिनिवृत्त्यनुपयुक्तमपि शिलाशकलादिकं बोधयन्ति, तथाऽप्यागमाख्येन प्रमाणेन प्रवृत्तिनिवृत्तिपर्यन्ताभिधायिना भवितव्यम्। अन्यथा वक्तृश्रोत्रोर्वचनश्रवणादिप्रवृत्तिवैयर्थ्यप्रसङ्गात्। न ह्यत्र गीतवच्छब्द एव स्वदत इति शृणोति। न च नाट्यवद्रसात्मतयाऽवदधते। अतः प्रमाणेन सता आगमेन श्रोतृप्रवृत्तिनिवृत्त्युपयोग्यर्थाभिधायिना भवितव्यम्। ततश्च भूतान्वाख्यानमात्रेष्वर्थवादवाक्येषु वायसरदनवाक्येष्विव क्व वा प्रवर्तेत? कुतो वा निवर्तेत? अतः, **अतदर्थानाम्**—प्रवृत्तिनिवृत्त्यन्वयविरहिणामर्थवादवाक्यानाम्। **आनर्थक्यम्**—निष्प्रयोजनत्वम्। तस्मादर्थवादवाक्यम् अनित्यमुच्यते। नपुंसकतया सामान्यवचनं सर्वार्थवादसंग्रहसूचनार्थम्। तन्मुखेन कृत्स्नवेदाक्षेपसूचनार्थं वा। एकदेशमुखेन कृत्स्नाक्षेपश्शारीरकत्रिपाद्यामिवात्रापि नानुपपन्नः। तत्र चोक्तं **दीपे**—* द्वितीयतृतीयचतुर्थपादेषु कानिचिद्वेदान्तवाक्यानि प्रधानादिप्रतिपादनपराणीति तन्मुखेन सर्वाक्षेपमाशङ्क्य तान्यपि ब्रह्मपराणीत्युक्तम्—इति। नित्यत्वे वेदस्य प्रामाण्यं समस्ति, अनित्यत्वे वा पुंप्रत्ययाभावादप्रामाण्यमिति कार्योद्देशेन कारणमुक्तम्। इह चौपचारिकमेवानित्यत्वं परैरभ्युपगतम्। यथा भाषितम्—* यद्यपि नित्यानि, तथाऽप्यनित्यकार्यमपि कुर्वन्तीति। आह च **भवनाथः**—* नित्यं हि हेत्वनपेक्षं स्वरूपे, अन्यदपि हेत्वनपेक्षमर्थे गौणं नित्यं तन्नेत्यनित्यमिति। अध्याहारविपरिणामगुणकल्पनादिभिर्विधिपरत्वमाश्रीयेत, अव्यवस्थितिस्स्यात्। रुद्ररोदनवाक्ये हि शिष्टाचारोपन्यासाद्रुद्रवद्रोदितव्यमिति कवयेम। यद्वा महतामपि तथाविधं प्रमादं प्रकाश्य प्रयत्नेन वर्जनीयमिति। अतो यथारुचि कल्पनादव्यवस्था; अशक्यविधानता च। न हीष्टवियोगादिकमन्तरेण विधिमात्रप्रेरितेन रोदितुं शक्यम्; नच प्रजापतिवदात्मनो वपोत्खेदनम्, तस्याश्च स्वयमग्नौ प्रेरणम्, ततस्तूपरपशूत्थानम्, तेन च स्वयं यजनमित्यादीनीदानींतनेषु घटते; न च देवयजनाध्यवसानसमनन्तरं स्वेच्छया दिङ्मोहस्साधयितुं शक्यः। अत एवंजातीयकानि दूरं गत्वाऽपि नैरर्थक्यात्सिद्धमात्रपर्यवसितान्येव। तत्र यदि सिद्धमर्थं प्रमिमीमहि, ततः किम्? यदि च न, ततोऽपि वा किम्? किञ्च, प्रामाण्ये निश्चिते प्रयोजनवदर्थपर्यवसानकल्पनम्, तत्कल्पनेन तन्निश्चय इत्यन्योन्याश्रयणम्। न च सिद्धप्रतिपादने निष्प्रयोजने सति श्रुतहानेनाश्रूयमाणप्रयोजनवदर्थान्तरपरताक्लृप्तिर्युक्ता। यथोक्तं **यामुनाचार्यैः**—* न खलु काकावलोकनमनभिमतमिति कनकाव-

लोकनता कल्प्येतेति । न च प्रयोजनानुगुणा प्रमाणव्यवस्था ; प्रयोजनं हि प्रमाणानुगुणम् , स्वविषयावबोधपर्यवसायित्वात्सर्वप्रमाणानाम् । अन्यथोपेक्षादिफलेषु तृणकण्टकादिविषयेषु प्रमाणेषूपादानोचितार्थक्लृप्तिप्रसङ्गात् । न च तर्हि तृणादिप्रत्यक्षवदेव प्रामाण्यमस्तीति वक्तुं शक्यम् , पुरुषव्यापारनैरर्थक्यप्रसङ्गस्योक्तत्वात् । न च तत एव प्रसङ्गात्प्रयोजनविश्रमः, भ्रान्त्याऽपि तद्व्यापारोपपत्तेर्ध्वाङ्क्षदन्तेयत्तावाक्यस्येव प्रामाण्यस्थापनस्यैवायुक्तत्वात् । न च वाच्यम् स्वाध्यायविधिना कृत्स्नस्य वेदस्य पुरुषार्थाय नियम्यमानत्वादर्थवादेष्वपि प्रयोजनेन भवितव्यमिति । शक्यमेव हि विधिना प्रयोजनमुपादीयेत । न च सिद्धार्थज्ञानमात्रं प्रयोजनम्, वैषयिकज्ञानवत्स्वयं स्वादुत्वादर्शनात् । दर्शनेऽपि ज्ञानमात्रे प्रीत्युत्पत्तावर्थसत्यतायामनिर्बन्धात् । न चात्र कार्यदर्शनं क्लृप्तितश्शक्यत इत्युक्तम् । दृष्टार्थत्वासंभवे चाध्ययनस्यैव वरमदृष्टार्थत्वं कल्पयितुम् , न तु तद्बलेनाशक्यदृष्टक्लृप्तिः । अध्ययनविधिश्च नार्थज्ञानपर्यन्त इति साधितमादौ । अक्षरग्रहणस्य प्रयोजनवत्त्वमर्थवादभागानामर्थपरत्वाभावेऽपि पारायणाद्यदृष्टेनापि सिध्येत् । न च तत्र प्रामाण्यापेक्षा, हुमादिसमानयोगक्षेमत्वात् । यथा च हुमादीनां स्तोभाक्षराणामर्थज्ञानमन्तरेणापि ऋगाद्यभिव्याप्तसामभागपूरणेन सप्रयोजनता वक्ष्यते, एवमिहाप्यर्थवादानामर्थज्ञानेतरप्रयोजनवत्तायामध्ययनविधेः का हानिः ? न चैवमस्त्विति वाच्यम्, अपौरुषेयस्यानन्तस्य वाक्यराशेः प्रतीतिमुत्पादयतोऽप्यविवक्षितार्थत्वे शिष्टेऽप्यनाश्वासप्रसङ्गात् । भवतु वाऽध्ययनविधेर्दृष्टार्थत्वबलादसंभवद्दृष्टानामर्थवादानां स्वाध्यायबहिर्भावः । सन्ति चाख्यानरुचीनामुपाध्यायानां मन्दप्ररोचनार्थमालापाः । इदानीन्तनेष्विव ग्रन्थेषु परिग्राह्यतया प्रथितेन केनचित्प्रक्षेपाच्च तदुपज्ञं परिग्रहपारम्पर्योपपत्तिः । एतदपि सूचितम् *तस्मादनित्यमुच्यत इति । *तदेषाऽभ्युक्ता, *तदुक्तमृषिणेत्यादीनि चार्थवादवाक्यानि मन्त्रान् संवादयन्ति । अतोऽप्यवगच्छामो मन्त्रेभ्योऽर्वाचीनतामर्थवादवाक्यानाम् । अतः कृत्स्नस्य वेदस्यापौरुषेयत्वं प्रामाण्यं च दुर्वचमिति ॥ १ ॥

नचानर्थक्यमात्रादप्रामाण्यम्, अपि तु बाधाच्चेत्याह—

34. सू॰—शास्त्रदृष्टविरोधाच्च ॥ १. २. २. ॥ (पू. २)

शास्त्रविरोधात् दृष्टविरोधाच्छास्त्रदृष्टविरोधाच्चेति प्रत्येकसमुदायपरमिदम् । द्वौ शास्त्रदृष्टविरोधौ परिहारसूत्रक्रमसंख्यानुरोधात् । शास्त्रविरोधस्तावत् *स्तेनं मनोऽनृतवादिनी वागित्यादिषु । यद्येतद्भूतान्वाख्यानमात्रम् , तदा विद्यमानत्वेऽपि नैरर्थक्यात्, अविद्यमानत्वे मृषावादरूपत्वात्, स्तेनं मनः, अनृतवादिनी वाक्, अतः स्तेयादिकं न कर्तव्यमित्यनन्वयात् कर्तव्यमित्येव कल्प्येत । सर्वशरीरेषु चेष्टायां वाङ्मनसयोः प्रधानत्वादितरभूतेन्द्रियैरपि तच्चरितमनुवर्तितव्यमिति वा, निमीलनोन्मीलनादिवत्स्वभावस्य दुरतिक्रमत्वात् तत्करणिना पुरुषेणापि तत्तन्त्रवाहिना भवितव्यमिति वा सः । तथा च स्तेनानृतप्रतिषेधकशास्त्रेण विरोधः । न च षोडशिग्रहणादिवद्विकल्पः, प्रत्यक्षान्निषेधात्कल्प्यस्य विधेर्दुर्बलत्वेनातुल्यत्वात् । रागप्राप्तप्रतिविध्यनुपजीविनो निषेधस्यैव बलीयस्त्वात् । स्तेयानृतयोश्च रागप्राप्तत्वात्, तत्र चानपेक्षिततया विधेरनुदयात् । नियमादेश्चात्रासंभवात् । अतोऽत्र विधिकल्पने शास्त्रविरोधस्सौत्रः, विध्यसंभवस्त्वर्थसिद्ध इति । दृष्टविरोधस्तु *तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिः....तस्मादर्चिरेवाग्नेर्नक्तं ददृशे न धूम इत्यादिषु स्पष्टः, दिवानिशमुभयोरुपलब्धेः । यच्चानेन समर्थ्यते—अस्माल्लोकादुत्क्रम्याग्निरादित्यं गत आदित्यश्च तमिति, तदपि हेत्वसिद्धेर्मृषावादः । अत एव तन्मूला अग्निसूर्ययोर्नक्तंदिवं व्यवस्थितज्योतिष्ट्वेन स्तुतिरपि मृषा, न ह्यसत्या स्तुतिरुपपद्यत इति ।

अथ शास्त्रदृष्टविरोधः—* न चैतद्विद्मोऽब्राह्मणा वा स्मो वयं ब्राह्मणा वेति । [न चैतद्विद्मो वयं ब्राह्मणा वा स्मोऽब्राह्मणा वेति] ब्राह्मण्यं विशिष्टमातापितृसंबन्धविशेषरूपोपाधिः, स च क्वचिद्दृष्टः क्वचिदनुमेय इत्येके । मातापितृसंबन्धविशेषसहकृतचक्षुर्ग्राह्यो जातिविशेष इत्यपरे । अत उभयेषामप्येतद्दृष्टविरोधोदाहरणम् । वयं तु ब्रूमः—शास्त्रविरोधस्यैवैतदुदाहरणमिति । नहि वयं गवादिवद्ब्राह्मणक्षत्रियादिविभागमापाततोऽध्यक्षयामः, न च रत्नतत्त्वमिवाभ्यासपाटवादिना । न च देशान्तरागतमुपदेशात्पूर्वमयं ब्राह्मण इति निश्चिनुमः । न च ब्रह्मसूत्रादिलिङ्गभेदान्निश्चयः, दुष्टशूद्रादिभिर्व्यभिचारात् । अत एव न लिङ्गविशेष एवैतत् । एतेनाचारविशेषो ब्राह्मण्यमित्यपि दत्तोत्तरम् । * चण्डालमपि वृत्तस्थम्....तं देवा ब्राह्मणं विदुः इत्यादि तु क्रियास्तुतिपरमेव, अन्यथा सर्वसंक्षोभप्रसङ्गात् । किंच, ब्राह्मण्यादिजातिविशेषमधिकृत्य क्रियाविधिः, सा चेत्तत्, आत्माश्रयस्स्यात् । एतेनाचारविशेषाभिव्यङ्ग्यत्वमपि निरस्तम् । अथ विशिष्टमातापितृसंबन्धरूपम्? किं तद्वैशिष्ट्यं नाम? न तावदाचारादिकम्, उक्तदोषानतिक्रमणात् । नापि मातापितृब्राह्मण्यमेव, पूर्वपूर्वमातापितृब्राह्मण्यनिरूपणेऽपि पूर्वपूर्वमातापितृब्राह्मण्यनिरूपणसापेक्षत्वादिनाऽनवस्थानात् । मातापितृब्राह्मण्यस्योपदेशसिद्धत्वान्नानवस्थेति चेन्न; तद्ब्राह्मण्यमपि ह्युपदिश्यमानं ब्राह्मणेन ब्राह्मण्यामुत्पत्तिरूपम्, ततश्चोत्पत्तिमात्रमतिप्रसङ्गि । तदतिरिक्तं तु ब्राह्मणशब्दनिमित्तं पूर्वपूर्वेष्वपि न सिध्यतीति निरालम्बनस्तद्व्यवहारः । अथ ब्राह्मण्याख्यो जातिविशेषो मातापित्रोः प्रत्यक्षः, तत्संबन्धज्ञानेन पुत्रे तदभिव्यक्तिरिति । तदपि न, मातापितृब्राह्मण्येऽपि तन्मातापितृब्राह्मण्यसापेक्षत्वेनानवस्थानात् । पूर्वपूर्वप्रत्यक्षमूलोपदेशपरम्परया न दोष इति चेन्न; उपदेशपरम्परातिरिक्तप्रत्यक्षपरम्परायां प्रमाणाभावात् । न हि विशिष्टमातापितृप्रसूतोऽयमित्युक्तेऽपि तद्वाक्यार्थनिश्चयादधिका क्षत्रियादिव्यावृत्तिधीरध्यक्षा जायते । यस्तु विशिष्टमातापितृप्रसूतत्वाद्ब्राह्मणोऽयमिति व्यवसायः, सोऽपि ब्राह्मणेन ब्राह्मण्यामुत्पन्नो ब्राह्मण इति सामान्योपदेशमूल इति नाध्यक्षमूलः । सङ्करजातानां तूत्कर्षापकर्षाभ्यां सप्तमे पञ्चमे वाऽन्यवर्णतापत्तिरित्यत्र त्वागम एव शरणमिति सर्वैरभ्युपगतम् । तथा च यथा तृणारणिमणिभ्यो जायमानस्याशुशुक्षणेः कारणवैषम्यपरिज्ञानेऽप्यवान्तरजातिरप्रत्यक्षा, एवमिहापि । तत्रापि चेज्जातिभेदः प्रत्यक्ष इष्येत, अनयैव दिशा द्रव्यादीनां धर्मत्वं प्रत्यक्षं भविष्यति देवानांप्रियस्य । एतेन * न हि यद्गिरिशृङ्गमारुह्य गृह्यते तदप्रत्यक्षमित्यादीनि स्त्रीपुंस्कोकिलविभागोदाहरणविषयाणि विषयवाक्यानि निरस्तानि । किंच यदि मातापितृसंबन्धविशेषस्तदभिव्यङ्ग्या वा जातिर्ब्राह्मण्यादि, ततः कथं परमपुरुषमुखबाह्वादिजातानामन्येषां च मानसानामगस्त्यवाल्मीकिद्रौपदीधृष्टद्युम्नादीनामयोनिजानां जातिविशेषा व्यवतिष्ठेरन् । नच ते न सन्ति, प्रत्यक्षाद्यविरुद्धविषये अर्थवादादेरितिहासादेश्च प्रामाण्यस्याभ्युपगमात् । अतो योनिजायोनिजसाधारणमन्यदेव ब्राह्मण्यादिकम् । यथा गोमयप्रसूते वृश्चिकप्रसूते च वृश्चिकत्वमविशिष्टम्, तथा योनिजेष्वयोनिजेषु च ब्राह्मण्यादिकम् । अनियतहेतुकं च ब्राह्मण्यादि सङ्करेषु सप्तमे पञ्चमे वाऽन्यतरवर्णोत्पत्तौ दृष्टम् । तच्च ब्राह्मण्यादिकं सर्वं प्रसवितुः परस्य पुंसः प्रजापतिप्रभृतीनामृषीणां च प्रत्यक्षम्, इतरेषां तु प्राक्तनप्रत्यक्षादिसिद्धगोत्रप्रवराद्युपदेशपारम्पर्यनियतसंबन्धावसेयमित्यौपदेशिकम् । यथा स्मरन्ति—

* वर्णाश्रमोक्तमन्त्र....नताबुद्धिसमन्विते । कर्मण्ये मिथुने जातो द्विजोऽन्यस्सङ्करस्स्मृतः ॥ इति ।

एतच्चास्मदादीनां योनिजशरीरेषु जातिविशेषज्ञापनाय लक्षणकथनं, न पुनः प्रमाणशतप्राप्तमयोनिजवर्गं व्यवच्छेत्तुं क्षमम् ।

ननु काऽसौ ब्राह्मण्यादिजातिः? न तावत्संस्थानातिरिक्ता पराभिमता जातिर्भवद्भिरभ्युपगम्यते । यथोक्तं भाष्ये—

* संस्थानातिरेकिणोऽनेकेष्वेकाकारबुद्धिबोध्यस्यादर्शनात्तावतैव गोत्वादिजातिव्यवहारोपपत्तेरतिरेकवादेऽपि संप्रतिपन्नत्वाच्च संस्थानमेव जातिरिति । न चात्र मनुष्यत्वातिरिक्तं क्षत्रियादिव्यावृत्तं ब्राह्मणादिषु संस्थानं पश्यामः । न च निपुणनिरूपणेऽपि दोषधातुषु रूपादिषु वा गुणेषु भयादिषु वा विकारेषु वैषम्यमुपलभ्यते । न च आयुर्वेदादिषु भेषजादिविधिभेदः ; अतोऽध्यवस्यामः साङ्केतिक एवायं ब्राह्मणादिविभाग इति । अपि च,

अनादौ खलु संसारे दुर्वारे मकरध्वजे । कुले च कामिनीमूले का जातिपरिकल्पना ॥

तस्मादनुपलम्भादनुपपत्तेश्च नास्ति ब्राह्मण्यादिजातिरिति । अविदितागमसिद्धान्तानामिदं चोद्यम् । शरीरारम्भकद्रव्यसमवेतानां सत्त्वरजस्तमसां तारतम्यविशेष एव ब्राह्मण्यादिजातिरिति महर्षयो विभजन्ते । एतदपि गुणतारतम्यं तत्तत्पुरुषकर्मतारतम्यनिबन्धनत्वान्न निर्मूलम् । अन्तःकरणगुणतारतम्यं तद्विरुद्धमपि न जात्यादिनियामकम् । दर्शनस्पर्शनाद्यनुज्ञापरिहारावपि शारीरगुणतारतम्यनिबन्धनावेव । पुण्यापुण्य [नियामकं] हेतुकं वृत्त्यादिभेदनियामकं वर्णानां गुणतारतम्यं

श्रीमद्गीताभाष्ये—

* ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप । कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥

इत्यत्र स्पष्टं व्याचकार—*ब्राह्मणक्षत्रियविशां स्वीयो भावस्स्वभावः, ब्राह्मणादिजन्महेतुभूतं प्राचीनं कर्मेत्यर्थः ; तत्प्रभवास्सत्त्वादयो गुणाः ; ब्राह्मणस्य स्वभावप्रभवो रजस्तमोऽभिभवेनोद्भूतस्सत्त्वगुणः, क्षत्रियस्य स्वभावप्रभवस्तमस्सत्त्वाभिभवेनोद्भूतो रजोगुणः । वैश्यस्य स्वभावप्रभवस्सत्त्वरजोभिभवेनोद्रिक्तस्तमोगुणः, शूद्रस्य स्वभावप्रभवस्तु रजस्सत्त्वाभिभवेनोद्रिक्तस्तमोगुणः । एभिस्स्वभावप्रभवैर्गुणैस्सह प्रविभक्तानि कर्माणि शास्त्रैः प्रतिपादितानि ; ब्राह्मणादय एवंगुणकाः, तेषां चैतानि कर्माणि, वृत्तयश्चैता इति हि विभज्य प्रतिपादयन्ति शास्त्राणीति । न चावयवसन्निवेश एव सर्वत्र जातिरित्यस्माभिरङ्गीकृतम् ; यथोक्तं भाष्य एव—*संस्थानं नाम स्वासाधारणं रूपमिति यथावस्तु संस्थानमनुसन्धेयमिति । या च कामिनीमूलत्वादिरुपप्लवाशङ्का, सा सर्वप्रवृत्तिविघातिनी, अतिशङ्कायास्सर्वत्र सुलभत्वात्, दर्शनस्य चाविशिष्टत्वात्, अनुमानस्य चागमादिविरोधे विपक्षे बाधकाभावे चानुदयात् । नच स्त्र्यपराधमात्रेण पुरुषस्यान्यप्रसूतत्वमनुमातुं शक्यम्; अपराधिनीनामपि भर्तृनिमित्तप्रसवस्यापि दर्शनेनानैकान्त्यात् । सवर्णेन चान्येन संयोगे सङ्कराभावात् । सङ्करजातानामप्युत्कर्षा [दीनां] दिना सप्तमे पञ्चमे वा वर्णान्तरापत्तिस्मरणाच्च । किंचेदमुपप्लवचोद्यं अर्धलोकायतिकमतमिव सेश्वरमत्यन्ताय नास्कन्दति । तथा हि—भगवान् पुरुषोत्तमः स्थावरजङ्गमात्मकं सर्वं जगदुपसंहृत्य पुनस्सृष्टिकाले तत्तत्कर्मानुरूपपरिणाममापन्नैरचिदंशैर्ब्राह्मणादीन्सृजति । तत्पारम्पर्यप्रसूताश्च ब्राह्मणादयो भवन्ति । एवमनुपप्लुत एवायं विभागो युगान्तरेषु । अद्यापि च विशिष्टदेशेष्वनुवर्तते । युगविपर्यासादिभिरुपप्लुतांश्च सर्वानुत्साद्य पुनः कृतयुगे महर्षिप्रभृतिभिश्शुद्धं जातिविभागं प्रवर्तयति । एवं सर्वोपसंहारे पुनः कल्पान्तेऽपीति संसारानादित्वेऽपीश्वराभिसन्धिवशेन शुद्धसन्तानप्रवर्तनात्सर्वत्रोपप्लवानुमानं दूरापाक्रान्तम् । यश्च महर्षिप्रभृतिषु प्रमादः, स तु प्राक्तनैः पश्चात्तनैर्वा तपःप्रभृतिभिरनुपप्लुत इति प्राञ्चः । अत ईश्वरमहर्षिप्रभृतीनां प्रत्यक्षं ब्राह्मण्यादिकम् । अस्मदादीनां चाबाधितस्मृत्युपदेशपरम्पराधीनलक्षणविशेषसिद्धमिति ।

अथायमपरश्शास्त्रदृष्टविरोधः—*को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वेतीति । अत्र प्रश्नार्थत्वे नैरर्थक्यात्प्रतिषेधपरिशेषे शास्त्रदृष्टेन परलोकादिना विरोधः । पारलौकिकप्रतिषेधे स्वर्गार्थिनां चोदनानामप्रामाण्यं स्यात्,

ताश्चेत्प्रमाणं तद्विरोधादर्थवादाप्रामाण्यम् । नच विकल्पः, अतुल्यार्थत्वात्, सिद्धे च तदसंभवादिति । शास्त्रदृष्टविरोधोऽपि मुखभेदेन शास्त्रदृष्टविरोध एव ॥ २ ॥

इतश्च—**35.** सू०—**तथा फलाभावात्** ॥ १. २. ३. ॥ (पृ. ३)

येष्वर्थवादेषु फलं निर्दिश्यते, न तत्तथा दृश्यते । समुच्चयार्थो वा तथाशब्दः । यदेतद्गर्गत्रिरात्रब्राह्मणं प्रकृत्याधीतम्—*शोभतेऽस्य मुखं य एवं वेद, *आस्य प्रजायां वाजी जायते इति, किं तत् सिद्धसङ्कीर्तनम्? उताध्ययनफलोक्तिः? नाद्यः, तदानीं विद्यमानविषयत्वे नैरर्थक्यात्; अविद्यमानविषयत्वे मृषावादत्वात् । न द्वितीयः, विध्यनुवादविकल्पानुपपत्तेः । न ह्यत्र फलविधिः, द्रव्यसंस्कारादिषु फलाभावस्य वक्ष्यमाणत्वात् । अत एव न तदनुवादः असदनुवादत्वापातात् । अत एव न स्तुत्यर्थताऽपि ॥ ३ ॥

नार्थवादिकफलस्याभावमात्रम्, केषुचित्तदभ्युपगमे दोषश्चास्तीत्याह—

36. सू०—**अन्यानर्थक्यात्** ॥ १. २. ४. ॥ (पृ. ४)

अन्यानर्थक्यप्रसङ्गादित्यर्थः । *पूर्णाहुत्या सर्वान्कामानवाप्नोति, *सर्वाँल्लोकान्पशुबन्धयाज्यभिजयति [पशुबन्धयाजी सर्वान् लोकानभिजयति] *तरति मृत्युम्, *तरति पाप्मानम्, *तरति ब्रह्महत्यां योऽश्वमेधेन यजते, य उ चैनमेवं वेद इत्यादिषु यदि पूर्णाहुत्यादिभिस्सर्वकामादिसिद्धिः, अन्येषामग्निहोत्रसोमाश्वमेधादीनामानर्थक्यं स्यात्; पूर्णाहुत्यादिव्यतिरेकेण तेषामननुष्ठानात् । यानि पुनरेकफलसाधनान्यपि परस्परनिरपेक्षाणि कर्माण्युपासनानि वा तत्र महीधरस्थमध्वर्थं मार्गभेदेन गमनवद्यथारुचि परिग्रहान्नानर्थक्यम् । अनित्यफलेषु देशकालस्वरूपाद्यतिशयापेक्षया समुच्चयोऽपि स्यात्; यथा शारीरके साधनलक्षणे वक्ष्यते—*काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावादिति । इह तु न विकल्पः, पूर्णाहुत्याद्यकरणे तदुत्तरकर्मानधिकारात् । नापि समुच्चयः, प्रथमेनैव सर्वफलसिद्ध्या तदुत्तरनैरर्थक्यात् । न च फलविशेषेणोत्तरेषां सार्थता, अविशेषश्रवणे कर्मविशेषेष्वप्रत्यक्षस्य सतः फलविशेषस्य कल्पने प्रमाणाभावात् । असता च स्तुतिर्न संभवतीत्युक्तम् ॥ ४ ॥

इतश्च—**37.** सू०—**अभागिप्रतिषेधात्** ॥ १. २. ५. ॥ (पृ. ५)

प्रतिषेधाभागिनः प्रतिषेधात् । प्रसक्तं हि प्रतिषेधभागि भवति । न चान्तरिक्षे दिवि वा चयनं प्रसक्तम्, येन *न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवीति प्रतिषिध्येत । तेन नैष नित्यानुवादः, अक्रियार्थत्वेनानर्थक्यात् । नापि पर्युदासः, पर्युदासितव्याभावादेव; नान्तरिक्षे न दिवि चेति यद्विध्यर्थं पर्युदस्यते, तच्च पृथिवीचयनं नित्यप्राप्तमिति न विधेयम् । विधीयमानमपि न पृथिव्यामग्निश्चेतव्य इत्येव यदि विवक्षा, तदा चयनविधिना बाधः । न चानेन तद्बाधः, अरागप्राप्तेः । विधिप्राप्ते तु तदुपजीविनोऽस्यैव दुर्बलत्वात् । न ह्यत्र विकल्पसंभवः, विधेः कामसंयोगेन चाग्नेः पाक्षिकत्वं सिद्धमिति विकल्पस्य व्यर्थत्वात् । तत्स्वीकारस्य च पाक्षिकबाधगर्भतयाऽष्टदोषदुष्टत्वाच्च । नच चयनफलं तदचिन्वानस्यापि स्यादिति संभवति । नापि चयननिषेधेन चयनप्ररोचनाबुद्धिः । अतस्स्वात्मानं विध्यन्तरं चाकुलयद्वाक्यमिदमप्रमाणमेव ॥ ५ ॥

इतश्च—**38.** सू०—**अनित्यसंयोगात्** ॥ १. २. ६. ॥ (पृ. ६)

पूर्वस्मिन्नधिकरणे वेदप्रामाण्यं सिद्धं कृत्वैवानित्यसंयोगस्य श्रुतिसामान्यमात्रेण परिहार उक्तः; इह तूक्तैर्हेतुभिरर्थवादांशस्याक्षेपे तदुपष्टम्भकतया पुनरुत्थाप्यते। यद्वा, प्रक्षिप्तस्य पुनरुत्थापनं मन्दम्। न चार्थवादेष्वधिकाशङ्काऽस्ति। सत्यपि तत्रैव परिहर्तव्या। असाधारण्येन च तत्रैव व्याख्यातमस्माभिः। अतोऽन्यथा व्याकुर्मः। उक्तैर्हेतुभिर्भवत्वनित्यमर्थवादवाक्यजातम्, तथाऽपि चोदनाभागे किमायातमिति यदि कश्चिद्ब्रूयात्तं प्रत्याह—* **अनित्यसंयोगादिति**। उक्तप्रकारेणानित्यलक्षणापन्नैरर्थवादवाक्यैः संयोगादन्यत्राप्यनाश्वास इति। अथवा विध्यर्थवादयोर्भिन्नवाक्यतापक्षे ह्यानर्थक्यादिदूषणमुक्तम्। अथैकवाक्यतापक्षं प्रतिक्षिपति—* **अनित्यसंयोगादिति**। नित्यसंयोगाभावोऽनित्यसंयोगः। न हि विध्यर्थवादयोर्नित्यसंयोगः, परस्पराकाङ्क्षायां हि तयोस्संबन्धनियमस्स्यात्। न चात्र साऽस्ति, अर्थवादान्वयमन्तरेण विध्युद्देशस्य प्रवर्तकत्वशक्तेः; यथाऽर्थवादरहितस्य। न ह्यर्थवादस्सर्वेषु विधिषु सार्वभौमः, *वसन्ताय कपिञ्जलानालभेत इत्यादिषु तदभावात्प्रधानविधिष्वपि। न चाङ्गाङ्गिनोरन्योन्यार्थवादेन सार्थकत्वम्; अन्यविषयप्ररोचनाया अन्यत्र प्रवृत्तिहेतुत्वाभावात्। अर्थवादानां च भूतान्वाख्यानमात्रविश्रान्त्या निराकाङ्क्षत्वात्। प्रयोजनार्थविध्यनुधावनस्य प्राक्तनदूषणम्। विध्युपयुक्तस्य च फलकरणादेरन्यतमस्याप्यनभिधानात्। प्रवृत्तेश्च स्तुत्याद्यपेक्षानियमाभावात्। अशब्दाच्च स्तुत्यादेः कल्पनेऽन्योन्याश्रयणात्, एकवाक्यतया स्तुतिनिन्दात्वक्लृप्तिः, स्तुतिनिन्दात्वेन चैकवाक्यता। न च प्रमाणान्तरेणान्यत्र प्रसिद्धिः, येन नान्योन्यापेक्षा स्यात्। अतः प्रत्यक्षेण विध्युद्देशेनैकवाक्यत्वासंभवादध्याहारादिभिरन्यत्र कल्प्यमानत्वेऽव्यवस्थितिप्रसङ्गात्, यथाश्रुति गृहीतेऽर्थे नैरर्थक्यात्, कचित्प्रमाणान्तरबाधेनासदर्थत्वात्, असता च स्तुत्यसंभवात्, अर्थवादवाक्यान्यप्रमाणम्। एतदुक्तं भवति—केचिदर्थवादाः कुण्डमजाजिनं पिण्ड इत्यादिवदाकाङ्क्षाविरहादनन्विताः, यथा * यजमानः प्रस्तरः इत्येवमाद्याः; अबोधका ह्येते। केचित्तु * अग्निरुष्णः, आपो द्रवा इत्यादिवत् बुद्धबोधकाः, यथा * आपो वै शान्ताः इत्येवमादयः; अनपेक्षिता ह्येते। केचित्तु भ्रान्तविप्रलम्भकवाक्यवद्विपरीतबोधकाः, यथाऽऽत्मवपोत्खेदनग्रावप्लवनादिविषयाः; बाधिता ह्येते यथायथं प्रत्यक्षाद्यैः। सर्वेऽप्येते विधौ न पर्यवस्यन्ति। अक्रियार्थस्वार्थमात्रप्रतिपादनेन च नोपयुज्यन्ते। तदेवमबोधनाद्बुद्धबोधनाद्विपरीतबोधनादनुपयुक्तबोधनाच्चार्थवादांशस्य प्रामाण्यं दुर्वचमिति॥ ६॥

तत्र सिद्धान्तमाह—

39. सू०—विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः॥ १. २. ७.॥ (सि. १)

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। विधिः प्रेरणात्मा लिङाद्यर्थविशेषः। तथा चानुशिष्यते—* विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति। विधिः—प्रेषणमिति च व्याचख्युः। लिङादिस्तु तत्प्रतिपादनात्परम्परया विधिः। तेन लिङादिनाऽवयवभूतेन समुदायो विध्युद्देशो लक्ष्यते। वेदे वक्तुरभावात्कथं प्रेषणम्? इत्थम्; नित्या एव हि वेदाः परमपुरुषप्रशासनरूपा इति प्रागेव स्थापितम्। तत्र प्रेषणं शाब्दमर्थलब्धं वेत्येतावदेव चिन्त्यम्। तत्र समभिव्याहृतनिमन्त्रणादिसमानयोगक्षेमतया विधिशब्दनिर्दिष्टस्य प्रेरणस्य शब्दवाच्यत्वम्। तथा च साङ्ख्याधिकरणभाष्यम्—* स्वशासनावबोधिशास्त्रं च प्रदिश्येति। अत्र शासनं हि शास्त्रेणावबोधनीयमुक्तम्। शासनमेव हि प्रेषणम्। अयमेव च विधिशब्दार्थो वेदानामभिमत इति। परेऽपि केचिदनुवदन्ति। **तत्त्वरत्नाकरकारैश्चोक्तम्।** एवं च प्रेषणे शाब्दे तस्य निर्विषयस्य बोधयितुमशक्यत्वात्, धात्वर्थस्य कर्तव्यत्वमप्यध्यवसितमेव। अथापि प्रेषण-

विषयस्य धात्वर्थस्य साध्यत्वाभिधानं न केवलस्य। तदभिप्रायेण शारीरकाद्ये भाष्यम्—* विधिवाक्येषु धात्वर्थस्य कर्तृव्यापारसाध्यतामात्रं शब्दानुशासनसिद्धं लिङादेर्वाच्यमित्यध्यवसीयत इति। एतदेव च **वेदार्थसंग्रहे**ऽप्युक्तम्—* लिङादेः कोऽयमर्थः परिगृहीतो भवति? * यज देवपूजायामिति देवताराधनरूपयागादेः प्रकृत्यर्थस्य कर्तृव्यापार-साध्यतां व्युत्पत्तिसिद्धां लिङादयोऽभिदधतीति न किञ्चिदनुपपन्नम्। कर्तृवाचिनां प्रत्ययानां प्रकृत्यर्थस्य कर्तृव्यापार-संबन्धप्रकारो हि वाच्यः। भूतवर्तमानतादिमन्ये वदन्ति। लिङादयस्तु कर्तृव्यापारसाध्यतां वदन्तीति। तत्रैव **द्रमिडभाष्यमुपात्तम्**—* स्वशासनानुवर्तिनं ज्ञात्वा कारु [ण्यात्स भगवान् वर्धयेत] ण्यस्वभावाच्च वर्धयेत विद्वान् कर्मदक्षः—इति। अनन्तरं च भगवद्गीतायामेवायमर्थो दर्शितः—

* ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः। श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः॥
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्। सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः॥

इति स्वाज्ञानुवर्तिनः प्रशस्य विपरीतान् विनिन्द्य, पुनरपि स्वाज्ञानुपालनमकुर्वतामासुरप्रकृत्यन्तर्भावमभिधायाधमा गति-श्चोक्ता इति। यत्तु **दीपे** कर्त्रधिकरणे प्रोक्तम् * यजेतोपासीतेति हि कर्तृलकारः, अतः कर्तारमेव बोधयति शास्त्र-मिति; तदात्मनः कर्तृत्वं श्रुतिसिद्धमित्येतदर्थम्, न तु लिङादिप्रत्ययवाच्यविशेषनिष्कर्षणपरम्। यद्वा—यजेतेत्यादौ स्वव्यापारसाध्ययागादिविशिष्ट इति कर्तृप्राधान्येन बोधनमभिप्रेतम्, कर्ता चाख्यातान्तरसाधारणत्वान्न लिङादेर्विशेषतो-ऽर्थः। एवम्—* स्वर्गकामो यजेते [त्येवमादिषु] त्यादिषु लकारवाच्य [चक] कर्तृविशेषसमर्प [णपराणां] काणां स्वर्ग-कामादिपदानां नियोज्यसमर्प [णपरत्वं] कत्वं शब्दानुशासनविरुद्धमिति **वेदार्थसंग्रहो**ऽपि। इत्थं प्रेषणस्य शाब्दत्वपक्षे निर्वाहः। गम्यमानत्वपक्षेऽप्येषां ग्रन्थानां न कश्चिद्विरोधः। अनुशासनं तु कथंचिन्नेयम्। अतो विधिः प्रेषणम्, तदर्थत्वाल्लिङादिरिह विधिः। यद्वा विधीयते, कर्तव्यतया बोध्यते विशिष्टो यागादिरनेनेति चोदनावाक्यमेव विधिः। स्वर्गकामस्साध्ययागादिविशिष्ट इति हि विध्युद्देशार्थः। अतश्चोदनावाक्येनार्थवादानामेकवाक्यत्वात्, अर्थवादाः, विधी-नाम्, स्तुत्यर्थेन स्युः। स्तुत्या निन्दाऽप्युपलक्षिता। विधिनेत्युपक्रम्य विधीनामिति बहुवचनं विध्यन्तर्गतेन येन-केनचिदंशेन स्तावकतयाऽन्वयद्योतनार्थम्।

एतदुक्तं भवति। यदुक्तं विध्युद्देशेनैकवाक्यतया चार्थवादानां प्रामाण्यं न सिध्यतीति। तत्र तिष्ठतु तावत् प्रादेशिकी स्वावसरसाध्या भिन्नवाक्यता। सामान्येनैकवाक्यतायां तावदानर्थक्यं न पश्यामः, स्तुत्यादिमुखेन सप्रयोजन-त्वात्। तत्र यान्यसंभवत्स्वार्थानि दर्शितानि तानि विचारयिष्यामः। यानि पुनरविरुद्धस्वार्थानि तानि तावदजहत्स्वार्थानि स्तावकतयैकवाक्यत्वं लभन्ते। यथा * वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेये-नोपधावति स एवैनं भूतिं गमयतीत्यादि। इह किल राजसेवादिवाक्ये राजगुणवर्णनवद्देवपूजाविधायिनि वाक्ये देवता-स्तुतिर्लोकव्युत्पत्तिप्रकारानतिक्रमेण समन्वेतीति सांप्रत्ययिकोऽयं पन्थाः। क्षिप्रदेवताकं च कर्म क्षिप्रफलदं भवतीति कर्म प्ररोचितं भवति। यद्यपि विधिबलादेव पुरुषः प्रवर्तते, तथाऽप्येवमर्थवादैः प्ररोचितं कर्म शीघ्रमनुष्ठानाय घटत इत्यपि लोकप्रसिद्धम्। ततश्च यत्र सन्त्यर्थवादास्तत्प्ररोचितं कर्म कर्तव्यम्; यत्र न, तत्र विधिमात्रेणेत्यपि न दोषः। न चात्र स्तुतिपरत्वेऽर्थवादानां स्वार्थप्रहाणम्, स्वार्थेषु तदुपयोगिषु तदयोगात्। यथा ऋध्येयं गौः, इयं हि संपन्नक्षीरेत्यादिषु। अबोधनं विपरीतबोधनं च सिंहो देवदत्त इत्यादिवदुपचारवृत्त्या परिहृतम्। लोकोत्तरेषु प्रागुक्तनयेन यथाश्रुतम्, वैप-रीत्याभावाच्च। बुद्धबोधनं तु प्ररोचनार्थानुवादतया। इति संग्रहः।

इदं च सर्वं शारीरकदेवताधिकरणे भाष्यकारैरेव स्पष्टमुक्तमिति तदेवात्र लिख्यते—* कर्मविधिशेषभूतमन्त्रार्थवादेष्वपि * वज्रहस्तः पुरन्दरः, * तेनेन्द्रो वज्रमुदयच्छदित्यादिभिः प्रतीयमानं विग्रहादिमत्त्वं प्रमाणान्तराविरुद्धं तत्प्रमेयमेव। न चानुष्ठेयार्थप्रकाशनस्तुतिपरत्वाभ्यां प्रतीयमानार्थान्तराविवक्षा शक्यते वक्तुम्; स्तुत्याद्युपयोगित्वात्, तेन विना स्तुत्याद्यनुपपत्तेश्च। गुणकथनेन हि स्तुतित्वम्। गुणानामसद्भावे स्तुतित्वमेव हीयेत। न चासता गुणेन कथितेन प्ररोचना जायते। अतः कर्म प्ररोचयन्तो गुणसद्भावं बोधयन्त्येवार्थवादाः। मन्त्राश्च कर्मसु विनियुक्तास्तत्र तत्र किञ्चित्करत्वायानुष्ठेयमर्थं प्रकाशयन्तो देवतादिगतविग्रहादिविशेषमभिदधत एव तत्र किंचित्कुर्वन्ति। अन्यथेन्द्रादिस्तुत्यनुपपत्तेः। न च निर्विशेषा देवता धियमधिरोहति। तत्र प्रमाणान्तराप्राप्तान्गुणान् स्वयमेव बोधयित्वा तैः कर्म प्ररोचयन्ति, गुणविशिष्टं वा प्रकाशयन्ति, प्राप्तांश्चानूद्य तैः कर्मप्ररोचनप्रकाशने कुर्वन्ति। विरुद्धत्वे तु तद्वाचिभिश्शब्दैरविरुद्धान् गुणान् लक्षयि [त्वोप] त्वा कुर्वन्ति। कर्मविधेश्च देवताया ऐश्वर्यमपेक्षितमेव। कामिनः कर्तव्यतया कर्म विधीयमानं स्वयं क्षणप्रध्वंसि कालान्तरभाविनः फलस्य स्वर्गादेस्साधनमपेक्षते। मन्त्रार्थवादयोश्च * वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति, * यदनेन हविषाऽऽशास्ते, तदश्यात्तदृध्यात्, तदस्मै देवा राधन्तामित्यादिषु देवतायाः कर्मणाऽऽराधितायाः फलदायित्वं तदनुगुणं चैश्वर्यं प्रतीयमानमपेक्षितत्वेन वाक्यार्थे समन्वीयते—इति। वेदार्थसंग्रहेऽप्युक्तम्—* सर्वो ह्यर्थवादभागो देवताराधनभूतयागादेः साङ्गस्याराध्यदेवतायाश्चादृष्टरूपान् गुणान् सहस्रशो वदन् कर्मणि प्राशस्त्यबुद्धिमुत्पादयति। तेषामसद्भावे प्राशस्त्यबुद्धिरेव न स्यादिति कर्मणि प्राशस्त्यबुद्ध्यर्थं गुणसद्भावमेव बोधयति, इत्यनयैव दिशा सर्वे मन्त्रार्थवादगता ह्यर्थास्सिद्धा इति ॥ ७ ॥

अथ स्यात्, केचिदुपाध्याया मन्दप्ररोचनौत्सुक्यात् स्वयं चाख्यानरुचित्वादर्थवादान् प्रक्षिपेयुः; तन्मूलं च पारम्पर्येण पठनं स्यात्; वक्तृप्रत्ययाभावाच्च न प्रामाण्यम्, पौरुषेयापौरुषेययोश्च नैकवाक्यत्वमिति; तत्राह—

40. सू०—तुल्यं च साम्प्रदायिकम् ॥ १. २. ८. ॥ (सि. २)

चश्शङ्कानिवृत्त्यर्थः। यद्वा विध्येकवाक्यतया सह सांप्रदायिकतुल्यत्वं समुच्चिनोति। संप्रदायप्रयोजकं सर्वं विधिभागेन तुल्यमर्थवादानाम्। न ह्यनादिनिधनाविच्छिन्नसंप्रदायतयाऽनन्तैरध्येतृभिरभ्यस्यमाने स्वरादिमात्रान्यथाकरणेऽपि बहुभिर्निवार्यमाणेऽर्थवादांशे प्रक्षेपसंभवः। अन्यथा विधिष्वप्यनाश्वासः। समं चास्मर्यमाणकर्तृकत्वं विध्यर्थवादयोः। न चार्थवादानवधूय स्वाध्यायोऽध्येतव्य इत्युच्यते। न च तथा प्रेक्षावद्भिरप्यनुष्ठीयते। अध्यायानध्यायाचार्योच्चारणानूच्चारणशिष्याचार्यभावादिस्तुल्य एवार्थवादभागेऽपि। न च निरर्थके कचिदेवमादरस्संभवति। अविघ्नार्थाश्चैते नियमाः, अध्ययनसंबन्धस्मृतेस्सन्निहितप्रयोजनवदध्ययनपरित्यागे हेत्वभावात्; तत्र चाविघ्नस्यापेक्षितत्वात्; दृष्टे संभवत्यदृष्टकल्पनायोगात्; क्रतुसाधनत्वरूपेण नियमेऽविदूरत्वापकारित्वप्रसङ्गाच्च। न च निरर्थकेषु अविघ्नापेक्षा, विघ्न एव हि तत्र वरम्। अतोऽनादिभिरर्थवद्भिरर्थवादैर्भवितव्यमिति ॥ ८ ॥

एवं विध्यर्थत्वे समर्थिते विधिविरोधस्य शीघ्रपरिहरणीयत्वात्तदभिप्रायेण च दूषणोद्देशक्रमात् शास्त्रदृष्टविरोधादित्यत्र शास्त्रविरोधं तावत्परिहरति—

41. सू०—अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधस्स्यात्, शब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्येत ॥ १. २. ९. ॥ (सि. ३)

चस्तादर्थ्ये तदविरोधं समुच्चिनोति। या सा रोदनात्मवपोत्खेदनस्तेयानृतवादादिषु शास्त्रविरोधात्मिकाऽनुपपत्तिरुक्ता, साऽत्र प्ररोचनार्थत्वपक्षे न। स्तेयादेः, प्रयोगे—अनुष्ठाने हि, अर्थवादानां विवक्षिते प्रत्यक्षया तत्तन्निषेधश्रुत्या विरोधस्स्यात। न चार्थवादरूपशब्दस्य अर्थस्त्वनुष्ठानात्मा दृश्यते। तस्मादुपपद्येत, अर्थवादप्रामाण्यम्। **अप्राप्तां चानुपपत्तिम्**, **अप्राप्तं चानुपपत्तिमि**त्यन्यौ पाठौ अध्याहारादिपरिग्रहक्लेशात्, *सा न प्राप्नोतीति शाबरयोजनाननुरूपत्वात्, प्रथमान्तपाठस्यापि सर्वैस्स्वीकृतत्वाच्चानादरणीयौ। प्रक्षेपबुद्ध्यैव वार्तिककृताऽपि पाठान्तरद्वयं व्याख्यातम्॥ ९॥

यद्यपि विध्येकवाक्यतया स्तुतिनिन्दार्थत्वेनार्थवादप्रामाण्यं संभवति, तथाऽपि व्यधिकरणे स्तुतिनिन्दे कथं विधेरुपकरिष्यतः? *वेतसशाखया चावकाभिश्च विकर्षतीति विधेः *आपो वै शान्ता इत्यपां स्तुतिः कोपयुज्यते? न ह्यश्वगुणोक्त्या गौः श्लाघ्येति स्यात्। तत्रैव चासिद्धो गुणः कथ्यमानो न प्ररोचनायै घटते। यदाहुर्**द्रमिडाचार्याः**—*नासता स्तुतिरुपपद्यत इति। न ह्यत्र पयः पिब, शिखा ते वर्धिष्यत इत्यादिबालातुराद्युपच्छन्दनन्यायोऽपि संभवति, परीक्षकादिकृतत्वात। अतः प्रतारणसमाधिरेवात्र स्यादित्यत्राह—

42. सू०—**गुणवादस्तु** ॥ १. २. १०. ॥ (सि. ४)

तुशब्दश्चोद्यं व्यावर्तयति। गुणवादः—अमुख्यवाद इत्यर्थः। एतदुक्तं भवति—यत्रार्थवादे साक्षादभिधेयार्थसमन्वयेन विध्येकवाक्यता न संभवति, तत्र लोकवद्गौण्या लक्षणया वा वृत्त्या विध्यन्वययोग्यं कंचिदर्थमुपस्थाप्य तन्मुखेन प्ररोचनादेकवाक्यत्वं भवति। एतेनैव सामान्यतस्सर्वविरोधे गमनिकोक्ता। तत्र यद्वेतसावकयोर्विधीयमानयोरपां स्तुतौ वैयधिकरण्यमुक्तम्, ततस्तयोरेव तथा स्तुतिः, तदभिजाते ह्येते स्वाभिजनस्तुत्या स्तुते भवतः—शान्तानामपां विकारभूते हि ते स्वप्रकृत्यानुगुण्येन शान्तिहेतुतया यजमानस्य कष्टं शमयिष्यत इति। यानि रुद्ररोदनादिवाक्यानि तेष्वपि पूर्वापरपरामर्शात्परस्परसाकाङ्क्षैः पदैः स्तुतिनिन्दामुखेन विध्येकवाक्यत्वं सुव्यक्तम्। तत्र रोदनाद्यसंभवमात्रं परिहर्तव्यम्। न तावद्रुद्रस्य रोदनमसंभवि, तस्यापि **शतपथब्राह्मणा**दिषु शतशस्तद्धेतोः प्रतिपादनात्। अत्र रुद्रशब्दनिर्दिष्टस्याग्नेर्देववर्गनिक्षिप्तधनप्रत्यर्पणनिमित्तशोकस्य रोदनहेतोः प्रामाणिकत्वात्। न चाशरीरस्य कथं रोदनाश्रुपातादिरिति वाच्यम्, देवताविग्रहादेस्समर्थयिष्यमाणत्वात्। न च तदश्रुणो रजताख्यपरिणामे काचिदनुपपत्तिः, वस्तुशक्तेः प्रतिनियतत्वात्। द्रवादीनां परिणामविशेषवशात्काठिन्यादियोगस्य करकादिष्वपि दृष्टेः। गोमयवृश्चिकादिनयेन विलक्षणादपि कार्योत्पत्तेर्नविलक्षणत्वाधिकरणे समर्थयिष्यमाणत्वात्। तृणारणिमणिजाग्निवदश्रुप्रसूतानश्रुप्रसूतरजताभेदस्य संभवात्। शब्दप्रमाणके चार्थे शब्देतरस्माद्बाधायोगात्। द्रव्यविशेषाणां च तत्तद्धातुरूपेण परिणामस्यान्यत्रापि दृष्टेः। महर्षिभिश्चानुमतत्वात्। रुद्रशरीरस्य तैक्ष्ण्यविशेषात्सर्वधातूपादानत्वं युक्तम्। आह च भगवान् वाल्मीकिरम्बिकापतेर्वीर्येण ताम्रकार्ष्णायसादिरूपसर्वधातूत्पत्तिम्। यथा—

*उत्ससर्ज तथा [महा] तेजः स्रोतोभ्यो हि तदाऽनघ। यदस्या निर्गतं तस्मात्तप्तजाम्बूनदप्रभम्॥
काञ्चनं धरणीं प्राप्तं हिरण्य[ममलं]म्मङ्गलं शुभम्। ताम्रं कार्ष्णायसं चैव तैक्ष्ण्यादेवाभ्यजायत॥
मलं तस्याभवत्तत्र त्रपु सीसकमेव च। तदेतद्धरणीं प्राप्य नानाधातुरवर्धत॥ इति।

एवमश्रुप्रसूतं रजतं स्वकारणानुगुण्येनाश्रुपतनहेतुर्भवतीत्यदेयत्वाय निन्द्यते। यथा कृत्तिकाग्न्याधानादेः गृहदाहाद्यनिष्टकारणत्वम्, तथा रजतस्य बर्हिषि दानं रोदनकारणं भवतीत्यनिष्टकारणत्वम् *तस्माद्बर्हिषि न देयमिति निषेधस्योप-

युक्तमेव; यथा अपगोरणशतयातनासाध्यसाधनभावः * तस्माद्ब्राह्मणाय नापगुरेतेति निषेधस्य। कालनियतफलादर्शनं तु प्रतिबन्धकबलात्कर्मकर्तृसाधनवैगुण्येन च समाधातव्यम्। एवं प्रजापतेरात्मवपोत्खननं लोकोत्तरशक्तेर्न विरुद्धम्। तथाऽपि तस्य जीवनम्, तेनैवाग्नौ वपायाः प्रहरणमित्यादिकं च शक्त्यतिशयादेव। विश्वसृजः प्रजापतेः कर्मसामर्थ्याच्च तथा तूपरपशूत्पत्तेर्न विरोधः। सर्वं चैतत्कर्मस्तुत्यर्थं भवति—अग्नौ प्रहृतमात्रायां प्रजापतेर्वपायामजस्तूपर उदगात्, इत्थं नाम बहवोऽपि पशवस्समभूवन् तदिदं कर्मणस्सामर्थ्यमिति। प्राजापत्यादिक्रमेण प्राजापत्यता च प्रतिपादिता भवति। अतः, * यः प्रजाकामः पशुकामस्स्यात्स एतं प्राजापत्यं तूपरमालभेत इत्यनेन विधिनैकवाक्यतया वपोत्खेदनादिवाक्यं प्रमाणम्। यदपि * देवा वै देवयजनमध्यवसाय दिशो न प्राजानन् इत्यादि, इदमपि * आदित्यः प्रायणीयश्चरुरादित्य उदयनीय इत्यस्य विधेः शेषतया न केवलं वृत्तान्वाख्यानपरम्; नापि विध्यन्तरकल्पकम्, येनोक्तदोषस्स्यात्; किंतु दिङ्मोहमपि शमयत्यसाविति सर्वव्यामोहशमनत्वेनेष्टिः स्तूयते। न चेदमसदन्वाख्यानम्, देवतानामतिशयितज्ञान-शक्तीनामपि कर्मवश्यतया कदाचिद्रजस्तमोभिभवादिदोषसंभवेन दिङ्मोहादौ विरोधाभावात्। न च तेषां देवयजनाध्यव-सानमेव दिङ्मोहकारणत्वेनोच्यते, येनास्मदादिष्वनुपलम्भेन विरोधश्शङ्क्येत; देवयजनाध्यवसानानन्तरं तेषां कदाचित् स्वकारणेन दिङ्मोहस्संवर्तते, स चानेन कर्मणा शमितः, इत्थं नाम प्रशस्तमिदं कर्म, अत इदं कर्तव्यमित्यस्मदादि-ष्वप्यस्य कर्मणो मोहप्रशमनहेतुतायां न विरोधः। न हि निवर्तनीयेन मोहेन तदानींतनेन भवितव्यमित्यस्ति नियमः। अङ्गेषु च फलं प्रधानाविरुद्धं नात्यन्ताय परिहा[प्य]र्यम्। करिष्यमाणे च दर्शपूर्णमासयोरनभ्यस्तसौमिके भवति कर्म-कलापे व्यामोहशमनमपेक्षितम्। तत्राभ्यस्तचरकर्मोपस्थानेनानभ्यस्तावधारणावकाशदायिनोऽप्यदितियागस्य दृष्टद्वारा-ऽप्यवधारणौपाधिकत्वे न कश्चिद्दोषः। आदित्यैनैव ज्ञापितमिति स्तुतिः। एवमेतादृशेष्वर्थवादेषु स्तुतिपरेष्वपि स्वार्थ-सत्यत्वमविरुद्धम्। यत्र तु स्पष्टः प्रमाणविरोधः, तत्र गुणवाद इति।

यत्तु, परेषां स्वार्थेष्वपि रुद्ररोदनादिवाक्यानां गुणवादाश्रयणम्, तदयुक्तम्, रुद्रस्य रोदनादिसंभवस्य दर्शितत्वात्। यत्तु, वर्णसारूप्यान्निन्दन्नश्रुप्रभवमप्यश्रुप्रसवमित्याहेति, तत्र च यद्वार्तिकम्, * अश्रुणश्शौक्ल्याद्यदि नामैतत्कठिनं भवेत्ततो रजतसदृशं भवेदित्युत्प्रेक्ष्य तत्प्रभवनिन्देति; इदमपि साक्षात्तत्प्रभवत्वसंभवोपपादनेन निरस्तम्। यत्तु * पुराऽस्य संवत्सराद्गृहे रुदन्तीत्यत्र * धनत्यागे दुःखदर्शनात्पुराऽस्य संवत्सराद्गृहे रोदनं भवतीत्याहेति; व्याख्यातं च वार्तिककृता * धनत्यागेनात्यन्तोदारस्यापि गृहजनः पीड्यत इति तत्सामान्याद्वा रोदनोपन्यास इति; तदनेन नूनं प्रहसनकोटौ निवेशितो वेदः। यदि च धनत्यागे दुःखदर्शनेन रजतमदक्षिण्यमदेयमित्युच्यते; कथं ततः प्रकृष्टमन्य-द्दक्षिण्यं विधीयेत? तस्यापि त्यागे दुःखाधिक्यसंभवेन निन्दाधिक्यप्रसङ्गात्। *रजतं हिरण्यमदक्षिण्यमिति विशेषेणोपा-दानमपि ह्यत्र हिरण्यव्यवच्छेदार्थम्। यत्तु स्तुतावाख्यानादिसत्यत्वमतन्त्रं कृत्वाऽप्युक्तम्—* शुक्तिकावत्तु किंचिदालम्बनं श्रुतिसामान्यमात्रेण सर्वत्र योजनीयम्, यथेह महाभूतानि प्रजा इति प्रजापतिशब्देनोच्यते वायुरादित्य आकाशो वा तेषां मध्यवर्तिनस्सारा वपाशब्देनोच्यन्ते यथासंख्यं वर्षं रश्मिर्वायुर्वा तादृश्याश्च वपाया अग्नौ प्रहरणं च वैद्युते वर्षस्य तस्य तत्संबन्धप्रसिद्धेः लौकिके रश्मेः ततस्य तदाप्यायकत्वात् शरीरान्तर्वर्तिनि [आर्चिषे] वायोः तस्यान्तश्चरत्व-सामान्यात् तेजोऽज इत्यजशब्देनान्नं बीजं वीरुदादिर्वोच्यते जायमानानामपि तेषां सामान्येनानादित्वात्। तदालम्भ-स्तत्प्रकाशनम्, ततः प्रजानां पशूनां चोत्पत्तिः, सर्वासां प्रजानां पशूनां च व्रीह्यादिपरिणामत्वात्। इत्थं काशकुशाव-

लम्बनेन सर्वत्रालम्बनमिति । एतस्मात्परिक्लेशाद्वरं चित्रकथावस्तूनामिव मिथ्यात्वमेव । नहि तत्र कथंचिदित्थमालम्बनं कल्प्यते, न च तदकल्पनेऽपि विवक्षितं रसादि न सिध्यति । एवमिहापि स्तुत्यादि । यच्चानित्यसंयोगभयात् भूतान्वाख्यानस्यान्यथाकरणम्, तदपि प्रवाहानादित्वात्प्रागेव परिहृतम् । **वार्तिककारेणापि** पुनस्सानुशयेनोक्तं यथा—*मन्त्रार्थवादेतिहासपुराणप्रामाण्यात् सृष्टिप्रलयाविष्येते, तत्र सृष्ट्यादौ प्रजापतिरेव योगी तस्मिन्काले पुण्यकर्मोद्भवाभ्युपगमेन पशूनामभावात् स्वमाहात्म्येनात्मानमेव पशुमभिनिर्माय वपोत्खननादि कृतवान्, ततोऽसमाप्त एव कर्मणि तूपरः पशुरुत्थितः, ईदृशं च कर्म प्रत्यासन्नफलम्, एवं च प्रजापतिना चरितमिति सर्वं सत्यमेव, प्रतिसृष्टि चर्तुलिङ्गन्यायेन तुल्यनामप्रभवव्यापारवस्तूत्पत्तेः नानित्यताप्रसङ्ग इति । एतेन *देवा वै देवयजनमित्यादावपि, कर्मसु कौशलेन दीव्यन्तीति देवा ऋत्विज इति क्लिष्टकल्पना निरस्ता । अत आर्थवादिकान्याख्यानानि सत्यान्येव सन्ति स्तुत्यादिमुखेन विधौ विनिविशन्त इति ॥ १० ॥

*स्तेनं मनोऽनृतवादिनी वागित्यत्र विध्यन्तरकल्पनाभावाच्छास्त्रविरोधः, सन्निहितहिरण्यविध्येकवाक्यतया च नैरर्थक्यं पर्यह्वियत । असंभवत्स्वार्थे च सामान्यतो गुणवाद इत्यभ्यधिष्महि । तत्र स्तेनं मन इत्यादिना विधेयान्तरस्तुत्यर्थं मनोवाचोर्निन्दा हि क्रियते । न चासता स्तुतिनिन्दे घटतः । न चात्र मनसस्स्तेनत्वमदर्शि, वाचो वा दृष्टमसत्यवादित्वम् । कथमसता स्तेयानृतभावेन निन्द्येयाताम्? तत्राह—

43. सू०—**रूपात्प्रायात्** ॥ १. २. ११. ॥ (सि. ५)

रूपात्—मनसस्स्तेनत्वं स्तेनसमानरूपत्वादित्यर्थः । स्तेना अपि परकीयं स्वकीयतयाऽभिमन्यन्ते । एवं मनोऽपि । करणे कर्तृत्वाध्यवसायेन स्तेनगुणवादः । स्तेनवच्छन्नरूपतया तन्निर्देश इत्येके । **प्रायात्**—वाचोऽनृतत्वबाहुल्यात्; बाहुल्येन हि साऽनृतं वक्ति, तावतैव सत्यवादतिरस्कारिणा निन्दोपपद्यते । अतस्सतैव स्वभावभेदेन उभे निन्द्येते ॥

यत्तु *धूम एवाग्नेर्दिवा ददृश इत्यादि दृष्टविरुद्धमुक्तम्, तत्राह—

44. सू०—**दूरभूयस्त्वात्** ॥ १. २. १२. ॥ (सि. ६)

दूरेऽन्यतरस्य भूयस्त्वेनोपलम्भादित्यर्थः । दिवा धूमो रात्रौ चार्चिर्दूरस्थैर्भूयस्त्वेनोपलभ्यते । तावता धूम एवार्चिरेवेत्यवधारणम् । यद्वा, दूरस्थैव भूयस्त्वादर्चिर्दिवा कदाचिन्नैव दृश्यते, रात्रौ च धूमः, अतस्तात्त्विकीयमवधारणा । अस्त्वेवमवधारणोपपत्तिः, तथाऽपि तेजसोर्मिथस्संक्रमणहेतुत्वमयुक्तम् । न हि दूरस्थैरनुपलभ्यमानानि वस्त्वन्तरेषु संक्रामन्ति । माभूत्संक्रमणम्, असंक्रान्तेऽपि संक्रान्तवाचोयुक्तिर्गौणी, अतिवादमूललोकानुपलम्भानुसारेण स्तुत्यालम्बनात् । अत एवातीन्द्रियदेवताकारसंक्रमणविवक्षायामपि न दोषः । एवं च *अग्निर्ज्योतिर्ज्योतिस्सूर्यः सूर्यो ज्योतिर्ज्योतिरग्निरिति मिश्रलिङ्गयोः *अग्निर्ज्योतिर्ज्योतिरग्निस्सूर्यो ज्योतिर्ज्योतिस्सूर्य इति केवलयोश्चाग्निहोत्रमन्त्रयोर्देवताद्वयसन्निधिविवक्षया संक्रान्त्याऽन्यतरसान्निध्यविवक्षया च विधानं स्तुतं मन्येमहि ॥ १२ ॥

अथ *न चैतद्विद्मोऽब्राह्मणा वा स्मो वयं ब्राह्मणा वेत्यत्र विरोधं परिहरति—

45. सू०—**स्त्र्यपराधात्कर्तुश्च पुत्रदर्शनात्** ॥ १. २. १३. ॥ (सि. ७)

नेदं ब्राह्मण्यप्रतिषेधार्थम्, येन विरोधस्स्यात्, अपि तर्हि ब्राह्मण्यस्य दुर्ज्ञानताप्रतिपादनार्थम्; दुर्ज्ञानत्वं च

स्त्र्यपराधात्, कर्तुश्च पुत्रदर्शनात्। अनपराधायां हि स्त्रियां क्षेत्रिण एव धर्मपुत्र इति निश्चेष्यामः, सा चेदपराध्येत तत्कर्तुरेवायं स्यात्, कर्ता च क्षेत्री वाऽन्यो वेति दुर्ज्ञानम्; अन्योऽपि ब्राह्मण इतरो वेति। अत एव हि श्रूयते—* अप्रमत्ता रक्षथ तन्तुमेतमिति। प्रमादे हि प्रजातन्तुच्छेदोऽत्र प्रतीयते। स्मरति च—* माता भस्त्रा जनयितुः पुत्र इति। अत एव काचित्कदुर्ज्ञानमात्रात् * न चैतद्विद्म इत्याद्यज्ञानवचनम्। अज्ञातेऽप्यज्ञातत्ववचनं किमर्थम्? प्रवरानुमन्त्रणप्रशंसार्थम्। प्रवरेण हि व्रियमाणेन अब्राह्मणोऽपि ब्राह्मणो भवेदिति प्रवरानुमन्त्रणं प्रशस्यते। सा च प्रशंसा प्रसिद्धब्राह्मणानां ब्राह्मण्यप्रसिद्ध्यपह्नवसापेक्षेति तदर्थोऽयमज्ञानार्थवादः ॥ १३ ॥

अथ * को हि तद्वेदेत्यादौ विरोधं परिहरति—

46. सू०—**आकल्पिकेप्सा** ॥ १. २. १४. ॥ (सि. ४)

तादात्विकमिहाकल्पिकं न विवक्षितम्। आगमिष्यति वसन्ते यदद्यतनं वसन्तलिङ्गं तदाकल्पिकमित्याहुः। **आकालिक**मिति पाठान्तरेऽप्येषैव विवक्षा। आकालिकेप्सा—अद्यतनफलश्रद्धा हि पुरुषाणां स्वरसवाहिनी, * वरमद्य काकश्श्वो मयूरादिति न्यायात्। एतदुक्तंभवति—* दिक्ष्वतीकाशान्करोतीति प्रवर्ग्यकाले प्राग्वंशस्य दिक्ष्वतीकाशकरणं धूमक्लेशानुभवनिवृत्तिहेतुतया प्रत्यक्षतात्कालिकफलं प्रशंसितुमामुष्मिकफलमागमैकसमधिगम्यमप्रत्यक्षमात्रेणाविदितमेव भावयन्तीति ॥ १४ ॥

यत्तु * तथा फलाभावादित्युक्तम्, तत्राह—

47. सू०—**विद्याप्रशंसा** ॥ १. २. १५. ॥ (सि. ९)

नैष फलनिर्देशः, अपि तु विद्याप्रशंसा। **गर्गत्रिरात्रा**ध्ययनं ह्यत्र मुखशोभावाजिभ्यां प्रशस्यते। न चैवमसता स्तुतिः, अध्ययनदशायामञ्जनादिमहनीयसौन्दर्यलावण्यादिमुखशोभाभावेऽपि * विद्यासमं नास्ति शरीरभूषणमिति न्यायेन विद्वत्संभाव्यविशिष्टपदवाक्योच्चारणरूपेण परिष्कारेण शोभमानत्वात्। * आस्य प्रजायां वाजी जायते इति चाध्येतुः कुले सन्तताध्ययनश्रवणेन सम्पन्नमेधो ब्रह्मवर्चसः पुत्रो वाजम्, * अन्नं वै वाजः, * पात्रमायान्ति सम्पदः इत्यादिन्यायेन प्रतिग्रहादन्नं प्राप्नोतीति ॥ १५ ॥

अन्यानर्थक्यानुयोगं प्रतिवक्ति—**48.** सू०—**सर्वत्वमाधिकारिकम्** ॥ १. २. १६. ॥ (सि. १०)

पूर्णाहुत्यादिषु यः फलनिर्देशः, नैष फलविधिः, संस्कारकर्मसु फलश्रुतेरविधित्वस्य वक्ष्यमाणत्वात्। स्तौति त्वेवम्। तथाऽपि नासता, परम्परयोपपत्तेः। पूर्णाहुत्यादिभिरग्न्यादिसिद्धौ तत्साध्यैः कर्मभिर्नानाफलैस्सर्वकामावाप्तेः। ये पुनरतत्साध्याः कामाः, न तेऽत्र सर्वशब्देन संगृह्यन्ते। अधिकृतापेक्षं हि सर्वत्वम्, तथैव लोकवेदयोः प्रयोगात् ॥ १६॥

नन्वङ्गेषु सर्वकामफलश्रुत्या माभूदन्यानर्थक्यम्, यत्र पुनः परस्परानङ्गभूतेषु कर्मस्वल्पस्य महतश्च कर्मण एकमेव फलं निर्दिश्यते, तत्र दुष्परिहरमन्यानर्थक्यम्। यदि ह्यल्पेनाग्निहोत्रादिना स्वर्गस्सिध्येत्, किं गुरुतरेण ज्योतिष्टोमादिना? यदि हि चातुर्मास्ययाजिनस्सुकृतमक्षय्यं स्यात्, किं कर्मान्तरेण? यदि च कर्मणैव स्वतन्त्रेणाक्षयामृतफलसिद्धिः, किं कर्माङ्गिकया यमनियमादिपरिक्लेशबहुलया दीर्घकालनैरन्तर्यादरसेवनीयया ब्रह्मविद्ययेति। तत्राह—

49. सू०—**फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषस्स्यात्** ॥ १. २. १७. ॥ (सि. ११)

यत्र फलस्य कर्मभ्यो निष्पत्तिर्विवक्षिता, तत्र तेषां कर्मणां लौकिककर्मणामिव परिमाणानुसारेण फलतारतम्यं स्यात्। एतदुक्तं भवति—यथा लोके कृष्यादिकर्मणां व्रीह्याद्येकफलसाधनानामपि कर्मतारतम्यानुसारेण फलतारतम्यम्, एवमिहापि। यद्यपि लोकेऽल्पेन रत्नवाणिज्यादिना महत्तरम्, महता च कृष्यादिनाऽल्पतरं फलं दृश्यते; तथाऽपि वेदे नैवमुत्प्रेक्षितुं शक्यम्, अधिका[र्यविशेषात्]रेऽविशेषे लघौ स्थिते गुरौ नियमेनाप्रवृत्तिप्रसङ्गात्। अतो यथा फलाश्रवणेऽपि विश्वजिदादौ फलं कल्पितम्, एवं फलविशेषाश्रवणेऽपि गुरुतरे कर्मणि विधिबलादेव फलभूमा कल्प्यः। संभवति च देशकालस्वरूपैस्स्वर्गादिफलेषु तारतम्यम्। अनुशिष्यते च श्रुत्यादिभिः। एवं गुरुतरोपासनविधिवैयर्थ्यपरिहाराय * अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवति, * अपाम सोममृता अभूम इत्यादिकम्, * वायुश्चान्तरिक्षं चेत्यादिकं चापेक्षिकं मन्तव्यम्। चातुर्मास्येष्वेव फलतारतम्यमधीमहे; वेदनरहितानां च सर्वेषां कर्मणां बहूनि वर्षसहस्राण्यभ्यस्तानामप्यन्तवत्फलत्वमुपनिषदि घुष्यते; अतो वेदनसंबन्धदशायां भवदक्षयफलत्वं स्तुत्यर्थमभिव्याप्त्या निर्दिष्टमित्यपि निर्वोढुं शक्यम्। तदेवमर्थवादप्रसङ्गाद्विध्युद्देशैर्मन्त्रैश्च प्रसक्तमन्यानर्थक्यं परिहृतम्। एवं च सति पूर्णाहुत्यादिष्वपि भवतु फलविधिरेव, तथाऽपि नान्यानर्थक्यम्; पूर्णाहुत्या सर्वेषां काम्यमे[देन]दानां मात्रया प्रागुपपत्तेः। पशुबन्धयजनेनापि देशकालस्वरूपैरल्पीयसो भोगस्य संभवात्, अश्वमेधब्राह्मणाध्ययनेनापि मात्रया तत्फलसिद्ध्यविरोधात्, आवृत्तिभूयस्तया वा समफलसंभवात्। कर्मणां तु सर्वेषां ज्ञानरहितानां कल्पकोटिसहस्रावृत्तानामपि न ब्रह्मविद्यया फलसाम्यं समस्ति। प्रायश्चित्तादिषु च गुरुलघुविकल्पाः फलतारतम्यात्, अधिकारिविकल्पभेदावृत्त्यादिभिश्च निर्वहणीया इति। नन्वेवं यदि सर्वत्रैव कर्मणामल्पास्थिरत्वमवधारितम्, अथेदानीं मुमुक्षुर्ब्रह्मविचारमारभताम्। मैवम्; अध्यायशेषमन्तरेण कृत्स्नवेदप्रामाण्यस्यानिर्वहणात्। ततःपरमप्यविदितस्वरूपाणां कर्मणां स्वतन्त्राङ्गभेदयोः फलभेदस्य दुर्ग्रहत्वात्। स्वरूपादिकं सिद्धं कृत्वा सङ्गत्यन्तराणां शास्त्रादौ दर्शितत्वात्। अतो निरूपितेषु कर्मस्विममेव सूत्रार्थं यथावत्प्रतिसन्धाय परं निर्वेदमेष्यति, यमेनं श्रुतिराह—* परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेति। तथा च **शारीरकाद्यभाष्ये**—* तत्र कर्मविधिस्वरूपे निरूपिते कर्मणामल्पास्थिरफलत्वं दृष्ट्वेति। केचित्—इदं सूत्रं कर्मावान्तरभेदविषयम्, कर्मोपासनयोः फलविवेकस्तु शारीरकाद्ये विशिष्टशास्त्रारम्भहेत्वेकदेशानुप्रवेशेन साधनीय इति वर्णयन्ति। तमपि च पक्षं तत्रैव स्थापयिष्यामः। यैः पुनरिदं सूत्रं फलान्वारोहेणान्यानर्थक्यपरिहारपरमिव नीतम्, तैः स्वतन्त्रकर्मफलनिर्देशमूलमन्यानर्थक्यं कथं परिहृतम्? निरूपितकर्मस्वरूपतारतम्यस्य तु पश्चाद्व्यक्तिर्भविष्यति, अस्मिन् पक्षे * कर्मविधिस्वरूप इत्यादि भाष्यमप्यविरुद्धमिति ॥ १७ ॥

अथाभागिप्रतिषेधचोद्यस्योत्तरमाह—

50. सू०—**अन्त्ययोर्यथोक्तम्** ॥ १. २. १८. ॥ (सि. १२)

अन्त्ययोः—* नान्तरिक्षे न दिवीति प्रतिषेधयोः। आदिमे * न पृथिव्यामित्यत्र यथोक्तं हिरण्यं निधाय चेतव्यमित्यस्य विधेश्शेषत्वम्, तथा तच्छेषत्वमित्यर्थः। एतदुक्तं भवति—केवलपृथिवीचयननिषेधो हिरण्यस्तुत्यर्थ इति स्पष्ट एव, अन्यथा चयनस्यैवासंभवप्रसङ्गात्। तद्वदन्तरिक्षादिचयननिषेधोऽपि। प्रसक्तेन हि प्रसक्तं सह निषेध्यम्। केवलपृथिवीचयनेन प्रसक्तेनाप्रसक्तं समीकृत्य निन्दति, तेन हिरण्यं स्तुतं भवतीति। **यथोक्त**मित्यत्र वाङ्मनसनिन्दनं यथोक्तं हिरण्यस्तुत्यर्थमिति, तथेत्येके। अनित्यसंयोगस्तु यदा प्रागुक्त एव प्रकृतोपष्टम्भकत्वेनानुषक्तः, तदा प्रकृत-

समाधाने प्रागुक्तमेवोत्तरम् । यदा तु प्रयुक्तिभिरनित्यकोटौ निवेशितैरर्थवादवाक्यैस्संयोगाद्विध्युद्देशभागेऽप्यनाश्वास इति योजना, तदा प्रयुक्तीनां परिहारेणार्थवादानामनित्यत्वप्रसङ्गाभावात्तत्संयोगमूला विध्युद्देशस्यानित्यत्वशङ्का स्वयमेव विलीयत इति नोत्तरं पृथक्सूत्रितम् । यदा पुनरर्थवादविध्युद्देशयोरसंबन्धचोद्यमिदम्, तदाऽप्यानर्थक्यपरिहाराय प्रवृत्तेन सिद्धान्ताद्यसूत्रेणैव विध्यर्थवादयोरेकवाक्यतया दत्तमुत्तरमिति तदेव प्रयोजनमिति सत्यार्थाभिधानात्सर्वेऽर्थवादाः प्रमाणमिति सिद्धम् । प्रयोजनं तु क्षणिकस्य कर्मणः कालान्तरभाविफलसाधनत्वेऽपि कल्पनानिरपेक्षदेवतानुग्रहादिद्वारलाभः, विश्वजिदादिवद्विध्युद्देशेऽप्यनिर्दिष्टफलानां रात्रिसत्रादीनामार्थवादिकप्रतिष्ठादिफलपरिग्रहः, विध्युद्देशनिर्दिष्टानां च स्वर्गादिफलानां दुःखासंभिन्नदेशत्वादिस्वरूपशोधनम्, यथावस्थापितस्वरूपरूपगुणविभवादिसिद्धिश्चेति ।

स्वरूपविश्रमो यत्र स्वत एव प्रयोजने । ततोऽन्यत्रैकवाक्यत्वं प्रतीतं परिगृह्यते ॥
स्तुतिनिन्दादिरूपेण विध्यपेक्षितलम्भनात् । नानर्थक्यं न पार्थक्यमर्थवादेषु कुत्रचित् ॥
प्रत्यक्षादिविरोधस्तु मुख्यार्थे यत्र दृश्यते । तत्रौपचारिकीं वृत्तिमनुसृत्यार्थसत्यता ॥
असंभवद्विरोधे तु मुख्यार्थेऽन्यपरेष्विव । स्वतःप्रामाण्यमुत्सृष्टं को वाऽपवदितुं क्षमः ॥
यत्र च स्तुतिनिन्दादौ तात्पर्यं तदपेक्षणात् । मुख्योऽमुख्योऽपि वा कश्चिदर्थस्सत्यो विवक्षितः ॥
असता स्तुतिनिन्दे तु नादर्तव्ये परीक्षकैः । उपच्छन्दननीतेरप्यत्र नूनमसंभवात् ॥
अतोऽर्धलोकायतिकैरसता स्तुतिकल्पना । अप्रमाणाविवक्षूणामहङ्काराय कल्पते ॥
अजैमिनीयेष्वर्थेषु भाषितेषु प्रतारकैः । गतानुगतिकान्मन्दान् किं करिष्यामहे वयम् ॥ १८ ॥

॥ इति अर्थवादप्रामाण्याधिकरणम् ॥ १ ॥

॥ अथ विधिवन्निगदाधिकरणम् ॥ २ ॥

51. सू०—विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् ॥ १. २. १९. ॥ (पू. १.)

यदुक्तम्, *विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरित्यर्थवादानां प्रामाण्याय विध्येकवाक्यत्वं स्तुत्यर्थत्वं च, तत्केषुचिदर्थवादेषु न संभवतीत्याशङ्क्य परिह्रियते । इह विध्यभिव्यक्तिरहितवाक्यान्तरसंबन्धिनोऽर्थवादा उदाहरणम् । यथा—*औदुम्बरो यूपो भवतीत्यादिवाक्यैस्संबध्यमानाः *ऊर्वा उदुम्बर ऊर्क् पशवः *ऊर्जं पशूनाप्नोति, *ऊर्जोऽवरुध्या इत्यादयः । ते किं स्वार्थमात्रं विदधति, उत विहितमन्यत्प्ररोचयन्तीति विचार्यते । किं प्राप्तम्? स्वार्थमेव विदधतीति । कुतः? **अपूर्वत्वात्**—तदर्थस्य प्रमाणान्तराप्राप्तत्वात् । नायमनुवादः, अपि त्वज्ञातज्ञापनरूपो विधिरेव स्यादित्यर्थः । ततः किम्? **वादमात्रं ह्यनर्थकम्**—अक्रियार्थवस्तुस्वरूपवादमात्रं ह्यनर्थकमिति पूर्वाधिकरण एवोक्तम् । यदिह परैर्भाषितम्—*इतरथा स्तुतिवादमात्रमनर्थकं स्यादिति, तत्तदर्थकशब्दप्रत्यभिज्ञानाननुरूपम् । स्तुतित्वेऽर्थशून्यत्वोक्तिर्निष्प्रयोजनत्वोक्तिश्च न युक्ता, प्रागेवोभयप्रतिषेधात् । स्वरूपविधिविषयं चानर्थक्यं न प्रतिक्षिप्तमिति तत्प्रत्यभिज्ञानमुचितम् । यद्यपि व्याससूत्रे स्वरूपविधावप्यानर्थक्यं केषुचिद्वाक्येषु परिहरिष्यते, तथाऽप्यपवरकनिहितनिधिसत्तादिवाक्यवत्स्वतःपुरुषार्थभूतवस्तुविषयेषु वाक्येष्वेव तदिति प्रस्तुतेष्वन्येषु चानुयोगावकाशः । ननु पश्वादिरूपोऽपि पुरुषार्थो लोकसिद्धः । सत्यम्, न पश्वादिरूपः पुरुषार्थोऽस्तीत्युपदिश्यते, तल्लोकसिद्धमेव । अत्रैकेऽपि

स्वर्गादौ ब्रह्मसमाधिसंभवेन न दोषः। पश्वादिरूपं पुरुषार्थमौदुम्बरेण प्राप्नोतीत्युक्ते तु लौकिके तदसंभवाद्वेदे तद्विध्य-दर्शनात्पश्वादिकं च औदुम्बरेण यूपेन प्राप्नोतीति वाङ्मात्रमेव स्यात्, तथाऽनर्थकमिति सम्यगनुयोगः ॥ १९ ॥

सिद्धान्तिच्छायया पुनराशङ्क्य परिहरति—

52. सू०—**लोकवदिति चेन्न पूर्वत्वात्** ॥ १. २. २०. ॥ (पू. २)

यथा लोके विध्येकवाक्यत्वाभावेऽपि गुणकथनात्तदनुरूपविधिकल्पनेन प्रवृत्तिनिवृत्तिपर्यन्तता, शालिसम्पत्ति-योग्यं सुक्षेत्रमिदम्, बहुक्षीरेयं गौरित्यादिषु हि तत्प्रयोजनाभिलाषिणः क्रेतव्यत्वादिबुद्धिर्भवति, एवमौदुम्बरादाविति चेत्; तन्न, **पूर्वत्वात्**—लौकिकस्यार्थस्य प्रमाणान्तरदृष्टपूर्वत्वात्। अन्यदीयसुक्षेत्रादिसिद्धेः क्रेतव्यत्वादिना नियमं समधिगम्य तत्प्रयोजनार्थिनां तत्र प्रवृत्तिरुपपन्ना। इह तु न विधिकल्पने प्रमाणमस्ति। तत्कल्पने हि वाक्यं भिद्येत, औदुम्बरो यूपः कर्तव्यः, उदुम्बरेण पशूनाप्नोतीति। न चैवं लोके। बहुक्षीरवत्त्वादेः प्रमाणान्तरसिद्धत्वेन वाक्यस्य तद्विधिपरत्वाभावात्तत एव क्रेतव्येत्यादिविध्यनुसरणोपपत्तेः। ननु करणश्रुत्या साधनत्वेऽध्यवसिते किं विधिना? प्रत्य-क्षादिगोचरेष्वप्यर्थेष्विष्टसाधनताबुद्धिमात्रेण पुरुषाः प्रवर्तन्ते। विधिना विहितसाधनत्वं निश्चित्यैव फलार्थिनः प्रवृत्तिः। तद्यदि साक्षात्करणश्रुत्याऽध्यवसितं तावतैव प्रवृत्तिसंभवे विधिरप्यपेक्ष्यत इति किमियमीश्वराज्ञा? अतो वाणिज्यादिना धनं प्राप्नोतीत्युक्ते विधिमन्तरेणापि तदुपादित्सा जायते; एवमिहापीति। एतदप्यनेनैव सूत्रेणानुभाष्य परिहृतम्—**लोकवदिति चेन्न पूर्वत्वादिति**। लौकिकवाक्यैरिष्टसाधनतया निर्दिष्टानामर्थानां प्रमाणान्तरगोचरतया ततस्तत्प्रमाणैरेव स्वप्रयत्नाधीनसिद्धिकतामधिगम्य प्रयतन्ताम्। इह तु न तथा, करणत्वे श्रुतेऽपि विधिमन्तरेण कर्तुर्व्यापारसाध्यत्वे प्रमाणाभावात्, *ऊर्ग्वा उदुम्बर इत्यादिना *वसन्तेन सुखं प्राप्नोतीत्यादाविव वस्तुस्वभाववर्णनमेव शब्दात्प्रतीयते, तावति चापूर्वे वस्तुनि विश्रान्ते वाक्येऽत्र किमिति तदतिरिक्तं कल्पयेमहीति। यत्तु परे लोकवदिति चेदिति सूत्रं भिन्दन्तः, इति चेदिति पूर्वोक्तानुवादेन लोकवदिति सिद्धान्तिच्छायया परिहारमाशशङ्किरे; तदसत्, स्वारस्यादेकवाक्यता-प्रतीतौ सूत्रभेदानौचित्यात्। अनुवादपरिहारयोर्व्युत्क्रमान्वयात्। इति चेदित्यनुवादस्य मन्दप्रयोजनत्वाच्च। न चैवं सौत्री शैली भज्येत, **शारीरके** तावत् *छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगमात्तथा हि दर्शनम्, *उपदेश-भेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्, *न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन्, *जीवमुख्यप्राण-लिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् इत्यादिषु बहुषु प्रदेशेष्विति चेदित्यन्तं नेत्यादिनोत्तरेणैकसूत्रतया व्याख्यायि। न चान्यादृशी जैमिनीयसूत्रशैलीति शास्त्रमस्ति। उपरि चैवंविधेषूचितं व्याख्यास्यामः ॥ २० ॥

53. सू०—**वेदे व्यक्तमसंवादः** ॥ १. २. २१. ॥ (पू. ३)

न केवलं वादमात्रस्यानर्थक्यमेव, संवादोऽपि न दृश्यते। असंवादः—न संवादः, विसंवाद इत्यर्थः। *ऊर्ग्वा उदुम्बर ऊर्क् पशव इत्यादयो हि प्रत्यक्षेण विसंवदन्ते। अतस्स्वार्थेऽपि न प्रामाण्यम्। कल्प्यमानविधेर्मृषा-वादमूलत्वात्प्रतारकवाक्यस्येव प्रामाण्यं दुर्वचम्। तस्मात्प्रागुक्तनिष्प्रयोजनमृषावादरूपत्वमेतेषु विध्येकवाक्यत्वादि-युक्त्यनपोदितमित्यप्रामाण्यमेवेति ॥ २१ ॥

54. सू०—**उक्तं तु वाक्यशेषत्वम्** ॥ १. २. २२. ॥ (सि. १)

उक्तमस्माभिः * विधिना त्वेकवाक्यत्वादित्यर्थवादानां विधिवाक्यशेषत्वम्; इह तु विधिसन्निधिमात्रं प्रदर्शनीयम्। तत्र तावत् * औदुम्बरो यूपो भवतीत्यस्य वाक्यस्य शेषतया * ऊर्ग्वा उदुम्बर इत्यादिकं प्रतीयत एव, अन्यथा कस्यायं फलविधिरिति शङ्क्येत; सौत्रान्तिकादेशवदित्थं फलं भविष्यतीत्याह औदुम्बरेण पश्वादिकमिति। न चाविहितः कश्चिदौदुम्बरो यूपो भवति प्रशस्तः, यूपस्य क्रतुसंबन्धाव्यभिचारादौदुम्बरतायाश्च तद्विशेषणत्वात्। न चायं प्रकृतानुवादः, अनुपदेशात्। अतोऽवगच्छामो वैकृते प्रकृतिवत्प्राप्तस्यौदुम्बरताविधिरिति। अतो यद्यप्यत्र विधिप्रत्ययो न श्रूयते, तथाऽपि विधिरेव; अपूर्वत्वात्, अन्यथाऽनुपपत्तेश्च। लिङर्थे लेडिति पञ्चमो वा लकारो विध्यर्थः। एवं विधिसन्निधौ प्रागुक्तनयेन स्तुत्यादिमुखेनैकवाक्यत्वं सुगमम्। फलवत्ता तावच्छाब्दी, ततः प्रशस्तिस्सिध्येत्। यथालोकमर्थवत्त्वाल्लक्षणा न दोष इति चोक्तम्। यदपि च वेदे व्यक्तमसंवाद इत्युक्तम्, तदपि गुणवादेन सामान्यतः प्रागेव परिहृतम्। आलम्बनमात्रं तु प्रदर्शनीयम्। ऊर्क्सादृश्यादूर्ग्वा उदुम्बर इति। दृश्यते यथा तस्य प्रीतिसाधनत्वम्, एवमौदुम्बरताया यूपद्वारकानुप्रवेशेन प्रीतिसाधनत्वम्। प्रीतिसाधनान्तरेष्वसतस्त्वन्नत्वेनोपचारोऽयं फलानुरूपेण, पचेलिमैरंशैरुदुम्बरस्यान्नताध्यवसानार्थत्वात्। * ऊर्क् पशव इत्यपि परिणामविशेषादेवोपपद्यते, अन्नविकारभूता एव हि प्राणिनश्श्रूयन्ते। एवमौदुम्बरादिविशेषतया फलादिवन्निगदानामर्थवादानां स्तुत्यादिमुखेनोपयोगात्प्रामाण्यमिति ॥ २२ ॥

55. सू०—विधिश्चानर्थकः क्वचित्तस्मात् स्तुतिः प्रतीयेत तत्सामान्यादितरेषु तथात्वम् ॥ १. २. २३. ॥ (सि. २)

अपि च * विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरित्यत्रार्थवादेषु स्वार्थको विधिरनर्थक इति, तत एव हेतोस्स्तुतिः प्रतीयेतेति साधितं पुरस्तात्। एतदुक्तं भवति—केषुचिदर्थवादेषु स्तुतिपरतयाऽर्थपरत्वेन प्रामाण्येऽभ्युपगते तदितरेष्वपि स्वार्थविधिमात्रेणासंभवत्प्रयोजनेषु तथैव प्रामाण्यमनुवर्तितुं शक्यम्। ततश्च प्ररोचनीयस्य यस्यकस्यचित्परामर्शी क्वचित्प्राकरणिकस्यापि कस्यचित्तथात्वं सिद्धमिति। यदिह परैरभाषि—* अप्सु योनिर्वा अश्वोऽप्सुजो वेतस इत्यादिषु अप्सु योनिरश्वः कर्तव्यः, अप्सुजो वेतसः कर्तव्य इत्यादिविधेरशक्यत्वात् स्वभावसिद्धत्वाद्वा विध्यानर्थक्यम्, तत्रावश्यं स्तुतिः कल्पयितव्या, तत्सामान्यादितरेषु तथात्वम्। किं तत्सामान्यम्? विध्यसंभवस्तुतिसंभवश्चेति—तदिदं प्रकृतासङ्गतम्। तथा हि—यदि फलविधिर्न वेति विचारः प्रकृतस्तदाऽध्याहारादिकल्पितकर्तव्यताविध्यानर्थक्यदर्शनेन स्तुतित्वकल्पनमयुक्तम्। अथ प्रकृतेऽपि कल्पनीयकर्तव्यविषयो विचारः, तदा विधिश्चानर्थकः। तथा तत्सामान्यादितरेष्विति वचनमयुक्तम्, विशिष्टत्वात्, फलविधिविचारविषयस्ववाक्यविरोधाच्च। तत एव विरोधात् * औदुम्बरो यूपो भवतीत्यादावविधित्वात् अर्थवादत्वविचारः प्रकृत इति प्रत्युक्तम्; विध्यसंभवस्स्तुतिसंभवश्चेत्युक्तमप्यत्र विपरीतम्। तस्मादसदुक्तैव योजनेति ॥ २३ ॥

ननु दर्शपूर्णमासप्रकरणे श्रूयते * यो विदग्धस्स नैर्ऋतो योऽशृतस्स रौद्रो यश्शृतस्स देवस्तस्मादविदहता श्रपयितव्यस्सदेवत्वायेति। तत्र यो विदग्धस्स नैर्ऋत इत्येतदविदहता श्रपयितव्य इत्यनेन नान्वेति। अतो विदग्धविधानं प्राकरणिकविधावन्यत्र चान्वयमलभमानं निरर्थकमेवेति, कथं तत्र प्रामाण्यम्? तत्राह—

56. सू०—प्रकरणे च संभवन्नपकर्षो न कल्प्येत विध्यानर्थक्यं हि तं प्रति ॥ १. २. २४. ॥ (सि. ३

*अविदहता श्रपयितव्य इत्येतत्प्रकरणे व्यतिरेकनिन्दामुखेनाविदग्धश्रपणस्तुतिपर्यवसायितया संभवन्विदग्धादिस्तत्प्रकरणा**दपकर्षो** न कल्प्येत । अपकृष्यत इत्यपकर्षः । ***विध्यानर्थक्यं हि तं प्रति**—विदग्धादिकं प्रति नैर्ऋतादिविध्यानर्थक्यं स्यात् । न ह्यत्र प्रकरणे विदग्धोद्देशेन नैर्ऋतादिविधिस्संभवति, उत्पत्तिगुणावरुद्धनयात् । न चान्यत्रोत्कर्षः, प्रकृतोपयोगसंभवादेव प्रकरणबाधायोगात् । न चात्र नैर्ऋतोद्देशेन विदग्धत्वविधिः, अप्रकृतत्वात्, प्रकृतानुपयोगाच्च । अतस्तमप्रकृष्टं प्रति विध्यानर्थक्यमिति वा योजना । यद्वा, प्रकरणे स्तुत्यादिपरतया संभवद्वत्यन्तरमर्थं प्रत्यभ्युदितेष्ट्यादिवन्नैमित्तिकविधेरानर्थक्यं तत्राह—***विध्यानर्थक्यमिति** । आनर्थक्यपरिहारायैव प्रकरणोपयुक्तस्तुत्यादिपर्यवसायित्वमेष्टव्यमिति । यद्यप्येतदुदाहरणं पूर्वस्मिन्नधिकरणे चिन्तयितुं युक्तम्, तथाऽपि विरुद्धविषयतया विध्येकवाक्यत्वासंभवाशङ्कास्पष्टत्वेन प्रकृतसारूप्यादत्र विचारितमिति ॥ २४ ॥

57. सू०—**विधौ च वाक्यभेदस्स्यात्** ॥ १. २. २५. ॥ (सि. ४)

अपि चात्र स्वरूपविधावभ्युपगम्यमाने *औदुम्बरो यूपो भवतीत्याकारक्रमेण प्रतीयमानमेकवाक्यत्वं भज्येत । न च कथंचित्संभवन्त्यामेकवाक्यतायां तद्भेदो युक्तः । न च परस्परानुपयुक्ततयैकवाक्यता । समर्थितश्चौदुम्बरविधिः । अतो विध्येकवाक्यतायास्स्तुत्यादिपरत्वेन प्रामाण्यं प्रागुक्तमप्रतिहतम् । ननु—*खादिरं वीर्यकामस्य यूपं कुर्यादित्यादिष्विव गुणफलसंबन्धविधिरस्यात् । अत एव च न वाक्यभेददोषः । न चैवं कामशब्देन फलमुपादेयमित्यस्ति नियमः, तदभावेऽपि रात्रिसत्रादिष्वार्थवादिकफलस्वीकारात् । तत्र तु *य एता रात्रीरुपयन्ति ते प्रतितिष्ठन्तीति न साक्षात् फलसाधनयोस्संबन्धश्श्रुतः ; इह पुनः करणश्रुत्यैव प्रकृतस्यौदुम्बरस्य फलेन संबन्धस्साक्षात्प्रतीयत इति विशेषः । एवमपि च प्रामाण्ये सुवचे किमशाब्दस्तुत्याश्रयणेनेति चेत्; सत्यम्, तथाऽपि वैकृतत्वादेव विशेषफलाकाङ्क्षारहिते तस्य फलसंबन्धविध्यनुपपत्तिः । स्तुतिस्तु तत्रापि युक्तेति तन्मुखेन प्रामाण्यं प्रत्यविवादमेव । यत्त्वत्र **कौमारिलै**र्विधित्वेन पूर्वपक्षमुपक्षिप्य कृत्स्नोऽर्थवाद इत्युक्तम्, तत्प्रामाण्याक्षेपसमाधानयोरनुपयुक्तमिति व्यर्थायासमात्रत्वादसङ्गतम् । प्रथमपादमात्रपर्यवसायिनी प्रामाण्यचिन्तेत्यभ्युपगमेऽपि निरर्थकोऽयं विचारः, विधिपरत्वेऽपि प्रामाण्यानुच्छेदेन विरोधाभावात् । सिद्धान्तेऽप्यर्थवादोन्नेयविधिस्वीकारात् । फलविधिपूर्वपक्षेऽपि *औदुम्बरो यूपो भवतीति विधेरवश्याभ्युपगन्तव्यत्वस्थापनात् । अङ्गेषु फलश्रुतेरर्थवादत्वस्यान्यत्र व्यवस्थितत्वेन रात्रिसत्रनयप्रसङ्गप्रतिषेधयोरसंभवाच्चेति । यच्च **प्रभाकरप्रमुखैः** प्रामाण्यमध्यायार्थं प्रतिसन्दधानैरपि औदुम्बरेण यूपः कर्तव्यः, उदुम्बरेण पशूनाप्नोतीति साध्यद्वयभानादेकवाक्यत्वप्रतीतेश्च परस्परविरोधादन्यतरपरित्यागकारणाभावाच्चानध्यवसायादप्रामाण्यमिति पूर्वपक्षितम् ; तदतिस्पन्दम्, उक्तन्यायेन विपरीताध्यवसायसंभवे तेनैव पूर्वपक्षीकरणस्योचिततरत्वात् । अतोऽस्मदुक्त एव पन्थाः । तत्र पर्णमय्यधिकरणादिषु पौनरुक्त्यशङ्काया एवाभावात्परेषामिव न विषयव्यवस्थादिपरिक्लेशः । शारीरकेऽपि लिङ्गभूयस्त्वाधिकरणादिषु विचारेष्वेतदुपयोक्ष्यत इति ।

अर्थवादविशेषेषु प्रामाण्यप्रतिपादनात् । अस्मदुक्तनये स्पष्टा सा पादाध्यायसंगतिः ॥
प्रकृतापेक्षितश्चात्र पूर्वपक्षसमुद्भवः । प्रकृतस्थापनेनैव प्रसिद्ध इति संग्रहः ॥ २५ ॥

॥ **इति विधिवन्निगदाधिकरणम्** ॥ २ ॥

———

॥ अथ हेतुवन्निगदाधिकरणम् ॥ ३ ॥

58. सू०—**हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम्** ॥ १. २. २६. ॥ (पू. १)

पुनरप्यर्थवादविशेषेष्वप्रामाण्यशङ्का परिह्रियते । तत्र पूर्वपक्षी मन्यते, भवतु सर्वत्रार्थवादानां विध्येकवाक्यता, तथाऽपि केषुचिदर्थवादेषु प्रामाण्यं दुष्प्रतिपादम् । तथा हि—ये पुनरेते हेतुवन्निगदाः *शूर्पेण जुहोतीत्यादौ *तेन ह्यन्नं क्रियत इत्यादयः, किं ते प्रतिज्ञातस्य कर्तव्यस्य हेतुमभिदधति, उत प्रशंसामिति विचारणीयम् । न तावत्प्रशंसन्ति, अशाब्दत्वात्प्रशंसायाः । हिशब्दादिश्रुत्यैव हेतुत्वस्य स्पष्टाभिधानात् । श्रुतहानाश्रुतकल्पनयोश्चान्याय्यत्वात् । तदेतदुच्यते ***हेतुर्वेति** । ईदृशानामर्थवादानां हेतुरभिधेयस्स्यात् । कुतः ? ***अर्थवत्त्वोपपत्तिभ्याम्**—हिशब्दार्थवत्त्वात् । अन्यथा श्रुतहानमित्यर्थः । अथैवं हेतुपरत्वे परार्थानुमानप्रयोगवन्नागमतया प्रामाण्यम् । नाप्यनुमानतया, तस्य व्याप्तिपरामर्शसापेक्षत्वात् । यदन्नकरणं तद्धोमसाधनमिति व्याप्तेश्चासिद्धेः । दर्वीपिठरादिषु होमसाधनत्वमसिद्धम्, प्रत्यक्षादेस्तत्र व्यापाराभावात्; शास्त्रेणापीतः पूर्वमसिद्धत्वात् । अथ हेतुनिर्देशमुखेन व्याप्तावेव तात्पर्यमुच्येत, तथाऽप्यश्रुतकल्पनागौरवम् । वाक्यभेदश्च, *तेन ह्यन्नं क्रियत इत्येकस्यैव यदन्नकरणं तद्धोमसाधनम्, अन्नकरणत्वाच्छूर्पो होमसाधनमित्यर्थद्वयविधानाशक्तेः । अथोच्येत, यद्यदन्नकरणं तेन तेन होतव्यमित्येव विधिः कल्प्यते, *शूर्पेण जुहोतीति तद्विशेषविषयोऽनुवाद इति । तदपि न, उक्तोत्तरत्वात्, करणविभक्तिश्रुत्यैव होममवरुन्धानस्य शूर्पस्य कल्पनासिद्धैर्दर्वीपिठरादिभिः कथं बाधो विकल्पः समुच्चयो वा कल्प्येत ? श्रौतेनैव करणेन निराकाङ्क्षो होमः कल्पनीयं करणान्तरं नापेक्षते । अपेक्षित एव च करणान्तरे श्रुतौ श्रूयमाणं करणमुपधावन्होमः करणान्तरकल्पनं प्रतिबध्नीयात् । कल्पकश्च हेत्वपदेशार्थवादः स्तुतिपरत्वेनान्यथाऽप्युपपन्नः । शूर्पस्य तु करणता विध्युद्देशान्तर्गततया स्फुटतरश्रुत्यैव प्रतिपन्ना । विशिष्टानुष्ठानेनैव हि शास्त्रार्थव्यवस्था, न च दर्वीपिठरादिभिः जुह्वतोऽनुष्ठातॄन्पश्यामः । अथ दर्वीपिठरादीनां होमकरणत्वं नास्तीत्यव्यभिचारं मन्यसे ? कथं तर्हि शूर्पस्य तत्करणत्वं मंस्यसे ? परम्परयेति चेत्, तुल्यम् । दर्व्यादेश्च तत्करणत्वाभावे कुत्र व्याप्तिं ग्रहीष्यसि ? न क्वचिदिति चेत्, कथं हेतुः ? न चात्रापि तन्नीतिरपि संभवतीत्यप्रामाण्यमेवाविशिष्टमिति ॥ २६ ॥

तत्र प्रतिविधत्ते—

59. सू०—**स्तुतिस्तु शब्दपूर्वत्वादचोदना तस्य** ॥ १. २. २७. ॥ (सि. १)

*तेन ह्यन्नं क्रियत इत्यादिना स्तुतिः क्रियते । कुतः ? शूर्पादीनां होमकरणत्वादेश्शब्दपूर्वत्वात् । श्रेयस्साधनस्य शब्दैकवेद्यतया हेतुसाध्यत्वाभावादित्यर्थः । अतोऽनाकाङ्क्षितस्य, **तस्य**—हेतोः, **अचोदना** ॥ २७ ॥

60. सू०—**व्यर्थे स्तुतिरन्याय्येति चेदर्थस्तु विधिशेषत्वाद्यथा लोके** ॥ १. २. २८. ॥ (सि. २)

*तेन ह्यन्नं क्रियत इत्यादौ, **व्यर्थे**—अर्थरहिते वाक्ये, स्तुतिरन्याय्या, असता स्तुतेरयुक्तत्वस्थापनात्, होमसाधनदशायां क्रियत इति वर्तमानतया निर्दिष्टस्यान्नकरणत्वस्यासत्त्वादिति चेत्, नैवं व्यर्थत्वम्, अर्थस्तु स्यादेव । कुतः ? **विधिशेषत्वात्; यथा लोके** । न ह्यसौ विधिः, अपि तु तच्छेषः, तेन परशब्दार्थस्वीकारो युक्तः । हेतुविधौ त्वयं दोषः, विधेस्त्वत्यन्ताप्रतिपन्नविषयतया यथाश्रुतान्मात्रयाऽप्यन्यथाकरणाभावात्; अन्नकरणदशायां च होमकरणतासं-

भवात् । विध्यर्थे चास्मिन्ननुवादे परिशेषाद्यथाप्रसिद्ध्यन्नकरणत्वं शब्देनैवानुज्ञातमिति न व्यवहितकरणत्वादिचोद्यावकाशः । पाकनिष्ठं च साधकतमत्वं शूर्पे उपचर्यते । विवक्षातः कारकाणि भवन्ति । * तेन ह्यन्नं क्रियत इति नेतरव्यवच्छेदार्थम्, अपि तु प्रकृष्टकरणत्वविवक्षया । प्रकर्षश्चापेक्षातो निकृष्टापेक्षया मन्तव्यः । इदमपि च न लौकिकम्, यथा वाणिज्येन वर्तेत तेन च धनवान्भवतीति । अत्र च भूतं भविष्यद्वाऽन्नकरणत्वं स्तुत्यर्थं वर्तमानतया व्यपदिश्यते । अवर्तमानादपि वर्तमानस्येष्टप्रीत्यतिशयहेतुत्वात् । शक्तेर्वा वर्तमानत्वं व्यापारे निवेश्य निर्दिष्टम् । तदवस्थायां तस्यां हि पुरुषाणां प्रीतिरतिशयिनी, न पुनस्स्वरूपसत्याम् । * वर्तमानसामीप्ये वर्तमानवद्वेत्यनुशासनं वाऽनुसर्तव्यमिति । इह परैः, इति चेदिति सूत्रं भिन्दानैः, इति पुनर्यदुक्तं तत्परिहर्तव्यम्, इत्यार्षभाषान्तं सूत्रमिह भाषितम् । तदयुक्तम्, एकवाक्यताप्रतीतिभङ्गात्; अध्याहारादेश्च निमित्तत्वात् । एवमुत्तरयोरपि सूत्रयोः परस्परनिरपेक्षशङ्कोत्तरक्रमेण प्रस्पष्टविभागयोरेकतयोपादानमकारणकमनुसन्धेयम् ॥ २८ ॥

एवं हेतुपरत्वं दूषितम् । अथाऽन्वारुह्य वदति—

61. सू०—**यदि च हेतुरवतिष्ठेत निर्देशात्** ॥ १. २. २९. ॥ (सि. ३)

* तेन ह्यन्नं क्रियते इत्यसौ यद्यपि हेतुः, तथाऽपि निर्देशादवतिष्ठेत । एतदुक्तं भवति—हिशब्दादेर्हेतुरेवार्थ इति नायं नियमः, नानार्थत्वप्रसिद्धेः । अतः प्रामाण्यानुगुण एवार्थः स्वीकार्यः । प्रसिद्धिप्रकर्षमात्रात्तु यद्यपि हेतुरङ्गीक्रियेत, तथाऽपि शूर्पगतमेवान्नकरणत्वं हेतुरवतिष्ठेत, * तेन ह्यन्नं क्रियत इत्येवं निर्दिश्यमानत्वात् । शब्दप्रमाणके चार्थे यथाशब्दं व्यवस्थानात् । क्लृप्तकल्प्यविरोधे च क्लृप्तस्वीकारस्यैव युक्तत्वात् । न चात्र व्याप्त्यादिपरामर्शापेक्षा, ज्ञापकहेतोरविवक्षितत्वात् । कारकेऽपि विरोधात् । बीजादङ्कुरं जन्यते, तद्धि क्षितिजलादिसापेक्षमिति व्यवस्थितमितिवत् । नच तावता शिलाशकलादिष्वपि प्रसङ्गः, तेष्वदर्शनाद्वा प्रकृतेऽपि क्षितिजलादेः कारणत्वं निवर्तते । एवमिहापि करणभूतस्य शूर्पस्यान्नकरणसामर्थ्यमविशेषकं भवति । न हि शूर्पस्य विशेषणमश्रुतानां तद्विशेषणयोगिनां संग्रहार्थम्, अपि तु शूर्पस्य तद्विशेषणायोगव्यवच्छेदार्थम् । तथाभूते च करणे तद्विशेषणरहितशूर्पान्तरं व्यवच्छिद्यते । न च विशिष्टस्य करणत्वे विधीयमाने विशेषणहेतुत्वग्रहाय प्रमाणान्तरमन्वेषणीयम्, अरुणैकहायन्यादिवत् । अतोऽन्नकरणसमर्थेन शूर्पेण होतव्यमिति विध्युद्देशान्तःपातेन केवलार्थवादतामेव प्रतिक्षिपन्नयं हेतुशब्दः कथमर्थवादतां प्रसञ्जयेदिति ॥ २९ ॥

हेतुविधावपि निर्देशवशात् विशेषव्यवस्थानं दर्शितम् । अथ तदभ्युपगमे बाधकमाह—

62. सू०—**सामान्यादिति चेदव्यवस्था विधीनां स्यात्** ॥ १. २. ३०. ॥ (सि. ४)

* शूर्पेण जुहोतीति प्रकृतं * तेनेति प्रत्यवमर्शं चानादृत्य * अन्नं क्रियत इति सामान्यमात्रादन्नकरणभूतसर्वोपसंहार इति चेत्; प्रमाणतयाऽभ्युपगतानां **विधीनामव्यवस्था स्यात्**—विध्युद्देशेष्वप्यर्थप्रकरणादिभिरापन्नान्विशेषाननादृत्य पदादिमात्रप्रतिपन्नसामान्येतिकर्तव्यतादिव्यवस्थाभङ्गः प्रसज्येतेत्यर्थः । अतो हेतुवन्निगदानामप्यर्थवादानामप्रामाण्यं वक्तुं न शक्यत इति सर्वेऽप्यर्थवादाः स्तुत्यादिमुखेन सार्थकास्सन्तः प्रमाणमिति ॥

असंगतिरनौचित्यमानर्थक्यं गतार्थता । अस्वारस्यं च सूत्राणामन्योक्तेष्विह सुग्रहम् ॥ ३० ॥

॥ इति हेतुवन्निगदाधिकरणम् ॥ ३ ॥

॥ अथ मन्त्राधिकरणम् ॥ ४ ॥

$ 63. सू०—तदर्थशास्त्रात् ॥ १. २. ३१. ॥ (पू. १)

एवं साधितमर्थवादानां विध्युद्देशेनैकवाक्यतया कार्त्स्न्येन प्रामाण्यम्। अथेदानीं तदेकवाक्यताहीना मन्त्रा विचार्यन्ते किं ते मन्त्राः प्रमाणमुत नेति। तदर्थं च प्रतीयमानेऽर्थे तात्पर्यमस्ति न वेति। तदर्थं च किमेते कर्मोपासनरूपेषु शास्त्रेषु स्वार्थबोधनेनोपकुर्वन्ति, उतोच्चारणमात्रेणेति। उच्चारणमात्रे विवक्षिते ह्यर्थबोधनमानुषङ्गिकम्, अर्थप्रत्यायनपरत्वेऽप्युच्चारणं प्राप्तमिति संशयावकाशः। तत्रैवं पूर्वपक्षः—यद्यपि स्वतः प्रामाण्यादिकं स्थापितम्, तथाऽप्यन्यपरत्वादिह तदपोद्यते। न ह्यतत्परश्शब्दस्तत्र प्रमाणम्, अतिप्रसङ्गात्। न च मन्त्राणां स्वार्थे तात्पर्यं संभवति, तदर्थशास्त्रादिविरोधहतत्वात्। तथा हि—* बर्हिर्देवसदनं दामीत्यादयो मन्त्रा यदर्थाः, तदर्थेष्वेव ते शास्त्रेण विनियुज्यन्ते; विवक्षितार्थत्वे हि स्वशक्त्यैव बर्हिर्लवनादौ विनियोगस्सिद्धः, तत्र किं शास्त्रेण तदर्थेन? न ह्येषामर्थविवक्षा शक्तिर्वा शास्त्रैरभिधीयते, हुमादिष्वतिप्रसङ्गात्। अविवक्षितार्थत्वे तदर्थशास्त्रमर्थवत्। अतोऽवगच्छामो मन्त्राणां स्वार्थेषु न तात्पर्यमिति ॥ ३१ ॥

64. सू०—वाक्यनियमात् ॥ १. २. ३२. ॥ (पू. २)

पदसमुदायविशेषो वाक्यम्, तस्य, नियमः—पदानां नियतक्रमयोगित्वम्। अयमभिसन्धिः—न तावत्पदानां क्रमनियमोऽर्थप्रत्यायनाङ्गम्, व्युत्क्रमेणाप्यर्थप्रतीतेः। उच्चारणार्थत्वे क्रमनियमोऽर्थवान्, नियतक्रमैरुच्चारितैरदृष्टोपकारसंभवात्। यद्यपि विध्युद्देशेऽपि व्युत्क्रमेऽप्यर्थप्रतीतिस्स्यात्, तथाऽपि नियतक्रमस्याप्यक्षरराशेः स्वाध्यायशब्दवाच्यत्वात्तथैवाध्ययनं वैधम्। अर्थप्रतीतेस्तु व्युत्क्रमप्रतिसंहितैरपि पदैस्साधनत्वं को वारयेत्? न चेहापि तथा, व्युत्क्रमेणोच्चारणस्याशास्त्रार्थत्वात्। अनुच्चारणावस्थाभाविन्याऽर्थप्रतीत्याऽनुष्ठानानुपकारात्। न च नियतक्रमार्थप्रत्यायनेनादृष्टमिति नियन्तुं युक्तम्, तादृशोच्चारणेनावर्जनीयेन तत्संभवे तदधीनातिरिक्तोपादानगौरवात्। यत्र त्वानुशासनिकप्रकृतिप्रत्ययसमासादिषु क्रमनियमः, तत्र क्रमभङ्गेऽपशब्दत्वान्यार्थत्वनिरर्थकत्वादिप्रसङ्गात्तथैव क्रमेण नियतेन भवितव्यम्। इह तु न तथाऽनुशिष्टमिति व्युत्क्रमेणार्थप्रत्यायनं को निरुन्ध्यात्? क्रमभङ्गे कथं मन्त्रत्वमिति चेत्, माभून्मन्त्रत्वम्। न ह्येतदर्थप्रतीतेरङ्गम्। अर्थप्रतीतिसाधनत्वे तदपेक्षामात्रमेव संरक्षणीयम्। अतो मन्त्रत्वपरिरक्षणायार्थप्रत्यायकमपि व्युत्क्रमपाठं [तं] पौरुषेयं वा वाक्यं ध्यानादिकरणान्तरं चानादृत्य रूपविशेषवत्स्वप्रकरणस्थवाक्यनियमोऽयमर्थाभिसन्धिं प्रतिबध्नाति ॥ ३२ ॥

65. सू०—बुद्धशास्त्रात् ॥ १. २. ३३. ॥ (पू. ३)

अपि च केचिन्मन्त्राः कर्ममध्ये प्रयुज्यमानाः परप्रेषणवन्निगदाः प्रतिपन्नास्साधनरूपा दृश्यन्ते; यथा * अग्नीदग्नीन्विहर इत्येवमादयः। प्रतिपन्नो ह्ययमर्थः पाठमात्रेण। न ह्यनधीतवेदोऽविद्वान्कर्मणि नियुज्यते। अतः क्रमात्प्रागेव शिक्षितात्मीयपदार्थमाग्नीध्रं प्रति प्रैषोऽयमनर्थकः। अथ निश्चितात्मीयपदार्थस्यानुष्ठानकाले स्मरणार्थः प्रैष इति

$ तदर्थशास्त्रादित्यारभ्य मन्त्रानर्थक्यमित्यन्तमेकं सूत्रमिति कौस्तुभादितोऽवगम्यते। व्याख्यासौकर्यार्थं खण्डश उपादानमिव। अर्थबन्धनादित्यनन्तरम् अर्थविप्रतिषेधात् इति सूत्रोपादानं तद्विवरणं चात्र नोपलभ्यते।

चेन्न; सादरपटुतरशिक्षितब्राह्मणार्थविज्ञानाभ्यासमहिमसंजनितसंस्कारविशेषादेव तत्प्रसिद्धेः। संस्कारोद्बोधोऽपि निरन्तरेष्वात्मीयपदार्थेषु पूर्वसमाप्तिमात्राद्ब्राह्मणवाक्यादेव सिध्येत्। न च बुद्धे बोधनमर्थवत्। बुद्धेऽप्युच्चारणमदृष्टद्वारेणोपकुरुते, बोधनं तु दृष्टं सिद्धं चेति न साधनमर्हति। ननु संस्कारातिशयाय द्वितीया बुद्धिरुत्पाद्यते। यच्चात्र सोपानत्के पादे द्वितीयोपानत्परिग्रहवदशक्यत्वं परैर्भाषितम्, पिष्टपेषणं च निदर्शितम्, सोऽपि हस्तसमालोचः, वैषम्यात्; शब्दे हि सहस्रशः पठितेऽपि प्रतिपर्यायं बुद्ध्यन्तरोत्पत्तेः; इति चेन्न; शक्यत्वेऽपि कृतकरत्वस्य दुस्त्यजत्वात्। न हि द्वितीयेन बोधेन प्रथमादधिकमुपकृतम्। अदृष्टं तूच्चारणादेव युक्तमित्युक्तम्॥ ३३॥

66. सू०—अविद्यमानवचनात्॥ १. २. ३४.॥ (पू. ४)

अविद्यमानमर्थं केचिन्मन्त्रा वदन्ति—

* चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश॥ इति।

न ह्येवंविधः कश्चित् वृषभस्संभाव्यते। यद्यपि लोकोत्तरमर्थं शब्दः प्रतिपादयेदिति साधितम्; तथाऽपि यत्रासौ यज्ञे मन्त्रः, न तत्र प्रकृतौ वा चतुश्शृङ्गत्वादिविशिष्टं कर्म तत्संबन्धि वा किंचिदुपलभामहे, यदभिधानेन प्रमाणमसौ मन्त्रः स्यात्। यदि च यज्ञानुबन्धिनि कस्मिंश्चिदर्थे मन्त्रस्यास्य विवक्षा स्यात्, स कथं समस्तशब्दार्थवित् भगवान् पतञ्जलिर्नामाख्यातोपसर्गनिपातादिरूपेण चतुश्शृङ्गतादीन् कल्पयित्वा शब्दविषयमयोजयत्। अविवक्षितार्थत्वे तु स्वेच्छया स्वाभिमते विवक्षा कल्पयितुं शक्यते। न त्वन्यथा, तथा सति विप्लावकत्वप्रसङ्गात्। एतेन संख्यासादृश्यमात्रादृत्विक्सवनादिषु शृङ्गपादादिरूपो गुणवाद इत्यपि प्रत्युक्तम्, अनुष्ठानानुपकारित्वाच्च। अविज्ञातप्रयोगप्रदेशस्यास्य मन्त्रस्य पाठक्रमात्प्रदेशक्लृप्तौ युक्तं तत एव स्वयंपतितोच्चारणार्थत्वम्। यच्च * नमस्ते अस्तु मा मा हिँसीः इत्यादिर्मन्त्रः, सोऽप्यविद्यमानवचनः। नहि तत्र हिंसा प्रक्रान्ता, येन प्रतिषिध्येत। तस्मादप्रतिषिद्धभागिनमर्थं प्रतिषेधन्नयं मन्त्रोऽपि स्यादविद्यमानवचन एव। एवमन्येऽपि॥ ३४॥

67. सू०—अचेतनेऽर्थबन्धनात्॥ १. २. ३५.॥ (पू. ५)

अचेतनं बोधयितुं केचिन्मन्त्रा अर्थं निबध्नन्ति। यथा—* ओषधे त्रायस्वैनँ स्वधिते मैनँ हिँसीः * शृणोत ग्रावाणः इत्यादयः, अनन्तरोदाहृताः * मा मा हिँसीरित्यादयश्च। न चाचेतना ओषध्यादयस्तत्प्रविष्टा वा क्षेत्रज्ञा अभिमुखीकर्तुमर्थं वा बोधयितुं मन्त्राणां पदवाक्यश्रवणादौ नियोक्तुं वा शक्यन्ते। नाप्यत्राभिमानिदेवताविवक्षा शक्या कल्पयितुम्, प्रत्यक्षसिद्धद्रव्यविषयत्वाद्विनियोगस्य। न चान्यस्य विनियोगेऽन्यः प्रकाशनीयस्स्यात्। अत उन्मत्तभाषितसमानाः कथमेते मन्त्राः प्रमाणं स्युः?॥ ३५॥

68. सू०—स्वाध्यायवदवचनात्॥ १. २. ३६.॥ (पू. ६)

* स्वाध्यायोऽध्येतव्य इति विधिमनुस्मरन्तोऽधिकारिणस्स्वाध्यायवन्न तदर्थं प्रधानमुपदिशन्ति, अपि तु स्वयं निश्चितार्थास्सन्तः सन्निहितमप्यर्थमनादृत्य यावदक्षरग्रहणं स्वाध्यायस्वरूपमेव शिष्यानध्यापयन्ति। येनाकारेणायमुपयोक्ष्यते तत्रैवायं संग्रह इत्युक्तम्। अत उच्चारणशिक्षणमुच्चारणार्थमेव। उच्चारणं च कर्मण्यपेक्षितं ज्ञानार्थत्वेऽप्य-

वर्जनीयं च । अतोऽर्थमशिक्षयद्भिः स्वाध्यायस्वरूपं शिक्षयद्भिश्शिष्टैरुच्चारणरूप उपकारोऽभिप्रेत इत्युत्प्रेक्षामहे । विध्यर्थवादयोरपि साधारणमिदं चोद्यम् । तयोरपि ह्यक्षरग्रहणपूर्वं वृद्धाः प्रवर्तयन्ति । यदा पुनर्बुभुत्सितार्थानामन्तेवासिनां विध्यर्थवादयोरर्थं व्याकुर्वते, तदाऽपि न मन्त्रभागार्थं परिसंख्याय व्याचक्षते । ततोऽक्षरग्रहणदशायामर्थावचनमात्रेण यदि मन्त्राणामविवक्षितार्थता, तुल्यं विध्यर्थवादयोरपीति शास्त्रार[म्भ एवो]म्भे त्रिपाद्यारम्भे चोपक्षिप्य परिहर्तव्यमिदं चोद्यं किं मन्त्रेषु विशिष्येदानीमभिधीयते ? एकदेशद्वारा कृत्स्नवेदाप्रामाण्यमुपपिपादयिषितमिति तदभिव्यक्त्यर्थमिदं सूत्रं [गुरुनये] संगच्छत इति चेत्; तथाऽप्येकदेशद्वारिकाणामेव पूर्वपक्षयुक्तीनामिहोपक्षेप्तव्यत्वम् । तथेह न चास्ति । अध्ययनविधेरर्थग्रहणपर्यन्तत्वेऽपि स्वशक्तेरक्षरग्रहणमात्रविश्रान्तत्वात्पूर्वमर्थानभ्यासः, नत्वर्थानादरात्; अत इदं सूत्रमसंगतम् । मैवम्, एकदेशद्वारिकाया एव युक्तेरिहाभिप्रेतत्वात् । अध्ययनदशायामेव जप्तव्यास्सन्ति केचिन्मन्त्राः, यथा *शं नो मित्रश्शं वरुणः, *सह नाववत्वित्यादयः, यथाच ब्रह्मचारिकर्तव्येष्वपि धर्मेष्वनुप्रविशन्तो मन्त्राः । नहि तेऽपि तदानीमर्थतश्शिक्ष्यन्ते, अपि त्वस्खलितमात्रादिना स्वरूपेणैव । यदि तेषु मन्त्रेषु विवक्षितार्थतयाऽर्थोऽपि तैरनुसन्धेयः, तदा कथं विद्वांसो वृद्धाः तत्तन्मन्त्रस्वरूपमिव तंतमर्थमपि शिष्यान्न शिक्षयेयुः । अत आरम्भे मन्त्राणामुच्चारणार्थत्वेऽवसिते सर्वत्रैवमिति सूत्राभिप्रायः । एवं वा सूत्रं व्याकुर्मः—स्वाध्यायाध्ययनदशायां यत्प्रकारा मन्त्रा अधीताः, न तथा प्रयोगकाले प्रयुज्यन्ते, अपि त्वर्थज्ञानानुपकारिणा नीचैस्त्वोपांशुत्वैकस्वरमात्रत्वादिभेदेन उच्चार्यन्ते । अतोऽवगच्छामस्समानन्यायतया सर्वत्र उच्चारणविशेषनियमेनैवादृष्टमिति ॥ ३६ ॥

69. सू०—अविज्ञेयात् ॥ १. २. ३७. ॥ (पू. ७)

अविज्ञानादित्यर्थः । अविज्ञेयत्वादिति वा । अर्थस्येति शेषः । अर्थप्रतीतौ जायमानायां प्रमाणमप्रमाणं वेति चिन्तावकाशः, न पुनः समुद्रघोषादिषु वर्णक्रमपाठादिषु वा । कतिचन मन्त्रा न कथंचिदर्थं बोधयन्ति । यथा—*अम्यक्सात इन्द्र ऋष्टिरस्मे इति, *सृण्येव जर्भरी तुर्फरीतू, *इन्द्रस्सोमस्य कानुका, इति । एवमविदितपदार्थवाक्यार्थानामेषां मन्त्राणां कस्मिन्नर्थे प्रामाण्यं प्रतिपिपन्महे ? उच्चारणार्थत्वे तु हुमादिवदविदितार्थैरपि तैस्तत्सिद्धिः । वस्तुतस्तेषामप्यर्थवत्तया वर्णक्रमादेर्हुमादेश्च विशेष इति चेत्, वर्णेष्वर्थमनधिगमयत्सु कथं भवांस्तेषामर्थवत्तां प्रत्यवादीः । न ह्यर्थवन्त इमे मन्त्रा इत्यनुशृणुमः । नाप्यनुमिमीमहे, योग्यानुपलम्भबाधात्, हुमादिभिरनैकान्त्याच्च । अतः ईदृशानां मन्त्राणामुच्चारणमात्रार्थत्वे तुल्यन्यायतयाऽन्येषामपि मन्त्राणां तादर्थ्यं युक्तमिति ॥ ३७ ॥

70. सू०—अनित्यसंयोगान्मन्त्रानर्थक्यम् ॥ १. २. ३८. ॥ (पू. ८)

वेदानामपौरुषेयत्वाय वेदानां प्रामाण्याय च पूर्वमनित्यसंयोगावुदाहृतौ । इह पुनर्मन्त्राणामविवक्षितार्थत्वाय मान्त्रवर्णिकस्स एव पुनरारभ्यत इत्येवं मन्यते । यथा—*किं ते कृण्वन्ति कीकटेषु गाव इत्यादयो मन्त्राः कीकटादिसंज्ञितान् जनपदनगरराष्ट्रप्रभृतीननित्यान्पदार्थान् कर्माङ्गभूतानुपाददते । तेषां चेदर्थविवक्षा, नित्येऽनित्यसंयोगविरोधाद्वेदाप्रामाण्यं प्रसज्यते । उच्चारणार्थत्वे तु नैवं दोषः । ईदृशार्थस्य प्रवाहयुक्त्या प्रागेव परिहृतत्वात् वयं नाम्रेडितमर्थमभिदध्महे । मन्त्राणां स्वप्रतिपाद्यैरर्थैः, **अनित्यसंयोगात्**—अनियतसंयोगादित्यर्थः । एकैक एव हि मन्त्रो विनियोगभेदेन तत्तदनुरूपान्नानार्थान्प्रतिपादयतीति निरुच्यते नैरुक्तैः । तत् कस्य हेतोः, ऋते मन्त्राणामविवक्षितार्थ-

त्वात् ? विवक्षितार्थत्वे वा कथं स्वार्थं जह्यात्, अन्यद्वा कथं वदेत् ? एवम् * ऐन्द्या गार्हपत्यमुपतिष्ठत इत्यादि-विनियोगबलादिन्द्रादिरूपान् स्वार्थान् परित्यज्य स्वकार्यसामर्थ्यादिनिमित्तनिर्वचनादिमुखेन गार्हपत्यादीनर्थान्मन्त्राः प्रतिपादयन्तीति व्याचक्षते । अतोऽयमनित्यसंयोगप्रभेदः । तदेवं तदर्थशास्त्रादिभिर्ज्ञापकैः प्रत्यायकैश्च युक्तिभेदैरविशेषात् सर्वत्र मन्त्रेषूच्चारणमेव विवक्षितम्, नार्थज्ञानमित्यविवक्षितार्थत्वान्मन्त्रा न प्रमाणमिति ॥ ३८ ॥

अत्र राद्धान्तमारभते—**71.** सू०—**अविशिष्टस्तु वाक्यार्थः** ॥ १. २. ३९. ॥ (सि. १)

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । व्युत्पन्नैः पदैरवगम्यमानो वाक्यार्थो वेदे लोके च समानः । तान्येव च पदानि संहत्य लोकोत्तरमर्थं प्रतिपादयितुं लोकवदेव वेदे व्युत्पत्त्यनुसारेण शक्नुवन्तीत्युक्तम् । स्वतःप्रामाण्यं च प्रागेव साधितम् । कारणदोषाशङ्का च परिहृता । ये पुनस्तदर्थशास्त्रादयः क्षुद्रोपद्रवाः, ते कारणदोषबाधकप्रत्ययरहितप्रतीतिजन्मनैव प्रत्युक्तप्रायाः । मान्त्रवर्णिकप्रतीतिः प्रमाणम्, कारणदोषबाधकप्रत्ययरहितप्रतीतित्वात्, आप्तवाक्यजन्यप्रतीतिवत्; विध्युद्देशादिवाक्यार्थप्रत्ययवत्; इति । इदमप्यविशिष्ट इत्यनेनैव सूचितम् । असिद्ध्यन्यथासिद्ध्यादिपरिहारस्तदर्थशास्त्रादिप्रत्युत्तरेणैव सेत्स्यति । एतदुक्तं भवति—तदर्थशास्त्रेणापि कर्मसु विनियुक्तैर्मन्त्रैस्तच्छेषतया तत्रतत्र किंचित्कर्तव्यम्, कर्मणां चानुष्ठानेऽर्थप्रकाशनमपेक्षितम्, मन्त्रैश्चाविहतस्वाभाविकशक्तिभिरर्थप्रकाशो जायमानो दृश्यते । अतोऽनुष्ठानोपयुक्तार्थप्रकाशनेनोपकुर्वत इति युक्तमाश्रयितुम्; दृष्टे संभवत्यदृष्टकल्पनस्यान्याय्यत्वात् । नियममात्रस्य च दृष्टाविरोधेन सिद्धेः । शक्त्यनुसारेण च विनियोगोपपत्तेः । सन्निहितस्य च वाक्यार्थप्रत्ययस्याकृतार्थप्रयोगेऽनुप्रवेशयितुं युक्तत्वात् । उच्चारणपदार्थज्ञानादेस्त्वेवमपि चरितार्थत्वात् । अचेतनसंबोधनाद्यनुपकार्यर्थप्रकाशनस्य च परिहरिष्यमाणत्वात् । अतो * बर्हिर्देवसदनं दामीत्यादिमन्त्राणां तावदविहतार्थप्राधान्यानामनाकुलं प्रामाण्यमिति ॥ ३९ ॥

अतस्त्रिभिस्सूत्रैरुदाहरणविशेषेषु पुनःश्रुतिं प्रकारान्तरेण परिहरति । * चतुर्भिरादत्त इत्यत्र चतुर्णां मन्त्राणां रूपादेवाभ्र्यादाने विनियोगः प्राप्यत इति न पुनर्विधानमर्हति । न ह्येतत्संख्याविशेषार्थं पुनःश्रवणम्, चतुष्ट्वस्यापि तेषु सिद्धत्वात् । नच निष्क्रियत्वात् क्रियाङ्गतया विशेष्टुमलम् । नापि समुच्चयः, चतुष्ट्वोक्तिप्रत्येकसामर्थ्यात्प्राप्ते विकल्पे समुच्चयस्यान्याय्यत्वात्; समुच्चयाभिधायिनश्चशब्दस्यादर्शनाच्च । अतोऽर्थपरत्वे निरर्थकमिदं पुनर्वचनम् । पक्षान्तरे त्वभ्र्यादाने प्राप्तानामेव तत्र विनियोगः प्रमाणान्तरेणाप्राप्तेश्चतुष्ट्वमप्यदृष्टार्थं गमयतीति युक्तः समुच्चय इति । तत्राह—

72. सू०—**गुणार्थेन पुनश्श्रुतिः** ॥ १. २. ४०. ॥ (सि. २)

स्वरूपादेवाभ्र्यादाने प्राप्तानामेषां मन्त्राणां पुनरभ्र्यादाने विधानम्, **गुणार्थेन**—चतुष्ट्वसंख्यारूपगुणविधानार्थम् । यद्यपि चतुष्ट्वं तेषु स्वतःसिद्धम्, तथाऽप्यभ्र्यदानार्थतया न प्राप्तमिति युक्तस्तद्विधिः । सामानाधिकरण्यलब्धगुणवैशिष्ट्यस्य कारकस्य क्रियाद्वयविधौ न कश्चिद्विरोध इत्यरुणाधिकरणे वक्ष्यते । न चात्र विकल्पप्राप्त्या विरोधः, लैङ्गिकत्वादत्र विकल्पप्राप्तेः, समुच्चयस्य श्रौतत्वात् । न चात्र समुच्चयशब्दो नास्तीति वक्तुं युक्तम्, क्रियावेषे च चतुष्ट्वस्य समुच्चयशब्दमन्तरेणापि सिद्धेः । अत एवंविधेषु पुनश्श्रुतेरप्राप्तगुणविधिपरत्वान्न तदर्थशास्त्रविरोध इत्यभङ्गुरमर्थपरत्वम् ॥ ४० ॥

ननु *इमामगृभ्णन् रशनामृतस्येत्यादिषु सामान्यलिङ्गेषु मन्त्रेषु यद्यर्थविवक्षा स्यात्, तदा *अश्वाभिधानीमादत्त इति विधानमनर्थकं स्यात्, मन्त्रलिङ्गेनैवाश्वाभिधान्या अपि रशनायाः प्राप्तत्वात्। अत्यन्ताप्राप्ते हि विधिः प्रवर्तते। तत्राह—

73. सू०—**परिसंख्या** ॥ १. २. ४१. ॥ (सि. ३)

सत्यमत्यन्ताप्राप्ते विधिः। न त्वसौ करिष्यते, अपि तु परिसंख्या। स तु सामान्यतः प्राप्तिमपेक्षतैवेति मन्त्रस्यार्थविवक्षा तदुपकारिका। अतोऽत्राश्वाभिधानीविधानं गर्दभरशनावर्जनस्य बोधनार्थमिति न पुनश्श्रुतिः। नन्वेवं स्वार्थप्रहाणं परार्थकल्पनं प्राप्तबाधश्चेति दोषत्रयं स्यात्; किमतः? गत्यन्तराभावे सोढव्यत्वात्। अत्यन्ताप्राप्तविषयविधिवत्, अपुष्कलविषयनियमवत्, पुष्कलप्राप्तैकदेशलक्षणायाः परिसंख्याया अपि लोकव्युत्पत्तिसिद्धत्वात्। लोके हि विशेषविधिरेवकारादिवन्निषेधं गमयति, विशेषनिषेधः शेषानुज्ञानम्। किंचित्प्रामाण्यमेकतः, परिसंख्यादोषत्रयमेकतः, तत्र कतरल्लघीय इति निपुणं निरूप्यताम् ॥ ४१ ॥

ननु तत्र चान्यत्र च प्राप्तावन्यतरविधानं परिसंख्यार्थमिति युक्तम्, यत्र तु तत्रैव प्राप्तिश्शब्दात्परिशेषाद्वा, तत्र *उरु प्रथस्वेति पुरोडाशं प्रथयतीत्यादौ पुनश्श्रुतिवैयर्थ्यपरिहाराय मन्त्रस्याविवक्षितार्थत्वं युक्तमास्थातुम्। तत्राह—

74. सू०—**अर्थवादो वा** ॥ १. २. ४२. ॥ (सि. ४)

वाकारो व्यवस्थितविभाषाविकल्पार्थः। पुनश्श्रुतिः क्वचिद्रशनादानादौ परिसंख्यार्था, क्वचित्पुरोडाशप्रथनादावर्थवादार्था। एतदुक्तं भवति—अप्राप्तं पुरोडाशप्रथनमेवात्र विधेयम्, न तु मन्त्रस्तत्र विनियुज्यते, सामर्थ्यादेव प्राप्तस्सन्प्रथनस्तुत्यर्थं पुनर्विधीयते। *यज्ञपतिमेव प्रजया पशुभिः प्रथयतीति प्रथनं स्तूयते। तत्रैवमाशङ्केमहि—कथं पुरोडाशः प्रथन्यजमानं प्रथयतीति। सैषा शङ्का मन्त्रलिङ्गप्रधानप्रकाशनेन निवर्त्यते। *उरु प्रथस्वोरु ते यज्ञपतिः प्रथतामिति यज्ञपतिप्रथनाशिषा हि मन्त्रेण प्रथनं क्रियते। अत इदं प्रथनमनेन मन्त्रेण क्रियमाणं यज्ञपतिप्रथनकारणं भवतीति। न चैवमसता स्तुतिः, मन्त्रोदितस्य हि फलस्यां[ग]शविषयस्यापि प्रधानाविरोधिनस्स्तुत्यर्थं पुरस्कृतस्यापि तदपेक्षितत्वेनैव परित्यागायोगात्। उक्तं च भाष्यकारैश्श्रीमद्गीताभाष्ये—*बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनामित्येतद्व्याचक्षाणैः प्रधानाविरोधिनां मन्त्रोदितफलानां विवक्षितत्वम् ॥ ४२ ॥

एवं बहुधा पुनश्श्रुतिः परिहृता। अथ क्रमनियमस्यान्यथासिद्धिमाह—

75. सू०—**अविरुद्धं परम्** ॥ १. २. ४३. ॥ (सि. ५)

यन्मन्त्रस्थानां पदानां क्रमनियमेनोच्चारणम्, तदर्थादृष्टकल्पनं वा, तन्मन्त्रस्य विवक्षितार्थत्वेऽप्यविरुद्धम्। **परम्**—अनन्तरोक्तमित्यर्थः। केवलमिति वा। क्रमनियमोच्चारणादिकं केवलम**विरुद्धम्**—पक्षद्वयसाधारणम्, न क्वचित्पक्षे पतितमित्यर्थः। अथवा **परम्**—उच्चारणादितरदर्थज्ञानम्, अदृष्टार्थोच्चारणनियमेनाविरुद्धम्। यद्वा उच्चारणमदृष्टार्थमिति वदता यतः परमेवं क्रमैरदृष्टमिति नियमितम्, तदर्थप्रत्यायनपक्षेऽप्यविरुद्धम्। एतदुक्तं भवति—दृष्टमर्थज्ञानं तावद्दुरपह्नवम्, बाधाद्यभावश्च सिद्धः, सोपयोगिता च दर्शिता, एवं स्थिते यथा क्रमनियमेनोच्चारणमदृष्टार्थं तथैव नियमयोगेन प्रत्यायनमदृष्टाय स्यादिति ॥ ४३ ॥

बुद्धे बोधनमपि नियमार्थतया समाधत्ते—

76 सू०—**संप्रैषे कर्मगर्हाऽनुपालम्भस्संस्कारत्वात्** ॥ १. २. ४४. ॥ (सि. ६)

*अग्नीदग्नीन्विहरेत्यादिसंप्रैषे बुद्धबोधनरूपस्य कर्मणो गर्हा या पूर्वमुक्ता, तस्याः, अत्र **अनुपालम्भः**—पुनर्बोधनगर्हारूप उपालम्भोऽत्र न कर्तुं शक्यत इत्यर्थः। पुनर्बोधनस्य नैरर्थक्यप्रसङ्गे हि मन्त्रस्याविवक्षितार्थताक्लृप्तिः, तत्तु सार्थकम्। तथा हि—स्वाध्यायकाले बुद्धस्येदानीं बोधनं तावन्न निरर्थकम्; तदातनधियां क्षणिकतया यावत्प्रयोगकालमनवस्थानात्। तासां संस्कारमात्राविशिष्टत्वात्, प्रयोगस्य च तदानींतनप्रयोक्तृव्यधीसाकाङ्क्षत्वात्। अथ केनचित्प्रत्ययमार्गादिना प्रयोगकालेऽपि स्मृतिस्संभवतीति पुनर्बोधननैरर्थक्यं शङ्क्येत, तदपि न, नियमार्थत्वात्। अनेनोपायान्तरेण वा प्राप्ता स्मृतिरनेनैवोपायेनेति नियम्यते। संस्कारत्वादित्यस्य पुनस्स्मृतिसंस्कारार्थत्वादित्यर्थः॥ ४४ ॥

अविद्यमानवचनं परिहरति—**77.** सू०—**अभिधानेऽर्थवादः** ॥ १. २. ४५. ॥ (सि. ७)

* चत्वारि श्रृङ्गा त्रय इत्यादिकं नाविद्यमानवचनम्, * हिरण्मयः पुरुषो हिरण्यश्मश्रुर्हिरण्यकेश इत्यादाविवाञ्जसैव विश्वसृजो रूपविशेषस्य प्रतिपादनात्। विग्रहादिमत्त्वञ्च देवतानां समर्थयिष्यते। ईदृशं च रूपमद्यापि क्वचिद्दर्शयन्ति। स्मरन्ति च वैखानससंहिताभेदकर्तारो महर्षयः। अत ईदृशस्य रूपविशेषस्य प्रतिपादकेन मन्त्रेणान्याभिधानेऽर्थवादः। मन्त्रेऽप्यर्थवादशब्दो व्युत्पत्तिसाम्याद्यथाकथंचित्सारूप्यात्तद्रूपत्वमारोप्यार्थवाद इत्यर्थकः। अत एव हि भगवान् पतञ्जलिस्स्वाभिमतं शब्दतत्त्वं स्तुवानो नामाख्यातोपसर्गनिपातादिमुखेन संख्यानिवेशात्सारूप्यारोपणेनेममेव मन्त्रमनुसन्दधानः पुनरस्य विवक्षितं स्वेष्टमर्थं कल्पयामास। अस्य च मन्त्रस्यायमर्थः—* यज्वभिर्यज्ञपुरुषो वासुदेवश्च सात्त्वतैरित्यादिप्रसिद्धो योऽसौ यज्ञपुरुषः अस्य चाग्नेये पुरुरूपे चत्वारि श्रृङ्गाणि, त्रयः पादाः, द्वे शीर्षे, सप्तहस्ताश्च। त्रिधा बद्धः—अग्नित्रयरूपेण यायजूकैर्बद्धः। क्रियादिरूपेण वा त्रिधाऽवस्थितः। वृषभः—वृषभसमानावयवत्वात्; नरसिंहमहावराहादिवत्। अर्थिनां पुरुषार्थान्वर्षतीति वा। रोरवीति—श्रुतिमुखरमुखत्वात्। तथा च श्रूयते—* तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इति। महाभारते यज्ञानुबन्धिरूपान्तरप्रादुर्भावे पठ्यते—* ओङ्कारमुद्गिरन्वक्त्रात्सावित्रीं च तदन्वयादिति। महोदेवः—महान् सर्वातिशायी महनीय इति वा; यद्वा महः—उत्सवः, यज्ञरूपशास्त्रोयोत्सवाधिदैवतत्वात्, देवः—जगद्व्यापारादिभिश्शास्त्रीयैश्च स्वाराधनरूपैः कर्मभिर्दीव्यन्। मर्त्यान्—यज्ञाधिकारिणः पुरुषान्। आविवेश—* ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतमितिन्यायेन परिकरानध्यतिष्ठदिति। नन्वपां सूक्ते पठितोऽयं मन्त्रोऽब्दैवत्यः प्राप्तः, *समुद्रादूर्मिरित्यपां सूक्तमेकादशर्चकमिति स्नाने शौनकेन विनियुक्तश्चेति नैतादृशार्थपर इति चेन्न; पुरुषस्यैवापाम्पतित्वात्। यथोक्तं **स्नानयाज्ञवल्क्ये**—

* प्रणवं वा त्रिरभ्यस्येत्स्मरेद्वा विष्णुमव्ययम्। विष्णोरायतनं ह्यापस्स ह्यपाम्पतिरुच्यते ॥ इति।

अतः स्नानेऽस्य विनियोगोऽप्युपपन्नः। अपां च विष्णुना सनाथतया पावनतमत्वादिलक्षणा प्रशस्तिर्दर्शिता भवति। न चान्यस्य कस्यचिदप्स्वरूपानुबन्धिन एवं रूपमस्ति। अतोऽत्र रूपविशेषवत्परमात्मप्रतिपादकत्वं नानुपपन्नम्।

यत्पुनः * अचेतनेऽर्थबन्धनात् इत्युक्तम्, तत्र साक्षादुत्तरस्य शारीरके समर्थनीयत्वादुक्तन्यायेनार्थवादत्वस्य सुवचत्वाच्च न पृथक्सूत्रेण पर्यभाषीत्। अचेतने हि चैतन्यारोपणेन स्तुतिः। यथा चेतनेषु तत्तत्सामर्थ्यद्वारा तत्तत्कार्य-

सिद्धिः, एवमचेतनेष्वपीति चेतनत्वोपचारः। साक्षादुत्तरं तु—सर्वं हि वस्तुजातं तत्तदभिमानिदेवताविशेषैरधिष्ठितं तत्तदात्मकत्वेन एकया वाचा निर्दिश्यते, अतस्तत्संबोधनादिकमुपपन्नमिति। * मैनँ हिँसीरित्यादिकमपि तत्तद्द्रव्यशरीरकचेतनपीडाहेतुत्वपरिहाराभिप्रायेण ॥ ४५ ॥

अर्थप्रतिषेधं परिहरति—

78. सू०—**गुणादविप्रतिषेधस्स्यात्** ॥ १. २. ४६. ॥ (सि. ८)

अयमर्थः—यत्र निपुणनिरूपणे विरोधो नास्ति, तत्र न किंचित्कर्तव्यम्, यथा—* एक एव रुद्र इत्यादौ। अत्र हि न रुद्रनानात्वं व्युदस्यते। न च रुद्रेतरन्निषिध्यते। नापि रुद्रतुल्यमितरन्नास्तीत्युच्यते। अपि तर्हि कर्मविशेषस्यैव रुद्रदेवताकत्वमुच्यते, * आखुस्ते रुद्र पशुस्तं जुषस्व इति वाक्यशेषानुसारात्। तथा च शाबरम्—* एकरुद्रदैवत्ये [कर्मणि] एको रुद्रः, शतरुद्रदैवत्ये शतं रुद्रा इत्यविरोध इति। यत्र तु मुख्यार्थे विरोधः स्फुटः, यथा—* अदितिर्द्यौरदितिरन्तरिक्षमित्यादौ, तत्र **गुणादविप्रतिषेधस्स्यात्**—एकस्मिन्नेव, नरपतिरेव सर्वलोकः, त्वमेव मे माता पिता च इत्यादाविवोपचारादविप्रतिषेधस्स्यात्। यत्पुनः—* पुरुष एवेदँ सर्वमित्यादि, तत्र विप्रतिषेधादिप्रसङ्गाभावः स्थाने समर्थयिष्यते। अर्थवादोक्तगुणवादसमानयोगक्षेमत्वेऽपि मन्त्रेषु पुनरभिधानं मन्दमतीनां प्रतिसन्धानार्थम् ॥ ४६ ॥

यदुक्तं स्वाध्यायस्वरूपवदर्थज्ञाने संरम्भो न दृष्ट इति, तत्राह—

79. सू०—**विद्यावचनमसंयोगात्** ॥ १. २. ४७. ॥ (सि. ९)

स्वाध्यायग्रहणकालेऽर्थज्ञानाकरणं तदानीं कर्मभिरसंयोगात्। न ह्यध्ययनदशायामेव ज्योतिष्टोमादीनि कर्माण्यनुष्ठेयदशापन्नानि, येन तदानीमेव तत्तन्मन्त्रैरर्थप्रकाशने प्रयतेमहि। पश्चात्तु मीमांसमानैः भाव्यनुष्ठानोपकारायार्थज्ञानं संपाद्यते। न च तत्पूर्वं शक्यमिति शास्त्रादौ दर्शितम्। अथ तदानीमपि किमर्थमर्थज्ञानं नाभ्यस्यन्तीति चेत्; पटुतरज्ञानाभावादिति वदामः। भवादृशैस्तु पटुतरज्ञैरर्थज्ञानवत् स्वाध्यायोऽपि सकृदेव गृह्यत इति किं तत्र न चोदयसि? अतो विषयानुरूपमधिकारानुरूपं च द्वयोरपि संभव एवेति ॥ ४७ ॥

यत्तु केषुचिन्मन्त्रेष्वर्थज्ञानानुदयादप्रामाण्यमुक्तम्, तत्राह—

80. सू०—**सतः परमविज्ञानम्** ॥ १. २. ४८. ॥ (सि. १०)

* सृण्येव इत्यादिमन्त्रेष्वपि प्रतिपाद्यत्वेन सत एवार्थस्य केवलमव्युत्पन्नानामविज्ञानम्। न च तावता निरर्थकत्वम्, पुरुषाणां प्रेक्षाव्युत्पत्त्योस्तारतम्यादनियमेन सर्वेष्वपि वाक्येष्वविज्ञातार्थतया प्रामाण्यभङ्गप्रसङ्गात्। अत एव स्वयमपरिज्ञानात्सर्वैरप्यविज्ञेयत्वं कल्पयितुं न शक्यम्। जानन्ति तावन्महर्षयः, तदुपदेशात्पारम्पर्याच्च वयमपि तथा ॥

81. सू०—**उक्तश्चानित्यसंयोगः** ॥ १. २. ४९. ॥ (सि. ११)

प्राक्तनानित्यसंयोगविवक्षायां प्रागेव प्रवाहयुक्त्या परिहार उक्त इत्यर्थः। जनपदनगरादयोऽपि श्रुतिसिद्धास्तत्तन्नामादिविशिष्टाः प्रवाहानादयः। यदा तु मन्त्राणामनियतार्थयोगित्वमनित्यसंयोगोऽभिमतः, तदा विध्युक्तोऽयमनित्य-

संयोगो विधिबलादेव स्वीकार्य इत्यभिप्रायः। एतदुक्तं भवति—एकैको मन्त्रो यत्रयत्रानेकेष्वर्थेषु विनियुज्यते, तत्र सर्वत्र प्रकाशनाय प्रयतताऽपि यत्र मुख्यार्थो न बाध्यते, तत्र शक्त्या प्रवर्तते, तद्बाधे चोपचारतोऽवयवशक्त्या वेति सममत्र समाधानमिति ॥ ४९ ॥

एवमविवक्षितार्थताहेतवस्सर्वे परिहृताः, अथ विवक्षितार्थत्वे हेतवश्च सन्तीत्युच्यते—

82. सू०—लिङ्गोपदेशश्च तदर्थवत् ॥ १. २. ५०. ॥ (सि. १२)

*आग्नेय्याग्नीध्रमुपतिष्ठत इत्यादिषु या अग्न्यादिदेवता तत्प्रतिपादनसामर्थ्येन च लिङ्गेन तदुपस्थानोपदेशो मन्त्रस्यार्थविवक्षायामेवोपयुज्यते। योऽयं तद्धितप्रत्ययोपदेशः, सोऽपि तदर्थवन्मन्त्रेषु तदर्थेष्वेव। न ह्यतदर्थेषु मन्त्रेषु तद्दैवतकस्तद्धितः, या तेनोच्यते सा देवतेति वा निरुच्यते। प्रधानतयोक्तिश्चात्र विवक्षिता। अन्यथैकैकेषु मन्त्रेषु नानादेवताप्रसङ्गमात्रेण विशेषनिर्देशभङ्गप्रसङ्गात्। प्राधान्यं चार्थविवक्षामन्तरेण न घटत इति प्रमाणतयाऽभ्युपगतविनियोजकवाक्यानुसारेण मन्त्राणां विवक्षितार्थत्वसिद्धिरिति ॥ ५० ॥

83. सू०—ऊहः ॥ १. २. ५१. ॥ (सि. १३)

ऊहश्च दृश्यमानो मन्त्राणामर्थविवक्षां साधयति। प्रकृतावुद्दिष्टानां मन्त्राणां विकृतौ तत्तदुचितः प्रकृतिप्रत्ययाद्यूहो दृश्यते। यदि च प्रकृतावविवक्षितार्था मन्त्रा उच्चारणमात्रेणादृष्टार्था भवन्ति, विकृतावपि स्वयमविकृतास्सन्तः किमदृष्टाय न घटन्ते? अथ प्रकृतावर्थप्रकाशनेनोपकुर्वन्ति, तदा यथोपदेशमुच्चारितैर्विकृतावर्थप्रकाशनासंभवाद्वचनाभावे चैन्द्रीन्यायानवतारादूहोऽर्थवान्। ननु ऊहविधायकं न किंचिद्वाक्यं दृश्यते। न्यायेन चेत्साध्येत, मन्त्राणां विवक्षितार्थत्वे न्यायेनोहः, न्यायसिद्धोहबलाच्च विवक्षितार्थतेत्यन्योन्याश्रयणम्। मैवम्, श्रुत्यैवोभयप्राप्तेः। तथा हि—*न माता वर्धते न पितेत्यूहप्रतिषेधस्तावत्प्रसक्तिमन्तरेण न घटते, विशेषनिषेधस्य शेषाभ्यनुज्ञाविषयत्वात् अन्यत्रोहोऽवगम्यते। कथमयमूहप्रतिषेधः? इत्थम्, न ह्यत्र मात्रादीनामर्थानामवयवपुष्ट्यादिरूपा वृद्धिर्निषिध्यते, प्रत्यक्षविरोधात्। अतः प्रकृतमन्त्रस्थानां मात्रादिशब्दानां द्विवचनबहुवचनयोस्संभवन्ती वृद्धिरूहात्मा निषिध्यते। अयं चोहो मन्त्रस्य विवक्षितार्थतया सर्ववस्तुविशेषणभूतमातापित्राद्युपादित्सायां प्रसक्तस्सन् प्रतिषेधमर्हति। ननु *न माता वर्धत इत्यादौ न स्वयमूहः प्रतिषिध्यते, किंतु परार्थेषु मातृप्रभृतिषु संबन्धिभेदात् भिद्यमानेषु न्यायप्राप्तमनूह्यत्वं सिद्धमेवानूद्यते; अत ऊहस्य कथं श्रौतत्वमिति स्थितं मिथस्संश्रयणम्। तन्न, निष्प्रयोजनानुवादासंभवात्। न्यायप्राप्तानूहानुवादस्यानूहन्यायागोचरेषु स्थलेषूहस्य शास्त्रीयताज्ञापनमेव प्रयोजनम्। तेन च प्रकृतौ विवक्षितार्थतामध्यवस्यामः। किंच * अन्यदैवत्यः पशुराग्नेय्येवमनोताकार्येति न्यायगोचरोऽनूहस्संकीर्त्यते। इदमपि च प्रकृतावर्थविवक्षायामूहप्राप्तावेव स्यात् ॥ ५१ ॥

84. सू०—विधिशब्दाच्च ॥ १. २. ५२. ॥ (सि. १४)

इतश्चार्थवन्तो मन्त्रा दृश्यन्ते। अयमस्य मन्त्रस्यार्थ इति विधानं ब्राह्मणं प्रायशोऽधीमहे—*इषे त्वोर्जे त्वेत्याह, इषमेवोर्जं यजमानो दधातीत्यादिकम्। ब्राह्मणोक्तस्य चार्थस्य वैशद्याय मन्त्रास्संवाद्यन्ते—*तदेषाऽभ्युक्ता, *तदुक्तमृषिणेत्यादिभिः। अप्रसिद्धं च मन्त्रस्थं पदं प्रसिद्धैः पर्यायैरर्थतोऽभिव्यक्ताः(?)। अवयवविभागादिना च नि-

वैक्ति निरुक्तं नामाङ्गम् । अविवक्षितार्थत्वे मन्त्राणां कथमेतत्सर्वमुपपनीपत्स्यते । अयमभिप्रायः—मन्त्राणामर्थवत्त्वं व्युत्पत्त्यनुगुणया श्रुत्यैव कण्ठोक्तम् । अविवक्षितार्थता तु व्युत्पत्तिमर्यादामवधीरयद्भिस्तदर्थशास्त्रादिभिः कल्प्या । न ह्यर्थवत्त्ववदविवक्षितार्थत्वे कश्चिच्छब्दः । अतस्तदर्थशास्त्रादयस्सर्वे श्रुत्यैवापहृतविषया इति नाविवक्षितार्थत्वं साधयितुं प्रभवन्तीति । तस्मान्मन्त्राः प्रत्यक्षाद्यविरुद्धेष्वपूर्वेष्वर्थेष्वभिधेयोपचारेण वा प्रमाणमिति सिद्धम् ॥

ब्राह्मणैर्विधिशेषैस्तु मन्त्रार्थप्रतिपादकैः । अर्थप्रणाड्या मन्त्राणामङ्गत्वकार्युपकारिता ॥
विध्येकवाक्यताशून्या मन्त्राः क्वचिदपि स्थिताः । तथाऽपि स्वार्थबोधेनानुष्ठानस्योपकुर्वते ॥
स्वापेक्षितार्थबोधेन प्रयोगक्षणभाविना । मन्त्रेण सहसा लब्धे नान्यो हेतु[र्गवेष्यते] रपेक्ष्यते ॥
अतोऽध्ययनसंसिद्धमन्त्रार्थस्मृतिपूर्वकम् । अनुष्ठेयं तदर्हैस्तदिति शास्त्रार्थनिश्चयः ॥
परापरसमाख्यातदेवतावैभवेषु च । समर्थयिष्यमाणेषु सफलैर्यमितिक्रिया ॥
यद्वृत्तप्रमुखैर्येषां विधिशक्तिर्न हन्यते । तेषां विधिपरत्वं च मन्त्राणामिह सिध्यति ॥ ५२ ॥

॥ इति मन्त्राधिकरणम् ॥ ४ ॥

पुमर्थशासने विभोः प्रशासनानुवर्तिनि । प्ररोचनप्रकाशनप्रकार एवमाहितः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु

॥ सेश्वरमीमांसाख्ये धर्ममीमांसाभाष्ये प्रथमस्याध्यायस्य द्वितीयः पादः ॥

(एतावदेवोपलभ्यते)

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः।

श्रीमते हयग्रीवाय नमः। श्रीमते रामानुजाय नमः।

श्रीमते निगमान्तमहादेशिकाय नमः।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेदान्ताचार्यविरचिता

॥ न्यायपरिशुद्धिः ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी। वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

॥ प्रत्यक्षाध्याये प्रथमाह्निकम् ॥

पत्युः संयमिनां प्रणम्य चरणौ तत्पादकोटीरयोः संबन्धेन समिध्यमानविभवान् धन्यांस्तथाऽन्यान् गुरून्।

शुद्धं संश्रितबादरायणतनोर्नारायणस्योक्तिभिः श्रीमान् वेङ्कटनायकः स्थितिपदं निर्माति नीतेः शुभम् ॥

विद्यास्थानेषु धर्म्येषु गण्यते न्यायविस्तरः। स च विप्लावितस्तैस्तैस्ततोऽत्र परिशोध्यते ॥

॥ गौतमसूत्रबहिष्कारपक्षः ॥

यद्यपि कथंचिदाक्षपादं सत्पक्षे निक्षेप्तुं शक्यम्; न च कणभक्षपक्षनिक्षेपवत् क्लेशः; नापि तत्कर्ता गौतमस्तामसेषु परिपठ्यते; नापि च विप्रलम्भकत्वख्यातिः; तथाऽपि ब्रह्मसूत्रकारादिबहिष्कृतत्वान्नातीव वयमाद्रियामहे। न खल्वार्षत्वादिभिस्तदादरः, अतिप्रसङ्गात्।

प्राज्ञानां प्रथमेनैव गुरुणा हि स्वयं पुरा। लोकायतमतं प्रोक्तं लोकविप्लवकारणम् ॥

अथवा पितामह एवात्र प्रमाणम्, य इन्द्रविरोचनयोश्चार्वाकमतमुपदिष्टवान्। तथा गौतमोऽपि संभाव्यते। अथापि,

* काणादशाक्यपाषण्डैस्त्रयीधर्मो विलोपितः। त्रिदण्डधारिणा पूर्वं विष्णुना रक्षिता त्रयी ॥ इति स्मृतेः,

* बहवः पुरुषा राजन् सांख्ययोगविचारिणः। नैत इच्छन्ति पुरुषमेकं कुरुकुलोद्भव ॥

समासेन तु तद्व्यासः पुरुषैकात्म्यमुक्तवान् ॥

इति महाभारतोक्तेश्च युक्तं तत्तद्बहिष्कारः; इह तु न तथेति चेन्न, तुल्यन्यायतया वचनस्योपलक्षणार्थत्वात्। न खलु तद्वा तादृग्वेति कश्चिद्विशेषः। यद्यपि काशकुशावलम्बनन्यायेन पक्षान्तरादाधिक्यमस्य पक्षस्य, तथाऽपि न तद्वेदान्तसंनिधौ; न खलु मशकाद्बलिष्ठोऽपि मातङ्गः कण्ठीरवमुपरुणद्धि ॥

* यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद। कुतार्किकाज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया निबन्धः ॥

इति वाक्यमक्षपादपक्षपातेनोक्तमित्यनास्थेयम् ॥ उक्तं च पूर्वाचार्यैः—

* काणादमाक्षपादं वा कापिलं तन्त्रमेव वा । तन्त्राण्येतानि सर्वाणि न तन्त्राण्यात्मनिर्णये ॥ इति ॥

अत एव हि * एतेन शिष्टापरिग्रहा अपि व्याख्याताः इति सूत्रे भाषितम्—एतेन—वेदापरिगृहीतसांख्यपक्षक्षपणेन, शिष्टाश्च ते वेदापरिगृहीताः कणभक्षाक्षपादक्षपणकभिक्षुपक्षाः क्षपिता वेदितव्याः इति । न च सूत्रनिबद्धं सर्वं विद्यास्थानमिति नियमो दृष्टः ; न चैक एवैकस्य विद्यास्थानस्य सूत्रकृदित्यपि वा ऋषिरित्येव वा राजाज्ञा, अन्यैरपि च तत्करणदर्शनात् ॥

१. प्रमाणशब्दस्य भावे करणे च व्युत्पत्तिः । २. एवं [अत्र] च प्रमैव प्रमाणमित्येके । ३. प्रमाकरणमेवेत्यपरे । ४. तयोरन्यतरदित्यन्ये । ५. यथावस्थितव्यवहारानुगुणं ज्ञानं प्रमाणम् । ६. यदज्ञानात् संसारो यज्ज्ञानात् तन्निवृत्तिस्तत् प्रमेयं मुमुक्षुभिः प्रकर्षेण मेयत्वात् । ७. सामान्यतो वा प्रमाविषयः प्रमेयम् । ८. तद्द्विविधं द्रव्याद्रव्यभेदात् । ९. आगन्तुकधर्माश्रयो द्रव्यम् । १०. अतथाभूतमद्रव्यम् । ११. द्रव्यं द्वेधा जडमजडमिति । १२. जडं च द्वेधा प्रकृतिः काल इति । १३. अजडं च तथा प्रत्यक् परागिति । १४. प्रत्यगपि द्विविधं जीव ईश्वर इति । १५. परागपि तथा धर्मभूतज्ञानं नित्यविभूतिश्चेति । १६. अथवा द्रव्यं द्विविधमात्मानात्मभेदात् । १७. त्रेधा वा भोक्तृभोग्यनियन्तृश्रुत्यनुसारात् । १८. षोढा वा त्रिगुणकालजीवेश्वरशुद्धसत्त्वमतिभेदात् । १९. अस्वयंप्रकाशं जडम् । २०. स्वयंप्रकाशमजडम् । २१. मिश्रसत्त्वाश्रयः प्रकृतिः । २२. कालः क्षणलवादिव्यवहारहेतुः । २३. स्वस्मै भासमानं प्रत्यक् । २४. परस्मै भासमानं पराक् । २५. परतन्त्रचेतनो जीवः । २६. स्वतन्त्र ईश्वरः । २७. अर्थप्रकाशो बुद्धिः । २८. प्रकृतिव्यतिरिक्तत्वे सति सत्त्वाश्रयो नित्यविभूतिः । २९. अद्रव्यमनेकधा सत्त्वशब्दादिवैचित्र्यात् । ३०. एकं वेतरविशिष्टं प्राधान्यतः प्रमेयं [परं] ब्रह्म । ३१. इतरेषां स्वनिष्ठब्रह्मैकनिष्ठत्वात् । ३२. तस्यैव च तथात्वेन मुमुक्षुभिः प्रकर्षेण मेयत्वश्रुतेः । ३३. अव्यवस्थितव्यवहारकारणं ज्ञानं संशयः । ३४. अयथाव्यवहारकारणं ज्ञानं विपर्ययः । ३५. संस्कारमात्रजं ज्ञानं स्मृतिः । ३६. तद्व्यतिरिक्तं ज्ञानमनुभवः । ३७. पुरुषप्रवृत्त्युद्देश्यं प्रयोजनम् । ३८. व्याप्त्यधिगमस्थानं दृष्टान्तः । ३९. प्रामाणिकत्वाभिमतैः परिगृहीतोऽर्थः सिद्धान्तः । ४०. परार्थप्रमाणप्रयोगवाक्यावान्तरवाक्यान्यवयवाः । ४१. व्याप्याङ्गीकारेण व्यापकानिष्टप्रसञ्जनं तर्कः । ४२. तर्कानुगृहीतप्रमाणपूर्वकतत्त्वावधारणं निर्णयः । ४३. वीतरागकथा वादः । ४४. पक्षद्वयसाधनवती विजिगीषु कथा जल्पः । ४५. प्रतिपक्षस्थापनहीना तु सा वितण्डा । ४६. हेत्वङ्गैकदेशविकला हेत्वाभासाः । ४७. अविवक्षितशब्दार्थारोपेण दूषणं छलम् । ४८. स्वव्यापिदूषणं जातिः । ४९. कथकाशक्तिलिङ्गं निग्रहस्थानम् । इत्येतादृशानि वाक्यानि किं न सूत्राणि स्युः ?

तदिह संक्षिप्तं लक्षणादिवाक्यं सूत्रम् ; तदुदाहरणादिवाक्यं तु भाष्यादिकमिति विभाव्य संतोष्टव्यम् । न च पूर्वप्राबल्यव्यवस्था, तत्पूर्वसंभवात्, वार्तिकस्य चानवतारप्रसङ्गात्, व्याकरणादिष्वन्यथाकरणस्वीकाराच्च । न च जैमिनेः प्रमाणलक्षणादिष्वौदासीन्यमात्रेण गौतमोक्तेषु काश्यपोक्तेषु वा निःशेषानुमतिसिद्धिरिति मन्तव्यम्, अन्यपरतया लोकप्रसिद्धोपजीवनात्, परकल्पिततटाकोपजीवनवत् । कर्मकाण्डवृत्तिकारादयोऽपि हि लोकसिद्धां प्रमाणा[दि] व्यवस्थां यथायथमन्यथा संजगृहुः । अतो यावदिह युक्तियुक्तं तावदुपजीव्यते, न खलु तटाकस्थः पङ्कोऽप्यपङ्किलबुद्धिभिस्तदवगाहिभिरुपजीव्यते । अतः सिंहवनगुप्तिन्यायेन यथावस्थितन्यायानुगृहीतं वेदं वेदानुमतं च न्यायमनुसरामः, न पुन-

न्यायमात्रम् ॥ यत्तु * ज्ञातसंबन्धस्य इत्यादिग्रन्थमुपादायानन्तरमुक्तं **श्रीविष्णुचित्तैः**—* व्याप्तिधीगर्भानुभवोऽनुमानमित्यर्थः, न्यायशास्त्रे तु तद्विशेषनिर्णयः इति—तदपि तन्निरूपणाधिकृतविद्यास्थानख्यापनपरम् । प्रमाणादिसूत्रमुपादाय व्याचक्षाणैस्तत्पक्षनिष्ठैरपि पूर्वैः क्वचित् सूत्राणि निराकृतानि । तन्न्यायस्य नास्मासु सर्वभारः, नापि दण्डनिवारणम् ॥ ततश्च,

यथालोकं यथावेदं लौकिके वैदिकेऽपि च । यो वक्ता [वेत्ता] स परिग्राह्यः प्राक्तनोऽद्यतनोऽपि वा ॥
विवक्षितार्थावैशद्यं व्याकुलत्वमपूर्णता । उल्लोकतेत्यमी दोषा गुणकोटौ जडैः कृताः ॥
भगवन्**नाथमुनिभिर्न्यायतत्त्व**समाह्वया । अवधीर्याक्षपादादि [पादादीन्] न्यबन्धि न्यायपद्धतिः ॥
तदर्वाग्भिस्तथाऽऽचार्यैर्यथेष्टं मतमास्थितैः । प्रणिन्ये बहुधा तैस्तैः प्रमाणादिविचारणा ॥

तदयं भाष्यस्वरससिद्धो बहिष्कारपक्षः ॥

॥ गौतमसूत्रस्वीकारपक्षः ॥

अङ्गीकारकाङ्क्षिणामक्षपादीयमप्यस्मदुक्तैकान्ततया स्थास्यति ; तथैव स्थापयिष्यामः । अतो वयमपि महताम्युक्तार्थतात्पर्यकल्पनेन नापराध्येम, न्यूनाधिकविरुद्धव्यपदेशादीनामलक्षणलक्षणोक्तीनां चाध्याहारान्यपर्याभ्यां तद्भक्तैरपि निर्वाहात् । तथाऽस्मिन् यत्र स्फुटः श्रुतिस्मृतिशारीरकविरोधः, स उद्देशतो निरुह्यते ॥ यत्तावत्सूत्रितं प्रथमाध्याये—* घ्राणरसनचक्षुस्त्वक्छ्रोत्राणीन्द्रियाणि भूतेभ्यः इति ; अत्र ज्ञानेन्द्रियपञ्चकोपादानं नेन्द्रियान्तरप्रतिक्षेपार्थम् ; मनसः पृथक्प्रमेयतयोद्देशात्, अनन्तरमेव च * युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् इति लक्षणकरणात्, अभ्युपगमसिद्धान्तन्यायेन च तदिन्द्रियत्वपरीक्षणात् । अतश्चोक्तेन समानयोगक्षेमयुक्तिप्रमाणकः कर्मेन्द्रियवर्ग उपलक्षणीयः, * प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः इति सूत्रे वाचः कण्ठोक्तेः पाण्यादिचतुष्टयस्य शारीरव्यापारकरणतया सूचनादिति । शारीरके तु * सप्तगतेर्विशेषितत्वाच्च इति पूर्वपक्षमुपक्षिप्यासाधयच्च हस्तादीनामपीन्द्रियत्वं भगवान् **बादरायणः**—* हस्तादयस्तु स्थितेऽतो नैवम् इति । * भूतेभ्यः इति च नोपादानाभिप्रायम्, अहंकारोपात्तानामाप्यायकभूतविवक्षयाऽपि तदुपपत्तेः । तथा च **वेदार्थसंग्रहे**—* एवमाहंकारिकाणामिन्द्रियाणां भूतैश्चाप्यायनं **महाभारत** उच्यते इति समाधानम् ऋष्यन्तरवाक्यस्यापि समानन्यायस्य निर्वाहार्थम् । परस्परविरुद्धप्रमाणवाक्येषु तात्पर्यविशेषपरिकल्पनया परिहार एव हि पण्डितकृत्यम् । अनित्यमनोवादिभिरपि हि * अन्नमयं हि सोम्य मनः इति श्रुतिराप्यायनपरतयैव योज्या । तुल्यमिदमन्यत्रापीति ।

यत्तु—* बाधनालक्षणं दुःखम्, * तदत्यन्तविमोक्षोऽपवर्गः इति, तत्र दुःखात्यन्तनिवृत्तेरपवर्गत्वं सर्वाङ्गीकृतम् । न च तत्रानन्दः श्रौतः कण्ठोक्त्या प्रतिषिध्यते । तदभिप्राये चानन्यथासिद्धं किमपि न लिङ्गं पश्यामः । अत एव हि **भूषणमते** नित्यसुखसंवेदनसंबन्धसिद्धिरपवर्गे साधिता । एतेन * तस्मात्सर्वदुःखविमोक्षोऽपवर्गः इति चतुर्थाध्यायवाक्यमपि निर्व्यूढम्, तत्राप्यानन्दनिषेधाभावात् । यच्च शारीरकद्वितीयाध्यायविरुद्धमिह द्वितीयाध्याये अवयविसमर्थनमिवाभाति, तदपि तदेकार्थं योजयितुं शक्यम् । तथा हि—* न चैकदेशोपलब्धिरवयविसद्भावात् । साध्यत्वादवयविनि संदेहः । सर्वाग्रहणमवयव्यसिद्धेः । धारणाकर्षणोपपत्तेश्च । सेनावनवद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् इत्येतानि हि तत्सूत्राणि ; न तानि विरुध्यन्ते, सेनावनादिव्यावृत्तावयव्यारम्भकतया तदसमवायिकारणत्वाभिमतावस्था-

विशेषापन्नः संघातविशेष एवावयविशब्देन निर्दिश्यत इत्यविरोधात्, तावतैव उपलम्भव्यवहारविशेषादेश्चरितार्थत्वात्। अतीन्द्रियाणुवचनमपि प्रदीपावयवानामिवैन्द्रियिकाणामेवावस्थाविशेषेणातीन्द्रियत्वाभ्युपगमादविरुद्धम्। अव्यक्तमेव हि त्रिगुणद्रव्यमवस्थाविशेषाद्व्यक्तं भवतीत्यागमिकाः। प्रत्येकमुपलम्भायोग्यानामपि संहतिविशेषरूपावस्थाभेदादैन्द्रियिकत्व-तत्तारतम्यादिकं हिमानीचूर्णपुञ्जादिष्वनारब्धावयविषु लोकसिद्धम्। उपमानाख्यप्रमाणान्तरसमर्थनं तु न्यायैकदेशिभि-रेवोपमानस्यानुमानान्तर्भावप्रतिक्षेपमात्रपरतया निर्व्यूढम्। यच्च—* पूरणप्रदाहपाटनानुपलब्धेश्च संबन्धाभावः इति शब्दार्थसंबन्धाभावमुपक्षिप्य परिहरता * शब्दार्थव्यवस्थानादप्रतिषेधः; न सामयिकत्वाच्छब्दादर्थसंप्रत्ययस्य इत्यादिना सामयिकत्वमुक्तम्, तदपि संप्रतिपन्नसामयिकत्वद्वारा अनुमानादिविलक्षणसंबन्धविशेषख्यापनार्थमिति योज्यम्; अनादि-निधनाविच्छिन्नसंप्रदायवेदवर्तिनां पदानां मन्वादिवचनविरुद्धसाङ्केतिकत्वोपपादनक्लृप्त्यसंभवात्। यच्च * मन्त्रायुर्वेद-प्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् इति, एतदप्यनादिनिधनस्यैव वेदस्य प्रतिकल्पमीश्वरेणाप्ततमेन यथापूर्वं प्रवर्तन-मभिसंधायेति सुगमम्।

वर्णानित्यत्ववर्णनं तु न श्रुत्यादिविरुद्धम्; प्रत्युतानुकूलमेव। **शारीरकदेवताधिकरणे** वर्णानित्यत्वमभ्युप-गम्यैव हि *अत एव च नित्यत्वम्, * समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च इति वेदनित्यत्वं साधितम्। यत्तु **जैमिनीयशब्दाधिकरणे** वर्णनित्यत्वसमर्थनं व्याचख्युः, स तु व्याख्यातॄणामेवापराधः, असाङ्केतिकवाचकाकार-नित्यत्वपरत्वेनान्यपरत्वात्तस्याधिकरणस्य। यच्च द्वितीयाध्यायान्ते * व्यक्त्याकृतिजातयस्तु पदार्थः इत्युक्तम्, तत्रापि न वैशेषिकाभ्युपगतजातिस्वीकारे लिङ्गं पश्यामः। न ह्यत्र द्रव्यगुणादिपदार्थपरिसङ्ख्यानं क्रियते, * ते विभक्त्यन्ताः पदम् इति प्रतिपादितपदवाच्यप्रदर्शनपरत्वात्। अनन्तरं च तिसृणामेव[वं] लक्षणमाह—* व्यक्तिर्गुणविशेषाश्रयो मूर्तिः, * आकृतिर्जातिलिङ्गाख्या, * समानप्रसवात्मिका जातिः—इति। इह तु [वस्तुनो] वस्तुस्वरूपनिरूपितस्वरूपविशेषक-धर्मस्वरूपनिरूपकधर्मविषयतया यथासंभवं योज्यम्। अतो न द्वितीयाध्यायेऽपि वेदान्तविरोधः। तृतीये * दर्शन-स्पर्शनाभ्यामेकार्थग्रहणात् इत्यादिकं बाह्यान्तरिन्द्रियादिनिरूपणादिकं चात्यन्तोपयुक्तम्। न च मनोनित्यत्वादिकं तत्र सूत्रितम्; येन तदुत्पत्त्या [तदुत्पत्तिवा] दिश्रुतिकोपः। यच्चात्रोक्तम्—* गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकं श्रुतिप्रामाण्याच्च इति, एतदेव यथाश्रुतं सिद्धान्ततया स्वीकार्यम्। यदपि * गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथि-व्याः अप्तेजोवायूनां पूर्वंपूर्वमपोह्याकाशस्योत्तरः इति गुणव्यवस्थापनम्, तत्र तु तथैवाभ्युपगमेऽपि न वस्त्वन्तर-विरोधः। तथाऽप्याकाशादिषु शब्दादेरेकद्वित्रिचतुष्पञ्चक्रमेण पुराणेषु पाठात्, आकाशानुप्रवेशा [दाकाशा] दन्यत्र शब्द इति निर्वाहे वाय्वाद्यनुप्रवेशादुत्तरोत्तरेषु स्पर्शादिरिति निर्वोढुं शक्यत्वात्, उपलम्भान्वयव्यतिरेकाभ्यां व्यव-स्थापनस्यापि समत्वात्, गन्धादिसूत्रं पृथिव्यास्ते सन्त्येवेत्ययोगव्यवच्छेदेन निर्वाह्यम्। * आकाशस्योत्तरः इत्यत्र तु तस्य स एवेत्यन्ययोगव्यवच्छेदेन। कतिकति चैवं सूत्राणि क्लिष्टानि परैरपि निरुह्यन्ते।

यच्च, स्वगुणान्नोपलभन्त इन्द्रियाणि कस्मादिति चेत्, * सगुणानामिन्द्रियभावात् इत्यत्र * न शब्द-गुणोपलब्धेः इत्युक्तम्; तत्रापि श्रोत्रेन्द्रियस्य आकाशाप्यायितत्वादाप्यायकगुणस्य तद्गुणतां पटनैल्यपानीयसौरभादिवत् प्रकल्प्योक्तमुत्तरम्। अथवा यथागममाहङ्कारिकत्वमिन्द्रियाणामजानतश्चोद्ये भूताप्यायितेन्द्रियपक्षे [भूतेन्द्रियवादे] स्थित्वै-वेदमुत्तरं गूढाभिप्रायेण दीयत इति। एतदुक्तं भवति—भवता किमिन्द्रियगुणोपलम्भाभाव उच्यते, किं वा तदाप्या-

यकगुणोपलम्भाभावः ? पूर्वत्राङ्गीकार एवोत्तरम् , शब्दादीनामनिन्द्रियगुणत्वात् ; उत्तरत्र व्यभिचार इति । अतो न वेदान्तविरोधप्रसङ्गः । चतुर्थेऽध्याये प्रवृत्तिरागद्वेषादिनिरूपणम् , आत्मनित्यत्वादिना प्रेत्यभावादिप्रतिपादनम् , अनिमित्त-भावोत्पत्तिसर्वानित्यत्वसर्वनित्यत्वादिनिराकरणं [निरूपणं] चात्यन्तानुगुणम् । अवयविप्रसङ्गश्च प्रागुक्तन्यायेन नेतव्यः । पञ्चमस्तु जातिनिग्रहस्थानमात्रोपक्षीणो न क्वचित्तत्त्व उपकरोति । व्यवहाराङ्गविमर्शसौन्दर्यासौन्दर्यादिकं तु वास्तवलक्ष्य-लक्षणयुक्त्यादिपरामर्शवैज्ञानिकैरर्थस्थितिमात्रानुसारादनादरणीयम् । यत्पुनरर्वाग्भिरक्षचरणपञ्चाध्याय्यां कुशकाशावलम्बने कणचरणकथां निवेश्य नैगमिक्यः पदव्यो निरुध्यन्ते, तत्र तु नूनं स एव गौतमः स्वयमन्तः प्रहसति ।

॥ इति स्वीकारपक्षः ॥

यद्वा नातिबहिष्कारो नातीव च परिग्रहः । सांख्यादिवदिहापि स्यात् समाधिस्तौषतण्डुलः ॥
उपजीव्यबहुत्वेन विद्यास्थाननिवेशनम् । विरुद्धांशैकविषया सूत्रादिषु बहिष्क्रिया ॥

अधिकारिविवेचनम् ॥ नियताधिकारश्चायं न्यायविस्तरः ।

अधिकाराच्च नियतः स्यादयं न्यायविस्तरः । अप्रत्यवायो माहात्म्याद्दयालुः शास्त्रम[ादिशत्]ब्रवीत् ॥
सर्वाधिकारमित्येतदसमीक्षितभाषितम् । कथमागमवृत्तान्तमनधीतागमा विदुः ॥
निषिद्धे प्रेरयंस्तान्वा कथं कारुणिको भवेत् । न च शक्या नरशिरःपावित्र्याद्यनुमाक्षतिः ॥
विहायागममक्षा [दिधिया] यैर्द्विधा तत्रापि विप्लवः । श्रुत्यां ह्यनधिकारित्वात्तदन्यत्राव्यवस्थितेः ॥
धर्मक्षोभानुमाभङ्गे कथं शूद्रादयः क्षमाः । अथ त्रैवर्णिकैरुक्ते त्वन्यो विश्वसितीत्यपि ॥
स्वयं न्यायविचारेऽस्य फलत्यनधिकारिता [म्] । प्रत्यक्षानुमयोर्यत्र नित्यं वेदानपेक्षता ॥
तत्रापशूद्रभाष्योक्ता शूद्रादेरप्यधिक्रिया । चतुर्दशापि स्थानानि भगवान् धर्मविद्ययोः ॥
न स्प्रष्टव्यानि शूद्रैरित्यब्रवीदाश्वमेधिके । * अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ॥
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश । यान्युक्तानि मया सम्यग्विद्यास्थानानि भारत ॥
उत्पन्नानि पवित्राणि पावनार्थं तथैव च । तस्मात्तानि न शूद्रस्य स्प्रष्टव्यानि कथञ्चन ॥ इति ॥

तस्मादेतानि त्रैवर्णिकैरध्येतव्यानि । तत्र ब्राह्मणेन विद्याप्राप्तये धर्मानुष्ठानाय चाधिगन्तव्यानि । क्षत्रिय-वैश्याभ्यां धर्मानुष्ठानायैव । तथा शङ्खेन विद्यास्थानान्यनुक्रम्योक्तम्—* एतानि ब्राह्मणोऽधिकुरुते । स च वृत्तिं दर्शयतीतरेषाम्—इति । एवमेव धर्मशास्त्रसंग्राहकैः समर्थितम् । ततश्च येषां कर्मब्रह्ममीमांसावसेयतत्त्वहितरूपप्रमेय-चिन्ताधिकारः, तेषामेव [तात्पर्यपर्य] तत्पर्यवसायितया धर्मविद्यास्थानाभिमतन्यायविस्तराधिकार इति सिद्धम् ॥

प्रयोजननिरूपणम्

प्रत्यक्षादिप्रमाणेन शु [सि] द्धिः पदतदर्थयोः । मानमेयादिनियतिर्निर्दोषोक्तेश्च मानता ॥
ग्रावप्लवनवाक्यादावान्यपर्यं विरोधतः । चित्रापशुफलत्वादावबाधद्वारसंग्रहः ॥
अनुवादविधानादिचिन्ता प्राप्त्यादिपूर्विका । प्रत्यक्षादिष्वसिद्धेषु न कल्पे [रन्]त कथञ्चन ॥
एवमाद्युपयोगेन मुनिभिर्न्यायविस्तरः । वेदानुग्रहणाद्धर्मविद्यास्थानतयोदितः ॥

आगमाख्यप्रमाणे तु संशुद्धे न्याय [संशुद्धिर्न्याय] विस्तरात् । तद्विशेषस्य मीमांसा साधयेद्धर्ममानताम् ॥
प्रमेयस्यापि संशुद्धिरन्ततो ब्रह्मचिन्तनात् । इह तस्य निवेशस्तु तादर्थ्यादिप्रसिद्धये ॥

प्रमाणमेवास्य शास्त्रस्य प्राधान्यतो विषयः । तत्र प्रेक्षावदधिचिकीर्षासिद्ध्यर्थम्—प्रमेयतत्त्वज्ञानं हानोपादानद्वारा निःश्रेयसहेतुः, तच्च सपरिकरात् प्रमाणात्—इति परम्परया प्रयोजनज्ञापनाय प्र [मेयप्र] दर्शनमात्रमिहाभिमतम् । अतः प्रधानविषयतया, प्रमेयादिसाधकतया च प्रमाणं प्रमेयादपि पूर्वमुच्यते । तत्र व्यवच्छेद्यत्वाङ्गत्वादिमुखेन संशयादयोऽपि चतुर्दश यथायथं निरूप्यन्ते । न च षोडशत्वे निर्बन्धः, [तथात्वे, अतथात्व] विपर्ययत्वाद्युपाध्यन्तराधीनसंग्रहविभजनाभ्यां न्यूनाधिकोद्देशस्यापि शक्यत्वात् उपयोगानुपयोगाविशेषाच्च । एतावदेव गौतमस्यापि हृदयमिति ॥

प्रमाणाप्रमाणव्यवस्थापनम् ॥ अस्ति तावदिदं प्रमाणमिदमप्रमाणमिति प्रसिद्धो लौकिकपरीक्षकव्यवहारघण्टापथः । तदनादरे तु निराश्रयतया परीक्षणस्याप्यनुदयः ॥

व्यवहारो हि जगतो भवत्यालम्बने क्वचित् । न तत्सामान्यतो नास्ति कथंता तु परीक्ष्यते ॥
सामान्यनिश्चितार्थेन विशेषे तु बुभुत्सिते । परीक्षा ह्युचिता स्वेष्टप्रमाणोत्पादनात्मिका ॥
न सर्वस्याप्रमाणत्वं स्वपक्षस्य स्वतः क्षतेः । न सर्वस्य प्रमाणत्वं स्वपक्षस्यान्यतः क्षतेः ॥
सिद्ध्यसिद्ध्योः स्वपक्षस्य सिद्धा लोकव्यवस्थितिः । तत्सिद्ध्यसिद्ध्योस्त्वत्पक्षो न कथंचन सिध्यति ॥
प्रमाणेन प्रमाणस्य बाधः स्वव्याहतेर्हतः । अप्रमाणेन तद्बाधे साधनं च ततो न किम् ॥
अप्रमाणात् प्रमाणाद्वा मानसिद्धिर्न चेन्न तत् । यतः प्रमाणतस्तस्य सिद्धिः स्वपररक्षिणी ॥
बाधाबाधव्यवस्थाऽपि मानतः स्याद्व्यवस्थितात् । अन्यथा त्वव्यवस्थाया न व्यवस्थेत्यवस्थिते[ति]ः ॥
सर्वत्रानिर्णये न स्तः संशयोत्पत्तिनिर्णयौ । यथा तत्कोटितत्सिद्धिस्तथाऽन्यत्रापि युज्य [दृश्य] ते ॥
धर्मिसाधारणाकारकोटीनां पूर्वनिश्चये । असावयमयं वेति ह्याविर्भवति संशयः ॥
सर्वत्र संशयस्तावन्न सर्वस्यापि दृश्यते । सर्वं संदिग्धमिति ते निपुणस्यास्ति निश्चयः ॥
संशयश्च न संदिग्धः संदिग्धाद्वैतवादिनः । दूरं गत्वापि दुर्वारः संशये निर्णयस्तव ॥
मानामानविभागेऽतः सामान्येन व्यवस्थिते । क्वाचित्कसंशयोच्छित्त्यै लक्षणं संप्रचक्षते ॥

तत्र व्युत्पत्तिविवक्षाभेदात् प्रमितिं तत्करणं च यथेच्छं प्रमाणमाहुरित्यवोचाम, आश्रयप्रामाण्यस्यानादेशिकत्वात् । * आप्तप्रामाण्यात्—आप्तोक्तत्वहेतोः प्रामाण्यादित्यर्थः । न हि वक्तृप्रामाण्यं वाक्यप्रामाण्य उपयुज्यते लौकिकवाक्येषु; किंतु कारणदोषाभावः । द्विधाऽपि प्रमितिरेव शोध्या ॥

प्रमालक्षणपरीक्षणम् ॥ तत्रास्मदीया एव केचिदन्यथाख्यातिमिच्छन्तः स्मृतेः प्रामाण्यमनिच्छन्तः सम्यगनुभवः प्रमेति लक्षयन्ति; उभयमिच्छन्तः, यथार्थज्ञानं प्रमेति ; उभयमनिच्छन्तः, अनुभूतिः प्रमेति । एवंप्रायाणि च वाद्यन्तरोक्तानि लक्षणानि । वयं तु ब्रूमः—यथावस्थितव्यवहारानुगुणं ज्ञानं प्रमेति ।

यथार्थख्यातिमख्यातिमन्यथाख्यातिमेव वा । इच्छद्भिर्न विमन्तव्यमिदं लोकानुसारतः ॥
स्मृतिमात्राप्रमाणत्वं न युक्तमिति वक्ष्यते । अबाधितस्मृतेर्लोके प्रमाणत्वपरिग्रहात् ॥

बुद्धागमादित्यागे च न हेतुः स्मृतिमूलता । विशुद्धस्मृतिमूलेऽपि मानवादौ प्रसङ्गतः ॥
भ्रान्तिं प्रमातो भिन्दन्तो न चाहुः स्मृतिमानताम् । स्मृतित्वमेव हि व्यक्तमप्रामाण्यं भवन्मते ॥
पीतशङ्खभ्रमादौ च न ह्येतदु [ह्येवमु] पपद्यते । चक्षुषैव हि शङ्खादेः पीतिमादेश्च तत्र धीः ॥
ततश्च प्रतिपत्तौ वा व्यवहारोदयेऽपि वा । तथाभावान्यथात्वाभ्यां प्रमाभ्रान्तिव्यवस्थितिः ॥
विपर्ययादेर्व्यावृत्तिरेवमेव हि सिध्यति । यत्किंचिदन्यथात्वं हि वैपरीत्यमिती [मपी] ष्यते ॥
आत्मख्यात्यादिवादेष्वप्यन्यथात्वमवारितम् । भ्रमप्रवृत्तिबाधादेरन्यथा न हि संभवः ॥
एवं सत्यन्यथाधीस्तत्सामग्री वाऽपि लाघवात् । अयथाव्यवहारस्य हेतुरि [त्ये] त्यवशिष्यते ॥
सर्वैरप्यन्यथाख्यातिर्दुस्त्यजत्वाल्लघीयसी । तद्वादिनाऽप्यवर्ज्यत्वात् ततोऽप्यख्यातिलाघवम् ॥
स्वारस्यमन्यथाख्यातावख्यातौ लाघवं स्थितम् । इति दर्शयितुं भाष्ये द्वि [तौ] तयं तदनु [श्रि] ज्झितम् ।
यन्नाथमुनिमिश्राद्यैःआचार्यैर्यथार्थख्यातिसाधनम् । तल्लोकबुद्ध्यनारोहाद्वैभवं केचिदूचिरे ॥
मानाद्रूप्यादिसत्त्वेऽपि तयोरन्यतरद्ध्रुवम् । कार्याक्षमत्वाग्रहणात् तत्क्षमत्वग्रहेण वा ॥
ख्यात्यन्तराणां दोषास्तु तत्तत्सिद्धान्तशीलने । स्वयमेवोन्मिषन्त्येव संग्रहात् किंचिदुच्यते ॥

तत्रात्मख्यातौ तावत्—

अन्यद्विज्ञानमस्तीति धीरन्यविषया न वा । आद्येऽर्थस्यापि तद्वद्धीरन्यत्रैकैव धीर्भवेत् ॥
सन्तानान्तरविज्ञानं स्वसन्ताने क्षणान्तरम् । या धीः साधयते सा हि स्वतो बाह्यं विगाहते ॥
सहोपलम्भनियमः संविदो ग्राह्यलक्ष्म च । [भेदेऽप्यत्रैव] बोधेऽप्यर्थ इवेत्येवं ज्ञानार्थैक्यं न तद्भवेत् ॥
दोषादिहेतुजालस्य मिथ्यात्वेऽपि यथेष्यते । अधिष्ठानस्य मिथ्यात्वेऽप्यनिवार्यस्तथा भ्रमः ॥
ततो माध्यमिकस्यैव पक्षस्तत्रावशिष्यते । न च तत्रापि निस्तारः सर्वथाऽनुपपत्तितः ॥
असत्त्वं लौकिकं ब्रूषे लोकोत्तरमथापि वा । न निषेधो निरुपधिः पूर्वत्रा [न्त्यं न] न्यत्र धीपदम् ॥
चतुष्कोटिविमुक्तं च तत्त्वं प्रामाणिकं न वा । पूर्वत्र तावती सत्ता न चेत् तद्धीरसन्मतिः ॥

अन्येषां च निरधिष्ठानख्यातौ—

[त] अत्रासदेव भवतामत्रेति ख्यायते न वा । आद्ये सिद्धमधिष्ठानं द्वितीये ख्यात्यपह्नवः ॥
किं च स्वनेत्रनिष्ठ्यूतं तिमिरं तिमिरार्दितैः । केशस्तबकसादृश्यात् तथा भात्येवमीदृशाः ॥
यद्यप्यविद्यमानोऽर्थो विद्यमानतया स्फुरेत् । तथाऽप्यसावधिष्ठानं स्वदेशादौ मितो हि सः ॥
इदंत्वेन प्रतीतेऽर्थे तदारोपं परे विदुः । तस्मिन्निदंत्वारोपस्ते फलतस्तुल्यता द्वयोः ॥

अनिर्वचनीयख्यातौ—

अनिर्वाच्यतया वस्तु निरुच्येत न वा त्वया । आद्ये विरोधो विविधो द्वितीयेऽसन्मतस्थितिः ॥
सदसद्व्यतिरेकोऽपि विरुद्धो यदि गृह्यते । सदसद्रूपता किं नु प्रतीता [तन्न] तु न गृह्यते ॥
अनुष्णाशीतवत् तुच्छाद्ब्रह्मणश्चातिरेकिता । साध्येत ख्यातिबाधादेर्यदि सिद्धं तदत्र नः ॥
न च विश्वस्य बाधोऽपि स्वरसादुपजायते । अप्रतिष्ठितयुक्त्या तु बाधो ब्रह्मापि संस्पृशेत् ॥

नाशात् सदितरत्वं च नाशकाले यदीष्यते । स्वकाले यदि बाधः स्यान्नाशस्याप्यनिरूपणम् ॥
नित्यत्वेन श्रुतानां च केषां चिन्न हि नाशिता । भागासिद्धस्ततो हेतुर्न चैक्यं नाशबाधयोः ॥

निर्विषयख्यातौ—

विषयालीकभावादौ ख्यात्यन्तरपरिग्रहः । अनुल्लेखस्तु रूप्यादिधीरित्युक्त्या निबर्हितः ॥

निगमनम् ॥ ततश्चात्रान्यथाधीर्वा तद्धेतुमतिरेव वा । भ्रान्तिर्वस्तुविरूपस्य व्यवहारस्य कारणम् ॥

॥ इति न्यायपरिशुद्धौ प्रत्यक्षाध्याये प्रथममाह्निकम् ॥

॥ अथ द्वितीयमाह्निकम् ॥

तदिहान्यथाख्यातिपक्षे विपर्ययस्य संशयस्य च व्यवच्छेदार्थम् *यथावस्थितव्यवहारानुगुणं ज्ञानम् इति प्रमाणलक्षणे यथावस्थितादिविशेषणम् । अख्यातिपक्षेऽपि तत्सामग्र्यनुप्रविष्टं ज्ञानं तत्तच्छब्देन व्यपदिश्यते । तच्च तत्राप्रमाणमिति लोकसिद्धत्वाद्व्यवच्छेद्यमेव । तत्रापि प्रत्येकांशे याथार्थ्यं न विहन्यते ॥

विपर्ययनिरूपणम् ॥ तत्राद्ये पक्षे अन्यस्य अन्यथाध्यवसायो विपर्ययः । द्वितीये तु पक्षे सामान्यतो धर्मिस्फुरणे सति अप्रतिपन्नतद्विरोधविरुद्धविशेषाध्यवसाय इति । स चायमनेकविधः—एकानेकविरुद्धविशेषस्फुरणात् । तत्र एकविशेषस्फुरणं यथा—पीतः शङ्ख इत्यादि । अनेकविशेषस्फुरणं यथा—एकमेव भिन्नमभिन्नं चेत्याद्यनेकान्तवादिनाम्, प्रपञ्चः सद्विलक्षणोऽसद्विलक्षणश्चेत्याद्यद्वैतवादिनाम् । परस्परविरुद्धानेकविशेषवत ईदृशस्य विपर्ययस्य संशयाद्भेदो मिथो विरोधाभिमानविरहेण समुच्चिताध्यवसायः । धर्मविरोधे परस्पराविरुद्धानेकविशेषस्फुरणं यथा—विपुलत्वैकत्वविशिष्टे चन्द्रे अल्पत्वद्वित्वादिग्रहः । विपर्ययमेव धर्मान्तरधर्म्यन्तरभेदादन्यथाख्यातिविपरीतख्यातिभेदेन क्वचिद्व्यवहरन्ति । यथा पीतशङ्खरज्जुसर्पभ्रमौ । तयोश्च रजस्तमसी मूलमिति गीयते—

*यया धर्ममधर्मं च कार्यं चाकार्यमेव च । अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥
अधर्मं धर्ममिति या मन्यते तमसा वृता । सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ इति ॥

यद्यपि रज्जुसर्पादिभ्रमे रज्जुत्वादिधर्मविपरीतसर्पत्वादिधर्माध्यास एव; तथाऽपि स्वरूपनिरूपकधर्मत्वेनान्तरङ्गतया धर्मिवैपरीत्यव्यपदेशः । श्वैत्यादेस्तु निरूपितस्वरूपविशेषकत्वमेव । विवरणे त्वेवमुक्तम्—त्रिविधमज्ञानम्—स्वरूपाज्ञानम्, अन्यथाज्ञानम्, विपरीतज्ञानमिति । स्वरूपाज्ञानं नाम वस्तुनोऽप्रतिपत्तिः । अन्यथाज्ञानं वस्तुनो वस्त्वन्तरतया भानम्; यथा शुक्तेः रूप्यतया । विपरीतज्ञानं तु यथावत् वस्तुनि भासमाने युक्तिभिस्तस्यान्यथोपपादनम्; यथा—ज्ञातृतया अहंत्वेन चात्मनि भासमानेऽपि कुयुक्तिभिरस्य भ्रान्तितोपपादनं कुदृशाम् इति । अधर्मेन्द्रियदोषदुस्तर्काभ्यासदुर्व्याप्त्यनुसंधानविप्रलम्भकवाक्यश्रवणादिभिस्तत्त्वाग्रहसहकृतैर्विपर्ययस्य यथासंभवमुद्भवः ॥

संशयनिरूपणम् ॥ सामान्यधर्मिस्फुर[ग्रह]णे सति अप्रतिपन्नतद्विरोधप्रतिपन्नमिथोविरोधानेकविशेषस्फुरणं संशयः । यथा—ऊर्ध्ववस्तुमात्रग्रहणे सति तद्विरोधितयाऽननुसंधीयमानयोर्मिथः स्फुटविरोधयोः स्थाणुत्वपुरुषत्वयोः स्फुरणम्—अयं स्थाणुर्वा पुरुषो वेति । मिथो विरोधाग्रहणे तयोर्विकल्पो न स्यात् । तत एव *डोलावेगवदत्र स्फुरणक्रमः इत्येके, एकस्मिन् युगपदन्योन्यप्रतिक्षेपस्य धीविरुद्धत्वात् । अत्र *चैतन्यस्य विषयेण दृढसंयोगो हि निश्चयः । तस्यैव बहु-

भिर्युगपदद्दढसंयोगः संशयः इत्यात्मसिद्धिग्रन्थोऽपि न विरुद्धः ; इतरथा ज्ञानार्थयोर्दृढादृढसंश्लेषनिरूपणानुपपत्तेः । युगपदिति तु शैघ्र्यमात्रपरम् । यौगपद्याभ्युपगमेऽपि अदृढत्वं परस्परप्रतिक्षेपप्रकारविशेष एव ; अन्यथा अयमूर्ध्वो वा स्थाणुर्वेत्यादिसंशयप्रसङ्गः । यद्यप्यविरुद्धेष्वपि केषुचिदधर्मादिमूलकविरोध [केषुचिदविरोधा] ग्रहणात् केषांचिदीदृशोऽपि संशयः संभवति ; यथा—आत्मा ज्ञानं वा ज्ञाता वेति, ज्ञनं धर्मो धर्मि वेत्यादि ; तथाऽप्याभिमानिकं परस्परप्रतिक्षेपित्वं तत्राप्यस्त्येव । अस्य च समानधर्मविप्रतिपत्तिभ्यामेवासाधारणकारणाभ्यामधर्मादिसहिताभ्यां यथासंभवमुद्भवः । तदुक्तं तत्त्वरत्नाकरे—* कश्चैष संशयः कतिविधश्च ? एकस्मिन् धर्मिणि विरुद्धानेकविशेषावभासः संशयः ; स च द्विविधः इत्यादिना । तत्र समानधर्मः साधारणो धर्मः । तज्जनितो यथा—ऊर्ध्वत्वाविशेषात् स्थाणुर्वा पुरुषो वेति । अगृह्यमाणबलतारतम्यविरुद्धानेकज्ञापकोपस्थापनमिह विप्रतिपत्तिः । सा च सजातीयविजातीयाभासरूपद्वित्रिचतुरादिज्ञापकभेदाद्बहुप्रकारा । प्रत्यक्षतदाभासविप्रतिपत्तेः संशयो यथा—चक्षुषा समुखं प्रतिभाति दर्पणतलम्, स्पर्शनेन त्वन्यथा ; किमिदं समुखं निर्मुखं वेति । अनुमानतदाभासविप्रतिपत्तेर्यथा—धूमवत्त्वात् पर्वतोऽग्निमान्, निरालोकत्वादनग्निरित्यत्र साग्निरनग्निर्वेति । श्रुतिविप्रतिपत्तेर्यथा—भेदाभेदव्यपदेशाभ्यां जीवो ब्रह्मणो भिन्नोऽभिन्नो वेत्यादि । वादिविप्रतिपत्तेर्यथा—वैशेषिकौपनिषदवाक्यद्वयश्राविणो मध्यस्थबुद्धेः किमिन्द्रियाणि भौतिकानि, आहंकारिकाणि वेति । एवं पामरादिवाक्यविप्रतिपत्तेरपि—नद्यास्तीरे [पञ्च] फलानि सन्ति, न सन्ति वेत्यादि । प्रत्यक्षानुमानविप्रतिपत्तेर्यथा—चक्षुषा पीतशङ्खभ्रमे शङ्खत्वाच्च सितत्वानुमाने, किमयं शङ्खः पीतः सितो वेति । प्रत्यक्षागमविप्रतिपत्तेर्यथा—किमहमर्थः स्थूलोऽणुर्वेति । अनुमानागमविप्रतिपत्तेर्यथा—किं परमाणूपादानं जगत्, उत ब्रह्मोपादानमिति ; एषा दिक् । केचित्तु विप्रतिपत्तिशब्दमात्रे मुह्यन्तो वादिविप्रतिपत्तिमेव विप्रतिपत्तिं मन्यन्ते, तदयुक्तम्, विशेषाभावात् । यदुक्तं प्रज्ञापरित्राणे—

* साधारणाकृतेर्दृष्ट्याऽनेकाकारग्रहात्तथा । विपश्चितां [च विमतेः] विवादाच्च त्रिधा संशय इष्यते ॥ इति ;

तदपि नूनं परानुकारमात्रम्, द्वितीयतृतीययोरैकराश्यात् ग्राहकावान्तरभेदस्यातिप्रसङ्गित्वात् अप्रयोजकत्वाच्च । अत्र चानेकाकारग्रहो नानाकारग्रहो विवक्षितः ; न त्वनेकव्यावृत्तासाधारणाकारग्रहः ; अनन्तरम् *अर्थेष्वेष्वविशेषेण द्व्याकारग्राहिधीद्वयम्, इत्यादिना तस्यैवोदाहरणात् । असाधारणधर्मादपि केचित् संशयमाहुः ; यथा—गन्धवत्त्वात् पृथिवी नित्या अनित्या वेत्यादि । अत्र गन्धवत्त्वस्य नित्यात्मादिव्यावृत्तेः कृतकत्वादिवदनित्यत्वस्मारकत्वम्, अनित्याबादिव्यावृत्तेर्निरवयवत्वादिवन्नित्यत्वस्मारकत्वमिति विरुद्धविशेषद्वयान्वितसमानधर्मस्येव तदुभयव्यावृत्तासाधारणधर्मस्यापि संशयहेतुत्वमुपपन्नमिति । तदयुक्तम् ; नहि तत्र गन्धवत्त्वादिना संशयोत्पत्तिः, अपि तु व्यतिरेकनिरूपणविलम्बात्प्रागेव गन्धादिविशिष्टद्रव्यस्य नित्यानित्यसाधारणतया भासमानैर्द्रव्यत्वादिभिरेव । तत्रान्यतरशिरोनिर्णिनीषया विशेषकधर्मचिन्तायां तु गन्धवत्त्वमुभयानन्वितत्वादुभयोरप्यनिष्कर्षकमित्येतावदेव चिन्त्यते । केवलव्यतिरेकिभङ्गे चैतद्विशदं भविष्यति । गन्धवत्त्वात् पृथिवी नित्या वा अनित्या वेति तु यदा कश्चिद्व्यवहरेत्, तत्रापि गन्धवत्त्वं नित्यत्वानित्यत्वयोरन्यतरस्य प्रयोजकं न वा इत्येव संदेहः । सोऽपि धर्मत्वादिलक्षणसमानधर्मादेव । अथ नित्यव्यावृत्तधर्मवत्त्वादनित्यत्वम्, अनित्यव्यावृत्तधर्मवत्त्वाच्च नित्यत्वं पुरस्कृत्य नित्या अनित्या वेति संशेते ; तदाऽपि हेतुभूतधर्मद्वयनिमित्तोऽयं संशयः । न ह्येक एवात्र हेतुः । गन्धस्तु तत्र सामान्यरूपस्तटस्थः ; न तु हेतुः । विप्रतिपत्तिमपि केचित् समानधर्म एवान्तर्भावयन्ति । यथा हि ऊर्ध्वत्वमुभयसाधारणम्, तथा वादिपरिगृहीतत्वादेरपि साधारणत्वात् विमतिविषयस्य धर्मिणो वा सामान्य-

वेषस्य तदुभयसाधारण्यादिति। तथाऽपि साधारणधर्मस्य सहानुभूतस्थाणुत्वपुरुषत्वस्मारकत्ववत् विप्रतिपत्तेरपि समानधर्मोन्नीतिनिरपेक्षाया एव तदुपजीव्यतया तत्पूर्वभाविन्याः साक्षात्तद्विशेषस्मारकत्वसिद्धेर्द्वैधमुक्तमस्माभिः ॥

पुनश्चायं द्वित्रिचतुरादिशिरोधिकरणभेदाद्बहुविधः; यथा—अयं स्थाणुर्वा पुरुषो वेति, घटः सत्योऽसत्यो निर्वचनीयोऽनिर्वचनीयो वेत्यादि। तथा इमौ स्थाणू वा पुरुषौ वा, एते पदार्थाः सत्या असत्या निर्वचनीया अनिर्वचनीया वेत्यादि। यस्तु द्वयोरन्यतरस्य चोरत्वे सिद्धे अयं चोरः अयं वा चोर इति संदेहः, स तु अयं चोरो न वा इत्येवंरूपसंशयद्वयसमाहारः। यद्वा यश्चोरः, सः अयम् अयं वा इत्येक एव। अथवा चोरत्वमेतन्निष्ठम् एतन्निष्ठं वेति। यद्यप्युभयव्यतिरिक्तपुरुषचोरत्वाभावे तयोरन्यतरस्याचोरत्वे वा तात्पर्यान्निर्णयगर्भत्वम्, तथाऽपि उभयोरन्यतरविशेषनिर्णयाभावात् तस्मिन्नंशे संशय एव। न चैकस्यापि ज्ञानस्य संशयनिर्णयात्मताविरोधः, सर्वस्मिन्नपि संशये धर्म्यंशादौ निर्णयस्य दुस्त्यजत्वात्। पुनर्द्विविधोऽयम्—अन्यतरकोटिपरिशेषयोग्यत्वतदयोग्यत्वभेदात्। पूर्वो यथा—स्थाण्वात्मके वस्तुनि स्थाणुः पुरुषो वेति। उत्तरस्तु पलालकूटे द्विरदो गिरिशिखरं वेति। तत्र निरूपकाणां प्रायशः पूर्व एव भवति। तेनैव च प्रवृत्तस्य पाक्षिकोऽर्थलाभः। यद्वा निरीहस्यैव कदाचित् द्वितीयेन संशयेन विपर्ययेण च प्रवृत्तस्य दैवात् तदातनार्थसंनिपातेनाभिमतलाभ इति। पुनरपि इमौ संशयविपर्ययौ सामान्यधर्मिणो विशेषाणां चानुभूयमानत्वस्मर्यमाणत्वादिभेदात् बहुविधावूहनीयाविति। किंसंज्ञकोऽयं वृक्ष इत्येवमादिरूपोऽनध्यवसायो नामान्यो ज्ञानविशेष इति केचित्; तदसारम्, तस्य संज्ञादिविशेषसंदेहसमनन्तरभावितद्विशेषबुभुत्सात्मकत्वात्। अथवा अवच्छेदकादर्शनादनवच्छिन्नकोटिविशेषः संशय एव। ऊहस्तु प्रायः पुरुषेणानेन भवितव्यमित्यादिरूप एककोटिसहचरितभूयोधर्मदर्शनादनुत्कटान्यकोटिकः स एव। प्रायः पुरुषेण भवितव्यमिति पुरुष एवेत्यभिप्रायश्चेत् यथोचितं प्रत्यक्षानुमानादिष्वनुप्रवेशः। तर्करूपमूहं तु अनुमाने वक्ष्यामः ॥

त्रिविधं प्रमाणम्—प्रत्यक्षानुमानशब्दभेदात्। भगवता **मनुना**ऽप्युक्तम्—

* प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्। त्रयं सुविदितं कार्यं धर्मसिद्धिमभीप्सता ॥ इति ॥

आह च भगवान् **शौनकः**—* दृष्टानुमानागमजं ध्यानस्यालम्बनं त्रिधा। इति। भाष्यकारेण च प्रत्यक्षादित्रयं स्वशब्देनोपादाय *प्रमाणसंख्याविवादेऽपि सर्वाभ्युपगतप्रमाणानामयमेव विषय इति न केनापि प्रमाणेन निर्विशेषवस्तुसिद्धिः इत्यन्येषामनादरः कृतः। सर्वाभ्युपगतप्रमाणानामिति च पराभ्युपगममात्रं द्योतयति, तत्र प्रतिवादिनः षट्प्रमाणाभ्युपगमात्। प्रत्यक्षानुमानागमानामेव च मिथो भेदो **वेदार्थसंग्रहे** विशदमुपपादितः। यत्तु *मत्तः स्मृतिर्ज्ञानमपोहनं च इत्यत्र **भाष्यम्**—*ज्ञानमिन्द्रियलिङ्गागमयोगजो वस्तुनिश्चयः इति, तत्रापि योगजस्य प्रत्यक्षस्य प्राधान्यात् पृथग्व्यपदेशः। अन्तर्भावं च वक्ष्यामः। उक्तं च **श्रीविष्णुचित्तैः प्रमेयसंग्रहे**—* प्रमाणसंख्याविवादेऽपीत्यत्र त्रिप्रमाणत्वं भाष्योक्तम् इति। भाष्ये च केषुचित् कोशेषु यथार्थख्यातिसमर्थनदशायाम्—*अथवा किमनेन बहुनोपपादनप्रकारेण। प्रत्याक्षानुमानागमाख्यं प्रमाणजातमागमगम्यं च निरस्तनिखिलदोषगन्धमनवधिकातिशयासंख्येयकल्याणगुणगणं सर्वज्ञं सत्यसङ्कल्पं परं ब्रह्माभ्युपगच्छतां किं न सेत्स्यति? किं नोपपद्यते? इत्यादिः पाठो दृश्यते। यद्यपि स्मृतिरपि यथार्था प्रमाणमिति वक्ष्यते, तथाऽपि प्रत्यक्षादिमूलतया तदविशेषात् पृथगनुक्तिः। उक्तं च **तत्त्वरत्नाकरे**—* प्रत्यक्षादिमूलानां स्मृतीनां स्वस्वमूलेऽन्तर्भावविवक्षया प्रमाणत्रित्वाविरोधः। चतुष्ट्वे च वैदिकानुवादो दर्शितः इति। स चाय-

मनुवादः पूर्वोपात्तः—* स्मृतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम् इति प्रत्यक्षाद्यविशेषेण वेदानुवादाच्च इति। **प्रज्ञापरित्राणे** तु स्मृतिप्रामाण्यानभ्युपगमेऽपि ज्ञानस्य तावत् करणभेदाच्चातुर्विध्यमेवोक्तम्—

* तत्रेन्द्रियार्थसंबन्धो लिङ्गशब्दग्रहौ तथा। संस्कारोन्मेष इत्येते संविदां जन्महेतवः ॥ इति।

यतु तत्रैव—* स्वयंसिद्धिस्तथा दिव्यं प्रत्यक्षमनुमाऽऽगमः। पञ्च सन्ति प्रमाणानि जैमिनिव्यासयोर्हृदि ॥ इत्यादिना स्वयंसिद्धिदिव्ययोः पृथङ्निरूपणं कृतम्, तत् प्रत्यक्षावान्तरवैरूप्यबोधनाभिप्रायम्। यथोक्तं **श्रीविष्णुचित्तैः**—* भगवत्प्रसादलब्धयोगिप्रत्यक्षं दिव्यम् इति ॥

प्रत्यक्षलक्षणम् ॥ तत्र साक्षात्कारिप्रमा प्रत्यक्षम्। साक्षात्त्वं च जातिरूप उपाधिरूपो वा कश्चित् ज्ञानस्वभावविशेषः स्वात्मसाक्षिकः ॥

ज्ञानकारणकज्ञानस्मृतित्वरहिता म[मि]तिः। अपरोक्षेति निष्कर्षे नाव्याप्त्यादिप्रसञ्जनम् ॥

प्रमेयसंग्रहे त्वेवमुक्तम्—* साक्षादनुभवः प्रत्यक्षम्। साक्षात्त्वं जातिः इत्यादि। **तत्त्वरत्नाकरे**ऽप्येवमुक्तम्—

* अपरोक्षप्रमाध्यक्षमापरोक्ष्यं च संविदः। व्यवहार्यार्थसंबन्धिज्ञानजत्वविवर्जनम् ॥ इति ॥

पारोक्ष्यं चैवमुक्तम्—पारोक्ष्यं व्यवहार्यानन्तर्गतवस्तुवेदनापेक्षा। तदनन्तर्गतलिङ्गाद्यपेक्षा पारोक्ष्यमनुमादौ इति। **वरदविष्णुमिश्रैर्मानयाथात्म्यनिर्णये** त्वेवमुक्तम्—अपरोक्षप्रमा प्रत्यक्षम्। प्रमाया आपरोक्ष्यं नाम विशदावभासत्वमिति ब्रूमः। किमिदं वैशद्यं नाम? असाधारणाकारेण वस्त्ववभासकत्वम्—इत्यादि। साक्षात्त्वं द्विधा; नित्यं चानित्यं च। ईश्वरनित्यज्ञानादिनिष्ठं नित्यम्। अस्मदादिज्ञाननिष्ठं त्वनित्यम्। अस्मदादिप्रत्यक्षं द्विधा, योगिप्रत्यक्षमयोगिप्रत्यक्षं चेति। तत्र योगिप्रत्यक्षं प्रकृष्टादृष्टविशेषजम्। तत् युक्तावस्थायां मनोमात्रजन्यम्। वियुक्तावस्थायां तु बाह्येन्द्रियजन्यमपि। तच्च बुभुत्सादिप्रतिनियतविषयमागमैकसिद्धं च। भावनाबलजमात्रं जगत्कर्तरि प्रत्यक्षं प्रतिक्षिप्तं **शास्त्रयोन्यधिकरणे,** अन्यत्र भाष्यकारैरेव साक्षाद्योगिप्रत्यक्षस्य कण्ठोक्तेः, तस्य संभवतोऽप्यागमिकेश्वरज्ञानमूलस्यागमानुवादत्वापादनाशक्त्या तत्रौदासीन्यात्; धर्मादयः कस्यचिदिन्द्रियग्राह्याः, प्रमेयत्वात्, घटवत्, मीमांसकानामप्रत्यक्षत्वाद्वा, अस्मत्सुखादिवदित्याद्यनुमानानां विपक्षे बाधकविरहादिभिराभासत्वात्; आगमबाधप्रसङ्गस्यैव पुरस्कारे त्वागमेनैव चरितार्थत्वात्; अन्यथा धर्मादयः कस्यचिच्चक्षुर्ग्राह्या इति वदतो बौद्धस्य किं प्रतिवक्ष्यसि। यश्चानुव्यवसाये सविषयव्यवसायप्रत्यक्षतामिच्छति, तस्यास्मदादिष्वपि धर्मादिव्यवसायानुव्यवसाये धर्मादिप्रत्यक्षत्वसिद्धौ कथं तदतिरिक्तयोगिप्रत्यक्षानुमासिद्धिः? तद्व्यवच्छेदेन प्रयोगेऽपि सौगतोक्तचाक्षुषत्वादिसाधनप्रसङ्गः स्यादिति। स चादृष्टविशेषो योगाभ्यासतपश्चर्यादिभिर्जायते। तस्मादार्षाभिमतमपि प्रकृष्टादृष्टजत्वाविशेषात् तत्रैवान्तर्भूतम्। यथोक्तं **प्रज्ञापरित्राणे**—

* अत्रेन्द्रियानपेक्षं यज्ज्ञा[द्ज्ञा]नमर्थावभासकम्। दिव्यं प्रमाणमित्येतत् प्रमाणज्ञाः प्रचक्षते ॥
परमेश्वरविज्ञानं मुक्तानां च धियस्तथा। संजयार्जुनवाल्मीकिप्रभृत्यार्षधियोऽपि तत् ॥ इति ॥

इन्द्रियानपेक्षमिति—अदिव्येन्द्रियानपेक्षमित्यर्थः। अत एव हि गीयते—* दिव्यं ददामि ते चक्षुः इत्यादि। यद्वा परमेश्वरादिविज्ञानसहपाठादिभिस्तथैव मन्तव्यम् [तन्मतम्]। अनन्तरं चैवमुक्तम्—

* स्वाभाविकस्य ज्ञानस्य स्वतः सर्वावभासिनः। अविद्याप्रतिबन्धस्या[बद्धस्या]प्रतिबन्धोऽक्षयोगतः ॥
अविद्याहानितो मुक्तपुरुषाणां हि संविदाम्। स्वाभाविकस्वरूपेण निखिलार्थावभासिता ॥

प्रतिबन्धकभावस्य प्रत्युत्तम्भकभाविना । परेणानुगृहीता धीर्ऋषीणां सर्वभासिका ॥ इति ॥

मानसप्रत्यक्षमप्यस्मदादीनां नास्त्येवेति **वृद्धसम्प्रदायः**, आत्मस्वरूपस्य तद्धर्मभूतज्ञानस्य च स्वयंप्रकाशत्वात्, सुखदुःखेच्छाद्वेषप्रयत्नानां तत्तद्धेतुतयाऽभिमतज्ञानविशेषानतिरेकस्य **वेदार्थसंग्रहे** समर्थितत्वात्, नित्यत्वादिविशिष्टास्मदाद्यनुभवस्य शास्त्रादिप्रसिद्धत्वात्, पूर्वानुभवादिज्ञानस्य स्मृतिरूपत्वात्, *आन्तरसुखदुःखादिव्यतिरिक्तबहिर्विषयेषु तस्य बाह्येन्द्रियानपेक्षप्रवृत्त्यनुपपत्तेः इति **शास्त्रयोन्यधिकरणभाष्यस्या**न्वारोहेणाप्युपपत्तेरिति । ततश्चादिव्यबाह्येन्द्रियप्रसूतं[प्रसूतं] ज्ञानमयोगिप्रत्यक्षम् । तत् सामान्याद्दृष्टालोकविशेषादिसहकृतेन्द्रियजन्यं दृष्टसामग्रीविशेषात् प्रतिनियतविषयम् । तत् श्रोत्रादीन्द्रियासाधारणकारणभेदात् पञ्चधा । विषयेन्द्रियसंबन्धश्च द्रव्येषु संयोगः, द्रव्याश्रितेषु रूपादिषु तु संयुक्ताश्रयणम् । यथोक्तं **तत्त्वरत्नाकरे**—

* अत्र वृद्धा विदामासुः संयोगः संनिकर्षणम् । संयुक्ताश्रयणं चेति यथासंभवमूह्यताम् ॥ इति ॥

पुनः प्रत्यक्षं द्विधा, सविकल्पकं निर्विकल्पकं चेति । सप्रत्यवमर्शं प्रत्यक्षं सविकल्पकम् । तद्रहितं प्रत्यक्षं निर्विकल्पकम् ।

नैयायिकनिर्विकल्पकनिराकरणम् ॥ उभयविधमप्येतद्विशिष्टविषयमेव । अविशिष्टवस्तुग्राहिणो ज्ञानस्यानुपलम्भात् अनुपपत्तेश्च । बालमूकतिर्यगादिविज्ञानमपि हि संज्ञादिविकल्परहितमपि विशिष्टवस्तुविषयमेव, अन्यथा तेषां हेयोपादेयविभागपूर्वकप्रवृत्तिविशेषानुपपत्तेः । विप्रतिपन्नं विशिष्टज्ञानं विशेषणज्ञानपूर्वकम्, विशिष्टज्ञानत्वात्, सुरभि चन्दनमित्यादिविशिष्टज्ञानवदिति चेन्न; एकसामग्रीवेद्यविशेषणेषु तन्निरपेक्षत्वात्, स्वरूपसंबन्धपक्षे स्वरूपग्रहेणैव संबन्धस्यापि ग्रहणात्, तावतैव विशिष्टग्रहणसिद्धेः, समवायवादेऽपि तस्यैव गृह्यमाणस्य विशेषणविशेष्यभावरूपत्वात्, समवायविशिष्टप्रत्यये तथैवाभ्युपगमात्, तद्वैशिष्ट्यग्रहे च गुणवैशिष्ट्यग्रहस्यावर्जनीयत्वात् । न च समवायस्य सविकल्पकैकविषयतेति वाच्यम्, निर्विकल्पके धर्मवद्धर्मिवच्च [धर्मधर्मिवत्] तत्संबन्धस्याप्यैन्द्रियिकत्वाविशेषेण ग्रहणसंभवात्, योग्यस्य संनिकृष्टगृह्यमाणसंबन्धिनः संबन्धस्याग्रहणानुपपत्तेः, अन्यथा नित्यं तदग्रहापातात् । प्रथमाक्षसंनिपातजा बुद्धिर्विशिष्टविषया, बुद्धित्वात्, संप्रतिपन्नवत्, इत्याद्यपि चिन्त्यम् ॥

सविकल्पकनिरूपणम् ॥ न च सविकल्पकं न प्रत्यक्षमिति वाच्यम्, साक्षात्काराबाधाद्यविशेषात् ।

सहकारिविशेषेण न वैजात्यं प्रसज्यते । तज्जातीये तु यत्किंचिद्वैषम्यं संभवेदपि ॥
यत्र दृश्येत वैजात्यं तथा तत्राभ्युपेयते । तावता नैव सर्वत्र भवेदेतस्य कल्पनम् ॥
केवलेन्द्रियजं चापि न किंचिज्ज्ञानमिष्यते । सहकारिविशेषा हि विभिद्यन्ते प्रतीन्द्रियम् ॥
अतः संस्कारसंभेदेऽप्यपरोक्षत्वयोगतः । प्रत्यक्षत्वं विकल्पस्य न क्वचिद्विनिवर्तते ॥

* निर्विकल्पकमेकजातीयेषु द्रव्येषु प्रथमपिण्डग्रहणम् इत्यादिभाष्यं तु उदाहरणपरं योज्यम् । अत एव हि **श्रीविष्णुचित्तै**रुक्तम्—*संस्कारोद्बोधसहकृतेन्द्रियजन्यं ज्ञानं सविकल्पकम्, एकजातीयेषु प्रथमपिण्डग्रहणं द्वितीयादिपिण्डग्रहणेषु प्रथमाक्षसंनिपातजं च ज्ञानं निर्विकल्पकम् इति । अन्यत्र चोक्तम्—* केवलचक्षुरादीन्द्रियजन्यं निर्विकल्पकम् इत्यादि ॥ यत्तूक्तं **तत्त्वरत्नाकरे**—

* विशेषणानां स्वायोगव्यावृत्तिरविकल्पके । सविकल्पेऽन्ययोगस्य व्यावृत्तिः संज्ञिता तथा ॥

इति, तत्रापि संस्कारनिरपेक्षत्वसापेक्षत्वयोः प्रदर्शनपरत्वं ग्राह्यम् । प्रत्यक्षस्य चैवं विभागोऽभिहितः—* द्विविधं चैतत्

प्रत्यक्षम् अर्वाचीनमनर्वाचीनं च । युगपदशेषविषयसाक्षात्कारक्षममनर्वाचीनम् । तत् योगिमुक्तेश्वराणां प्रभावविशेषाधीनमुपपादयिष्यते इत्यादि । अत एव कुदृष्टीनां सन्मात्रग्राहि प्रत्यक्षमित्यविलक्षजल्पितं निरस्तम् । क्रमयौगपद्यादिदूषणं तु भ्रान्तिविकल्पेऽपि समानम् । भ्रान्तिरूपोऽपि हि विकल्पः क्षणिकत्वान्न विरम्य व्यापर्तुमलम् । न च पूर्वज्ञानवार्तां जानाति । न च स्वयं धर्मिप्रतियोगिग्रहणाभावे भेदग्रहणं मन्यसे । तथाऽपि यदि कल्पना भेदविशिष्टं युगपद्गृह्णाति, का प्रत्यक्षे सर्पभृतिः ? अतो धर्मिवद्योग्यत्वाज्जात्यादिरूपभेदोऽपि युगपद्ग्राह्यः । अभेद इव भेदोऽपि स्वरूपतः प्रतीतौ [तौ] न प्रतियोगिसाकाङ्क्षः ; भेदव्यवहारस्त्वभेदव्यवहारवत् तत्साकाङ्क्षः । अतः प्रथममेव भेदधीर्युक्ता । अत एव धर्मधर्मिणोर्धर्मिप्रतियोगिनोरन्येषां च प्रतीतावन्योन्याश्रयो निरस्तः । ततश्च व्युत्पत्तेस्तद्व्यवहारेऽपि न तत्प्रसङ्गः । भेदशब्देन व्यवहारस्य तु प्रतिसंबन्धिनिरूपिताकारे व्युत्पन्नत्वात् तदपेक्षा । भेदत्वं हि भेदानां प्रतियोगिना निरूप्यं न तु जात्यादिलक्षणं स्वरूपम् ; यद्ग्रहो यत्र यदारोपविरोधी, स हि तस्य तस्माद्भेदः ; गोत्वादि च गृह्यमाणं स्वस्मिन् स्वाश्रये चाश्वत्वाद्यारोपं निरुणद्धीति स्वस्य स्वाश्रयस्य च स्वयमेव तस्माद्भेदः । अपि च प्रतियोगिसापेक्षत्वनिरपेक्षत्वलक्षणविरुद्धधर्माध्यासेन भेदात् स्वरूपभेदग्रहणैक्यं न संभवतीति वदन् भेददूषणार्थमेव भेदं साधयतीति स्ववचनविरोध इति ॥

शाब्दापरोक्षनिरासः—शब्दजन्यमपि प्रत्यक्षमस्तीति त एव वर्णयन्ति ; तदप्ययुक्तम्, व्याघातात् । न हि परोक्षजननस्वभावतया सिद्धा सामग्री विशेषाभावे क्वचित् स्वभावमतिपतेत् । न चैकजातीयसामग्रीतः प्रसूतं कार्यं विचित्रं स्यात्, एकयैव सामग्र्या सर्वजातीयोत्पत्तिप्रसङ्गात्, एकस्य कार्यस्य विरुद्धजातियोगप्रसङ्गाच्च । * दशमस्त्वमसि इत्यादिदृष्टान्तेऽपि त्वमर्थमात्रं प्रत्यक्षम् । दशमोऽहम् इति प्रत्ययो हि नेन्द्रियस्वातन्त्र्येणोदेति, किंतु पुरुषवचनानुरोधेन । तन्मूलेऽपि चेत् प्रत्यक्षता ; एवं धर्मवांस्त्वमसि इति कार्तान्तिकोपदेशादौ तादृशोऽहमस्मि इति बोधे धर्मादेरपि प्रत्यक्षत्वप्रसङ्गः । ततश्चाप्रत्यक्षमिति जगति किंचिन्न स्यात्, प्रत्यक्षभूतं यत्किंचिदुद्दिश्य विशेषणतयैव सर्वस्य प्रत्यक्षत्वोपपत्तेः । पूर्वावगतदशमभावं तु पुरुषं प्रत्युपदेशे माषराशिप्रविष्टमषीन्यायेन पूर्वापरापरोक्षधीनैरन्तर्येण मध्यवर्तिशब्दजन्यधियोऽपरोक्षत्वव्यवहारः कस्यचित् स्याद्वा न वा । अत एव तत्त्वमस्यादिशब्दः स्वविषयगोचरप्रत्यक्षज्ञानजनकः, स्वतोऽपरोक्षार्थगोचरत्वात् दशमस्त्वमसि संवित् स्वप्रकाशा इत्यादिवाक्यवत् इत्याद्यनुमानानि निरस्तानि, दशमत्वस्वप्रकाशत्वादिविशिष्टाकारेण दृष्टान्तेष्वपरोक्षज्ञानजननासिद्धेः । तथा, विगीतः शब्दो न स्ववाच्यगोचरप्रत्यक्षधीजनकः, शब्दत्वात्, संप्रतिपन्नवत् इत्याद्यपि प्रतिप्रयोक्तव्यम् । उपलम्भविरोधशाब्दप्रत्यक्षलक्षणसंकरादिप्रसङ्गोऽत्र विपक्षे बाधकः । नैवं पूर्वस्य, शब्दजन्यप्रत्यक्षमन्तरेणापि योगजादृष्टजनितसाक्षात्कारात् प्रणिधानविशेषप्रसादितपरमात्मसंकल्पाद्वा निःश्रेयससिद्धेरिति ॥

प्रत्यक्षं चिदचिन्मयं जगदिदं यस्येत्यनुश्रूयते यश्चानन्यधियामनन्तविभवः प्रत्यक्षतामश्नुते ।
यश्चैको युगपत्सदा स्वत इदं विश्वं दरीदृश्यते प्राज्ञं तं प्रतिपन्नमोक्षणविधादक्षं दिदृक्षेमहि ॥

॥ इति न्यायपरिशुद्धौ प्रत्यक्षाध्याये द्वितीयमाह्निकम् ॥

॥ समाप्तश्च प्रत्यक्षाध्यायः ॥

———

॥ अनुमानाध्याये प्रथममाह्निकम् ॥

अथ प्रत्यक्षमूलत्वादागमज्येष्ठभावतः । तयोरन्तरतः साङ्गमनुमानं प्रसाध्यते ॥

व्याप्यस्य व्याप्यत्वानुसंधानाद्व्यापकविशेषप्र[मि]तीतिरनुमानम् । तत् प्रमाणम्, कारणदोषबाधकप्रत्ययरहितत्वात् । किं च, अनुमानाप्रमाणत्वं नाध्यक्षेणैव गम्यते । नानुमानेन तेनैव तद्विरोधप्रसङ्गतः ॥

न च तत्संशयाकारं सर्वलोकविरोधतः । न च किंचेति दुर्ज्ञानं तथात्वेनैव निर्णयात् ॥

संदेहादनुमेयादौ प्रवृत्तिरिति वादिनः । प्रत्यक्षेऽपि तथैव स्याद्बाधाबाधादिसाम्यतः ॥

यत्तु **चार्वाकेणोच्यते**—

* विशेषेऽनुगमाभावात् सामान्ये सिद्धसाधनात् । तद्वतोऽनुपपन्नत्वादनुमानकथा कुतः ॥ इति ;

अन्यत्र च—* विशेषेऽनुगमाभावः सामान्ये सिद्धसाधनम् । अनुमाभङ्गपङ्केऽस्मिन्निमग्ना वादिदन्तिनः ॥

इति ; तत् स्ववचनविरुद्धम्, अनुमाननिरासाय हेतूपन्यासात्, तस्य च हेतोः स्वसाध्यव्याप्त्यनभ्युपगमे अनुमानस्य तेन बाधितुमशक्यत्वात्, अभ्युपगमे तत्रापि * विशेषेऽनुगमाभावः इत्यादिप्रसङ्गात् ॥

न व्याप्तिर्नियमायोगादिति व्याप्तमिदं न वा । व्याप्तं चेत् स्वीकृता व्याप्तिर्न व्याप्तं चेन्न दूषणम् ॥

सर्वस्य व्यभिचारित्वे व्यभिचारो न सिध्यति । एकस्याव्यभिचारित्वे न सर्वव्यभिचारिता ॥

ततश्च सामान्यसिद्धैव व्याप्तिर्हेतोः पक्षधर्मताख्यसहकारिसाहित्यात् साध्यविशेषमुपस्थापयतीति दर्शनबलादभ्युपेयम् । अप्रमाणत्वपक्षेऽप्यन्वयव्यतिरेकावसिता सैव हि सामग्री ; अन्यथा अनुमानतो[ऽ]विशेषप्रतीतिमात्रस्याप्यनुदयप्रसङ्गात् । यथा च सामान्यधीः सामग्रीमध्यपातिनी विशेषबुद्ध्युत्पादिहेतुः, तथा सर्वविशेषसंग्राहिसामान्यव्याप्तिधीरपि विशेषानुमितिहेतुरिति यथादर्शनमाद्रियेथाः । स च साध्यस्य विशेषः पक्षसंबन्धमात्रात्मना त्वत्यन्तविद्भिरिष्यते । तदतिरिक्तविशेषानुमाने त्वनुगमाभावविरोधादयो दोषाः स्युः । अत एव च वयमत्यन्तातीन्द्रियवस्त्वनुमानं नेच्छामः । तदेतत् सूत्रकारैरेव * शास्त्रयोनित्वात् इति जगत्कर्तुः शास्त्रैकप्रमाणकत्वं वदद्भिः प्रदर्शितम् ॥

अनुमानस्यातिरिक्तत्वस्थापनम् ॥ अस्त्वनुमानं प्रमाणम् ; तथाऽपि प्रत्यक्षान्तर्भूतं स्यादिति चेन्न, साक्षादिन्द्रियव्यापारसाध्यत्वाभावात् । नापि लिङ्गग्रहणावान्तरव्यापारद्वारेन्द्रियजम्, इन्द्रियव्यापारोपरमेऽपि स्मर्यमाणलिङ्गाद्व्यापकप्रतीतेः । नापि संस्कारादिप्रत्यासत्त्या मानसता, बाह्येन्द्रियग्राह्येष्वपि तत्तत्प्रत्यासत्त्या मानसप्रत्यक्षत्वप्रसङ्गात् । न चैतदिष्टम्, बाह्यान्तरप्रत्यक्षविभागायोगात्, बाह्यार्थेषु च मनसः स्वातन्त्र्यादर्शनात् । यत्परतन्त्रता मनसः, तत् पृथक्प्रमाणमित्युच्यते । वेद्यांशपारोक्ष्यं चानुमितेरैन्द्रियिकत्वविरोधि । परंपरया प्रत्यक्षमूलत्वमात्रेण प्रत्यक्षत्वोपचारं तु न वारयामः । न चानुमितिः स्मृतिमात्रमिति वक्तुं शक्या, अधिकविषयत्वात् । न चानेकसंस्कारसंभेदेन तत्, अनुभूतानेकस्मरणयौगपद्यसंभवेऽपि वैशिष्ट्यविशेषस्याननुभूतस्य स्मृत्ययोगात् । शाब्दत्वं तु असंभावितमेव । अतः सिद्धम्—अनुमानं प्रमाणं प्रत्यक्षादिबहिर्भूतं चेति ॥

व्याप्तिनिरूपणम् ॥ अनधिकदेशकालनियतं व्याप्यम् । अन्यूनदेशकालवृत्ति व्यापकम् । तदाहुः—

* यो यस्य देशकालाभ्यां [देशतः कालतो वाऽपि] समो न्यूनोऽपि वा भवेत् ।

स व्याप्यो व्यापकस्तस्य समो वाऽभ्यधिकोऽपि वा ॥ इति ॥

देशकालनियमश्च क्वचिद्देशैक्ययौगपद्याभ्याम् ; यथा रसगुडत्वयोः । क्वचिद्यौगपद्यमात्रेण ; यथा [शङ्कु] गन्तृच्छायासूर्यस्थितिविशेषयोः । क्वचिद्देशैक्येनैव ; यथा पाकतज्जन्यगुणयोः । क्वचिद्भिन्नदेशतया भिन्नकालतया च ; यथा दिवा निशाकरास्तगमनातिक्रा[श्रा]न्तसमुद्रक्षोभयोरित्यादि । अत्रेदं तत्त्वम्—यादृग्रूपस्य यद्देशकालवर्तिनो यस्य यादृग्रूपेण देशकालवर्तिना येनाविनाभावः, तदिदमविनाभूतं व्याप्यम् ; तत्प्रतिसंबन्धि व्यापकमिति । तेन निरुपाधिकतया नियतः संबन्धो व्याप्तिरित्युक्तं भवति ॥

व्याप्तिग्रहोपायनिरूपणम् ॥

यथोपलम्भं भूयोभिर्दर्शनैर्गम्यते तु सा । सकृदेवानवच्छिन्नसंबन्धो न हि भासते ॥

तदुक्तं **वरदविष्णुमिश्रैः**—* तस्मादनुमानाङ्गभूता व्याप्तिर्भूयोदर्शनावसेयैव इति । **तत्त्वरत्नाकरे** तु सा सकृद्दर्शनसाध्यैवोक्ता—

* संबन्धोऽयं सकृद्ग्राह्यः प्रतीतिस्वरसात् तथा । प्रतीतयो हि स्वरसाद्धर्मधर्म्यवधीन् विदुः ॥ इत्यादिना । सकृदेव च सर्वधूमव्यक्तिग्रहणमपि सामान्यरूपैक्यादुपपादितम् । असंनिकृष्टेष्विन्द्रियसंप्रयोगश्च संयुक्ताश्रिताश्रयत्वमित्युक्तम्—* संनिहितधूमादिव्यक्तिसंयुक्तस्येन्द्रियस्य तदाश्रितधूमत्वादिः संयुक्ताश्रितः, तदाश्रयत्वेन व्यक्त्यन्तराणि संप्रयुक्तानि इत्यादिना,

* तृतीयः संनिकर्षोऽयं संनिकर्षनिरूपणे । अनुक्तस्तत्प्रमेयस्य व्याप्तेरत्रैव साधनात् ॥ इत्यन्तेन ।

इदं तु सर्वप्रत्यक्षत्वप्रसङ्गभीरवो वैभवं मन्यन्ते, पूर्वपूर्वसहदर्शनजनितसंस्कारप्रचयसहकृते त्वन्तिमे प्रत्यक्षे सकृदेव सामान्यतस्तज्जातीयसमस्तसंग्राहिणि सिद्धे [णी सद्धेतु] सामग्रीमहिम्नाऽप्यसंबद्धप्रकाशनायोगात् [संग्राहिणी सिद्धिः सामग्रीसमवहितस्याप्यसंबन्धप्रकाशायोगात्] । संभावितसंबन्धप्रकाशनमात्र [मात्रप्रकाशन] परत्वे तु नातिप्रसङ्गः । एवम् [च] अस्तु सकृद्दर्शनेन भूयोदर्शनेन वा व्याप्तिग्रहः । तत्राप्यन्तिममन्यद्वा ग्राहकं बाह्यं मानसं वाऽस्तु । तत्र सर्वैरपि भूयोदर्शनं न परित्याज्यम् । तत्रापि भूयोदर्शनजनितसंस्कारसमुदायाधीनविमर्शविशेषेणोपाधिसंभावनामुच्छिन्दता निःशङ्कसंबन्धनियमसिद्धिरिति च सिद्धम् । अतःपरं तु विकल्पनमायासायैवेति विरम्यते ।

तादात्म्यतदुत्पत्तिभ्यामेवाविनाभाव इति सौगताः । यथाऽऽहुः—

* कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् । अविनाभावनियमो दर्शनान्न नदर्शनात् ॥ इति ;

तदसत्, अकार्यानात्मभूतकृत्तिकोदयादिना अकारणानात्मभूतरोहिण्युदयाद्यनुमानात् । कथं च तादात्म्ये लिङ्गलिङ्गिभावः ? तथात्वेन वा भेदे कथंतत् ? यदि च शिंशपात्ववृक्षत्वयोरैक्यम्, सर्वोऽपि वृक्षः शिंशपैव स्यात्, नवा कश्चित् । किंच,

सति भावे न कार्यत्वं किं तु सत्येव भाविता । तस्माच्चेदविनाभावः स्यादात्माश्रयणं ध्रुवम् ॥

व्याप्तिविभागः ॥ व्याप्तिर्द्विधा, अन्वयव्यतिरेकभेदात् । साधनविधौ साध्यविधिरूपेण प्रवृत्ता व्याप्तिरन्वयव्याप्तिः ; यथा, यो धूमवान् सोऽग्निमानिति । साध्यनिषेधे साधननिषेधरूपेण प्रवृत्ता व्याप्तिः व्यतिरेकव्याप्तिः ; यथा, योऽनग्निः स निर्धूम इति ॥

उपाधिनिरूपणम् ॥ सेयमुभयविधाऽपि व्याप्तिरुपाधिसंभवे दुष्यति । साधनाव्यापकत्वे सति साध्यसम-

व्याप्तः साधनधर्मव्यतिरिक्तो धर्म उपाधिः । सावयवत्वादनित्यत्वसाधने कृतकत्वस्य, कृतकत्वादनित्यत्वसाधने सावयवत्वस्य समव्याप्तहेतुप्रयोगे तत्स्वरूपस्य चोपाधित्वव्युदासाय विशेषणत्रयम् । पक्षेतरत्वादेरुपाधित्वव्युदासाय तु समशब्दः । इतरथा साध्यव्यापक इत्येतावता सावयवत्वादेरुपाधित्वव्युदासः शक्यः । सावयवमीश्वरविग्रहादिकं नित्यतया श्रुत्यादिसिद्धमनभ्युपगच्छतां सावयवत्वाद्युदाहरणम् । अभ्युपगच्छतां तु द्रव्यत्वाद्वाच्यत्वसाधने वस्तुत्वस्य, वस्तुत्वाद्वाच्यत्वसाधने द्रव्यत्वस्य चोपाधित्वव्युदासाय विशेषणद्वयमित्युदाहर्तव्यम् । न चोपाधिव्याप्त्योर्निरूपणे अन्योन्याश्रयता, यावत्साधनदेशमवर्तमानो यावत्साध्यदेशवर्तीत्युपाधिनिरूपणात् । स च द्विधा, निश्चितः शङ्कितश्च । व्याप्तः पक्षे नास्तीत्यवधारितो निश्चितोपाधिः, यथा—विप्रतिपन्ना सेवा दुःखहेतुः, सेवात्वात्, राजसेवावत्, इत्यनुमाने पापारब्धत्वम् । अयं च [अदश्च] ईश्वरसेवायां नास्तीति शास्त्रतो निश्चितत्वाद्व्याप्तत्वाच्च निश्चितोपाधिः । पक्षावृत्तिव्याप्त्योरन्यतरस्यापि संदेहे संदिग्धोपाधिः । तत्राद्यो यथा—विप्रतिपन्नो जीवः एतच्छरीरावसाने मुक्तिमान्, निष्पन्नसमाधित्वात्, शुकादिवदित्यत्र कर्मात्यन्तपरिक्षयः [उपाधिः] । स च निष्पन्नसमाधौ विप्रतिपन्ने जीवे अस्ति वा नास्ति वा इति संदिग्धत्वाच्छङ्कितोपाधिः । यद्यपि योगिनामुत्तरपूर्वाघयोरश्लेषविनाशौ भवतः, तथाऽपि प्रारब्धकर्मणामेकशरीर एव पर्यवसानमिति न नियमः, निष्पन्नोपायस्यापि प्रतिबन्धककर्मविशेषादनेकदिवसस्थितिवदनेकशरीरपरिग्रहोपपत्तेः । तथा च सूत्रितम्—* भोगेन त्वितरे क्षपयित्वाऽथ संपद्य [त्स्य] ते इति, * यावदधिकारमवस्थितिराधिकारिकाणाम् इति च । * विनिष्पन्नसमाधेस्तु मुक्तिस्तत्रैव जन्मनि इत्यादिस्मृतिस्त्वनिष्पन्नसमाधेः शरीरान्तरयोगनियमपरतया प्रायिकविषया ; अतो नास्य साधन[ा] व्यापकत्वम् । अपक्षनिष्ठतया निश्चितोऽपि संदिग्धव्याप्तिको यथा—विप्रतिपन्नम् अधर्मः, निषिद्धत्वात्, ब्राह्मणहिंसावदिति हिंसाव्यतिरिक्तसमस्तनिषिद्धपक्षीकरेण प्रयोगे हिंसात्वमुपाधिरिति यदि कश्चिद्ब्रूयात्, तदा अग्नीषोमीयादिषु विपक्षेषु हिंसालक्षणमस्ति वा न वेति सांख्यवेदान्तिविप्रतिपत्त्या संदिहानस्य हिंसात्वं संदिग्धव्याप्तिकं भवति । पक्षे च स्वयंपतितजन्तुभक्षणादौ निषिद्धेऽपि हिंसात्वं नास्त्येवेति निश्चितमिति । उपाधेश्च साधनाभिमतधर्मे स्वगतव्याप्यत्वाध्यासहेतुत्वादुपाधिशब्दवाच्यत्वम् । तदेवं हेतोः सोपाधिकत्वे व्याप्यत्वासिद्धिः ; निरुपाधिकसंबन्धे व्याप्यत्वसिद्धिः ॥

केचित्तु व्यापकाभावाद्व्याप्याभावप्रतिपादनमुखेन साध्यव्यापकस्योपाधेर्दूषणत्वमाहुः । तदा साधनाव्यापकत्वे सति साध्यव्यापक इत्येव वक्तव्यम् ; तथाऽपि सर्वस्य पक्षेतरत्वस्य नोपाधिता, पक्षस्य साध्यविपर्ययानिश्चये तद्व्यतिरिक्तत्वस्य व्यापकत्वानिश्चयात् । नन्वतीन्द्रियोपाधिशङ्कायां कथं साध्यनिश्चयः ? मैवम्, अनुमानाप्रामाण्यवादिभिरतीन्द्रियस्य शङ्कितुमशक्यत्वात्, तत्र प्रामाण्याभ्युपगमे तु क्वचिन्निरुपाधिकत्वसिद्धावन्यत्रापि तदविशेषात् । अपि च शङ्क्यमानोऽतीन्द्रिय उपाधिर्व्यापको वा न वा ? पूर्वत्र वह्न्यादेरपि सार्वत्रिकत्वप्रसङ्गः । उत्तरत्रापि नित्यो वा अनित्यो वा ? नित्यत्वे साध्यस्यापि सदातनत्वापातः । अनित्योऽपि हेतुसाध्ययोरुभयोर्व्यापकः, उभयाव्यापकः, अन्यतरव्यापको वा ? आद्ये साधनाव्यापकत्वाभावादुपाधिलक्षणहानिः । द्वितीयेऽपि उभयासंसर्गेऽप्युभयव्याप्यतामात्रेऽपि साध्यसमव्याप्त्यभावात् । तृतीयेऽपि साधनमात्रव्यापकस्य विशेषणयोरभावात् । साध्यमात्रव्यापकस्य तु साधनाव्यापकत्वं पक्षादन्यत्र हेतोः स्वव्यतिरेकेण वृत्तेर्वा, पक्ष एव वा स्यात् ? न प्रथमः ; तथा सति साध्यव्यापकस्य हेतुमन्तरेण वृत्तौ हेतोः साध्यव्यभिचारः क्वचिदन्यत्र दृष्ट इत्युक्तं भवति ; स एव प्रत्यर्थितां भजते ; अन्यथा तथाभूतोपाधेरसंभवः । द्वितीये तु सर्वत्र सपक्ष एवा[पक्षे योऽ]सौ साध्यवदनुगत उपाधिः, तस्य तेनैव हेतुना पक्षे साधनाद्धेतोस्तद्व्यभिचारस्याप्यसंभवात्, पक्षे

चातीन्द्रियस्य तस्याभावस्याप्यदर्शनात्। तेनापि निरुपाधिक एव संबन्ध इति। साध्यवत् साध्यसामग्रीवच्च हेतुबलादेव सोऽपि पक्षे समापतन् न स्वनिवृत्त्या साध्यं निवर्तयितुमलमिति स कथमुपाधिः? अथ तेनैवाप्यतीन्द्रियेणातीन्द्रियोपाध्यन्तरप्रयुक्तसंबन्ध इति शङ्क्येत, तथा सत्यनवस्थापातः। अपि च—

उपाधित्वेन शङ्क्यस्य संबन्धो निरुपाधिकः। अन्यथोपाधिता नास्ति तद्वदन्यत्र गृह्यताम्॥

तत्त्वरत्नाकरे तु एवमुपाधेः स्वरूपं प्रमाणमवान्तरभेदो दूषणत्वप्रकारश्चोपपादितः। यथा—

* केनचिद्यस्य संबन्धे योऽवच्छेदक एष हि। तस्योपाधिर्यथा वह्नेरार्द्रेधो धूमसंगमे॥

श्रोत्रत्वयोगे नभसो यथा वा कर्णशष्कुली। संसारयोगे जीवस्य कर्माविद्यादि वा यथा॥

साध्यव्या[प्त:]पकः साधनाव्यापक इति तं [उप]लक्षयन्ति। केचित् साधनाव्यापकः साध्यसमव्याप्तिरिति च—इत्यादिना स्वरूपं निदर्शितम्। किमस्य ज्ञापकम्? साधनस्य क्वचित् साध्यासंबन्धख्यापकम्, संबन्धग्रहणवेलानुयायिस्वरूपवैकल्यं वा। असंबन्धख्यापकं च व्यभिचारदर्शनम्। तच्च साध्यविरुद्धधर्मकतया निश्चिते प्रमाणबाधिते पक्षे विपक्षे वा हेतोर्दर्शनम्। अग्नीषोमीयशास्त्रबाधिते पक्षे दृष्टं हि हिंसात्वं निषिद्धत्वमात्मन उपाधिं कल्पयति। प्रमेयत्वं च नित्यात्मादिविपक्षे दृष्टमनित्यत्वसाधने कृतकत्वादिकमुपाधीकरोति। सपक्षेषु च यावद्रूपविशिष्टतया साधनं साध्यसंबन्धित्वेन दृष्टम्, तदन्यतररूपविकलं चेत् पक्षे दृश्यते, तदा व्याप्तरूपाप्रत्यभिज्ञानात् सर्वरूपविशिष्टमेवोपाधयति; यथा—भावितनयश्यामलिमनि अनुमेये मित्रापुत्रत्वं भूतपुत्रेषु दृष्टं शाकाद्याहारपरिणामविशेषम्। एवंजातीयके रूपवैकल्य[वि]कल्पितोपाधिके हेतावप्रयोजकत्वव्यपदेशः परीक्षकाणाम्; व्यभिचारकल्पितोपाधिकयोस्तु बाधितो विरुद्धोऽनैकान्तिक इति—इत्यादिना उपाधेः प्रमाणावान्तरभेदादिकं प्रपञ्चितम्। एवं चोपसंहृतम्—तदेष [बहुरूपः] संक्षेपः; व्यभिचार एव हि प्रतिबन्धाभावः, उपाधिरेव व्यभिचारनिदानम्। प्रमाणनिश्चित एवोपाधित्वेन शङ्कनीयः। साधने सोपाधिस्साध्ये निरुपाधिरेवोपाधित्वेन निश्चेयः। सर्वशङ्कातिप्रसङ्गपाटनपटीयांश्च तर्कः इति। तदेवं निरुपाधिकसंबन्धं व्याप्यमिति सिद्धम्। व्याप्यं साधनं लिङ्गमित्यनर्थान्तरम्॥

साधनरूपनिरूपणम्॥ तस्य द्वे रूपे अनुमित्यङ्गभूते—व्याप्तिः पक्षधर्मता चेति। तयोरेव प्रपञ्चनात् पञ्च रूपाणि—पक्षव्यापकत्वम्, सपक्षे सत्त्वम्, विपक्षवृत्तिरहितत्वम्, अबाधितविषयत्वम्, असत्प्रतिपक्ष[क्षित]त्वं चेति। सिषाधयिषितधर्मविशिष्टो धर्मी पक्षः; यथा अग्निमत्त्वादिसाधने पर्वतादिः। तस्मिन्नभिन्नप्रकारेण स्वायोगव्यवच्छेदेन सर्वत्र वर्तमानत्वं पक्षव्यापकत्वम्। सिषाधयिषित[धर्म]सजातीयधर्मवान् सपक्षः; यथा महानसादिः। तस्मिन् सर्वत्र, कतिपयव्यक्तौ वा वृत्तिः सपक्षे सत्त्वम्; सर्वसपक्षावृत्तिराहित्यमित्यर्थः। कृतकत्वादयः सपक्षव्यापकाः। धूमवत्त्वादयः सपक्षैकदेशवर्तिनः। तत्र सपक्ष एव हेतुधर्मेणापि समन्वितः साधर्म्यदृष्टान्तः। तस्य व्याप्तिदर्शनस्थानत्वादुभययोगापेक्षा। साध्यतज्जातीयशून्यो विपक्षः; यथा महाह्रदादिः। तत्र सर्वत्रावृत्तिः विपक्षवृत्तिरहितत्वम्। इदं च क्वचिद्विपक्षाभावात्, क्वचित् तत्संसर्गाभावादिति द्विविधम्। पूर्वं केवलान्वयिनि, द्वितीयमन्वयव्यतिरेकिणि चानन्तरं द्रष्टव्यम्। अन्ये तु विपक्षाद्व्यावृत्तिरितीदं रूपमकल्पयित्वा केवलान्वयिनश्चतूरूपत्वमाहुः; तदसत्; विपक्षवृत्त्याख्यदोषस्याभाव एव ह्यत्र रूपत्वेन विवक्षितः। तावदेव चान्वयव्यतिरेकिण्यपि रूपम्। तच्च रूपं तुल्यं केवलान्वयिन्यपीति। विपक्षसद्भावस्तु व्यतिरेकव्याप्तेरङ्गम्, विपक्षवृत्तिरूपदोषस्य च; न पुनस्तदभावस्य। विपक्ष एव हेतुना

शून्यो व्यतिरेकदृष्टान्तो भवति । हेतुमानपि हि विपक्षोऽस्त्येव ; येन हेतोरनैकान्त्यादि वक्ष्यते । ततश्चानैकान्त्याद्यनुपदर्शितव्याप्तिकत्वादिपरिहाराय व्यतिरेकदृष्टान्तस्योभयनिवृत्त्यपेक्षा । व्याप्तिदर्शनस्थानं हि दृष्टान्तभूतमाहुः । प्रबलेन प्रमाणेन पक्षे निश्चितसाध्याभाववत्त्वं बाधितविषयत्वम् ; यथा महाह्रदो वह्निमानित्यादौ । तदभावस्त्वबाधितविषयत्वम् ; यथा पूर्वतः परभागेऽग्निमानित्यादौ । समबलतया प्रतीयमानप्रमाणोपरोधाभावः असत्प्रतिपक्ष [पक्षित] त्वम् ; यथा धूमानुमानादेः ॥

हेतुविभागः ॥ द्वे [द्वि] धा च व्याप्यम् अन्वयव्यतिरेकि, केवलान्वयि चेति । तत्र पूर्वोक्तपञ्चरूपोपपन्नं विपक्षवत् अन्वयव्यतिरेकि ; यथा—पर्वतोऽग्निमान् ; धूमवत्त्वात् ; यो धूमवान् सोऽग्निमान् यथा महानसः ; योऽनग्निः स निर्धूमः यथा महाह्रद इति । यद्यपि स्वसाध्यसाधनेऽन्वयव्यतिरेकयोरन्यतरेणैवालमिति तावता व्यपदेशोऽपि युक्तः ; तथाऽप्युभयसद्भावज्ञापनाय असाधारणकेवलान्वयिभ्यां व्यावृत्तिज्ञापनाय च व्याप्तिद्वयेन व्यपदेशः । तादृशमेव विपक्षरहितं केवलान्वयि ; यथा—ब्रह्म शब्दवाच्यम्, वस्तुत्वात् द्रव्यत्वाद्वा, घटादिवत् । अनुभूतिरनुभाव्या, वस्तुत्वात्, घटादिवदित्यादि । न ह्य [शब्द] वाच्यमननुभाव्यं वा किंचिदस्ति, येन विपक्षः स्यात् । असदस्तीति चेन्न, व्याहतवचनत्वात् निरुपाधिकनिषेधासंभवाच्च । सोपाधिकनिषेधे सत एवासच्छब्देनाप्याकारान्तरनिमित्तेन व्यपदेशः । तथा च यदि तत्र वस्तुत्ववाच्यत्वादिहेतुसाध्यव्यतिरेक उच्यते, तदा व्याघातः । अव्याहतस्थलेषु त्वन्वयव्यतिरेकित्वमेव स्यात् । न च तदतिरिक्तमसदिति किंचित् प्रतीमः, येन तत्र व्यतिरेकमनुसंदधीमहि । एतेन, असतो व्यतिरेकदृष्टान्तत्वमिच्छन्तो निरस्ताः, तथा सत्यभावरूपेषु साध्येष्वसतोऽन्वयदृष्टान्तत्वस्याप्यवर्जनीयत्वप्रसङ्गाच्च ; हेतोश्चाप्रतीयमानत्वादेरभावात्मकस्य वा यस्यकस्यचित् प्रयोक्तुं शक्यत्वात् । भाष्यादिषु तु क्वचित् शशविषाणाद्युदाहरणं प्रतिबन्धभिप्रायेण परमतेन वेति द्रष्टव्यम्, * पिशाचानां पिशाचभाषयैवोत्तरं देयम् इत्यादिन्यायात्, स्वयमेव निरुपाधिनिषेधासंभवस्य शून्यवा[दि]दनिराकरणे दर्शितत्वाच्चेति । तर्हि विपक्षरहितस्य केवलान्वयिनो विपक्षवृत्त्यभावः कथमिति चेत्, हन्त ! किं तस्य विपक्षवृत्तित्वमस्ति ? तदपि नास्तीति चेत्, तर्हि तावदेवानुमानाङ्गमित्युक्तम्, तदभावेऽपि तद्वृत्तिलक्षणविशिष्टस्यासिद्धेरिति । एतेन, केवलान्वयि नानुमानं, विपक्षरहितत्वात्, सर्वमनित्यं सत्त्वादित्यादिवदिति हैतुक [वराक] दुर्दरूटदृष्टिर्दूषिता । ननु, यदि केवलान्वयि प्रमाणम्, अग्निरनुष्णः पदार्थत्वात्, घटवदित्याद्यपि प्रसज्येतेति चेन्न, बाधितत्वात् । तर्हि धर्मादयः कस्यचिदिन्द्रियग्राह्याः, प्रमेयत्वात्, मीमांसकानामप्रत्यक्षत्वाद्वा, अस्मत्सुखादिवदित्यादि स्यादिति चेन्न ; विपक्षे बाधकाभावादेरुक्तत्वात् । अनुभूतेः स्वयंप्रकाशाया अप्यननुभाव्यत्वे अनुभूतिपदप्रयोगस्यैव निरर्थकत्वप्रसङ्गात् । परस्यानुभूतिविषयानुभवसिद्ध्यर्थमेव हि तत्प्रयोगः । एवं वाच्यत्वविपर्ययेऽपि बाधः स्पष्टः । तस्मात् व्याहतसाध्यविपर्ययं केवलान्वयि प्रमाणमिति संक्षेपः । अत एव महाविद्यादिरूपकेवलान्वयिनामप्यनवकाशः, अव्याहतसाध्यविपर्ययत्वात् ; अन्यथा तेषां सर्वसाधकत्वसामर्थ्याभ्युपगमभङ्गप्रसङ्गात् ॥

केवलव्यतिरेकिभङ्गः ॥ ननु न द्विविधं व्याप्यम्, केवलव्यतिरेकिणोऽपि भावात् ; तथा हि—अनुभूतिरननुभाव्या, अनुभूतित्वात् ; यदनुभाव्यं न सा अनुभूतिः यथा घटः । न चान्वयव्याप्त्यभावादस्याव्याप्तिरिति भाव्यम् [वाच्यम्], व्यतिरेकव्याप्त्यभावात् केवलान्वयिनोऽप्यव्याप्तिप्रसङ्गात्, द्वयोरपि व्याप्त्योः प्रत्येकमन्वयव्यतिरेकिणि प्रदर्शनीयत्वाभ्युपगमाच्च । उक्तं च **वरदविष्णुमिश्रैरपि**—* तत्पुनरन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकीति

त्रिविधम् इत्यादि । **तत्त्वरत्नाकरे**ऽप्युक्तम्—* अक्षपादस्त्रैधमसूत्रयत् इत्यादीति चेत्, न तावदिह संप्रदायविरोधः, * केवलव्यतिरेकि तु साधनदशामेव नासादयति, सपक्षान्वयविरहात्, असाधारणवत् इत्यादिना **आत्मसिद्धौ** भगव-**द्यामुनमुनिभिः** प्रपञ्चितत्वात् । उक्तं च **न्यायकुलिशे स्वप्रकाशवादे श्रीमद्रामानुजार्यैः**—* न च सिद्धान्तिनोऽयं प्रसङ्गः [प्रयोगः], केवलव्यतिरेकिप्रामाण्यानभ्युपगमात् इति । अतो **वरदविष्णुमिश्रो**क्तमेकदेशिमतम्, परमतानुसारेण वोक्तम् । **तत्त्वरत्नाकरे**ऽपि * अक्षपादस्त्रैधमसूत्रयत् इत्युपक्रम्योक्तम्, न तु स्वमततया । यत्तु तत्रैव हेत्वाभासनिरू-पणेऽप्युक्तम्—* इयं ह्यनध्यवसितकेवलव्यतिरेकिणो भिदा । विद्यमानसपक्षोऽपि पक्षमात्रवृत्तिः प्रथमः । अन्यस्त्वविद्य-मानसपक्षो विपक्षाद्व्यावृत्त इति । तत्र दृष्टे साध्यवति सपक्षे साधनस्य ततो व्यावृत्तावन्वयबाधादाभासत्वं स्पष्टम् । अदृष्टे तु तस्मिन् साध्यान्वयाक्षेपकपूर्वोक्तप्रमाणावतारादनाभासत्वं सुवचम् इति ; तदप्यनादरभावितमिति मन्यामहे ; अन्यथा सपक्षैकदेशवृत्तेरप्याभासत्वप्रसङ्गात्, साध्यान्वयबाधस्य तावताऽपि सुवचत्वात्, लक्षणनिरूपणे चाभिप्रायव्यक्तेः, साध्या-न्वयाक्षेपकाणां च सामान्यतोऽपि निराकरिष्यमाणत्वात् । ननु सपक्षैकदेशवर्तिनः साध्यान्वयोऽप्यस्तीति कथं साध्यान्वय-बाधशङ्का ? सपक्षे सत्यपि पक्षमात्रवर्तिनो वा पक्ष एव साध्यान्वयसंभवे कथं तद्बाधः ? तथाऽप्यन्यत्र क्वचित् साध्यसंबन्धो न दृष्ट इति चेत्, तुल्यं केवलव्यतिरेकिण्यपि । साध्यमपि तस्य क्वचिन्न दृष्टमिति विशेष इति चेत्, हन्त ! दोष एव गुणीभवत्यायुष्मतः । साध्यादर्शने साध्यासंबन्धोऽपि न दृष्टः स्यादिति चेत्, तर्ह्यसंबन्धदर्शनं दोष इति सपक्षैकदेश-वर्तिनोऽप्यसौ दुस्त्यजः । क्वचित् संबन्धदर्शनात् तस्य दोषपरिहार इति चेत्, तर्हि क्वचिदपि संबन्धादर्शनात् केवल-व्यतिरेकिणः साध्यसंबन्धप्रतीत्यनुत्पत्तिरेवेति किम [किं] बाधेन ? तेनैव पक्षे संबन्धः प्रतीयत इति चेन्न, सिद्धे संबन्धे व्याप्याद्यापकधीः, व्यापकप्रतीतौ च संबन्ध [प्रतीति] धीरित्यन्योन्याश्रयणात् ॥

अथ साध्याभावः साधनाभावेन व्याप्तः ; साधनाभावश्च निवर्तमानः स्वव्याप्यं साध्याभावमपि निवर्तयन् साधनस्य साध्यव्याप्यतामुपादायैव विश्राम्यतीति प्रतिबन्धसिद्धिः, अभावव्याप्तिवैपरीत्येन भावव्याप्तेः सार्वत्रिकत्वात्, साध्यसाधनविरुद्धधर्मद्वयान्वयसमव्याप्तेश्च साध्यसाधनसमव्याप्त्यव्यभिचारित्वसिद्धेरिति चेत्, मैवम् ;

व्याप्यानां व्यापकाभावव्यापकाभावयोगिता । कथं नाम नियन्तव्या केवलान्वयिवादिनः ॥
केवलान्वयिनि व्याप्ये न हि सर्वसपक्षगे । तद्व्यापके वा क्वापि स्यादभावप्रतियोगिता ॥

अपि च, अनध्यवसितेऽपि तथा व्याप्तिः सुवचा । नित्यत्वाभावो हि गन्धवत्त्वाभावेनाबादिषु व्याप्तः । गन्धवत्त्वाभावश्च पृथिव्या निवर्तमानः स्वव्याप्यं नित्यत्वाभावमपि निवर्तयन् गन्धवत्त्वस्य नित्यत्वव्याप्यतामुपादायैव विश्राम्यतीति । नन्वेवमनित्यत्वेनापि व्याप्तिस्तस्य ग्रहीतुं शक्यत इति चेत्, तर्हि केवलव्यतिरेकिसाध्येन वस्त्वन्तरा-साधारणस्वभावस्यापि व्याप्तिर्ग्रहीतुं शक्यत इति समो दोषः । तथा हि—घटः स्व[यं]प्रकाशः, घटत्वात् ; न यदेवं न तदेवम् ; यथा पट इति व्याप्तिः सुग्रहा । अनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्ग इति केवलव्यतिरेकिणो विपक्षे बाधकमस्तीति विशेष इति चेन्न, घटस्यानुभाव्यत्वे पटवदघटत्वप्रसङ्ग इति सुवचत्वात् । किंच सपक्षवति असा-धारणे साध्यं क्वचित् प्रसिद्धमिति तद्व्यतिरेकव्याप्तिर्ग्रहीतुं शक्या । इह तु साध्यधर्मस्य पूर्वमप्रसिद्धतया तद्व्यतिरेकव्याप्ते-[स्त, रेत] रसत्प्रतियोगिकत्वेन प्रवृत्ताया दुर्ग्रहत्वमेव । अथानुभाव्यत्वरूपतद्व्यतिरेकः सुग्रह इति चेन्न, तथाऽपि यदनु-भाव्यं न सा अनुभूतिरिति व्याप्तिग्रहणदशायामेव प्रतियोगिभूतानुभूत्यनुभाव्यत्वदर्शनेन व्याघातात् । भावसाध[ध्य]क-

केवलव्यतिरेकिषु च यदि साध्यं पक्षे प्रसिद्धम्, तर्हि व्यर्थमनुमानम्। यद्यन्यत्र, तदा सपक्षे सति केवलव्यतिरेकित्वं न स्यात्। न चोभयातिरिक्तमस्ति, व्याघातात्। न हि भावाभावात्मना विकल्पेऽपि कोट्यन्तरसंभवः, * परस्परविरोधे तु न प्रकारान्तरस्थितिः इति न्यायात् तुल्यं चेदमभावसाध[ध्य]कत्वेऽपि, [विशिष्ट]साध्यादिव्यतिरेकमुखेन व्याप्ते-र्ग्रहीतव्यत्वात्; अन्यथा कस्य केनेषा व्यतिरेकव्याप्तिः? स्वरूपतः प्रवृत्ता[व]ऽपि हि व्यतिरेकव्याप्तिः। सा प्रकृत-व्यतिरेकत्वपरामर्शाभावे कथं प्रकृतस्योपकरिष्यति? न च सामान्यतः क्वचिदिति विदितं साध्यं केवलव्यतिरेकिणा पक्ष-रूपे विशेषे व्यवस्थाप्यत इति वाच्यम्, तथाविधसामान्योपस्थापकप्रमाणाभावात्। वेद्यत्वं किंचिन्निष्ठात्यन्ताभावप्रति-योगि, धर्मत्वात्, घटत्ववदित्याद्यस्तीति चेन्न, स्ववचनविरोधात्, किंचिदिति निर्दिश्यमानस्य वेद्यत्वे तदभावाधिकरण-त्वविरोधात्, अवेद्यत्वे तत्र किंचिच्छब्दप्रयोगस्यैवानुपपत्तेः, यत्किंचिद्धर्मात्यन्ताभावलक्षणधर्मेण चानैकान्त्यात्। तस्य च सर्वत्र वृत्त्यनभ्युपगमे पुनर्व्याघातः। तथा सति हि कस्यचित् सर्वधर्मविशिष्टत्वमेष्टव्यम्। तथा च तत्र तद्वत्त्व-तदभाववत्त्वयोः समुच्चयः स्यात्। संविदोऽपि यत्किंचिद्धर्मात्यन्ताभावविरहे तन्निष्ठात्यन्ताभावसाधनविरोधः, तद्विरहेण पुनस्तत्सिद्धेश्च, यत्र यदत्यन्ताभावविरहस्तत्र तस्य सत्त्वावश्यंभावात्। न च स्वरूपमेवात्र तद्विरहः, तदारोपसहे तद-योगात्। एवं किंचिच्छब्दवाच्यत्वलक्षणधर्मेणाप्यनेकान्तो वाच्यः। यदि क्वचित् किंचित्त्वं न स्यात्, अलीकतैव स्यात्। कथं च क्वचिदिति निर्दिष्टे किंचित्त्वं न स्यादित्युच्येत? एवम्, इच्छादयोऽष्टद्रव्यातिरिक्तद्रव्याश्रयाः, अष्ट-द्रव्याश्रितत्वायोगे सति गुणत्वादित्यत्राष्टद्रव्यातिरिक्तद्रव्यसिद्धौ व्यतिरेकिवैयर्थ्यम्। असिद्धौ स एव दोषः। गुणत्वेन द्रव्याश्रितत्वेऽनुमिते अतिरेकानतिरेकविप्रतिपत्त्या च संशये अष्टद्रव्याश्रितत्वकोटावनिष्टप्रसङ्गेनाभिमतकोटिपक्षपातिनी शङ्का जायते, तद्बलेन तदेककोटिगोचरस्मृतिसन्ततिर्वा। इदमेव च संभावितत्वं वस्तुनः। अतः संभावनासिद्धत्वेना-प्रसिद्धविशेषणत्वव्यतिरेकासिद्धयोरसिद्धेरिति चेन्न; संभावनायाः प्रमाणत्वे पूर्ववत् प्रमाणान्तरानपेक्षणात्, अप्रमाणत्वे-ऽनुपयोगित्वात्। साध्यमानस्य पक्षमात्रे हि शङ्का गुणाय, न तु सार्वत्रिकी। यद्विपर्ययेऽनिष्टप्रसक्तिः, तत् प्रमाण-योग्यमिति निश्चिते विप्रतिपत्तिवाक्यजनितसंशयाधीनसंभावनापदमिदं च तथेति सामान्यतः प्रमाणविषयत्वे सिद्धे विशेषापेक्षायां व्यतिरेकिसाफल्यमिति चेन्न, इदं च तथेत्युपनयस्य निराश्रयत्वात्, सिषाधयिषितानुमानेन तत्सिद्धावन्यो-न्याश्रयणात्, प्रमाणयोग्यमित्यनेनैव प्रामाणिकत्वसिद्धौ प्रमाणविशेषचिन्तायाश्च निष्प्रयोजनत्वात्। यच्च गुणत्वादिति सामान्यतो दृष्टेन द्रव्याश्रितत्वे सिद्धे तत्र चान्वयव्यतिरेकव्याप्तिनिरूपणे अष्टद्रव्याश्रितत्वानुपपत्तिसाचिव्यात् तत एव हेतोरतिरिक्ताश्रितत्वं सिध्यतीति; तदपि न, तत्राप्यतिरिक्तविशेषाकारस्य क्वचिदप्यसिद्धेः। इच्छादयोऽनुपपन्न[स्थल]-व्यतिरिक्ताश्रिता इति सामान्यसाधने तु, यो यद्द्रव्याश्रितत्वानुपपत्तौ सत्यां द्रव्याश्रितः, स ततोऽतिरिक्तद्रव्याश्रितः, यथा गन्धादिः; इच्छादयश्च तथा, इत्यन्वयस्यापि सिद्धौ न [सिद्धेर्न] केवलव्यतिरेकिता। अस्त्वेवम्, तथाऽपि पश्चात् केवलव्यतिरेकिणाऽपि जीवितुं शक्यमिति चेन्न, * सन्दिग्धे न्यायः प्रवर्तते इति न्यायेनाशक्यत्वात्॥

अथ सामान्यतः सिद्धेच्छाद्याश्रयपक्षीकारेण विगीतोऽष्टद्रव्यव्यतिरिक्तः, इच्छाद्याश्रयत्वादिति साध्यते; तदा गुणादौ सपक्षे तिष्ठति त्वयैवाभास[तोच्यते]तेष्यते। गुणादिनिष्ठ[तया] हेत्वन्तरप्रयोगे तु अन्वयित्वमेव। तत्र तु गुणादेरपि पक्षीकरणे अंशतः सिद्धसाध्यत्वम्। तदसिद्धौ पुनरप्रसिद्धविशेषणता। यच्च—इच्छादेः कार्यत्वादिना सामान्यतः समवायिकारणसिद्धौ, शरीरमिच्छासमवायिकारणवत्, प्राणादिमत्त्वात्; न यदेवं न तदेवमिति सर्वदोष-

परिहारः—इति ; तदपि न, संबन्धमात्रसाधने घटादेः सपक्षत्वापातात् ; शरीरत्वादिलक्षणसंबन्धविशेषसाधने त्वप्रसिद्ध-विशेषणत्वात् । अन्यथा घटः इच्छासमवायिकारणवान्, घटत्वात् ; न यदेवं न तदेवमित्यपि प्रसङ्गात्, अन्यतो विशेषनिर्ण [ये अस्य] यस्य निरवकाशत्वात् । न च वह्न्यादिसंबन्धसाधनेऽप्येवं संबन्धविकल्पप्रसङ्गः, वह्निसंयोगित्वस्य स्वरूपतःसिद्धस्य पक्षधर्मताबलेन पर्वतनिष्ठत्वमा [त्रे] त्रविशेषलाभात् ; अत्र त्विच्छासमवायिकारणसंबन्धविशेषस्यैव साध्य-धर्मस्य स्वरूपतः क्वचिदप्यसिद्धत्वेन तस्य शरीरनिष्ठत्वसाधनायोगादिति । यत्तु सर्वं कार्यं सर्ववित्कर्तृपूर्वकम्, कादा-चित्कत्वात् ; वेदाः सर्वज्ञप्रणीताः, वेदत्वादित्याद्युदाहरणम् ; तत्रापि सर्ववित्कर्तृपूर्वकत्वादेः क्वचिदप्यग्रहणात् तद्व्यति-रेकस्य साधनव्यतिरेकेण व्याप्यत्वग्रहणमनुपपन्नम् । यदि प्रत्येकव्युत्पन्नसर्वविदादिपदसमुदायसमभिव्याहारमात्रेण साध्य-सिद्धिरिति मन्यसे, तदा शशविषाणादिवदयोग्यपदसमभिव्याहारमात्रेण भ्रान्तिसिद्धं साध्यमित्युक्तं भवति । यदि बाधका-भावादत्रायोग्यत्वं नास्तीत्यभिप्रायः, तदप्यसारम्, सामान्यतः सिद्धस्यैव विरोधस्य साधकाभावे बाधकत्वात्, तस्यैवानु-मानस्यैतत्साधकत्वेऽन्योन्याश्रयणात् । न चागमतया तानि पदानि तदर्थमुपस्थापयन्ति, अनभ्युपगमात्, आ [प्तत्वागमो-क्तत्वयो] प्तोक्तत्वनित्यत्वयोरभावे तदनुपपत्तेश्च । अथागमसिद्धं सर्वज्ञमात्रमुपजीव्य तत्पूर्वकत्वं साध्येत, तथाऽपि तत्पूर्व-कत्वस्याप्रसिद्धिस्तदवस्थैव । तस्यापि चेत् प्रसिद्धिरागमतो गृह्येत, सा चेत् पक्षे, कृतमनुमानेन । विपक्षे चेत्, व्याघातः । सपक्षस्तु नात्र त्वयेष्यते, तथा सत्यन्वयव्यतिरेकित्वापातादिति । एवं केवलव्यतिरेक्युदाहरणान्तरेष्वपि दूषणमुन्नेयम् । सर्वत्र च केवलव्यतिरेकिणि सत्त्वादिभिः केवलान्वयिभिः सार्वत्रिकसाध्यदर्शनलब्धजीवितैः प्रतिरोधो बाधो वा ग्राह्यः । एवं केवलव्यतिरेकिणि साध्याप्रसिद्धेस्तद्व्यतिरेकव्याप्तिर्दुर्ग्रहा । अन्वयव्यतिरेकिण्यपि अन्वयव्याप्ति-रेव प्रधानभूता । व्यतिरेकव्याप्तिरप्यन्वयसिद्धप्रतियोगिलाभात् समीची । तत्रान्यतरव्याप्त्युदाहरणमात्रेणापि परार्थ-प्रयोगोऽपि चरितार्थ इति ॥

लक्षणनिरूपणम् ॥ ननु यदि केवलव्यतिरेकि न प्रमाणम्, लक्षणमिति किमपि न स्यात्, तस्य तदात्म-कत्वात् । तदभावे च कथं परस्परव्यावृत्तवस्तुव्यवस्था ? ततश्च विलीनं लौकिकपरीक्षकवैदिकव्यवहारैरिति ; तन्न, लक्षणस्य केवलव्यतिरेकित्वाभावात् । उक्तं हि **तत्त्वरत्नाकरे**—

* अर्थासाधारणाकारप्रतिपत्तिनिबन्धनम् । सजातीयविजातीयव्यवच्छेदेन लक्षणम् ॥

इत्युक्त्वा *सचायं जात्यादिराकारः प्रमेयं निष्कृष्य लक्षयतः प्रमाणस्य सजातीयविजातीयव्यवच्छेदांशे सहकारीति लक्षण-मुच्यत इति । एतेन तत्तत्प्रतिपादकं प्रमाणं त [त्त्वनि] त्त्वनिष्कर्षे शरणमित्युक्तं भवति । एतेन लक्ष [णशब्द] णानिरुक्ति-मात्रेण लक्ष्यमपलपन्तो निराकृताः । न हि प्रतीतमिति [मपि] सर्वं निर्देष्टुमपि [ष्टुं] शक्यम्, सर्वलौकिकपरीक्षकव्यवहृतस्य घटस्यापि पृथुबुध्नादिमत्त्वाङ्गुलिनिर्देशविषयत्वादेः साधारणत्वात्, तद्विशेषस्य तु दुर्वचत्वात् । उक्तं च **दण्डिना**—

* इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् । तथाऽपि न तदाख्यातुं सरस्वत्याऽपि शक्यते ॥ इति ॥

असाधारणधर्मोपस्थापनेन व्यवहारव्यवस्थापकमाप्तवाक्यादिकमेव [वा] लक्षणम् ; यथा गन्धवती पृथिवीति । यत् गन्धवत् तत् सर्वं पृथिवीशब्देन व्यवहर्तव्यम्, नेतरदिति हि तदर्थः । प्रमाविषयः प्रमेयमित्यादिषु च लक्षणतया संमतेषु विपक्षशून्यत्वेन केवलव्यतिरेकित्वभङ्गप्रसङ्गः । यद्वा अन्वयव्यतिरेकिविशेष एव लक्षणम् । स च समव्याप्तः । असाधारणो व्यापको धर्मो लक्षणमिति वा लक्षणम् । तत एवेतरप्रतिक्षेपस्तत्त्वं च सिध्य [सिध्येदि] ति ;

यथा—शरीरादेः पार्थिवत्वादिसंदेहे, शरीरं पार्थिवम्, गन्धवत्त्वात्, घटवत् । शरीरमाप्यादिकं न भवति, गन्धवत्त्वात्, घटवदित्यादि । तदेवं तत्त्वतदितरप्रतिक्षेपयोः साधनाल्लक्षणत्वं गन्धवत्त्वस्येति । नन्वनेकव्यक्तिसंग्राहकलक्षणे तथा स्यात् । एकव्यक्तिलक्षणे तु कथम्, यथा आकाशादेः शब्दमात्रवत्त्वादाविति चेन्न, आकाशादिशब्दानामपि जातिशब्दत्वात् । कल्पादिभेदापेक्षया बहवो ह्याकाशादयः । अस्तु तथा तेषु । ईश्वरादिलक्षणं तु कथम्? न हीश्वरस्य कल्पादिभेदेऽपि भेदोऽस्ति ; सत्यम् ; तत्र तु प्रागुक्तनीत्यैव धर्मिग्राहकेणैव लक्षणविशिष्टलक्ष्यसिद्धावसाधारणधर्मातिरिक्तव्यावृत्त्यभावान्न साध्यं किंचिदवशिष्यते ; तथाऽपि तत्रेश्वरादिलक्षणव्यतिरेकस्यानीश्वरत्वव्याप्तेर्ब्रह्मादिषु केषुचिदीश्वरतया शङ्क्यमानेषु तेनानीश्वरत्वं साध्यते । तत्र चान्वयव्यतिरेकित्वमेव । प्रतियोगिनः प्रमाणसिद्धेश्चाभावनिरूपणोपपत्तिः । प्रयोगश्च—ब्रह्मादयोऽनीश्वराः, सकलजगत्सृष्ट्याद्यकारणत्वात्, घटवत् । कालो न प्रकृतिः, महदादिविकाररहितत्वात्, चेतनवत् । त्रिगुणं कालातिरिक्तम्, कलादिविकाररहितत्वात्, चेतनवत् ॥

एवं तदात्मना शङ्क्यमानानां तद्व्यतिरेकसिद्धेस्तस्यापि तेभ्यो व्यतिरेकः सिद्ध इति लक्षणफलम् । अतः सर्वत्राप्यन्वयित्वमेव । एवं तर्हि सर्वस्मिन्नेव लक्षणे तदितरस्य तद्व्यतिरेको वक्तुं शक्यः ; यथा—गवयो न गौः, सास्नादिरहितत्वात्, महिषवदित्यादीति चेत् ; अस्त्वेवम्, तावताऽपि न लक्षणस्य केवलव्यतिरेकित्वम् । अयं गौः, सास्नादिमत्त्वात्, यथा अस्मदीयः ; यो गोव्यतिरिक्तः, नासौ सास्नादिमान्, यथा महिष इत्यत्र ; नायं गौः सास्नादिरहितत्वात्, यथा महिषः ; यो गौः स सास्नादिमान्, यथा संमत इत्यत्र चान्वयव्यतिरेकित्वमेव । ये पुनः विप्रतिपन्नस्सर्वो गौरिति व्यवहर्तव्यः, अगोव्यावृत्तो वा, गोत्वात्, सास्नादिमत्त्वाद्वेति लक्षणस्य केवलव्यतिरेकित्वमाहुः ; तेषामंशतः सिद्धसाधनत्वमपि दुष्परिहरम् । सकलव्यक्तिसंग्राहकप्रवृत्तिनिमित्तस्य सकलेतरप्रतियोगिकव्यावृत्तेश्चासिद्धतया नैवमिति चेन्न, गौरिति व्यवहर्तव्य इत्यत्रापि गोत्वमेव व्यवहारनिमित्तमिति नियन्तुमशक्यत्वात्, अन्यस्याप्यसाधारणधर्मस्य तन्निमित्तत्वाविरोधात्, लाघवादेश्च समत्वात् । गोत्वनिमित्तगोव्यवहारवानित्येव साध्यार्थे [चा] प्राग्वदप्रसिद्धविशेषणत्वादिकम् । सकलेतरप्रतियोगिकव्यावृत्तिसाधने त्वपोहवादिन इवान्योन्याश्रयणम् । अपि च,

लक्षणादधिके भेदे [सति कातीत] क वाऽतीतस्य संभवः । तस्यैव तत्त्वे किं केन किमर्थं साधयिष्यसि ॥

किं च महिषादिसमस्तव्यावृत्तेरेकस्मिन् गवि सिद्धत्वादपरिहृतमेव सिद्धसाधनत्वम् । एतदेव चानूद्य **तत्त्वरत्नाकरे**ऽप्युक्तम्—* क्षोण्यादिलक्ष्यं प्रमाणसिद्धं न वा? तदसिद्धावाश्रयासिद्धिर्लक्षणात्मनो हेतोः । सिद्धौ च साधनं मुधा । स्वरूपसिद्धावपि व्यवच्छेदः साध्यत इति चेत्, [न ;] तादृगेव तदपि । तथाऽपि ह्यप्रसिद्धविशेषणः पक्षः स्यात्, इतरव्यवच्छेदस्य क्वचिदनालोचितचरत्वात्, सिद्धौ वा साधनवैयर्थ्यात् । किं च प्रमाणस्य स्वविषयव्यवस्थायां प्रमाणान्तरापेक्षणादनवस्थितिपरतःप्रामाण्ये प्रसज्येयाताम् ;

तस्माद्धर्मः प्रमेयात्मा धर्मिनिष्कर्षमाचरन् । लक्षणं न प्रमाणात्मेत्युक्तयैव दिशा गतिः ॥ इति ॥

तस्माद्यथोक्त एव लक्षणप्रकारः, न पुनस्तस्य केवलव्यतिरेकित्वमिति । एवं केवलव्यतिरेकिणि निरस्ते प्रामाणिकानां हैतुकभङ्गभारस्य त्र्यंशोऽवरोपितः ॥

अनुमानविषयविशेषनिरूपणम् ॥ केवलान्वयिन्यपि व्याहतसाध्यविपर्ययव्यतिरिक्ताः सर्वे विपक्षे बाधकाभावान्निरस्ताः । अन्वयव्यतिरेकिण्यपि अत्यन्तातीन्द्रियार्थगोचरा अप्यैन्द्रियिकव्याप्त्युपजीवनेन प्रवर्तमानाः सपक्षानुगतव्याप्ता-

कारवैकल्यात् सोपाधिकत्वादिभिर्निराकृताः। चन्द्रबिम्बपरभागादिकं तु नास्मदाद्यतीन्द्रियम्। पर्वतपरभागादिवदिन्द्रियसंप्रयोगाभावादेव तदग्रहणोपपत्तिरिति युक्तं तदनुमानम्। सन्ति हि सतोऽप्यनुपलम्भहेतवो बहवः; यथोक्तं **सांख्यैः**—

* अतिदूरात्सामीप्यादिन्द्रियघातान्मनोनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च॥ इति॥

यत्तु, * सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धेः। महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च॥ इति। ईदृशविषयेऽनुमानं वार्यते, न तु दृष्टजातीयसूक्ष्मेषु; यथा उष्णजलादौ वह्न्यादेः। यत्र तु शास्त्रेणैव व्याप्यव्यापकभावग्रहणम्, तत्रात्यन्तातीन्द्रियाणामप्यनुमानं न वारयामः; यथा—तत्तज्जातिगुणकर्मवर्णप्रज्ञामेधागदादिषु दृष्टेषु तत्तत्कारणभूतादृष्टविशेषानुमानमिति। * अतीन्द्रियेऽर्थे सर्वत्र शास्त्रमेव प्रमाणम् इति **भाष्यम**पि प्रत्यक्षसिद्धव्याप्त्युपजीवनेन अत्यन्तातीन्द्रियार्थसाधनबाधनप्रतिक्षेपपरम्; न तु शास्त्रसिद्ध [व्याप्त्युपजीवनेना] व्याप्तिमूलातीन्द्रियानुमाननिषेधार्थम्; तत्रापि शास्त्रमूलतया तस्मिन्नेव विश्रमाच्छास्त्रमेव प्रमाणमिति वाचोयुक्तेरविरोधात्॥

सामान्यतोदृष्टादिनिरूपणम्॥ एतेन अस्मदादिप्रत्यक्षयोग्यार्थानुमापकं विशेषतोदृष्टम्, तदयोग्यार्थं सामान्यतोदृष्टमिति परोक्तविभागस्यापि विषयः सिद्धो भवति। लौकिकेष्वेव [वा] सूक्ष्मासूक्ष्मविभागात् तत्सिद्धेः। किंचिज्जातीयात् तद्व्यापकजातीयस्यानुमानं सामान्यतोदृष्टम्; यथा धूमादग्नेः। व्याप्ति[ग्रहदशायां व्याप्यतया] दशादृष्टयैव व्यक्त्या देशान्तरकालान्तरादौ व्यापकतया दृष्टव्यक्तेरेवानुमानं विशेषतोदृष्टम्; यथा—कृत्तिकया रोहिण्यनुमानमिति केचित्। तत्रापि निष्कर्षे कृत्तिकोदयरोहिण्यासत्तिव्यक्तीनां भूयस्त्वात् तदातनेन कृत्तिकोदयेन तादात्विकी रोहिण्यासत्तिव्यक्तिरेवानुमीयत इति सामान्यत एव व्याप्तिग्रहः, अन्यथा व्याप्ति [ग्रह] दशादृष्टमात्रविषयत्वे स्मृतिमात्रत्वप्रसङ्गात्। एवं स्वरविशेषात् पुत्राद्यनुमानेऽपि पूर्वस्वरवदद्यतनस्वरस्य पुत्रस्वरत्वानुमानात् सि[द्धो]द्धौ भेदः। तेनैव शैलशृङ्गेण तस्यैव शैलस्य कथमनुमानमिति चेन्न, कथंचित् स्मृतिमात्रत्वात्। तत्कालवर्तित्वार्जवाद्यतिरिक्तग्रहे तु तत्कालादिव्यक्तिभेदसिद्धिरिति॥

॥ इति न्यायपरिशुद्धौ अनुमानाध्याये प्रथममाह्निकम्॥

॥ अथ द्वितीयमाह्निकम्॥

परार्थानुमानभङ्गः॥ तदिदमनुमानं स्वार्थं परार्थं चेति केचिद्विभजन्ते; तदयुक्तम्, सर्वेषामप्यनुमानानां स्वप्रतिसंधानबलेन प्रवृत्ततया स्वव्यवहारमात्रहेतुत्वेन च स्वार्थत्वात्। वाक्यप्रतिपन्नेऽपि [तस्मिन्] न वाक्यबलादर्थसिद्धिः; किंतु वा[क्यार्थोपस्था]क्योत्थापितव्याप्तिप्रतिसंधानादिनैव। न च प्रतिवादिवाक्यं व्युत्थितस्य प्रमाणम्। आप्तश्चेद्ब्रूयात् तत्रापि व्याप्तिमात्रे तेनोपदिष्टे श्रोता स्वयमेवानुमिनुयात्, न तु साध्यार्थज्ञानेऽप्युपदेशमपेक्षते। यदि च वाक्यप्रतिपादितत्वमात्रेणानुमानस्य परार्थत्वम्, तदा प्रत्यक्षागमयोरपि तथा विभागप्रसङ्गः, केषुचिदर्थेषु प्रमाणतया तयोरेवाभिधेयत्वात्। एतदुक्तं भवति—द्विविधानि प्रमाणानि, स्वयमेव सिद्धानि, परवाक्यपूर्वाणि चेति सामान्यत एव विभागः कार्य इति। एतदेव ह्युक्तं **तत्त्वरत्नाकरे**ऽपि—

* सर्वं प्रमाणं सामग्र्या स्वत एव प्रवृत्तया। जन्यते परवाक्येन वृत्तया चेति हि द्विधा॥

अतोऽनुमानं द्विविधं स्वपरार्थत्वभेदतः। प्रत्यक्षागमसामग्र्योः परवाक्ये प्रदर्शिते॥

वक्ष्यते व्यवहारा[र्थमनुमानं निरुच्यते] ध्वन्यनुमानस्य तूच्यते ।
अनुमोद्बोधकं वाक्यं प्रयोगः साधनं च तत् ॥ इत्यादि ॥

पञ्चावयववाक्यनिरूपणम् ॥ तदेवमनुमोद्बोधकं वाक्यं प्रतिज्ञादिपञ्चावयवम् । तत्र [परं प्रति] परप्रतिपिपादयिषया पक्षवचनं प्रतिज्ञा ; यथा पर्वतोऽग्निमानिति । तत्र धर्मिणमुद्दिश्य साध्यधर्मो विधीयत इति वृद्धाः । साधकत्वप्रकाशकविभक्तिपदान्तरसमभिव्याहार[ादि]युक्तं लिङ्गस्य वचनं हेतुः ; यथा धूमवत्त्वात्, धूमवत्त्वेन, धूमोऽत्र विद्यते यत इत्यादि । प्रसङ्गद्वारेण वा, अन्यथा निर्धूमत्वप्रसङ्गादित्यादि । सम्यग्व्याप्तिनिर्देशपूर्वकं दृष्टान्तवचनमुदाहरणम् । तच्च व्याप्तेर्दृष्टान्तस्य च शैलीमनुरुध्य अन्वयोदाहरणं व्यतिरेकोदाहरणमिति भिद्यते । तत्र यो धूमवान् सोऽग्निमान् ; यथा महानस इत्यन्वयोदाहरणम् । योऽनग्निः स निर्धूमः ; यथा महाह्रद इति व्यतिरेकोदाहरणम् । यदुक्तसाधनं तदुक्तसाध्यम् ; यदुक्तसाध्यं न भवति, तदुक्तसाधनं न भवति ; यथा संप्रतिपन्नमिति सामान्यतोऽप्युदाहरन्ति । अत्र च यदित्थं तत्तथेति साधारणप्रयोगादेव सर्वोपसंहारः सिध्यति ; यथा गौर्न पदा स्प्रष्टव्या इत्यादौ । अतो यद्यदिति वीप्सानपेक्षा । कस्यचित्तु सा [स्पाष्ट्या] स्पष्टार्था । दृष्टान्तनिदर्शनेन व्याप्ततया पक्षे हेतुमुपसंहरद्वाक्यमुपनयः । सोऽपि पूर्ववत् द्विधा—अयं च तथा, धूमवानित्यन्वयोपनयः, अयं न तथा, निर्धूम इति व्यतिरेकोपनयः । हेतुपूर्वं पक्षे साध्यमुपसंहरद्वाक्यं निगमनम् । तत्रापि पूर्वतुल्यन्यायतया द्वैविध्यमनुसंधेयम् ; यथा—तस्मादसावग्निमान् इति, अयं निरग्निर्न भवतीति च ॥

पञ्चावयवानियमनिरूपणम् ॥ एते पञ्चावयवाः प्रयोक्तव्या इति **नैयायिकाः** । उदाहरणान्तं तदाद्यं वा त्रितयं प्रयोक्तव्यमिति **मीमांसकाः** । उदाहरणोपनयावेवेति **सौगताः** । वयं त्वनिय[तं]मं ब्रूमः, नियमवदनियमस्याप्याभिमानिकतया सिद्धान्तत्वोपपत्तेः । दृष्टश्चानियमेन भाष्यादिषु प्रयोगः—क्वचित् पञ्चावयवः, क्वचित् त्र्यवयवः, क्वचिदवयवकल्पनारहितः, क्वचिदेकव्याप्तिकः, क्वचिद्व्याप्तिद्वयविशिष्टः इत्यादि । इदं च वादिनोः परस्परसंवादानुरूपयथाभिमतव्यवहाराभ्यनुज्ञालिङ्गम् । प्रतिवाद्यभिमतप्रस्थानेन व्यवहारमन्येऽपि केचिदिच्छन्ति, *पिशाचानां पिशाचभाषयैवोत्तरं देयमिति न्यायात् । अतोऽप्यनियतावयव एव प्रयोगः । उपपन्नश्च मृदुमध्यकठोरधियां विस्तरसंग्रहाभ्यां व्यवहारः । यद्यप्युदाहरणोपनयाभ्यामेव व्याप्तिपक्षधर्मतयोः सिद्धत्वात् तावदेव तत्त्वतो वक्तुमुचितम् ; तथाऽपि विवक्षित[स्फौट्या]स्पाष्ट्याय प्रतिज्ञाहेतूदाहरणानि, उदाहरणोपनयनिगमनानि वा वाच्यानि, अन्यथा विवादविषयस्य साध्यार्थस्य व्यक्तप्रतिपादनानुपपत्तेः । ये तु प्रतिज्ञादित्रयानन्तरं हेतोरसिद्ध्यन्यथासिद्धिपरिहारार्थं उपनयः ; निगमने हेत्वंशः सिद्धसाधनतापरिहाराय, साध्यांशस्तु बाधपरिहारायेति वर्णयन्ति ; तैर्नूनं तत्तद्दोषपरिहाराय मन्त्रपाठोऽयमिष्टः, प्रतिज्ञाहेतुभ्यामेव तदर्थाभिधानसिद्धेः, अन्यथा नायमसिद्धो नापि बाधित इति व्यक्तमेव वक्तव्यत्वात् । आभासोद्धार[निबन्धने, निर्बन्धः] निबन्धेन पुनरुक्तिश्चेति । भगवद्यामुनमुनिभाष्यकारादिभिश्च पञ्चावयवा अपि हेतवः प्रयुक्ता इति चेत्, सत्यम् ; अत एव ह्यनियमः सिद्धान्तितः । न च ग्रन्थेषु निबद्धमिति व्यवहारेऽपि तथेति नियमः, *स च प्रत्यगात्मा मुक्तावप्यहमित्येव प्रकाशते, स्वस्मै प्रकाशमानत्वात् इत्यादावन्वयव्यतिरेकौ द्वावप्युक्ताविति, तावता तयोर्द्वयोरप्यवश्यपठनीयत्वापातात् । यच्चेदं प्रयोगसंस्थानं निर्णीतम्, न तत्राप्यस्माकं निर्बन्धः, अत्र पर्वतेऽग्निरस्ति, यदत्र धूमो विद्यते ; दृष्टं च धूमव[तां सर्वेषा]तामग्निमत्त्वमित्यादिनाऽपि तदर्थप्रतिपादनोपपत्तेः । दृश्यन्ते चैवंविधानि चित्राणि

प्रयोगवाक्यानि सर्वसैद्धान्तिकानां ग्रन्थेषु । एवमेव च पदानामन्वयमात्रं प्रधानयित्वा लौकिकवैदिकव्यवहारा अपि वर्तन्ते । **तत्त्वरत्नाकरे**ऽपि, पञ्चानाम[प्य]वयवानां पृथक् प्रयोजनान्यभिधाय *अतश्च [सर्वत्र] पञ्चावयववाक्यमाद्रियन्ते **वेदाचार्यादयः**—*पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषवित् इत्यादौ, इत्यभिधायैव पुनरनियमः प्रतिपादितः—*न च सर्वदा सर्वेऽवयवाः प्रयोज्याः, न न्यूना नाधिका इति निर्बन्धीमः, वक्तृप्रतिवक्तृसंप्रतिपत्तौ लघूपायोपादानेऽपि दोषाभावात्, लोकेऽपि तथा व्यवहाराच्च—इति। साधर्म्यवैधर्म्यवचनप्रयोगे चोक्तम्—*[यथायोगं] यथोपयोगं प्रतिपत्त्रपेक्षया विकल्पसमुच्चयावेव, अविरोधादिति । अन्यच्चोक्तम्—*प्रतिज्ञायाः परं हेतूदाहरणयोर्न क्रमनिर्बन्धः, व्याप्तिहेतुप्रदर्शने विशेषाभावादित्यादि । अत एव पक्षादिवचनदोषविशेषाणां केषांचित् तत्रैवोक्तानामपि नियमकथाविषयत्वं सूचितम् । उपमानान्तर्भावदशायां चोक्तम्—*सोऽयं गवयपदाभिधेयः, गोसदृशत्वात्; य इत्थम्, स तथा, यथोक्तमाप्तेन ; अयं च गोसदृशः; ततस्तत्पदवाच्यः इत्युक्त्वा—

*व्याप्तौ दृष्टान्तदृश्यायामवश्यं स निदर्श्यते । आगमाद्व्याप्तिसिद्धौ न व्याप्तिस्मृत्यर्थमीयते ॥
धूमवानग्निमानेवेत्याप्तोक्तायां तथा गतिः । इत्यादि ॥

प्रज्ञापरित्राणे तु **वरदविष्णुमिश्रो**क्तानुसारेणैवमुक्तम्—

*परार्थमनुमानस्य प्रयोगेऽवयवास्त्रयः । प्रतिज्ञा चाथ हेतुश्च तथोदाहरणं मतम् ॥ इत्यादि ॥

अतो व्याप्तिपक्षधर्मताप्रतिपादनोपयुक्तेन येनकेनापि प्रकारेण व्यवहरेत् । नियमकथायां तु यथानियममिति रहस्यम् ॥

कथानिरूपणम् ॥ विचारविषयगोचरो वादिप्रतिवादिवाक्यसंततिविशेषः कथा । सा द्विविधा वीतरागकथा विजिगीषुकथा चेति। पूर्वो वाद इति सामान्यशब्देनैव विशेषतोऽपि निर्दिश्यते । सा चैवं **न्यायतत्त्वे संयोगाधिकरणे** लक्षिता—*परस्य स्वोपदे[शो न्याय]शन्यायेन निश्चितार्थो व्यवहारो वादः इति । शिष्याचार्यव्यवहारवत् प्रमाण[त्वा]तर्काभिमानास्पदसाधननिश्चितार्थविषयो व्यवहारो वाद इत्यर्थः। तत्र स्वपक्षस्थापनं परपक्षदूषणमित्यवयवद्वयम्॥ केचित्तु साधनसमर्थनदूषणसमर्थनादिभिः सह पञ्चावयवतामाहुः; तदयुक्तम्, स्वपक्षदूषणोद्धारतत्समर्थनादेरप्यवयवान्तरत्वप्रसङ्गात् । यदि स्वपक्षसाधनादौ तदन्तर्भाव इति न पृथग्[ग्रहणात्]गणना, तदा स्वपक्षस्थापनपरपक्षप्रतिक्षेपयोरेव सर्वान्तर्भाव इति तावत्येव गणनोचिता । अत्र च बुद्धिपूर्वकदुष्टवचनानि न संभवन्ति, [अन्यत उ] अन्यानि तूद्भावितन्यभ्युपगन्तव्यानि, तत्त्वनिर्णयाय प्रवृत्तत्वात् । विजिगीषुकथायां तु गत्यन्तरमलभमानस्य परव्यामोहनेनापि पाक्षिकविजयः समत्वं वा संभवेदिति बुद्धिपूर्वकदुष्टप्रयोगसंभवः। सा च द्विधा जल्पो वितण्डेति । तत्रोभयपक्षोपन्यासतत्प्रतिक्षेपवती कथा जल्पः। वादिपक्षोपन्यासतत्प्रतिक्षेपमात्रवती [कथा] वितण्डा । केचित्तु वितण्डायामपि वीतरागविजिगीषुभेदाद्भेदमाहुः ; तदयुक्तम्, वीतरागस्य परपक्षप्रतिक्षेपपर्यन्तव्यापाराभावे तत्त्वनिर्णयासिद्धेः । विजयस्तु तावताऽपि संभवत्येव, अभ्युपगम[नीयस्य] निय[तत्त्वात्]तत्वात् । वादे परपक्षस्य कालात्ययापदेशनिर्वाहे तु न पुनः स्वपक्षनिरूपणं, तेनैव तत्फलस्यापि सिद्धेः । न हि पुनस्तस्यैव प्रमाणस्य पाठे प्रयोजनम् । न च स्थापितस्वरूपादिमत् प्रमाणमनादृत्य मानान्तरमन्वेषणीयम्। न च नैरपेक्ष्येणोपरमाद्वितण्डात्वम्, अपेक्षायां सत्यां प्रतिवादि[ना स्व]पक्षस्थापनस्यापि कर्तव्यत्वेन वैषम्यात्। जल्पे तूक्तिगुणदोषाभ्यामपि जयपराजयौ स्यातामिति कालात्ययापदेशायोपन्यस्तस्यापि प्रमाणस्य पुनः पाठाद्युपपत्तिः । आगमसिद्धा चेयं कथात्रयव्यवस्था, *वादजल्पवितण्डाभिः इत्यादिवचनात् ॥ केचित्तु वितण्डाद्वय-

मेव व्यत्यस्तं जल्प इति वदन्ति; तथाऽपि तथैव नियमात् कथात्रयगणनं नानुपपन्नम् । उक्तं च जल्पवितण्डयोरपि लक्षणं **संयोगाधिकरणे**—*स्वपक्षप्रामाण्यप्रतिपक्षाप्रामाण्यनिश्चयार्थो व्यवहारो जल्पः । प्रतिपक्षाप्रामाण्यमात्रनिश्चया[र्थो]र्थ-व्यवहारो वितण्डा इति । **श्रीमद्गीताभाष्ये**ऽपि—*वादः प्रवदतामहम् इत्यत्र *जल्पवितण्डादि कुर्वतां तत्त्वनिर्णयाय प्रवृत्तो वादो यः, सोऽहम् इति व्याख्यानात् कथात्रयं दर्शितम् । एतेन *विप्रं निर्जित्य वादतः, *न विगृह्य कथां कुर्यात् इत्यादिभिर्जल्पवितण्डयोर्निषेधो विशिष्टविषय इति दर्शितम्; कदाचिद्बाह्यकुदृष्टि[दर्प]भङ्गाय द्वयोरपि कार्यत्वात्' तथा **चाक्षपादसूत्रम्**—*तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् इति ॥

कथाङ्गनिरूपणम् ॥ अथ कथाङ्गानि—सभ्यानुविधेयसंवरणम्, वादिप्रतिवादिनियमः, कथाविशेषव्यवस्था, निरूप्यनिर्णय इति चत्वार्येव । **वरदविष्णुमिश्रैस्तु**—*जल्पश्चतुरङ्गः, अङ्गानि वादिप्रतिवादिसभापतिप्राश्निकाः इत्युक्तम् । वादे तु न सभ्यादिसंवरणनिर्बन्धोऽस्ति, अपलापादीनां प्रायशस्तत्रासंभवात्; वीतरागाः शिष्यगुरुसब्रह्मचारि-शिष्टश्रोत्रियश्रेयोर्थिनो हि तदधिकारिणः । सभ्यानां दैवादागतानां त्ववर्जनम् । अनुविधेयसंवरणं तु सर्वथा [दा] ऽनपे-क्षितमेव, विजयफलप्रतिपादनाद्यर्थत्वादनुविधेयस्य । रागद्वेषरहिता अन्यवरा विषमसंख्याः सभ्याः स्युः, द्वैधे अधिकानां वचनस्य ग्राह्यत्वात् । एकोऽपि वा प्राज्ञतमः । ननु सिद्धान्तनियमोऽप्यवश्यापेक्षितः; तत् कथं चतुष्टयम्? सत्यम्; निरूप्यनियम एव तस्यान्तर्भावादनुक्तिः । न हि तमन्तरेण स उपपद्यते । यत्र तु नानासिद्धान्तानुमतोऽर्थो निरूप्यते, तत्र व्यवहारविशेषनियमार्थं सिद्धान्तविशेषनियमोऽप्यस्तु ॥ केचित्तु निग्रहसामस्त्यासामस्त्योद्भावनप्रतिज्ञानकथापर्यव-साननियमाभ्यां सह षडङ्गान्याहुः; तदयुक्तम्, इच्छाकल्पितत्वेनावश्यापेक्षितत्वाभावात्, अनियतस्य चाङ्गत्वायोगात्; अन्यथाऽतिप्रसङ्गात् । वादे तावत् कथा हि तत्त्वनिर्णयपर्यन्ता वा स्यात् अशक्तिपर्यन्ता वा; न तत्र नियमकृत्यम्; द्वयोः संप्रतिपत्तेरेव पर्यवसानमित्युक्तं भवति । जल्पवितण्डयोरपि निग्रहपयन्ता [सा] । अतस्तत्रापि किं नियमेन? उक्तं हि **प्रज्ञापरित्राणे**—

*निग्रहस्थानपर्यन्ता विजिगीषुकथा मता । तत्त्वनिर्णयपर्यन्तो वादः स्याच्च पुनःपुनः ॥
हेत्वाभासापसिद्धान्ताननुयोज्यानुयुक्तयः । दृश्यन्ते यत्र तत्रैव वादोऽवसितिमान् भवेत् ॥ इति ।

यदि त्वेकस्मिन्नेव निग्रहे कथापर्यवसानमिति नियमो जल्पवितण्डाङ्गमङ्गीक्रियते; तर्हि ए[क]तयैव भाषया भाषितव्यम्, प[ग]द्यादिनियमेनाभिधेयम्, एतत्प्रमाणजातीयं वाच्यम्, महाविद्यादिरीतिरपि ग्राह्या, लिखित्वैव निरूप्यम्, गगन-सूचनभूतलविलेखनादिविकाराः परिहार्याः, मध्ये नान्येन संलपनीयमित्यादिनियमानामप्यङ्गत्वप्रसङ्गः ॥

निग्रहस्थाननियमः ॥ स्वारसिकस्तु कथासु निग्रहस्थाननियम उच्यते । वादे तावत्, अपलापादिकं प्रायशो न संभवति । संभवदपि प्रतिज्ञान्तराज्ञानादिकमनुद्भाव्यम् । उद्भाव्यमप्यवाचकादि न कथाविच्छेदकम् । संप्रतिपत्त्या अनेकहेतुदृष्टान्तदूषणाद्यभिधानेऽपि न दोष इति । जल्पवितण्डयोस्तु यथाभ्युपग[मं]तं सर्वे निग्रहाः ॥

कथास्वरूपविवेकः ॥ तदेवमङ्गेषु चतुर्षु पञ्चसु वा सिद्धेषु यथावलेपं नियमान्तरेषु, कृतेषु, अवहितेषु च सभ्यप्रतिवादिषु, तदभ्यनुज्ञातेन वादिना प्रथमं स्वसाध्यमुद्दिश्य तत्र विवक्षितः प्रत्यक्षादिरूपः प्रमाणविशेषो वाच्यः । प्रतिवाद्यापादितश्चाभास उद्धरणीयः । विपक्षे बाधकाभावादिप्रसङ्गे च तर्को वाच्यः । ये पुनः संक्षेपतो विस्तरतो वा आभासोद्धारं तर्कप्रयोगं चावश्यम्भाविनमाहुः, तैर्नूनम् *असद[पवरके]वकरे कांस्यं नास्ति इति लोकवादोऽनुसृतः ।

अनिष्टप्रसङ्गश्च, आभासोद्धारतर्कप्रयोगवाक्ययोरपि स्वयमेव दूषणोद्धारादेः कर्तव्यत्वप्रसङ्गात्। एवं तदुपर्यपीत्यनवस्था। प्रतिवादिनाऽपि तत्तदनुभाषणपूर्वकं तत्र दूषणं वाच्यम्। ततश्चैवं परस्परवाक्यानुभाषणप्रतिक्षेपाभ्यामुक्तिप्रत्युक्तिपरम्परासिद्धेः। अत्र व्यवहारस्य प्रतिज्ञासाधनदूषणनिर्णयरूपेण चतुष्पात्त्वम्, प्रथमद्वितीययोर्वादिनिष्पाद्यत्वम्, तृतीयस्य प्रतिवादिनिष्पाद्यत्वम्, तस्य च कदाचित् संप्रतिपत्त्यात्मकत्वम्, चतुर्थस्यापि वादिभ्यां सभ्यैर्वा कार्यत्वम्, प्रतिज्ञातविषये प्रत्यक्षानुमानागमेषु मनीषितस्य यथोचितमुपन्या[सः] सप्रका[रः]रः, प्रत्यक्षस्यासिद्ध्या दूषणे सदस्यै रेव निर्णे[तव्य]यत्वम्, लैङ्गिकस्यासिद्ध्या दूषणे तस्याप्यंशस्य प्रतिज्ञापूर्वकं साध्यत्वम्, प्रतिवादिना वादिना वा अनैकान्तिकत्वाद्युद्भावने कृते तेनैव तत्साध्यत्वम्, प्रत्यनुमाने समबलतया निरूपिते सति द्वयोरपि विजयाभावः, वैतण्डिकस्य तु तावताऽपि विजयः, प्रतिकक्ष्यं च वादिप्रतिवादिवचनयोर्लेखनीयत्वम्, छलजात्योरेकान्तविजयाभावेन त्याज्यत्वम्, कदाचिदवष्टम्भविजयावहत्वमात्रेण तत्त्वाध्यवसायसंरक्षकत्वम्, अन्यदन्यदपि विस्तरेण **तत्त्वरत्नाकरे** प्रत्यपादि। तदेवंविधेऽस्मिन् व्यवहारे निग्रहस्थानानि यथासंभवमाविर्भवन्ति। तानि च स्वनामधेयेन अर्थतो वा यथानियममुद्भाव्यानि॥

निग्रहस्थानसामान्यलक्षणम्॥ कथायां स्वाश्रयस्य पराजयनिमित्तं निग्रहस्थानम्। तस्य तन्निमित्तत्वं तत्त्वाप्रतिपत्तिसूचनेन। तत्त्वाप्रतिपत्तिश्च अप्रतिपत्तिविप्रत्तिप्रकारा, प्रतिपत्त्यभावे विपरीतप्रतिपत्तौ च तत्त्वाप्रतिपत्तेरविशिष्टत्वात्। ततश्च तदुभयसूचनान्निग्रहस्थानद्वैविध्यम्। कर्तव्याकरणमकर्तव्यकरणमिति वा। त्रेधा च कश्चित् संग्रहः—वक्तव्यानुक्तिः, उक्तिदूषणम्, उक्तार्थदूषणं चेति। एतदवान्तरभेदान्निग्रहस्थानवैचित्र्यम्। तथा हि—उक्तहानिः, उक्तविशेषणम्, उक्तापलापः, उक्तविरोधः, अपसिद्धान्तः, अवाचकम्, अनन्वितम्, अप्राप्तकालम्, अविज्ञातार्थम्, अर्थान्तरम्, न्यूनम्, अधिकम्, पुनरुक्तम्, अननुभाषणम्, अज्ञानम्, अप्रतिभा, विक्षेपः, मतानुज्ञा, पर्यनुयोज्योपेक्षणम्, निरनुयोज्यानुयोगः, प्रमाणाभासाश्च बहुविधाः प्रत्येकं निग्रहस्थानानीति॥

उक्तहानिः॥ कथायां स्वोक्ते परेण दूषिते स्वेनैव तत्परित्याग उक्तहानिः। सा द्विविधा; शब्दतोऽर्थतश्च। यद्येतद्दुष्टम्, तर्हि त्यक्तमिदं मया इत्यादिः शब्दतः, अन्यत् तर्ह्युपादीयते इत्यादिस्त्वर्थतः। एषा च प्रतिज्ञाहेतुदृष्टान्तप्रत्यक्षागमादित्याज्यभेदात् प्रतिज्ञाहानिहेतुहान्यादिभेदं भजते। तत्र प्रतिज्ञाहानिर्यथा—नित्यः शब्द [इति कैवल्यकथकेनोक्ते अपसिद्धान्तेन दूषिते, तर्हि अनित्योऽस्त्वित्यादि। हेतुहानिर्यथा—अनित्यः शब्दः प्रत्यक्षत्वादित्युक्ते अनैकान्तिकत्वेन प्रत्युक्ते, तर्हि त्यक्तम्; अस्तु कृतकत्वादित्यादि। (तत्रैवान्यव्यापकं साध्य) तत्रैव अस्तु सामान्यतोऽप्यन्यव्यापकं साधनमित्यादिवचने प्रतिज्ञाहान्यादि।] इत्युक्ते बाधितत्वेन दूषिते तर्हि अनित्यः शब्दः इति। हेतुहानिर्यथा—तत्रैव शब्दत्वादित्युक्ते असाधारण्यादिभिर्दूषिते, तर्हि कृतकत्वं हेतुरिति। दृष्टान्तहानिर्यथा–तत्रैव सामान्यवदित्युक्ते साध्यसाधनविकलतया दूषिते, तर्हि घटो दृष्टान्त इत्यादि। एवं धर्मिविशेषणहेतुविशेषणदृष्टान्तविशेषणादेरपि हानिरूह्या। प्रत्यक्षहानिर्यथा—स्थिरः शब्दः प्रत्यभिज्ञानादित्युक्ते भ्रान्ततुल्यत्वेन प्रत्युक्ते, अस्तु तर्हि अनुमानेन आगमेन वेत्यादि। आगमहानिर्यथा—सर्वं क्षणिकं सर्वज्ञेन तथाऽभिधानादिति सौगतेनोक्ते बुद्धस्यानाप्तत्वेन प्रत्युक्ते, अस्तु तर्हि सत्त्वानुमानादित्यादि। एवं हान्यन्तराण्यपि चिन्तनीयानि। वादे तु सदुक्तं निर्वाह्यम्। असदुक्तं तु त्याज्यमेव, तन्निर्वहणस्य तत्त्वनिर्णयानङ्गत्वात्, तद्विपर्ययस्य तु तादर्थ्यादिति। दुष्टस्य त्यागान्निर्दोषः स्यामिति सङ्कल्पादुक्तहानिसंभवः। निर्वाह्यमेव वदेत्। जल्पवितण्डयोस्तु उक्तं च निर्वहेदिति रहस्यम्॥

उक्तविशेषणम् ।। अविशेषितपूर्वोक्ते दूषिते, तद्विशेषणनिक्षेप उक्तविशेषणम् । अविशिष्टपरित्यागादेतदपि हानिरेवेति चेन्न, अविशिष्टत्वस्यानुक्तत्वात्, उक्तमात्रस्य चापरित्यागात् । साध्यसाधकांशविशेषणभेदादेतत् प्रतिज्ञान्तरहेत्वन्तरसंज्ञं निग्रहस्थानद्वयम**क्षपादेन** पठितम्; तदयुक्तम्, सामान्यसंग्रहस्य दृष्टत्वात्; अन्यथा हानिरपि तथैव प्रतिज्ञाहानिर्हेतुहानिरिति निग्रहस्थानद्वयं स्यात्, अविशेषात् । उक्तं च हेत्वन्तरं पृथगभिदधानैरपि **वरदविष्णुमिश्रैः**—

* पक्षदृष्टान्तहेत्वादिदूषणे कथिते सति । पुनर्विशेषणादानं प्रतिज्ञान्तरमिष्यते ।। इति ।

द्विविधं चैतत्, सामान्यतो विशेषतश्चेति; यथा—अनित्यः शब्दः प्रत्यक्षत्वादिति वैशेषिकेण प्रयुक्ते, सामान्यादिभिरनैकान्तिकत्वे मीमांसकेनोद्भाविते, अस्तु तर्हि यत्किंचिद्विपक्षव्यावर्तकं विशेषणमिति सामान्यतः; अस्तु तर्हि जातिमत्त्वे सत्यस्मदादिप्रत्यक्षत्वादिति इति विशेषतः । इदमपि पक्षसाध्यहेतुदृष्टान्तप्रत्यक्षागमादिरूपविशेष्यभेदाद्बहुविधम् । तत्र पक्षविशेषणं यथा—अनित्यश्शब्द इत्युक्ते मीमांसकेन अंशतः सिद्धसाधनत्वाभिधाने, तर्हि वर्णात्मकः शब्द इत्यादि । साध्यविशेषणं यथा—क्षित्यादिकं प्रयत्नवत्पूर्वकमित्युक्ते प्राचीनादृष्टसाधकप्रयत्नवज्जीवपूर्वकतामात्रेण सिद्धसाधनत्वेऽभिहिते, अस्तु तर्हि साक्षादुपादानादिगोचरज्ञानचिकीर्षाप्रयत्नवत्पूर्वकमिति इति । हेतुविशेषणं प्रागुदाहृतम् । दृष्टान्तविशेषणं यथा—यत् सत्, तत् क्षणिकम्, यथा घट इति बौद्धेनोक्ते साध्यविकलतया प्रत्युक्ते, अस्तु तर्हि कुर्वद्रूपक्षणावच्छिन्नो घट इति । प्रत्यक्षविशेषणं यथा—भावरूपाज्ञानम् अन्धकारादिवत् सर्वलोकप्रत्यक्षमित्यद्वैतिनोक्ते बाह्यान्तरप्रत्यक्षविकल्पानुपपत्त्या दूषिते, अस्तु तर्हि साक्षिप्रत्यक्षमन्यदेवात्र प्रमाणमित्यादि । एवमुदाहरणान्तराण्यपि चिन्त्यानि । निर्विशेष[स्यैव]णस्य दोषो विशिष्टे [तु स] नापततीति व्यवसायादुक्तविशेषणसंभवः । प्रागेव पुष्कलं वदेत् । अपुष्कलोक्तं तु जल्पवितण्डयोस्तात्पर्यभेदादिना निर्वहेत्, न तु विशेषयेदिति रहस्यम् । सतो हानौ विशेषणे च पर्यनुयोज्योपेक्षणसध्रीचीनमिदं निग्रहस्थानद्वयमुद्भाव्यम् । न च तथा सति स्वदोषोद्भावनदोषः, व्यामोहनार्थं प्रत्युक्तमसदप्यनेन न ज्ञातमित्यवष्टम्भविजयावहत्वात् । दूषणाधिक्यं तु न सर्वदा दोष इति ।।

उक्तापलापः ।। स्वयमुक्तस्य सभ्यादिविदितस्य परेण दूषितस्य निगूहनमुक्तापलापः । स च बहुविधः— न मयैवमुक्तमिति वा, अन्यदेव मयोक्तमिति वा, त्वमेवोक्त्वा मय्यारोपयसीति वा, त्वदुक्तमन्योक्तं वा मयाऽनूदितमिति वा, पार्श्वस्थेनैवमुक्तमिति वा, अनुक्तमप्रक्रान्तमेव त्वया भ्रान्तिवशादवगतमिति वा, अशरीरिवाक्यमिदमिति वा । ईदृशस्यापलापस्य संभवहेतुः पश्यतोहरेषु शिक्षणीयः । प्रतिज्ञाहेतुदृष्टान्तप्रत्यक्षागमाद्यपलपनीयभेदादयमपि बहुविषयः पूर्ववदुदाहरणीयः । नियमपरिहरणीयहस्तचेष्टाद्यपह्नवसंग्रहाय कृतापलाप इति लक्ष्यलक्षणसिद्धिः । स्पष्टानुष्ठितनिह्नवे च समर्थनीयान्तराभावात् परिषदनुविधेयावेव स्थेयतया शरणम्, विश्वसाक्षिणां चतुर्दशानामपि तूष्णींभावात् [तूष्णीकत्वात्] । एवं सार्वलौकिकप्रतीत्यपह्नवेऽपि । उक्तं च **नारायणार्यैर्भगवद्गीता[भाष्ये]व्याख्याने**—

* प्रसिद्धमपि विज्ञानं वादे यो नाम निह्नुते । स सदस्यैर्नियन्तव्यो व्यवस्था नान्यथा यतः ।। इति ।।

सभ्यादिविदितमुक्तं कृतं वा नापलपेदिति रहस्यम् । अपलापमेव प्रतिज्ञासंन्यासशब्देनाक्षपाद उपचचार; तदिह हानिसंन्यासशब्दयोरैकार्थ्यभ्रमहेतुतया नाद्रियामहे । अत्रापि सदपलापे पूर्ववत् पर्यनुयोज्योपेक्षणसध्रीचीनता । एतानि त्रीण्यपि निग्रहस्थानानि तृतीयादिकक्ष्याभावीनि तदुत्तरकक्ष्योद्भाव्यानि ।।

उक्तविरोधः ॥ स्वोक्तस्य स्वेनैव विरुद्धकरणमुक्तविरोधः । स द्विधा पदवाक्यभेदात् । पदविरोधो यथा—ईश्वरोऽनीश्वरः[नेश्वरः] इत्यादि । वाक्यविरोधो यथा—ईश्वरः सर्वज्ञ एव ; तथाऽपि स्व [1] ज्ञानमेकं न जानातीत्यादि । स चायमवान्तरभेदाद्बहुविधः । तत्र प्रतिज्ञापदद्वयविरोधो यथा—ईश्वरो न सर्वज्ञ इत्यादि । पक्षहेतुविरोधो यथा—ईश्वरः कर्मवश्यः, जीवत्वादित्यादि । साध्यहेतुविरोधो यथा—क्षित्यादिकं सकर्तृकम्, अकर्तृकत्वादित्यादि । स्ववचनविरोधो यथा—यावज्जीवमहं मौनी मूको वेत्यादि । स्वक्रियाविरोधो यथा—सर्वदा निर्व्यापारोऽहमित्यादि । एवम्, न किंचिदहं याचे, अतो मेऽर्था दीयन्ताम् ; अमृतं पीतवानहम्, तथाऽपि मे तद्वर्णतः पलितमासीत् ; न कश्चिन्मे सिद्धान्तः, तथाऽपि शून्यं चिन्मात्रं वा तत्त्वम् ; अवेद्यं ब्रह्म, तथाऽपि तज्ज्ञानान्मोक्षः ; न किंचित् कारणं कार्यं वा, तथाऽपि भूतपरिणतिविशेषाच्चैतन्यमित्यादीनि तत्तत्सैद्धान्तिकानां व्याहतभाषितान्यवगन्तव्यानि । एषु चोक्तस्य क्वचिच्छाब्दो विरोधः, क्वचिदार्थः । अभ्युपगतनियमविरुद्धाचरणमप्यत्रैवान्तर्भवति ; तद्यथा—संस्कृतमभ्युपगम्य अपभ्रंशेन भाषणम् ; कृत्स्नानुभाषणाद्यभ्युपगमे दूष्यमात्रानुभाषणादिकम् ; हस्तचेष्टादिवर्जनमभ्युपगम्य तत्करणमित्यादि । एवं शास्त्रान्तरपठितानि विसन्धियतिभङ्गभिन्नवृत्तनेयार्थत्वादीन्यपि तत्तन्नियमापेक्षया दूषणान्यत्रैवान्तर्भवन्ति । जैनकौमारिलादिनयेन विरोधतिरस्कारादनवधानादेश्चास्य संभवः । स्ववचनस्वाभ्युपगमाविरुद्धमेवाचरेदिति रहस्यम् । अयं प्रथमादिकक्ष्याभावी तदनन्तरकक्ष्योद्भाव्यः ॥

अपसिद्धान्तः ॥ स्वाभ्युपगत [सिद्धान्त] विरुद्धाभ्युपगमोऽपसिद्धान्तः ; यथा—सांख्यस्य आत्मा कर्तेति ; वैशेषिकस्य आत्मा चिद्रूप इत्यादि । एवं स्वस्वसैद्धान्तिकानभ्युपगतं प्रमाणं पुरस्कुर्वन्नपि वस्तुतस्तत्प्रामाण्ये तदभावेऽप्यनेनैव निग्राह्यः, तत्प्रमाणत्वे वक्तव्यदूषणान्तराभावात्, तदप्रमाणत्वे तद्धेतुसमर्थनप्रयासतोऽप्युद्भटस्याभ्युपगमनियतस्यास्यैवोद्भावयितुमुचितत्वात् । यस्त्वनुमानादिकमर्थापत्त्यादिशब्दमात्रेण व्यपदिशति, न स निग्रहीतव्यः । अभ्युपगततदैक्यस्य पर्याय [वादे] पाठे विरोधाभावेन निरपराधत्वात् ; अन्यथाऽतिप्रसङ्गात् । अथ चेत् स एवावष्टम्भेन पृष्टः पृथक्त्वं प्रतिब्रूयात्, तथाऽप्यपसिद्धान्तावतारः । एवं कौमारिलादेरभ्युपगतबहिर्भावस्यार्थापत्त्यादेरन्तर्भावानुज्ञानेऽपि पूर्ववत् तद्याथाथ्र्यायाथार्थ्ययोरयमेव निग्रहः । अत्र स्वाभ्युपगतसिद्धान्तविरुद्धकरणमात्रव्यवच्छेदायाभ्युपगमशब्दः । समस्ति हि वस्तुतो निग्रहस्थानान्तरेष्वपि स्वसिद्धान्तविरुद्धाचरणम्, परिहृतसर्वापराधेन कथा प्रवर्तनीयेति सर्वसैद्धान्तिकसंमतत्वात् । न चैतावता सर्वेषामपि निग्रहस्थानानामपसिद्धान्ततेति । नन्वेवमपि अपसिद्धान्त उक्तविरोधेऽन्तर्भावनीयः, एतत्सिद्धान्तवर्त्मना व्यवहरिष्यामीति कथारम्भं प्रतिज्ञाय तत्पर्यवसानात् पूर्वं तद्विरुद्धभाषणात् ; सत्यम् ; त्वत्परिगृहीतसिद्धान्तविरुद्धोऽयमर्थस्त्वयाऽभ्युपगम्यते ; अतः पूर्वोक्तसिद्धान्ताभ्युपगमवाक्यविरोध इति वक्तव्यम् ; तत्र प्रथमपर्वणि स्थितस्योपजीव्यस्योद्भटस्य सिद्धान्तविरोधस्यैवोद्भाव्यत्वमुचितमिति पृथग्व्यपदेशः । स्वस्यापि तत्तच्छास्त्रकर्तृसाम्याभिमानात्, प्रमादादेश्चास्य संभवः । अतीर्थकरः स्वस्वाभ्युपगतसिद्धान्तविरुद्धं नाङ्गीकुर्यादिति रहस्यम् । कथं तर्ह्येकस्मिन्नेव दर्शने मतभेदप्रवृत्तिरिति चेत्, तीर्थकरवाक्यानां तत्तत्परत्वाभिमानात् । कथं तर्हि वार्तिकादिसृष्टिरिति चेत्, स्वतन्त्रस्य सतोऽभ्युपग [तै] मैकदेशस्य स्वयमंशतस्तीर्थकरत्वात् । अस्त्वेवमपसिद्धान्तेऽपीति चेन्न, पूर्वमेव तथाऽभ्युपगमाभावात् । अभ्युपगमे वा को नाम तत्रापसिद्धान्तमुद्भावयेदिति । अस्य प्रायशो द्वितीयादिकक्ष्यासु संभवः । पृथुकव्यवहारेषु प्रथमकक्ष्यायामपि । द्वितीयकक्ष्यायां तु स्वसिद्धान्तविरुद्धसाधनेऽपि सिद्धसाधनत्वोद्धाटनाद [व] स्यैव तत्संभवः ॥

सिद्धान्तः ॥ अथ कः सिद्धान्तः ? प्रामाणिक इत्यभ्युपगतोऽर्थः ।

अभिमानैकमूलत्वादन्योन्यं च विरोधतः । न कश्चिद्यदि सिद्धान्तो नैवं तत्सिद्ध्यसिद्धितः ।

सिद्धान्ताभाव एवायं प्रामाणिक इतीष्यते । नेष्यते वा द्विधाऽप्येवं सिद्धः सिद्धान्तसंग्रहः ॥

स त्रिविधः—सर्वतन्त्रप्रतितन्त्राभ्युपगमसिद्धान्तभेदात् । यमन्तरेण वादव्यवहारोऽपि न घटते, स सर्वाभ्युपगतः सर्वतन्त्रसिद्धान्तः; यथा प्रमाणात् प्रमेयसिद्धिरित्यादि । अभ्युपगतो हि माध्यमिकादिभिरपि सांवृतादिसंज्ञातः प्रमाणप्रमेयव्यवहारः । स्वतन्त्र एव सिद्धः परतन्त्रैर्निषिद्धः प्रतितन्त्रसिद्धान्तः; यथा—वैयाकरणस्य स्फोटः; सौगतस्य क्षणभङ्गः, दिगम्बरस्य सप्तभङ्गी, कौमारिलादेः शब्दभावनादिलिङर्थता, त्र्यन्तविदामीशितुः सर्वशरीरित्वादि । अमी च सिद्धान्तान्तरानभ्युपगमप्रसिद्धिदशायामेव प्रतितन्त्राः; यदि कश्चिदन्योऽपि तीर्थकरस्तानेवार्थानभ्युपगच्छेत्, तदा तेषामभ्युपगमसिद्धान्तत्वम् । न चापूर्वास्तीर्थकरा न भवन्तीति नियमः, तथात्वे प्राथमिकैकसिद्धान्तपरिशेषप्रसङ्गात् । न च तैस्तेऽर्था नाभ्युपगन्तव्या इति वाच्यम्, आवापोद्वापभेदानामिदानीमपि दर्शनात्, अभिमानमूलत्वाच्च सिद्धान्तानामिति । अव्यापकः स्वतन्त्रस्य तन्त्रान्तरस्य च साधारणोऽभ्युपगमसिद्धान्तः; यथा—नैयायिकादीनां सामान्यविशेषसमवायादिः, सांख्यादीनां भेदाभेदादिः, सौगतादीनां प्रपञ्चमिथ्यात्वादिः । परतन्त्रे साधितः स्वतन्त्रे च समाश्रित इति वा, तन्त्रान्तरसिद्धसद्भावस्य वस्तुनो विशेषपरीक्षणमिति वा केचिदाहुः । अत्र स्वतन्त्रपरतन्त्रसाधारण्यमेव निष्कृष्टलक्षणं भवति ॥ केचित्तु कस्य चित् साधने अनुषङ्गसिद्धोऽन्य आधारसिद्धान्त इति चतुर्धा विभागमाहुः; यथा—क्षित्यादेः सकर्तृकत्व [मात्र] सिद्धावीश्वरसिद्धिरित्यादि । **अक्षपादश्च** सिद्धान्तचातुर्विध्यं प्र [क्रम्या] कृत्याह—* यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः इति; तदयुक्तम्, तस्य सर्वैरभ्युपगमे सर्वतन्त्रसिद्धान्तत्वात्, स्वतन्त्रमात्रसिद्धौ प्रतितन्त्रत्वात्, परैरपि कैश्चिदभ्युपगमेऽभ्युपगमसिद्धान्तत्वात् । केवलं त्वयमस्य सिद्धान्त इति निर्णये अनुषङ्गसिद्धिर्लिङ्गं भवतीत्येतावता यदि पृथगभिधानम्, काममभिधीयतामिति ॥

अवाचकम् ॥ शब्दशास्त्रविरुद्धस्वरूपमवाचकम्; यथा—कृत्तद्धितसमासाख्यातलकारात्मनेपदपरस्मैपदसकर्मकाकर्मकलिङ्गवचनविभक्तिवर्णादेशागमप्रभृतीनां विपर्यासन्यूनातिरेकादयः । उदाहरणानि त्वशिक्षितानां वचनान्येव द्रष्टव्यानि । अपशब्दमपि सुशब्दयिष्यामीति वैयाकरणत्वगर्वादशिक्षितत्वानवधानादिभिश्चास्योक्तिसंभवः । वक्तव्यतयाऽभ्युपगतभाषामूलव्याकरणसिद्धमेव नियमकथायां भाषितव्यमिति रहस्यम् । उक्तं च **प्रज्ञापरित्राणे**—

* साधुगीर्वाणवाण्यैव प्रयोगनियमे कृते । अप [भ्रंशा] शब्दान्यभाषाभि [भा] र्षणं चापि दूषणम् ॥

अकृते नियमे सर्वभाषाभिरपि भाषणम् । स्खलने च पुनः साधुशब्दग्रहणमिष्यते ॥ इति ।

एवं सत्ययमपि नियमविरोध इति चेत्, सत्यम्; तथाऽपि स्वतोऽपशब्दस्य दूषणत्वसंभवादुपजीव्यत्वाच्चास्यापि पृथग्व्यपदेशः । * सर्वभाषाभिरपि इत्युभयाभ्युपगतैकापभ्रंशभाषाविषयम्, न पुनस्तदातदा यथेच्छमव्यवस्थितभाषाभिप्रायम्, तथा सति परानभ्यस्तभाषयाऽपि भाषणप्रसङ्गे परस्परवार्तानभिज्ञतया वादिनोर्निष्फलपरिश्रमत्वप्रसङ्गात् । अत उभयाभ्यस्तया नियमपरिगृहीतयैव भाषया व्यवहरेदित्यर्थः । इदं च निग्रहस्थानं सर्वकक्ष्यासंभावितं तदैवोद्भाव्यं च ॥

अनन्वितम् ॥ उचितान्वयशून्यमनन्वितम् । तद्विधा पदवाक्यभेदात्; यथा—स्तम्भः कुम्भः कुड्यं कुसूलमित्यादि । यथा च पर्वतो वह्निमान्, महाह्रदो बकोट [बहूदक] वानित्यादि । व्यवहितान्वयमप्यनन्वयम्, प्रतीत्यभावा-

विशेषात् । न चास्य विपर्याससङ्करः, पद्य[ादि] नियमकथायां विपर्यासस्य क्षन्तव्यत्वेऽपि व्यवहितान्वयस्य दूषणत्वात्, विपर्यासे व्यवहितान्वयत्वाभावात् । संभावितसमस्तान्वयप्रकारविकल्पे तदनभ्युपगन्तुर्विकल्पविशेषानन्वय इत्याहुः । नन्वाकाङ्क्षासत्तियोग्यताभिरन्वयः; तासामेकैकाभावेऽप्यनन्वय इति सिद्धम् । ततश्च येषु वाक्येष्वाकाङ्क्षासत्त्योरभावः, तत्रानन्वितनिग्रहस्थानावकाशः; यत्र तु योग्यताविरहादनन्वयः, तत्र विरोधनिग्रहस्थानमेव स्यात्, विरोधमन्तरेणायोग्यत्वस्यापादयितुमशक्यत्वादिति चेत्, अस्त्वेवम्; तथाऽपि पृथग्विषयलाभान्निग्रहस्थानद्वयं सिद्धम् । नन्वनन्वितस्यास्ति पृथग्विषयः, तथाऽपि विरोधस्य सर्वस्यायोग्यतयैव क्रोडीकारान्न पृथग्विषयलाभ इति चेत्, सत्यम्; तथाऽप्यन्वयायोग्यतानिमित्तस्य विरोधस्यैवोद्भटत्वात् तस्यैवोद्भाव्यत्वम् । न चैवमाकाङ्क्षासत्तिविरहयोरपि पृथगुद्भाव्यत्वम्, तयोर्द्वयोरप्यन्वयप्रतीतेरेवानुदयात् । इह तु शब्दस्वरसतो जातस्यान्वयबोधस्य विरोधेन बाधादिति । यत्र तु विप्रलम्भकादिवाक्ये प्रतिवादिवाक्ये च सामान्यतस्तत्तद्वस्तुस्वभावप्रयुक्तविरोधाभावेन दृढोदितेऽप्यन्वयबोधे प्रमाणान्तरपरामर्शाद्बाधः, तत्र तु तत्तत्प्रमाणबलाद्विशेषतः सत्यपि विरोधे तत्तत्प्रमाणबाध एवोद्भाव्यः, तस्यैव तत्रोपजीव्यत्वादिति ॥

अप्राप्तकालम् ॥ विवक्षितक्रमस्य विपर्यस्तकरणमप्राप्तकालम्; यथा—सभ्यानुविधेयसंवरणादिकमकृत्वा प्रयोगे वादारम्भविपर्यासः, प्रतिज्ञाहेतुदृष्टान्तादेर्विपर्यासेन वचने अवयवविपर्यासः, अनित्यः शब्द इत्यादाववयवांशविपर्यासः, तर्कमभिधाय प्रयोगे अङ्गाङ्गिविपर्यासः, वाद्युक्त[मशेष]मदूषयित्वा प्रतिवादिना स्वपक्षसाधने वादविपर्यास इत्यादि । वाक्यस्य परप्रत्यायनार्थत्वाद्विपर्यासेऽपि परप्रत्ययसंभवाभिमानात् तदुक्तिसंभवः । नियमकथायामभ्युपगतक्रमातिक्रमेण न कुर्यादिति रहस्यम् । अनित्यः शब्द इत्यादिप्रयोगस्तु विपर्यासेऽपि शीघ्रान्वयप्रतिपत्तेरनियमकथायां वादे च सोढव्य इत्यादि ॥

अविज्ञातार्थम् ॥ त्रिभङ्ग्यन्तराभिधानेऽपि प्राश्निकप्रतिवादिष्वन्यतमेनाप्यज्ञातार्थं वचनमविज्ञातार्थम् । तच्चाप्रसिद्धप्रयोगस्वसिद्धान्तमात्रसिद्धप्रयोगार्थान्तरसाधारणप्रयोगादिभेदाद्बहुविधम् । तत्राप्रसिद्धप्रयोगो यथा—अहार्यो वीतिहोत्रवानित्यादिः । स्वसिद्धान्तमात्रसिद्धप्रयोगो यथा—पञ्चस्कन्धद्वादशायतनादिप्रयोगः सौगतानाम्; अस्तिकायपर्यायपुद्गलादिप्रयोगो दिगम्बराणाम्; यतमानव्यतिरेकैकेन्द्रियवशीकारसंज्ञादिप्रयोगः पातञ्जलानाम्; स्फ्यकपालादिप्रयोगो मीमांसकानाम्; सुतेजाः विश्वरूपः, पृथग्वर्त्मा, बहुलः, रयिः, प्रतिष्ठेति त्रय्यन्तविदामित्यादि । साधारणप्रयोगो यथा—महीभृत् लोहिताश्ववानित्यादिः । केवलयोगमूलप्रयोगो यथा—पयःपयोधिसंभवाकान्तपदवैशेषिकगुणः उत्तरावध्युपलक्षितवस्तुसत्तावान्, पूर्वान्तोपलक्षितवस्तुसत्तायोगित्वात्, दण्डादिव्यापारनिष्पाद्यावयवसंयोगासमवायिकारणद्रव्यवदित्यादिः । स्वोक्तिदोषतिरस्करणश्रद्धया प्रतिवादिव्याकुलीकरणाद्यभिसन्धेर्वा संभवोऽस्य । स[भा]भ्यप्रसिद्धैर्विवक्षितासाधारणैरगमितयोगैर्निरस्तग्रस्तादिदोषैः पदैर्व्याहरेदिति सारम्; प्रतिवाद्यभ्युपगमे तु प्रहेलिकाप्राया अपि व्यवहाराः प्रवर्तन्ते । अत एव हि दृप्तैर्महाविद्यादिरीतीनां प्रयोगोऽभ्युपगम्यत इति ॥

अर्थान्तरम् ॥ प्रकृतानुपयुक्तवचनमर्थान्तरम्; यथा—क्षित्यादिकं सकर्तृकम्, प्रमेयत्वादित्युक्त्वा, स्वयमेव दूषणप्रतिभासे, प्रमाविषयः प्रमेयम्, तत्र च त्वप्रत्ययान्तं प्रमेयत्वपदमित्यादि । एवं कुशकाशावलम्बेन प्रकृतानन्वितराजवार्तावतरणादिकमपि । ईदृशानां स्वाज्ञानसंवरणार्थं परव्यामोहनार्थं च प्रयोगसंभवः । अन्वितमप्युपयुक्तमेव वदेदित्युपदेशः ॥

न्यूनम् ॥ वक्तव्यत्वेन स्वसिद्धान्तनिर्णीतस्यैकदेशकथनं न्यूनम्; यथा—पञ्चावयववादिनो **नैयायिकस्य** त्र्यवयवप्रयोगः, **कौमारिलादे**र्द्व्यवयवप्रयोग इत्याद्यवयवन्यूनम्। वादिनः स्वपक्षसाधनमनादृत्य परपक्षं दूषयितुमिच्छतो वादन्यूनम्। सभ्यसंवरणादिकमकृत्वा स्वपक्षं साधयतः कथारम्भन्यूनम्। नचात्र विपर्यासः, तस्य क्रमत्यागात्मकत्वात्, अत्र तु क्रमिण एव त्यागात्। यदि न्यूनत्वोद्भावने पश्चात्करिष्यामीति ब्रूयात्, तदा अस्तु विपर्यास इति। एवं यावत्संभवं विकल्पयतोऽपि संभावितकोट्यन्तरानुक्तौ विकल्पन्यूनत्वमाहुः। स्तम्भादलंबुद्ध्या वा अस्य संभवः। आत्मसिद्धान्तसिद्धं[द्धम] पूर्णं [न]च वदेदित्यादेशः ॥

अधिकम् ॥ अन्वितमुपयुक्तमपुनरुक्तं कृतकरतया स्वसिद्धान्तनिर्णीतमधिकम्। तत्र हेत्वधिकं यथा—धूमवत्त्वादालोकवत्त्वादित्यादि। दृष्टान्ताधिकं यथा—मठवन्महानसवदित्यादि। व्याप्त्यधिकं यथा—अन्वयव्यतिरेकयोर्द्वयोरप्यभिधानम्। तर्काधिकं यथा—एकविषयेऽनेकानिष्टप्रसञ्जनम्। दूषणाधिकं यथा—असिद्धोऽयं हेतुर्विरुद्धश्चेत्यादि। सामान्यत आदिशब्दोपादानेऽप्यधिकत्वमेव; यथा—धूमवत्त्वादेः, महानसादिवदित्यादि। एवमधिकतया स्वसिद्धान्तनिर्णीतानामवयवानामपि कथनं संगृहीतम्; यथा—सौगतादेस्त्र्यवयवप्रयोगादि। पुनरुक्तिर्वा तत्र, तथैव तत्सिद्धान्तादिति। हेतुदृष्टान्तव्याप्तितर्काद्यधिकं तु वादे वस्तुतो न दूषणम्, येनकेनापि तत्त्वनिर्णयाभिसन्धेः। जल्पादौ यावत्प्रतिभासमनेकाभिधाननियमे तु भूषणमपि। यावत्संभवमनेकाभिधानं चासर्वज्ञेनाशक्यमिति प्रायशो न तथा नियमः संभवति। अनयोश्च न्यूनाधिकयोरुद्भावितयोरभ्युपगमे[त्व]ऽपसिद्धान्तो वाच्यः। अवयवाधिकादौ नित्यमपसिद्धान्तत्वं केचिदाहुः; तदसत्, अवयवन्यूनादावपि प्रसङ्गात्। न्यूने विरुद्धं नोक्तमिति चेन्न; अनैकान्तिकादिप्रयोगेऽप्यपसिद्धान्तप्रसङ्गात्। तत्र विरुद्धं नाभ्युपगम्यत इति चेन्न, अधिकावयवत्वप्रयोगेऽपि समत्वात्। वचनलि[ङ्गा हि वक्तुरभिप्रायाः इत्यभ्युपगमः]ङ्गादिभिर्वक्तुरभिप्रायः कल्प्यत इति चेन्न, अपरा[मृश्या]मर्शादिनाऽपि प्रयोगसंभवात्, पूर्वोक्तात् प्रसङ्गाच्च। सर्वतोमुखी साध्यसिद्धिः स्थेयसी स्यादिति सं[कुल]प्लववादसंस्कारादेरधिकस्योत्थानम्। साध्यसिद्ध्यपेक्षितमात्रं साधकमुपाददीतेति समयः ॥

पुनरुक्तम् ॥ स्वोक्तिवशात् परेण शब्दतोऽर्थतो वा प्रतिपन्नस्यैव निष्प्रयोजनं वचनं पुनरुक्तम्। तद्द्विधा—अर्थपुनरुक्तम्, आक्षेपपुनरुक्तं चेति। प्रथमम्—अनित्यः शब्दः, विनाशी ध्वनिरित्यादि। द्वितीयं तु विवादपदं क्षित्यादिकं सकर्तृकमित्यादि। विवादपदमिति हि धर्मिनिर्देशे विवादस्यानेकप्रकारत्वेऽपि साध्यविशेषनिर्देशाद्धर्मिविशेषोऽप्यर्थसिद्ध एव। एवं देवदत्तो गृहेऽस्ति बहिर्नास्तीत्याद्यपि। नियमकथायामेवास्य दोषत्वम्, अन्यदा विशदप्रतीत्यर्थमुपयोगात्। अन्ये तु शब्दपुनरुक्तमित्यपि भेदमाहुः; यथा—शब्दो नित्यः शब्दो नित्य इति; तदसत्, एकार्थत्वे अर्थपुनरुक्तत्वात्, भिन्नार्थत्वे त्वदोषत्वात्। भिन्नार्थोऽपि स शब्दो न वाच्य इति नियमकथायामस्यावकाश इति चेत्, हन्त! तर्हि वर्णस्वरादिपुनरुक्तमपि भेदेन पठनीयम्, तत्रापि धृष्टानां नियमसंभवादिति। सकृदुक्तौ परेण सभ्यैर्वा यदप्रतिपन्नम्, तत्र तदपेक्षया पुनरभिधानं युक्तम्। तत्रापि त्रिरभिधानमित्येव नियमः, आत्मीयान[व]भिधानमतिमान्द्यादिशङ्कया तावन्मात्रस्य सभ्यैरपेक्षणोपपत्तेः। ततः परं तु वचनदोषादेरेव सभ्यैरवधारणान्न भूयस्तदपेक्षा। यत्र तु प्रतिवादिसंमत्या वक्रानुमानादिप्रयोगः, तत्र वचनद्राघीयस्त्ववक्रिमादिभिरेव दुरवधारार्थतया यदि भूयोऽपि सभ्याकाङ्क्षा, तदा यावत्तदाकाङ्क्षाशमनमस्त्वभिधानम्; अत एव परिषदनुज्ञोपलक्षणं त्रिरभिधानमिति केचिदाचार्याः। [अचातुर्य] विशदीकरणाभिसन्ध्यादिभिरस्योत्थानम्। निष्प्रयोजनं न पुनर्वदेदिति रहस्यम् ॥

अननुभाषणम् ॥ त्रिभङ्ग्यन्तरोक्तस्य प्राश्निकविदितस्यार्थस्यानुद्भावितस्वाज्ञानेन यथोचितानुभाषणाभावः अननुभाषणम् । तच्च दूष्यैकदेशानुभाषणतदधिकानुभाषणविपरीतानुभाषणकेवलोत्तरमौनभेदात् पञ्चविधम् । अधिकानुभाषणं तु अधिकाख्यनिग्रहस्थानमित्येके । दूषणमात्रस्यैव परतिरस्कारार्थत्वाभिमानादप्रतिभानाद्वा अस्योत्थानम् । दूष्यमंशमेव तेनैव शब्देन शब्दान्तरेण वा अनुवदेद्यथानियमं नियमकथायामिति संग्रहः ॥

अज्ञानम् ॥ वादिना त्रिभङ्ग्यन्तराभिहिते सभ्येष्वन्यतमेनापि विदितार्थे वचने मया न ज्ञायत इति वाद्यन्तरस्य यद्वचनं तत् तस्याज्ञानम् । वैशद्याय तस्यैवार्थस्य वचनव्यक्त्यन्तरेण प्रतिपादनं युक्तमिति सूचयितुं त्रिभङ्ग्यन्तरोक्तिः । वादे तु स्वाज्ञानाविष्करणं न दोषः । अत एव यावत्प्रतिवादिबोधं तत्राभिधेयम् । परस्याविज्ञातार्थारोपहेतुत्वादार्जवादेर्वा स्वाज्ञानाविष्करणम् । जल्पवितण्डयोः स्वाज्ञानं नाविष्कुर्यादिति संक्षेपः ॥

अप्रतिभा ॥ कथां प्रविष्टस्य साधनदूषणाद्यप्रतिपत्तिरप्रतिभा । उत्तरस्याप्रतिपत्तिरप्रतिभेति प्राचामुपदेशः साधनाप्रतिपत्तेरप्युपलक्षणार्थः विशेषाभावात्, अस्य प्रथमपर्वण्यपि संभवात् । अनुभाषितेऽप्युत्तराभासस्याप्यवचनोपपत्तेरननुभाषणादेर्भेदः । गगनसूचनभूविलेखनकेशविरचनसाध्वसस्वेदादीनामप्येतन्निग्रहस्थानभेदत्वं केचिदाहुः; तदयुक्तम्, सदभिधानदशायां तेषां विद्यमानानामप्यनिग्रहत्वात्, असदभिधानदशायामवचनदशायां च तयोरेव दूषणत्वात् । तद्वर्जननियमकथायां तु तेषां भवत्येव निग्रहस्थानता । तदा चान्यत्रैव तेषामन्तर्भावः । अवचनसमकालभाविनस्त्वेते केवलाप्रतिभामूलव्यथालिङ्गत्वादनृशंसबुद्धीनामप्रतिभानिग्रहस्थानाभियोगं निरुन्धते, तैरेव च सभ्यानां तत्पराजयव्यक्तः । तदहंकारखण्डनं च तैरेव प्रथमदर्शितैः । वचनावसरे तूष्णीको न भवेदिति मर्यादा । अप्रतिभासहेतुरनेकविधो द्रष्टव्यः ॥

विक्षेपः ॥ कथामवगाह्यैव तद्विच्छेदमिच्छतोऽनावश्यकापसरणव्याजवचनं विक्षेपः; यथा—महदिदानीं मे कृत्यमतिवर्तत इत्यादि । आवश्यकानां तु लौकिकवैदिकानामनलीकानां विच्छेदाभिसन्धिलिङ्गत्वाभावादनिग्रहः; यथा—युयुत्सूनामेव मध्ये विश्रमाद्यर्थं निवृत्तिः । व्याजमभिधायापि कथाकरणे तु नैतन्निग्रहस्थानम्, विच्छेदार्थत्वाभावात् । तदानीं तदभिधानस्य प्रकृतानुपयोगादर्थान्तरत्वं तु तत्र स्यादेव । अपजयभयादेरपसरणसंभवः । वाक्छूरगर्हितं वादाहवादपसरणं न कुर्यादिति समयः ॥

मतानुज्ञा ॥ स्वदोषमभ्युपेत्य परदोषप्रसञ्जनं मतानुज्ञा । यथा त्वद्वचनं दुष्टमित्युक्ते तवापि वचनं दुष्टमित्यादि, त्वं चोर इत्युक्ते त्वमपि चोर इतिवत् । अत्र परदोषे सत्य[सत्यसत्य]पि स्वदोषाभ्युपगमोऽनुचित एवेति तेनांशेन निग्रहावहत्वम्; न तु परदोषाभिधानांशेन । तर्हि तस्यांशस्य किमर्थं लक्षणे निवेश इति चेन्न, स्वदोषमभ्युपेत्य तूष्णीकस्याप्रतिभाग्रस्ततया निग्रहान्तरकॢप्त्याभावात्; अतूष्णीकस्य तु प्रतिभावतोऽप्यनेनैव नि[व]र्वर्तनीयत्वादिति । प्रतिबन्ध्यभिप्रायेण समीकरणाय [णाशया] मतानुज्ञोदयः । परापादितदोषानभ्युपगमेन तदुद्धारेणैव वा परपक्षे दोषं ब्रूयादिति शासनम् ॥

पर्यनुयोज्योपेक्षणम् ॥ अवश्योद्भाव्यस्य निग्रहस्थानस्यावसरेऽप्यनुद्भावनं पर्यनुयोज्योपेक्षणम् । एतत् सदस्योद्भाव्यमित्येके । एतत् परीक्षार्थमसदेव मयोक्तम्, तदप्यनेन मन्दमतिना न विदितमिति स्वेनापि सावष्टम्भेनोद्भाव्यमित्यपरे । सदस्यप्रतियोगिकपराजयाभावात्, वादिनश्च पाक्षिकापजयहेतौ बुद्धिपूर्वप्रवृत्त्ययोगात्, स्वदोषोद्भावनेन पर-

निरसनस्य च पतितं मामयं न जानातीति दोषास्पृष्ट्यन्तरोद्भावनवदपरिहास्यत्वादनिग्रहस्थानमेवेत्यन्ये । इदमत्र तत्त्वम्–जल्पवितण्डयोर्नैतत् सर्वदा निग्रहस्थानम्; केवलं सभ्यानुविधेयानामुभयमतिमान्द्यनिरूपणायोपयुक्तम् । षट्पक्षीसहनसमनन्तरोद्भावनं तु निग्रहस्थानान्तरस्यापि तुल्यम् । वादे तु सभ्यैः स्वेन च यथाज्ञानमुद्भावनीयम्, उभयथाऽपि तत्त्वनिर्णयोपयोगात्, तादर्थ्येन च स्वदोषोद्भावनस्याप्यदोषत्वात् । अस्य चानेकनिग्रहस्थानसंनिपातेऽन्यतममुद्भावयतोऽन्यतमानुद्भावनेऽपि न दोषत्वम् । सर्वोद्भावनियमे त्वन्यतमोद्भावनेऽपि नियमभङ्गेऽन्तर्भावः । तदा तु जल्पवितण्डयोः स्वेनाप्युद्भावनीयम्, परस्य निग्रहस्थानद्वयापत्तेः, तदनुद्भावनेन नियमभङ्गाभियोगस्याशक्यत्वाच्च । एवमन्यत्रापि परस्य निग्रहस्थानद्वयापत्तिदशायां स्वस्यावष्टम्भविजयावहत्वान्निग्रहस्थानान्तरोपसर्जनतयेदमुद्भाव्यमस्तु । पिहितस्वच्छिद्रोऽपि परच्छिद्रं नोपेक्षेतेति नीतिरिति । क्षुद्रस्खलितत्वभ्रमादेरुपेक्षासंभवः ॥

॥ इति न्यायपरिशुद्धौ अनुमानाध्याये द्वितीयमाह्निकम् ॥

॥ अथ तृतीयमाह्निकम् ॥

निरनुयोज्यानुयोगः ॥ तन्निग्रहस्थानाभावे तन्निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः । एतदेव सर्वमसदुत्तरम् । उत्तररूपतया, सर्वस्य च निरनुयोज्यानुयोगभेदस्य द्वितीयादिकक्ष्यास्ववसरः । तदनन्तरकक्ष्यायामेवोद्भावनम् । तद्द्विविधम्–दूषणव्याप्तमप्यसिद्धम्, सिद्धमपि दूषणव्याप्तिरहितं चेति । पूर्वमपि द्विविधम् सिद्धदूष्यं कल्पितदूष्यं चेति । सिद्धदूष्यमपि द्विधा अनवसरग्रहणं निग्रहस्थानाभासवचनं चेति ॥ तत्र **अनवसरग्रहणं** यथा–चतुर्थकक्ष्यायां स्थितः प्रतिवादी वदति–प्रथमकक्ष्यायां त्वयाऽपशब्दितमिति । यद्वा सन्तमसन्तं वा कंचि[कश्चि]दनैकान्त्यादिदोषमुद्भाव्य स्वयमेवाह–यदि हेतुं विशेषयिष्यसि, तदा हेत्वन्तरेण निगृहीतोऽसि; यदि त्यक्ष्यसि, तदोक्तहान्यैव; इत्यादि । वादे तु हेत्वाभासादिकं तत्त्वनिर्णयपरिपन्थित्वादतिक्रान्तकालमप्युद्भाव्यम्, अन्यथा तन्मूलचिन्तासन्ततेर्निष्फलपरिश्रमत्वप्रसङ्गादिति । न चानवसरग्रहणस्य विपर्ययेऽन्तर्भावः शङ्क्यः, अवश्यंभाविनियतक्रमविषयत्वाद्विपर्यासस्य, अनवसरे क्रियमाणस्य ग्रहणस्य त्ववश्यंभावित्वाभावात्, तस्य तत्पूर्ववाक्यस्य चाकाङ्क्षादिक्रमनियामकाभावाच्च । यदा चासतो दोषस्यानवसरे प्रतिपादनं, तदा तु व्यक्त एवास्यावश्यंभावित्वाभावः । नन्वसिद्धत्वे सति दूषणव्याप्तस्यासदुत्तरस्य विभागोऽयमुदाह्रियते; अत्र सतो दोषस्यानवसरोद्भावने तस्य स्वपर्वणि सिद्धत्वात् कथमसिद्धत्वम्? उच्यते–अतिक्रान्तस्यैष्यतो वा पर्वणस्तदानीमदूष्यत्वात्, स्वपर्वणि सिद्धस्यापि दूष्यतया संनिहिते तदानीन्तने पर्वण्यसिद्धत्वाद्युक्त एवायं विभागः । असतस्तु दोषस्यानवसरोद्भावितस्य स्वपर्वण्यप्यसिद्धिर्विशेष इति ॥ **निग्रहस्थानाभास**वचनमपि बहुविधम्–तन्निग्रहस्थानाभावे तदारोपणम्, निग्रहस्थानान्तरे तदन्यनिग्रहस्थानवचनम्, स्वसमये निग्रहस्थानत्वेनापरिसंख्यातस्य निग्रहस्थानतया प्रसञ्जनम्, क्षन्तव्यतयाऽभ्युपगतस्योद्भावनमित्यादि । तत्राद्यं यथा–संभावितानेककल्पसाधारणोक्तौ विकल्पितायां विवक्षितविकल्पत्यागेनोक्तहानिः; प्रकरणाद्यापन्नस्य स्वयमेव पूर्वोक्तस्य वा विशेषणस्य प्रकाशनेनोक्तविशेषणम्; पार्श्वस्थाद्युक्तस्यारोपितस्य वाऽनभ्युपगमेनोक्तापलापः । एवमुत्तरेष्वपि भाव्यम् । द्वितीयं यथा–हान्यादावपलापादि, छले जातिः, जातौ छलम्, तदवान्तरविशेषेष्वपि विशेषान्तरवचनमित्यादि । तृतीयं यथा–कण्डूयन-

केशविरचनताम्बूलचर्वणादिभिर्निगृहीतोऽसीति । चतुर्थं यथा—तत्त्वनिर्णयाविरोधिनामुक्तविशेषणमतानुज्ञादीनां वादे प्रकाशनम् । जल्पवितण्डयोश्च नियमविशेषवशादनुद्भावनीयानामुद्भावनं तत्र [च] नियमभङ्गसध्रीचीनमिति विशेष इति ॥

छलम् ॥ यत्तत् कल्पितदूष्यमसदुत्तरं तत् छलम्; वक्तुरविवक्षितमर्थमारोप्य तद्दूषणं छलमित्यर्थः । ननु साधनवाक्येऽपि छलं संभवति ; तथा हि, भूतचतुष्टयैकद्रव्यत्ववादी जैनः प्राह—पाथः पार्थिवम्, पयस्त्वात्, यत् पयस्तत्पार्थिवम्, यथा क्षीरम्, इति । पशुः स्वर्गसाधनं न भवति, सत्त्वात्; यत् स्वर्गसाधनं तत् सत्त्वहीनम्, यथा हविरन्तरम्, इति । अत्र पयःशब्दसत्त्वशब्दयोः स्वयमेवार्थान्तरकल्पनाद्युक्तं छलत्वम् । यथा जातित्वं महाविद्यादौ साधनेऽपि कैश्चिदुच्यते, तथा स्ववाक्यस्थशब्दस्यापि स्वयमेव वृत्त्यन्तरकल्पनेन प्रयोगाच्छलत्वं सिद्धम् । न चात्र पयःसत्त्वादिशब्दार्थविकल्पेनासिद्धिसाधनविकलत्वादिदूषणसंभवे किं छलत्वोक्त्येति वाच्यम्, नवकम्बलादिच्छलेऽपि नूतनत्वसंख्याविशेषविकल्पेन प्रत्यक्षविरोधप्रस्तुतासङ्गतत्वादिदूषणप्रसङ्गस्य तुल्यत्वादिति । सत्यम्; निरनुयोज्यानुयोगभेदभूतोत्तररूपच्छलविवक्षयाऽत्र लक्षणमिति न विरोधः । अथवा संख्याविशेषरूपार्थस्य वक्तुर्विवक्षितत्वं प्रकाश्य तत्कथनद्वारैव प्रकृतासंगतिर्वाच्या । तत्र चाविवक्षितार्थविषयत्वं वचनस्वभावादेव व्यक्तम् । पयस्त्वादिहेतावुभयत्र विवक्षा[न्तर]सद्भावे प्रमाणा[ऽन्तर]भावाद्विकल्पमुखेनैव दूषणं साधीयः । पयःशब्दवाच्यत्वमात्रविवक्षायां च [न] छलत्वम् । यदि तु वृत्तिद्वय विवक्षां स्वयमेवोद्भाव्य हेत्वसिद्धिं साधनविकलतां च परिजिहीर्षति, तदाऽपि साधकतयोपन्यस्तहेतोः दृष्टान्तेऽनुदाहरणादुदाहृतस्य प्रकृतानुपयोगादर्थान्तरनिग्रहस्थानता । अथार्थद्वयविवक्षामात्रेण छलत्ववाचोयुक्तिमिच्छसि, इष्यतां स्वैरमिति ॥

तत् त्रिधा—वाक्छलम्, उपचारच्छलं, सामान्यच्छलमिति । तत्र नानार्थेषु शब्देष्वभिधेयान्तरारोपणेन तद्दूषणं **वाक्छलम्**; यथा—नूतनकम्बलवत्त्वविवक्षया नवकम्बलोऽयमित्युक्ते संख्याविशेषमर्थमारोप्य कुतोऽस्य नव कम्बलाः ? एक एव हि कम्बलो दृश्यते इति । एवं दूषयतो वादिविवक्षिताप्रतिपत्तेस्तदुत्तराप्रतिपत्तेश्चाप्रतिपत्तिः; अदूषणे दूषणबुद्धेश्चान्यथाप्रतिपत्तिरिति ॥ अभिधोपचारविपर्ययारोपणेन तद्दूषणमु**पचारच्छलम्**; यथा—गङ्गायां घोष इत्यादौ कथं प्रवाहे घोषवासः ? इति । अग्निर्माणवक इत्यत्र कथमनुष्णो ज्वलनः ? इति । उभयथा लोकवेदयोः प्रयोगात् तत्प्रतिपत्त्यभावादेव चात्र निग्रहः । उपचारप्रयोगे मुख्यार्थासंभवाद्बाध उपचारच्छलमित्यन्ये ; तन्न, मुख्यप्रयोगेऽपि कस्यचिदौपचारिकार्थासंभवेन प्रत्यवस्थानोपपत्तेः । अस्य चौपचारिकार्थे मुख्यार्थताभ्रमेण वा, गत्यन्तराभावादेवमपि किमयं व्याकुलीभवेदिति वा प्रयोगसंभवः ; यथा—पर्वतोऽग्निमानित्युक्ते, अग्निर्माणवक इति प्रसिद्धम् ; न चात्रेदानीं माणवकः, इति कालात्ययापदिष्टो हेतुरिति । न चैतद्दूषणान्तरान्तर्गतम् । तस्माद्यथोक्तमेव लक्षणम् । तात्पर्यान्तरारोपणेन तद्दूषणं **सामान्यच्छलम्**; यथा—अयमहो ब्राह्मणोऽनूचानः इत्यत्र, सुक्षेत्रे शालिसम्पत्तिवत् संभावितत्वविवक्षया किमाश्चर्यमित्युक्ते, ब्राह्मणत्वसामान्ये व्याप्यत्वमारोप्य अनूचानत्वे च व्यापकत्वमविवक्षितमारोप्य ब्राह्मणत्वहेतोर्व्रात्यैरनैकान्तिकत्वकथनमिति । अत्र सामान्यच्छलमित्युपलक्षणसंज्ञा । अन्वर्थसंज्ञा तु तात्पर्यच्छलमित्येवेति ॥

जातिः ॥ यत् सिद्धमपि दूषणव्याप्तिरहितमसदुत्तरं तत् जातिः । व्याप्तिपक्षधर्मताविशिष्टेनैव हि हेतुना स्थापनं दूषणं वा । तयोरन्यतराभावे प्रतिषेधहेतुरपि दुष्यत्येव । तत्र यथा छलस्य केवलनिरनुयोज्यानुयोगस्य वा पक्षीकृते वादिवाक्ये स्वयमसिद्धस्य पक्षधर्मत्वविरहान्न दूषकत्वसिद्धिः, एवं पक्षधर्मस्यापि जात्युत्तरान्तर्गतस्य हेतोर्दूषणव्याप्तिविरहान्न दूषकत्वम्; तथा हि—नेदं स्वसाध्यसाधकम्, युक्ताङ्गानपेक्षप्रतिप्रमाणादिप्रतिरुद्धत्वात्, इत्यादिषु जातिप्रयोगेषु प्रतिषेध-

हेतोः पक्षधर्मत्वे सत्यप्यसाधकत्वेन व्याप्तिर्नास्ति, अन्ततः स्वस्मिन्नेव व्यभिचारात्। तदेतदीदृशमसामर्थ्यविशेषं विवक्षित्वा प्रतिषेधासामर्थ्यं जातिलक्षणमुक्तं **न्यायवार्तिके**। तादृशासामर्थ्यमूलभूतं स्वव्याघातकत्वमेव **न्यायाचार्येण** लक्षणीकृतम्। तच्च युक्ततमम्, साधारणस्य दूषणविशेषस्य स्फुटप्रतीतेः। किं च सूत्रकारस्य *साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः इति जातिसामान्यलक्षणं ब्रुवाणस्य न तदेव लक्षणं विवक्षितम्, सर्वजातिसंग्र[हकर]हकत्वाभावात्। सदुत्तरप्रकरणसमातीतकालोद्भावनयोरतिव्याप्तेश्च। अतो जातिविभागसूत्रे निग्रहस्थानवत् परस्परनिरपेक्षास्वपि जातिषु प्रयोगलाघवाय द्वन्द्वात् परतया सर्वजात्यन्वितं समशब्दं प्रयुञ्जानस्य तदेव लक्षणतया विवक्षितमिति **भाष्यकारादिभिस्सर्वैरास्थितम्**। तत्र यथा त्वदुक्तं साधर्म्यं वैधर्म्यं सहचरितं वा, तथाऽस्मदुक्तमपीत्यादिनाऽऽकारेण जातिवादिनाऽभिधीयमाने, स्वपरसाधनयोर्विशेषहेत्वभावे समशब्दार्थतया विवक्षिते, वस्तुतो विशेषहेतुसद्भावात् न समशब्दार्थसिद्धिः। आरोपितं तु साम्यमस्तीति गत्यन्तराभावे स्वीकार्यम्, सत्यसति वोत्तरे प्रत्यवस्थानस्वरूप[पेऽपि] दोषमात्रे तु भाष्योक्तोपयोगात्। वार्तिकोक्तं प्रतिषेधासामर्थ्यं न साक्षात् समशब्दार्थः। सममनुत्कृष्टमपकृष्टमुत्तरं जातिरिति वा, जातिवादिसमः साधारणो नोत्कृष्टः—अपकृष्ट इत्यर्थः, स च साधर्म्याद्यु[त्तर]क्तिद्वारेणैवोन्नीयत इति उत्तरमेव सममपकृष्टमित्यर्थ इति वा क्रमेणापकर्षविशेषे लक्षणीयेऽपि क्लिष्टा गतिः। कुशकाशावलम्बेन तु लक्षणसिद्धिः स्यात्। स्वस्य प्रतिवादिनश्च समीकरणाभिप्रायपूर्वकत्वात् समीकरणार्थत्वाद्वा जात्युत्तरं सममित्युच्यत इति टीकापक्षोऽपि तथैव। नच तावता लक्षणसिद्धिः, छलादेरपि समीकरणाभिप्रायपूर्वकत्वादिसंभवात्। तथा सदुत्तरमपि कश्चिन्मन्दः समीकरणाभिप्रायेण प्रयुञ्जीत। समीकरणार्थत्वं च वास्तवं न व्यापकम्, तत्साधने जातिवादिनो वास्तवसमीकरणस्य दुर्लभत्वात्। अपि च कश्चिज्जातौ सदुत्तरत्वभ्रान्त्या स्वोत्कर्षाभिप्रायेणापि जातिं गृह्णीयात्; अतोऽस्मिन्नर्थेऽपि न लक्षणसिद्धिः। बुद्धिपूर्वता तु जातिकार्येत्युच्यते। प्रतिषेधरूपस्य जात्युत्तरस्य स्वपरसाम्ये समशब्दार्थे येनाकारेण परस्य प्रतिषेधकं तेनाकारेण स्वस्यापि प्रतिषेधकं भवतीति स्वव्याघातकत्वमेव विवक्षितं स्यात्। न चात्रातिव्याप्तिरव्याप्तिर्वा। ततश्च लक्षणसिद्धिः, साधारणदुष्टत्वमूलसूचनं चेति लाभोऽप्यधिकः॥

ननु छलेऽपि व्याघातकत्वं संभवति। तथा हि—आढ्योऽयं नवकम्बलत्वादिति नूतनकम्बलत्वविवक्षयोक्ते कुतोऽस्य नव कम्बलाः इति प्रत्युक्ते वादिना च पुनश्छलत्वोद्भावने यदि छलवाद्याह—विवक्षितमविवक्षितं वेति किमनेन विभागेन? त्वदुक्तशब्दप्रतिपन्नं तावत् दूषितम् इति, तदा तस्य सिद्धः स्वव्याघातः। अविवक्षितार्थदूषणेनापि परस्य भङ्गे छलवादिवाक्येऽप्यविवक्षितयत्किंचिदर्थदूषणेन भङ्गप्रसङ्गस्य दुर्वारत्वात्। अतः स्वव्याघातकत्वमतिव्याप्तमिति। मैवम्; कुतोऽस्य नव कम्बलाः इत्यस्यां कक्ष्यायामविवक्षितदूषणाभिमानस्यानभिव्यक्तेः, तथाविधानुयोगस्य तदर्थविवक्षाभ्रमादपि संभवात्। यस्यां तु कक्ष्यायामविवक्षितदूषणेनापि परपराजयाभिमानो व्यज्येत, तदा जातित्वमेव, अविवक्षितस्य विवक्षितत्वारोपाभावेन छललक्षणासिद्धेः। एवं केवलनिरनुयोज्यानुयोगे जातिसंकरः परिहर्तव्यः। अतः सुष्ठूक्तं स्वव्याघातकत्वं जातिलक्षणम्। ये तु साधनेष्वपि केषुचिज्जातित्वमिच्छन्ति तेषां स्वसमानन्यायप्रसञ्जनेन स्वव्याघातकं जातिरिति सामान्यतो लक्षणम्। तत्र स्वव्याघातकसाधनं जातिसाधनम्, यथा महाविद्यादि। स्वव्याघातकमुत्तरं तु जात्युत्तरम्, यथा तत्त्वोपप्लवखण्डनादिगतिरिति विभागः। स्वव्याघाति[ती] प्रसङ्गो जातिरिति **वरदविष्णुमिश्रोक्तिरुत्तर**रूपजात्यभिप्रायेण। **अक्षपादीयेषु** च जातिविशेषलक्षणसूत्रेषु पुल्लिङ्गान्तसमशब्दनिर्देशः स्वपक्षस्थापनपरपक्षप्रतिक्षेप-

रूपेण द्विभागे प्रत्यवस्थाने प्रतिषेधभागेनात्र जातित्वं विवक्षितमित्युत्तररूपजातिविशेषाभिप्राय इति ह्याहुः ॥

अथायमपरो जातिसंग्रहः—मर्यादालङ्घनाभ्युपगमपूर्वकमुत्तरं जातिः। मर्यादा च प्रतिष्ठिता प्रमाणसरणिः। स्वव्याघातकत्वमपि तल्लङ्घनाभ्युपगमादेव। स च द्विधा, परिकरनियमानभ्युपगमः विषयनियमानभ्युपगमश्चेति। प्रथमो द्विधा युक्ताङ्गत्यागः, अयुक्ताङ्गपरिग्रहश्चेति। अयुक्ताङ्गपरिग्रहेऽपि ह्यन्यूनानतिरिक्तविषयपरिकरनियमानभ्युपगम एव। द्वितीयो [ऽपि] द्विधा प्राप्तविषयत्वत्यागः, तदन्यविषयत्वाभ्युपगमश्चेति। एतेन *लक्ष्यं लक्षणमुत्थितेरवसरो मूलं फलं पातनम् इति पठितेषु सदुत्तरेण जातीनामुद्धाराय प्रतिजातिप्रतिसंधाने सदुत्तरापरिस्फूर्तौ जातिप्रसङ्गे चोपयोक्ष्यमाणेषु जातीनां सप्तस्वङ्गेषु साधारणमसाधारणं च दुष्टत्वमूलं दर्शितं भवति। विशेषतश्च जातीनां लक्ष्यलक्षणे वक्ष्येते। *प्रमादः प्रतिभाहानि[स्ता]र्वासामवसरः [स्मृत] इति पूर्वे। सभ्यानुमतिपूर्वकपरपरीचिक्षिषाऽपीत्यवष्टम्भविजयाभिलाषिणः। एवंच [सत्येव वा असत्येव वा जाति] वादिसाधने जातेरुदय इति न नियमः, उभयत्रापि प्रमादादिसंभवात्। अत एव हि जात्यादेरुत्तरतया जात्यन्तराद्युदयः। फलं च प्रायशः परव्यामोहनं, पाक्षिकविजयः, साम्यं वा। तत्त्वाज्ञानं साधारणमुत्थानबीजम्। तत्तदवान्तरस्वभावाज्ञानं, तद्विपरीतज्ञानं चासाधारणमुत्थानकारणमिति च विभाव्यम्। वादिवाक्यस्य कस्मिंश्चिद्दूषणविशेषे निपातनमेव पातनम्। तच्चासाधारणदुष्टत्वमूलपुरस्कारेण साधारणस्वव्याघातप्रदर्शनौपयिकमिति भाव्यम्। व्याघातपर्यवसितं हि सर्वं दूषणम्। उपलम्भपर्यवसितं च सर्वं साधनमिति रहस्यम् ॥

स्वव्याघातनिरूपणम् ॥ ननु यत्पर्यवसायीनि जातीनां दूषणानि, क एष स्वव्याघातः? न तावत् स्वेनैव स्वस्य विरोधः, तस्य भेदापेक्षया आत्माश्रयप्रसङ्गात्। स्वस्य सिद्धत्वे विरोधस्यानवकाशात्। असिद्धौ कस्य केन वा विरोधः? एतेन यथा परं व्याहन्ति तथा स्वात्मानमपीति निरस्तम्। किंच परव्याहतिसिद्धौ समीकरणाकाङ्क्षी जातिवादी तावतैव चरितार्थः। तदसिद्धौ तु कथं तन्निदर्शनेन यथेत्युच्यते। एतेन परस्य स्वेनेव स्वस्यान्येन व्याघाताक्षेपकत्वं स्वव्याघातकत्वमिति च प्रत्युक्तम्। आक्षेपकत्वं चात्र किमभिप्रेतम्—किमुत्पादकत्वम्? उत ज्ञापकत्वम्? यद्वाऽन्यकर्तृकव्याघातप्रतियोगित्वेनावस्थानमात्रमिति? न प्रथमः, असंभवात्। न द्वितीयः, परव्याहतिमात्रबोधनपरत्वात्। न तृतीयः, असदुत्तरान्तराणामपि जातित्वप्रसङ्गादिति। अत्रोच्यते—या परपक्षप्रतिक्षेपार्था युक्तिः प्रसज्यते, तस्याः प्रयोजकाकारेण तत्सजातीयस्वविषययुक्त्यन्तरकोडीकारः स्वव्याघातः। तथा च सति तया युक्त्या परपक्षस्य न दोषप्रसङ्गः; स्वयमेव तथाविधयुक्त्या दुष्यतीति न परपक्षस्य दोषमापादयितुं शक्नोति। यदि च तथाविधयुक्तिदुष्टमेवाभिमतसाधकमित्यभ्युपगम्यते, तथाऽपि परपक्षस्याभिमतसाधकत्वान्न काचित् क्षतिरिति जात्युत्तरस्य दूषकत्वं न स्यात्। स्वयमपि दुष्टं परस्यापि दूषकं भवत्विति चेत्, तथा सति सर्वं सर्वस्य दूषकं भवेत्, अविशेषात्। ततश्च मौनं वा नित्यकलहो वा शरणं कथकानाम्। जात्युत्तरबाधकयुक्तेरपि युक्त्यन्तरबाधितत्वात् प्रथमं निरुपद्रवमिति चेन्न, परस्तादपि प्रसङ्गेन द्वितीयस्यापि निरुपद्रवत्वात्। कुतस्तर्ह्यनवस्थानिवृत्तिरिति चेत्, प्रथमस्य परित्यागेन, यदभ्युपगममूलोऽयं प्रवाहः इति भाव्यम्; अन्यथा सर्वत्रानवस्थाप्रसङ्गे प्रथमसंरक्षणप्रसङ्गात्। समवायादिवादिभिरिष्यत एवायमर्थ इति चेत्, किं तदिष्टत्वमात्रेण तथैव वस्तुस्थितिः? अतिप्रसङ्गात्। सूत्रितं च वैशेषिकाधिकरणे अनवस्थापकसर्वदूषणोपलक्षणतया समवायकल्पनेऽनवस्थानम् *समवायाभ्युपगमाच्च साम्यादनवस्थितेः इति। अतः साधने दूषणे वा यदभ्युपगमे तथाविधः प्रवाहः प्रसजति, तदेवादौ त्याज्यम्। न चात्र कारणानवस्थावद्गुणत्वम्; तद्वैषम्यस्य स्वस्थाने वक्ष्यमाणत्वादिति ॥

जातिविभागः ।। जातिर्द्विधा प्रतिप्रमाणसमा, प्रतितर्कसमा चेति । तत्रानभ्युपेतमर्यादेन प्रतिप्रमाणेनानिष्टापादनं प्रतिप्रमाणसमा यथा चापकर्षसमादिष्वेकैकस्यां वा जातिविधायामसिद्ध्याद्यनेकदोषसंग्रहं व्याचख्युः, तथा प्रतिप्रमाणसमायामपि सर्वानिष्टसंग्रहे न कश्चिद्दोषः । तादृशेन प्रतितर्केणानिष्टापादनं प्रतितर्कसमा । न चायं विभागोऽनादेशिक इति वाच्यम्, यथा परैः सूत्रा [त्रकारा] नुपदिष्टाऽपि साधर्म्यवैधर्म्यसमादिसंग्राहिका प्रतिधर्मसमोन्नीता, तद्वत् सर्वसंग्राहकविभागस्यात्यन्तोचितत्वात् । न च सूत्रोपदिष्टायां चतुर्विंशतौ सर्वजात्युदाहरणान्तर्भावः शक्यः, परैरपि कल्पितेनैव प्रतिधर्मसमेन प्रत्यक्षाभासादिमूलस्य प्रतिरोधस्य संग्रहोपलक्षणात्, तेनाप्यसंगृहीतस्य उदाहरणान्तरस्यास्माभिः प्रदर्शयिष्यमाणत्वाच्च । उक्तं च **तत्त्वरत्नाकरे**—*अमूषां जातीनामानन्त्याच्चतुर्विंशतिरसौ प्रदर्शनार्था ; *अन्यदन्यस्मात् इत्यादिना जात्यन्तरसूचनात् इति । **प्रज्ञापरित्राणे**ऽप्युक्तम्—

*आनन्त्येऽपि च जातीनां जातयस्तु चतुर्दश । उक्तास्तदपृथग्भूता वर्ण्यावर्ण्यसमादयः ।। इति ।

अत्र चतुर्दशेति स्वग्रन्थोदाहृतकतिपयजातिमात्रपरिसंख्यानम् ; न तु वस्तुतो न्यूनाधिकसंख्याव्यवच्छेदार्थम् । **न्यायभूषण**मतानुसारेणा [सारिणाम] पि चतुर्विंशतेः प्रदर्शनार्थत्वमेवाभिमतम् । अस्मदुक्तं तु द्वैविध्यं सर्वजातिसंग्राहकम् । तयोरेव ह्यापाद्यापादकभेदभिन्नयोरवान्तरभेदाः सर्वजातयः । तथा हि—द्वे अपि द्विविधे सामान्यतो विशेषतश्चेति । अत्र प्रतिप्रमाणसमायां सामान्यतो यथा—त्वत्पक्षवदस्मत्पक्षेऽपि किंचित् प्रमाणं संभवेत्, पक्षत्वाद्यविशेषादिति । सेयमुपपत्तिसमेति सूत्रिता । विशेषतो यथा—यं कंचित् प्रमाणाभासमुपक्षिप्य यथा त्वदुक्तं विवक्षितसाधकम्, तथेदमपि ; न चेदेवं, त्वदुक्तमप्यसाधकं स्यात्, अविशेषादिति । एतन्मुखभेदा एव प्रतिधर्मप्रतिदृष्टान्तप्रकरणसमादयः । प्रति[तर्क ?]-प्रसङ्गसमायां सामान्यतो यथा—यथा पक्षान्तरेऽनिष्टप्रसङ्गः, तथा त्वत्पक्षेऽप्यनिष्टप्रसङ्गः कश्चित् स्यात्, निपुणाभ्यूहने सर्वत्र दूषणसंभवात्, आपातरमणीयत्वस्य सर्वत्राविशेषादिति । विशेषतो यथा—एवं चेदनेन त्वयेदं साध्यते दूष्यते वा ? तथा सति मदुक्तेनानेन तर्केण त्वदुक्तविपरीतं किं न स्यात् ? अविशेषादित्यादि । एतदवान्तरविशेषा उत्कर्षसमादयः । तत्रापि स्वरूपस्पर्शिन्यः काश्चित् ; प्रदिबन्दीव्यवहितास्त्वविशेषसमादय इति भिदा ।।

एवं विभागे शक्येऽपि विशेषानवधारणात् । विविच्य सूत्रयामास गौतमो जातिसंततिम् ।।
व्याघातमुखभेदादेरुत्थानादेश्च दर्शयन् । वैचित्र्यमन्तेवसतां तदानन्त्यं न्यदर्शयत् ।।
न चानन्त्येऽपि जातीनां दुर्विवेचविशेषता । स्वव्यापि दूषणं जातिरिति सामान्यसंग्रहात् ।।
अवान्तरविधाभेदस्यानन्त्येऽपि च गृह्यते । अशेषसंग्रहादेकमप्पृथिव्यादिलक्षणम् ।।
विशोधयिष्यमाणेषु विभागेषु च तत्त्वतः । विशेषलक्षणैस्तैस्तैः संग्रहोऽपि भविष्यति ।।

वरदविष्णुमिश्रैस्तु—*स्वव्याघातिप्रसङ्गो जातिः । सा च चतुर्विंशतिविधा इत्युक्त्वा साधर्म्यादिसूत्रमुपादाय **यथोदयनं** प्रायो लक्ष्यलक्षणादिकमुक्तम् । एवमन्यैरपि । वयंतु तदेवेदानीं प्रतिसंस्कारमदूरविप्रकर्षेण प्रब्रूमः ।

तत्र यदिदं सूत्रम् *साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः इति ; अत्र द्वन्द्वात् परत्वात् समशब्दः प्रत्येकमन्वेतव्यः । सर्वानुगतस्तदर्थ एवच सामान्यलक्षणमिति प्रदर्शितम् । अत्र सूत्रकारोक्तयोः साधर्म्यवैधर्म्यसमयोरसूत्रितप्रतिधर्मसमावान्तरभेदतामन्ये व्याचख्युः । तत् कस्य हेतोः ? तथाविधमानाभासमुखेन प्रतिरोधोदाहरणान्तराणां दर्शनादन्यत्र तु छलादौ

जात्यन्तरे वा तेषामनन्तर्भावाच्च जात्यन्तरस्य कल्पनीयत्वे सत्युक्तेनोपलक्षणस्योचितत्वादवान्तरभेदकथनस्य सर्वत्रावान्तर-भेदसद्भावज्ञापनेन सप्रयोजनत्वाच्चेति चेत्, एवं यद्यनुक्तोदाहरणान्तराणि [संभवन्ति] ब्रूहन्ति, तदा जात्यन्तरं वा, तत्संग्रहलक्षणं वा कल्पनीयमेव ॥

प्रतिरोधसमः ॥ तदिह * अनभ्युपेतयुक्ताङ्गेन प्रतिप्रमाणेन प्रतिरोधः प्रतिधर्मसमः इति परैः कल्पितम् । तत्र प्रतिरोधसम इति लक्ष्यसंज्ञाकल्पनमुचितम्, अन्वर्थसमाख्यासिद्धावुपलक्षणसंज्ञानिवेशस्य निष्फलत्वात्, असूत्रितत्वेन सूत्रानुविधानव्यसनाभावाच्च । तादृशेनैव बाधो बाधसमः । तत्रापि प्रकरणसमः इति समाख्या यौगिकी प्रक्रियमाणार्थ-सिद्ध्यभिमानद्वारा कथंचिन्निवेशिता । अनयोस्तत्तत्प्रतिरोधकबाधकमर्यादालङ्घनाभ्युपगमपूर्वकत्वादसदुत्तरप्रकरणसमा-तीतकालोद्भावनाभ्यां केवलनिरनुयोज्यानुयोगाच्च व्यवच्छेदः । तादृशेनैवासिद्ध्यापादनमसिद्धिसमः । एवमनेकान्तसमा-दयोऽपि ग्राह्याः । एषां सामान्यसंग्रहस्तु प्रागुक्तप्रक्रिययाऽनभ्युपेतमर्यादेन प्रतिप्रमाणेनानिष्टापादनं प्रतिप्रमाणसम इत्येव । अत्र साधर्म्यसमादिसूत्रे [णैव] असिद्धिसमादयोऽप्युपलक्षिताः । नच तासामसंभवोऽन्यत्र वाऽनुप्रवेशः, पृथगुदाहरिष्य-माणत्वात् । तत्र प्रतिरोधसमे तावत् सरूपं विरूपं चेति द्विविधं प्रत्यवस्थानम् । वादिना प्रत्यक्षादियज्जातीयेनार्थः साधितः, तज्जातीयेन प्रत्यवस्थानं सरूपम् । तत् त्रिधा ; प्रत्यक्षे प्रत्यक्षेण, अनुमाने अनुमानेन, शब्दे शब्देनेति । अतज्जातीयेन तु विरूपम् । तत्तु षोढा; यथा प्रत्यक्षे तदन्याभ्यां तथाऽनुमाने शब्दे चेति । एवं बाधसमादिष्वपि विभागो भाव्यः । तत्र सरूपं यथा—प्रत्यक्षबलादेकश्चन्द्र इत्युक्ते अङ्गुल्यवष्टम्भादिसहकृतप्रत्यक्षेण अनेकः किं न स्यात्? न ह्येकं प्रत्यक्षं स्वार्थसाधकम्, प्रत्यक्षान्तरं तु नेति राजाज्ञा । न च सहकारिभेदो दोषः, प्रतिप्रत्यक्षं सहकारिवैचित्र्यात् । घृतादिष्व-तीन्द्रियेषु च गन्धादिग्रहणयोगादिसहकारिवैचित्र्याभ्युपगमात् इति । अनुमाने तु साधर्म्येण वादिनोपसंहारे साधर्म्येण वैधर्म्येण द्वाभ्यां वा, तथा वैधर्म्येण द्वाभ्यां वोपसंहारे तथैव त्रिधा त्रिधेति नवधा भेदः । तत्र त्रिधोपसंहारेऽपि साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः । वैधर्म्येण तु वैधर्म्यसमः । द्वाभ्यां तु साधर्म्यवैधर्म्यसम इति । आद्यो यथा—स्थावरशरीरं भोक्त्रधिष्ठितम्, जीवनिद्राप्रबोधादियोगित्वात्, मनुष्यादिशरीरवत् इति साधर्म्येण वा, यन्न भोक्त्रधिष्ठितं न तन्निद्रादियोगि यथा घटः इति वैधर्म्येण वा, द्वाभ्यां वा, वादिना साध्योपसंहारे कृते जातिवाद्याह—यदि मनुष्यादिशरीरसाधर्म्यात् घटादिवैधर्म्यादुभाभ्यां वा स्थावरशरीरं भोक्त्रधिष्ठितमुच्येत, तदा घटादिसाधर्म्यात् पाणिपादादिरहितत्वात् तन्निरात्मकं [इति] किं न स्यादिति । एवं तत्रैव मनुष्यशरीरवैधर्म्यादित्युक्ते वैधर्म्यसमः । समुच्चये तु साधर्म्यवैधर्म्यसमः इति । आगमे यथा—अवैदिकहिंसा न धर्मः, निषेधशास्त्रं हि तथाऽऽह इति नैगमिकेनोक्ते बाह्यो ज्वल[वद]ति—नैवं नियन्तव्यम्, आगमान्तरं हि तामपि धर्मयति, श्रेयःसाधनतया तेन तद्विधानात् । न चागमत्वे विशेषं पश्यामः । परि-ग्रहस्त्वार्यैः कस्यचित्, कस्यचित् पाषण्डिभिरिति को[ऽयं] विशेषः ? यथारुचि सर्वत्र परिग्रहात् इति । विरूपं यथा—स्फटिकादीनामबाधितप्रत्यभिज्ञया स्थैर्ये वैनाशिकः प्रतिवक्ति—यत् सत् तत् क्षणिकम् ; यथा उभयवादिसिद्धः क्षणो-पाधिः । सन्तश्चामी भावाः । न हि प्रत्यक्षं प्रत्यक्षमित्येवानुमानेन न बाध्यते, ज्वालाभेदानुमानेन तदैक्यप्रत्यक्षस्या-प्यबाधप्रसङ्गात् । अविशिष्टा हि तत्र चात्र च प्रत्यभिज्ञा ; अनुमानं च भेदगोचरमविशिष्टमिति । एवमुदाहरणान्तराण्यपि पञ्च स्वयमेवोहनीयानि । असद्विषयाया अपि जातेरुक्तैव प्रक्रिया । तत्र जातिवादिनः पर्यनुयोज्योपेक्षणमपि स्यादिति विशेषः । एवमनादृतप्रयोजकाकारतौल्येन प्रतिरोधे प्रतिरोधसम उदाहृतः । अथाङ्गीकृततुल्यभावेन तु बाधे बाधितसम

उदाह्रियते—परशरीरमात्माधिष्ठितम्, वाक्यप्रयोगादिमत्त्वात्, स्वशरीरवत्, इत्युक्ते प्रत्याह—स्वशरीरव्यतिरिक्तत्वात् तृणादिवदनधिष्ठितमेव स्यात्; न ह्यनुमानरूपेषु तस्य चास्य च विशेषं पश्यामः। तुल्यत्वे च तदेव बाधकमिदं नेति को नियन्ता? ततश्चानेन स्वसाध्यसाधनात् पूर्वबाध इति ॥

असिद्धिसमः ॥ असिद्धिसमादीनां पुनरेवमुत्थानम्—अनित्यः शब्दः, कृतकत्वात्, इत्युक्ते प्रतिब्रूते—स्वयं सिद्धो हि हेतुः स्वसाध्यं साधयेत्; न चासौ सिद्धः, प्रत्यभिज्ञयैक्यसिद्धेः। सा चेदैक्यं न साधयेत्, भेदमपि कः साधयिष्यति? प्रमाणत्वप्रत्यक्षत्वादेरविशेषात् इति। एवमनेकान्तो विरुद्धो वाऽयं हेतुरित्युक्त्वाऽऽह—अनित्यत्वसाधनप्रमेयत्वहेतुः प्रमेयत्वप्रस्तुतहेत्वन्यान्यानैकान्तिकान्यः, प्रमेयत्वात् इति। एवमनैकान्तिकपदस्थाने विरुद्धपदप्रक्षेपे विरुद्धता। तथाऽन्यदन्यदपि। यद्यनेन हेतुनाऽनैकान्तिकविरुद्धत्वादिकं न सिध्येत्, वादिहेतुनाऽपि कथं साध्यं सिध्येत्? न हि वाद्युक्त एव हेतुः स्वसाध्यं साधयिष्यति, प्रतिवाद्युक्तस्तु नेति प्रथमं नियमकल्पनम् इति। तत्रापि प्रतिरोधबाधसमयोरिव मर्यादालङ्घनाशयगर्भतया केवलनिरनुयोज्यानुयोगाद्विशेषः प्रतिसन्धानीय इति। अत्र सर्वत्र युक्ताङ्गहीनप्रतिकूलप्रमाणोपलम्भ उत्थानहेतुः। दुष्टत्वमूलं च साधारणं व्याप्त्यादियुक्ताङ्गान्यतमहानिः। साधारणदुष्टत्वमूलप्रदर्शनोपयुक्तं त्वेवं पातनम्; वादिसाधनमसाधकम्, युक्ताङ्गहीनप्रतिप्रमाणापादितदोषत्वात्, इति हि जातिवाक्यार्थः; स एव स्वात्मानमपि व्याहन्ति, यथोक्तप्रक्रियया जातिवादिसाधनेऽपि येनकेनापि युक्ताङ्गहीनप्रमाणेन तत्तद्दोषाणां तथातथा दर्शयितुं शक्यत्वात् इति। न च व्याप्त्यादि युक्ताङ्गमेव न भवतीति वक्तुं शक्यम्, प्रागेव तत्समर्थनात्, अन्यथा जातिवाक्यस्य दूषणव्याप्त्यनभ्युपगमे तत्प्रयोगनैष्फल्यप्रसङ्गात्। अतो नियमरहितस्यापि दूषणत्वनियममिच्छन् प्रतिक्षिपति, स्वीकरोति च नियममिति सोऽयं वृषलविवाहमन्त्रन्यायः।

उत्कर्षसमः ॥ अपि च हेतुसाध्ययोरन्यतरबलात् कस्यचिदनिष्टस्याव्याप्तधर्मस्य दृष्टान्तात् पक्षे, पक्षात् दृष्टान्ते वा समुत्कर्षप्रसञ्जनम् उत्कर्षसमः। तत्र हेतुबलेन दृष्टान्तात् पक्षे समुत्कर्षो यथा—यदि कृतकत्वाद्घटवदनित्यः शब्दः, तद्वदेव तत एव सावयवोऽपि किं न स्यात्? इति। साध्यबलेन यथा—यदि घटवदनित्यत्वं शब्दस्येष्यते, अनित्यत्वसहचरितं सावयवत्वमप्यस्य स्यादिति। नच साधनशक्त्यैवोत्कर्ष इति राजाज्ञा, साध्यशक्त्याऽपि तदविरोधात्, अनिष्टत्वाद्यविशेषाच्च। एवमेव पक्षाद्दृष्टान्ते समुत्कर्षस्याप्यसंभवशङ्का निरस्ता। यथा हि कृतकत्वाच्छब्दोऽनित्यश्चेत्, तद्वदेव तत एव सावयवोऽपि स्यादित्युत्कृष्यते, तथा शब्दवदेव तेनैव घटोऽपि निरवयवः स्यादित्यु[त्यप्यु]त्कर्षः शक्यः; समं चोभयत्रानिष्टत्वम्, अनतिप्रसक्तप्रसञ्जकविशेषयोगश्च, शब्दघटयोः साधनाङ्गशक्त्योत्कर्ष इति लक्षणव्यवस्थितेश्च। [ननु] शब्दाद्घटे निरवयत्वोत्कर्षे शब्दानित्यत्वस्य किमायातमिति चेत्, घटाच्छब्दे सावयवत्वोत्कर्षेऽपि तस्य किमायातमिति तुल्यम्। तत्र निरवयवत्वे सत्यनित्यत्वमभिमतं सावयवत्वेन व्याहन्यत इति हेतुदूषणपर्यवसायिविशेषविरोधश्चोदितः स्यादिति चेत्, तथाऽपि साध्यमानस्यानित्यत्वमात्रस्य न किंचिद्धीनम्। प्रतिबन्धभिप्रायेणोपाध्यभिप्रायेण वा तदुत्कर्ष इति चेत्, तुल्यम्। घटस्य निरवयवत्वप्रसङ्गे कथमुपाधिव्यञ्जनमिति चेत्, शब्दस्य [वा] सावयवत्वे कथम्? सावयवत्वमनित्यत्वप्रयोजकम्; ततश्च सावयवत्वप्रसङ्गो विपर्यये पर्यवस्यन् प्रयोजकाभावं व्यनक्तीति चेत्, तर्हि प्रयोजकं सावयवत्वमन्तरेण यदि प्रयोज्यं शब्दे स्यात्, घटेऽपि तथैव स्यात्, इति प्रसङ्गे तात्पर्यात् तुल्यमुपाधिव्यञ्जनम्। अथ व्यापकसावयवत्वनिवृत्त्या व्याप्यानित्यत्वनिवृत्तिः पक्षेऽभिप्रेता, इह तु न तथेति; तदप्यसत्, अपकर्षसमादविशेष-

प्रसङ्गात् । अत्रापि च घटे निरवयवत्वविपर्ययदर्शनेन पक्षेऽपि तत्समानयोगक्षेमतया साध्यनिवृत्तिसमर्थनाभिप्रायस्याविरोधात्, इति । तिष्ठत्वेतत् । तदिह कस्यचित् साधनाङ्गस्य किंचिदनिष्टं प्रति व्याप्यत्वाभिमान उत्थानहेतुः । हेतुविपर्ययदूष्यप्रतिकूलतर्कयोगमुखेनाप्रयोजकत्वमारोप्यं, विशेषविरुद्धत्वं वा । तद्भ्रान्तिः फलम् । दुष्टत्वमूलं तु युक्ताङ्गहीनत्वम्, व्याप्तिलक्षणाङ्गस्य जातिसाधने हानेः ; न हि यत् कृतकं, तत् सावयवमित्यादिप्रक्रियया तदभिमतेषु व्याप्तिर्ग्रहीतुं शक्या, शब्दादिष्वेव बाधदर्शनात् । अतो यद्यव्याप्यमव्यापकं न साधयेत्, कथं तन्निदर्शनेन व्याप्यस्य व्यापकसाधनं प्रतिरुध्येत ? व्याप्तं च कृतकत्वमनित्यत्वेन ? अनित्यावस्थान्तरातिरिक्तस्य प्रध्वंसस्याभावात् ; भावेऽपि भावत्वे सतीति विशेषणेन वा, कृतकत्वलक्षणान्तरेण वा तद्व्यवच्छेदसिद्धेः, निवृत्तप्रतिबन्धस्वरूपप्राप्तमुक्तधीविकासे च तदतिरिक्तागन्तुकसाध्यत्वलक्षणकृतकत्वस्याभावात् इति । अयुक्ताङ्गाधिकत्वं वा, युक्ताङ्गहीनप्रतितर्कराहित्यस्यापि साधनाङ्गत्वेन स्वीकरणात् ; अन्यथा जातिसाधनेऽपि तादृशाङ्गयोगस्य सत्त्वात् स्वव्याघातः । तथाहि—नेदं साध्यसाधकम्, अव्याप्तधर्मोत्कर्षमुखेन विरुद्धत्वात्, संप्रतिपन्नविरुद्धवत्, इति हि जातिवाक्यार्थः । इदमपि साधनं न दूष्यं दूषयेत्, तत्रापि तथाविधाव्याप्तधर्मोत्कर्षस्य सुशकत्वात् ; सन्ति हि धर्माः साध्यसाधनातिरेकिणस्तत्सहचरिताः संप्रतिपन्नविरुद्धवर्तिनः, अन्यथा पक्षदृष्टान्तवैषम्यासिद्धिप्रसङ्गात् । एवमुदाहरणान्तरेष्वपि प्रत्युत्तरं योज्यम् । नन्वेवमस्त्वव्याप्तधर्मोत्कर्षे स्वव्याघातः, व्याप्तोत्कर्षे तु कथम् ? न कथंचित्, इष्टव्याप्तोत्कर्षे प्रकृतानुपमर्देनार्थान्तरनिग्रहस्थानत्वात्, अनिष्टव्याप्तापादने सत्तर्कत्वेन जातित्वाभावात् । अत एवेश्वरानुमानादिषु व्याप्तोत्कर्षस्याजातित्वं स्थितम् । उक्तं चानुमानिकैरपि—* व्याप्तौ सत्यां नेदमनिष्टम्, असत्यां तु न प्रसङ्गः इति । यद्यपि च कार्यत्वादिलक्षणहेत्वपेक्षया शरीरजन्यत्वादेर्व्यापकत्वं पक्षीकृतेष्वेव दूर्वादिषु बाधान्निरस्तम् ; तथाऽपि सिषाधयिषितसकर्तृकत्वाद्यपेक्षया तेषां व्यापकत्वस्य दुरपह्नवत्वात् साध्यमुखेनोत्कर्षे तस्य व्याप्यत्वान्न दोषः । वेदप्रणयनादिषु चेश्वरस्यापि सशरीरस्यैव कर्तृत्वं परेऽप्यनुजानते । तत्र चेत् व्याप्त्यैव शरीरपरिग्रहः, तुल्यमन्यत्रापि । अथ तन्निरपेक्षं क्वचित् कर्तृत्वम्, तदा त्वशरीर एव प्रणयतां वेदं समयकरणादिकं च, तस्याशक्याभावात् इति ॥

अपकर्षसमः ॥ व्यापकाभासनिवृत्त्या कुतश्चित् कस्यचित् व्याप्याभासस्यापकर्षणमपकर्षसमः । स चानेकधा—पक्षात्, सपक्षात्, उभयतः, विपक्षाच्चेति । पक्षादपि हेतुसाध्ययोरन्यतरस्य, द्वयोर्वा । तथा सपक्षात्, उभयतोऽपि । विपक्षात्तु व्यतिरेकदृष्टान्ताद्धेत्वभावसाध्याभावयोरन्यतरस्योभयोर्वा, विपक्षमात्राद्धेत्वभावस्य इति विशेषः । तत्र पक्षादपकर्षो यथा—यदि घटादिवत् कार्यत्वात् क्षित्यादि सकर्तृकं साध्यते, तदा आत्मादिवन्मनुष्याशक्यक्रियत्वात् कार्यत्वम्, सकर्तृकत्वम्, उभयं वा किं न बाध्यते ? तच्चेत् साधयेत्, इदमपि बाधेत । न चेदिदम्, न तदपि, अविशेषात्, इति । अत्र हेत्वपकर्षे स्वरूपासिद्धिः, साध्यापकर्षे बाधः, उभयापकर्षे तूभयम् इति । असमीक्षितोदाहरणान्तरास्त्वे [णि तु ए]तावति विश्रान्ता [नि]ः । सपक्षादपि हि तयोरपकर्षे साध्यविकलत्वसाधनविकलत्वोभयविकलत्वानि । व्यतिरेकदृष्टान्तीकृताद्विपक्षाद्धेत्वभावसाध्याभावयोरपकर्षे साधनाव्यावृत्तत्वसाध्याव्यावृत्तत्वोभयाव्यावृत्तत्वानि । तत्रापि हेतुदोषचिन्तायामप्रयोजकत्वानैकान्त्यादि । अदृष्टान्तीकृताद्विपक्षमात्राद्धेत्वभावस्यापकर्षे तु विरोधः, साधारण्यं वा । न चैवमपकर्षाणामसंभवः, उत्थानहेत्वाद्यविशेषात् । नापि जात्यन्तरेऽन्तर्भावः, तल्लक्षणानन्वयात्, अविशेषप्रसङ्गमात्राद्यविश्रान्तेश्च । नाप्यजातित्वम्, युक्ताङ्गहान्याद्यविशेषात् । अपकर्षसमसमाख्यानिरुक्तिमात्रेण संग्रहे संभवत्यनुक्तसमाख्यान्तरोन्नीति-

श्चायुक्ता । न चापाद्यदोषभेदाज्जात्यन्तरता, पक्षाद्धेतुसाध्ययोरपकर्षेऽप्यसिद्धिबाधलक्षणापाद्यभेदेन तत्प्रसङ्गात् । तत्र सपक्षादपकर्षणं यथा—विगीतम् ईश्वरशरीरम्, ईश्वरतज्ज्ञानेतरद्रव्यत्वात्, संप्रतिपन्नरामकृष्णादिशरीरवत् इत्यत्रेश्वरेतरत्वं रामादिशरीरे दुर्वचम्, ईश्वरस्यैव सर्वत्र सच्छब्दार्थत्वात्, तद्व्यतिरेकव्यापकतया शशशृङ्गादिषु दृष्टस्यासत्त्वस्य संप्रतिपन्नशरीरे निवृत्तेरिति हेत्वपकर्षात् साधनविकलो दृष्टान्त इति । साध्यापकर्षणं यथा—रामकृष्णादिशरीरस्येश्वरशरीरत्वं नास्ति ; ईश्वरो ह्यशरीरः ; यत् शरीरम्, तत् शरीरिणः कर्मफलभोगायतनम्, यथा क्षेत्रज्ञशरीरम् ; इदमपि चेदीश्वरशरीरं स्यात्, तत्कर्मफलभोगार्थत्वप्रसङ्गः ; न च तदस्ति ; अतो न तच्छरीरम् इति । उभयतोऽप्यपकर्षणमप्येतेनैवोदाहर्तव्यम् । विपक्षाद्धेत्वभावापकर्षणं यथा—धूमानुमाने कश्चिदाह, यदि महानससाधर्म्यात् पर्वतो महानससाधर्म्यान्तरवान्, तर्हि निर्धूमत्वव्यापकतया खपुष्पादिषु दृष्टस्यासत्त्वस्य व्यावृत्तौ निर्धूमत्वमपि व्यावर्तेत ; न हि, व्याप्याद्यापकं सिध्येत्, व्यापकनिवृत्त्या तु व्याप्यभूतया व्यापिका व्याप्यनिवृत्तिर्न सिध्यतीति सुवचम् । ततश्च निरग्नौ महाह्रदे निर्धूमत्वनिवृत्त्या हेतुवृत्तेरनेकान्तः । एवं महाह्रदे व्यतिरेकदृष्टान्ततया निदर्शितेऽप्यसत्त्वनिवृत्त्या साधनाभावं साध्याभावमुभयाभावं वा व्यावर्त्य व्यतिरेकग्रहणं बाध्यमिति । अत्र व्यापकनिवृत्तिवद् व्यापकाभासनिवृत्तेरपि व्याप्यत्वाभिमान उत्थानहेतुः । यथायथं पक्षहेत्वादिसाधनाङ्गं दूष्यम् । बाधादिकमारोप्यम् । तद्भ्रमः फलम् । दुष्टत्वमूलं त्वसाधारणं युक्ताङ्गहानिः, व्यापकत्वमनादृत्य सहचरितमात्रनिवृत्त्या व्याप्येतरनिवृत्त्युपन्यासात् ; व्याप्तिभङ्गश्च यथायथं तत्रतत्र प्रत्यक्षानुमानागमैर्ग्राह्यः । अयुक्ताङ्गाधिकत्वं वा, वस्तुसिद्धेः सहचरितसमस्तवस्त्वन्तरनिवृत्त्यभावापेक्षाङ्गीकारात् । अविषयवृत्तित्वं वा, व्याप्यनिवर्तनानुगुणव्यापकनिवृत्तिशक्तेः सहचरितनिवृत्तावपि संचरणादिति । एवमपि चेत् किंचिद्बाध्येत, तदा बाधिताबाधितव्यवस्थैव न स्यात्, सर्वत्र यत्किंचित्सहचरितनिवृत्तेः सुलभत्वात् । अत एव साधारणः स्वव्याघातः, जातिवादिसाध्यादिष्वप्यसाधकत्वादिषु सहचरितधर्मान्तरविरहस्यावश्यंभावात्, अन्यथा जातिसाधनेऽपि पक्षहेत्वादिविभागस्य दुर्वचत्वप्रसङ्गात्; वादिसाधनं स्वसाध्यसाधकं न भवति, सहचरितनिवृत्त्यपहृतविषयत्वात्, निषिद्धत्वनिवृत्तिलुण्ठितसाध्यनैगमिकालम्भाधर्मत्वसाधनवत्, इत्यादिप्रक्रियया ह्यत्र जातिवाक्यविश्रान्तिः । अत्रासाधकत्वादिसहचरितदोषान्तरादिनिवृत्तेस्तद्बाधोऽपि दुर्वारः । न च अस्तु सर्वं बाधितमिति शक्यं वक्तुम्, बाधस्याबाधे कस्यचिदबाधेन सर्वाबाधात्, तस्यापि बाधे बाधस्यैव बाधेन सर्वाबाधादिति । न चात्र प्रक्रियासमाख्यबाधसमेन सङ्करः, तुल्यबलत्वाभ्युपगमपूर्वकत्वात् तत्र प्रत्यवस्थानस्य, इह तु तदभावात्, हेतुबाधादिष्वसङ्कीर्णोदाहरणान्तरसंभवाच्च । प्रतिप्रमाणसमभेदतामात्रं तु भवतु वा मा वा । उक्तप्रकारेण विवेकस्तावदुपपन्न इति ॥

अथ वर्ण्यसमादेरुत्थानहेत्वादिव्यञ्जनायेदं तावद्भ्रमः—पक्षदृष्टान्तौ प्रागेव लक्षितस्वरूपौ । हेतोश्च व्यक्तिभेदेऽपि सामान्याकारसंगृहीततया व्याप्तिश्च स्थापिता । तत्र पक्षवर्तिन्या हेतुव्यक्तेरसिद्धार्थत्वम्, साध्यज्ञापनाय प्रवृत्तत्वम्, व्याप्तिग्राहकप्रमाणेन विशेषतोऽनास्कन्दितत्वम्, संदेहसमानविषयत्वम्, स्वरूपभेदश्चेति पञ्चरूपाणि । सिद्धार्थत्वे पक्षस्वरूपव्याघातात्, साधननैरर्थक्याच्च ; साध्यज्ञापनप्रवृत्त्यभावे हेतोरफलत्वात्, हेतुत्वव्याघाताच्च ; व्याप्तिग्राहकप्रमाणेन विशेषतो विषयीकृतत्वे विप्रतिपत्त्यभावप्रसङ्गात्, प्रयोगनैष्फल्याच्च ; संदेहाभावस्त्वनुल्लेखेन निश्चयेन वा ? पूर्वत्र किं साध्येत ? उत्तरत्र सिद्धं किमर्थं साध्येत ? तथा सैव चेद्धेतुव्यक्तिः, तदा सिद्धार्थत्वादेरवश्यंभावादुक्तदोषानतिवृत्तिः । कृत्तिकारोहिण्यादिषु चक्रप्रवाहवात्याविक्षेपादिवशात्तत्तदुदयादिव्यक्तिभेदा व्यवस्थिताः, अन्यथा तत्राप्यनुमेयपरिशेषा-

भावात्। एवं दृष्टान्तवर्तिहेतुव्यक्तेरुक्तरूपविपर्ययेण सिद्धार्थत्वादिरूपप्रपञ्चकं शाश्वतिकम्, साध्यासिद्धौ सपक्षस्वरूपव्याघातात्, संप्रतिपत्त्यर्थं व्याप्त्युदाहरणासंभवाच्च। अतएव रूपान्तराणामपि विप[र्यासः]र्ययः सिद्धः। अपिच स्वयं चेत्तत्र साध्यज्ञापनाय प्रवर्तेत, ततो दृष्टान्तान्तरमन्वेषणीयम्; तत्रापि तथेत्यनवस्था। अतस्तत्र साध्यमन्यतो वेदितव्यम्। व्याप्तिग्राहकप्रमाणाविषयत्वे संदिग्धार्थत्वे च पक्षदृष्टान्तयोरविशेषः, स्वरूपाभेदे च पूर्वोक्ता दोषाः। नच पक्षो नास्तीति प्रतिज्ञातुं शक्यम्, एतत्प्रतिज्ञावाक्यार्थाभ्युपगमे पक्षाभ्युपगमात्, तदनभ्युपगमे पक्षप्रतिषेधासिद्धेः। एवं हेतुमात्रनिषेधोऽपि न शक्यः, कारकनिषेधे स्वकीयसर्वप्रवृत्तिविरोधात्, ज्ञापकनिषेधेऽपि परवाक्यतः स्वस्यार्थबोधमभ्युपगम्य परबोधार्थवाक्यप्रयोगायोगात्, हेतुनिषेधे च सहेतुके व्याघातात्, अहेतुके तथैव हेतुसिद्धेरपि विरोधाभावात्। एवं दृष्टान्तोऽपि सामान्यतो निषेद्धुं न शक्यः, लौकिकपरीक्षकसर्वपुरुषसंमतत्वात्, तत्रापि च वाङ्मात्रेण निषेधे तावतैव तत्साधनस्याप्यविरोधात्, हेतुतो निषेधे अन्वयरूपस्य व्यतिरेकरूपस्य वा कस्यचिद्दृष्टान्तस्य दुस्त्यजत्वात्, इति प्रतिष्ठि [ता] तैव पक्षहेतुदृष्टान्तमर्यादा ॥

वर्ण्यसमः ॥ एवं स्थिते दृष्टान्तवर्तिहेतुव्यक्तेः पक्षधर्मत्वापेक्षितासिद्धार्थत्वादिरूपविरहे साधनविकलत्वादिप्रसङ्गाद्दृष्टान्तस्यापि तादृग्रूपहेतुमत्तया वर्ण्यत्वेन प्रत्यवस्थानं वर्ण्यसमः; यथा—ब्रह्म सविशेषम्, पदार्थत्वात्; यः पदार्थः स सविशेषः, यथा घटः, इत्युक्ते, जातिवाद्याह—पक्षे साधकतया प्रयुक्तस्य हि हेतोर्व्याप्तिर्दृष्टान्ते प्रदर्श्यते; नान्यस्य, अनन्वयादिप्रसङ्गात्। स च यादृग्रूपविशिष्टः पक्षे दृष्टः, तादृग्रूपविशिष्ट एव दृष्टान्तेऽप्युदाहरणीयः, अन्यथा सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वादिति विशिष्टहेतुप्रयोगे सामान्यवत्त्वादिमात्रस्य व्याप्त्युदाहरणप्रसङ्गात्, एवमेकदेशव्यतिरेकेण व्यतिरेकोदाहरणप्रसङ्गात्। ततश्च पक्षवर्तिनो हेतोरसिद्धार्थत्वादयो रूपविशेषास्तद्धेतुकरूपभेदश्च दृष्टान्तेऽस्ति वा नवा? अस्ति चेत्, असिद्धार्थत्वादिभिः साध्यविकलत्वादिकमनिवार्यम्। नचेत्, प्रकृतसाधनविकलत्वाद्दृष्टान्त एव तादृशहेतुमत्तया वर्ण्यः, अलं पक्षे साध्यवर्णनेन इति। अत्र सपक्षवर्तिहेतुव्यक्तेः पक्षमात्रविवक्षितरूपवैपरीत्येनोपलम्भ उत्थानहेतुः। दृष्टान्तादिकं दूष्यम्। साधनविकलत्वादिकमारोप्यम्। फलं तद्भ्रान्तिः। असाधारणं दुष्टत्वमूलं चायुक्ताङ्गाधिक्यम्; न हि दृष्टान्तवर्तिन्या हेतुव्यक्तेरसिद्धार्थत्वादिकं युक्तम्, तथा सति दृष्टान्तत्वभङ्गप्रसङ्गात्। व्याप्तिसंप्रतिपत्तिस्थानं हि दृष्टान्तं ब्रूमः। न चासिद्धार्थत्वादिसंभवे त[दभाव]द्भावसिद्धिः। अत एव युक्ताङ्गहानिरपि, दृष्टान्तवर्तिहेत्वङ्गस्य सिद्धार्थत्वादेस्त्यागात्। अविषयवृत्तित्वं वा, पक्षवृत्तिहेत्वङ्गानां दृष्टान्तवर्तिनि संचरणात्। एवमपि चेत् साधनविकलत्वादिः प्रसज्येत, तथा सत्यनुमानजातीयमेवोच्छिन्नं स्यात्। न चैवमस्त्विति वाच्यम्, तत्र व्याघातादेः प्रागेवोक्तत्वात्। अपि च, एवं पर्यनुयुञ्जानश्च जातिवादी किं दृष्टान्तवर्तिहेतुव्यक्तेः स्वभाववैषम्यमात्रं प्रकाशयति? उत तन्मुखेन वादिहेतोरसाधकत्वं साधयति? नाद्यः, अर्थस्थित्युपन्यासे विरोधाभावात्, अर्थान्तरनिग्रहस्थानप्रसङ्गाच्च। न द्वितीयः, वादिसाधनमसाधकम्, साधनविकलत्वादिदोषदूषितत्वात्, संप्रतिपन्नहेत्वाभासवत्, इत्यत्रापि पक्षसपक्षवर्तिहेतुव्यक्तिभेदस्य तद्रूपवैचित्र्यस्य च दुर्वारत्वात्, तदनभ्युपगमे स्वप्रयोगानुत्थानात्, तदभ्युपगमे च स्वोक्तपर्यनुयोगसाम्यादिति ॥

अवर्ण्यसमः ॥ पक्षवृत्तिहेतुव्यक्तेर्दृष्टान्तापेक्षितसिद्धार्थत्वादिरूपविरहे हेत्वसिद्ध्यादिप्रसङ्गात् तादृग्रूपहेतुमत्त्वाभ्युपगमे पक्षस्य साध्यत्वाभावप्रसञ्जनम् अवर्ण्यसमः। वर्ण्यः—साध्यः, अवर्ण्यः असाध्य इत्यर्थः, यथा—ब्रह्म शरीरित्वात्यन्ताभावरहितम्, आत्मत्वात्, अनीश्वरात्मवत् इत्यत्र। यद्यप्यात्मत्वमात्रमनुवृत्तम्, तथाऽपि तत्तद्विशेषणभेदेन

विशिष्टताभेदात् पक्षदृष्टान्तयोर्भिद्येत । ततश्च दृष्टान्त इव पक्षेऽप्यसौ हेतुः सिद्धार्थत्वादिविशिष्टः, न वा? न चेत्, व्याप्यतयाऽनुसंहितविशिष्टहेत्वभावात् स्वरूपासिद्धिः; सकलसपक्षानुयायिस्वरूपवैकल्यात् सोपाधिकतादिश्च । तद्रूपविशिष्टश्चेत्, सिद्धसाधनत्वासाधकत्वनिर्णयसमानविषयत्वप्रसङ्गः । ततश्चासाध्यत्वं पक्षस्येति । अत्र पक्षनिष्ठहेतुव्यक्तेर्दृष्टान्तमात्रापेक्षितरूपवैपरीत्येनोपलम्भः उत्थानहेतुः । पक्षहेतू दूष्यौ । सिद्धसाधनत्वादिकमारोप्यम् । तथाऽभिमानः फलम् । प्रातिस्विकं दुष्टत्वमूलं वर्ण्यसमवत् । व्यत्यासेन त्रितयमपि, पक्षस्थहेतुव्यक्तेरनङ्गानां सिद्धार्थत्वादीनामुररीकरणात्, अङ्गानामसिद्धार्थत्वादीनां त्यागात्, दृष्टान्तवर्तिन्यपेक्षितानां पक्षवर्तिनि संच[ा]रणाच्च इति । तथा च स्वीकारे तथैव स्वव्याघातात् प्रतिक्रिया; न हि पक्षादिकमपि सामान्यतः प्रतिक्षेप्तुं शक्यम्, न कश्चित् पक्ष इति पक्षप्रतिक्षेपवाक्यस्यापि पक्षादिगर्भितत्वात् । सिद्धसाधनतानुयोगश्चात्र स्वदूषणं भवति । यदि हि प्रतिवादी असिद्धमपि साधयन्ननेनोपायेन सिद्धसाधनं पुरस्कृत्य निगृह्येत, तदा स्वयमेव हि निगृहीतः, एतावन्तं कालं निगृही [विगी] तस्य परसाध्यस्येदानीमभ्युपगमात् । तथा चोक्तविरोधापसिद्धान्तादि । अपि च इदमसाधकम्, सिद्धसाधनत्वादित्यत्र साधकत्वादसाधकमित्युक्तं स्यात् । न ह्य[न्य]तः सिद्धमिदं साध्यत इत्युच्यते, किं त्वेतद्धेतुशक्त्यैवेति व्याघातः । अस्त्वेवम्, तथाऽपि सिद्धसाधनतानुयोगमुखेनैव स्वव्याघातो दुर्वचः, इदमसाधकमिति जातिवादिसाध्यस्य सिद्धत्वाभ्युपगमे तदिष्टापादनात्, स्वोक्तस्वमतविरोधापाताच्चेति चेत्, तदेतदसमीक्षितवैषम्यं पिशाचभाषितम्; न ह्यत्र जातिवादिवाक्यार्थं सिद्धं कृत्वा वयं स्वव्याघातं ब्रूमः, अपि तर्हि यद्येवंविधेन सिद्धसाधनत्वेन वादिसाधनं दुष्टमिष्येत, तदा तथाविधेनैव तेन जातिसाधनमपि दुष्टं स्यात् । दुष्टस्य च न दूषकत्वमिति निर्बाधा स्थापना । तच्चेत् तेनापि न दुष्टम्, तदा तद्वदेव स्थापनाऽपि निर्दोषेति निरर्थकः श्रमः । अतो न ब्रूमो वयं नेदं दूष्यदूषकं सिद्धसाधनत्वादिति, किं तु स्वव्यापिदूषणसमाधिग्रस्तत्वादिति ॥

उत्प्रेक्षासमः ॥ स्वोत्प्रेक्षितसाधनदूषणादिप्रतिक्षेपः उत्प्रेक्षासमः । यथा—शब्दानित्यत्वे वादिना प्रतिज्ञाते भण्डः प्रतिवाद्याह—अलमेतावता, शब्दानित्यत्वे प्रत्यक्षत्वं हि त्वया हेतुरभिधित्सितः; स च सामान्यादिभिरनैकान्तिक इति साधनोत्प्रेक्षया प्रतिक्षेपः । एवं शब्दो नित्यः कृतकत्वादिति हेतुं प्रयुज्य वादी स्वयमेवाह—असिद्धत्वमिह दूषणं त्वया विवक्षितम्, तच्चात्र नास्ति, प्रत्यक्षत एव कृतकत्वसिद्धेरिति । निर्मर्यादा ये तु लक्षयन्ति—

* असिद्धतां वादिहेतोरुक्त्वा तां साधयेत् स्वयम् । तद्दूषणान्मूलहेतुभङ्गः कार्यसमो मतः ॥

इति, अयमपि अस्मदुक्तोत्प्रेक्षासमावान्तरभेद एव । न चैतदेव लक्षणं युक्तम्, उदाहृतोदाहरणान्तरासंग्रहात् । न च कार्यसमसमाख्यैव सर्वत्रोचिता, अवाचकत्वात् । युक्तस्त्ववान्तरविशेषमुदाहरतः सूत्रकृतस्तत्र तन्निवेशः । एवं दृष्टान्ततर्कोत्प्रेक्षादयोऽपि द्रष्टव्याः । नचात्र स्वोत्प्रेक्षितदूषणमात्राच्छलत्वं श[ङ्]क्यं वक्तुम्; शब्दार्थारोपणाभावात्, पाक्षिकपराभिमतिसंभवाच्च । यत्तु सौगतैरुक्तम्—

* साध्येनानुगमात् कार्यसामान्येनापि साधने । संबन्धिभेदाद् भेदोक्तिदोषः कार्यसमो मतः ॥ इति,

अत्रापि यदि कार्यत्वहेतोः पक्षदृष्टान्तयोस्ताल्वादिपूर्वकत्वमृद्दण्डादिपूर्वकत्वलक्षणविशेषप्रदर्शनमात्रे विश्रमः, तदा जातित्वमेव नास्ति; कुतस्तद्विशेषता? अनुपयुक्तवादी त्वयमर्थान्तरेण निग्राह्यः । अथ दृष्टान्तस्थविशेषस्य व्यापकत्वाभिमानेन साध्यापकर्षविवक्षा, तदा अपकर्षसमभेदोऽयम्; यदा तु साधनवैकल्यहेत्वसिद्ध्यादिष्वभिप्रायः, तदाऽपि वर्ण्यावर्ण्यसमयोरनुप्रवेश इति न पृथग्जातिता । अतोऽस्मदुक्तप्रक्रियैवात्र साधीयसीति । अत्र परमतपारीणत्वाभिमानो वा स्वोत्प्रे-

क्षितातिरिक्तासंभवाभिमानो वा, संभवेऽपि तुल्यन्यायत्वाभिमानो वा, प्रतिवादिनस्तथाविधाभिमानजननमनोरथो वा स्यादुत्थानहेतुः। यथायथं सर्वं दूषणमारोप्यम्। तत्क्रमः फलम्। दुष्टत्वमूलं त्वसाधारणमविषयवर्तित्वम्। प्रतिवाद्युक्तमेव हि दूषणस्य विषयः, न तु तदभिप्रेतमप्यनुक्तम्; अनभिप्रेतं तु किं पुनः? अन्यथा उपर्युपरि साधनदूषणपरम्परोत्प्रेक्षणेनोपन्यासप्रक्रियया प्रतिवादिनोऽनवसरप्रसङ्गः। कथायाश्च विश्रमः कदाचिदपि न स्यात्। किं च यदि सम्यञ्चं हेतुमन्यं प्रतिवाद्यभिप्रैति, स्वयं तु सम्यञ्चमसम्यञ्चं वा कंचिदन्यमुत्प्रेक्ष्य दूषयति, तदा प्रतिवाद्यभिप्रेतस्य हेतोः किमायातम्? न च तस्य तुल्यन्यायता निश्चेतुं शक्यते, सामान्यतो विदिते प्रक्रियान्तरसंभवात्; विशेषतो विदिते तस्यैव दूषयितुं युक्तत्वात्। न च तस्य विशेषतो वेदनं शक्यम्, पराभिप्रायस्याप्रत्यक्षत्वात्, विशेषनिर्णायकस्य लिङ्गादेश्चासंभवात्। न च सिद्धान्तकोशलिखितमेवासौ वदिष्यतीति नियमः, प्रज्ञावतां स्वोत्प्रेक्षिकयाऽन्यकथनस्याप्यविरोधात्। अतस्तदभिप्रेतमेवोत्प्रेक्षापदमित्यपि दुर्वदम्। अस्तु वा लोकोत्तरप्रज्ञेन तदभिप्रेतमेव विदितम्, तथाऽपि न तदनुक्तं दूष्यम्; इदं ममानभिप्रेतमित्यपह्नुवाने प्रतिवादिनि सभ्यानामपि तत्र साक्षित्वासंभवात्, विश्वसाक्षिणां च मौनावष्टम्भात्, शपथस्य चात्र दृष्टप्रत्यवायहेतोरनुपदेशात्, अदृष्टप्रत्यवायहेतोरनुपयोगात्। अपि च यदाऽसौ निष्प्रतिभः स्यात्, तदाऽनायाससिद्धे विजये किं तदभिप्रेततया कस्यचित् पुरस्कारेण? सप्रतिभश्च यदाऽसावभिप्रेतं स्वयमेव वाचि निवेशयति, तदा पुरोभाविषु वचनदोषादिषु संभविष्यत्सु किं विगीयमानव्याप्त्यादिपरामर्शसापेक्षार्थानुवादतद्दूषणवृथाश्रमेण? वचनदोषानपि संभविष्यतो विदित्वा दूषयत्विति चेत्, हन्त! तर्हि प्रतिवाद्यपि वैयात्यादेवमपशब्दादिस्त्वया विवक्षित इत्युक्त्वा यदि निगृह्णाति, तदाऽसौ कथमपसरिष्यति? एतेन साधारणः स्वव्याघातोऽपि सुस्थः; न ह्यन्यतर उत्प्रेक्षितमपि दूषयिष्यति नेतर इति राजाज्ञा; न च तथाऽऽदौ नियमः कृतः। अपि च निरपराधस्य तावन्न निग्रहः; अत्र च केनापराधेन प्रतिवादी निगृह्यते? परोत्प्रेक्षणीयदुष्टार्थाभिप्रायवत्त्वादिति चेत्, संदिग्धं तावदिदम्। तथाविधाभिप्रायसंभावनाविषयत्वादिति चेत्, स्वस्यापि समानमित्येवमपि स्वव्याघातः। इदमसमीचीनम्, मदुत्प्रेक्षितासमीचीनव्यवस्थापकत्वात्, इति वाक्यार्थविश्रमेऽप्येवं विपरिवर्तो वाच्यः। इयं [च] तु जातिर्द्व्यादिमामपि कक्ष्यामास्कन्दति, आदावेव वादिनं विनिवार्य त्वदभिप्रेतमेव दुष्टमिति वक्तुं शक्यत्वात्; तथाऽप्यर्थतो जात्यन्तरवत् द्वितीयैवेयं कक्ष्या, तदभिप्रेततया प्रथमस्यापि पर्वणः स्वयमेव पुरस्कारात्। साधनेष्वपि केषुचिज्जातित्वमिच्छतामपि दूषणरूपा जातयो द्वितीयादिकक्ष्याभाविन्य एवेति नियम इति ॥

एवं सप्ताङ्गसंपन्नजातितत्त्वावलोकिनाम्। सदुत्तरैस्तदुत्थानात् तत्त्वधीजयसंभवः ॥
अन्यथा [ऽरण्यरुत] षण्डरतवत् भवेयुरफलाः कथाः। इति प्रख्यापनायात्र कथाभास उदाहृतः ॥
अर्थिप्रत्यर्थिनोस्तावन्न द्वयोर्जयसंभवः। एकस्य विजयेऽपि स्यात् सफला सत्कथैव सा ॥
यत्र द्वयोर्न विजयो न वा तत्त्वविनिश्चयः। कुकथां कथयन्त्येनामसदुक्तिपरम्पराम् ॥
तां द्विकक्ष्यादिकामेके षट्कक्ष्यावधिकां विदुः। पूर्वत्रासंभवात् सभ्यैरुत्तरत्र निवारणात् ॥
असदप्रतिभादौ तु पक्षैकत्वमपि क्वचित्। सभ्येष्वसत्स्वदक्षेष्वप्युपर्यपि च धावति ॥

तथा हि—कथामभ्युपगम्य यदि वादी सभ्येषु दत्तावधानेषु प्रतिवाद्यनुयुक्तोऽपि तूष्णीमास्ते, प्रतिवादी च तदा मन्दचित्तवृत्तिरवश्योद्भाव्यमपि तादात्विकं निग्रहस्थानं न व्यनक्ति, तदा कस्यचिदपि पक्षस्यानुत्थानमेव। निग्रह[स्थान]-

व्यञ्जनेऽपि तावति समाप्तिः। यदा तु वादी सद्वा असद्वा ब्रूयात्, अनाहितप्रतिभस्तु प्रतिवादी न किंचि[द्विवक्षति]-द्वक्ति, वादी च यदि तदा निग्रहमूढः, तदा एकपक्षा कथा। द्वयोश्च न विजयः; वस्तुतः सद्वादिनोऽपि प्राप्तकाल-निग्रहानुद्भावनात्। वादिना प्रतिवादिनिग्रहे तु तेनैव विजयित्वायासते सभ्याः विजयिता स्यात्। यदा त्वसत्साधनोप-क्रमायां कथायां प्रतिवादी सदुत्तरेण निगृह्णाति, तावति च सभ्याः प्रमाणीकृताः, तदा प्रतिवादिनो विजयः। अस-दुत्तरेण निग्रहे सभ्येषु भरन्यासे द्विपक्षी कुकथा। एवं तदुपरि वादिप्रतिवादिनोः सप्रतिभयोरसदुत्तरपरम्परायां पञ्च-पक्षीपर्यन्ता कुकथाप्रवृत्तिः। सत्साधनोपक्रमायां तु षट्पक्षीपर्यन्ता। तत्र हि प्रथमः पक्षस्तावदनुपप्लवः प्रादुःष्यात्। प्रतिवादिनस्तु निरनुयोज्यानुयोगभेदचतुष्का[न्यन्तरेण]द्यवतरणाद् द्वितीयपक्षप्रवृत्तिः। तत्र सभ्याः स्वयं कथाया-मनधिकृतत्वाज्जानन्तोऽपि वाद्यनुयोगमपेक्षमाणास्तूष्णीमासते। तदा वादी सदुत्तराप्रतिभानात् तत्प्रतिभानेऽपि वा जडी-करणदुरभिलाषेण तज्जातीयमन्यद्वा किंचिदसदुत्तरं प्रयुञ्जीत, तथाऽपि प्रतिवाद्यनुयोगमपेक्षमाणेषु प्रतिवादिनस्तथैव चतुर्थपक्षावतारः। तथाऽप्यवसरप्राप्तायोभयस्तम्भरूपायानुविधेयप्रश्नाय दत्तक्षणेषु वादिनः पञ्चमः पक्षः। अनुविधेयेऽपि देवानांप्रिये स्वयमानृशंस्या[त्तयोः]त्कथंकरणयोरप्रतिभया कथाविच्छेदकाङ्क्षिषु षष्ठः। ततःपरं स्वदोषपरिहारायोभौ निवार्य कुकथात्वप्रकाशनेनापक्षपातेन द्वावपि निगृह्णन्ति। सभ्याभावे मन्दमतिव्यव[व्या]हारेषु वा सभ्येषु मार्जारकलह-व[द्दैवान्नि] देवानिवारणमिति॥

॥ इति न्यायपरिशुद्धौ अनुमानाध्याये तृतीयमाह्निकम् ॥

॥ अथ चतुर्थमाह्निकम् ॥

अथ **प्रमाणाभासाः**—अप्रमाणत्वे [सति] प्रमाणव्यवहारविषयास्ते। प्रमाणचातुर्विध्यात् तदाभासा अपि चतु-र्विधाः प्रत्यक्षानुमानागमस्मृत्याभासभेदात्। एषामवान्तरलक्षणं सामान्यलक्षणच्छाययैव सुगमम्। तत्र प्रत्यक्षाभासो यथा—द्वौ चन्द्रमसौ, पीतः शङ्खः इत्यादिः। विषयेन्द्रियादिदोषादस्योद्भवः। [तं]इमं च प्रमाणतयोपन्यस्यतोऽस्य हेत्वा-भासवन्निग्रहो भवत्येव। **अक्षपादसूत्रे**ऽपि हेत्वाभासग्रहणमुपलक्षणम्; चशब्दाद्वा अनुक्तसमस्तसंग्रहः।

हेत्वाभासः॥ अनुमानाभासो यथा—बाष्पादिषु धूमत्वाद्यारोपेण धूमवत्त्वात्पर्वतोऽग्निमानित्यादिः॥

अव्याप्तापक्षधर्मौ द्वौ हेत्वाभासौ समासतः। तयोरेव प्रपञ्चेन स्यादसिद्ध्यादिकल्पना॥

यदुक्तं **न्यायतत्त्वे**—* असिद्धानैकान्तिकविरुद्धा हेत्वाभासाः इति, तत्रासिद्धोऽपक्षधर्मः; इतरावव्याप्तभेदौ हेत्वाभासौ। तावन्मात्रोक्तिश्च प्रदर्शनार्था। प्रयोजकान्तरेण वा तदन्यसंग्रहस्तत्र विवक्षितः। ये चासाधारणबाधित-प्रकरणसमादयो भेदाः कथ्यन्ते, तत्रासाधारणस्याव्याप्तत्वं केवलव्यतिरेकिनिराकरणे प्रदर्शितम्। अनैकान्तिकभेदश्चासौ कैश्चिदुक्तः; तथा चोक्त**मागमप्रामाण्ये**—* स न तावदनैकान्तिकः; स हि द्वेधा—साधारणासाधारणभेदात् इति। बाधितस्य तु न पक्षधर्मत्वम्, नापि व्याप्तिरिति दूषणद्वयसमुच्चयः। नहि साध्याभाववत्तया निर्णीतस्य संदिग्धसाध्यत्व-लक्षणं पक्षत्वम्। नच हेतुमति पक्षे साध्याभाववत्तया प्रमिते हेतोर्व्याप्यताग्रहणसंभवः। प्रकरणसमस्य तु प्रतिसाधन-प्रतिरुद्धत्वलक्षणस्यानिर्णीतबलत्वात् बलस्य च व्याप्तिपक्षधर्मतानतिरेकाद्व्याप्त्याद्यनिश्चये[न] तयोरेवान्तर्भावः। स्वपक्ष-सिद्धाविव परपक्षसिद्धावपि त्रिरूपो हेतुः प्रकरणसमः कैश्चिल्लक्ष्यते। यथा—नित्यः शब्दः, पक्षसपक्षयोरन्यतरत्वात्,

आकाशवत् । अनित्यः शब्दः, पक्षसपक्षयोरन्यतरत्वात्, घटवदिति । तत्रेदं लक्षणमसंभवीत्येके, एकस्य पक्षद्वयेऽपि त्रैरूप्यासंभवात् । नित्यत्वे हि साध्ये शब्दाकाशयोरन्यतरत्वादिति हेत्वर्थः । अनित्यत्वे तु शब्दघटयोरन्यतरत्वादिति । न च शब्दसारूप्यमात्रेण हेतोरेकता, अतिप्रसङ्गात् इति । तत्र यद्यप्येतस्मिन्नुदाहरणे लक्षणमसंभवि, तथाऽपि महाविद्यादिप्रस्थानेषु केषांचिद्धेतूनां साध्यतदभावयोः समानाकारतया संभवं पश्यामः ; यथा—शब्दः स्वस्वेतरवृत्तित्वानाक्रान्तानित्यनिष्ठाधिकरणम्, प्रमेयत्वात्, घटवदिति शब्दानित्यत्वसाधने प्रवृत्तः प्रमेयत्वहेतुरेक एव ; शब्दः स्वस्वेतरवृत्तित्वानाक्रान्तनित्यनिष्ठाधिकरणम्, प्रमेयत्वात्, आकाशवदित्यपि शब्दनित्यत्वस्थापने पूर्ववृत्तिरूप उपलभ्यते । अतः नोदाहरणमादरणीयमिति न्यायाल्लक्षणासंभवोद्यं हस्तालोचः । क तर्ह्यस्यान्तर्भावः ? अविनाभावादिसंभावनायामपक्षधर्मे, अन्यदा त्वव्याप्ते । यदि पक्षे व्यापकप्रतीत्यपर्यवसानबलादनित्यत्वं साधयेत्, स एव हेतुः कथं न तद्विपरीतव्यापकप्रतीत्यपर्यवसानेन नित्यत्वमपि ? ततश्चाविशेषादुभयत्रापि व्याप्तिर्न स्वाभाविकीत्यव्याप्तकोटौ निक्षेपः । य[त]था च परपक्षवत् स्वपक्षस्यापि बाधकमुत्तरं जात्युत्तरमिति व्यवहरन्ति, तथा वाद्यभिमतसाध्यवत् तद्विपरीतप्रतिवाद्यभिमतसाध्यस्यापि साधकत्वप्रसङ्गादर्थत उभयासाधकान्येतानि जातिसाधनानीति च केचिदूचुः । अपि चैषां साध्यतदभावसाधने समानाकारत्वादेवानैकान्तिकवदव्याप्तत्वं सुव्यक्तम्, उभयत्र विपक्षे बाधकाभावाच्च । न चोभयत्र संभवः, व्याघातात्, एकस्मिन् विरुद्धयोरिव विरुद्धोभयप्रतिक्षेपयोरपि परस्परात्मनोरतिरिक्तयोर्वा समुच्चयासंभवात् । नच शीतोष्णव्यतिरेकवत् कोट्यन्तरोपलम्भः, भावाभावात्मना विरोधे तत्तदन्यात्मना विभागे च तदसंभवात् । अत एव ह्यनिर्वचनीयानेकान्तवादयोरनवतारः । अस्त्वन्यतरद्विपक्षे बाधकमिति चेन्न ; तथाऽपि तादृशरीतेः कुटिलोन्नीतिकल्पिताया विपक्षे बाधकविरहादप्रयोजकत्वं सिद्धम् । प्रमाणान्तरबलात्तु सिध्यतस्साध्यविशेषस्य विपर्यये बाधकम[प्य]स्तु ; न पुनर्महाविद्यादिहेतुभिरप्रयोजकैः सिध्यतः । अप्रयोजकोऽन्यथासिद्धः, उपाधिमान् व्याप्यत्वासिद्धः इति [चा] वाऽनर्थान्तरमित्यतोऽपि न द्वितीयबहिर्भावः । तथा हि—

विपक्षे बाधकाभावादुपाधेर्वाऽपि संभवात् । हेत्वाभासोऽन्यथासिद्धश्चन्न प्रयोजक इष्यते ॥
पञ्चभ्यः पृथगेवैनं कतिचित्संप्रचक्षते । व्याप्यत्वासिद्धभेदोऽयमिति त्वाहुर्मनीषिणः [विचक्षणाः, : परीक्षकाः] ॥
विपक्षे न हि निर्बाधे व्याप्तिः काऽपि प्रसिध्यति । प्रतिकूलेषु तर्केषु सत्सु धात्राऽप्यनिश्चयात् ॥
व्याप्तिस्वरूपवैकल्यकल्पितोपाधिकेषु नः । अप्रयोजकतावादः प्राचां प्रागेव दर्शितः ॥

अन्ये [त्वा] प्याहुः—

* समासमाविनाभावावेकत्र स्तो यदा तदा । समेन यदि नो व्याप्तस्तयोर्हीनोऽप्रयोजकः ॥ इति ।

शावरवार्तिककारश्च—

* व्याप्तेश्च दृश्यमानायाः कश्चिद्धर्मः प्रयोजकः । अस्मिन् सत्यमुना भाव्यमिति शक्त्या निरूप्यते ॥
अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः । दृष्टैरपि न तैरिष्टा व्यापकांशावधारणा ॥ इति ।

एनमेव [हि] संदिग्धव्याप्तिकं **बाह्याः** पठन्ति—

* साध्यादन्येन धर्मेण सपक्षेष्वनुयायिना । विनापक्षे स्थितो धर्मः संदिग्धव्याप्तिको मतः ॥ इति ।

तस्मादव्याप्तभेद एवायमप्रयोजकः, तत्स्वभावानतिलङ्घनाच्च । **श्रीमहाविद्यामानमनोहरप्रमाणमञ्जर्या**दिपठितवक्रा-

नुमानस्यापि तथात्वम् । एवं पक्षदृष्टान्ताभासानामपि हेत्वाभासेष्वेवान्ततो निवेशः । तेषां च तयोरितरत्रैव विश्रमः, सर्वेष्वपि पक्षाभासेषु हेतोरपक्षधर्मत्वात् । न हि पक्षाभासधर्मस्य पक्षधर्मता । न हि साध्यसाधनोभयविकलाश्रयहीनेषु दृष्टान्ताभासेषु हेतोर्व्याप्तिग्रहः शक्यः, सर्वेषु च दृष्टान्ताभासेष्वव्याप्तत्वात् । सिद्धसाधनेऽपि हि पक्षधर्मत्वं न सिध्यति, सिद्धधर्मविशिष्टस्यापक्षत्वात् । यदि पक्षीकृतेष्वेकत्र साध्यं प्रसिद्धं, तदा अंशे सिद्धसाधनादंशतोऽपक्षधर्मत्वम् । यदा तु सिद्धमसिद्धं च साध्यद्वयं प्रयुञ्जीत, तदाऽपि सिषाधयिषितस्य सर्वस्य साध्यत्वाभावादंशतः सिद्धसाधनादंशतोऽपक्षधर्मत्वम् । अतोऽतिपीडायां द्वावेव हेत्वाभासौ । पूर्वेषां तु पक्षाभासादिपृथगुदाहरणवत् स्फुटतया पृथगुद्भाव्यत्वाय [नैयायिक] अधिकपरिगणनम् । तदनुसारेण ब्रूमः—तत्र **न्यायतत्त्वोक्ता**स्त्रयः । तदभिप्रेतौ कालात्ययापदिष्टप्रकरणसमाविति पञ्च हेत्वाभासाः ।

असिद्धः ।। तत्र व्याप्तिपक्षवृत्तिनिश्चयरहितोऽसिद्धः । तद्भेदास्तु **न्यायतत्त्वे** संग्रहेणोक्ताः—* अज्ञातसंदिग्धविपरीतास्तिस्रोऽसिद्धयः इति । सर्वत्रापि पक्षादिष्वज्ञानसंशयविपर्ययैस्त्रिभिरेव ह्यसिद्धिर्भवति ।

पक्षतद्धर्मभागानां साध्यतद्धर्मयोस्तथा । हेतुतद्व्याप्तिधर्माणां स्वरूपेणाप्रसिद्धितः ॥
हेत्वंशयोरिहासिद्धेर्वा वैयधिकरण्यतः । पक्षांशसाध्यहेतुस्थविशेषणविशेष्ययोः ॥
वैयर्थ्यादत्र सर्वत्र वादिनः प्रतिवादिनः । द्वयोश्च निर्णयात् तद्वत् संशयात् सिद्धसाधनात् ॥
असिद्धयोंऽशसिद्धेश्च विविच्यन्ते शताधिकाः ॥

यद्यपि व्यर्थविशेषणत्वादिकं न वस्तुतोऽसिद्धरूपम्, तथाऽपि **तत्त्वरत्नाकरा**दिषु परानुसारेण तथोक्तम् । व्यर्थमभिदधानो वादी त्वर्थान्तराख्यनिग्रहस्थानेन निगृह्येत ; न त्वसिद्ध्या, प्रकृतानुपयुक्तस्य स्वरूपासिद्धत्वादसिद्धत्वेऽपि स्वरूपासिद्धेरेव वाच्यत्वात् । व्यर्थविशेषणप्रयोगेऽपि विशेष्यमात्रव्याप्तेरनपक्रमात् विशिष्टस्यापि व्यभिचाराभावेन व्याप्तिसिद्धेः । न हि कार्यत्वमनित्यत्वं न व्यभिचरति, प्रयत्नकार्यत्वं तु व्यभिचरतीति संभवति । न च धूमवत्त्वालोकवत्त्वे प्रत्येकं पावकाविनाभूते, धूमवत्त्वे सत्यालोकवत्त्वादिति प्रयोगे त्वविनाभावं त्यजत इति युक्तिमत् । अतो व्यर्थविशेष्यत्वेऽपि न व्याप्तिभङ्गः । पक्षादिविशेषणादिवैयर्थ्येषु तु न व्याप्यत्वासिद्धिप्रसङ्गोऽपि । केचित्तु असिद्धिं चतुर्धा संगृह्णन्ति ; तथा हि—व्याप्तत्वे सति पक्षधर्मतया प्रमितिर्हि हेतोः सिद्धिः । तदभावश्च व्याप्तेः पक्षस्य तद्धर्मस्य तत्प्रमितेर्वा खल्वभा[वः] वात् स्यात् । तत्र च व्याप्यत्वासिद्धिः, अश्रयासिद्धिः, स्वरूपासिद्धिः, तत्रैवाज्ञानासिद्धि [रिति] समाख्यानिवेशः इति ॥

नन्विदमसिद्धलक्षणमतिव्याप्तम्, विरुद्धानैकान्तिकयोरपि व्याप्त्यभावेन व्याप्यत्वासिद्धत्वप्रसङ्गात् । न चैतदिष्टम्, पृथगेव परिसंख्यानात् । अथैतत्परिहारायानिश्चितपक्षवृत्तिरसिद्ध इति लक्ष्येत, तदा त्वव्याप्तिः, व्याप्यत्वासिद्धसंग्राहकत्वाभावात् । न चान्यत्र तत्प्रवेश इष्टो दृष्टो वा । किंच साध्यधर्मविशिष्टो धर्मी पक्ष इति सिद्धसाध्यस्यापक्षत्वात् तन्निष्ठस्य सिद्धसाधनाख्यस्य हेतोराश्रयासिद्धत्वमुच्यते ; तथा सति साध्याभाववत्तया निश्चितस्यापि संदिग्धसाध्यत्वलक्षणपक्षत्वाभावेनापक्षत्वाद्बाधितस्यापि हेतोराश्रयासिद्धतैव स्यात् । प्रमाणबाधितस्यापि साध्यस्य सिषाधयिषितत्वमात्रेण साध्यत्वात् तद्विशिष्टस्य पक्षत्वमिति चेत्, प्रमाणसिद्धस्यापि तथा किं न स्यात् ? अपि च व्याप्तिपक्ष [धर्मत्व] वृत्तिनिश्चय एव हि हेतोरङ्गम् ; तदभावलक्षणश्चासिद्धो हेत्वाभासमात्रपर्यायः स्यात् ; न तु तद्विशेषः । अतः प्रागुक्तप्रस्थानेन द्वैधमेवोचितम् इति । सत्यम्, तथाऽपि हेत्वाभासान्तराणां पृथग्लक्षणसंभवस्य वक्ष्यमाणप्रकारसिद्धत्वात् तल्लक्षणानाक्रा-

न्तत्वे सति हेतुरूपासिद्धेरिह लक्षणत्वेन विवक्षितत्वान्न दोष इति। तथैव सिद्धसाधनमपि बाधितसाधनवत् पृथक्कृत्य कश्चित् तद्व्यतिरेकमप्यसिद्धलक्षणे निवेशयेदिति चेत्, का नो हानिः? विवक्षावैचित्र्येण न्यूनाधिकोद्देशलक्षणादेः प्रारम्भाह्निक एव प्रदर्शितत्वात्, अत्र तु पञ्चधा परिगणयतामभिप्रायेणैव संग्रहात्। न चैकीकरणपृथक्करणाभ्यामाभासस्यानाभासता स्यात्, येनान्यतरपर्युदासे प्रयस्येम। उद्भावनेऽपि सामान्यरूपे विशेषरूपेऽपि तुल्यार्थतैव विवक्षिता। सामान्यनिर्देशेऽपि कथमिति विशेषमनुयुक्तेन स एव हि वक्तव्यः इति॥

अथात्र काश्चिदसिद्धय उदाह्रियन्ते। तत्र **व्याप्यत्वासिद्धः** प्रागुक्तो रूपवैकल्यकल्पितोपाधिको द्रष्टव्यः। तत्र च संदिग्धोपाधिके संदिग्धव्याप्यत्वासिद्धता। **आश्रयासिद्धो** यथा—शशशृङ्गं तीक्ष्णं शृङ्गत्वादिति। स्वसिद्धान्तमात्रसिद्धप्रकृतिपरमाण्वादिपक्षीकारे **त्वन्यतराश्रयासिद्धः**। **आश्रयभागासिद्धो** यथा—अवयवावयविनौ नित्यौ द्रव्यत्वादिति; न ह्यवयवसमुदायातिरिक्तमवयविशब्दार्थं त्रय्यन्तविद इच्छन्ति। **स्वरूपासिद्धो** यथा—नित्यं नभः निरंशत्वादिति; अत्र हि *व्योम्नोऽर्धभागाश्चत्वारो वायुतेजःपयोभुवाम्। इत्यादिपञ्चीकरणवाक्यबलादागमिकैर्नभसोऽपि सांशत्वमिष्यते। एष एवानिश्चितपञ्चीकरणवाक्यार्थस्य **संदिग्धासिद्धः**। साध्यस्यैव हेतुतया प्रयोगे च **साध्यविशिष्टाख्यः** स्वरूपासिद्धभेदः; यथा—क्षित्यादिकं सकर्तृकम् बुद्धिमत्पूर्वकत्वादिति। यदा तु सिद्धं साध्यं हेतुतया प्रयुज्येत, तदा त्वेवं स्वरूपासिद्धता वाच्या। सिद्ध एव हि हेतुः प्रयोक्तव्यः; स च साध्यात्मा चेत्, कथं नासिद्ध इति। अत्रच स्वेनैव ज्ञातेन स्वयं ज्ञाप्यत इत्यात्माश्रयद्वारेणासिद्धौ विश्रमः। धूमानुमानादिष्वेवाविदितधूमादिस्वरूपस्य**ाज्ञानासिद्धिः**। **व्यधिकरणसिद्धो** यथा—पर्वतो वह्निमान्, महानसस्य धूमवत्त्वादिति। यद्यपि धूमवत्त्वात् वह्निमत्त्वं सिध्यति; तथाऽपि नान्यनिष्ठेन तेन। यद्यप्यसौ न हेतोरपराधः, अपि तु प्रयोक्तुरेव; तथाऽपि प्रयुज्यमानवेषेण हेतुरसिद्ध एवेति युक्तं तथोद्भावनम्। अत एवानुपयुक्तपदोपादानेनार्थान्तरनिग्रहतैवेत्यपि न शङ्कनीयम्। दृष्टान्तस्थितहेतुव्यक्तिविशेषः पक्षे नास्तीति तस्य तत्र प्रयुज्यमानस्यासिद्धता युक्ता। दृष्टान्तस्थितस्यापि तस्य व्याप्तिग्रहणमुखेन प्रकृतोपयोगान्न सहसाऽर्थान्तरत्वं वक्तुं शक्यम्। यदि हि वक्ता पर्वतस्थधूमवत्त्वमेव हेतुमभिसंधाय महानसस्येत्यनुपयुक्तं ब्रूयात्, तदैवं स्यादपि; न च तथा विवक्षाऽस्माभिस्तद्वाक्यमन्तरेण निश्चेतुं शक्या। तथा चेत् ब्रूयात्, तथाऽपि महानसस्येति पदस्यानन्वयान्निग्रहस्थानान्तरता। अन्वितानुपयुक्तवचने ह्यर्थान्तरावकाशः, उभयसंनिपातेऽप्युद्भटस्यैवोद्भाव्यत्वादिति। **स्वरूपभागासिद्धो** यथा—घटव्यतिरिक्तं सर्वमनित्यम्, कार्यत्वात्, घटवदिति; न हि पक्षीकृतेष्वीश्वरादिषु स्वरूपतः कार्यत्वम्। येनाकारेण कार्यत्वम्, तेनाकारेणानित्यत्वसाधने तु सर्वत्रैव सिद्धसाधनतेति विशेषः। सिद्धसाधनस्य चाश्रयासिद्धताप्रकारोऽपक्षधर्मत्वप्रतिपादनेन प्रागुक्तः। सिद्धेष्वेव पक्षेषु हेतोः क्वाचित्कत्वे स्वरूपभागासिद्ध इति विशेषः। **विशेषणासिद्धो** यथा—क्षित्यादिकम् अस्मदाद्युत्तीर्णकर्तृकम्, अस्मदाद्यशक्यक्रियत्वे सति कार्यत्वात्; यत् येनाशक्यक्रियं कार्यं, तत् ततोऽन्यकर्तृकम्; यथा मनुष्याद्यशक्यक्रियं ततोऽन्यकर्तृकं वल्मीकादि, इति। अत्रास्मदादिशब्देन सर्वजीवग्रहणे विशेषणासिद्धः, अस्मदादीनामेवोपचितपुण्यानां विश्वामित्रादिवद्ब्रह्मिकादिवच्च विचित्रतरमहत्तरसूक्ष्मतरकार्यारम्भसंभवात्। न च तेषां तेषुतेष्वकर्तृत्वम्, कुलालादिष्वपि प्रसङ्गात्। न हि कुलालादयोऽपि सामग्र्यन्तर्भूतमदृष्टादिकमसमवायिकारणभूतमान्तरसूक्ष्मावयवसंयोगादिकं च यथावत् साक्षात्कुर्वन्ति। अपि त्वेवं व्यापृते सत्येतत् कार्यं भवतीति प्रमाणतोऽध्यवसाय प्रवर्तन्ते। तदेतत् तुल्यं विश्वामित्रादिष्वपि। प्रमाणं त्वन्वयव्यतिरेकादिकम्, शास्त्रं

चेति क एष विशेष इति ? एष एव हेतुर्व्युत्क्रमेण पाठे **विशेष्यासिद्धः**। एवमुभयथासिद्धिराश्रयदृष्टान्तविशेषणाद्यसिद्धिश्च ग्राह्या। यच्चात्र हेत्वाभासेऽप्यसिद्धे हेतुरसिद्ध इत्युद्भावनम्, न तत्र व्याघातः शङ्कनीयः, हेतुयया त्वदभिमत इति वाद्यभिप्रेतत्वात्। एवमाभासान्तरेष्वपीति ॥

सव्यभिचारः ॥ सव्यभिचारोऽनैकान्तिकः। स द्विधा—साधारणोऽसाधारणश्चेति पूर्वः पक्षत्रयव्यापी। उत्तरः पक्षमात्रनिष्ठः। यथा हि पक्षसपक्षमात्रविषयस्यान्वयस्य विपक्षवृत्तिर्व्यभिचारः, तथा सपक्षैकदेशमात्रविषयस्य व्यतिरेकस्य स्वस्थानातिक्रमेण सपक्षव्याप्तिर्व्यभिचार इत्येके। असाधारणस्त्वनध्यवसितसंज्ञं हेत्वाभासान्तरमिति **भूषणः**। द्वावप्यष्टविधौ ; तथा हि—

त्रयाणामपि पक्षाणां व्यापकोऽव्यापकस्तथा। एकद्विव्यापकाः षट् चेत्येवं साधारणोऽष्टधा ॥
निःसपक्षो निर्विपक्षो द्वयं निर्विषयं तथा। पक्षव्याप्तितदव्याप्त्योरष्टासाधारणाः स्मृताः ॥
केचित् सपक्षे सत्येव तथाऽऽभासत्वमब्रुवन्। तदसत् सकलं नित्यं सत्त्वादित्यादिसंभवात् ॥

तत्र **पक्षत्रयव्यापकसाधारणो** यथा—क्षित्यादिकं सकर्तृकम्, प्रमेयत्वात्, घटवदिति। तत्रैव परिमितपरिमाणत्वादिति पक्षत्रयैकदेशवृत्तिः, पक्षसपक्षभूतगुणकर्मणोरवृत्तेः, विपक्षेषु च विभुष्ववृत्तेः। **पक्षव्यापकः सपक्षविपक्षैकदेशवृत्ति**र्यथा—पर्वताश्चूर्णीभविष्यन्ति, प्रत्यक्षग्राह्यत्वात्, घटवदिति। अयं हेतुः सपक्षतयाऽभिमते द्व्यणुकादौ, विपक्षे चेश्वरादौ न वर्तते। **सपक्षव्यापक इतरैकदेशवृत्ति**र्यथा—कालजीवावनित्यौ, अचेतनत्वात्, पृथिव्यादिवदिति। नित्येश्वराभ्युपगमपक्षे तस्य विपक्षत्वादत्राचेतनत्वस्य विपक्षैकदेशावृत्तिता। **विपक्षव्यापकः पक्षसपक्षैकदेशवृत्ति**र्यथा—कालात्मानावनित्यौ, कालघटव्यतिरिक्तत्वात्, घटवत्, इति। अत्र सपक्षे घटे पक्षे च काले कालघटव्यतिरिक्तत्वं नास्ति। एते त्रय एकैकव्यापकाः। अथ द्विव्यापकास्त्रय उदाह्रियन्ते। तत्र **पक्षेतरव्यापको** यथा—अनित्यौ पृथिव्यात्मानौ, पृथिवीव्यतिरिक्तत्वात्, प्रदीपवदिति। **सपक्षेतरव्यापको** यथा—अनित्यः शब्दः, घटव्यतिरिक्तत्वात्, पटवत्, इति। **विपक्षैकदेशवृत्तिरितरव्यापको** यथा—त्रसरेणुः सावयवः, द्रव्यत्वात्, घटवत्, इति। अत्र पक्षैकदेशवर्तिनां चतुर्णां भागासिद्धलक्षणयोगेऽपि व्यभिचारादनैकान्त्यमप्यस्तीति दूषणसंभेदसंभवज्ञापनायोदाहृतिः। एवमन्यत्रापि ग्राह्यम्। अत्र चासिद्धिवदन्यतरोभयभेदेनाऽपि विभागोऽनुसंधेयः। न ह्यसिद्धावेवायं विभाग इति नरपतिशासनम्, विपरिवर्तवैयात्यस्य दुर्वारत्वात्, उदाहरणदर्शनाविशेषाच्च। तथा हि—नित्या वर्णाः, श्रावणत्वात्, शब्दत्ववत्, इति **कौमारिलेनोक्ते काणादः** स्वानभ्युपगतैरपि श्रावणतया तदभ्युपगतैर्ध्वनिधर्मैरनैकान्त्यमुद्भावयन् कथं प्रतिक्षेप्यः ? कथं वा शब्दतया स्वाभ्युपगतैरेव समुद्रघोषादिभिरनित्यैरसिद्धिवत् परमतमूलमनैकान्त्यम् ? स्वमतमूलं तु तद्वदेव दुरुत्तरमिति। एवमन्यत्राप्यन्यतरोभयभेदेन संभव ऊह्यः। तत्तत्पदार्थभेदाभ्युपगमानभ्युपगमवशेन तत्संभवादिति ॥

यस्त्वनध्यवसितापरपर्यायोऽसाधारणोऽष्टधा विभक्तः, तत्र **सपक्षशून्यः** प्राङ्निरूपितः केवलव्यतिरेक्येव पराभिमतः। **विपक्षरहितो** यथा—सर्वं कार्यजातं पक्षीकृत्याह विगीतं नित्यं कादाचित्कत्वादिति। उक्तिविरोधोऽत्र संभिद्यते। **सपक्षविपक्षरहितो** यथा—सर्वमनित्यं सत्त्वादिति। इह तु व्यतिरेकिहेतौ विरोधोऽपि प्रतिनियतश्च। यन्नित्यं तदसदिति व्यतिरेको हि धियमपि नाधिरोहेत्, किमुत वाचम्। नित्यत्वं हि कालानवच्छिन्नसत्तायोगः। एवं नित्यत्वादिसाध्यान्तरेष्वप्यूह्यम्। **सपक्षविपक्षवान्** यथा—पृथिव्यनित्या गन्धवत्त्वादिति। एते पक्षव्यापिनः। तदेकदेशवर्तिनोऽपि चत्वारः

स्वयमूह्याः। एषामष्टानां साध्यसंबन्धाग्रहणं समानमिति तुल्ययोगक्षेमतैव। ये च केवलव्यतिरेकिप्रामाण्यमिच्छन्ति, तैरपि सपक्षशून्यस्य पक्षमात्रवर्तिनः कचिदाभासत्वमेष्टव्यम्। तथा हि—सर्वं कार्यं नित्यत्वसुखाद्याश्रयकारणकम्, शशविषाणपूर्वकं वा, कादाचित्कत्वात्, इत्युक्ते सपक्षरहितस्यापि कादाचित्कत्वस्य न सम्यग्घेतुत्वमिष्टम्। विपक्षे बाधकाभावादिना तदाभासत्वमिति चेत्, तुल्यं सर्ववित्कर्तृपूर्वकत्वसाधनेऽपि, तमन्तरेणापि तैस्तैरेव हेतुभिरदृष्टसहकृतैस्तत्तत्कार्योदयसंभवात्। अदृष्टस्याचेतनत्वाच्चेतनानधिष्ठितस्य न कार्यारम्भप्रवृत्तिसंभव इति चेत्, किमिदमधिष्ठानं नाम? किं वास्यादिवत् प्रेरणापरपर्यायं क्रियावत्त्वापादनमात्रम्? उतावस्थान्तरापादनमात्रम्? उत प्रयत्नवतः संनिधानमात्रमेव? अन्यद्वा किंचिदिति? नाद्यः, गुणतयाऽभ्युपगतस्यादृष्टस्य क्रियावत्त्वासंभवात्। न द्वितीयः, अद्रव्यत्वादेव। न च तृतीयः, प्रयत्नजन्यफलानाधारे प्रयत्नवदधिष्ठितत्ववाचोयुक्तेरनर्थकत्वात्। प्रयत्नसहकारित्त्वेनावस्थानमात्रमित्यप्ययुक्तम्, क्रियाहेतुगुणेष्वन्यतरमात्रेणापि क्रियोपपत्तौ गुणान्तरकल्पनानैरर्थक्यात्। अदृष्टस्य च क्रियाहेतुत्वम् *अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि इति वदद्भिः स्वीकृतम्। अचेतनं चेतनाधिष्ठितमिति व्याप्तिश्च चैतन्ये प्रयत्ने वा व्यभि[चाररूपा] चरिता, अन्यथाऽनवस्थादिप्रसङ्गात्। तद्व्यतिरिक्तत्वे सतीति विशेषणमपि निर्मूलम्, अनीश्वरचैतन्यप्रयत्नयोरीश्वराधिष्ठितत्वाभ्युपगमात्, ईश्वरगुणयोस्तु तयोरसिद्धौ व्यवच्छेद्यासिद्धेः, सिद्धौ तु चेतनाधिष्ठानादिमुखेन तदनुमाननैष्फल्यात्। अत एव न चतुर्थः, तथाविधस्य कस्यचित् कुतश्चित् प्रमाणादसिद्धेः, इत्यलं प्रसक्तानुप्रसक्त्या॥

विरुद्धः॥ साध्यविपरीतव्याप्तो विरुद्धः; यथा—पर्वतोऽनग्निः धूमवत्त्वादिति।

सपक्षे सत्यसति च पृथक्पक्षविपक्षयोः। व्याप्त्यव्याप्त्योर्द्वयोश्चेति विरुद्धोऽप्यष्टधा मतः॥
इष्टप्रतीपव्याप्त्या हि निर्विवादा विरुद्धता। विशिष्टसाध्यवैलोम्यात् स्याद्विशेषविरुद्धता॥
धर्मधर्म्युभयेषां च तद्विशेषत्रयस्य च। विपरीतानुगमनाद्विरुद्धः षड्विधो मतः॥

तत्र सति सपक्षे चतुर्णामुदाहृतिः। **पक्षव्यापको विपक्षैकदेशवृत्तिर्यथा**—अनित्यो जीवः, चेतनत्वादिति। सर्वेषामेव जीवानां सुषुप्त्याद्यवस्थास्वपि संकुचितचैतन्याश्रयत्वं त्रय्यन्तविद्भिरिष्यते। आगन्तुकचैतन्यवादेऽपि चैतन्यात्यन्तायोगव्यवच्छेदलक्षणं चेतनत्वं सर्वेषु जीवेषु विद्यत एवेति पक्षव्यापकता। **विपक्षव्यापकः पक्षैकदेशवृत्तिर्यथा**—नित्यौ पृथिव्यात्मानौ, कृतकत्वादिति। **उभयव्यापको** यथा—नित्यः शब्दः, कृतकत्वादिति। उभयाव्याप[कस्तु]को यथा—शब्दस्पर्शावनित्यौ, श्रावणत्वादिति। शब्दत्वसामान्यं नित्यमिच्छतः तत्रापि हेतुवृत्तेर्विपक्षैकदेशवृत्तिता। असति सपक्षे त्वन्ये चत्वारः। तत्र **पक्षव्यापकः विपक्षैकदेशवृत्तिर्यथा**—चेतनाः सर्वे निरतिशयानन्दधर्मकाः, स्वयंप्रकाशत्वादिति। स्वयंप्रकाशत्वं हि वेदान्तिनां सर्वात्मव्यापकम्, अचेतनत्वादनानन्दिनि धर्मभूतज्ञानाख्ये विपक्षे च वर्तत इति। **विपक्षव्यापकः पक्षैकदेशवृत्तिर्यथा**—सर्वेऽप्यात्मानः सर्वज्ञाः, अकर्मवश्यत्वात् इति। कर्मवश्यत्वाभावो ह्यचेतनेषु सर्वेषु विपक्षेषु व्याप्तः, पक्षे चेश्वरांश इति। **उभयव्यापको** यथा—कादाचित्कं सर्वमनित्यम्, वस्तुत्वादिति। अत्र वस्तुतः कादाचित्कानामनित्यत्वेऽप्यस्मिन् प्रयोगे वस्तुत्वहेतोर्विपरीतव्याप्त्या विरुद्धता। **उभयैकदेशवृत्तिर्यथा**—तत्रैव साध्ये द्रव्यत्वादिति। ननु पक्षस्पर्शरहितोऽपि नवमो विरुद्धः संभवति—नित्य आत्मा कृतकत्वादिति; अत्र हि सर्वस्मिन्नात्मजाते कृतकत्वं नास्त्येव, विपक्षे च सर्वत्र वर्तते, सपक्षे च कालादौ न वर्तत इति नानैकान्तः। सत्यम्; अत एव हि साध्यविपरीतव्याप्तो विरुद्ध इति लक्षणं प्रणीतमस्माभिः, न तु पक्षविपक्षयोरेव वर्तमान इति। ततश्च सत्यसति च सपक्षे

सर्वपक्षावृत्तिविपक्षव्यापकाव्यापकरूपविरुद्धचतुष्टयसंभवाद्द्वादशविधो विरुद्ध इति । विशेषविरुद्धत्वमपि व्याप्तिदशानुविधायिस्वरूपवैकल्यवति प्रागुदाहृते प्रतिसंधानीयमिति ॥

बाधितः ॥ कालात्ययापदिष्टस्तु बलवन्मानबाधितः । कालातीतोऽतीतकालो बाधितश्च स कथ्यते ॥
एकैकद्वित्रिबाधेन सप्तधा स विभागवान् । एवं बाधितयोर्भेदः प्रत्यक्षागमयोरपि ॥
यद्यप्येकैकतो बाधेऽप्याभासत्वं प्रतिष्ठितम् । तथाऽप्यल्पज्ञशिक्षार्थं यावत्संभववर्णनम् ॥
यावद्दोषोक्तिनियमकथायां चोपयुज्यते । यथास्मृत्येककथनेऽप्यनेकं शिष्यमेव हि ॥

तत्र **प्रत्यक्षबाधितो** हेत्वाभासो यथा—अग्निरनुष्णः, पदार्थत्वात्, घटवदिति । न ह्यत्र ज्वालैक्यप्रत्यक्षवत् पावकौष्ण्यप्रत्यक्षं दुर्बलम्, अनन्यथासिद्धेः । न ह्यौष्ण्यं नाम जगति नास्ति, तथा सति वह्नौ तदारोपस्याप्यसंभवात् । क्वचित् सिद्धमेवान्यत्रारोप्यम् । तदग्रहे च तदभावलक्षणसाध्यस्याप्यग्रहः । न चाप्रमितसाध्यसामान्यमनुमानं प्रवर्तयितुमलम् । न चोष्णत्वाभावातिरिक्तमनुष्णत्वं नाम किंचित्, भावान्तराभावपक्षेऽपि तस्य तदभावात्मना निरूपितस्य व्याप्त्यनुप्रवेशात् । नच तद्द्रव्यम्, तल्लक्षणादृष्टेः । न चावह्निधर्मः ; तद्धर्मिणोऽन्यस्य कस्यचित् कुतश्चित् प्रमाणादसिद्धेः, सिद्धौ च तत्रापि पदार्थत्वसद्भावे हेतोरनैकान्त्यात्, तदसद्भावे तस्यैवासिद्धेः । अत एव वह्नौ तत्सादृश्यतत्संसर्गग्रहाद्यसंभवात् तद्गुणारोपो दुर्वचः । अग्न्यातपोपाधिक एव ह्यन्यत्रौष्ण्योपलम्भः, न तथा तयोस्तदुपलम्भोपाधिं कंचित् पश्यामः । न च तयोः परस्परोपाधिकत्वम्, व्याघातात्, नियामकाभावाच्च । अतोऽग्न्यातपादिरूपतेजोधर्म एवौष्ण्यमित्यनन्यशरणे प्रत्यक्षेऽनुमानसहस्रेणापि न तत्कम्पनसंभव इति ॥

नन्वेवं ज्वालैक्यप्रत्यक्षेऽप्यनुमानबाधो न स्यात् । न, तत्रानुमानस्य स्वमूलभूतप्रत्यक्षविशेषप्रतिक्षेपकत्वाभावात् । न हि तत्र भेदसामान्यादिग्रहणं ज्वालैक्यग्रहणोपजीवि । भेदप्रतियोगिन ऐक्यस्याप्यन्यत्र सामान्येन ग्रहणं सिद्धम् । नच कृत्स्नप्रत्यक्षादिबाधकानुमानवत् प्रयोजकवेषेणापि मूलघातः । न च ज्वालान्तरासंभवे दीपसामाग्र्यनुवृत्त्यादेरन्यथासिद्धिः सुवचा । न च ज्वालैक्यप्रत्यक्षं तदौष्ण्यप्रत्यक्षवदनन्यथासिद्धम्, निर्वापितारोपितदीपेऽप्यविदितनिर्वापणस्य तत्त्वप्रत्यभिज्ञानात् । तद्वदेव सादृश्यादिबलादैक्यधीसंभवे शङ्कितान्यथासिद्धेः प्रत्यक्षस्य भेदानुमानप्रतिक्षेपाशक्तेः । सुसूक्ष्मावलोकने च ज्वालाधूमादिसन्ततिषु निस्तरङ्गप्रवाहतैलधारादिष्विव सञ्चरणभेदाध्यवसायात् । एवमेव देहात्मैक्यप्रतिक्षेपिभेदानुमानस्यैव विजयित्वम्, तप्तायःपिण्डे पावकत्वादिबुद्धिवत् ज्ञातृसंसर्गविशेषात् सङ्घातेऽपि तद्बुद्ध्युपपत्तेः । न च पावकवत् ज्ञाता पृथङ्नोपलभ्यत इति वाच्यम्, ममेदं शरीरमिति व्यतिरेकप्रत्ययदशायां गृहतत्स्थादिवत् पृथगेवोपलब्धेः । न च शिलापुत्रकस्य शरीरम्, घटस्य स्वरूपमित्यादिष्विव भेदव्यपदेश औपचारिक इति वाच्यम्, तद्वदिह द्रव्यान्तराभावानध्यवसायात् । न च समानाधिकरणप्रत्ययेन व्यतिरेकप्रत्ययबाधः, विपर्यासस्यापि सुवचत्वात् । यथा च व्यतिरेकव्यपदेशस्यौपचारिकत्वशङ्का, तथा समानाधिकरणधियोऽपि तप्तायःपिण्डादिष्विव संसर्गोपाधिकत्वशङ्काया अपि दुर्वारत्वात् । न च पावकौष्ण्येऽपि तथा, व्यतिरेकप्रत्ययपुरस्काराभावात् । भावे वा कस्तत्राप्याश्वासः ? अपि च व्यतिरेकबुद्धेः प्रथमतः स्तन्येच्छाद्यनुत्पत्तिप्रसङ्गेनानुग्रहात् देहात्मबुद्धेश्च तेन निग्रहात् प्राबल्यदौर्बल्ये प्रतिभातः । न हि भवान्तरीयानुभवजनितसंस्कारमूल[सजा]तज्जातीयत्वप्रतिसन्धानजनितसुखादिसाधनत्वानुमानमन्तरेण प्रथमतः स्तन्येच्छादेरुत्पत्तिसंभवः । यथा चेदानीमभ्यासभेदाद्रुचिभेदः प्रज्ञाभेदश्च हेत्वन्तरसाम्येऽपि दृश्यते, तथा

प्रसूतमात्रस्यापि प्राग्भवाभ्यासभेदहेतुकप्रज्ञारुचिवैचित्र्यं न सहसा प्रतिक्षेप्तुं शक्यम् । अपि च असमाहितधियामस्मदादीनामपि निरुद्धबाह्यकरणवृत्तीनां मात्रया मनःप्रणिधानेऽपि ग्रहालोकयोरिव देहदेहिनोर्भेदेऽपि स्फुरत्येव । विनिष्पन्नसमाधीनां तु विशदतम इति विशेषः । अत एव हि तस्मिन्नंशे शास्त्रव्यापारः ; यथाऽऽहुः—

* अवयवितयेदं कुर्वाणैर्बहिष्करणैर्वपुर्निरवयवकोऽहंकारार्हः पुमान् करणातिगः ।
स्फुरति हि जनाः प्रत्यासत्तेरिमौ न विविञ्चते तदधिकुरुतां शास्त्रं रङ्गेश ते परलोकिनि ॥ इति ।

* आनुमानिकीमप्यात्मसिद्धिमश्रद्दधानाः श्रौतमिव तां श्रोत्रियाः संगिरन्ते इत्यात्मसिद्धिग्रन्थोऽपि तावन्मात्राभिप्रायः । पाणिपादादिषु प्रत्येकसमुदायाहंत्वविकल्पानुपपत्त्यादयश्चास्मदाचार्यैर्न्यायकुलिशे प्रपञ्चिताः प्रस्पष्टमनुसन्धेयाः । अतो ज्वालैक्यदेहात्मैक्यप्रत्यक्षयोरनुमानेन बाधः सुशकः । दहनौष्ण्यप्रत्यक्षस्य न तथेति तत्रानुमानमेव प्रत्यक्षबाधितमिति पदार्थत्वादेर्हेत्वाभासता । **अनुमानबाधितो** यथा—प्रथमाद्यास्तिथयः संभवच्चन्द्रसूर्योपरागाः, तिथित्वात्, पर्ववदिति । अयं हि उपरागस्य पर्वान्तप्रतिनियतभावित्वग्राहिणा शास्त्रानुमतदृढनिरूढान्वयव्यतिरेकेण गणितानुमानेन बाधितः । **आगमबाधितो** यथा—परविग्रहादिरुत्पत्तिविलयवान्, सावयवत्वात्, संप्रतिपन्नवदिति । अयं हि * नित्यालि [ङ्गा] - ङ्ग्यादिस्वभावसंसिद्धिः,

* नित्यसिद्धे तदाकारे तत्परत्वे च **पौष्कर** । यस्यास्ति सत्ता हृदये तस्यासौ सन्निधिं व्रजेत् ॥

* नित्यं नित्याकृतिधरम् इत्यादिभिरागमैरबाधितैर्बाध्यते । न चात्र शास्त्रमन्तरेण पक्षसिद्धिः । न चासिद्धाश्रयो हेतुः साधकः । न च धर्मिग्राहकेणैव बाध इति नियमः, तद्वा तादृग्वेति विशेषायोगे तज्जातीयेनापि बाधोपपत्तेः । एवं ब्राह्मणेन सुरा पेया, द्रवद्रव्यत्वात्, क्षीरवदित्यत्र पातुं शक्यत्वादिविधौ सिद्धसाधन [त्व] ात् पीतायाः पारलौकिकप्रत्यवायसाधनत्वाभाव एव हि सिषाधयिषितः ; तत्र प्रतिषेध्यस्वरूपसिद्धेरागमोपज्ञत्वात् तदुपजीविनोऽनुमानस्य तेन बाधः । एवमग्नीषोमीयाधर्मत्वादिसाधनेष्वपि भाव्यम् । द्वाभ्यांद्वाभ्यां त्रिभिश्च बाधितस्तु भिन्नप्रमाणविरुद्धसाध्यकानेकपक्षीकारे तत्तत्प्रमाणविरुद्धानेकसाध्यसहसाधने च तत्तदंशप्रतिनियमेन द्रष्टव्यः, यथा—विप्रतिपन्नं सर्वं दण्डसाध्योत्पत्तिविनाशवत्, वस्तुत्वात्, संप्रतिपन्नघटवदिति । संप्लववादे त्वत्यन्तसमानविषयानेकप्रमाणबाध्यत्वमप्यन्वमंसतेति ॥

प्रकरणसमः ॥ अतुल्यं तुल्यमपि वा यं तुल्यमभिमन्यते । तेन यः प्रतिरुध्येत तमाहुः प्रक्रियासमम् ॥
मानमाभाससंरुद्धं मानरुद्धस्तथेतरः । आभासरुद्ध आभासः प्रतिरुद्धस्त्रिधा स्थितः ॥
आभासमानयोरत्राप्यवान्तरभिदावशात् । प्रतिरुद्धविधाभेदा निरूप्या बाधितक्रमात् ॥
त्रिविधस्यापि रोधस्य साम्यबुद्ध्याऽस्ति संभवः । न तु मानेन मानस्य रोधो भवति कर्हिचित् ॥
अन्यूनानतिरिक्तादौ विरोधो न हि विद्यते । न चात्यन्तविभिन्नार्थे विरोधेऽन्यतरत् प्रमा ॥
श्रुतिद्वयविरोधेऽपि तत्रैकस्या न मानता । तात्पर्यार्थे हि मानत्वं न च द्वे अपि तत्परे ॥
रोधश्च हेतुनैवेति हेतोरेवेति वा पुनः । नियमो नाभिमन्तव्यः सर्वैः सर्वत्र संभवात् ॥

तथा हि—तत्राभासेन प्रमाणप्रतिरोधो यथा—* ब्राह्मणो न सुरां पिबेदिति वैदिकोक्तौ बौद्धकापालिकाद्यागमैः पातव्यत्वोक्त्या प्रतिरुद्धा श्रुतिरिति । अत्र ह्यविदितगुणदोषबलाबलप्रस्थानस्य प्रमाणभूतमपि प्रतिरुद्धं भवति । उक्तविपर्यासात् प्रमाणेनाप्रमाणस्य प्रतिरोधो द्रष्टव्यः । तत्राधिकबलस्य वस्तुतो बाधकत्वेऽपि बलानभिज्ञः प्रतिरोधकं

मन्यते । आभासेनाभासस्य प्रतिरोधो यथा—केशोल्लुञ्छनं कर्तव्यम्, अर्हदाद्युपदेशादिति दिगम्बरेणोक्ते, न तत् कर्तव्यम्, अन्यथा तथागतोपदेशात् इति । अत्रानाप्तवाक्यत्वाविशेषाद्वस्तुतो द्वयोरनादरणीयत्वेऽपि योगसिद्धसार्वज्ञ्य-वाक्यत्वविशेषाभिमानात् भवति प्रतिरोधः । वास्तवविमर्शे तुल्यदोषतयोभयोरप्यसाधकत्वमेवेति । प्रकरणसममेव विरुद्धा-व्यभिचारिशब्देन केचिदुपचरन्ति ; यथा—

* यत्राप्रत्यक्षता वायोररूपत्वेन साध्यते । स्पर्शात् प्रत्यक्षता चासौ विरुद्धाव्यभिचारिता ॥ इति ।

द्विवचनान्तविरुद्धाव्यभिचार्युदाहरणमिदम् । तत्र हेतोर्हेत्वाभासेन प्रतिरोधो यथा—देवदत्तात्मा यज्ञदत्तात्मनो भिन्नः, तदनुभवजनितस्मृतिरहितत्वात्, घटवदित्यन्वयेन वा, यो यज्ञदत्तात्मनो न भिन्नः, स तदनुभवजनितस्मृत्याधारः, यथा यज्ञदत्त एवेति व्यतिरेकेण वोदाहृते, स तस्मादभिन्नः, आत्मत्वात्, तद्वदेवेति वा, यस्ततो भिद्यते, न स आत्मा, यथा घट इति वेति । अत्रानुमितपरसुखदुःखाद्यनाधारतया स्वस्य प्रत्यक्षसिद्धत्वात्, सुखदुःखोपभोगसङ्करप्रसङ्गात्, उपाधितो व्यवस्थानस्य इन्द्रियादिभेदेष्वपि प्रसङ्गात्, सौभर्यादिषु शरीरादिभेदस्य सुखादिव्यवस्थापकत्वादर्शनाच्च, बाधितमैक्यानुमानमित्याभासता । अत्र विपर्यासेन हेत्वाभासस्य हेतुना प्रतिरोधः । हेत्वाभासस्य हेत्वाभासेन प्रतिरोधो यथा—यत्सत् तत्क्षणिकम्, यथा घटः, सन्तश्चामी भावा इति सौगतेन [प्रयुक्ते] उक्ते प्रतिवक्ति—यत् क्षणान्तरवर्ति न भवति, तदसत्, यथा खरविषाणम्, न चासन्त इमे भावा इति । अत्राबाधितप्रत्यभिज्ञानादिभिः स्थैर्ये वक्तव्ये, पिशा-चानां पिशाचभाषयैवोत्तरं देयमित्यभिमन्यमानस्यैवमुत्तरसंभवः । एवं महाविद्यादिरीतिष्वपि प्रागेवोक्तम् । एकस्मिन् हेतौ केन कः प्रतिरुध्येत? कथं वा तत्र प्रकरणसमसमाख्यानिवेशः स्यादिति चेन्न, एकस्यैव हेतोः तत्साध्यव्याप्यत्वाभि-मानगृहीतस्य तद्विरुद्धसाध्यव्याप्यत्वाभिमतस्वात्मसाध्यनिर्णयपरिपन्थित्वेनावस्थानात्, प्रक्रियमाणार्थसाधनप्रवृत्तस्वात्मन-स्तद्विरुद्धसाधनप्रवृत्तस्वात्मसमानत्वाच्चेति । तथाहि—अनित्यः शब्दः, प्रमेयत्वात्, घटवदितिकेनचित्प्रयुक्ते, नित्यः शब्दः तत एव हेतोः, आत्मवदिति कश्चित् प्रयुञ्जीत । समं चासाधकत्वमुभयत्र, व्यभिचा[रित्वा] रात् इति ॥

हेत्वाभासविभागान्तरम् ॥ तदेवमेते पञ्च हेत्वाभासा **अक्षपादादिभिः** संगृहीताः । तथा च सूत्रम्—
* सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः इति । अत्रासिद्ध एव साध्यतुल्यत्वं निमित्तीकृत्य साध्य-समशब्देनोपचरितः । अत्र **न्यायतत्त्वानुसारात्** क्रमनियामकसङ्गत्यभावाच्चाक्षपादं क्रममुल्लङ्घ्यास्माभिर्हेत्वाभासा निरू-पिताः । ननु **तत्त्वरत्नाकरे** अन्यथैव हेत्वाभासाः प्रपञ्चिताः ; यथा—

* ईदृक्षपक्षाद्यज्ञानामेकैकविकलत्वतः । सर्वानुमानाभासानां संक्षेपाल्लक्ष्म सूचितम् ॥

तत्तत्पक्षादिस्वरूपतत्त्वमतदपि तथा भासमानं तदाभासः । तत्र,

पञ्च प्रतिज्ञार्थाभासाः पक्षवैकल्यदोषजाः । सिद्धप्रसिद्धिबाधि[ध्य]त्वविरुद्धत्वाफलत्वतः ॥

इत्याद्युक्त्वा, प्रसिद्धिं च विशेषणविशेष्योभयभेदेन त्रेधोदाहृत्य, बा[ध्य]धित्वमपि प्रमाणत्रित्वात् त्रिधा निर्दिश्य, विरुद्धत्वमपि स्ववचनस्वाभ्युपगमसर्वलोकप्रसिद्धिभेदेन विभिद्य, स्ववचनविरोधेऽप्युक्तिमात्रधर्मधर्म्युक्तिविरोधभेदेन त्रैधमभिधायाफलत्व-पर्यन्तमुदाहृत्य, धर्मित्वानिर्देशविशिष्टत्वानिर्देशविशेषणानिर्देशधर्म्यनिर्देशसाध्यानिर्देशरूपपक्षासाधारणनिर्देशदोषपञ्चकमुदा-हृत्य, * अवाचकसंदिग्धाश्लीलनिर्देशादयः साधनादिष्वपि साधारणनिर्देशदोषा द्रष्टव्याः । एते च लक्षणवाक्ये पक्षधर्म-पदेन व्यावर्त्यत्वात् सर्वे प्रतिज्ञाभासाः इत्यादि चोक्त्वा, अथ हेतवोऽसिद्धानध्यवसितविरुद्धविशेषणविरुद्धानैकान्तिका-

प्रयोजकबाध्यविरुद्धाव्यभिचारिप्रकरणसमसिद्धसाधनाः इति दशधा । तत्रासिद्धोऽप्रमितपक्षधर्मभावः । स स्वतो नवधा इति विभज्य स्वरूपासिद्धसंबन्धासिद्धभागासिद्धविशेषणासिद्धविशेष्यासिद्धोभयासिद्धाश्रयासिद्धाश्रयैकदेशासिद्धव्यधिकरणासिद्धोदाहरणान्युक्त्वा, तेषामेवाज्ञानसंदेहविपर्ययैः सप्तविंशतित्वम्, पुनरन्यतरासिद्ध्युभयासिद्धिभेदेन चतुःपञ्चाशत्त्वमभिधाय, एवं सिद्धसाधनपर्यन्तानामपि लक्षणोदाहरणान्यभिधाय, हेतूक्तिदूषणं च धूमादित्याद्युक्त्वा, उदाहरणदूषणानि साध्यविकलसाधनविकलोभयविकलाश्रयहीनानुपदर्शितव्याप्तिविपरीतोपदर्शितव्याप्तिसाध्याव्यावृत्तसाधनाव्यावृत्तरूपाण्युदाहृत्य, सर्वेषु चैतेषु विभागेषु मिथः संभवदन्तर्भावानामपि पृथगुदाहरणप्रयोजनानि तत्रैवाभिहितानि । सत्यम्; तथाऽपि वास्तवचिन्तायामन्तर्भावप्रक्रियैवानुसंधेया । अत एव हि तत्राप्यन्ते निगमितम्—

* सर्वानुमानाभासानां तल्लक्ष्मावयवक्षतिः । व्याप्यत्वपक्षधर्मत्वहानिर्वा लघु लक्षणम् ॥ इति ।

अतो वस्तुतो द्वावेव हेत्वाभासौ तत्रापि विवक्षितौ । तदवान्तरभेदतयैवान्ये सर्वे दर्शिताः । उक्तिदूषणानि तु न हेत्वाभासाः; तथाऽपि समीचीनहेतुप्रतिपादनार्थत्वादुक्तेस्तद्दूषणे सति न तथा हेतुः प्रतिपादितो भवेदित्येतावता हेतुदूषणत्ववचनम् । यद्वा निग्रहस्थानानां सर्वेषां प्रतिज्ञादिवाक्यदूषणात्मकत्वद्योतनायेति मन्तव्यम् । अश्लीलनिर्देशादीनां दोषत्वं तु नियमकथाविषयं योज्यम् । एतेन—* हेत्वाभासास्त उच्यन्ते त्वसिद्धाद्या नवैव ते । इति **प्रज्ञापरित्राणादिग्रन्था** निर्व्यूढाः ॥

उदाहरणाद्याभासाः ॥ अथात्र पक्षदृष्टान्ताभासानां हेत्वाभासान्तर्भावप्रकारमुदाहरामः । तत्र विशेषणाप्रसिद्ध्यादौ हेतोराश्रयासिद्धत्वम् । सामान्यतः प्रसिद्धो हि साध्यधर्मः प्रसिद्धे धर्मिणि सिषाधयिषितो भवति, निरालम्बनविवादायोगात् । तथाविधसाध्यधर्मविशिष्टश्च धर्मी पक्षः । स च तदप्रसिद्धौ न सः । पक्षश्च हेतोराश्रयः । एवं सिद्धसाधनेऽप्युक्तम् । बाधितविशेषणत्वादौ कालात्ययापदेशः । साधर्म्यदृष्टान्ते साधनवर्जिते हेतुः साधारणोऽसाधारणो विरुद्धो वा । तत्राद्यः—नित्यः शब्दः, प्रत्यक्षत्वात्, यथा द्व्यणुकमिति । तत्रैव शब्दत्वात्, यथा घट इति द्वितीयः । श्रावणत्वात्, यथा घट इति तृतीयः । साध्यवर्जिते तु तस्मिन् विरुद्धः, साधारणो वा । अत्र अनित्यः शब्दः, श्रावणत्वात्, शब्दत्ववत्, इति प्रथमः । तत्रैव वस्तुत्वादिति द्वितीयः । उभयवर्जिते निराश्रये च व्याप्यत्वासिद्धः । पूर्वे च दोषा यथासंभवं भाव्याः; यथा—अनित्यः शब्दः, कृतकत्वात्, यथा आत्मेति, यथा वा शशविषाणमिति । सत्यपि हि व्याप्तिरत्र न प्रदर्श्यते । वैधर्म्यदृष्टान्ते तु साधनाव्यावृत्ते हेतोः साधारणत्वम्, विरुद्धत्वं वा । यथा—शब्दः ध्वंसप्रतियोगी, प्रत्यक्षत्वात्, यन्नैवं तन्नैवम्, यथा आत्मेति साधारणत्वम् । तत्रैव साध्ये श्रावणत्वादिति हेतौ यदुक्तसाध्यं न भवति तच्छ्रावणमपि न भवति, यथा शब्दत्वमिति विरुद्धत्वम् । साध्याव्यावृत्ते तु व्याप्यत्वासिद्धादयः—गर्भस्थो मैत्रीतनयः श्यामः, मैत्रीतनयत्वात्, यः श्यामो न भवति स मैत्रीतनयो न भवति, यथा सत्यवतीतनयः इति व्याप्यत्वासिद्धः । एवमन्येऽपि ॥

यद्यपि सपक्षैकदेशवर्तिनि सम्यग्घेतौ हेतुरहितः सपक्ष एव विपक्षविवक्षया केनचिदुदाह्रियते, तथाऽपि तत्र व्यतिरेकव्याप्तेरनुपदर्शितत्वान्न तत्र व्याप्यत्वं सिध्यति । एवं सर्वत्र समीचीनेऽपि हेतौ साधर्म्यदृष्टान्तेषु साधनविकलसाध्यविकलोभयविकलाश्रयहीनेषु साध्याव्यावृत्तसाधनाव्यावृत्तोभयाव्यावृत्ताश्रयहीनेषु च वैधर्म्यदृष्टान्तेषु, पुरुषापराधाद्व्याप्त्यनुपदर्शने सत्यपि व्याप्तिरनुपकारिका; व्याप्तिप्रत्यायनार्थं ह्यसौ दृष्टान्तमुदाहरति, न तु व्याप्तिसद्भावार्थम्, येन

तद्दोषेऽप्यन्यतोऽस्ति व्याप्तिरिति चरितार्थता । न च परेण स्वयमेव व्याप्तिः प्रत्येतव्या, तथा सत्युदाहरणाख्यावयवस्यैव परित्यागप्रसङ्गात् । यद्यपि घटकः प्रतिवादी सम्यग्दृष्टान्तसिद्धां व्याप्तिं स्वयं प्रतिसंधत्ते, तथाऽप्यप्रतिसंधानमभिनीय वादी निगृह्येत, स्वप्रतिसन्धानं प्रकाश्य वा दृष्टान्ताभासवचनाज्जडीक्रियेतेति । साध्यमात्रविकले साधर्म्यदृष्टान्ते साधनमात्राव्यावृत्ते च वैधर्म्यदृष्टान्ते हेतोर्न कथंचिदपि सम्यक्त्वसिद्धिः, हेतोर्विपक्षवृत्तित्वेन साधारणत्वविरुद्धत्वयोरन्यतरावश्यंभावात् । तत्रोभयाव्यावृत्तो यथा—क्षित्यादिकं सकर्तृकम्, कार्यत्वात्; यत् सकर्तृकं न भवति तत् कार्यमपि न भवति, यथा घटः, इति । साधर्म्यदृष्टान्तवच्छशविषाणाद्युदाहरणे अत्राप्याश्रयहीनत्वम् । व्यतिरेकित्वे [त्वा]आश्रयहानिर्न दोष इत्येके; यथाऽऽहुः—

*यस्मिन्न नित्यता नास्ति कार्यताऽपि न विद्यते । अस्मिन् यथा खपुष्पादाविति शक्यं हि भाषितुम् ॥

इति । अभ्युपगतोऽयमर्थो मुखभेदेनास्मदीयैरपि कैश्चित्; यथोक्तं **प्रज्ञापरित्राणे**—

*भवेदाश्रयहीनत्वं भावसाधन एव तत् । असत्तासाधने तादृगसदर्थोपवर्णनम् ॥
न दोषायान्यथा सत्ता साधनस्याप्रसङ्गतः ॥ इति ।

भाष्ये च गगनकुसुमाद्युदाहरणमेतत्पक्षानु[सारेण]गुणम् । ये पुनरसिद्धपक्षादयोऽपि केचिद्भाष्यादिषु प्रयोगाः, ते तु तत्तत्प्रतिवादिमतानुविधायिप्रसङ्गविशेषपराः परिणमयितव्याः । न चैवं शुष्कवैतण्डिकोत्थानप्रसङ्गः । स्वसिद्धान्तगृहीतमनाकुलयद्भिः स्वव्याघातरहितैः परस्य स्वव्याघातादिप्रदर्शने प्रवृत्तिरिति ॥

एवमष्टौ निश्चिता **उदाहरणाभासाः** प्रदर्शिताः । अथान्ये **संदेहद्वारेणाष्टौ** प्रदर्श्यन्ते—विगीतः पुरुषः पुनर्भवानर्हः, सुसमाहितावताररहस्यत्वात्; यदुक्तसाधनम्, तदुक्तसाध्यमित्युक्त्वाऽऽह—यथा सद्विद्यासमाधिनिष्पत्तिमान् पुरुषः इति । अत्र विद्यान्तरसमाधिनिष्पत्त्या मोक्षनिश्चये तदनङ्गभूतावताररहस्यस्य तत्त्व[चिन्तन] ज्ञानसद्भावे साधकबाधकानवतारात् संदेह इति **सन्दिग्धसाधनविकलता** । **सन्दिग्धसाध्यविकलो** यथा—तत्रैव साध्ये विदितवेदान्तत्वादिति हेतौ यथा बृहस्पतिरिति । अत्र साधननिश्चयेऽपि वसिष्ठावान्तरतपःप्रभृतीनामिव पुनर्भवसंभवात् साध्यसंदेहः । **सन्दिग्धोभयो** यथा; तत्रैव—यथोन्मत्तवेषः पुरुष इति । अत्र स किमुन्मत्तः, उत ब्रह्मविदेव सन्नुन्मत्तभावक इति संदेहे साध्यसाधने अपि संदिह्येते । तत्रैव—यथा भविष्यन्मैत्रीतनय इति **सन्दिग्धाश्रयहीनः** । न ह्यवन्ध्या युवत्यपि मैत्री पुनःप्रसूतिमतीत्यर्वाग्दृशां सुग्रहम् । **सन्दिग्धसाधनाव्यावृत्तो** यथा—यः पुनर्भवार्हः सोऽविदितवेदान्तः, यथाऽसौ देशान्तरगतः पुरुष इति । अत्र कामक्रोधादिदृढिमलिङ्गात् सहसैव मोक्षानर्हत्वनिश्चयेऽप्यौपनिषदसंव्यवहारात् प्राक् विदितवेदान्तत्वं संदिह्यते । **सन्दिग्धसाध्याव्यावृत्तो** यथा—विगीतः पुरुषो ब्रह्मविद्याधिरोहानर्हः, अत्रैवर्णिकत्वात्; यस्तदर्हः, स त्रैवर्णिकः,यथाऽसौ काणादः, इत्यत्र निदर्शितस्यारूढपतितत्वादिशङ्कायां भवति तदनर्हत्वसंदेहः । **सन्दिग्धोभयव्यावृत्तो** यथा; तत्रैव—यथाऽसौ वैदेशिको मीमांसक इति । नह्यत्र तदर्हतां त्रैवर्णिकत्वं च वेदपठनादिमात्रेण विनिश्चिनुमः, दशपुरुषविख्यातत्वादिविरहे दुष्टशूद्रादिष्वपि संभवद्भिर्लिङ्गैर्वर्णविशेषादिनिर्धारणायोगात् । व्यतिरेकेऽपि **सन्दिग्धाश्रयहीनो**दाहरणं प्राचीनमेव । अपि चात्र हेत्वसिद्ध्यादाविव कथकयोरन्यतरोभयभेदेन संदिग्धनिश्चितसाधन विकलत्वादिभेदात् द्वात्रिंशद्विदा भवन्ति । उदाहरणे लोकप्रसिद्धेऽप्युभाभ्यामपि संदेग्धव्यं निश्चेतव्यमिति वा न राजशासनम्, सामग्रीशक्तेरनियमादिति ॥

दृष्टान्तवचनदोषाः ।। व्याप्त्यनभिधानविपरीतव्याप्त्यभिधानादयो दृष्टान्तवचनदोषाः । यथा घट इति दृष्टान्तधर्मिमात्रोदाहरणं व्याप्त्यनभिधानम् । कृतकत्वादिति हेतौ यदनित्यं तत् कृतकम्, यथा घटः, इति विपरीतव्याप्त्यभिधानम् । तदनित्यं यथा घटः, इति व्याप्त्येकदेशाभिधानम् । घटवत्, घट इवेत्यादीनामभिन्नार्थत्वाद्व्याप्त्युपन्यासानन्तरमेतेष्वन्यतमाभिधाने न दोषः ; न हि यथाशब्देनैव व्याप्तिरुपदर्शनीया, नान्येनेति नियामकमस्ति । शब्दशक्तिश्च नातिदवीयसीति यथाविवक्षं न विरोधः । ननु व्याप्त्यनभिधाने तदेकदेशाभिधाने चावयवांशन्यूनत्वापातात् विपरीतव्याप्त्यभिधाने चावयवैकदेशविपर्यासान्न्यूनत्वाप्राप्तकालत्वे उद्भाव्ये । किमेषां हेत्वाभासविश्रान्तदृष्टान्तदोषत्ववचनेन ? सत्यम् ; व्याप्त्यनुपदर्शनमुखेन हेतुदोषेऽप्येते विश्राम्यन्तीति ख्यापनायैतदिति मन्तव्यम् । हेतुदोषपर्यवसायिनामप्येषां वैशद्याय स्वयं कथकाशक्तिख्यापनसामर्थ्याच्च विशेषत उद्भावनं कार्यम् । सामान्यत उद्भाविते वा कथमिति पृष्टेन विशेषो वक्तव्यः । हेत्वाभासोऽयमिति सामान्यत उद्भावितेऽपि हि न दोषः । तत्र यदि विशेषानुयोगे प्रतिवक्तुं न शक्नुयात्, हेत्वाभासतास्थापकाव्याप्त्यपक्षधर्मत्वयोरन्यतरनिर्वाहे वा न प्रगल्भेत, निरनुयोज्यानुयोगेन निगृह्येत । एवं पक्षदृष्टान्ताभासप्रयोगेऽपि प्रयोगाभासोऽयमिति वा पक्षाभासोऽयमिति वा दृष्टान्ताभासोऽयमिति वोद्भाविते सभ्यप्रतिवादिबुभुत्सानुसारेण तत्तद्विशेषाः प्रदर्शनीयाः । स्पष्टेषु तावतैव चेत् चरितार्थबुद्धयस्ते स्युः, किं विशिष्याभिधानेन ? अत्रापि यदि पक्षाद्याभासतामनुयुक्तो न निर्वहति, तदा पूर्वनिग्रहः । अभावरूपदोषानुयोगे च भरः प्रतिवादिनः । भावरूपदोषानुयोगे तु तद्वक्तुरेवेति **वृद्धाः** । परस्परसंमत्या लौकिकव्यवहारेष्विवात्रापि समर्थकथकयोर्न व्यवस्थितिरिति केचित् । एवं हेत्वाभासप्रसङ्गात् तदनुप्रविष्टपक्षाभासादीनां दिङ्मात्रं दर्शितम् । तदङ्गभूततर्काभासा अपि हेत्वाभासविशेषा एव, तर्कस्यानुमानराश्यपृथग्भावात् । न्यायस्तर्कश्चोभयमनुमानमिति **मीमांसकाः** । व्याप्याङ्गीकारे व्यापकानिष्टप्रसञ्जनं हि तर्कः, व्याप्याद्व्यापकप्रमितिरेवानुमानमिति ॥

तर्कः ।। ननु न तर्कोऽनुमानम्, **भाष्यकारै**रेव पृथक् [व्यवहृत]परिगणितत्वात् । यद्यपि **जन्माद्यधिकरणे** *तर्कश्च साध्यधर्माव्यभिचारिसाधनधर्मान्वितवस्तुविषयत्वान्न निर्विशेषवस्तुनि प्रमाणम् इत्यनुमानेऽपि तर्कशब्दः प्रयुक्तः ; तथाऽपि * न विलक्षणत्वात् इत्यधिकरणे * यतः सर्वेषां प्रमाणानां क्वचिद्विषये तर्कानुगृहीतानामे[व स्वा] वार्थनिश्चयहेतुत्वम् ; तर्को हि नामार्थस्वभावविषयेण वा सामग्रीविषयेण वा निरूपणेनार्थविशेषे प्रमाणं व्यवस्थापयत् तदितिकर्तव्यतारूपमूहापरपर्यायं ज्ञानम् । तदपेक्षा च सर्वेषां प्रमाणानां समाना । शास्त्रस्य तु विशेषेणाकाङ्क्षासंनिधियोग्यताधीनप्रमाणभावस्य सर्वत्रैव तर्कानुग्रहापेक्षा । उक्तं च मनुना—*यस्तर्केण, इत्याद्यभिहितम् । तथा **प्रथमसूत्रे**ऽपि * अनधिगतपदवाक्यस्वरूपतदर्थयाथात्म्यप्रत्यक्षादिसकलप्रमाणवृत्ततदितिकर्तव्यतारूपसमीचीनन्यायमार्गाणाम् इत्याद्युक्तम् । एवं श्रीमति **गीताभाष्ये**ऽपि—* मत्तः स्मृतिर्ज्ञानमपोहनं च इत्यस्य व्याख्याने *अपोहनं ज्ञाननिवृत्तिः ; अपोहनमूहनं वा, ऊहनमूहः, ऊहो नाम इदं प्रमाणमित्थं प्रवर्तितुमर्हतीति प्रमाणप्रवृत्त्यर्हताविषयं सामग्र्यादिनिरूपणजन्यं प्रमाणानुग्राहकं ज्ञानम् । स चोहो मत्त एव इत्युक्तम् । किंच *तर्काप्रतिष्ठानादिति सूत्रं, *तर्कोऽप्रतिष्ठः इति स्मृतिश्च तर्कस्यानुमानादन्यत्वं सूचयतः । न ह्यनुमानं प्रमाणभूतमप्रतिष्ठितं स्यात् । किंच एवंत्वादेवमिति ह्यनुमानस्वरूपम्, एवं चेदेवं स्यादिति च तर्कप्रकारः ; कथमनयोरैक्यम् ? आहार्यलिङ्गजन्यत्वाच्चानुमानाभासवत्तस्यानुमानत्वम्, आरोपितविषयत्वाच्च ; न हि सधूमे निर्धूमत्वप्रसङ्ग इति धीरनारोपितविषया, विपर्यये पर्यवसानाच्च ; न ह्यनुमानं स्ववेद्यविपर्यये पर्यवस्यति, किं तु स्ववेद्य एव, अन्यथा अनुमानप्रामाण्योच्छेदप्रसङ्गात् । उक्तं च **प्रज्ञापरित्राणे**—

*प्रमाणानिष्टपक्षोक्तौ तस्य व्याप्तिबलात् प्रति । अनिष्टापादनं तर्को नानुमानं स्मृतिर्मता ॥
स्मृतिप्रमोष एवात्रानिष्टोपस्थापनं ह्यतः । तद्व्याप्तिबलतस्तादृगनिष्टापादनं स्मृतिः ॥

इत्यादिकमुक्त्वाऽनन्तरमेवोक्तम्—

*एवं व्याप्रियमाणोऽसौ तर्को मानोपकारकः । प्रामाणिकोऽर्थो लिङ्गं स्यादनुमाने तु तद्बलात् ॥
प्राप्तः प्रामाणिकः स्यादित्यनुमातर्कयोर्भिदा । प्रसङ्गद्वारतो याः स्युरनुमानप्रवृत्तयः ॥
तर्कोक्तयस्तास्तदपि साक्षाल्लिङ्गादयोऽपरे ॥ इत्यादि ।

तस्मादनुमानादन्यदेव किंचिद्यथाभाष्यमूहापरपर्यायं ज्ञानं तर्क इति वदन्ति ॥

यत्तु सर्वेषां प्रमाणानां तर्कानुग्रहापेक्षावचनम्, तत् प्रमाणस्य सतस्तर्कस्यानुग्राहकत्वमात्रेणोपपन्नम् । प्रमाणस्य प्रमाणेन कथमपेक्षेति चेत्, कथं वा प्रमाणेतरेण तर्केण ? विपक्षे जिज्ञासाविच्छेदनादिति चेत्, तुल्यम् । तर्हि पूर्वेण किं प्रयोजनमिति चेत्; किं वाऽतिरिक्ततर्कवादिनः ? पक्षस्थापनमिति चेत्, तुल्यम् । न च तत्रापि तर्कान्तरापेक्षया अनवस्था, अप्रमाणत्वपक्षेऽपि व्याप्तेर्व्याप्त्यन्तरापेक्षाक्रमेणानवस्थानप्रसङ्गात् । न हि तर्कान्तर्गता व्याप्तिर्नास्तीति युक्तं वक्तुं तार्किकगोष्ठीषु, शङ्काभावे च तदनपेक्षणात्; तर्कः क्वचित्क्वचिदित्येव ह्युच्यते । उक्तं च **उदयनेनापि**—*व्याघाता-वधिराशङ्का तर्कः शङ्कावधिर्मतः । इति । **तत्त्वरत्नाकरेऽपि**—अपरे पुनः सकलप्रमाणानां तर्कानुग्राह्यतामाग्रहादुदाहरन्ति इत्याद्युक्त्वा तदा तर्कापेक्षाध्यवसायविरुद्धम् इत्यादिना प्रत्युक्तम् । पश्चाच्चोक्तम्—

*नैनं तर्कमपेक्षन्ते सर्वाः प्रमितयो यतः । विरोधाबोधयोर्जातं संशयं स चिकित्सते ॥ इति ।

यच्च *तर्को हि नाम इत्यादि, तदप्यनुमानविशेषस्यैव तर्कस्य प्रमाणान्तरपरिकरत्वेनावस्थितस्य व्यापारसंज्ञाविशेषादि-कथनमात्रम्; न हि तत्रानुमानान्यत्वमुक्तम् । एवम् *अनधिगत इत्यादावपि । एतेन *यस्तर्केण इति मनुवचनमपि निर्व्यूढम् । यच्चोक्तं **श्रीविष्णुचित्तैः**—भाष्यकारैस्तु प्रत्यक्षानुमानागमेभ्यस्तर्कोपबृंहितेभ्य आत्मनः स्वयंप्रकाशत्वं सम-र्थितम् इति, तथा तैरेव **संगतिमालायामुक्तम्** *रचनानुपपत्तेः इति सूत्रे,—*नात्रेश्वरानुमानमुच्यत इति शङ्कनीयम्, प्रतितर्कमात्रवचनात् । व्याप्तिबलमालम्ब्यानिष्टप्रसञ्जनस्तर्कः इति तर्कस्यापि व्याप्त्यवश्यंभावात् इति, तदपि भाष्यवदेव योज्यम् । यत्तु अप्रतिष्ठितत्वसूत्रस्मृतिभ्यामनुमानान्यत्वं सूचितमिति, तदपि न, अतीन्द्रियार्थगोचराणां केवलतर्काणा-मेवाप्रतिष्ठितत्वाभिधानस्य **भाष्यकारैरेव** बहुशोऽभिधानात् । उक्तं तत्रैवोपसंहारे—*अतोऽतीन्द्रियार्थे शास्त्रमेव प्रमाणम् । तदुपबृंहणायैव तर्क उपादेयः इति । प्रत्यक्षादिविरोधे चाप्रतिष्ठा साक्षादनुमानेऽपि समाना; अन्यथा तर्क-मात्रस्याप्रतिष्ठितत्वे मीमांसैव हिंसिता स्यात् । न च तद्युक्तम्; *यश्च मीमांसतेऽध्वरम्, *वेदशास्त्राविरोधिना यस्तर्केणानुसंधत्ते इत्यादिविरोधात् । किंच—

तर्काप्रतिष्ठाऽतर्कोऽयं प्रतितिष्ठति वा न वा । तर्कप्रतिष्ठा द्वेधाऽपि तत्तदन्यव्यवस्थितेः ॥

अप्रतिष्ठितस्य तर्कस्यानुग्राहकत्वमपि मृग्यमिति । यत्तु एवंत्वादेवम्, एवं चेदेवं स्यात्, इत्यनयोः कथ-मैक्यमिति ? तत्र ब्रूमः—

व्यतिरेकात्मिका व्याप्तिर्विपक्षे दण्डतां गता । पक्षोपश्लेषणवशात् स्याच्चेदित्यवतिष्ठते ॥
पक्षधर्मत्वगर्भोक्तिः स्यादित्येवं प्रवर्तते । न चैवमिति तेनैव हेतुमाह विपर्ययम् ॥

साध्याभाववतामेष हेत्वभावो व्यवस्थितः । न च सोऽयमिहास्तीति स्यात्कारेणाभिसंहितम् ॥
साध्यशून्यस्त्वया पक्षो विपक्षवदभीप्सितः । नासौ तथेति चेत्कारः साध्यधर्मान्वयाशयः ॥
अनुवादात्मना पक्षे साध्याभावो विभाति यत् । प्रतिषेधोपपत्त्यर्थः परामर्शः स युज्यते ॥
एवं चेदेवमेव स्यादिति धीर्यदि विभ्रमः । व्याप्तिरेवात्र भग्ना स्यात्तदा कस्तर्क इष्यताम् ॥
न चैवमिति तर्कोऽयं पर्यवस्यन् विपर्यये । पर्यवस्यति तेनैव प्रसञ्जकविपर्यये ॥
प्रसङ्गान्तर्निमग्नोऽर्थ उन्मज्जति विपर्यये । एवकाराद्यभिप्रेताः स्वशब्दाभिहिता यथा ॥

अत आहार्याध्यारोपितहेतुविषयत्वेऽपि तर्कस्य याथार्थ्यं नापैति, यद्युपश्लेषेण स्यात्कारेण च प्रवृत्तेः, तयोश्च तद्विपर्ययाध्यवसायगर्भत्वात् । अत एव च न स्मृत्यादावपि तर्कधियोऽन्तर्भावः । स्मृतिप्रमोषविशेष एवायमीदृश इति चेन्न, तत्रापि चेत्स्यात्प्रयोगयोरयोगात् । न हि स्मृतावेव तयोः संभवः; कुतस्तत्प्रमोषे ? प्रमुषितपूर्वानुभवविषयैकदेशा स्मृतिरेव हि स्मृतिप्रमोष इति वर्ण्यते । अपि च तर्कस्यायथार्थत्वे—यदि सविषमिदमन्नं भक्षयिष्यसि, परेष्यसि, *अन्धोऽभविष्यद्यन्मां नागमिष्यः इत्यादयो लौकिकवैदिकप्रसङ्गा मृषावादाः स्युः । ततश्चैतेभ्योऽनर्थेभ्यो विच्छेदोऽपि न स्यात् । न हि यदि धर्मं चरिष्यसि, नरके पतिष्यसीत्ययथार्थोक्तौ कश्चिद्धर्मान्निवर्तते । एवं च दृष्टेऽपि—यदि भोक्ष्यसे क्षुच्छान्तिर्न भविष्यतीति । अपि च यद्युपश्लिष्टं प्रसञ्जकं व्याप्यं यदि कार्तान्तिकवदनिष्टं प्रसञ्जयेत्, तदा स्यादप्ययाथार्थ्यम् । न तथाऽत्र । यदि स्वरूपतो मिथ्याभूतप्रसञ्जनीयोल्लेखमात्रादयथार्थत्वं, तदा भ्रान्तिविषयज्ञानान्तरेऽपि स्यात् ॥

नन्वीश्वरो दयालुश्चेत् सुखैकान्तं जगत्सृजेत् । अविद्या ब्रह्ममूला चेदनिवर्त्या प्रसज्यते ॥
सर्वप्रपञ्चमिथ्यात्वं मिथ्या चेद्व्याहतं भवेत् । अनाश्रयस्यैवमादेरनुमानात्मता कथम् ॥
भ्रान्ताश्रयानुमन्तॄणां शून्याद्वैतादिवादिनाम् । नैतच्चोद्यं तदन्येषामेवं दोषः समुत्थितः ॥
अनुमानान्यतायामप्येष न स्यादनाश्रयः । वन्ध्यासुतो बुभुक्षुश्चेद्भुङ्क्तेति हि नोच्यते ॥
ततो यदाश्रयस्तर्कः साक्षाद्व्यवहितोऽपि वा । तस्यानुमानभावेऽपि न ह्यसावपसर्पति ॥

न चैतदनादेशिकम्, **आरम्भणाधिकरणे** तर्केष्वेवानुमानशब्दस्य **भाष्यकारैः** प्रयोगात्—*तानि चानन्तरोक्तैरविद्याकार्यत्वादिभिरनुमानैर्निरस्तानि इति । न च ते न तर्का इति शक्यं वक्तुम्, यथाश्रुतप्रकारेण स्वरूपासिद्ध्यादिप्रसङ्गात् । **तत्त्वरत्नाकरे**ऽपि *एषां प्रसङ्गद्वारेण वा प्रयोगः इत्यादिना हेतुत्रयस्यापि प्रसङ्गरूपेण प्रयोग उदाहृतः । अर्थापत्त्यन्तर्भावदशायामप्युक्तम्—*तन्निरवकाशमानालिङ्गादिह सावकाशस्यात्माविरुद्धविषयस्थापनविषयानुमानमर्थापत्तिः । इयमेवागमविषयव्यवस्थितौ शेषभूता चेत् सामान्यविशेषाख्यो न्यायो निर्दिश्यते इति । आकाङ्क्षादिनिरूपणे चाभिहितम्—*पीनो देवदत्तो दिवा न भुङ्क्ते इत्येतदपि रात्रिभोजनपर्यन्ततात्पर्यं चेत् अध्याहारस्योदाहरणम्; दिवातनाशननिषेधमात्रपरं चेच्छ्रुतार्थापत्तेः । यस्य हि प्रमाणस्य यावत् प्रमेयं व्यवस्थापितम्, तत् तावत्यप्रमिते न स्वातन्त्र्येण पर्यवस्यति; तदा तत्पर्यवसानार्थतयाऽनुपपत्तिलिङ्गादिकं व्याप्रियमाणं तर्कलक्षणापन्नं तच्छेषतयाऽवतिष्ठते, परोद्देशप्रवृत्तव्यापारव्याप्यत्वात्, प्रमित्सितपर्यवसाने तत्प्रमेयस्वभावपर्यालोचनया स्वातन्त्र्येण व्याप्रियमाणं तर्कप्रमाणपदं समधिरोहति इति । मनोनिरूपणे चोक्तम्—*यद्यप्येवं न तर्कः स्वातन्त्र्येण स्वार्थसमर्थनसमर्थः, तथाऽप्यागमानुग्रहेण प्रभवति; सन्ति ह्यागमाः इत्यादि । नन्वप्रमाणत्वं तर्कस्य तत्रैव प्रपञ्चितम् । तथा हि **न्यायपादे**—

*यदुक्तं न प्रमाणेन परीक्षा दोषवन्न तत् । अप्रमाणेन तर्केण परीक्षा वक्ष्यते यतः ॥ इति ।

साक्षात् **तर्कप्रमाणे** च—

*मानानुग्राहकं युक्त्या ज्ञानं तर्कोऽभिधीयते । युक्तिश्च संभवौचित्यतद्विपर्ययतो द्विधा ॥

मानानुग्राहकपदेन प्रमाणेभ्यो व्यावर्त्यते इत्याद्युपक्रम्य हेतुफलविषयव्यापारावान्तरभेदादि प्रपञ्चेनोक्त्वा,

*केचिदाचक्षते तर्कः प्रमाणमिति मन्महे । संशयादिबहिर्भावात् प्रामाण्यस्य च संभवात् ॥

इत्यादिना तर्कप्रामाण्यपक्षं प्रपञ्चेनानूद्य, प्रसङ्गरूपव्यतिरेक्यनुमानमेव तर्कः इति तन्मतमुपसंहृत्य,

*उच्यते न प्रमा तर्को वेषहेत्वोर्विशेषतः । हेत्वाभासोद्भवत्वाच्च सोऽयं निर्णायको न च ॥ इत्यादिना ।

सत्यम्; तथाऽपि **भाष्यकारैः**—*चार्वाकशाक्योलूक्याक्षपादक्षपणककपिलपतञ्जलिमतानुसारिणो वेदबाह्याः इत्यादिषु बहुषु प्रदेशेषु बाह्यपक्षनिक्षिप्ताक्षपादोक्तषोडशपदार्थसूत्रानुवादपूर्वकं तत्क्रमेण प्रमाणादिपरी[क्षया]क्षायां न्यायपादमारचयतः परमतमनुरुध्यापि कचिद्व्यवहाराः संभवन्ति, अन्यथा स्वेनैवार्थापत्त्यन्तर्भावादिप्रकरणोक्तग्रन्थविरोधात् । यच्च तत्र युक्तिरूपमिव किंचिदुक्तम्, तदपि न तदुचितमिति ततोऽपि न स सिद्धान्तः; तथा हि—एवं भवितव्यमिति हि प्रमाणात् तर्कस्य वेषविशेष उक्तः । स त्वनिश्चयात्मकश्चेत् संशय एवान्तर्भावः । तत्रैव हि श्रमसंशयादिलक्षणानन्तरं चैवमुक्तम्—*संभवासंभवपरामर्शस्तर्कः; यथा—बाह्वादिप्रदेशवत्त्वात् पुरुषेणानेन भवितव्यम्, न स्थाणुनेति । एषां संशयादीनां विमर्शानवधारणाद्येकप्रयोजनान्तर्भावसंभवेऽपि पृथगुपादानमवान्तरकारणवैषम्यात्, उपयोगभेदस्य च न्यायपादे दर्शयिष्यमाणत्वाच्च इति । न चानग्निश्चेत् निर्धूमः स्यादिति बुद्धेः संशयता । अथायमसंभावनानिरासः, तथाऽपि तेनाकारेण वैषम्यान्निर्णयरूपत्वादबाधाच्च प्रमाणमेव । यच्च *न केवलं प्रसङ्गसाधनं साध्यधर्मिण्यसिद्धम्, अपि त्वन्यगतमेव प्रसङ्गहेतुः; न त्वनुमानमन्यगताद्धर्मात् प्रवर्तते; ततस्तस्मात् स्फुटोऽस्य भेद इत्युक्तम्, तत्रासिद्धहेतुजन्यत्वे परिहारः पूर्वमेवोक्तः । एवं चेदेवं स्यादित्यस्य च, न चैवं तस्मान्न तथेत्यत्रैव तात्पर्याद्व्यतिरेकव्याप्तिक्रोडीकार एवातिरिक्तः । अन्यगतहेतुसमुत्थत्वं तु न कथंचिदपि स्यात्; न खल्वन्योऽनग्निश्चेदयं निर्धूमः स्यादिति युज्यते, नापि न चान्यो निर्धूमस्तस्मादयमनग्निर्न भवतीति । यच्चाप्रयोजकानैकान्तिकहेतुभिरपि तर्कस्य संभवरूपेण समुत्थानादनुमानान्यत्वमुक्तम्, तदपि हेत्वाभासजन्यज्ञान एवान्तर्भावाय, न तु पृथक् तर्काख्यज्ञानसिद्धये । न च तेऽपि हेतव आभासा अपि संशयद्वारा विपर्ययद्वारा वोपकुर्वते; तत्त्वनिश्चयस्य तदपेक्षानियमाभावात्, भावेऽपि सिषाधयिषितस्याविरोधप्रदर्शननिर्णयरूपेणैवोपकारात् । एवमन्यदपि चिन्त्यम् । निर्णयात्मकत्वं च तर्कस्य **श्रीविष्णुचित्तैरुक्तम्**—*तर्कश्च साध्यधर्माव्यभिचारिसाधनधर्मान्वितवस्तुविषयः इति ॥

तर्कविभागः ॥ भवत्वेवं प्रमाणभूतोऽप्रमाणभूतो वा प्रमाणानुग्राहकस्तर्कः । स किमङ्गकः? कतिविधः? कियदवयवप्रयोगश्च? व्याप्त्यादिपञ्चाङ्गः संग्रहाद्विविधः पञ्चविधो वा, प्रयोगोऽप्यनुवादप्रसङ्गाभ्यां द्व्यवयवः । विपर्ययपर्यवसानवाक्यं तु तृतीयोऽवयवः । स नावश्यं वक्तव्यः, मन्दस्य त्वनिष्टताव्यक्त्यर्थमुच्येतापि । प्रसञ्जकस्य प्रसञ्जनीयेन व्याप्तिः, प्रतितर्केणाप्रतिघातः, प्रसञ्जनीयविपर्यये पर्यवसानम्, प्रसञ्जितस्यानिष्टत्वम्, परपक्षासाधकत्वं चेति तदङ्गानि । यथा—अनग्निश्चेत् निर्धूमः प्रसजेत्, न चासौ निर्धूम इति । अग्न्यभावो हि धूमाभावेन व्याप्तः । यथाऽऽहुः—

*धूमाभावेनाग्न्यभावे व्याप्ते नाग्निस्ततश्च्युतः । अधूम एव वर्तेतेत्येवं व्याप्यत्वमश्नुते ॥ इति ।

न च साग्नित्वेऽप्यत्र कश्चिदनिष्टप्रसङ्गः, येन ततः प्रतिहन्येत । न चायं निर्धूम इति विपर्यये पर्यवसानं धूमप्रत्यक्षबलसिद्धम् । अत एव धूमाभावप्रसञ्जनमनिष्टमेव ; न चासावनग्नित्वपक्षसाधक इति । प्रामाणिकपरित्यागः, अप्रामाणिकस्वीकारः इति प्रसञ्जनीयद्वैविध्यात् द्विविधस्तर्कः । तत्र पूर्वो दर्शितः । अपरो यथा—यदीश्वर आतृणादाकरीषात् स्वरूपेणाभिन्नः, तस्य विकारापुरुषार्थयोगित्वप्रसङ्ग इति । आत्माश्रयान्योन्याश्रयचक्रकानवस्थाकेवलानिष्टप्रसङ्गभेदेन पञ्चविधः । तत्रात्माश्रयादयश्चत्वारः स्वविषये स्वरूपासिद्धिमावहन्ति, पञ्चमस्तु व्याप्यत्वासिद्ध्यादिकम् । अन्याधीनतयैव नियतस्य स्वाधीनत्वाभ्युपगमे विरोधप्रसङ्ग आत्माश्रयप्रसङ्गः । यथा स्वेनैव स्वयमुत्पाद्यत इत्यादौ नियतपूर्वसिद्धि कारणम्, नियतोत्तरं च कार्यम्; न चैकमेकापेक्षया पूर्वमपरं च स्यात्, अन्यथा भावाभावसौहार्देन सर्वव्यवस्थोन्मूलनप्रसङ्गादिति । अन्याधीनत्वनियमरहितस्य स्वाधीनतया विरोधापादनमात्माश्रयाभासः । यथा—स्वेनैव स्वयं पोष्यते, ज्ञायते च इत्यादौ ; न ह्यत्र कर्मकर्तृविरोधः, स्वरूपतः सिद्धेनातथाभूतेन स्वेनैव स्वस्यैव तथाभावापादनस्य सर्वप्रत्यक्षसिद्धत्वात्, ज्ञानादिषु चैकस्यैवाश्रयत्वविषयत्वयोः सहोपलम्भात् । स्वातिशयापादनानभ्युपगमे स्वज्ञानाभावाभ्युपगमे च दृष्टादृष्टार्थसर्वचेतनप्रवृत्त्यपह्नवप्रसङ्गेन स्ववचनादिविरोधादिति । स्वकार्येण स्वोत्पत्त्यभ्युपगमे विरोधप्रसङ्गः अन्योन्याश्रयप्रसङ्गः । यथा—देवदत्तः पिता यज्ञदत्तस्य, तस्मिन्नेव च जन्मनि स एव तस्येति ; न हि स्वकारणात् पूर्वं स्वस्य सत्ता समस्ति, पूर्ववत् स्वप्रागभावसमानकालत्वप्रसङ्गात् । न ह्यसति प्रागभावे कारणेन किंचित् कार्यम् ; न चासता कार्येण कारणस्योत्पादनं युक्तम् ; तथा सति किं कस्य कारणं कार्यं वा न स्यात्? एवं कारणेऽपि कार्यसमनन्तरभाविनि भवनस्य प्रागभावाव्यवधानात् स्वकार्यस्य स्वप्रागभावपरिष्वङ्गप्रसङ्गः । यदि च कारणप्रागभावदशायां कार्यं स्यात्, किं कारणेन साध्यं स्यात्? यच्च—धूमेन वह्निर्ज्ञायते, तेनैव च वह्निना स एव, इत्यादिषु ज्ञाप्यज्ञापकान्योन्याश्रयणम्, तत्रापि कृतावेव तद्विश्रमः, धूमज्ञानेन वह्निज्ञानं जन्यते, तेनैव च तदिति । एवमन्यत्रापि द्रष्टव्यम् । अन्योन्योपकारादिमात्रे तदाभासः । यथा—सैन्येन राजा रक्ष्यते, तेन च सेनेत्यादि ; न ह्यनयोः शक्तिर्व्यापारादिकं वा परस्परोत्पाद्यम् । अन्यतः सिद्धशक्तिकयोस्तु मुखभेदेनान्योन्योपकारः । एवं परस्परोपष्टम्भेन काष्ठाद्यवस्थानेऽपि द्रष्टव्यम् । त्रिप्रभृतीनामवधिमतामन्योन्यं चक्रवदुत्पत्त्यपेक्षावृत्तौ चक्रकप्रसङ्गः । यथा—कश्चित् कौपीनसारः सङ्कल्पयति * न श्रीरकृषमाणस्य इति परमाप्तवचनात् कृष्या [धन] विभवमुपलप्स्ये, तेन चोपदामुखेन राजानं प्रसादयिष्यामि, राजप्रसादेन लब्धोपकरणस्य मे कृषिरद्य न दुष्करेति । मुखभेदे तु तदाभासः । यथा—अन्योन्यव्यक्त्यनुसारिणि बीजाङ्कुरस्तम्भादिप्रवाहे, दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानपरिवृत्तौ, * अन्नाद्भवन्ति भूतानि इत्यादिचक्रेषु । स्वस्मिन्नेव विश्रमे ह्यत्रापि विरोधः, न तु स्वसजातीयविश्रान्तौ, तज्जातीयप्रागभावस्य तस्य च विरोधाभावात्, अन्यथा सजातीयानां सर्वेषां समानायुष्कत्वादिप्रसङ्गात् । अपर्यवसिताप्रामाणिकप्रवाहप्रसक्तिरनवस्था । यथा—ज्ञातेनैव सर्वं ज्ञायत इति यदि कश्चिन्नियमं ब्रूयात्, तदा पूर्वपूर्वज्ञापकज्ञानपरम्परापेक्षायां न क्वचिदपि विश्रमः, तत्र कस्यचिदप्यज्ञाने तज्ज्ञाप्यज्ञानासंभवात् सर्वाज्ञानप्रसङ्गः । जिज्ञासितार्थविज्ञाने च ज्ञापकपरम्पराज्ञानस्य दुस्संपादत्वाच्च सर्वाज्ञानमेवापतेत् । न चाविच्छिन्ना ज्ञानसंततिः ; येन तत्तद्विषयैर्ज्ञातैरेवोत्तरोत्तरज्ञप्तिसिद्धिः स्यात् । तस्मादज्ञातैश्चक्षुरादिभिः संस्कारैश्च ज्ञातेन लिङ्गेन शब्देन चार्थप्रतीतिरित्यनियम एवाङ्गीकार्यः इति । एवं संबन्धस्य संबन्धान्तरे विशेषस्य विशेषान्तरे सामान्यस्य सामान्यान्तरे अवयवस्यावयवान्तरे धारकस्य धारकान्तरे शेषिणः शेष्यन्तरे अङ्गस्याङ्गान्तरे नियन्त्रादे-

र्नियन्त्रन्तरादौ च नियमेनाभ्युपगम्यमाने तस्यापि तथेत्यनवस्था ग्राह्या । अतः प्रमाणसिद्धेषु स्वपरनिर्वाहकेषु निरपेक्षेषु वा विश्रमः स्वीकार्यः इति ॥

अनवस्थाभासः ॥ प्रमाणसिद्धप्रवाहप्रसक्तिस्त्वनवस्थाभासः । यथा—यदि सामग्र्या अपि सामग्री स्यात्, तस्या अपि सामग्र्यन्तरेण भवितव्यम्, एवमुपर्युपरीति । न ह्यनादिसामग्रीप्रवाहाभ्युपगमे कश्चित् प्रमाणविरोधः, उत्तरोत्तरासिद्धिर्वा, येन सिद्धाऽनवस्थाऽपि दूषणमिष्येत । एवं विभुद्रव्येषूपाधिभिरवच्छिद्यमानेष्वायामविस्तारघनभागान्तरपरम्पराभ्युपगमेऽपि न तद्द्रव्यस्वरूपस्य सिद्धानां वा भागानां काचित् क्षतिः, येन सर्वं परिमितस्वभावमपरिमितमङ्गीक्रियेत ; अन्यथा परिमितभागप्रदेशान्तरपरम्परानुसारेणाप्यनवस्था दुस्त्यजा, कस्यचिदपि स्वाभावविशिष्टप्रदेशान्तराभावे विभुत्वप्रसङ्गात् । एवं दृष्टान्तहेतुपक्षादिषु तज्जातीयान्तरापेक्षानियममिच्छतोऽनवस्था । अनिच्छतस्तत्प्रसङ्गे तदाभासो ग्राह्यः । आत्माश्रयादीनामेषां चतुर्णां साध्यस्य सिद्धवत्कारप्रतिपादनमुखेन दूषणत्वम्, केवलानिष्टप्रसङ्गे तु पूर्वप्रदर्शिते व्यापकानुपलब्धिविरोधेनेति । एतेषामेव प्रकारभेदात् प्रतिबन्दिसम [वचनो] चर्चोभयतःस्पाशादयः प्रसङ्गभेदा द्रष्टव्याः । **प्रज्ञापरित्राणे** तु केवलानिष्टप्रसङ्गमेव द्विधाकृत्य षोढा तर्का उक्ताः—

* आत्माश्रयणमन्योन्याश्रयणं चक्रकं तथा । अनवस्था विरोधश्चासंभवश्चेत्यमी बुधैः ॥ इति ।

तत्रान्त्ययोश्चैवं लक्षणमुक्तम्—

* स्ववाग्विरोधो यत्र स्याद्विरोधः स प्रकीर्तितः । सर्वप्रमाणासिद्धत्वमसंभव उदाहृतः ॥ इति ॥

एवंच तावुदाहृतौ—* वन्ध्या मे जननीत्येष विरोधः स्वोक्तिबाधतः । शशे शृङ्गमुदस्थादित्येवमादिरसंभवः ॥ इति ॥

अत्र व्याप्त्याद्येकैकवैकल्येन **केवलानिष्टप्रसङ्गाभास**पञ्चकमुदाह्रियते । तत्र **व्याप्तिशून्यो** यथा—आत्मा अणुश्चेत् तत्कर्मणा देशान्तरे फलं न स्यात् इति । नहि कर्मणः फलकरणत्वमाश्रयसंयोगादिमुखेनेति नियमः ; तत्तत्कर्मसाध्यदेवतानुग्रहनिग्रहमुखेन तत्सिद्धेरागमिकत्वात् । परस्या देवतायाश्च वैभवात् संकल्पमहिम्ना च सार्वत्रिकफलजननोपपत्तेः इति । **प्रतितर्कप्रतिहतो** यथा—प्रागसच्चेत् कार्यम्, पश्चादपि शशविषाणवदनुत्पत्तिप्रसङ्गः इति । तत्र **प्रतिप्रसङ्गः**—प्रागपि सच्चेत् प्रकृत्यादिवदेवानुत्पाद्यत्वप्रसङ्गः इति । नहि सर्वत्र व्यक्त्यर्थो व्यापारः, व्यक्तौ तदसंभवात् ; अन्यथा अनवस्थादिप्रसङ्गात् । **विपर्ययपर्यवसानरहितो** यथा—न सत्यं स्थूलम्, विरुद्धधर्मसंसर्गप्रसङ्गात् इति । न ह्यत्र विरुद्धधर्मसंसर्गो दृश्यते ; देशकालदशावयवप्रतिसंबन्ध्यादिभेदेन तत्तद्विरोधप्रशमनात् । **इष्टप्रसङ्गो** यथा—ईश्वरसत्त्वे नित्यस्यापि वेदस्य तदधीनत्वप्रसङ्गः इति । न ह्यौपनिषदैर्नित्योऽपि वेदः स्वतन्त्र इष्यते, तदाज्ञारूपत्वात्, क्रमभङ्गाभावेऽपि प्रवर्तनादिषु सर्वथा तदधीनत्वाच्च । **अनुकूलप्रसङ्गो** यथा—अस्ति चेदीश्वरः, उपनिषदपि प्रमाणं स्यादिति ; न ह्यत्रेष्टतामात्रम्, अपित्वीश्वरसिद्धिहेतुत्वमपीति परपक्षसाधकत्वात् पृथक्करणम् ; नहीष्टं सर्वं विवक्षितसाधकम्, अनग्नित्वे वृक्षवत्त्वप्रसङ्ग इत्यत्र वृक्षसंबन्धस्येष्टत्वेऽपि वह्न्यभावसाधकत्वाभावात् । न च विवक्षितसाधकं सर्वमिष्टम् ; अग्निमत्त्वे सालोकत्वप्रसङ्ग इत्यत्र प्रत्यक्षविरुद्धस्यालोकस्य साधकत्वेऽप्यनिष्टत्वादित्येके । परविपक्षे दण्डभूतस्तु तर्कः परपक्षानुकूल इति पण्डिताः । यथा स्थूलापलापिनो बौद्धस्य नास्थूलमिदम्, तथोपलम्भप्रसङ्गात् इति । स्थूलसाधकस्य ह्यस्थूलपक्षबाधकोऽनुकूलः । एते च तर्काभासाः अनुमानाभासान्तर्भावपक्षेऽपि प्रवावदूकैः पृथ [गुद्भा] म्भावयितुमुचिताः । तर्कस्य पृथक्प्रसिद्धव्यवहा[र्य]रत्वेन तदाभासानामपि तथैव व्यवहारोपपत्तेः इति । स्थितं तावत् सावान्तरभेदैर्हेत्वाभासैः ।

आगमाभासाः ॥ सापराधैः पुरुषैः प्रणीतानि वाक्यान्यागमाभासाः । भ्रमविप्रलम्भप्रमादाशक्तयश्च प्रणेतॄणामपराधाः । तत्र **भ्रममूलः** आगमाभासो यथा—* पतति गुरुत्वान्नित्यं पृथ्वी इत्यादिरार्हतादीनामुपदेशः । **विप्रलम्भमूलो** यथा—अयसः काञ्चनत्वादिवदाचण्डालं संस्कारविशेषवशात् ब्राह्मणत्वादिसिद्धिरिति कापालिकादीनाम् । **प्रमादमूलो** यथा—व्यासङ्गादिदशाविक्षिप्तचेतसां प्रामाणिकानां स्वपक्षपरपक्षसंकराद्युपदेशः । **अशक्तिमूलो** यथा—तत्त्वविदामृजूनामवहितानामप्यपटुकरणत्वादिवशादक्षरादिविपर्यासवान् व्यवहारः । सोऽपि हि श्रोतुरर्थान्तरभ्रमादिहेतुत्वादागमाभासः । एवमधिकृतशास्त्रविरोधे अनधिकृतशास्त्रमतत्परमपि तत्परं योजयतां वाक्यमपि । क्वचिद्धि किंचिच्छास्त्रमधिकरोति । यथा—शुभाशुभकालेषु ज्योतिषम्, श्रौतानुष्ठानक्रमे कल्पसूत्राणि, आचारेषु धर्मशास्त्राणि, सर्गप्रतिसर्गादिषु पुराणानि, चिदचिद्विवेकमात्रे सांख्यम्, साङ्गसमाधिस्वरूपे योगः, अधिकारिविशेषनियतानन्यभजनप्रस्थाने पञ्चरात्रम्, वास्तुविभागादिषु शिल्पविद्यादयः, पथ्यापथ्य [द्रव्य] विभागादिष्वायुर्धनुर्गान्धर्ववेदादयः इति । तेष्वधिकृतशास्त्रविरोधे अनधिकृतं शास्त्रमन्यपरं नेतव्यम् । तदेव तत्परं ब्रुवाणः आगमाभासेन निगृह्येत । अत एव हि सांख्यादेः क्वचिदंशे परिग्रहोऽपरिग्रहश्च ॥

न च * सांख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा । आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः ॥
इत्यादिभिः सांख्ययोगपाशुपतानामपि यथोक्ततात्पर्येण कृत्स्नप्रामाण्यं शङ्क्यम्; अत्यन्तातीन्द्रियार्थविषयतया हेतुहन्तव्यत्वमात्रनिषेधात् । न हि तादृशे विषये हेतुभिर्विधातुं निषेद्धुं वा शक्यम् । न च हेतुहन्तव्यत्वनिषेधमात्राच्छ्रुतिहन्तव्यत्वमपि निषिद्धं स्यात्; अतुल्यबलयोर्विरोधे हीनस्य निग्रहावश्यंभावात् । पौरुषेयापौरुषेयविरोधे पौरुषेयं हीयते, पौरुषेयेष्वपि परिग्रहादितारतम्यात् परस्परबलाबलव्यवस्था; परिग्रहादिसाम्येऽप्यैदंपर्यान्यपर्याभ्यामर्थतत्त्वव्यवस्था इति । लौकिकेष्वपि पित्रादिवाक्यं प्रमाणं कुहकादिवाक्यमप्रमाणमिति स्थिते क्वचित्क्वचिदंशे गुणदोषसंभावनया दृष्टमन्यथात्वम् । संदिग्धप्रामाण्येष्वपि वाक्येष्वागमाभासत्वमेव, याथार्थ्ये [र्थ्यसत्त्वे]ऽपि प्रत्ययजनकत्वाभावात्, तदर्थं हि पुरुषः प्रमाणमुपादत्ते । अन्यथा भ्रान्तविप्रलम्भकादिवाक्यानामपि यादृच्छिकार्थसंभावनया प्रामाण्यप्रसङ्गः । न च तथा लौकिकाः परीक्षका वा प्रतियन्ति ।

अतो ये नाम बाह्यानां व्याहाराः कुदृशामपि । न ते दृष्टेष्वदृष्टेष्वप्यर्थेष्वादरगोचराः ॥
दृष्टे किमुपदेशेन किमदृष्टे तदुक्तिभिः । न खल्वतीन्द्रिये वस्तुन्यस्ति पुंसां स्वतन्त्रता ॥
प्रत्यक्षादेरसाध्येषु वेदवेद्येषु वस्तुषु । किमन्यैः सति सूर्ये कः खद्योतमनुधावति ॥
* या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः । सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥
इति मन्वादयश्चाहुरध्यक्षितपरावराः । येषां यदृच्छावादोऽपि श्रूयते विश्वभेषजम् ॥
* मन्वर्थविपरीता च या स्मृतिः सा न शस्यते । इति [स्मृति] सर्तृभिरेवोक्तमतश्चिन्त्यं बलाबलम् ॥
* सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च । प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥
इति स्वयं भगवता गुणकार्यमगीयत । अतः सत्त्वोत्तरादेशसन्निधावन्यथापनम् ॥
इतिहासपुराणेष्वप्यन्योन्यपरिपन्थिषु । स्वमूलगुणभेदेन बलाबलविनिश्चयः ॥
मात्स्यादिषु पुराणेषु परस्परविरोधिनाम् । पुराणानां विभागो हि तत्परोक्त्यैव साधितः ॥

* यस्मिन् कल्पे तु यत् प्रोक्तं पुराणं ब्रह्मणा पुरा। तस्यतस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते ॥
* अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते। राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः ॥
* सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः। तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम् ॥
सङ्कीर्णेषु सरस्वत्या इन्द्रस्येत्याद्यनुक्रमात्। द्रष्टव्यमेतदखिलं स्पष्टं **पुरुषनिर्णये** ॥
वेदार्थसंग्रहे चैव **भाष्यकारैः** प्रदर्शितम्। न च प्रजापशुपतिप्रभृतेर्नास्ति विभ्रमः ॥
मेधाविभ्रंशतत्सिद्ध्योरेषां **व्यासेन** साधनात्। *त्वं हि रुद्र महाबाहो मोहशास्त्राणि कारय ॥
* अल्पायासं दर्शयित्वा [दर्शयित्वाल्पमायासं] फलं शीघ्रं प्रदर्शय। अहं मोहं करिष्यामि यो जनं [मोहयिष्यति ॥
इत्थं भगवदादेशाद्युक्ता चैषां प्रतारणा। *अबुद्धिपूर्वकः सर्गः प्रादुर्भूतस्तमोमयः ॥
इत्यादिभिः स्यादेतेषां प्रमादाशक्तिसंभवः। अतः प्रत्यक्षवेदादेः सत्परिग्रहशालिनः ॥
विरुद्धमीश्वरवचोऽप्यागमाभास एव नः ॥

स्मृत्याभासाः ॥ प्रत्यक्षाद्याभासनिरूपणेनैव स्मृत्याभासाश्च निरूपिताः, तत्सम्यक्त्वतदभावानुविधानात् स्मृतिसम्यक्त्वतदभावयोः; अथापि स्मृतिप्रामाण्यमिच्छन् कश्चित् प्रतिज्ञातेऽर्थे यदि भ्रान्तिमूलां स्मृतिं प्रमाणतया पुरस्कुर्यात्; तदा तदाभासत्वमुद्भाव्यम्। न हि स्मृतिरत्र प्रमाणमित्युक्ते न तन्मूलं प्रमाणमिति साक्षादुत्तरं स्यात्। न च स्मृतिरित्येवाप्रामाण्यं वक्तुं शक्यम्; तद्याथात्म्यस्य वक्ष्यमाणत्वात्। अतः पुरस्कृतस्य स्मृतिविशेषस्याप्रामाण्ये प्रथममुद्भाविते तत्समर्थनकक्ष्यायां मूलानुभवसम्यक्त्वादिविचारावतारः इति युक्तः पन्थाः। तत्र **प्रत्यक्षाभासमूलस्मृत्याभासो** यथा—आसीत्तदा गगने गन्धर्वनगरमिति। **अनुमानाभासमूलो** यथा—कलधौतमिति परिगृहीतरक्षितकम्बुशकलस्य अस्ति मे तदङ्गुलीयकार्हद्रव्यम् इति। **आगमाभासमूलो** यथा—उपच्छन्दितस्य डिम्भस्य पयःपानेन शिखा मे वर्धिष्यते इति। एवमेव बाह्यानां कुदृष्टीनां च तत्तत्प्रबन्धकरणहेतवः स्मृत्याभासा द्रष्टव्याः। एवं तत्तत्संशयमूला स्मृतिरपि तथातथा संशयात्मिका, तत्तज्ज[न्य]नकसंस्काराणां स्वमूलानुरूपस्मृतिजननशक्ततयैव हि स्वसामग्र्योत्पत्तिः। यथा—जङ्गमस्थावरबीजानां स्वतस्तत्तदनुरूपचराचरारम्भकत्वम्, विनाशे प्रतिबन्धे वाऽनारम्भः, वैगुण्ये कार्यवैगुण्यम्, सहकार्यन्तरवशाच्च जातिगुणान्तरविशिष्टकार्यारम्भः; एवं संस्कारबीजेष्वपि प्रबलसुखदुःखपापकालविप्रकर्षादिभिर्विनष्टेषु प्रतिबद्धेषु वा न तत्साध्या स्मृतिः। वैगुण्ये त्वनुभूतैकदेशविषयः स्मृतिप्रमोषः। प्रत्युत्पन्नकरणादिसहकारिसन्निधौ प्रत्यभिज्ञातदाभासाद्यारम्भकत्वमिति सांदृष्टिकमेतत् ॥

ततश्च संस्काराणां स्वतः पूर्वानुभवसमानाकारस्मृतिजननस्वाभाव्यात् स्मृतिरपि संशयविपर्ययवैषैवेति स्वमूलप्रत्ययवन्नार्थव्यवस्थापिका। साऽपि च विचित्रार्थगोचरा काव्यादिनिर्मिमाणानामुपकुरुते। नतु वस्तुस्थितिं प्रमित्सतामिति तत्पुरस्कारे परस्य निग्राह्यतैव। अतः स्मृतिप्रामाण्यवादानुसारे भ्रान्तिमूलस्मृतीनां प्रमाणाभासाख्यनिग्रहस्थाने निवेशः। स्मृतिमात्राप्रामाण्यपक्षनिष्ठस्तु यथार्थामपि स्मृतिं पुरस्कुर्वंस्तदप्रामाण्याभ्युपगमोद्भावनेन निगृह्येतेति विशेषः। तत्प्रामाण्यवादी च यथार्थां चेत् स्मृतिं प्रस्तुते प्रमाणयेत्; तदनभ्युपगन्ता तु परस्तदाभासतां ब्रूयात्; तत्प्रामाण्याप्रामाण्यविमर्शविषयवादान्तरावतारः। एवं प्रकृतोपयुक्तेषु प्रकृतमध्ये वादान्तरावतारो गर्भाङ्कान्तरचिन्तावदविरुद्धः। तदवसाने च प्रकृतमेव पुनरनुसरणीयम्। जल्पवितण्डयोस्तु प्रकृतविच्छेदेऽपि तदर्थचिन्तान्तरबलेन प्रकृतोद्भावितनिग्रहस्थानसद-

सद्भावसिद्धेस्तावतैव च जयपराजयव्यवस्थानान्न प्रकृतविशेषचिन्तावकाशः। अन्युपगमनीयभेदे तु तदनुसारेण स्यादपीति। एवमनुमानतर्कप्रयोगप्रसङ्गादसत्प्रयोगादिपरिहाराय निग्रहस्थानान्तं निरूपितम्। एतदध्यायचिन्तितमेव चासाधारणं सारं **न्यायविस्तरस्ये**त्यत्रैव वादिभिस्सातिशयश्रमै [र्भवितव्य] र्भाव्यमिति॥

यस्मिन् नानुमितिः क्रमेत विविधा बोधाय बाधाय वा यस्याशेषदृशः क्षितावनुमितिस्तन्मानताख्यातये।
यस्मिन् पश्यति तत्त्वनिर्णयजयावत्याहितं यत्क्षुधा नित्यैश्वर्यमहोदधिः स भगवान्निःश्रेयसायास्तु नः॥

॥ इति न्यायपरिशुद्धौ अनुमानाध्याये चतुर्थमाह्निकम्॥

॥ समाप्तश्च अनुमानाध्यायः॥

॥ अथ शब्दाध्याये प्रथममाह्निकम्॥

अथानुमो[द्भवं]दयं स्मृत्या हेतुत्वेनापि संस्थितम्। मध्ये तयोरिहेदानीं मानं शाब्दं प्रचक्ष्महे॥

शाब्दस्य प्रत्यक्षाद्यतिरिक्तत्वम्॥ अनाप्तानुक्तवाक्यजनितं तदर्थविज्ञानं तत् प्रमाणम्; कारणदोषबाधकादर्शनात्। न चानाप्तोक्तवाक्यं प्रमाणम्, कारणदोषबाधकदर्शनात्, न च वाक्यत्वादिभिर्बाधः; स्ववचनविरोधात्। यदि बाधकोपन्यासवाक्यमयथार्थम्, तदा कथं बाधः? अथ यथार्थम्, तस्यापि पक्षीकारे तद्बाधः। बहिष्कारे [तु] तेनैवानैकान्त्यम्। न चातिप्रसङ्गः; भ्रान्तादिवाक्यानां दोषमूलत्वस्य दुरपह्नवत्वात्। अत्र तु तदभावात्। उत्स्वप्नायितघुण[क्षत]ाक्षरादीनां तु विशिष्टतात्पर्यविरहेण बोधकत्वेऽप्यनाश्वसनीयत्वात्, व्यभिचारदर्शनाच्च। नित्येऽपि वेदे नित्येश्वरशासनात्मनि तत्तदर्थतात्पर्यानपायात्। तस्य चात्राभावात्, क्वाचित्कदोषदर्शनस्य च प्रत्यक्षादावपि [अ]समत्वात्, स्वतः परतो वा प्रामाण्ये च ततो विशेषाभावात्॥

तच्च वेद्यांशे प्रत्यक्षातिरिक्तम्, असाक्षात्कारित्वात्, अनुमानवत्। अनुमानातिरिक्तम्, पक्षलिङ्गपरामर्शाद्यदृष्टेः, पदवाक्यतत्संबन्धादीनां च विशिष्टवाक्यार्थे प्रत्यसिद्धव्याप्तिकत्वेनालिङ्गत्वात्, दृष्टान्ताभ्युपगमे सर्वत्राविशेषात्, व्युत्पत्तौ च स्वतन्त्रतयैव बोधकत्वसिद्धेः। अत एव वक्तृज्ञानानुमानाभ्युपगमेऽपि शब्दप्रामाण्यं सिद्धम्। आगमिकबुद्धिरनुमा, प्रत्यक्षेतरप्रमितित्वात्, संप्रतिपन्नवदिति चेन्न, उक्तोत्तरत्वात्। अन्यथा शब्दरसगन्धादिबुद्धिरनुमा, अचाक्षुषप्रमितित्वात्, संप्रतिपन्नवत्, इत्यपि प्रसङ्गात्। * प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्। दृष्टानुमानागमजम् इति **मन्वादि**महर्षिसंमतेश्च शब्दानुमानयोर्भेदो दृश्यते। न चात्र गोबलीवर्दनयः; अन्तर्भावादर्शनात्। आगमोऽनुमानम्, संबन्धग्रहणे सत्येव बोधकत्वादिति चेन्न; बोध्यबोधकभावातिरिक्तसंबन्धग्रहणापेक्षिण्यनुमानत्वनियमात्। न चात्र तदतिरिक्तः संबन्धः, यद्ग्रहणं नियमेनापेक्ष्येत। अन्यथा संबन्धसापेक्षतया तयोः प्रत्यक्षत्वस्यापि सुसाधत्वादिति। न च स्मृतिः; अपूर्वविषयत्वात्। पदसंदोहविशेषो वाक्यम्। प्रामाणिकपदव्यवहारविषयः पदम्। तस्य सुप्तिङन्तत्वादिकल्पनयाऽपि व्यक्तिः क्रियते। अत एव ह्यन्यथान्यथा प्रकृतिप्रत्ययादिकं व्याकरणान्तरेषु कल्प्यते। तच्च न साङ्केतिकम्; सङ्केतयितृपुरुषासंभवात्। अत एव न भाषान्तरवत् तत्क्लृप्तिः, नित्यवेदगतत्वाच्च। यानि वैदिकानि पदानि तान्येव लौकिकानीति * वेदशब्देभ्य एवादौ इत्यादिवचनादपि सिद्धम्। भाषाच्छन्दसोस्तु कतिपयशब्दानां लक्षणभेदस्तत्तदानुपूर्वीप्रतिनियमापेक्षः॥

भाषाप्रयुक्तः सर्वोऽपि वेदे क्वापि प्रयोगवान् । वेदैकनियतः शब्दो नान्यत्रेति व्यवस्थितिः ॥

उक्तं चैतद्वेदार्थसंग्रहेऽपि—*वैदिका एव सर्वे वाचकाः शब्दाश्च इत्यादिना ॥

वाक्यविभागः ॥ वाक्यं द्विधा—पौरुषेयापौरुषेयभेदात् । पुरुषस्वातन्त्र्याधीनरचनाविशेषविशिष्टं **पौरुषेयम्** । तद्विधा, अन्वितार्थमनन्वितार्थं च । आद्यं यथा—अग्निरुष्णः, आपो द्रवाः, इति । द्वितीयं यथा—अग्निरनुष्णः, आपः कठिनाः इति । अत्रैकदेशिनो वदन्ति—अनन्वयाग्रहादन्वितव्यवहारः क्वचिज्जायत इति । अत एव लौकिकवाक्ये दृष्टव्यभिचारस्य न झटिति वाक्याद्वाक्यार्थाध्यवसायः ; योग्यताविमर्शसाकाङ्क्षत्वात् । सामान्ययोग्यताग्रहणेऽपि व्यक्तियोग्यतायाः वक्तृज्ञानानुमानमन्तरेणासिद्धेः इति **प्रमेयसंग्रहा**दिषु समर्थितम् । तथा—सन्मात्रग्राहिप्रत्यक्षनिराकरणाय शास्त्रस्यानुवादकत्वप्रसङ्गे **विवरणकारै**रुक्तम्—*अबुद्धबोधनस्वरसस्य शब्दस्यातथात्वं दोष इत्यभिसन्धिः । अथवा अनुवादकत्वमेव स्यात् । न हि मानान्तरप्रतीतेऽर्थे शब्दः प्रमाणम् । तथैव हि तस्य व्युत्पत्तिः इत्युक्त्वा *नन्वनुवादकतयैव व्युत्पत्तिः पुंवाक्येषु इत्यादिना वक्तृज्ञानानुमानमुपपाद्य *सत्यम्, दैवात् तदनुवादकत्वमिति नाबुद्धबोधनस्वारस्यभङ्गप्रसङ्गः, यथा स्मृत्यनुमितवेदस्यानुवादकत्वेऽप्यर्थादिति न मानताभङ्ग इत्यादि ॥ उक्तं च **प्रज्ञापरित्राणे**—

*पौरुषेयगिरः शङ्काग्रस्ता न सहसा मितिम् । जनयन्ति न यावत् तन्मूलमानानवग्रहः ॥
अनुमाय च वक्तुस्तन्मूलयोग्यप्रमान्तरम् । तदुक्तवाक्यलिङ्गेन वाक्यार्थमनुजानते ॥
अन्वितार्थाभिधानाय योग्यं वाक्यमिदं सदा । असौ च नानृतं वक्ति संज्ञात्वार्थं तदब्रवीत् ॥
वक्तृज्ञानानुमानेन ज्ञाताज्ञातस्ववाक्यतः । अन्वितार्थाभिधायित्वयोग्यतामात्रधीर्गिराम् ॥
परामर्श इति [प्रोक्तो] प्राप्तो नार्थसंसर्गगोचरः । मानान्तराविरोधित्वं योग्यतेत्यभिधीयते ॥
नन्वेवं लौकिकं वाक्यं लिङ्गं चेल्लिङ्गवत् ततः । शब्दो गृहीतसंबन्धात् तद्वदस्यापि लिङ्गता ॥
व्युत्पत्तिकाले व्युत्पित्सोर्लिङ्गधीर्नास्त्यसंशयात् । यथाव्युत्पत्तिशब्दास्तु बोधका इति चेदतः ॥
स्वत एवार्थबोधः स्यादिति नैवास्य लिङ्गता ॥ इत्यादि ।

भगवद्यामुनमुनिभिस्तु **आगमप्रामाण्ये** वक्तृज्ञानानुमानं दूषितम् । निगमितं च—

*तस्मादस्ति नदीतीरे फलमित्येवमादिषु । या सिद्धविषया बुद्धिः सा शाब्दी नानुमानिकी ॥ इति ।

अयमेव पक्षोऽनुसृतो **वरदविष्णुमिश्रैः** । **तत्त्वरत्नाकरे**ऽप्यागमप्रामाण्यग्रन्थोपादानपूर्वकं प्रपञ्चितमेतत् ॥

अपौरुषेयं तु सर्वमन्वितार्थमेव । किंतु *आदित्यो यूपः इत्यादिषूपचारतो निर्वाहः । आकाङ्क्षासत्तियोग्यतावन्ति हि पदान्यन्वितमभिदधति, अन्वये वा विश्राम्यन्ति । आदित्ययूपपदयोः प्रत्यक्षसिद्धस्वार्थभेदयोरयोग्यतया मुख्यवृत्तिपरित्यागः ॥

वृत्तिः ॥ वृत्तिर्द्विधा—अभिधोपचारभेदात् । व्युत्पत्तिसिद्धार्थ एव वृत्तिरभिधा । यथा सिंहशब्दस्य **मृगेन्द्रे** । सा जातिगुणादिविषयभेदात् योगरूढितत्समुच्चयभेदाच्च बहुविधा । मुख्यार्थबाधे सति तदासन्ने वृत्तिरुपचारः । **आसत्तिश्च** द्विविधा—मुख्यार्थसंबन्धस्तद्गुणसंबन्धश्चेति । तत्र पूर्वेण प्रवृत्तिर्**लक्षणा**, यथा—गङ्गायां घोषः प्रतिवसतीत्यत्र गङ्गाशब्दस्य प्रवाहविशेषरूपवाच्यसंबन्धिनि तीरे । एवं **लक्षितलक्षणा** ग्राह्या । द्वितीयेन प्रवृत्ति**र्गौणी** । यथा सिंहो देवदत्त इत्यत्र सिंहशब्दस्य शौर्यादिगुणयोगिनि देवदत्ते । **तत्त्वरत्नाकरे** त्वेवमुक्तम्—

*अभिधानाभिधेयत्वमतः शब्दार्थयोः स्थितम् । संबन्धोऽत्राभिधा द्वेधा बोध्या मुख्यजघन्यतः ॥

अभिधार्थावगत्यात्मा शब्दं व्यापारयिष्यतः । शब्दशक्तिनिमित्ता सा स्वार्थे मुख्याऽभिधीयते ॥
स्वार्थाभिधानद्वारा स्याज्जघन्यार्थान्तरे मता ॥ इति ।

तद्विस्तरस्तत्रैव द्रष्टव्यः । न च गौणलाक्षणिकप्रयोगयोरवाच्यविषयत्वादवाच्यत्वम् । संबन्धसादृश्यमूलमात्रप्रवृत्ते-रप्यनादित्वात् । तत एव विवक्षितस्थले यथौचित्यं प्रयोगोपपत्तेः ।

अन्विताभिधानवादः ॥ एताः सर्वा अपि वृत्तयः अन्विताभिधानवृत्त्यन्तर्भूताः । पृथक् पदानां स्मारकत्व-मेव । अभिहितान्वये हि पदानां पदार्थे पदार्थानां वाक्यार्थे पदानां च तत्रेति शक्तित्रयकल्पनागौरवं स्यात्, वाक्यार्थे-स्याशाब्दत्वप्रसङ्गो वा । पदार्थे लक्षणसमाप्तेः प्रमाणप्रसङ्गश्च । नचान्विताभिधानेऽन्योन्याश्रयणम्, मिथः स्मरणमात्रोप-जीवनात् । यथाऽऽहुः—

* पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम् । न्यायसंपादितव्यक्ति पश्चाद्वाक्यार्थबोधकम् ॥ इति ।

नापि पौनरुक्त्यादिदोषः ; तत्तदंशप्रतिनियतशक्तित्वात् । नापि वाक्यभेदः, एकप्रधानतया स्वार्थाभिधानात् । * पदार्थ एव वाक्यार्थः संसृष्टो ह्यभिधीयते । इत्युक्तम् । तथा * नानाशब्दादिभेदात् इत्यधिकरणे, * यद्यपि वेद, उपासीत इत्यादयः शब्दाः प्रत्ययावृत्त्यभिधायिनः, प्रत्ययाश्च ब्रह्मैकविषयाः ; तथाऽपि तत्तत्प्रकरणोदितजगदेककारणत्वापहत-पाप्मत्वादिविशेषणविशिष्टब्रह्मविषयप्रत्ययावृत्त्यवबोधिनः प्रत्ययावृत्तिरूपा विद्या भिन्दन्ति इति । **वेदार्थसंग्रहे**ऽपि—शोधकेष्वपि * सत्यं ज्ञानमनन्तं ब्रह्म, आनन्दो ब्रह्म इत्यादिषु सामानाधिकरण्यव्युत्पत्तिसिद्धानेकगुणविशिष्टैकार्था-भिधानमविरुद्धमिति सर्वविशिष्टं ब्रह्मैवाभिधीयते इति । अत्रैवापूर्वभङ्गे * समभिव्याहृतपदान्तरवाच्यान्वययोग्यमेवेतर-पदप्रतिपाद्यमित्यन्विताभिधायिपदसङ्घातरूपवाक्यश्रवणसमनन्तरमेव प्रतीयते । तच्च स्वर्गसाधनत्वरूपम् । अतः क्रिया-वदनन्यार्थता विरोधादेव परित्यक्ता इति । एषां स्वारस्यमन्विताभिधाने । न चात्र पराभ्युपगमेनोक्तमिति ज्ञापकमस्ति । **वरदविष्णुमिश्रै**रपि * सत्यज्ञानादिपदानामखण्डैकरसार्थत्वे अन्विताभिधानानुपपत्तेश्च इत्यादिषु बहुषु प्रदेशेषु अन्विताभिधानमेव मायावादिनं प्रत्युक्तम् । उक्तं **चागमप्रामाण्ये**—

* अन्यान्विताभिधानेऽपि व्यवहारोपपत्तितः । अवश्याश्रयणीयेऽयमन्विताथाभिधायिता ॥ इत्यारभ्य,

* तस्मादाकाङ्क्षितासन्नयोग्यार्थान्तरसङ्गते । स्वार्थे पदानां व्युत्पत्तिरास्थेया सर्ववादिभिः ॥ इति ।

तत्त्वरत्नाकरेऽपि, * अवश्याश्रयणीयेयमन्विताथाभिधायिता । इत्याहु**र्यामुनाचार्याः** पदैरेवान्विताभिधाम् ॥ इत्यारभ्य प्रपञ्चेनोपपाद्योपसंहृतम्—

* षड्भिः प्रतीतिप्रमुखोपपत्तिभिर्निर्धूतचोद्याभिरिहान्विताभिधा ।
सिद्धा पदैर्नाभिहितान्वयस्थितिर्विपर्ययादित्यखिलं समञ्जसम् ॥ इति ।

प्रज्ञापरित्राणन्यायसुदर्शनयोश्च बहुश उक्तम्—

* अन्वितार्थाभिधायित्वं शब्दशक्तिनिबन्धनम् । व्युत्पत्त्यवगतं पुंधीदोषतोऽस्य विपर्ययः ॥ इत्यादिना ॥

अभिहितान्वयवादः ॥ नन्वभिहितान्वयद्योतकान्यपि वाक्यानि विद्यन्ते । **वेदार्थसंग्रहे** तावत् * एवं बोध-कानां पदसङ्घातानां संसर्गविशेषबोधनेन वाक्यशब्दाभिधेयानामुच्चारणक्रमो यत्र पुरुषबुद्धिपूर्वकः इत्याद्युक्तम् । तथा तत्रैव * प्रकृतिप्रत्ययरूपेण पदस्यैवानेकविशेषणगर्भत्वात्, अनेकपदार्थसंसर्गबोधकत्वाच्च वाक्यस्य इति । **भाष्ये**ऽपि

* शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यम्, पदवाक्यरूपेण प्रवृत्तेः। प्रकृतिप्रत्यययोगेन हि पदत्वम्; प्रकृतिप्रत्यययोरर्थभेदेन पदस्यैव विशिष्टार्थप्रतिपादनमवर्जनीयम्। पदभेदश्चार्थभेदनिबन्धनः। पदसङ्घातरूपस्य वाक्यस्यानेकपदार्थसंसर्गविशेषाभिधायित्वेन इत्याद्युक्तम्। एवं व्युत्पत्तिनिरूपणे **वेदार्थसंग्रहे** * सिद्धवस्तुषु शब्दस्य बोधकत्वशक्तिग्रहणमत्यन्तसुकरम् इत्युपक्रम्य, * अपवरके दण्डः स्थितः इति वाक्ये यादृच्छिकव्युत्पत्तिप्रकारमुपपाद्य, * तथा बालः तातोऽयम्, अम्बैषा इत्यादिना बुद्धिपूर्वव्युत्पादनेन तत्तत्पदानां तत्तत्पदार्थेष्वेव बोधकत्वशक्तिग्रहणमुपपाद्य, पुनरपि * अस्य शब्दस्यायमर्थ इति पूर्ववृद्धैः शिक्षितः इत्यादि चोक्त्वा, * एवमेव सर्वपदानां स्वार्थाभिधायित्वं सङ्घातविशेषाणां च यथावस्थितसंसर्गविशेषवाचित्वं च जानाति इत्याद्युक्तम्। **भाष्ये**ऽपि प्रथमसूत्रपूर्वपक्षनिराकरणे— * एवं किल लौकिकाः शब्दार्थसंबन्धमवधारयन्ति; मातापितृप्रभृतिभिः अम्बातातमातुलादीन् इत्यादिना पदव्युत्पत्तिः पूर्वमुपपादिता। तत्र च * तेषुतेष्वर्थेषु तेषां शब्दानां प्रयोगो बोधकत्वनिबन्धनः इति निश्चिन्वन्ति इत्याद्युक्तम्। पुनश्च * व्युत्पन्नेतरशब्देष्वस्य शब्दस्यायमर्थ इति पूर्ववृद्धैः शिक्षिताः इत्यादि। यदि नामान्विताभिधानमभिमतम्, तदा कथमिव पदमात्रे व्युत्पत्तिः स्यात्? यदि च सा स्यात्, कथमन्वितमभिधेयम्? व्युत्पत्तिवैपरीत्यप्रसङ्गात्। तस्मान्नान्विताभिधानमेव सिद्धान्त इति निर्णेतुं शक्यम्—इति केचित्॥

अन्ये तु * बोधकानाम् इत्यादिवाक्यमन्विते संसर्गविशेषसिद्धेरुपपद्यते। पदवाक्यभेदाभिधानमपि तत्तद्विशेषवैशिष्ट्यप्रदर्शनमात्रार्थम्, पराभ्युपगमद्योतनार्थं वा। प्रत्येकपदव्युत्पत्त्यभिधानमप्यन्वितार्थबोधनोपयुक्तासाधारणद्वारप्रकाशनमात्रम्। पदार्थं स्मारयित्वैव हि पदानि वाक्यार्थं बोधयन्तीत्युक्तम्। स्मृतेश्च स्वानुभूतिमूलत्वान्न शक्त्यन्तरक्लृप्तिः। व्याख्यातं च भाष्यादिकमन्वितपरतया विवरणे **श्रीराममिश्रैः**। तथा **षडर्थसंक्षेपे**ऽपि—* शब्दश्च स्वतःशक्यमन्विततया बोधयति, असंभवेऽर्थान्तरम्, इति हि व्युत्पत्तिः इत्याद्युक्तम्। अतोऽन्विताभिधानं सिद्धान्तः इति। एवमन्विताभिधानसामर्थ्याद्विशिष्टप्रतिपत्त्यन्यथानुपपत्तेश्च पदानामपि विशिष्टार्थाभिधायित्वं सिद्धम्। अत एव विशिष्टार्थाभिधायित्वेऽपि विशेषणमात्रे शक्तिः इत्यपि निरस्तम्; अभिधायित्वातिरिक्तशक्त्यन्तराभावात्। अपर्यवसानवचनमपि विशिष्टबोधनशक्तस्य विशेषणमात्रे स्थातुमशक्तत्वात्। विशिष्टानुप्रविष्टं हि विशेषणं परोपरञ्जकवेषमेवेति तादृगाकारो विशेष्यग्रहणमन्तरेण दुर्ग्रहः। तावता च तदर्थं विशेष्यग्रहणमिति व्यर्थं वचः। यथाप्रतीति व्यवस्थापनस्यैव युक्तत्वात्। किंच—

गवादिशब्दाभिहितगोत्वाद्यर्थस्वभावतः। व्यक्तिधीर्यदि तद्वत्स्यात् निष्कर्षकपदेष्वपि॥
गवादिशब्दा जात्यादीन् परतन्त्रान् प्रचक्षते। तेनाश्रयप्रतीतिश्चेत् तन्नः सिद्धं समीहितम्॥
परं कथमविज्ञाप्य पारतन्त्र्यस्य बोधनम्। विज्ञाप्य यदि शब्दस्य तत्र शक्तिर्न किं भवेत्॥
परस्य परतन्त्रेण तथा बुद्धेन बोधनम्। तद्बुद्ध्या परतन्त्रस्य बोधनेऽन्योन्यसंश्रयः॥
परधीनिरपेक्षं चेत् पारतन्त्र्यं प्रतीयते। न तेन परबुद्धिः स्यान्निष्कृष्टप्रतिपत्तिवत्॥
पारतन्त्र्यं स्वरूपं चेत् तुल्यं निष्कर्षकेऽपि तत्। अधिकं धर्मिनिष्ठत्वादन्यन्नोपलभामहे॥
पदान्तरपरामर्शनिरपेक्षप्रतीतिके। निरूढलक्षणावादाः पर्यायावृत्तिगोचराः॥
व्यक्तेर्गौरित्यनिष्कर्षान्निष्कर्षे त्वाद्यपेक्षणात्। निष्कर्षकेष्वदृष्टेश्च न जात्या व्यक्तिलक्षणा॥

आकृतावेव यः शक्तिं शब्दानामभिमन्यते । सत्तायामेव किं तेन सर्वेषां नाभ्युपेयते ॥
अतो गवादिशब्देभ्यो विशिष्टविषया मतिः । शब्दशक्तिप्रसूतेति बलादभ्युपगम्यताम् ॥

यत्तु * न लोकव्युत्पत्तिहानिः, तत्रैव शक्तेः इति **षडर्थसंक्षेपे श्रीराममिश्रै**रुक्तम्, तदपि तत्र शक्त्यभावप्रतिक्षेपपरम् । असमाप्तधीस्तु वेदान्ताश्रुतेर्भ्रमः आपातव्युत्पत्त्या श्रुतेस्तत्पूर्तिरित्यनन्तरमभिधानात् । यच्चात्म**सिद्धौ** * यथा गवादिपदशक्तिरेकबुद्धिसिद्धेऽपि सामान्यविशेषात्मके वस्तुनि सामान्यांशेन संबध्यते इति, तदपि पराभ्युपगतोदाहरणमन्यार्थम् ; यथेति परसंप्रतिपन्ननिदर्शनात् ।

गुणवाचिन्यपि पदे जातिशब्दोक्तनीतितः । अपृथक्सिद्धवाचित्वान्न युक्ता गुणिलक्षणा ॥
स्वरलिङ्गविशेषोत्थमन्त्रलोपे न संस्क्रिया । विशिष्टवाचकत्वं तु तदायत्तं न मन्महे ॥

अतो निष्कर्षकशब्दातिरिक्तानामपृथक्सिद्धविशेषणवाचिनां विशेष्यपर्यवसानव्युत्पत्तेः शरीरवाचिनां देवादिशब्दानामपि यथाप्रयोगं शरीरिपर्यवसानं सिद्धम् । अत एव चात्मपृथिव्यादिशब्दानामीश्वरपर्यन्तता । तेन *सर्वं खल्विदं ब्रह्म, *ज्योतींषि विष्णुः, *अयमात्मा ब्रह्म, *तत्त्वमसि इत्यादिसामानाधिकरण्यं तत्तत्प्रकारकब्रह्मपरम् । नामरूपव्याकरणं च तदनुप्रवेशात् । अत एव च तस्य सर्वशब्दवाच्यत्वमपि श्रूयते ; तदेव च व्यज्यते *तदनुप्रविश्य, सच्च त्यच्चाभवत् इति । स्मर्यते च—*सर्वं समाप्नोषि ततोऽसि सर्वः इति । सूत्रितं च—*चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् इति । उक्तं च **वरदविष्णुमिश्रैः**—*स्वर्गकामशब्देन काम्यमानस्वर्गः पुरुषोऽभिधीयते । न हीश्वरोऽवाप्तसमस्तकामः स्वर्गं कामयते, तस्यात्यल्पसुखत्वात् । अतो वाच्यैकदेशे जीवे लक्षणा, गङ्गाशब्दस्य तीर इवेति । यद्वा स्वर्गकामादिशब्दानामपि जीवादिमात्रेऽपि मुख्यत्वमेव, प्रवृत्तिनिमित्तापरित्यागात् । अत एव हि भाक्तपदस्य भक्त्या व्यपदेशार्थत्वमपि **भाष्यकारै**रुक्तम् । विशिष्टवेषस्य शक्तिविषयत्वात् तत्त्यागे कथं न लक्षणेति चेत्, अपरित्यक्तप्रवृत्तिनिमित्तस्य व्युत्पत्त्यनुप्रविष्टमात्रबोधनं मुख्यता, तदभावकृत उपचार इति व्यवस्थानात् ॥

तत्त्वमसिवाक्यार्थः ॥ ननु *तत्त्वमसि इत्यत्र त्वमिति श्वेतकेतुमात्रनिर्देशे तदसीति सामानाधिकरण्यायोगः । श्वेतकेतुशरीरकेश्वरनिर्देशे तदाभिमुख्येनोपदेशायोगः । तदुद्देशेन त्वमर्थविधानं चासिशब्दानन्वयादिना दूरनिरस्तम् । प्राप्तार्थतया निगमनरूपत्वेऽपि विशेषणविशेष्यभेदो निष्कर्षणीयः । एवम् *अहं ब्रह्मास्मि इत्यादिव्यपदेशोऽपि दुर्निर्वहः । तथा *अनेन जीवेनात्माना इत्यत्राप्यात्मशब्देन जीवात्माद्यभिधानं **भाष्यकार**वचनविरुद्धम्, जीवेन मयेत्यादिव्यपदेशात् । परमात्माभिधाने तु तृतीयानुपपत्तिः, *व्याकरवाणि इत्यभिहितत्वात् । क्रियाभेदेऽपि क्त्वादेरुत्तरक्रियैकरस्यात् कर्त्रन्तरायुक्तिः, समानकर्तृकत्वविरोधात् । करणत्वविवक्षया कर्तरि तृतीयायां मुख्यत्वहानिः । अतश्चारेणानुप्रविश्य परबलं संकलय्यानीतिवज्जीवस्यैव प्रविशतिकर्तृत्वम् ; परस्तु व्याकरणमात्रकर्ता । तावता तु शब्दानां न तत्पर्यन्तत्वसिद्धिः इति । अत्रोच्यते—संबुद्धिस्तावदत्र आत्मविद्योपदेशेन श्वेतकेतुमात्रपर्यवसितेति नासंबोध्यसंबोधनम् । वचनव्यक्तिश्च तदसीत्येव । तत्र कार्यकारणभावेन, शरीरात्मभावेन वा सामानाधिकरण्यनिर्वाहः । उभयत्र त्वंशब्दस्यापि तच्छब्दाभिहितद्रव्यपर्यवसानं सिद्धम् ॥

धर्मान्तरविशेष्यस्य धर्मान्तरविशेष्यतः । स्वस्मादभेदस्तादात्म्यं स्यादुपादानदेहिनोः ॥

अतस्त्वच्छरीरकं ब्रह्मेति विवक्षायां सत्यां त्वं तदिति निर्देशमात्रमुपपन्नम् । मध्यमपुरुषश्च त्वंशब्दप्रयोगनिबन्धनः,

* युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः इति विधानात्। अतः सोऽपि त्वंशब्दपर्यवसानविषयपर्यवसितः। यद्वा तत् त्वमसीत्येवान्वयोऽस्तु। न चोद्देश्यानुगुणा तिङ्विभक्तिरिति नियमः, उपादेयानुगुणलिङ्गवचनादिनिर्देशवदत्रापि विरोधाभावात्। प्रयुञ्जते च पतञ्जलिप्रभृतय उपादेयानुगुणामपि तिङ्विभक्तिम् * स पुनरावृत्तः सुवर्णपिण्डः खदिराङ्गारसवर्णे कुण्डले भवतः इत्यादिषु। एतेन * अहं ब्रह्मास्मि इत्यादिकमपि निर्व्यूढम्। * जीवेनात्माना इत्यत्राप्यनेनैव न्यायेन स्वशब्दपर्यायेणात्मशब्देन जीवशब्दस्य सामानाधिकरण्यं तावत् सिद्धम्। तृतीयानुपपत्तिस्तु स्वरूपतादात्म्यपक्षे पृथक्त्वपक्षे च समाना। अथांशभेदादिना विभज्य करणत्वादिविवक्षया कथंचिन्निर्वाहः, तथा विशिष्टाकारादिभेदविवक्षया विभज्यात्रापि निर्वाहमनुमन्येथाः ॥

अतः श्रुत्यादिवाक्येषु विरुद्धार्थानुबन्धिनः। सामानाधिकरण्यस्य न स्वरूपैक्यनिष्ठता ॥
कार्यत्वादपृथक्सिद्धेरावेशादनुकारतः। अस्तिसृष्ट्युपकारादेः सामानाधिकरण्यधीः ॥

न च त्वद्दृष्टः पुरुषः स्थाणुरितिवत् * पुरुष एवेदं सर्वम्, * तत्त्वमसि इत्यादौ बाधार्थं सामानाधिकरण्यमिति वाच्यम्, मुख्यवृत्तिसंभवे तदयोगात्, प्रपञ्चसत्यत्वादेश्चाबाधितप्रत्यक्षादिबलसिद्धत्वात्। चिदंशसामानाधिकरण्यं तु न बाधसहम्, त्वयाऽपि तत्सत्यत्वाभ्युपगमात्। स्वरूपैक्यविधाने च विरुद्धधर्मप्रतिरोधात्, तत्परित्यागे पदयोरनतिरिक्तार्थतया पर्यायपदसामानाधिकरण्यप्रसङ्गात्, द्वाराभावेन मुख्यवृत्तिबाधापत्तेः, गत्यन्तरे च संभवति तदयोगात्, स्वरूपमात्रनिर्देशे च पदान्तरवैयर्थ्यात्, स्वरूपभेदस्य च बहुप्रमाणसिद्धत्वात् ॥

सत्यंज्ञानवाक्यार्थः ॥ * सत्यं ज्ञानम् इत्यादिलक्षणवाक्यमपि सत्यत्वादिविशिष्टैकविषयम्, तथैव सामानाधिकरण्यव्युत्पत्तेः। न चात्र विशेषणभेदाद्विशेष्यभेदप्रसङ्गः, विरुद्धविशेषणाभावात्; नहि घटपटादिष्विव विरोधः। यथा च प्रत्यक्षे नीलत्वोत्पलत्वादेरविरोधो दर्शनबलात्, तथाऽत्रापि। न च सत्यत्वज्ञानत्वादेर्वैयधिकरण्यनियमो दृष्टः, येन विरोधः स्यात्। विशेष्यैक्यपरे तु सामानाधिकरण्ये विशेषणानां विशेषणविशेष्ययोश्च मिथो भेदो गुण एव। न च विशेष्यैक्यवद्विशेषणविशेष्यैक्यप्रसक्तिः, विशेषणानामैक्यप्रसक्तिर्वा, लक्षणाविरोधादिदोषात्, अतथाव्युत्पत्तेश्च। नापि विशिष्टे विशिष्टान्तरविधानाद्विशेषणानां मिथः समवायादिदोषः, युगपदनेकविशिष्टैकाभिधानात्। अनूद्य विधानेष्वपि यथाव्युत्पत्ति धर्मिप्रधानत्वाच्च। न च विशेषणं सर्वं विशेषणान्तरासहम्, विरोधिमात्रविरोधित्वात्, अन्यथा प्रत्यक्षविरोधात् साध्यसाधकधर्मादिविशिष्टविषयानुमानाद्यनुदयप्रसङ्गात्, एवंत्वादिदं विशिष्टबोधकं न भवतीत्यादिव्यवहारस्यापि विलोपः स्यात्। नच शब्देन प्रतिपादने तथा, अविशेषात्, प्रत्यक्षादिवच्छब्देनापि यथावस्तु बोधनीयत्वात्। विशेषणमात्रपरत्वं तु नाभ्युपगतमेव, येन विशिष्टैक्यासिद्धिः स्यात्। यस्य तु विशेष्यमात्रपरत्वं तस्य पर्यायतुल्यत्वात् पदान्तरवैयर्थ्यलक्षणभङ्गलक्षणादिदोषः, प्रवृत्तिनिमित्तानां विशेषणानां त्यागात्, विशेष्यमात्रस्य च द्वाररहितस्यालक्ष्यत्वात्। इतरव्यावृत्तीनां तूपलक्षणत्वे स्वरूपत्वे च पदान्तरवैयर्थ्यादिदोषः स एव ॥

एवं तासां विशेषणत्वे पक्षान्तरवद्विशिष्टभेदादिदोषस्त्वदुक्त आपतेत्, न चेन्नान्यत्रापि। त्यक्तप्रवृत्तिनिमित्तस्य तद्विरोधिव्यावृत्त्यभिलाषस्त्वालोकमपहाय तिमिरनिराकरणवाञ्छा। विप्रतिपन्नं वाक्यमखण्डपरम्, समानाधिकरणवाक्यत्वात्, सोऽयं देवदत्तः इति वाक्यवत्, यद्वा लक्षणवाक्यत्वात्, प्रकृष्टप्रकाशश्चन्द्रः इत्यादिवत् इति चेन्न, दृष्टान्तासिद्धेः, तत्तेदन्ताविशिष्टस्यैव देवदत्तस्य सोऽयमिति प्रतीतेः। युगपत् तयोर्व्याघात इति चेन्न, यौगपद्यस्यानभिधानात्,

अनाक्षेपाच्च । युगपत् प्रतिपत्तिस्तु न दोषः, अन्यथा प्रत्यभिज्ञाभङ्गे क्षणभङ्गनैरात्म्यद्रव्यापलापादिवादा विजयेरन् । तथाऽप्यतीतत्ववर्तमानत्वे कथमेकस्येति चेत्, स्वप्रध्वंसकाले हि स्वयमतीतः स्यात्, नचासौ प्रध्वस्तः, वर्तमानत्वोपलम्भात्; अतीतोपाधिविशेषसंबन्धितया हि तत्त्वम्, न त्वतीततया । कथमेकं पूर्वमपरं च? इति चेन्न, प्रतिसंबन्ध्युपाधिभेदेनोभयोपपत्तेः, अन्यथा क्षणस्यापि पूर्वापरमध्यवर्तिनः क्षोदप्रसङ्गात्; न हि तस्य पूर्वस्मादपि पूर्वत्वमेव, उत्तरस्मादप्युत्तरत्वमेव वा। क्षुद्यतां क्षणोऽपीति चेन्न, सर्वापह्नवप्रसङ्गात्, इति । तिष्ठत्वेतत्; द्वितीयोऽपि दृष्टान्तो विशिष्टपर एव, अन्यथा व्यावृत्तप्रतीत्यनुदयप्रसङ्गात्, प्रकृष्टत्वादिविशेषणवैयर्थ्याच्च । एवं [श्रुत्यन्तरादि] श्रुतिबाधोऽप्यनुमानयोर्वक्तव्यः, पर्यायतुल्यत्वादिप्रसङ्गलक्षणप्रतिकूलतर्कश्च । तथा विप्रतिपन्नं वाक्यं विशिष्टपरम्, आकाङ्क्षायुक्तवाक्यत्वात्, व्यधिकरणवाक्यवत्, इति बाधकमनुमानमपि, प्रतिपत्त्यनुरोधात् दृष्टान्तसिद्धेश्चास्य बलीयस्त्वम् । *भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति शाब्दै रेवोक्तम् । तत्र भिन्नप्रवृत्तिनिमित्तानामिति पर्यायव्यावृत्तिः । एकस्मिन्निति व्यधिकरणानां घटः पट इत्याद्यनन्वितानां च व्यवच्छेदार्थम् । शब्दानाम् अर्थे इतिच व्यक्त्यर्थमेव, अर्थे इति विशेष्यस्य प्रधानतया वाच्यत्वसूचनार्थं वा । तेन व्यधिकरणवाक्येष्वेकप्रधानार्थे वृत्तिसंभवेऽपि तस्य विशेष्यत्वाभावाद्व्यवच्छेद्यता । विशेष्यबोधनव्यापारो वृत्तिः प्रवृत्तिरिति च सामान्यतो विशेषतश्चात्रोच्यते । प्रकृष्टा हि वृत्तिः प्रवृत्तिः । प्रकर्षश्चात्र विशेष्यविषयतया । तत्र यदुपाधिका विशेष्ये शब्दवृत्तिः, तत् प्रवृत्तिनिमित्तम् । भिन्नविशेषणद्वारेणैकविशेष्याभिधानं सामानाधिकरण्यमित्युक्तं भवति ॥

स्वतःप्रामाण्यम् ॥ ननु अपौरुषेयं सर्वमन्विततार्थमिति प्रतिपादितम्, तन्नोपपद्यते, गुणवद्वक्तृप्रणीतस्यैव वाक्यस्य तथात्वदर्शनादिति चेन्न, स्वतःप्रामाण्यात्, स्वरसतो हि सर्वं ज्ञानमबाधितव्यवहारजनकं दृश्यते । भेदाग्रहादिविशेषोपाधिकं हि क्वचित् बाध्यव्यवहारहेतुत्वम् । ततः स्वाभाविकमपि प्रामाण्यं प्रतिबन्धकेन दोषेण क्वचिदपहुतम्; यथाऽग्नेरौष्ण्यम् । तत्र तदंशापेक्षया प्रामाण्यमेव । गुणास्तु संभावितदोषस्थले दोषनिराकरणौपयिकाः, प्रामाण्यस्य तैर्व्याप्त्यभावात्, नित्यसर्वज्ञवादिनां प्रमाणभूते तज्ज्ञाने व्यभिचारात् । अप्रामाण्यस्य तु दोषाधीनत्वमव्यभिचरितान्वयव्यतिरेकसिद्धम् । अवस्तुनोऽप्रामाण्यस्य कथं हेतुसाध्यत्वमिति चेन्न, संशयत्वविपर्ययत्वादिरूपस्य तस्यावस्तुत्वाभावात्, भावान्तरातिरिक्तस्य चाभावस्यास्माभिरनभ्युपगमात्, अभ्युपगमेऽपि प्रध्वंसस्य मुद्गरादिसाध्यत्वदृष्टेः । तद्वत् प्रमाऽपि सम्यङ्मिथ्याबोधसाधारणादतिरिक्तसहिताज्जायते, कार्यत्वे सति तद्विशेषत्वात्, अप्रमावत्; प्रामाण्यं परतो ज्ञायते, अनभ्यासदशायां सांशयिकत्वात्, अप्रामाण्यवत्, इति चेत्, तत्र प्रथमे कृत्स्नप्रमापक्षीकारे हेतोः स्वमते भागासिद्धिः, ईश्वरप्रमाया नित्यत्वाभ्युपगमात् । अनीश्वरप्रमापक्षीकारे यावदीश्वरसिद्धि व्यर्थं विशेषणम् । ईश्वरानुमानसमनन्तरं प्रयोगः इति चेन्न, तस्य शास्त्रयोन्यधिकरणन्यायेनानुमातुमशक्यत्वात् । तर्हि विशेषणं न प्रयोक्ष्यामहे इति चेन्न, स्वाभिमतेश्वरप्रमयाऽनैकान्त्यात् । अनभ्युपगतेश्वरैः सौगतादिभिरेवं प्रयोगे कः परिहारः इति चेन्न, श्रुतिसिद्धनित्यप्रमासमर्थनेन बाधस्यानैकान्तिकत्वस्य वा वक्तुं शक्यत्वात् । श्रुतिसिद्धनित्यप्रमाव्यवच्छेदेन कार्यत्वविशेषणं सफलं स्यादिति चेत्, तर्हि श्रुत्या तत्सिद्धिः श्रुतिप्रामाण्यनिर्णयमन्तरेण कथं स्यात्? तत्प्रामाण्यं च नित्यनिर्दोषतयाऽभ्युपगम्यते चेत्, कथं तत्र परतःप्रामाण्योत्पत्तिः? वक्तृगुणाधीनं वाक्यानां प्रामाण्यमिति हि वः सिद्धान्तः । निर्दोषतैव गुण इति तदधीनतया तत्र परतःप्रामाण्यमिति चेन्न, प्रतिबन्धकाभावस्य परैः कारणत्वानभ्युपगमात् । अभ्युपगमे च तावन्मात्राधीनत्वेऽपि वेदापौरु-

षेयत्वनित्यत्वादेरविरोधात् ; वेदपौरुषेयत्वादिसिद्ध्यर्थं हि वः परतःप्रामाण्यसमर्थनारम्भः । तदपौरुषेयत्वादिसिद्ध्यर्थमेव चास्माभिः स्वतःप्रामाण्यं प्रतिपाद्यते । अथाप्तोक्ततया वेदप्रामाण्यादीश्वरसिद्धौ तत्प्रमात्व्यवच्छेदाय विशेषणमिती [प्येत]-ष्यते, तदपि न, परतःप्रामाण्ये निर्णीते वेदस्याप्तमूलप्रामाण्यसिद्धिः, तत्सिद्धौ चेश्वरसिद्धिः, तत्प्रमात्व्यवच्छेदाय विशेषणम्, सविशेषणश्चासौ हेतुः परतःप्रामाण्यं साधयेत्, इति चक्रकाश्रयप्रसङ्गात् । ईश्वरानुमानान्यथासिद्धिपरिहाराय [च] परतःप्रामाण्यं **न्यायकुसुमाञ्जलौ** समर्थ्यते । तत्रैव च कार्यत्वविशेषणं प्रयुज्यते । न चासिद्धिव्यवच्छेदाय विशेषणं युक्तम् ; सिद्धत्वे तु परतःप्रामाण्यसमर्थनस्य न तदर्थतेति दुस्तरता । तथाऽपि शब्दप्रामाण्यं वक्तृगुणाधीनमिति चेन्न विशेषकाभावात्, दोषसंभावनास्थले च तदपेक्षणात्, वेदस्य च निर्दोषत्वात् । दोषाभावाधीनत्वे परतःप्रामाण्यं सिद्धमिति चेन्न, तदधीनत्वाभावात्, तस्य विरोधनिवृत्तिमात्ररूपत्वात् । अस्तु वा तदधीनत्वम्, तथाऽपि वेदे तु न दोषः । गुणमन्तरेण दोषाभावो न घटत इति चेत्, अनुष्णाशीतस्पर्शवदुभयनिवृत्तेरपि दर्शनात्, उपपत्तेश्च । भावान्तराभाववादिनो दोषाभावोऽपि गुण एवेति चेन्न, स्वाभावान्तरेण [ापि] तन्निर्वाहात् । न हि तस्यापि शीताभाव उष्ण एव, अनुष्णाशीते तदसिद्धेः । उभयसंग्रहणेन हि शीताभावत्वम् । तद्वदत्रापि सगुणेष्वाप्तवाक्येषु वक्तृगुणरहितेषु वेदवाक्येषु च दोषाभावः समानः ॥

ननु शब्दानां स्वतःप्रामाण्ये बुद्धादिवाक्यमपि स्वतःप्रमाणं स्यात् । न स्यात्, स्वतस्त्वस्योत्सर्गरूपत्वात्, अपोदितादितरत्र व्यवस्थानात् विरोधिविशेषे च तस्याननुप्रवेशात् । उक्तं **चागमप्रामाण्ये**—

* नैव शब्दे स्वतो दोषाः प्रामाण्यपरिपन्थिनः । सन्ति किंतु स्वतस्तस्य प्रमाणत्वमिति स्थितिः ॥

वक्तुराशयदोषेण केषुचित्तदपोद्यते । अङ्गुल्यग्रे [ऽस्ति] हि मातङ्गयूथमित्येवमादिषु ॥ इति ।

किंच, नित्ये हेतुगुणापेक्षा वेदे नास्तीशबुद्धिवत् । हेत्वभावान्न दोषश्चेद्वक्त्रभावादिहापि नः ॥

अकारणं यथा ज्ञानं प्रमात्वमधिगच्छति । अकारणं तथा वाक्यं स्वतः प्रमितिकारणम् ॥

यदि हेतुगुणाभावादप्रामाण्यं प्रसज्यते । तदेश्वरप्रमायामप्यनिवार्यमिदं तव ॥

अथैवं ब्रूषे—कारणगुणदोषयोरभावे तत्प्रयोज्ययोः प्रामाण्याप्रामाण्ययोर्द्वयोरप्यसंभवा [त्कोट्य] द्राश्यन्तरायोगाच्च निःस्वभावत्वं वेद [जन्य] शब्दजन्यज्ञानानां स्यादिति ; इदमपि तुल्यमीश्वरज्ञाने । हेतुनिवृत्तिस्तत्कार्यं प्रामाण्यं निवर्तयेत्, न तु नित्यमिति चेत्, अप्रामाण्यहेतुनिवृत्तिरपि तथैव । अतो विरुद्धस्वभावयोगः उभयपरित्यागान्निःस्वभावतैव वा स्यात् । एवमनीश्वरवादिनां सौगतादीनां शुद्धसंवित्सन्तानादिष्वधिपतिसहकार्यादिकारणतद्गुणादेरसंभवात् स्वारसिकस्वात्मगोचरप्रामाण्यस्य चाभ्युपगमात् समाश्चर्चाः । यद्यपि पूर्वप्रत्ययस्य कारणत्वमिष्टम्, तथाऽपि तस्यापवर्गदशास्थस्य गुणदोषादिरूपसमस्तसंस्कारप्रत्यर्थितया न तज्जन्यस्य गुणहेतुतेति । यच्च, प्रामाण्यं परतो ज्ञायते इति प्रयुक्तम्, तत्र ज्ञानान्तरेण ज्ञानान्तरस्वभाववेदनाभ्युपगमात् सिद्धसाधनता । परत एवेति विवक्षायामीदृशं ज्ञानं प्रमेति लक्षणतः सर्वप्रमासंग्राहिणि ज्ञाने पारमेश्वरे च विज्ञाने तदसंभवः ; नहि ताभ्यां स्वप्रमात्वं न गृहीतम्, लक्षणाव्याप्तिकिंचिज्ज्ञत्वादिप्रसङ्गात् । अतोऽन्यत्र परत एवेति नियम इति चेत्, तदपि न, तद्दृष्टान्तेनैव प्रतिप्रयोक्तुं शक्यत्वात्—विगीतं प्रामाण्यं स्वाधारेण ज्ञायते, प्रामाण्यरूपत्वात्, ईश्वरज्ञानादिप्रामाण्यवत् इति । कथं तर्हि इदं प्रमाणमप्रमाणं वेति संशयावकाशः इति चेन्न, विशेषतो [गृहीतेष्वपि] गृह्यमाणेष्वपि संशयोत्पत्तिदर्शनात् । भवति मुहुः शुक्तिकारजतमोहादन्धीकृतधियः

कलधौतेऽपि तथोपलभ्यमाने यथोपलम्भमिदं रजतमेव वा पूर्ववच्छुक्तिरजतं वेति द्वापरः। तथाऽत्रापि गृह्यमाणेऽपि प्रामाण्ये किमिदं प्रमाणमेव सत् प्रमाणतयोपलभ्यते? उत बाधात् पूर्वभ्रमवदप्रमाणं सत्? इति संशयो युक्तः। तथाऽपि सन्देहसहेन किं स्वतोग्रहणेन? निश्चयस्तु पराधीन एवेति चेत्, किमस्मदपेक्षया ग्रहणमग्रहणं वा नियन्तुं शक्यम्? सिद्धो हि ग्रहणप्रकारः परीक्षकैरनुसरणीयः। सिद्धिरेव स्वतः कथमिति चेत्, इत्थम्—ज्ञानं स्वालम्बनं प्रकाशयत् स्वयमपि ज्ञानान्तरनिरपेक्षं प्रकाशते, इति तावत् सर्ववेदान्तिसम्मतम्। अस्वयंप्रकाशवादेऽपि स्वग्राहिणाऽनुव्यवसायेन प्रकाशमानो व्यवसायस्तावदसंशयमात्मैव दृश्यते॥

स्मृत्यप्रामाण्यवादेऽप्यपूर्वार्थगोचरतया स्मृतिविलक्षणश्चाविपर्ययात्मा चाबाधात्मा च, बाधादेः पूर्वं तत्प्रसङ्गाभावात्। ततश्च यद्विषयतयाऽयं व्यवसायः प्रथमं प्रतिभातः, तद्विषयतयैव परस्सहस्रपरिक्षोदात्पश्चादपि। अतो यत् तद्विषयत्वलक्षणं प्रामाण्यं पश्चात् तेनैव व्यवस्थाप्यते, तदादावेव गृहीतमिति स्वतःप्रामाण्यग्रहः। नन्वेवं संशयत्वादिलक्षणमप्रामाण्यमपि स्वयंप्रकाशेनानुव्यवसायेन वा प्रथममेव ग्रहीतुं शक्यम्; तथा विपर्ययत्वलक्षणम्; न तथा, गृह्यमाणवैपरीत्यस्य स्वेन स्वग्राहिणा वा प्रथममग्रहणात्, तस्मिन्नंशे च वैदिकानामविवादात्, तत्रेममंशमादायैव चान्ततः स्वतःप्रामाण्यसमर्थनप्रवृत्तेः, तत्र दोषाभावादेवादावप्रामाण्यानुत्पत्तेः। तत एव चाप्रामाण्यप्रमित्यसंभवात्, स्वत एव च प्रामामाण्यप्रमितेरबाधाच्चेत्युच्यते, इति॥

॥ इति न्यायपरिशुद्धौ शब्दाध्याये प्रथममाह्निकम्॥

॥ अथ द्वितीयमाह्निकम्॥

वेदापौरुषेयत्वम्॥ अथ पौरुषेयापौरुषेयविभाग एवानुपपन्नः, सर्वस्यापि वाक्यस्य पौरुषेयत्वे वाक्यत्वादिलिङ्गसद्भावात्—सर्वज्ञप्रणीता वेदाः, वेदत्वात्, इति व्यतिरेकिसंभवात्; * मन्त्रकृद्भ्यः, * तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः, * ऋचः सामानि जज्ञिरे। छन्दाँसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत इत्यादिश्रवणात्, * प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते। इत्यादिस्मृतेश्च; तथा * अधिकृत्य कृते ग्रन्थे इति पाणिनिस्मृतिसिद्धार्थकाठककालापकादिसमाख्याविशेषयोगात्; कादाचित्ककथाविशेषसंदृष्टेः, अनित्ययोगात्, तत्पूर्वोत्तरकालयोस्तदनन्वयापत्तेः, शब्दस्य [च] भूतगुणस्य नश्वरत्वादिति चेत्, तन्न, वाक्यत्वानुमानस्य विपक्षे बाधकाभावात्। अकारणकार्योत्पत्तिप्रसङ्ग इति चेन्न, कार्यत्वस्यैव साध्यमानत्वात्, अकारणत्वमात्रस्य [प्रसज्य]पाद्यमानस्येष्टत्वात्। क्रमविशेषेणानुच्चार्यमाणानां वर्णानां कथं पदत्वं वाक्यत्वं वेति चेन्न, परकृतप्रबन्धपाठवदकर्तृभिरुच्चारणेऽपि तत्सिद्धेः। आदिममुच्चारणं कर्त्रभावे कथं स्यादिति चेन्न, आदिमत्वस्यैवासिद्धेः, दर्शनानुगुण्येन अद्यत्ववदेव सर्वदा परतन्त्रोच्चारणस्यैवाभ्युपगन्तुमुचितत्वात्, ततश्च सर्वदोच्चारयितृपुरुषसापेक्षत्वेऽपि पूर्वापूर्वाधीतप्रकारस्यानुसरणादनादित्वसिद्धेः। अपौरुषेयत्वे घुणक्षताक्षरवद्बोधकत्वेऽप्यभिप्रायविरहादर्थपरत्वं न स्यादिति चेन्न, प्रतिपन्ने निर्बाधे चार्थे प्रधाने बोधकत्वस्यैव तात्पर्यरूपत्वात्, प्राधान्यादेर्लौकिकवाक्यवदाख्यातादिस्वभावादेव सिद्धेः, अस्मदिष्टे च सेश्वरमीमांसापक्षे नित्येश्वराभिप्रायसंभवात्। [ईश्वरः] स्वयमेव ह्याह—* श्रुतिः स्मृतिर्ममैवाज्ञा इति। तथा **भाष्यम्**—* स्वशासनावबोधि शास्त्रमिति नित्यं श्रुत्यैव नियुङ्क्ते परः इति।

नित्याऽपि सा तदाज्ञा। गीतादिरपि श्रुत्यर्थोपदेशरूपतया प्रवर्तते। साक्षात्तु श्रुतिस्तदादेशः। तदनुविधानाच्च स्मृतिरपि। अज्ञातकर्तृकत्वे गन्धर्वभाषितादिवदाप्तकर्तृकत्वनिश्चयाभावादप्रामाण्यशङ्का स्यादिति चेन्न, दोषाभावनिश्चयादेव तन्निवृत्तेः। अनाप्तकर्तृकत्वशङ्कायां कथं दोषाभावनिश्चयः? इति चेन्न, महाजनपरिग्रहादेवानाप्तकर्तृकत्वशङ्कोन्मूलनात्। बाह्यागमपरिग्रहवत् किं न स्यात्? इति चेन्न, बहुजनपरिग्रहादिमात्रस्य महाजनपरिग्रहत्वेनाविवक्षितत्वात्, तत्परिग्रहविशेषस्यैव विवक्षितत्वाच्च। तयोः को वा विशेषः? इति चेन्न, हेतुदर्शनादर्शनाभ्यां विशेषात्। अनन्यगतिकैः स्वैररसिकैः सुखजीविकार्थिभिः कुहकवञ्चितैर्वा तत्परिग्रहः, इह तु न तथा, तद्वैपरीत्यस्य सुप्रसिद्धत्वात्, इति ॥

अपि च बाह्यागमप्रतिबन्दिः किं वेदप्रामाण्यमाप्तप्रामाण्यनिबन्धनमितीच्छद्भिर्वैशेषिकादिभिरुच्यते? उत सौगताद्यागमप्रामाण्यमिच्छद्भिः? अथवा परित्यक्ताशेषपारलौकिकागमैर्लौकायतिकैः? इति। नाद्यः, ईश्वरकृतत्वेऽपि वेदस्यैवंविधपरिग्रहविशेषमन्तरेणाद्यतनैर्बाह्यागमेभ्यो विवेकस्य [दुश्शक] अशक्यत्वात्, सर्वज्ञप्रणीतत्वाद्यभिमानस्य तदनुमानप्रक्रियायाश्च सर्वत्र दुर्वारत्वात्। न द्वितीयः, अभ्युपगतप्रामाण्ये स्वागमेऽपि प्रसङ्गात्। दृष्टफलसंवादस्य विसंवादान्यथासिद्धेश्च सर्वत्र समचर्चत्वात्, अस्मदुक्तस्य निरुपाधिकपरिग्रहस्य स्वमते दुर्वचत्वात्। अत एव न तृतीयः, प्रामाण्यस्य परोक्षप्रामाण्यस्य वाक्यप्रामाण्यस्य च स्थापितत्वेन वैदिकवाक्ये ह्यौत्सर्गिके प्रामाण्ये प्राप्ते निरुपाधिकप्रेक्षावदनन्तपुरुषपरिग्रहादेवानाप्तकर्तृकत्वशङ्कोन्मूलने च वक्तृदोषशङ्कानुत्थानात्, वचसि च स्वतः काचादिवद्दोषादर्शनात्। आप्तकर्तृकत्वाभावेऽप्यौत्सर्गिकं प्रामाण्यमनपोदितमिति। अत एव हि प्रेक्षावन्तश्चोदितेषु बहुवित्तव्ययायाससाध्येषु निश्शङ्कं प्रवर्तन्ते, प्रतिषिद्धेषु च सुखतरेष्वपि विषसंसृष्टान्नभोजनादिवन्निवर्तन्ते। प्रयोगश्च—पारलौकिकी महाजनप्रवृत्तिः सफला, प्रेक्षावत्प्रवृत्तित्वात्, कृष्यादिप्रवृत्तिवत्; न ह्यनन्तैः प्रेक्षावद्भिरविसंवादेनाफलमनुष्ठीयते इति शङ्कितुं शक्यम्। दुःखरूपफलदर्शनेन सिद्धसाधनतेति चेन्न, अनभिप्रेतोपालम्भात्, प्रवृत्तिदुःखादधिकपुरुषार्थपर्यवसानस्य सिषाधयिषितत्वात्। तथाऽपि लाभपूजाख्यातिरूपदृष्टप्रयोजनेनैव सार्थतेति चेत्, तदप्यसत्, अतदुद्देशेन तेषां प्रवृत्तिदर्शनात्, तदुद्देशेन प्रवृत्तेश्च डाम्भिकत्वेन शास्त्रैस्तन्निष्ठैश्च विगर्हणात्। ये च तदुद्देशेन प्रवर्तन्ते, तेऽप्यतदुद्देशेन प्रवृत्तानामनुकुर्वाणा एव ख्यात्यादि प्राप्नुवन्ति, अन्यथा ख्यातिलाभपूजादेर्निर्निमित्तत्वप्रसङ्गात्। न हि यत्किंचिदनेन कृतमिति मत्वा कश्चित् कृच्छ्रसंपादितान् धनादीन् ददाति, पूजयति, गुणान्वा आरोप्य स्तौति; अपि तु कुतश्चित् प्रमाणात् सिद्धं प्रशस्ताचरणमभिमत्यैव। समरसामर्थ्यादिमूललाभपूजादिकमप्यन्ततोऽर्थशास्त्रादिमूलप्रशस्तप्रवृत्तिप्रसूतम्। अतः सन्मर्यादाप्रवृत्तान् दानमानादिभिरभ्यर्चयन्तोऽप्यदृष्टबुद्ध्यैव प्रवर्तन्ते। जनरञ्जनार्थमेव दानादि, जनो दातरि मानयितरि च रज्यते, * जनानुरागप्रभवाश्च संपदः इति प्रसिद्धेः, इति चेन्न, प्रत्युपकाराद्यनर्हप्रव्रजिततपस्विजडान्धबधिरदीनानाथादिषु दानमानादिभिरनुरञ्जितेष्वपि तन्मूलदृष्टसंपत्प्रसङ्गाभावात्; अत एव हि नीतिनिर्मसचिवेष्वेव तदर्थदानादिव्यवस्थापनम्। प्रतारणपटुभिर्वैदिकैः प्रतारितास्तान् पूजयन्तीति चेन्न; किं ते स्वात्मानमपि प्रतारयन्ति? ये नाम समस्तभोगविमुखा यावज्जीवमात्मानं परिक्लेशयन्ति; यैश्च पटुप्रज्ञाः सर्वे लोकाः प्रतारिताः, ते कथं लोकोत्तरप्रज्ञेन त्वया प्रतारका इत्युन्नीताः। अन्धपरम्पराकल्पस्तर्ह्ययमनुष्ठानप्रवाहः इति चेन्न, प्रमाणस्वरूपफलयोरबाधस्य च प्रत्यक्ष[सिद्ध]त्वात् धर्मबुद्ध्यैव च निरुपाधिकपरिग्रहस्य त्वदुक्त्यैव सिद्धेः। अनादिनिधने अस्मिन्नाम्नायमूले अनुष्ठाये प्रवहति प्रक्रियान्तरमाश्रित्य प्रतारकैरीश्वरैरर्वाचीनैश्च प्रतिच्छन्दप्रवर्तना श्रुतिस्मृतिसिद्धा युक्तिमती चेत्येषा दिक् ॥

वेदानित्यत्वानुमानानां प्रतिप्रयोगाश्च—पूर्वापरकल्पाः एतद्वेदसन्दर्भपाठवन्तः, कल्पत्वात्, अद्यतनकल्पवत्। ऐश्वरं वेदप्रवर्तनमप्रच्युतप्राचीनसन्दर्भम्, आप्तकर्तृकवेदप्रवर्तनरूपत्वात्, अद्यतननिपुणोपाध्यायवेदप्रवर्तनवत्। न चाश्रयाद्यसिद्धिः, पौरुषेयत्वेऽपि प्रामाण्यमिच्छतस्तत एव तत्सिद्धेः। अप्रामाण्यमिच्छतोऽपि महाजनपरिग्रहान्यथानुपपत्त्यैव प्रामाण्यं प्रसाध्य तत एव तत्साधनात्। न चास्ति वेदप्रवर्तनस्य सारस्वतपाठेनानैकान्त्यम्, तथैव तत्प्रवाहस्य तत्तच्छाखाप्रणयनवदनादित्वात्, मन्त्रब्राह्मणादिवाक्यस्वरूपवैयाकुलीविरहाच्चेति। एवं विपक्षे बाधकाभावादेव केवलव्यतिरेक्यपि निरस्तः, अनुमानाध्याये तस्य सामान्यतो दूषितत्वाच्च। त्वन्मतेऽप्यायुर्वेदादिसपक्षसद्भावेन तस्यासाधारण्यम्; नहि तेभ्यो व्यावृत्तमपौरुषेयत्वादिलक्षणं वेदत्वं त्वयाऽभ्युपगम्यते। वेदशब्दप्रयोगविषयतामात्रेण तेषामपि पक्षीकारे स्वेच्छागृहीतरूपस्येश्वरस्य तत्तदवतारसंव्यवहारा वेदव्यतिरिक्ताः सन्ति सपक्षाः। न च ते त्वयाऽपि नेष्यन्ते, वेदतया वा स्वीक्रियन्ते, गीतादिषु भगवदुक्त्यंशानां **श्रीविष्णुस्मृति**प्रभृतीनां च वेदत्वानभ्युपगमात्। धर्मशास्त्रतयैव हि वैष्णवस्मृत्यादिप्रसिद्धिः। अवक्तृकसन्दर्भा वेदाः, वेदत्वात्; यः सकर्तृकसन्दर्भः, नासौ वेदः, इति प्रतिहेतुश्च सिद्धः। अप्रसिद्धविशेषणत्वादिचोद्यं त्विह न त्वया स्मर्तव्यम्। सन्दर्भः कथमवक्तृकः स्यादिति चेन्न, वर्णक्रमविशेषनियममात्रस्य सन्दर्भशब्देन ग्रहणात्, तस्य च प्रागुक्तनयेन यथापूर्वप्रवर्तनमात्रेणापि व्यवस्थानात्। माभूदवीतहेतुः। वीतस्तु स्यात्। विगीतं वाक्यं सर्वज्ञप्रणीतम्, प्रमाणत्वे सत्यलौकिकार्थविषयवाक्यत्वात्, *न त्वेवाहं जातु नासम् इत्यादिवाक्यवत्, इति चेन्न, वेदार्थविषयैः कल्पसूत्रकारादिवाक्यैरस्मदादिवाक्यैरेव वाऽनैकान्त्यात्। अजीवकर्तृकत्वे सतीति विशेषयिष्यामः इति चेन्न, तथाऽपि यथापूर्वप्रणयनमात्रेणापि तत्प्रणीतत्वसिद्धौ सिद्धसाधनात्। यथापूर्वमेव हि विश्वमीश्वरः सृजति; यथा अधीमहे—*सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् इति। एवं तर्हि तुल्ययोगक्षेमतया वेदवज्जगतोऽप्यकर्तृकत्वं प्रसक्तमिति चेन्न, यथापूर्वं घटादिनिर्माणे कुलालकुविन्दादेः कर्तृत्वसिद्धेः; हन्त! वे[दस्यैवं]देऽप्येवं स्यादिति चेत्, हन्त! स्यादेव। न हि कल्पान्तरवर्णव्यक्तिसमुदायमेवेदानीन्तनवेदराशिं ब्रूमः, अपि तु तादृक्क्रमयोगितामात्रम्। सर्वत्र वाक्येषु हि यथेष्टक्रमकल्पने पुरुषस्य स्वातन्त्र्योक्तिः, न पुनर्यथापुरोच्चारणे, इति काव्यादिष्वपि प्रसिद्धम्। यदि त्वया अयथापुरप्रणीतत्वं साध्येत, तत्र यथापुरप्रणयने कमिव दोषमालक्ष्यैवं विशेषयसि? मन्त्रादिषु क्रमभङ्गानुपपत्तिश्च कल्पान्तरेऽपि तच्छक्त्यनपायादेव, तथात्वेऽपि वा यथापूर्वोच्चारणेऽपि तदनपायात्, अन्यथा कल्पनागौरवात्, इति ॥

तथाऽपि सर्गप्रलयसंभवात् संप्रदायविच्छेदे सर्ववेदोच्छेदात् पश्चादीश्वरस्तत्स्रष्टा स्यात्। न स्यात्, तथाऽपि प्राचीनवेदसाक्षात्कारिणस्तस्य तत्प्रवर्तनमात्रौचित्यात्, शक्तस्यापि तज्जातीयवेदान्तरकल्पने गौरवात्, शक्तावपि सिद्धोपजीवनस्यास्मदादिषु दृष्टेः, एषामेव च मन्त्राणां कल्पान्तरेऽपि मन्त्रत्वाविरोधात्। एवं मन्त्रनित्यत्वे च तुल्यन्यायतया ब्राह्मणनित्यत्वस्यापि दुस्त्यजत्वात्, तद्दृष्टान्तेन वा तन्नित्यत्वसाधनात् **सारस्वत**पाठादावपि मन्त्रादिस्वरूपभेदाभावस्योक्तत्वात्। *यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै, *वाचाविरूपनित्यया, *पूर्वे पूर्वेभ्यो वच एतदूचुः, *अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयंभ्वभ्यानर्षत् *त ऋषयोऽभवन् तदृषीणामृषित्वम्, *अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा, *व्यस्य वेदं सनातनम् इत्यादिभिरीश्वरस्याप्यनीश्वरव[देव, वेद] द्वेदप्रवर्तनमात्रसिद्धेः। कुतश्च सर्गप्रलयसिद्धिः? विश्वसन्ततिरत्यन्तमुच्छिद्यते, सन्ततित्वात्, प्रदीपसन्ततिवत्। विश्वसन्तानोऽयं दृश्यसन्तानहीनैः सम-

वायिभिरारब्धः, सन्तानत्वात्, आरणेयाग्निसन्तानवत् । वर्तमानब्रह्माण्डपरमाणवः पूर्वमुत्पादितसजातीयसन्तानान्तराः, नित्यत्वे सति तदारम्भकत्वात्, प्रदीपपरमाणुवत् । पर्वता अपि चूर्णीभविष्यन्ति, अवयवित्वात्, घटवत् । समुद्रा अपि शोषमुपयास्यन्ति, जलाशयत्वात्, पल्वलवत् इत्याद्यनुमानत इति चेन्न, केषांचिन्नित्यसंसारपक्षे प्रथमस्य हेतोस्तथा तत्प्रतिपादकैरागमैरंशतो बाधः, तद्बहिष्कारे च अनैकान्तः । सर्वेषां च श्रुतिशतसिद्धैर्नित्यविभूतिनिष्ठैरीश्वरनित्यविग्रहादिभिस्तैस्तैरनैकान्तः । न च तत्पक्षीकारः [शक्यः], बाधासिद्ध्योरन्यतरापातात् । प्रतिप्रयोगाश्च—गणितविशेषादिसिद्धद्विपरार्धसंख्यापूर्वोत्तरकालो न लोकशून्यः, कालत्वात्, अद्यतनकालवत्, इत्यादयः स्वयमूह्याः ॥

विपक्षे च बाधकं न सम्यग्दृश्यते । यच्चागमानुग्रह एषां बलमित्यभिमतम्, तदागमप्रमाणत्वोपजीवनम्, तथा चागमत एव प्रलयादिसिद्धिः । ततश्चागमादेवागमनित्यत्वं सिद्धम् । उक्तं च **प्रज्ञापरित्राणे**—

* वेदतः पौरुषेयत्वशङ्का वेदेन शाम्यति । हेत्वन्तरसमुद्भूता हेत्वन्तरनिवारिता ॥ इति ।

सर्गादौ वेदपरिग्रहप्रकारश्चैवमुपपादितः—

* व्यवहारिजनाभावाद्गिरां व्युत्पत्त्यसंभवात् । वेदार्थो नैव शक्येत बोद्धुं तस्येति चेन्न तत् ॥
बहवः संभवन्त्येव शब्दार्थव्यवहारिणः । मुक्ताद्या ईशितुर्यद्वा बहुरूपपरिग्रहात् ॥
प्राच्यविज्ञानसंस्कारानुवृत्त्या वाऽस्य वेधसः । सर्वशब्दार्थविज्ञानं सुप्तोत्थितवदुद्भवेत् ॥
न गर्भवासस्तेषां न वयोवस्थादयोऽपि च । सर्वविज्ञानसंपन्नाः सृष्टास्त इति वेदधीः ॥
यो ब्रह्माणमिति श्रुत्या सृष्ट्वा ब्रह्माणमीश्वरः । अस्मै वेदानदत्तेति प्रतीतिर्न उदेति हि ॥
शब्दार्थवेदिने वेदप्रदानं सार्थकं भवेत् । अन्यथा व्यर्थमित्यर्थापत्त्या शब्दार्थवेदिता ॥ इति ।

सूक्तकाण्डमन्त्रकृत्त्वजन्मादिवाक्यानामपि प्रथमद्रष्टृत्वस्मर्तृत्वसंप्रदायप्रवर्तनादिभिरेव निर्वाहः । इदमप्यागमानुरोधादेव सिद्धम् । * स्वयंभ्वभ्यानर्षत् इत्यादि हि श्रूयते । प्रजापतिनियोगाच्च तदाहितमहिमानो महर्षयोऽनधीतानेव वेदभागान् पश्यन्ति । तन्नियोगश्च तत्तदृषिकत्वेनानुसन्धानादेः कर्मौपयिकत्वात् । तेषामपि प्रवाहानादित्वान्नानित्यसंयोगादिदोषः । *यद्वै किंच मनुरवदत् इत्यादौ प्रवाहानादित्वं परैरुक्तम्; तदुपाख्यानान्तरादिष्वपि तुल्यम् । उक्तं च भगवता **व्यासेन**—

* युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः । लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा ॥ इति ।

इतिहासोऽत्र तत्तद्वृत्तान्तः । उक्तं च तेनैव धर्मशास्त्रेऽपि—

* धर्ममूलं वेदमाहुर्ग्रन्थराशिमकृत्रिमम् । तद्विदां स्मृतिशीले च साध्वाचारं मनःप्रियम् ॥ इति ।

शाखाप्रणयनं च द्वापरान्ते भाविपुरुष[षाशक्तिपरीक्षया वेद]शक्तिपरिक्षयाद्वेदवृक्षैकदेशोद्धरणम् । एतेन समाख्या निर्व्यूढा, प्रवचन[विशेष]विषयत्वात् ॥ इदं च सर्वं प्रसाधितं **प्रज्ञापरित्राणे**—

* यादृक्प्रभावाः श्रूयन्ते ऋष्याद्या वेदराशिषु । तादृशा एव सृज्यन्ते वेदान् दृष्ट्वा स्वयंभुवा ॥
अतस्तेभ्यः पुरा वेदसत्त्वाद्वेदस्य नित्यता । अनधीत्यैव वेदानामाविर्भावयितृत्वतः ॥
तपसा प्राप्य संस्कारात् तत्सूक्तत्वादिसंभवः । तपःप्रभावान्मन्त्राणामृषिदर्शनसंस्कृतेः ॥
शक्तिराधीयते काचिद्यथाऽस्माकमधीतितः । अर्थावबोधकत्वं तु शब्दशक्त्याऽन्यशब्दवत् ॥
ऋषिदर्शनतोऽधीतेरपि शक्त्यन्तरोद्भवः । अपूर्वकार्यनिष्पत्तावुपकुर्यादिदं ततः ॥

काठकादिसमाख्याया निमित्तं चेदमेव वा । प्रकृष्टं वा प्रवचनं तत्सिद्धा वेदनित्यता ॥ इति । वर्णानित्यत्वं क्रमानित्यता वा नाभिमतवेदनित्यत्वविरोधि । न च वर्णनित्यत्वं वेदनित्यत्वहेतुः; का[र्या]व्यादिष्वपि तुल्यत्वात् । शब्दाधिकरणं चानुपयुक्तवर्णनित्यत्वपरं नानुमन्यामहे । **शारीरकदेवताधिकरणे** च—*शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्, अत एव च नित्यत्वम्, समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च इति सूत्रैरिदं सर्वं समर्थितम् ॥

वेदार्थसंग्रहे तु—*वेदाः प्रमाणं चेत्, विध्यर्थवादमन्त्रगतं सर्वमपूर्वमर्थजातं यथावस्थितमेव बोधयन्ति । प्रामाण्यं च वेदानाम् *औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः इत्युक्तम्, इति मन्त्रार्थवादयोरपि याथार्थ्यं प्रक्रम्य, शब्दशक्तेरसाङ्केतिकत्वम्, तत एव शब्दानुमानविवेकः पौरुषेयापौरुषेयादिविभागादिकं च व्यक्तं प्रदर्शितम् । तथा हि—यथा अग्निजलादीनामौष्ण्यादिशक्तियोगः स्वाभाविकः; यथा चक्षुरादीनामिन्द्रियाणां बुद्धिजनकत्वशक्तिः स्वाभाविकी, तथा शब्दस्यापि बोधकत्वशक्तिः स्वाभाविकी । न च हस्तचेष्टादिवत् सङ्केतमूलं शब्दस्य बोधकत्वमिति वक्तुं युक्तम्, अनाद्यनुसन्धानाविच्छेदेऽपि सङ्केतयितृपुरुषाज्ञानात् । यानि सङ्केतमूलानि, तानि सर्वाणि साक्षाद्वा परम्परया वा विज्ञायन्ते । न च देवदत्तादिशब्दवत् कल्पयितुं युक्तम्; तेषु साक्षाद्वा परम्परया वा सङ्केतो ज्ञायते । गवादिशब्दानां तु अनाद्यनुसन्धानाविच्छेदेऽपि सङ्केताज्ञानादेव बोधकत्वशक्तिः स्वाभाविकी । अग्न्यादीनामौष्ण्यादिशक्तिवदिन्द्रियाणां बोधकत्वशक्तिवच्च शब्दस्यापि बोधकत्वशक्तिरवश्याश्रयणीया । ननु च इन्द्रियवच्छब्दस्यापि बोधकत्वं स्वाभाविकं चेत्, संबन्धग्रहणं बोधकत्वाय किमित्यपेक्ष्यते? लिङ्गवदित्युच्यते; यथा ज्ञातसंबन्धनियमं धूमादि अग्न्यादिबुद्धिजनकम्, तथा ज्ञातसंबन्धनियमः शब्दोऽप्यर्थविशेषबुद्धिजनकः । एवं तर्हि शब्दोऽप्यर्थविशेषस्य लिङ्गमित्यनुमानमेव स्यात्; मैवम्; शब्दार्थयोः संबन्धो बोध्यबोधकभाव एव । धूमादीनां तु संबन्धान्तरमिति, तस्य संबन्धस्य ज्ञापनद्वारेण बुद्धिजनकत्वमिति विशेषः । एवं गृहीतसंबन्धस्य बोधकत्वदर्शनादनाद्यनुसंधानाविच्छेदेऽपि सङ्केताज्ञानात् बोधकत्वं शक्तिरेवेति निश्चीयते ॥

मन्त्रः ॥ एवं बोधकानां पदसङ्घातानां संसर्गविशेषबोधकत्वेन वाक्यशब्दाभिधेयानामुच्चारणक्रमो यत्र पुरुषबुद्धिपूर्वकः, ते पौरुषेयाः शब्दाः इत्युच्यन्ते । यत्र तूच्चारणक्रमः पूर्वपूर्वोच्चारणक्रमजनितसंस्कारपूर्वकः सर्वदा, अपौरुषेयास्ते वेदा इत्युच्यन्ते । एतदेव वेदानामपौरुषेयत्वं नित्यत्वं च, यत् पूर्वपूर्वोच्चारणक्रमजनितसंस्कारेण तमेव क्रमविशेषं स्मृत्वा तेनैव क्रमेणोच्चार्यत्वम् । तेनानुपूर्वीविशेषेण संस्थिता अक्षरराशयो वेदा ऋग्यजुस्सामाथर्वभेदेन भिन्ना अनन्तशाखा वर्तन्त इति । अत्राङ्गिरसानुक्तिरथर्वानुप्रवेशविवक्षया । एवं त्रिवेदीव्यपदेशोऽपि विवक्षाभेदो ग्राह्यः । सर्वोऽप्यसौ पुनर्विधिमन्त्रार्थवादरूपेण त्रिविधः । तत्र प्रामाणिकमन्त्रव्यवहारविषयो मन्त्रः । स चानुष्ठेयार्थप्रकाशनादिनोपकरोति । न चेदमेव तल्लक्षणम्, विध्यव्याप्तेः *वसन्ताय इत्येवमाद्यव्याप्तेः । *वसन्ताय कपिञ्जलानालभेत इत्यादयस्तु मन्त्रा अपि विधिपरा एव मीमांसिताः । स किल मन्त्रः क्रियमाणानुवादिस्तोत्रशस्त्रजप्यादिभेदभिन्नः । पैशाचमागधादितत्तद्भाषामन्त्राणां फलप्रदत्वे तत्तद्बीजजात्यादिकं निदानम् । श्रद्धेयदेवतानामाङ्कमात्रं तु न तदक्षरशक्तिप्रतिबन्धकम्; क्षिप्रक्षुद्रफलप्रकाशनेन विप्रलम्भार्थं तथैवेश्वरादिभिः सृष्टम् । गरुडादिनामाङ्कभाषामन्त्रेषु तु तत्तद्देवतास्मृत्युपकारकत्वमप्यस्ति । एतेन मन्त्रव्याकरणं निर्व्यूढम् । ये तु सप्तकोटयो महामन्त्राः इत्याप्तशास्त्रेषु पठिताः शास्त्रप्रतिष्ठिताः, ते तु प्रणवयोगा-

योगादिभिर्वैदिकास्तान्त्रिका इति विभज्यन्ते । तत्र शूद्राधिकारत्वसिध्यर्थं तान्त्रिकपरिभाषाः; न पुनरवैदिकतया, श्रौत-स्मार्तादिभेदव्यपदेशवत् प्रमाणसिद्धत्वाविशेषात् । सर्वेषां च मन्त्राणां सद्वारकमद्वारकं च परमात्मैव प्रतिपाद्यः फलप्रदश्च । सद्वारकेषु तावत् विनियोगभेदात् बहुधा ब्रह्मणि पर्यवसानम् ॥

तत्तद्देवशरीरत्वात् तत्तदंशतया स्थितेः । ऐन्द्यादिन्यायतश्चैषां सर्वेषामीश्वरे स्थितिः ॥

अर्थवादः ॥ विध्यधीनप्रवृत्त्युत्तम्भकवाक्यविशेषो ह्यर्थवादः । सोऽपि प्रत्यक्षाद्यविरुद्धे स्वार्थे प्रमाणम्, स्वतः-प्रामाण्यस्यानपायात् । यत्र विरोध[प्रतीतिः]धीः, तत्राप्यविरुद्धार्थोपचारेण तत्प्रामाण्यम् । स च कचित् विध्येकवाक्यतया प्रमाणीभवतीत्यर्थवादाधिकरणा[दिभिः साधि]दिषु स्थापितम् । स्वतःप्रयोजनभूतार्थविशेषणविषयस्तु स्वतन्त्रतयाऽपि प्रामाण्यं प्राप्नोतीति **समन्वयसूत्रसिद्धम्** । तत्प्राप्त्यभिलाषे तु तदुपायवाक्यप्रवृत्तिः । स चतुर्धा—निन्दाप्रशंसापरकृति-पुराकल्पभेदात् । निषेधादिशेषभूतो निषेध्यादिदोषवादोऽत्र **निन्दा** । विध्यादिशेषभूतो विधेयादिगुणवादः **प्रशंसा** । एकानुबन्धी कथाविशेषः **परकृतिः** । अनेकानुबन्धी तु **पुराकल्पः** ॥

विधिः ॥ हितानुशासनरूपं वाक्यमिह विधिः । स च बहुविधः—नित्यनैमित्तककाम्यसंवलितविधिनिषेधादि-भेदात् । **नियमपरिसंख्ये** अपि विधिभेदावेव । तत्रैवं विवेकः—

अप्राप्तस्य विधौ प्राप्तिर्नियमे प्राप्तपूरणम् । बाधस्तु परिसंख्यायां प्राप्तस्यैवैकदेशतः ॥

विध्यर्थः ॥ अथात्र को नाम लिङादिप्रत्ययार्थः? न तावदपूर्वम्, तस्मिन् प्रमाणान्तरागोचरे व्युत्पत्त्ययोगात्, तद्गोचरत्वे तु अपूर्वत्वव्याघातात्, लिङादिबोधिते व्युत्पत्तावितरेतराश्रयप्रसङ्गात् । विमर्शतः सिद्धिः स्यादिति चेन्न, विमर्शस्य स्मृत्यनुभवातिरिक्तस्यानभ्युपगमात्, क्रियाकार्येऽव्युत्पन्नस्य चान्वयायोग्यतायामपि लक्षणादिभिरेव निर्वाह्यत्वात्, अभिधानान्यथाकरणायोगात्, प्रथमव्युत्पत्तेरपि सर्वत्र कार्य एवेति नियमाभावात् । तथा गामानयेत्यादिप्रयोजकवृद्धवाक्य-श्रवणसमनन्तरं गवानयने प्रवृत्तं पुरुषमालोक्य पार्श्वस्थो व्युत्पित्सुश्चेतनप्रवृत्तेः कार्यताबुद्धिपूर्वकत्वात् प्रयोज्यवृद्धकार्यता-बुद्धेश्च कारणान्तरादर्शनात् यदनन्तरं यत् दृश्यते तत्तस्य कारणमिति प्रयोजकवृद्धवाक्यमेव प्रयोज्यवृद्धकार्यताबुद्धेः कारणमित्यध्यवस्यति । तथा कस्यचित् * पुत्रस्ते जातः इति केनचिदुक्ते प्रतिपन्नपुत्रोत्पत्तेस्तस्य प्रियत्वं च ज्ञायते । व्युत्पित्सुः पुत्रजन्मवाक्यश्राविणः पुरुषस्य मुखविकासमालोक्य तस्य प्रियार्थप्रतिपत्तिनिमित्तत्वानुमानात् तत्प्रतीतेश्च कारणान्तरादर्शनात् पुत्रजन्मवाक्यमेव कारणं कल्पयति । न च पुत्रजन्मनः प्रियत्वं बालेनाज्ञातमिति वाच्यम्, प्रज्ञात-पुत्रजन्मनस्तस्य प्रौढस्य भाषान्तरवत् प्रथमव्युत्पत्तावेवं संभवात्, नोदाहरणमादरणीयमिति च न्यायविदः ॥

ततश्च ये बालानां प्रियत्वेन संप्रतिपन्ना भक्ष्यभोज्यादयः, तद्दर्शी व्युत्पित्सुस्तत्सं[प्रवृत्ति]पत्तिश्राविणः पुरुषस्य मुख-विकासदर्शनादिप्रक्रियया व्युत्पद्यत इति किं नोपपद्यते? प्रियान्तरस्मृत्यादिभिरपि मुखे विकासः संभवतीति चेत्, तथैव स्वयं तदधीनप्रयोजनान्तरस्मरणादिनाऽपि गवानयनकर्तव्यताबोधः संभवेत् । आसत्तिविशेषवशादनेकप्रयोगानुगतेश्च व्यवस्थेति चेत्, तुल्यम् । तथाऽपि तत्तत्प्रियानुबन्धिसुलग्नजन्मसुखप्रसवस्वादुवाक्त्वादिहर्षहेत्वर्थान्तरसंभावनया विशेषो दुर्निश्चय इति चेन्न, गवानयनेऽपि वत्ससंयोजनक्षीरसंपादनादिकर्तव्यताबोधकेऽपि वाक्ये तदर्थगवानयनसंभवात् गामा-नयेत्यादिवाक्यं गवानयनकर्तव्यतैकबोधकमिति कथं निश्चिनुयात्? अन्वयव्यतिरेक[महिम]वशात् दृष्टानुग्रहाच्चेति चेत्,

तुल्यम् । तदेवं पुत्रजन्मवाक्योदाहरणसमीकारस्य मन्दमतीनां दुरारोहत्वात् तदुपेक्षणेन स्पष्टतरव्युत्पत्तिप्रकारो यादृच्छिको बुद्धिपूर्वश्च **भाष्यकारैः** [च] दर्शितः ; तदत्र लिख्यते—* एवं किल बालाः शब्दार्थसंबन्धमवधारयन्ति ; मातापितृप्रभृतिभिरम्बातातमातुलादीन् शशिपशुनरमृगपक्षि[सर्पा]सरीसृपादींश्च एनमवेहि, इमं चावधारय, इत्यभिप्रायेणाङ्गुल्या निर्दिश्यनिर्दिश्य तैस्तैः शब्दैस्तेषुतेष्वर्थेषु बहुशः शिक्षिताः शनैःशनैस्तैस्तैरेव शब्दैस्तेषुतेष्वर्थेषु स्वात्मनां बुद्ध्युत्पत्तिं दृष्ट्वा शब्दार्थयोः संबन्धान्तरादर्शनात् सङ्केतयितृपुरुषाज्ञानाच्च तेष्वर्थेषु तेषां शब्दानां प्रयोगो बोधकत्वनिबन्धन इति निश्चिन्वन्ति । पुनश्च व्युत्पन्नेतरशब्देष्वस्य शब्दस्यायमर्थ इति पूर्ववृद्धैः शिक्षिताः सर्वशब्दानामर्थमवगम्य परप्रत्यायनाय तत्तदर्थावबोधि वाक्यजातं प्रयुञ्जते । प्रकारान्तरेणापि शब्दार्थसंबन्धावधारणं सुशकम्—केनचित् पुरुषेण हस्तचेष्टादिना पिता ते सुखमास्ते इति देवदत्ताय ज्ञापय, इति प्रेषितः कश्चित् तज्ज्ञापने प्रवृत्तः, पिता ते सुखमास्ते इति शब्दं प्रयुङ्क्ते ; पार्श्वस्थोऽन्यो व्युत्पित्सुर्मूकवच्चेष्टाविशेषज्ञः तज्ज्ञापने प्रवृत्तमिमं ज्ञात्वाऽनुगतः तज्ज्ञापनाय प्रयुक्तमिमं शब्दं श्रुत्वा, अयं शब्दस्तदर्थबुद्धिहेतुरिति निश्चिनोतीति कार्यार्थ एव व्युत्पत्तिरिति निर्बन्धो निर्निबन्धनः इति ॥

अत्र पिता ते सुखमास्त इति वाक्यस्य स्थाने अपवरके दण्डः स्थितः इत्युदाहरणान्तरमात्रमन्यत्रोक्तम् । अतः सिद्धासिद्धेऽप्याद्यव्युत्पत्तिः । भवतु वा प्रथमव्युत्पत्तिः कार्य एव, तथाऽपि प्रयोगान्वयव्यतिरेकवशादेव शब्दशक्तिर्विवेचनीया । प्रयुज्यन्ते च सिद्धपरा एवाविवक्षितकर्तव्यैः [पुरुषैः] शब्दाः ; यथा—कोऽसौ राजा ? कौरवः । कौतुकमात्रादेव ह्यत्र प्रश्नः, प्रतिवचनं च तदनुविधाय्येव । अतो यथा पदानां प्रातिस्विकी शक्तिः सिद्धे कार्येऽपीति यथासंभवं निष्कृष्यते, तथा तात्पर्यमपि यथायोगमेव, व्युत्पत्त्युपायत्वेऽपि च कार्यस्य सर्वशब्दतात्पर्यविषयत्वायुक्तेः । कार्यवाक्येऽपि प्रवर्तकत्वादिलक्षणं च प्राधान्यमपूर्वस्य मृग्यम्, सुखदुःखाभावाभ्यामतिरिक्तस्य स्वतः स्वस्मिन् प्रवर्तकत्वायोगात्, व्युत्पत्तिदशायामप्यसुखरूपस्यानयनादेरन्यशेषतयैव प्रवृत्तिशेषत्वावगमात् । अतः सुखे दुःखनिवृत्तौ वा साक्षात् कार्यत्वबोधः ; तदर्थतया तत्साधने । अपेक्षितत्वेन च साधनवत् साधनसाधनेऽपि कार्यताबोधोपपत्तिः । न च सुखादित्वमपूर्वस्य ; न च तत्साधनतया तत्प्रवर्तकत्वमभ्युपगतम् । अभ्युपगमेऽपि लौकिकसेव्यप्रीत्येव देवताप्रीत्यैव श्रुत्यादिसिद्धया कालान्तरभाविफलसिद्धौ लिङ्वाच्यतया स्वरूपेण वा तत्कल्पनायोगात् । रात्रिसत्रादिनयाच्च प्रतिष्ठादेशविशेषशतयातनासाधनत्वघृताञ्जनच्छागादिपरिग्रहवत् विध्यपेक्षितं प्रतीतं च देवताप्रीत्यात्मकमेवापूर्वं लिङ्वाच्यतया स्वरूपेण वा द्वारमुपकल्प्यताम् ; किमन्येन ? यच्च जल्पन्त्यर्धलोकायतिकाः—

* विग्रहो हविरादानं युगपत्कर्मसन्निधिः । प्रीतिः फलप्रदानं च देवतानां न विद्यते ॥ इति,

तदपि जैमिनिहृदयानभिज्ञतानिबन्धनम् ; न हि स्वतःप्रमाणाम्नायस्मृतिपुराणादिसिद्धाः साधकबाधकप्रमाणागोचराः देवताविग्रहादयो हातुं युक्ताः । न चायोग्येष्वनुपलम्भमात्रेण बाधः शङ्क्यः, अतिप्रसङ्गित्वात्, साक्षाल्लोकायतिकवादप्रसङ्गात् । स्तुत्या विधिशेषभूतेष्वप्यर्थवादेषु तदर्थतयैव स्वार्थमभिदधानेषु न वाक्यभेदादिदोषः । स्तुत्यादिपरत्वेऽपि न मुख्यार्थबाधः, स्वार्थबाधकाभावे स्वार्थप्रहाणायोगात् ; न च सर्वा स्तुतिरयथार्था ; न चासता गुणेन कथितेन स्तुतिसिद्धिः । यत्र तु मुख्यार्थबाधः, तत्राप्यौपचारिकं किञ्चिदालम्बनमभिप्रेतम् ; अन्यथा विडम्बनमात्रमेव स्यात् । न चोपच्छन्दनमात्रता, तज्ज्ञाने पुंसः प्रवृत्त्यनुपकारात्, निरूपकस्य च तदज्ञानायोगात्, अन्यथा भ्रान्तिमूलप्रवृत्तित्वप्रसङ्गात् ; **समन्वयाधिकरण**नयाच्च सिद्धैकपराः सन्ति भागाः । तदनु [वादि, विधायि] धाविनश्चेतिहासपुराणादयः ॥

नन्वर्थवादाधिकरणे *विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः इति सर्वेषामर्थवादानां विध्येकवाक्यत्वमुक्तम्; समन्वयसूत्रे तु कथं तद्विरुद्धोक्तिः? मैवम्; अर्थवादाप्रामाण्यपूर्वपक्षप्रतिक्षेपाय विध्येकवाक्यतया प्रामाण्यं संभवतीत्येतावन्मात्रमर्थवादाधिकरणे स्थापितम्। विध्येकवाक्यत्वे ब्रह्मस्वरूपतात्पर्याभावपूर्वपक्षस्तु अपवरकनिधिसद्भावादिवाक्यवत् स्वतःप्रयोजनभूतार्थविषयवाक्यानां भिन्नवाक्यतयाऽपि प्रामाण्यमुपपाद्य समन्वयसूत्रे प्रतिक्षिप्यत इति विरोधाभावात्। अपि चौत्सर्गिकमापवादिकं च तंतमर्थं प्रतिपादयत्सु वाक्येषु विषयव्यवस्थया विरोधशमनं व्याकरणादिष्वपि दृष्टमिति। अत एव ब्राह्मणशे[षो]षा अर्थवादा[द] इत्यार्षमपि वाक्यमौत्सर्गिकविषयमवगन्तव्यम्। या तु शब्दभावनैव लिङाद्यर्थ इति **कौमारिल**कुसृतिः, सा तु प्रतीतिविसंवाददिप्रतिहता; न हि विधिवाक्यश्रावी पुरुषः, लिङादि स्वव्यापारमभिधत्ते, अतो मया प्रवर्तितव्यमिति मन्यते। न च यागादिस्वरूपे लिङादिव्यापारे च केनचिद्वाक्येन समुच्चित्य प्रतिपादितेऽपि कश्चित् प्रवर्तमानो दृश्यते। लिङादेश्च ज्ञायमानत्वलक्षणव्यापारमात्राच्छक्तिलक्षणव्यापाराद्वा प्रवर्तकत्वे व्युत्पत्तेः प्रागपि ततः प्रवृत्तिप्रसङ्गः। व्युत्पत्तेरपि सहकारित्वे तत्सापेक्षाया निर्विषयायास्तस्या असंभवात् तद्विषयो वाच्यः। न च स्वव्यापारे लिङादिः क्वचिद्व्युत्पन्नः। सर्वेषामपि शब्दानां स्वव्यापारातिरिक्त एव ह्यर्थे व्युत्पत्तिः। ये चाभिधादयः शब्दाः, तेऽपि न शृङ्गग्राहिकया स्वव्यापारमभिदधति; अपि तु शब्दमात्रव्यापारे तत्प्रवृत्तेः सामान्योपाधिक्रोडीकारेण स्वव्यापारस्यापि निवेशः; अत एवाभिधादिशब्दाभिधेयस्य निमित्तस्य च सामान्यतः प्रतिपन्नत्वात् व्युत्पत्त्युपपत्तिः। लिङादेस्तु स्वव्यापारे प्रतीते तत्र व्युत्पत्तिः स्यात्; तत्प्रतीतिर्व्युत्पन्नेन चेत्, अन्योन्याश्रयः; अव्युत्पन्नेन चेत्, अतिप्रसङ्गः, इति। न चेष्टसाधनत्वमात्रं लिङादिबोध्यम्, तवेष्टसाधनमिदम्, अतः कुरु—इति सहप्रयोगदर्शनात्। न चादरादिनिबन्धना पुनरुक्तिरियम्, प्रतीतेरतथात्वात्, हेतुसाध्यनिर्देशायोगाच्च। कर्तव्यमिदम्, अतः कुरु—इत्यपि दृश्यते, इति चेन्न, ब्राह्मणस्य कर्तव्यमिदम्, अतस्तवापि कर्तव्यमितिवत् सामान्यविशेषादिविवक्षया अविरोधात्, अत्यन्तैकार्थविवक्षायां तु तत्रापि प्रयोगायोगात्। अत एव आप्तस्य वक्तुरिच्छामात्रं लिङाद्यर्थः, इति प्रत्युक्तम्; आप्तस्येष्टमिदम्, अतो ममेदं कार्यम् इति प्रवर्तमानपुरुषाभिलापविशेषदर्शनात्। न च लिङर्थत्वादेव निमन्त्रणादिवत् विधिरपि वक्त्रभिप्रायमात्रमिति वाच्यम्, संभावनादिभिर्विशेषविहितैश्चानैकान्त्यात्; एकशब्दवाच्यतामात्रेणैकत्वे चानेकार्थशब्दभङ्गप्रसङ्गे दृष्टान्तोऽपि न सिध्येत्। यद्यपि परमते[ऽप्यु] **ह्युदयनो**क्ता निषेधानुपपत्तिः, तथाऽपि न साऽस्मत्पक्षमवगाहते, कर्तव्यताया विध्यर्थत्वे न कर्तव्य इति नञन्वयाविरोधात्; कर्तृव्यापारसाध्यत्वमेव च कर्तव्यत्वम्; तथा हि **वेदार्थसंग्रहे** * लिङादेः कोऽयमर्थः परिगृहीतः इति प्रश्नपूर्वकं प्रत्युक्तम्—* यज देवपूजायाम्, इति देवताराधनभूतयागादेः प्रकृत्यर्थस्य कर्तृव्यापारसाध्यतां व्युत्पत्तिसिद्धां लिङादयोऽभिदधतीति न किञ्चिदनुपपन्नम्, कर्तृवाचिनां प्रत्ययानां प्रकृत्यर्थस्य कर्तृव्यापारसंबन्धप्रकारो हि वाच्यः; भूतवर्तमानतादिमन्ये वदन्ति, लिङादयस्तु कर्तृव्यापारसाध्यतां वदन्ति—इति। **भाष्ये चाद्यसूत्रे**—*अतो विधिवाक्येष्वपि धात्वर्थस्य कर्तृव्यापारसाध्यतामात्रं शब्दानुशासनसिद्धमेव लिङादेर्वाच्यमित्यध्यवसीयते, धात्वर्थस्य च यागादेरग्न्यादिदेवतान्तर्यामिपरमपुरुषसमाराधनरूपता, समाराधितात् परमपुरुषात् फलसिद्धिश्चेति *फलमत उपपत्तेः इति प्रतिपादयिष्यते—इति। अत्र कर्तृव्यापारसाध्यतामात्रमिति निष्कृष्टार्थप्रदर्शनायोक्तम्; प्रतिपत्तिप्रकारस्तु यजेतेत्यादौ स्वव्यापारसाध्ययागादिविशिष्ट इति कर्तृप्राधान्येनैव। यथोक्तं **दीपे कर्त्रधिकरणे**—* यजेत, उपासीत, इति हि कर्तरि लकारः, अतः कर्तारमेव बोधयति शास्त्र-

मिति । उक्तं च **वेदार्थसंग्रहे**ऽपि—*स्वर्गकामो यजेत, इत्येवमादिषु लकारवाच्यकर्तृविशेषसमर्पकाणां स्वर्गकामादिपदानां नियोज्यविशेषसमर्पकत्वं शब्दानुशासनविरुद्धम् इति । यद्यपि **दीपग्रन्थः** पुंसः कर्तृत्वं श्रुतिसिद्धमित्यत्रैव तत्परः, तथाऽपि धात्वर्थसाध्यतापरलिङादिष्वपि कर्तृप्रधानतया वृत्तिं प्रदर्श्य सांख्यान् प्रतिक्षिपतीति तादर्थ्यात् तत्रापि तत्परत्वमेव ग्राह्यम् । पचतीत्यादौ पाकं करोतीत्यादिनिपुणव्याक्रियाश्च कृतिकर्मतयैव धात्वर्थस्यान्वयं व्यञ्जयन्ति ॥

श्रीगीताभाष्ये चैतत् व्यञ्जितम्—युध्यस्व इत्यत्र युद्धाख्यं कर्मारभस्व इति व्याख्यानात् । व्याकरणात् करणतया च धात्वर्थस्यान्वये कथं क्रियाविशेषणस्य कर्मविभक्त्यन्तता? न हि विशेष्येण विशेषणं भावयेदित्यन्वेति, फलस्यापूर्वस्य वा भवद्भिर्भाव्यत्वाभ्युपगमात्; वर्तमानव्यपदेशादिषु च साध्यान्तराभावेऽपि न विशेषणमात्रं साध्यम्, न च प्रथमान्तं क्रियाविशेषणम्; करणपक्षेऽपि धात्वर्थेनानन्वयप्रसङ्गात्, अनन्वितविशेषणताद्यनुपपत्तेः । न चाकर्मविभक्त्यन्तेन धातुना कर्मविभक्त्यन्तस्य कथं सामानाधिकरण्यमिति वाच्यम्, करणविभक्त्यन्तेनाप्यसामानाधिकरण्यप्रसङ्गात्; न च प्रतीयमाने कर्मत्वेनान्वये कश्चिद्दोषो दृश्यते, [व्रीहि] प्रियङ्गुकामः कृषिं कुर्यादितिवत् स्वर्गकामो यागं कुर्यादिति वाक्यार्थेऽपि विरोधाभावात्, तद्वदेवार्थतस्तस्य तदुपायत्वसिद्धेः केनेति करणाकाङ्क्षाया अपि शमनात् । नामधेयगततृतीयान्वयोऽपि नावश्यं सामानाधिकरण्येन, तत्तन्नामकैः कर्मविशेषैः देवतापूजां कुर्यादित्येवंपरत्वेऽपि स्वरसान्वयात्, सामान्यविशेषरूपेण व्यधिकरणनिर्देशोपपत्तेः । चाटुवादेन राजानं प्रीणयेदितिवत् यागं कुरुष्वेत्यादौ न कृञर्थस्यापि साध्यत्वप्रसङ्गः, तस्यैव कर्तृव्यापाररूपत्वे तत्साध्यत्वायोगात्, प्रकृतिप्रत्यययोरन्यतरस्य कृतावुदासीनत्वात्, एकः, द्वौ, बहवः इत्यादिवत् । तत्रापि यदा कर्मतां विवक्षति, तदाऽपि कर्तृव्यापारान्तरमभिप्रेत्य वा, भेदोपचारेण वा निर्वाहः; यथा—उदकाहरणक्रियां करोतीत्यादौ । नच तावताऽनवस्था, प्रतीत्यनारोहेण व्यवहारस्य पर्यवसितत्वात् । अग्निहोत्रं जुहोतीत्यादिप्रयोगश्चास्मत्पक्षानुकूलः । अतः, किं? केन? कथमिति भवत्प्रोक्तवत्, किमर्थम्? किम्? केन? कथमित्याकाङ्क्षाचतुष्टये स्वर्गादिना किमर्थमित्याकाङ्क्षापूरणम्, देवतां प्रीणयेदिति किमित्याकाङ्क्षाशान्तिः, ज्योतिष्टोमेनेत्यादिनामधेयादिभिः केनेत्याकाङ्क्षा पूर्यते, कथमित्याकाङ्क्षापूरणं तु भवतामस्माकं च तुल्यमेवेति शाब्दोऽयं पन्थाः । अतस्तत्तदधिकारिणः स्वसाध्यधात्वर्थविशिष्टताबोधिनि यजेतेत्यादौ तत्तद्धात्वर्थानुष्ठाने फलम् अननुष्ठाने प्रत्यवायश्च सर्वप्रशासितुः सङ्कल्पात् भवतीत्यपि वाक्यादवगतम् । अवान्तरदेवताबुद्धिवृत्तिविशेषस्तु सद्वारकयजने श्राद्धभोजिपुरुषप्रीत्यादिवदानुषङ्गिकः, अन्यथा कल्पान्तरादिषु प्रलीनप्राचीनदेवतागणेषु पूर्वकल्पानुष्ठितकर्मफलानुत्पत्तिप्रसङ्गात् । अत एव ह्येकस्यैव श्रुतिराज्ञा; अन्येषां चाराधकत्ववदाराध्यत्वमपि तदायत्तमिति । **नारायणार्यै**स्त्वेवमुक्तम्—

*आप्तस्य हितकामस्य नियोगं केचिदूचिरे । **भाष्यकारो**ऽपि भगवानेतदेवान्वमन्यत ॥ इति ।

अत्र च *स्वशासनावबोधि शास्त्रं च प्रदिश्य इति **भाष्य**मभिसंहितम् । इदं च विधिनिषेधानुवर्तनातिवर्तनप्रयुक्तनिग्रहानुग्रहवचनबलात् सिद्धम् ।

*श्रुतिः स्मृतिर्ममैवाज्ञा यस्तामुल्लङ्घ्य वर्तते । आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः ॥ इति ।

विधिः प्रेरणम् इति च व्याकारि **वैयाकरणैः** । प्रेरणं च शासनमेव । **तत्त्वरत्नाकरकारै**श्चैवमुक्तम्—

*क्रिया तच्छक्तिर्वा किमपि तदपूर्वं पितृसुरप्रसादो वा कर्तुः फलद इति रङ्गेश कुदृशः ।
त्वदर्चेष्टापूर्ते फलमपि भवत्प्रीतिजमिति त्रयीवृद्धास्तत्तद्विधिरपि भवत्प्रेरणमिति ॥

नित्यनैमित्तिकादिविधिभेदेषु च प्रशासितुरभिप्रायविशेषाः व्यञ्जिताः—

* आज्ञा ते सनिमित्तनित्यविधयः स्वर्गादिकाम्यद्विधिः सोऽनुज्ञा शठचित्तशास्त्रवशतोपायोऽभिचारश्रुतिः ।
सर्वीयस्य समस्तशासितुरहो श्रीरङ्गसर्वस्व ! ते रक्षाकृतनिवेदिनी श्रुतिरसौ त्वन्नित्यशास्तिस्ततः ॥ इति ।

अपि च **वेदार्थसंग्रहे**ऽप्युपात्तं **द्रमिडभाष्यम्**—* स्वशासनानुवर्तिनं ज्ञात्वा कारुण्यात् स्वभावाच्च स भगवान् वर्धयेत विद्वान् कर्मदक्षः इति । अनन्तरं चायमेवार्थो **भगवद्गीताया**मपि दर्शितः—

* ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः । श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् । सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥ इति ।

स्वाज्ञानुवर्तिनः प्रशस्य विपरीतान् विनिन्दन् पुनरपि स्वाज्ञानुपालनमकुर्वतामासुरप्रकृत्यन्तर्भावमभिधायाधमा गतिश्चोक्तेति ईदृश एव विधिशब्दार्थो वेदान्तिभिः स्वीकृतः इति । परेऽपि केचिदन्वयवादिषुः । अतो मूलस्कन्धीकृतनियोगं धात्वर्थस्य कर्तृव्यापारसाध्यत्वं वा निर्विषयप्रेरणासंभवात् तत्साध्यत्वपर्यन्तं प्रेषणमेव वा लिङाद्यसाधारणार्थः, इति स्थिते * विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति समभिव्याहृतनिमन्त्रणादिसमानयोगक्षेमतया विधिशब्दार्थतया व्याकृतस्य प्रेषणस्यैव लिङादिशब्दवाच्यत्वं युक्तमिति । अन्यथाऽपि प्रेषणमन्तर्गतमेवेत्यपरे ॥

इदं च विधिवाक्यानामीश्वरशासनात्मकत्वं **जैमिनिना**ऽपि सूचितमेव—* चोदनालक्षणोऽर्थो धर्मः इति । चोदनाशब्दो हि चोदकं कंचित् पुरुषं सूचयति । अहृदयादपि **शाबरो**दाहरणादिदं व्यज्यते—* आचार्यचोदितः करोमीति हि दृश्यते इति । एवं चोदनाशब्दसूचितश्च पुरुषः स्ववाक्येन प्रागेव विशेषतो दर्शितः । अपिच **औत्पत्तिकसूत्रे** * तस्य ज्ञानमुपदेशः इत्यसूत्रयत् । उपदेशोऽपि हि उपदेष्टारमाक्षिपति । * तत्प्रमाणं बादरायणस्य इति सूत्रखण्डे च स्वस्य स्वाचार्यभूतबादरायणसमानाभिप्रायत्वं व्यञ्जितम् । स च **बादरायणो जैमिनि** स्वशिष्यमभ्युपगतेश्वरादितत्त्वं *साक्षादप्यविरोधं जैमिनिः इत्यादिषु बहुषु सूत्रेष्वदर्शयत् । प्रतिक्षेपस्तु काचित्कः अन्यपरोक्त्यापातप्रतीतार्थमन्दमतिमोहनिरासार्थो वा क्षुद्रप्रमादमात्रस्याप्युद्धारार्थो वेति न प्रधानविरोधकल्पनलिङ्गम् । **अर्थवादाधिकरणे** च *विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरिति प्रेरणरूपविधिप्रतिपादकलिङाद्यवयवद्वारा समुदायभूतं विध्युद्देशवाक्यं लक्षयित्वा तदेकवाक्यत्वमर्थवादानां वदन् कृत्स्नस्य वेदस्येश्वराज्ञारूपविधिप्रतिपादकत्वं तद्वाक्यकण्ठोक्तमसूचयत् । एवमन्यत्रापि भाव्यम् ॥

स्मृतिः ॥ एवं श्रुतिस्तावदीश्वराज्ञा, तदनुविधानात् स्मृतिरपि । ब्राह्मणमन्त्रार्थवादमया ह्यनन्ता वेदाः सङ्कीर्णा विप्रकीर्णाः क्वचित् कदाचिदुत्सन्नाश्च । तत्र कृत्स्नवेदिनो मन्वाद[यो महर्षि]यस्तत्तद्देशकालविशेषेष्वकृत्स्नवेदिनां तत्त्वानुष्ठानविप्लवप्रशमनाय स्वानुभूतान् वेदार्थान् यथावन्निबध्नन्ति ; अतस्तन्मूलोऽनादिवाचामर्थनिर्णयः । श्रुतिस्मृतिविरोधे तु स्मृत्या मूलान्तरानुमानादनुष्ठानविकल्पं केचिदाहुः । सर्वेषां गुणत्रयवतामाप्ततमत्वेऽपि काचित्कभ्रमसंभवाच्छ्रुत्या स्मृतिबाधः, इत्यपरे । तत्त्वविषये तु विरोधे बाध एव, आन्यपर्यं वा, वस्तुनि विकल्पासंभवात् । स्मृतिद्वयविरोधे तु परिग्रहतारतम्यादिभिर्व्यवस्था । नच क्वचित् स्मृतीनामप्रामाण्ये सर्वत्रानाश्वासः, बाधकादर्शनात्, कारणदोषक्लृप्तेश्च नियतलिङ्गाभावात्,संवादभूयस्त्वादिभिः परिग्रहान्यथानुपपत्त्या च श्रुतेरेव मूलत्वकल्पनोपपत्तेः ; अन्यथा पौरुषेयवाक्यस्य सर्वस्याप्रामाण्यप्रसङ्गे विलीनमागमेन । न चैतन्नानिष्टमिति वक्तुं शक्यम्, पित्राद्याप्तवाक्यं प्रमाणीकृत्य चार्वाकस्य प्रवृत्तिदर्शनात् । न च काचित्कसंवादमात्रेण बाह्यागमेष्वपि विस्रम्भावकाशः, प्रत्यक्षश्रुतिविरोधभूयस्त्वेन वैदिकपरिग्रहाभावेन

वेदबाह्यत्वप्रसिद्ध्या वेदप्रतिक्षेपाच्च वेदाख्यमूलकल्पनस्याशक्यत्वात् । न चालौकिके प्रत्यक्षादिमूलत्वसंभवः । योगजसाक्षात्कारमूलत्वक्लृप्तिरपि वेदाविरुद्धस्थले स्यात् ; न च तत्रापि निश्चयः, विपरीतोपलम्भस्यापि संभवादिति ।

स्मृतिभेदाः ॥ ततश्च वेदमूलाः **स्मृतयस्त्रिविधाः—धर्मशास्त्रेतिहासपुराण**भेदात् । तत्राद्ययोरदूरविप्रकर्षादेकविद्यास्थाननिवेशः । अत्र चाधिकृतानधिकृतविभागेन बलाबलनियति**राभासाह्निके** दर्शिता ; पुराणेष्वपि **सात्त्विकराजसादि**विभागश्च । यानि पुनः सांख्ययोगपाशुपतपञ्चरात्राणि, तान्यपि धर्मशास्त्रभेदा एव ; परिशुद्धात्मचिन्तनरूपज्ञानयोगप्रदर्शनाधिकृतं शास्त्रं **सांख्यम्** ; समाधिपर्यन्तकर्मयोगनिष्ठं शास्त्रं **योगः** ; प्रतिबुद्धेतरविषयपशुपतिभजनप्रतिपादकं **पाशुपतम्** ; प्रतिबुद्धविषयभगवदनन्यभजनोपदेशप्रवृत्तं तु शास्त्रं **पञ्चरात्रम्** । एतानि च क्वचित्क्वचिदंशे परस्परोपजीवीनि । परस्परविरोधे तु वेदानुसारेण बलाबलव्यवस्था, वेदविरुद्धे त्वंशे बाधः । [करणापाटवस्य] प्रमादस्यानीश्वरेषु सर्वेषु संभवात् । विप्रलम्भस्य तु असुरादिव्यामोहनोद्यते साक्षादीश्वरेऽपि ; यथोक्तं **भगवतैव**—

* त्वं हि रुद्र महाबाहो मोहशास्त्राणि कारय । अल्पायासं दर्शयित्वा [दर्शयित्वाऽल्पमायासं]
फलं शीघ्रं प्रदर्शय ॥ अहं मोहं करिष्यामि यो जनं मोहयिष्यति ॥ इति ॥

अतो यत् **सांख्ये** ईश्वरानधिष्ठितप्रधानादिप्रतिपादनम् , यच्चेश्वरमभ्युपगम्य केवलनिमित्तकारणत्वप्रतिफलनकल्पैश्वर्यवर्णनं **योगे,** यच्च **पाशुपते** परावरतत्त्वव्यत्ययवेदविरुद्धाचारादिकल्पनम् , तत् सर्वं व्यपोह्य शिष्टेंऽशे प्रामाण्यं ग्राह्यम् । न चैतत् तुषतण्डुलविभागवदल्पज्ञैः शक्यम् । अतो हि **शारीरके** त्रयाणां निरासः ।

पञ्चरात्रम् ॥ पञ्चरात्रं तु कृत्स्नं श्रुतिवत् स्मृतिवद्वा प्रमाणम् , प्रत्यक्षश्रुत्यादिविरोधाभावात् । **महाभारते** चाप्ततमानवधर्मशास्त्रस्यापि तन्मूलत्वोक्तेरत्यादरेण व्यासादिपरिग्रहविशेषादीश्वरदयामूलत्वेन च कारणदोषप्रसङ्गाभावात् ।

* वेदान्तेषु यथासारं संगृह्य भगवान् हरिः । भक्तानुकम्पया विद्वान् संचिक्षेप यथासुखम् ॥

इति च तत्रैव व्यक्तेः । वेदप्रामाण्याङ्गीकारतदर्थोक्तिभूयस्त्वतद्वैशद्यहेतुत्ववचनसाधुपरित्राणार्थत्वसत्त्वोत्तरनारदादिश्रोतृकत्वादिनिबन्धनस्पष्टप्रामाण्यत्वात् । न च विप्रलम्भार्थं तथा निबन्धः, अन्यत्रापि प्रसङ्गात् ; * अधीता भगवन् वेदाः इत्यादेर्दुर्ग्रहत्वमात्रतात्पर्येण वेदनिन्दादिरूपत्वाभावात् । निन्दारूपत्वेऽप्युदितहोमनिन्दावन्निन्दितेतरप्रशंसनप्रवृत्तेः । * सङ्कर्षणो नाम जीवोऽजायत इत्यादेस्त्ववतारादिगोचरत्वस्य तत्रैव सिद्धेः । **शारीरके** च—* उत्पत्त्यसंभवात् , * न च कर्तुः करणम् इति सूत्रद्वयेन पूर्वपक्षं कृत्वा, * विज्ञानादिभावे वा तदप्रतिषेधः, * विप्रतिषेधाच्च इति तत्प्रामाण्यप्रतिषेधः परिहृतः । तथा निर्मूलत्वासत्परिग्रहसत्परिग्रहाभाववैदिकसंस्कारवर्जनावैदिकसंस्कारविधानविद्यास्थानपरिगणनाभावक्षुद्रविद्याबाहुल्यादिमन्दशङ्कानां **भगवद्यामुनमुनिभिः** परिहारः प्रपञ्चित इति नेह प्रतन्यते ॥

एवं साक्षादीश्वरदयामूलत्वान्मन्वादिनिबन्धनेभ्योऽस्यातिरेकः । तेषां श्रुतिविरोधे सति बाध्यत्वमपि संभवेत् । गुणत्रयवश्यतया कादाचित्कभ्रमादिसंभवात् । स्मृत्यादीनां हि श्रुतिमूलतयैव प्रामाण्यमिति **भाष्ये**ऽप्युक्तम् * तदुपर्यपि इत्यधिकरणे—सङ्कीर्णब्राह्मणमन्त्रार्थवादमूलेषु धर्मशास्त्रेतिहासपुराणेषु इति । तत एव चैषां विप्रकीर्णशाखामूलत्वं सिद्धान्तः इत्यपि सूचितम् । क्वचित्कदाचित् केषांचिच्छाखाविशेषाणामुच्छेदः ते च पुनर्व्यासादिभिः क्वचित्कदाचित्प्रवर्त्यन्ते, इत्येतावता उच्छिन्नशाखामूलत्वमस्तु । उक्तं च भगवता **आपस्तम्बेन**—* तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्ते इति । मन्वादिवचनप्रामाण्यं न्यायमन्तरेणापि श्रुत्यैव सिद्धम्—* यद्वै किञ्च मनुरवदत् तद्भेषजम् इत्यादिभिः । एवं [वि]शिष्टा-

चारस्यापि—* यथा ते तत्र वर्तेरन्, तथा तत्र वर्तेथाः, * यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि इत्यादिभिः। स्मृतिश्च—* स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनाम् इत्यादि। श्रुत्यैव धर्मनिर्णये संभवति किं धर्मशास्त्रेण इत्याशङ्क्याह **मरीचिः**—

* दुर्बोधा वैदिकाश्शब्दाः प्रकीर्णत्वाच्च ये खिलाः। तज्ज्ञैस्त एव स्पष्टार्थास्स्मृतितन्त्रे प्रतिष्ठिताः॥ इति।

सत्यपि धर्मशास्त्रे गृह्यापेक्षां दर्शयति **देवलः**—

* मन्वादयः प्रयोक्तारो धर्मशास्त्रस्य कीर्तिताः। तत्प्रयुक्तप्रयोक्तारो गृह्यकाराः स्वमन्त्रतः॥ इति।

अतो धर्मशास्त्रगृह्यादिसापेक्षत्वं वेदार्थनिर्णयस्य। विरोधे च यथायोगं बलाबलव्यवस्था सिद्धा। भगवद्धर्मशास्त्रस्य तु पञ्चरात्रस्य श्रुत्यादिविरोधे षोडशिग्रहणादेरिव देशकालाधिकार्यवस्थाविशेषविषयतया विकल्प एव, श्रुतेरिवास्यापि दोषसंभावनाविरहादिसिद्धेः। आहुश्चैवमभियुक्ताः—* वेदे कर्त्राद्यभावात् इत्यारभ्य * तस्मात् सांख्यं सयोगं सपशुपतिमतं कुत्रचित्पञ्चरात्रं सर्वत्रैव प्रमाणं तदिदमवगतं पञ्चमादेव वेदात्॥ इति। अन्यत्र च—

* उपनिषदि तु बह्वयां व्यावघोष्यामदोषप्रतिहतगुणराशिर्घुष्यते तार्क्ष्यकेतुः।
श्रुतिरपि तदुपज्ञैः पञ्चरात्रैर्विकल्पं न लभत इति सूक्तं **भाष्यकृद्यामुनार्यैः**॥ इति।

तदेतत् **यामुनाचार्यैरागमप्रामाण्ये** संभावितसमस्तपूर्वपक्षयुक्तिनिराकरणेन प्रपञ्चितम्। तदनुसारेणैव **भाष्यकारैः श्रीपाञ्चरात्राधिकरणं** व्याख्यातम्। * श्रुतिमूलमिदं तन्त्रं प्रमाणं कल्पसूत्रवत् इत्यादिवचनं तु त्रय्यन्तमूलतया एकायनश्रुतिमूलतया च योज्यम्। न चात्र वेदत्वे सन्देग्धव्यम्,

* यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च। महतो वेदवृक्षस्य मूलभूतो महानयम्॥
स्कन्धभूता ऋगाद्यास्ते शाखाभूतास्तथा मुने। इत्यादिवचनात्।

तथा **ऋग्वेदपाठे** पठितम्—* व्रतमेतत् सुदुश्चरम् इति संवादप्रदर्शनात्, वेदशाखाव्यासदशायां निरुक्तशाखाया अपि गणितत्वात्, भगवच्छास्त्रसारभूत**सात्त्वतपौष्कर**ादिषु रहस्याम्नायविधाने * एकायनीयशाखोक्तैर्मन्त्रैः परमपावनैः इत्यादिभिः तच्छ्रुतित्वप्रतिपादनात्। अत्र **भगवद्यामुनमुनिभिरे**वोक्तो ग्रन्थो लिख्यते—* यदप्युक्तम्, * गर्भाधानादिदाहान्तसंस्कारान्तरसेवनात् भागवतानामब्राह्मण्यम् इति, तत्राप्यज्ञानमेवापराध्यति, न पुनरायुष्मतो दोषः; यत एते वंशपरम्परया वाजसनेयशाखामधीयानाः कात्यायनादिगृह्योक्तमार्गेण गर्भाधानादिसंस्कारान् कुर्वते, ये पुनः सावित्र्यनुवचनप्रभृति त्रयीधर्मत्यागेन एकायनश्रुतिविहितानेव चत्वारिंशत् संस्कारान् कुर्वते, तेऽपि स्वशाखागृह्योक्तधर्मं यथावदनुतिष्ठमाना न शाखान्तरीयकर्माननुष्ठानात् ब्राह्मण्यात् प्रच्यवन्ते, अन्येषामपि परस्परशाखाविहितकर्माननुष्ठाननिमित्ताब्राह्मण्यप्रसङ्गात्; सर्वत्र हि जातिचरणगोत्राधिकारादिव्यवस्थिता एव समयाचारा उपलभ्यन्ते। यद्यपि सर्वशाखाप्रत्ययमेकं कर्म, तथाऽपि न परस्परविलक्षणाधिकारिसम्बद्धा धर्माः क्वचित् समुच्चीयन्ते। विलक्षणास्त्रयीविहितस्वर्गपुत्रादिविषयोपभोगसाधनैन्द्रा [वायव्या] ग्नेयादिकर्माधिकारिभ्यो द्विजेभ्यस्त्रय्यन्तैकायनश्रुतिविहितविज्ञानाभिगमनोपादानेज्याप्रभृतिभगवत्प्राप्त्येकोपायकर्माधिकारिणो मुमुक्षवो ब्राह्मणा इति नोभयेषामप्यन्योन्यशाखाविहितकर्माननुष्ठानमब्राह्मण्यमापादयति। यथा च एकायनशाखाया अपौरुषेयत्वम्, तथा **काश्मीरागमप्रामाण्य** एव प्रपञ्चितमिति नेह प्रस्तूयते। प्रकृतानां तु भागवतानां सावित्र्यनुवचनादित्रयीसंबन्धस्य स्फुटतरमुपलब्धेर्न तत्त्यागनिमित्तव्रात्यत्वादिसन्देहं सहते इति॥

पञ्चरात्रविभागः ।। चतुर्विधं चेदं पञ्चरात्रम्—आगमसिद्धान्तः, दिव्यसिद्धान्तः, तन्त्रसिद्धान्तः, तन्त्रान्तरसिद्धान्तश्चेति । चतुर्विधं चेदं वेदमूलभूतांशस्योपबृंहणम् ; तदभिप्रायेण ह्युक्तं **महाभारते**—*महतो वेदवृक्षस्य मूलभूतो महानयम् इत्यादि । चतुर्णां चैषां लक्षणादिकं **श्रीपौष्करादिषु** भगवतैव दर्शितम् । यच्च तेषु चतुर्षु साधारण्यासाधारण्याचोपसंहार्यानुपसंहार्यादिकं वक्तव्यम्, तत् सर्वं **श्रीपाञ्चरात्ररक्षा**सिद्धान्तव्यवस्थायां सर्वपरामर्शेन साधितमस्माभिरिति तत्रैव तद्विस्तरः सात्त्वतधर्मगोप्तुरनन्यैरनुसन्धेय इति नात्र प्रब्रूमः ।

वैखानसप्रामाण्यम् ।। एवं स्थिते केचित् बाह्लीकप्राया आगमबाह्याः **श्रीमद्वैखानस**प्रामाण्ये विशेरते । तत्र तावत् कल्पसूत्रं नाप्रमाणम्, इतरवदेव कल्पसूत्रत्वात्, तत्कर्तुश्च कल्पसूत्रकारत्वप्रसिद्धेः, वेदाविरुद्धत्वात्, वैदिकमन्त्रैरेव सकलकर्मविधानात्, सूत्रान्तराणामपि कुण्डसन्निवेशलक्षणादिषु क्वचित्क्वचित् तदुपजीवनात्, वर्णाश्रमधर्माणामनुकूलं नारायणपरत्वप्रतिपादनादेरपि सत्त्वमूलत्वेन प्रामाण्यैकहेतुत्वात्,

* हरिमेव स्मरेन्नित्यं कर्मपूर्वापरेष्वपि । ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु ॥

इत्यादिना शौनकादिभिरपि तथैव विधानात्, वंशपरम्परया च वैखानसैरधीयमानतया विप्लवस्याप्यनवकाशत्वात् । अस्तु किमपि तत्, इदं तदिति किं नियामकमिति चेत्, इतरानुपलम्भः तदुपलम्भश्च, अन्यथा सर्वत्र श्रुतिस्मृत्यादीनां तथातथा संशयप्रसङ्गात् । अस्त्विदमेव तत्, प्रमाणं च, तथाऽपि भार्गवादिचतुष्कस्य कथं प्रामाण्यम्? इति चेन्न, उक्तोत्तरत्वात्, महर्षिप्रणीतत्ववेदाविरुद्धत्वादेः समत्वात् । पञ्चरात्रविरोधोऽस्तीति चेन्न, तत्त्वे तदभावात्, कर्तव्यक्रियादिभेदस्यापि प्रतिनियताधिकारिविषयत्वेनैवोपपत्तेः, कल्पसूत्रप्रक्रियाभेदवत्, आगमदिव्यतन्त्रतन्त्रान्तररूपपञ्चरात्रावान्तरचतुष्कक्रियादिविभागवच्च । **आश्वमेधिके श्रीवैष्णवधर्मशास्त्रे** द्वितयमपि समप्रामाण्यतयोपात्तम् । द्वयोरपि परस्परप्रामाण्यम् * विष्णोस्तन्त्रं द्विधा प्रोक्तम् इत्यादिषु व्यञ्जितम् । परस्पराक्षेपवचनानि तु इक्षुभक्षकृतिचिकीर्षुभिरसहिष्णुभिरुपक्षिप्तानि वा स्वशास्त्रप्रशंसार्थवादरूपाणि वेति न ततो विरोधः ॥

ननु भार्गवादीनि न तावत् कल्पसूत्राणि, तथाऽनभ्युपगमात्, अप्रसिद्धेः, अयुक्तेश्च । न स्मृत्यन्तराणि, मन्वादिष्वपाठात्, तद्वत् तत्प्रसिद्ध्य[।द्य]भावाच्च । नच स्वतन्त्रतन्त्रान्तराणि, सांख्ययोगादिसहपाठादर्शनात्, वैखानसानुवर्तनाच्च । तत् कतमां विधामवलम्ब्यामीषां प्रामाण्यमुच्यते? मन्वत्रिभार्गवादिवत् नारदीयादिवच्च धर्मशास्त्रतयैव तेषामपि प्रामाण्यम्, अष्टादशादिपरिगणनस्य उपलक्षणतायाः प्रामाणिकैरभ्युपगमात् । स्मृत्यन्तरेषु देवोत्सवादिप्रपञ्चनं नास्तीति चेत्, माभूत् प्रपञ्चनम्, स्वरूपं तावदनुज्ञातं तत्प्रपञ्चनपराणाम् । तथाऽपि जीवानामन्ततोऽन्योन्यवैषम्यमात्रस्य च सार्वत्रिकत्वान्निकृष्टाधिकारिकाणि तानीति चेन्न, तेष्वन्येषु च ब्राह्मण्यैकप्रधानत्ववचनात्, तथोपलब्धेश्च । कथं तेषां ब्राह्मण्यमिति चेत्, शान्तं पापम् । श्रवसी पिदध्महि । तथाऽपि वक्तव्यम् । दृश्यन्ते ह्येते वंशपरम्परया वेदमधीयाना वैखानससूत्रोक्तवैदिकसकलसंस्कारशालिनो वर्णाश्रमधर्मकर्मठा भगवदेकान्ता ब्राह्मणाः । नूनममीषां ब्राह्मण्यैककारणेन भागवतत्वेनैव विपरीतं बम्भ्रमीति ब्राह्मणगर्दभः ; अन्यथा वैखानसकल्पस्यापि निरधिकारि[क]त्वेनाप्रामाण्यप्रसङ्गः । अस्तु तत्प्रामाण्यम् ; सन्तु च देशान्तरे कालान्तरे वा तदधिकारिणः ; अमी तु न ते इति चेत्, देशान्तरादावप्येवं वक्तुं शक्यत्वात् ; विपरीतं वा कस्मान्न स्यात्? एवं च सति सूत्रान्तरादिष्वपि कः समाश्वासः? वैखानसानां निकृष्टजातित्ववचनविवादाभ्यां सन्देहविषयत्वमिति चेत्, आप्तग्रन्थस्थतादृशवचनाभावात् ; भावेऽप्येतेषां नि-

कृष्टजातित्वे प्रमाणाभावात्; आगमप्रामाण्योक्तसात्त्वतादिसमाख्यानिर्वाहसमत्वात्। न ह्यनेकार्थः शब्दो नास्ति, न च शब्दैक्यादर्थैक्यम्, शब्दभेदेनार्थभेदो वा, अन्यथा विलीनं तृतीयाश्रमेणापि; विवादस्य तु भवादृशजिह्वास्पन्दमात्राधीनस्य सूत्रगोत्रादावपि सुशकत्वात्। इतःपूर्वं तावन्नास्तीति चेन्न, अस्यापि विवादस्यानादित्वायोगात्, ततः पूर्वमभावात्। तथा च भवतो भविष्यतो वा विवादस्य विवादत्वाविशेषात् ततःपरं तेषामनाश्वासप्रसङ्गात्। अस्माकं तावत् तेषु संशयो नास्तीति चेत्, अस्माकं वा किमस्त्यमीषु? क तर्हि निकृष्टजात्यन्तरम्? किमस्मासु तन्न्यासीकृतम्, येनास्माभिः प्रदर्शनीयम्? न चास्माभिरनन्ता देशा द्रष्टुं शक्याः। संभवति चोच्छेदः, इदानीं क्षत्रियवैश्यमाहिष्यादिवत् तेषां केषांचिन्नामसाम्यमात्रादत्रानुप्रवेशः संभवतीति चेन्न, अस्या अपि शङ्कायाः सर्वत्र सुलभत्वात्; अस्ति च वर्णित्वभिक्षुत्वादीनां साम्यमन्यत्रापि। यश्चैवमतिशङ्कया दूयते, स तु स्वमातापितृचरितानवधारणेन स्वब्राह्मण्यमपि यथार्हमतिशङ्केतेति जितं **लोकायतेन**। उक्तं च भगवता—

* अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति। नायं लोकोऽस्ति न परो न सुखं संशयात्मनः॥ इति।

तत् सिद्धं विशिष्टाधिकारिकं वेदाविरुद्धं वैखानसादिस्मरणं प्रमाणमिति। यच्च धर्मशास्त्रादिषु अष्टादशादिपरिसंख्यानम्, न तदधिकसंख्याव्यवच्छेदपरम्, अन्येषामपि शिष्टपरिग्रहादेरविशिष्टत्वात्, अनुक्तांशदर्शनादिना उपजीव्यत्वाच्चेति॥

वेदप्रामाण्योपसंहारः॥ एवं सपरिकरो वेदः प्रमाणमिति सिद्धम्॥

* छन्दः पादौ शब्दशास्त्रं च वक्त्रं कल्पः पाणी ज्यौतिषं चक्षुषी च।
शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं वेदस्याङ्गान्याहुरेतानि षट् च॥

एवं सपरिकरवेदार्थतत्त्वनिर्णयविषया * अथातो धर्मजिज्ञासा इत्यारभ्य, * अनावृत्तिःशब्दादनावृत्तिःशब्दात इत्येवमन्ता विंशतिलक्षणी मीमांसा। तत्र च * संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिः इति **भाष्योपात्तो वृत्तिग्रन्थः**। **तत्त्वरत्नाकरे** त्वेवमुक्तम्—

* कर्मदेवताब्रह्मगोचरा सा त्रिधोद्भवौ सूत्रकारतः। जैमिनेर्मुनेः काशकृत्स्नतो बादरायणादित्यतः क्रमात्॥ इति।

अनयोर्देवताकाण्डस्य जैमिनीयत्वकाशकृत्स्नीयत्वोक्ती तादधीन्यादिविवक्षया समानार्थे गमयितव्ये। तत्र कर्मकाण्डार्थमेवं संजगृहुः—* धर्मधीर्मानभेदाङ्गप्रयुक्तिक्रमकर्तृभिः। सातिदेशविशेषोहबाधतन्त्रप्रसक्तिभिः॥ इति।

* वेदार्थे न्यायचिन्त्ये प्रथममवसितं कर्म तद्देवता चाथातः शारीरकांशे निरवधिकफलब्रह्मचिन्ता त्वसूत्रि।
तत्राध्याये परस्मिन् स्वयमुपनिषदामन्वयोऽस्याविरोधो मोक्षोपायोऽथ मुक्तिर्विषयविषयिणौ सिद्धसाध्यौ द्विकार्थौ॥

* तत्राद्येऽत्यन्तगूढाविशदविशदतच्छायजीवादिवाचः पश्चात्स्मृत्यादिकैरक्षतिरहितहतिः कार्यताभ्रेन्द्रियादेः।
दोषादोषौ तृतीयेऽप्यवरपरगतौ भक्तिरङ्गानि चाथोपासानुष्ठाप्रभावोत्क्रमसरणिफलान्यन्तिमे चिन्तितानि॥

विचारात् पूर्वमेवात्र प्राप्तमध्ययनं विधेः। अतोऽनधीतवेदस्य विचारः शास्त्रबाधितः॥
क्रमो विंशतिलक्षण्या न वैधः किंतु यौक्तिकः। अतो व्युत्क्रमचिन्तायामनौचित्यं प्रशिष्यते॥

एवं विंशतिलक्षणीश्रवणमननाभ्यां सुप्रतिष्ठितसमस्तशास्त्रार्थस्य मोक्षसाधनतया विधेयं निदिध्यासनं न वाक्यार्थज्ञानमात्रम्, तस्य रागप्राप्तश्रवणादिसिद्धत्वात्। अत एव च तस्मिन् विशेषे वेदनादिसामान्यशब्दपर्यवसानम्। न च निदिध्यासनादिकं निषिद्धम्, वरणीयत्वमेव विहितमिति वाच्यम्; स्वतन्त्रान्यकर्तृकवरणकर्मीभावस्यापुरुषतन्त्रत्वेनाविधे-

यत्वात्। अतस्तद्धेतुना प्रीतिरूपत्वेन उपासनमेव विशिष्यते; तथा सति *भक्त्या त्वनन्यया इति स्मृत्यविरोधश्च। तदेव च निदिध्यासनं प्रीतिरूपं प्रकर्षविशेषात् समाधिः। स चाष्टाङ्गः शास्त्रेषु शिष्यते। तावति च पातञ्जलप्रामाण्यमपि। आगमशीलनं च आफलान्मात्रया अनुवर्तनीयम्। स्मरन्ति च—

*स्वाध्यायाद्योगमासीत योगात् स्वाध्यायमाविशेत्। स्वाध्याययोगसंपत्त्या परमात्मा प्रकाशते ॥ इति।

यत्पुनः श्रूयते—*ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः। पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः ॥

इति, तत् कोशत्यागाभिप्रायम्; नच सादरपटुसंस्कारप्रचयसंसिद्धमेधासंपदः पुरुषस्य कोशेन किंचित् साध्यम्। मेधावीति च विशेष्यते। *धीर्धारणावती मेधा इति च नैघण्टुकाः। अधीमहे च—*मेधामनीषे मा विशतां समीची भूतस्य भव्यस्यावरुद्ध्यै इति। यद्वा मुक्तप्रायात्यन्तनिष्पन्नयोगपुरुषविषयमेतत्; न हि तस्य शास्त्रेण ज्ञातव्यं तदानीमस्ति, साक्षात्कृतसमस्ततत्त्वार्थत्वात्। यत्तु स्मर्यते—

*शास्त्रज्ञानं बहुक्लेशं बुद्धेश्चलनकारणम्। उपदेशाद्धरिं बुद्ध्वा विरमेत् सर्वकर्मसु ॥

इति, इदं तु तीव्रसंवेगिनामलसास्तिकानां च ग्राह्यम्। बुद्धिचलनहेतूनामसच्छास्त्राणां त्यागार्थं वा; तदा विशेषणसाफल्यम्; धर्मविद्यास्थानेष्वपि हि बहिर्दलेष्वतिसंरम्भो मुमुक्षोरपोद्यते—

*न शब्दशास्त्राभिरतस्य मोक्षो न चैव रम्यावसथप्रियस्य। न भोजनाच्छादनतत्परस्य न लोकचित्तग्रहणे रतस्य ॥

इति, तदेतत् शब्दं प्रमेयतत्त्वमधिजिगमिषतां प्रमाणेषु सारम्, तदभावे पुंसः पशुभिः समत्वप्रसङ्गात् इति ॥

यस्याज्ञा निगमैकहर्म्यवलभीवास्तव्यपारावती यद्भ्रूलास्यवशंवदा विधिशिवस्वस्थानसुस्थासिका।
यः सर्वत्र यथापुरं वितनुते नामानि विश्वाकृतिर्नित्यं नः प्रतिभातु सर्ववचसां निष्ठा स नारायणः ॥

॥ इति शब्दाध्याये द्वितीयमाह्निकम् ॥

॥ समाप्तश्च तृतीयः शब्दाध्यायः ॥

॥ अथ स्मृत्यध्याये प्रथममाह्निकम् ॥

स्मृतिप्रामाण्यम् ॥ अथ **स्मृतिर्निरूप्यते**—संस्कारमात्रजं ज्ञानं स्मृतिः, इति तल्लक्षणम्। ननु स्मृतिर्न प्रमाणम्, अविद्यमानविषयत्वात्, अननुभूतित्वात्, भ्रमसंभवाच्चेति चेन्न, स्मृतिमात्राप्रामाण्यस्य प्रथमाह्निके प्रतिक्षिप्तत्वात्, अबाधितबाह्यार्थदर्शनात्, अतीतानागतविषयानुमानादिबाधप्रसङ्गात्, सर्वलोकविरोधात्, अननुभूते अर्थान्तरेऽपि स्मृतिप्रसङ्गात्, स्मृतेरपि स्वप्रकाशत्वेऽपि वेद्याकारे संस्कारादिसापेक्षत्वात्। न च पूर्वानुभवपुरस्कारेणैव ग्रहणादप्रामाण्यमिति चेन्न, स्मृतिप्रमोषे तदभावात्, प्रमाणतया संमतायां प्रत्यभिज्ञायां भावाच्च। परतन्त्रत्वादप्रामाण्यमिति चेन्न, स्वहेतुपारतन्त्र्यमात्रस्य सार्वत्रिकत्वात्, अनुभवमूलत्वस्य प्रमाणमूलत्वस्य च सविकल्पकादिभिरनैकान्तिकत्वात्, संस्कारमात्रजन्यत्वस्यासाधारणत्वात्, स्वविषयप्रकाशव्यवहारयोस्तु स्मृतेरपि स्वतन्त्रत्वात्। इच्छादिवद्विषयनियमेऽपि पारतन्त्र्यमस्तीति चेन्न, तद्वदेवाज्ञानत्वप्रसङ्गात्; ज्ञानमेव हि स्वतो विषयप्रवणमिच्छसि। अत एव हि नित्ययोरपि ईश्वरचिकीर्षाप्रयत्नयोर्विषयनियमाय ज्ञानापेक्षां ब्रूषे। इच्छादीनामपि स्वतो विषयप्रावण्यं ज्ञानत्वं चास्माभिः स्वीकृतम्। ननु संस्कारवदिति चेन्न, तस्यापि स्वहेतुसमानविषयज्ञानोत्पादनशक्तस्वभावत्वात्। अतो हेतुनियतविषय-

त्वमेव फलितम् । तच्च अनुभवेऽपि समम् । तथा च समानविषयानुभवजन्यत्वतदभावाभ्यां स्मृत्यनुभवयोः पारतन्त्र्य-स्वातन्त्र्यव्यवहारो मन्दानाम् । स्वप्रामाण्यनिर्णयादावपि नानुभवापेक्षत्वनिर्बन्धः, स्वविषयप्रकाशनबाधविरहादिभिस्त-त्सिद्धेः, गृहीतमात्रग्राहित्वस्यासाधारणत्वात् । प्राभाकराणामनुमानादौ, नैयायिकादीनां धारावाहिकादौ, योगसिद्धसर्वज्ञ-वादिनां द्वितीययोगप्रत्यक्षादौ, केषांचिदीश्वरवादिनामनित्येश्वरज्ञाने च व्यभिचाराच्च । निष्प्रयोजनत्वादप्रामाण्यमिति चेन्न, तृणादिविषयप्रत्यक्षादिनाऽनैकान्त्यात्, असिद्धेश्च । स्मृत्यैव हि जगतां कृताकृतप्रत्यवेक्षणादिसिद्धिः । स्मृत्यैव हि कवयः काव्यानि कवयन्ति । स्मृत्यैव हि शब्दानुमानयोः प्रवृत्तिः । परभक्त्यादिनिष्पत्तिश्च । पूर्वानुभवस्यैव तानि प्रयोजनानीति चेत्, सर्वजगदादिकारणस्य ब्रह्मसंकल्पस्यैव किं न स्युः ? एवं चानुभवस्यापि न तत्सिद्धिः, तत्कारण-स्येति वक्तुं शक्यत्वात् । यदुक्तं **प्रज्ञापरित्राणे**—

* ज्ञातात्मज्ञानरूपत्वात् स्वप्रमेयप्रहाणतः । विषयाव्यभिचारित्वेऽप्यप्रामाण्यं स्मृतेर्मतम् ॥

इत्यादि, तदप्यनेन परिहृतम् । प्रमाणव्यवहाराभावादप्रामाण्यमिति चेन्न, पामरव्यवहाराभावस्यानैकान्तिकत्वात्, एवं परी-क्षकव्यवहाराभावस्यापि; विगीतत्वाच्च; सर्वपरीक्षकव्यवहाराभावस्य चासिद्धेः; **मानमनोहरादौ [वादि]वागीश्वरादि**भि-स्तत्प्रामाण्यस्योक्तत्वात्, कतिपयपरीक्षकव्यवहाराभावस्य चातिप्रसञ्जकत्वात्, **अक्षपादादि**व्यवहाराव्यवहारयो**र्बृहस्प-त्यादि**व्यवहारवदस्माभिर्नातीवादरणात्, **इन्द्रपाणिन्यादी**नां तु सर्वसंप्रतिपत्तेरबाधाच्चादरात्, **पाराशर्यादी**नां प्रमाण-परिगणनानधिकृतत्वेनतदनुक्तेरप्रयोजकत्वात्, आगमः प्रमाणमित्यपि व्यवहाराभावात् । * प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम् । इत्यादिषु च प्रत्यक्षादिमूलस्मृतेः प्रत्यक्षादिसमानचर्चत्वेन पृथग्व्यवहाराभावोपपत्तेः । प्रमाणहेतुका स्मृतिः प्रमाणमेव, अविसंवादात्, इति । उक्तं च **न्यायतत्त्वे** स्मृत्युदासीनभेदके चतुर्थेऽधिकरणे—* अप्रमाणमूलत्वं तु उभयोरपि नास्ति, व्यभिचाराभावेनानधिगतार्थं प्रमाणमिति विशेषणस्यायुक्तत्वात् । प्रमिते प्रमित्यनुपपत्तिः क्व दृष्टा ? स्मृतौ चेत्, प्रतिज्ञैव दृष्टान्तः स्यात्; ज्ञानान्तरे चेन्नानुजानामि इत्यादि । **तत्त्वरत्नाकरे** च—

* यथार्थनिश्चयो मानं तद्धेतुश्चेति सूरयः । नातिव्याप्तिः स्मृतौ व्याप्तिर्यथार्थेन हि सा प्रमा ॥

इत्युक्त्वा अस्योत्तरार्धविवरणेऽप्युक्तम्—* अनुभूतविषयासंप्रमोषः स्मृतिः; यथा स घट इति । ननु तामपि व्याप्नोति लक्षणम्; सत्यम्; तद्व्याप्तौ नातिव्याप्तिः, तस्या अपि लक्ष्यपक्षे निक्षेपात् ।

* लक्ष्यालक्ष्ये अनालक्ष्य क्षिप्यते लक्षणं कथम् । लोकधीव्यवहा[राभ्यां]रं हि लक्ष्यालक्ष्यावधिं विदुः ॥

इत्यादि । यत्तु—* अनुभवः प्रमाणम्, स्मृतिव्यतिरिक्तं ज्ञानमनुभवः इत्यादिना स्मृतेरप्रामाण्यमुक्तमिव **श्रीविष्णुचित्तैः**, तन्नूनं परमतान्वारोहेण । अत एव हि तैः स्वतःप्रामाण्यनिर्णयदशायामन्यथा व्यवहृतम् । तथा हि—* तस्मात् सिद्ध-मेतत् प्रमाणानां यथार्थत्वलक्षणं प्रामाण्यं गुणज्ञानानपेक्षात् स्वप्रमाणादेवावसीयते, स्वकीयात् कारणादेव ज्ञायत इति च इति । तथा * अर्थतथात्वं गुणसंवादज्ञानानपेक्षज्ञप्ति, तदभावेऽपि ज्ञायमानत्वात् इत्यादौ । * न च हेतोरसिद्धत्वम्; तथा हि—रजतज्ञानस्यार्थतथात्वं नाम रजतविषयत्वम्; तच्चासति बाधके रजतग्राहिणैव ज्ञानेनावगम्यते इत्यादि । अतो यथावस्थितवस्तुनिश्चयात्मकत्वमेव प्रामाण्यं प्रमाणज्ञानानामात्मीयात् कारणाज्ज्ञायते, न गुणसंवादज्ञानमपेक्षते, इति । तथा प्रमाणानां यथावस्थितवस्तुनिश्चयात्मकत्वमेव प्रामाण्यम् । तदाभासयुक्तयः पूर्वपक्षिणोच्यन्ते । सिद्धान्तेऽपि विवेक-प्रदर्शनमेवेति । यदि चानुभव एव प्रमा[णं निश्चितम्]णम्, तन्न युक्तमुपयुक्तं वा । न च सर्वमनुभवं प्रमाणतया

व्यवहरन्ति, पीतशङ्खभ्रमादिष्वदर्शनात्; नापि सर्वां स्मृतिमप्रमाणतया, प्रमाणमूलस्मृतिषु तदभावात्। *अगृहीतग्रहण-शक्तं प्रमाणम् इति **वरदविष्णुमिश्रो**क्तिरपि परमतान्वारोहेण नेतव्या। यत्तु **आगमप्रामाण्ये** प्रोक्तम्—

*प्रमाणान्तरदृष्टार्थविषयव्यापिशेमुषी। प्रमाणमेव तत्पूर्वं न चेत् स्वार्थं विगाहते॥

इति, इदमप्यनुवादवाक्यस्यान्यपरतया स्वार्थप्रामाण्यव्यवच्छेदार्थम्; अन्यथा स्मृतिप्रमोषे प्रमुषिततदंशे पूर्वानुभव-पुरस्कारेण स्वार्थावगाहनासिद्धेः कथं तत्र स्मृतित्वनिबन्धनमप्रामाण्यं भविष्यति?

यत्तु **भाष्ये** सन्मात्रग्राहिप्रत्यक्षनिराकरणदशायामुक्तम्—*अश्वे हस्तिनि च संवेदनयोरेकविषयत्वेनोपरितनस्य गृहीतग्राहित्वात् विशेषाभावाच्च स्मृतिवैलक्षण्यं न स्यादिति, न तत्र स्मृतेरप्रामाण्यं सूचितम्, प्रकारान्तरेणापि वैलक्षण्य-सिद्धेः, तदपेक्षया च प्रसङ्गोपपत्तेः। यच्चापरं **भाष्यम्**—*इन्द्रियजन्मनः प्रत्यक्षस्य ह्येष स्वभावनियमः, यत् स्वसमकाल-वर्तिनः पदार्थस्य ग्राहकत्वम्, न तु सर्वेषां ज्ञानानां प्रमाणानां च, स्मरणानुमानागमयोगिप्रत्यक्षादिषु कालान्तरवर्तिनो-ऽपि ग्रहणदर्शनादित्यादि, तत्रापि परस्यानिष्टप्रसङ्गाय तदभिप्रायानुधावनेन विभज्योदाहरणं युक्तम्। यच्च **शास्त्रयोन्य-धिकरणे** भाषितम्—*भावनाप्रकर्षपर्यन्तजन्मनस्तस्य विशदावभासत्वेऽपि पूर्वानुभूतविषयस्मृतिमात्रत्वान्न प्रामाण्यमिति कुतः प्रत्यक्षता? इति, इदमपि न साक्षात् सिद्धान्तस्थम्; नच याथार्थ्यं तत्र प्रतिक्षिप्तम्। एवमन्यदपि भाव्यम्। स्मृत्य-प्रामाण्यवादिनोऽपि वैशेषिकास्तां याथार्थ्याद्विद्याकोटौ पठन्ति। तत एव च तदेकदेशिभिरपि तत्प्रामाण्यं स्वीकृतमिति॥

॥ इति न्यायपरिशुद्धौ स्मृत्यध्याये प्रथममाह्निकम्॥

॥ अथ द्वितीयमाह्निकम्॥

प्रमाणसंख्या॥ एवं तावद्विवेचितं प्रमाणम्। **चार्वाका**स्तु प्रत्यक्षमेकं प्रमाणमित्याहुः। तेष्वेव केचित् अनु-मानस्य प्रत्यक्षेऽन्तर्भावमिच्छन्ति; केचित्तु अप्रामाण्यम्। प्रत्यक्षमनुमानं च **काणादाः सौगताश्च**। तत्र पूर्वे शब्द-स्यानुमानेऽन्तर्भावमाहुः; परे तु केचित् अन्तर्भावम्; केचिदप्रामाण्यम्। ते चागमं च **सांख्याः, भूषण**मतानुवर्तिनश्च। तत्र वेदस्यानादित्वं पूर्वे परिजगृहुः; उत्तरे त्वीश्वरसृष्टताम्। तानिच स्मृतिं च **वैशेषिकैकदेशिनो**ऽस्मत्सिद्धान्तैकदेशि-नश्च। स्मृतिरहितानि सोपमानानि तान्यक्ष**पाद**सूत्रस्वारस्यानुसारिणः। तान्येव सार्थापत्तिकानि **प्राभाकराः**। अनुप-लब्धिषष्ठानि तान्येव **[कौमारिलाः] तौतातिताः**, तत्प्रलोभनरुचयो मायावादिनश्च। तान्येव संभवैतिह्ययुक्तानि पुराण-शरणाः। अद्यतनप्रमाणपरिग्रहोपलम्भप्रक्रियेयम्। अनन्ते पूर्वापरकाले कः किमङ्गीकुर्यात्? किं वा बहिष्कुर्यात्? इति को जानात्यन्यत्र कृत्स्नसाक्षात्कारिणस्तस्मादेकस्माद्देवात्। इह च न्यूनवादिनस्तदवसरे निरस्ताः। अधिकतया पराभि-मतानां तु अन्तर्भावो वक्तव्यः। तत्र यथा **प्रत्यभिज्ञा**दीनां प्रत्यक्षादिष्वेव निवेश इष्यते, एवमन्येषामपि॥

प्रत्यभिज्ञा॥ प्रत्यभिज्ञा तावत् ग्रहणात्मिकैवेत्येके। तथा हि—*प्रत्यभिज्ञायामपि स्मृतिरनुभव इत्यंश-भेदोऽ[स्त्विति]स्ति चेत् इत्याशङ्क्य प्रत्युक्तं **श्रीविष्णुचित्तैः**—*[न ह्येकस्मिन्नेवार्थे ज्ञानस्यांशद्वयम्] यदि विषय-भेदः, तदा अंशभेदः संभवेत्; ऐक्यमेव हि निरंशं प्रत्यभिज्ञाप्रत्यक्षविषयः। कथं संस्कारः अपरोक्षधीजनकः? इति चेत्, न, [भवत्येव जनकत्वमि] चक्षुरादीन्द्रियसहकृतस्य संस्कारस्य ज्ञातुरैक्यात् तदिदमित्यपरोक्षधीहेतुत्वोपपत्तेः। अपरोक्षार्थैक्यसाधिका।

* सा प्रत्यभिज्ञा सोऽयं वै पुमानित्येवमात्मिका । संस्कारमात्राजन्यत्वान्न स्मृतिर्मानमेव तत् ॥ इति ।

दीपे च * अनुस्मृतेश्च इति सूत्रे भाषितम्—* प्रत्यभिज्ञानाच्च न घटादेः क्षणिकत्वम्; तदेवेदमिति प्रत्यभिज्ञायते; प्रत्यभिज्ञा हि नामातीतवर्तमानकालवर्त्येकवस्तुविषयमेकं प्रत्यक्षज्ञानम् । तस्य कालद्वयसंबन्धविशिष्टमेकमेव वस्तु विषयः । न च तदित्यंशः स्मरणम्, इदमंशश्च ग्रहणम्, अतीतसंबन्धिनीन्द्रियसंप्रयोगाभावात् इति वाच्यम्, तदिदमिति सामानाधिकरण्येन ग्रहणस्यैकत्वस्फुरणात् । पूर्वानुभवजनितसंस्कारसचिवेन्द्रियसंप्रयोगयुक्तस्य पुरुषस्य तथा ग्रहणमुपपद्यत एव । अन्वयव्यतिरेकाधीनं हि सर्वत्र सामग्रीपरिकल्पनम् इति । अन्ये तु अत्र धीभेदबाध्यपरिहारौ मत्वा तदिदमंशयोस्तदंशे संस्कारान्वयव्यतिरेकानुविधानदर्शनात् परोक्षरूपतया [इदमंशे च प्रत्यक्षरूपतया] चोभयात्मकत्वमाहुः । तन्मते संस्काराधीनप्रकाशा स्मृतिरिति लक्षणम्, अपरोक्षज्ञानं प्रत्यक्षम्, उभयलक्षणयोगात् प्रत्यभिज्ञायामुभयात्मकत्वम्, इति । अभ्युपगन्तव्यं चास्मत्सिद्धान्तिभिः सर्वैः प्रत्यक्षेतरज्ञानानां परोक्षापरोक्षरूपत्वम्, स्वयंप्रकाशत्वात्, सर्वज्ञानानां वेद्येतरांशापेक्षया च प्रत्यक्षत्वात् । उक्तं चेदं **श्रीविष्णुचित्तै**रपि—* स्वप्रकाशकं विषयप्रकाशकं चैकमेव ज्ञानम्; तत्र स्मृतिरनुभूतिरिति कुतो भेदः? इति परिचोद्य, * प्रकाशमानभेदादिति ब्रूमः; यथा—गौरयमित्येकस्मिन्नेव ज्ञाने प्रकारिप्रकारविषयभेदेन ज्ञानांशभेदः; यथा च घटपटावित्येकस्मिन्नेव ज्ञानेंऽशभेदः; यथा वा पराभ्युपगतभ्रमज्ञानेष्वधिष्ठानांशे प्रामाण्यम्, इतरत्राप्रामाण्यं चेति परिहारात्; तथा *स्मृतेः स्वप्रकाशांशोऽपि संस्कारमात्रज एव, इन्द्रियादिप्रतिनियतकारणान्तराभावादिति परिचोद्य * नैवम्, ज्ञानानां प्रकाशमानत्वस्य स्वाभाविकत्वादिति परिहाराच्च । तस्मात् सर्वत्र विषयापेक्षयैव अपरोक्षत्वानुमितित्वस्मृतित्वादिविभागः । जातिसङ्करासङ्करादि तु दर्शनादर्शनाभ्यां व्यवस्थाप्यम्, औपाधिकसंकरादिवच्च । तदेवमुभयात्मकत्वोपपत्तेः प्रत्यभिज्ञाऽप्युभयात्मिकेति ॥

प्रत्यभिज्ञाऽप्यभिज्ञावत् त्रिधा चाक्षादिभेदतः । तत्तत्संस्कारसंभेदमूलत्वान्नत्रधा भवेत् ॥
प्रत्यक्षतोक्ति**र्दीपादौ** प्रदर्शनपरेष्यताम् । न हि लिङ्गादिभिः सोऽयमिति ज्ञानं न जायते ॥
शब्दजं प्रत्यभिज्ञानमुपजीव्य प्रवर्तते । शाखान्तराधिकरणन्यायश्च क्रतुविद्ययोः ॥
दीपादिष्विव सर्वत्र बाधकादेरसंभवात् । विगीतं प्रत्यभिज्ञानं प्रमा[णम]णं सविकल्पवत् ॥
करणाकरणादीनां कालभेदाद्युपाधितः । अविरोधान्न बीजादौ शक्यते भेदकल्पनम् ॥
अन्यथा देशभेदेन करणाकरणादिभिः । एकं जगति नैव स्यादिति स्यात् सर्वशून्यता ॥
तस्मात् विरुद्धसंस्पृष्टविषयप्रत्यभिज्ञया । स्थिरत्वमात्मनां सिद्धं बाह्यानामपि वास्तवम् ॥

प्रतिसन्धानम् ॥ प्रतिसन्धानमप्यात्मगोचरं प्रत्यभिज्ञाविशेष एव; योऽहमद्राक्षं स एव स्पृशामि, इत्येवमादिरूपत्वात् । प्रतिसन्धिरर्थद्वयविषयैकबुद्धिरित्येके । तत्रापि पृथगनुभूतानेकार्थगोचरैककर्तृकैकबुद्धिरिति पूरणीयमिति ॥

संवादः ॥ संवादो नाम ज्ञानजात्यन्तरमिति केचित्; तदयुक्तम्, संख्यान्तरासंभवात् । यत्तु **वरदविष्णुमिश्रै**रुक्तम्—* गृहीतार्थविषयं शब्दकारणकं ज्ञानं संवाद इति, तदपि शाब्दावान्तरभेदे संज्ञाविशेषनिवेशमात्रपरम्; नहि गृहीतार्थविषयत्वे शब्दशक्तिप्रसूतत्वमपैति; गृहीतमात्रगोचरप्रमाणान्तरेऽपि तदन्यत्वप्रसङ्गात्; भवति हि पर्वतोऽयमग्निमानिति शब्दश्रवणानन्तरं धूमं परामृशतोऽपि तादृशी बुद्धिः । तथा द्वितीययोगिप्रत्यक्षादावपि द्रष्टव्यम् । अनपेक्षितवादिकमपि श्रुतविषयानुमानादौ समम् । न चापेक्षायत्तं प्रामाण्यं भेदोऽभेदो वा? तृणादिप्रत्यक्षस्यापि तथा प्रसङ्गात्

इत्युक्तम् । किमर्थं तर्हि वेदानां वेदान्तानां चाप्राप्तविषयत्वं समर्थ्यते? इति चेत्, अतथाप्राप्तौ साक्षादप्रामाण्यप्रसङ्गात्; तथाऽप्राप्तावपि अनपेक्षिततया प्रेक्षावद्भिर्निरर्थकप्रयासभीरुभिरत्याज्यत्वापातेन फलतोऽप्रामाण्यप्रसङ्गात्, इति पश्य ॥

उपमानम् ॥ उपमानमपि यदि गृह्यमाणपदार्थगतसादृश्यविज्ञानात् स्मर्यमाणपदार्थगतसादृश्यविज्ञानम्, तदा स्मृतिः, तत्तद्वस्तुसंस्थानविशेषातिरिक्तस्य सादृश्यस्याभावात्, तस्य च पूर्वदृष्टत्वात्, स्मर्यमाणत्वाच्च । व्यवहारोऽप्यस्त्व-पूर्वः तत्तद्व्यवहारवत् प्रतिसंबन्धिविशेषपरामर्शोपाधिकः । यद्वा यो यत्सदृशः, स तद्गतसादृश्यप्रतियोगी; यथा—मिथः स्व-हस्तौ इति व्याप्तिसिद्धौ, गौरेतत्सदृशः, एतद्गतसादृश्यप्रतियोगित्वात् इत्यनुमानात् स्मर्यमाणगतसादृश्यसिद्धिः । अन्यथा गृह्यमाणगतवैसादृश्यज्ञानात् स्मर्यमाणगतवैसादृश्यप्रतीतिरपि मानान्तरं स्यात् । सा चेत् अर्थापत्तिः, सादृश्यधीरपि तथा किं न स्यात्? इति । अथवा युगपदेव तत्सदृशोऽयमिति प्रत्ययेनैवोभयवृत्तिसादृश्यस्फुरणान्न तद्धेतुकम्, अन्यथा पृथगनु-भूतयोस्तदानीमप्रतीतसादृश्ययोः परस्ताद्युगपत् स्मर्यमाणयोर्युगपदेव प्रतीयमानसादृश्ययोः को निर्वाहः? तत्रापि वा प्र-माणान्तरं कल्प्यते? यथा गौः तथा गवयः, गोवत् द्विशफो न भवत्यश्वः, दीर्घग्रीवः प्रलम्बोष्ठो विकटाकृतिः पशुः क्रमेलकः, इति तु साधर्म्यवैधर्म्यधर्ममात्रविषयम् । त्रिविधमप्यतिदेशवाक्यमागम एव । यत्तु श्रुतातिदेशवाक्यस्य गवया-दावतिदेशवाक्यार्थप्रत्यभिज्ञानमुपमानम्, तच्च व्युत्पत्तिफलकमिति, तदप्यनुपपन्नम्, प्रागेव व्युत्पत्तिसिद्धेः । यत्तु—

* सादृश्यस्य निमित्तत्वान्निमित्तस्याप्रतीतितः । समयो दुर्ग्रहः पूर्वं शब्देनानुमयाऽपि वा ॥

इति, तत्र निमित्तस्याप्रतीतित इति त्वसिद्धम्, गवयत्वादेरेव जातिविशेषस्य गोसादृश्याकारोपलक्षितस्य प्रथममेव वाक्यार्थ-तयाप्रतीतेः—गोसादृश्योपलक्षितः कश्चि[दर्थ]द्व्यक्तिविशेषो गवय इति हि प्रतीतिः । पश्चात्प्रत्यक्षितगवयस्य तद्वैशद्यमात्रमेव । उक्तं च **श्रीविष्णुचित्तैः**—* गोसदृशो गवय इति गोसादृश्यैकाधिकरणं सामान्यं वाच्यमिति व्युत्पन्नम्, प्रथमं वाक्या-र्थतया प्रतीतेः । गोसादृश्योपलक्षितस्यानिर्णये पश्चादप्यनिर्णयः । अन्यथानिर्णये तथा पश्चादपि । ततो वाक्यश्रवण-वेलायामेव निर्णीतम् इति । एवं चानभ्युपगमे कथमिन्द्रादिशब्दव्युत्पत्तिः? न ह्यत्र निमित्तभूतसंस्थानविशेषादि-दृष्टिः । न च नित्यं तत्राव्युत्पत्तिः, तदर्थविशिष्टवाक्यार्थबोधापातात् । एवं नित्यातीन्द्रियविषयसंस्कारादिशब्दानामपि नित्यमव्युत्पत्तिरेव स्यात् । तत्र चेत् कथंचिन्निर्वाहः, तथाऽत्रापि । तत् सिद्धं नोपमानमतिरिक्तम् इति ॥

अर्थापत्तिः ॥ अर्थापत्तिस्त्वनुमानमेव; तथा हि—अनुपपद्यमानदर्शनादुपपादककल्पनं नाम व्याप्याद्व्यापक-ज्ञानम्, अव्याप्यस्य तेन विनाऽनुपपद्यमानत्वाभावात्, अव्यापकस्य च तदुपपादकत्वायोगात्, इति । प्रमाणद्वयविरोधे सति विषयव्यवस्थापनमर्थापत्तिरित्यपि न वाच्यम्, प्रमाणयोः सतोर्विरोधाभावात्, विरुद्धयोरपि प्रामाण्यायोगात् । ननु देवदत्तस्य जीवने कुतश्चित् प्रमाणात् प्रमिते, जीवता क्वचित् स्थातव्यम्, इत्यविशेषेण देशसामान्यसंबन्धावगतौ गृह-मप्यास्कन्दन्त्यां मत्यां प्रत्यक्षे च गृहे तदभावं प्रतिपादयति स्पष्टो विरोधः, अतस्तच्छान्त्यै बहिर्भावकल्पनमर्थापत्तिः, इति; मैवम्, क्वचिदिति विदितस्य जीवनस्य नियमाभावात्, बहिर्विद्यमानतासन्देहे निश्चयरूपेण गृहाभावप्रत्यक्षेण प्रतिस्पर्धितुमसामर्थ्यात् । न च विरुद्धविषययोर्वास्तवं कुत्रापि समबलत्वं समस्ति । उभयाप्रामाण्ये तु कथंचित् स्यात् । आभिमानिकबलसाम्येऽपि तथैव । यदा वैषम्यग्रहः, तदा तत एव बलाबलसिद्धौ किमर्थापत्त्या साध्यम्? अतः केवल-निरवकाशविरोधिविशेषसन्निधौ सति सावकाशं सामान्यं सङ्कोचयितव्यमिति व्यवस्था स्यात् । साऽपि च तथैव व्याप्तेः, इत्यनुमानफलमेव; अन्यथा विरोधिविषयत्याग इवाविरोधिविशेषपर्यवसानादावपि मानान्तरक्लृप्तिः किं न स्यात्? एव-

मनभ्युपगमे च धूमानुमानादावप्यर्थापत्तित्वप्रसङ्गः । अग्निं विनाऽनुपपाद्यमानत्वस्य लिङ्गप्रत्यक्षरूपप्रमाणद्वयविरोधस्य च वक्तुं शक्यत्वात् । धूमो हि कारणभूतं वह्निमाक्षिपति, प्रतिक्षिपति तु प्रत्यक्षम्, इति विरोधे पर्वतार्वाग्भागे वह्निरिति व्यवस्थाकल्पनस्यार्थापत्तित्वं स्यात् । व्याप्तिनिरूपणमन्तरेण गमकता गमकस्यैव [तथा] धर्मान्तरयोगितया गम्यते इत्यादि-भेदास्त्वाशामात्रकल्पिताः, इति । उक्तं च **श्रीविष्णुचित्तैः**—अर्थापत्तिरनुमानम् इत्यादि । केचित्तु केवलव्यतिरेकिणि अर्थापत्तिसंज्ञां निवेशयन्ति । तस्य प्रागेव निरासान्न प्रमाणवर्गानुप्रवेशः । अनुप्रवेशेऽपि वा न पृथक्त्वम् । यत्तु **आगमप्रामाण्ये** * अनुभवश्चेन्द्रियलिङ्गशब्दसदृशान्यथानुपपद्यमानार्थपूर्वकः इत्यादिषु उपमानार्थापत्तिपरिग्रहः नतिभाति, तदपि पूर्वपक्षप्रदेशगतत्वान्न सिद्धान्तत्वाय कल्पते ॥

अभावः ॥ अभावस्त्वस्मन्मते भावान्तरात्मा । स चाक्षादिभिर्यथासंभवं सिध्यति । अभावात्मना तु ग्रहणेऽपि प्रतियोगिस्मरणादिसहकारिसहितानि तान्येव प्रमाणानीति न तदतिरिक्तकल्पनावकाशः । अत एव हि प्रातर्गजाभावादि-विज्ञानमपि निर्व्यूढम्; दृष्ट एव हि देशकालादिसंसर्गादिविशेषः पश्चात् प्रतियोगिस्मरणादिमतः पुरुषस्य तदभावात्मना धियमधिरोहति, स्मर्तव्यस्य स्मरणाभावाद्वा; तत्र तदभावानुमानम् । एवमतिरिक्ताभावपक्षेऽपि निर्मूला प्रमाणान्तर-क्लृप्तिः; सघटं भूतलमितिवत् अघटं भूतलमित्यपि ह्यपरोक्षा प्रतीतिः; न चाधिकरणग्रहणोपक्षीणमिन्द्रियम्, गुणा-दिष्वपि प्रसङ्गात्; अतिरेकवदनतिरेकेऽप्यज्ञातकरणत्वादीन्यनुमानानि च सुलभानीति ॥

संभवः ॥ संभवोऽप्यनुमानमेव, सहस्रे शतं संभवति इत्यादेः पूर्वानुभूतसहस्रशतव्याप्तिबोधनत्वात्, संभवति क्षत्रिये शौर्यमित्यादेः संदेहात्मकत्वेनाप्रमाणत्वात् । अविरोधनिश्चयरूपत्वेऽपि तदविरोधनिश्चायकप्रमाणान्तरे विश्रमः ॥

ऐतिह्यम् ॥ ऐतिह्यं तु प्रमाणमूलं चेदागमः; तदाभासमूलं चेत् तदाभासः ।

चेष्टादि ॥ एवं चेष्टालिप्यक्षरादिकमप्यभिप्रायवर्णविशेषाद्यविनाभूतमनुमानमेव । चेष्टायां तु **वरदनारायण-भट्टारकै**रेवमुक्तम्—

* शाब्दस्य व्यवहारस्यानुकारश्चेष्टयाऽपि हि । क्रियते शाब्दविज्ञानयोगिनां स्वार्थबोधिका ॥
अनादिव्यवहारेषु चेष्टा विज्ञातशक्तिकाः । बोधिकाः स्युर्यथाऽऽध्यक्षमिति चेद्भवतो मतम् ॥
चेष्टा गिरो वा स्वीकार्याः परप्रत्यायनाय हि । अनादयो गिरामेवानादिता [ज्ञायते स] ज्यायसी तदा ॥
चेष्टा सामयिकी शाब्दव्यवहारानुसारिणी । अस्यैवं बोधिकेत्येवं भरताद्यागमे स्थिता ॥
दृश्यतेऽनादिराम्नायोऽस्मर्यमाणप्रणेतृकः । इत्यादि ।

तत्त्वरत्नाकरे त्वेवमुक्तम्—* व्युत्पन्नबोध्यबोधकनियमं चेत् चेष्टितं शाब्दम् । अनियतमपि सहदृष्ट्या स्मार-कमिति न पृथगेष्टव्यम् इति । लिप्यक्षरेषु [च हि] तु अयं गकारः अयं घकारः इति वर्णात्मना ज्ञानमप्रमाणमेव । एतेन चिह्नेनेदमक्षरं जानीहीत्यभिप्रायेण लिप्यक्षरसंबन्धग्राहकाणां प्रवृत्तिः । ततश्च व्याप्तिसिद्धिः । एषा लिपिरेत-द्वर्णविशेषाभिप्रायपूर्विका, भ्रमादिरहित [वर्णप्रत्ययव] वर्णाभिप्रायवत्पुरुषलिखितैतल्लिपित्वात्, संप्रतिपन्नव्युत्पत्तिकाललिपि-वत्, इत्यादिरूपः प्रयोगो द्रष्टव्यः ॥

प्रतिभा ॥ यत्तु प्रतिभायामुक्तं **तत्त्वरत्नाकरे**—

* ननु च प्रतिभा काचिद् यथार्था मानमिष्यताम् । बाह्यार्थनैरपेक्ष्येण बाह्यज्ञानक्षमाऽस्तु सा ॥

विशिष्टकालपुरुषाद्यपेक्षोत्कर्षसंभवा । सत्यम्, कालादिभेदस्तु दुर्विवेचोऽस्मदादिभिः ॥
सन्नप्यसौ व्यवहृतौ नोपयोगीत्युपेक्ष्यते । प्रतिभायाः फलं दृष्टं यदा प्रामाण्यनिश्चयः ॥
त[दा]दन्यतः कृतार्थत्वात् प्रेक्ष्यते न परीक्षकैः । पुण्येषु पुरुषेष्वेषा भूयिष्ठं सत्यदर्शिनी ॥
तस्मात् **पतञ्जलिः** प्राह प्रतिभा चेति तां प्रमाम् ॥ इति,

तदपि प्रागुक्तयोगिप्रत्यक्षविशेषविषयमेव । नन्वेवम्, तदपि प्रमाणत्रित्वं चतुष्ट्वं वाऽनुपपन्नम्, प्रत्यक्षपरोक्षरूपेण द्वित्वस्यैव युक्तत्वात्, इति चेन्न, अतिप्रस[ङ्गित्वात्]ङ्गात् । तथा हि—

बहुष्वेकैकमुद्धृत्य तदन्येष्वैकराश्यतः । द्वैधक्लृप्तौ घटादावप्येवमेव प्रसज्यते ॥
अनुमाननुमानत्वशब्दाशब्दविभागतः । प्रमाणद्वित्वमेवं ते वद किं वा न रोचते ॥
प्रत्यक्षस्य तदन्याभ्यां वैजात्यग्रहणाद्यदि । तयोरपि स्वेतराभ्यां वैजात्यं स्फुटमेव नः ॥
अतोऽक्षलिङ्गशब्दाख्यासाधारणनिदानतः । उपलक्ष्यं प्रमात्रित्वं चतुष्ट्वं वाऽपि संस्मृतेः ॥
स्पष्टमस्पष्टमिति च जैना यद् द्वैधमूचिरे । तत् प्रत्यक्षपरोक्षत्वविभागान्न विशिष्यते ॥
अतो न तावति द्वैधे साधिते विवदामहे । परोक्षस्यैकमानत्वं दुर्वचं भेदसाधनात् ॥
नन्वध्यक्षेऽपि भेदोऽस्ति बाह्यान्तरविभागतः । दिव्यादिव्यतया चक्षुःश्रोत्रादिभिदयाऽपि च ॥
तद्वत् परोक्षस्यैकस्य प्रमाणस्य विभागतः । अनुमानागमभिदा कथं नाभ्युपगम्यते ॥
दत्तोत्तरमिदं किंच दृष्टमेतच्छ्रुतं त्विदम् । एतत्त्वनुमितं चेति लोकोक्तिरिह साक्षिणी ॥
यतः कुतश्चिद् वैधर्म्यं साधर्म्यमपि केनचित् । सर्वत्र सुलभं काममिहापि परिगृह्यते ॥
अतः स्मृत्यनुभूत्याख्यविभागादपि नोचितम् । प्रमाणद्वित्वमित्येवं प्रागुक्तैव सुपद्धतिः ॥
त्रिविधोऽनुभवश्चैव तन्मूला च तथा स्मृतिः । इति षोढा विभागे तु न विमन्यामहे वयम् ॥
अनुभूतिविभागेन तन्मूलायाः स्मृतेरपि । विभागस्य गतार्थत्वादैकराश्यमुदाहृतम् ॥
अतो हि तस्यास्तन्मूलेष्वन्तर्भावविवक्षया । प्रमाणवर्गं त्रित्वेन प्राञ्चः केचिद्विविञ्चते ॥

एवमन्यदपि चिन्त्यम्, इति । ननु अनेन किं प्रमाणचिन्ताक्लेशेन? अविमृश्यापि प्रमाणवर्गमुपलम्भान्वयव्यतिरेकादिवशात् पश्वादीनामिव मनुष्यादीनामपि लौकिकेष्वर्थेषु प्रवृत्तिनिवृत्तितत्प्रयोजनादिकं निरुपद्रवं सिध्यति । अलौकिकेष्वपि तत्तद्विधायकैस्तदनुग्राहकैश्च कल्पसूत्रादिभिश्चरितार्थधियां किमनेन पिष्टपेषणादिकल्पेन वृथा विमर्शेनेति चेत्, मैवम्;

अवकाशोपरोधाय तत्त्वोपप्लवमिच्छताम् । अविपर्याससिद्ध्यै च वि[चिन्त्या]शोध्या मानपद्धतिः ॥
प्रतिसंधाय च फलं प्रारम्भाह्निकदर्शितम् । साध्यप्रमेयसंशुद्ध्यै साङ्गे माने परिश्रमः ॥
प्रत्यक्षितसमस्तार्थैर्योगीन्द्रैरपि लङ्घ्यते । प्रमाणप्लवमा[रुह्य]लम्ब्य तत्त्वविप्लवसागरः ॥

तस्मादुक्तरीत्या शुद्धिः कर्तव्येति ॥

शुद्धन्यायनिषेविता श्रुतिशिरःशुद्धान्तसिद्धान्तिनी भद्राणां प्रतिपादनाय भजतु प्रत्यक्षतामक्षताम् ।
पत्यौ नित्यरसे समं करुणया पातिव्रतीं बिभ्रती सर्वग्रन्थिविमोचनी भगवती सा मे समीची[म, स्मृ]कृतिः ॥

॥ इति न्यायपरिशुद्धौ स्मृत्यध्याये द्वितीयमाह्निकम् ॥

॥ समाप्तश्च स्मृत्यध्यायः चतुर्थः ॥

॥ अथ प्रमेयाध्याये प्रथममाह्निकम् ॥

एवं सपरिकरं प्रमाणं विशोधितम् । अथ प्रमेयं प्रदर्शयामः । तत्र यत् पुनः षट्सप्तादिरूपेण पदार्थान् विभज्य वैशेषिकादयश्चिन्तयन्ति, तत्र साक्षादपवर्गाङ्गमिति तैरेवाभ्युपेतम् । अपि च—

विद्यमानपरित्यागादसतां च परिग्रहात् । व्यामोह[न]ना विमर्शास्ते बहिष्कार्या मुमुक्षुभिः ॥

सावान्तरविभागेषु तत्तच्चिन्ताश्रमेष्विह । अविस्तराय दिङ्मात्रं दोषाणामभिदध्महे ॥

पदार्थाः ॥ यत् तत्राहुः—* अभिधेयः पदार्थः । स च भावाभावभेदेन द्विधा इति, तत्तावत् *असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेःशब्दान्तराच्च इत्यारम्भणाधिकरणसूत्रेणाभावस्य पराभ्युपगताभावाभावस्यैव भावान्तरत्वसमर्थनात् प्रतिक्षिप्तम् । यदपि च द्रव्यगुणकर्मसामान्यविशेषसमवायरूपेण भावरूपाणां पदार्थानां षोढा परिसंख्यानम्, तदपि **वैशेषिकाधिकरणे** *समवायाभ्युपगमाच्च साम्यादनवस्थितेः इति सूत्रकारैरेव समवायाख्यपदार्थान्तरदूषणेन परास्तम् । अभावतदधिकरणयोर्विशेषणविशेष्यभावसन्निधिविशेषादिशब्दवाच्यसंबन्धान्तरानुमानमपि समवायदूषणच्छाययैव दूषितमेव ॥

विशेषः ॥ यश्चान्योन्यमत्यन्ततुल्येषु मुक्ता[त्मा]दिषु मिथो व्यावृत्तधीजननाय द्रव्यत्वादिहेतुना विशेषाख्यः पदार्थः कल्प्यते, सोऽपि तुल्यन्यायतया सूत्रकारैर्दूषितप्राय एव । *महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् इत्यनुपपन्नपरमाणुद्व्यणुकादिप्रक्रिया[तिदेशेन] निदर्शनेनान्येषामपि तदभ्युपगतानामनुपपन्नत्वस्य सूचितत्वाच्च । अपि चानित्येषु द्रव्येषु तावज्जातिगुणादिभिरेव व्यावृत्तधीः सिध्यतीति नित्येषु हि **विशेषो**ऽन्यः कल्प्यते ; यथाऽऽहुः—*नित्यद्रव्यवृत्तयोऽन्त्याविशेषा इति, तथाऽपि वेदान्तिभिर्दिक्संज्ञकविभुपदार्थान्तरानभ्युपगमादाकाशस्य च कार्यत्वादिश्रुतेः प्रकृतिविकारभूतपृथिव्याद्यंशविशेषातिरिक्तपरमाणुजालप्रतिक्षेपात् तथाविधपरमाणूनां चावस्थाप्रवाहस्यानाद्यन्तत्वान्न तत्र विशेषक्लृप्तिः । ततः कालात्मानौ परिशिष्येते । तत्रापि चेतनानां न कालतत्त्वमात्मतया भाति ; क्षणलवाद्यवस्थापरंपरायोगित्वपराक्त्वाचेतनत्वादिभिरेव तस्मात् स्वेषां स्वेभ्यश्च तस्य व्यावृत्तधीसंभवात् । अन्यथाऽन्येनापि कल्पितेन तदसंभवप्रसङ्गात् । अतः आत्मपरिशेषे तत्रापि जीवेश्वरयोरणुत्वविभुत्वनियाम्यत्वनियन्तृत्वाधेयत्वाधारत्वशेषत्वशेषित्वशरीरत्वशरीरित्वादिभिरनेकविधैर्धर्मभेदैर्व्यावृत्तधीसिद्धौ किमन्येन विशेषेण ? तदत्यन्तसाम्यवत्सु मुक्तेषु नित्येष्वपि हि तत्साम्यस्यैव संरक्षणाय धर्मिग्राहकसिद्धा यावदात्मभाविनस्तेते विशेषा न परित्यक्ताः । न चेश्वरद्वैतम् ; येनेश्वराणां मिथो व्यावृत्तप्रतीत्यै विशेषं कल्पयिष्यामः, एकस्यैव सर्वदेशकालेष्वेकातपत्रतया सर्वश्रुतिसिद्धत्वात्, अस्यैव च सामान्यशब्दैर्विशेषशब्दैश्च रूढितो योगतस्तत्तद्वस्तुविशिष्टत्वादिना च तत्तत्प्रकरणानुगुणं **शारीरके** प्रतिपाद्यत्वस्थापनात् । जीवेष्वपि बद्धानां मिथो भेदस्तत्तत्सुखदुःखधीच्छावैचित्र्येण व्यक्तः । बद्धमुक्तयोश्च किञ्चिज्ज्ञत्वसर्वज्ञत्वादिभिः, मुक्तानां नित्यानां च विशुद्धेरादिमत्त्वानादिमत्त्वाभ्यामेव विभक्तधीसंभवः । मुक्तदशायां नित्येभ्यः किं वैषम्यमिति चेत्, किं तेन ? प्राक्तनेन तत्तदात्मवर्तितया प्रत्यक्षितेन गुणादिभेदेन तदन्यव्यावृत्तधीसिद्धेः । सिद्धैरपि तद्व्यवहारे प्राक्तनोपाधिभेदैरेव तत्तत्प्रमाणप्रमितैः प्रतिसंहितैः सर्वनिर्वाहात् । एतेन मुक्तानां मिथो विभक्तबुद्धिरपि निर्व्यूढा ; न हि तेषामेकरूपः प्राक्तनः संसारः ; विषमविपाकसमयानाद्यसंख्यातकर्मप्रवाहवैचित्र्यप्रतिनियतदेशकालस्वरूपसुखदुःखतत्कारणादिसंततेरेव मिथो व्या-

वर्तकत्वात् । तदतद्विभागो हि तत्कालवर्तिनैव धर्मेणेति न नियमः, अतत्कालवर्तिनाऽपि तन्निष्ठतयोपलभ्यमानेन तत्सिद्धेः ; न ह्यतीतः संसारो मुक्तात्मस्वरूपमुपलभमानैर्नोपलभ्यते, उपलभ्यमानो वाऽन्यनिष्ठः प्रतिभाति । अथ नित्येषु मिथः का वार्ता ? साऽपि कुशलैव । तेषामपि हि सत्यसंकल्पानां विचित्राः संकल्पेच्छादय ईश्वरस्येवानियतदेशकाल-विषयापर्यनुयोज्यसामग्रीका अनाद्यनन्तसंतानवन्तः सन्तीति किमन्येन विशेषेण ? अपि च यद्दर्शने यत्र यदारोपो न भवति स हि तस्य ततो भेदः । स एव च विशेषः । स चेत् स्वरूपभूतोऽहंत्वमादिरूपेण भातः परारोपं प्रतिरुन्ध्यात्, कस्ततोऽन्यस्ततो विशेषस्तस्य ? एवमनभ्युपगमे विशेषक्लृप्तावपि का गतिर्वैशेषिकस्य ? स्वपरनिर्वाहकास्ते विशेषा इति चेत्, किं त एव ? अपिच पृथक्त्वे विद्यमाने किं तैर्विशेषैः ? पृथक्त्वस्यैकजातिसंगृहीतत्वान्न ततोऽपि व्यावृत्तधीरिति चेत्, तर्हि ततो न क्वचिदपि स्यात् । विशेषेष्वपि वा विशेषत्वाक्रान्तेषु कस्ते निस्तारः ? विशेषत्वं नाम जातिर्नास्तीति चेत, किं तत् ? उपाधिरिति चेत्, किं ततो न संग्रहः ? तथा सति क्वचिदपि तन्निबन्धनानुवृत्तधीभङ्गप्रसङ्गात् । एव-मन्योन्याभावेनापि गतार्थता दुस्तरेति परास्तः पराभिमतविशेषः ॥

सामान्यम् ॥ सामान्यमपि परोक्तं सूत्रकारैरेव निरस्तप्रायम् ; तथा हि—*तदनन्यत्वमारम्भणशब्दादिभ्य इत्या-दिभिः सूत्रैःकार्यदशायामुपादानस्यावस्थान्तरापत्तिमात्रमेव, न पुनः पराभिमतमवयव्याख्यं द्रव्यमस्तीति समर्थनात् घटाद्यव-यव्यभावे तदाश्रितघटत्वादिसामान्यमवयविसमवेततयाऽभ्युपगतगुणादयस्तदुभयारम्भप्रक्रियाजालं च निर्मूलितम् । यच्चोपा-दानस्य घटत्वादिरूपमवस्थान्तरं संयोगविशेषादिरूपम्, तत् परैरपि कार्यतयाऽभ्युपेतमुपलम्भादिभिश्च तथैव सिध्यतीति न तत्रापि नित्यत्वकल्पनावकाशः । ततः सर्वेषां द्रव्याणां स्वरूपतोऽनाद्यनन्तत्वात् कार्यद्रव्यत्वात्मत्वादिमात्रमेव शिष्यते । गुणेषु नित्येष्ववस्थारूपेषु चानुवृत्तप्रत्ययनिमित्तं किमिति चिन्त्यम् । तत्रैवं भाषितं **शारीरकाद्ये**—* संस्थानातिरेकिणो-ऽनेकेष्वेकाकारबुद्धिबोध्यस्यादर्शनात्, तावतैव गोत्वादिजातिव्यवहारोपपत्तेः, अतिरेकवादेऽपि संस्थानस्य संप्रतिपन्नत्वाच्च संस्थानमेव जातिः । संस्थानं नाम स्वासाधारणं रूपमिति यथावस्तु संस्थानमनुसन्धेयमिति । एतदुक्तं भवति—किं संस्थानातिरिक्तं सामान्यं विविक्तस्फुटप्रत्यक्षाध्यवसायभेदादङ्गीक्रियते, उतोपपत्तिबलादिति ; नाद्यः, असिद्धेः ; नान्त्यः, अन्यथासिद्धेः । अतिरिक्तसामान्यमभ्युपगच्छतोऽपि हि तदुपलक्षणं संस्थानमिष्टं दृष्टं च । प्रतिव्यक्तिनियतं संस्थानं कथमनुवृत्तप्रत्ययकारणमिति चेत्, कथं वा तज्जातीयस्य लक्षणं भवति ? अनुवृत्तजात्यन्तरसंगृहीतोपाधिरूपतयेति चेत्, तावतैव गवादिव्यवहारसिद्धौ किमन्येन ? तथाऽप्यन्ततोऽनुवृत्तं सामान्यं क्वचिदभ्युपगन्तव्यम्, यत्रानन्यथासिद्धिः ; अन्यथोपाधिसंग्रहस्याप्यसंभवादिति चेत्, तत्रापि वा तत्र सामान्यमुपलक्षणेन संगृह्यते न वा ? पूर्वत्रान्यथासिद्धिरनव-स्थितिश्च । उत्तरत्र नियामकादर्शनाज्जातेराश्रयव्यवस्था न स्यात् । व्यावृत्तानामपि स्वभावत एव कासांचित् व्यक्तीनां तद्व्यञ्जकत्वनियतिरिति चेत्, स एव स्वभावः किं न व्यवहारं नियच्छेत् ? निर्विषयः कथं व्यवहारः स्यादिति चेन्न, तासामेव व्यक्तीनां विषयत्वात् । व्यावृत्तानामनुवृत्तव्यवहारविषयत्वे सर्वत्र विषयव्यवस्था भज्येतेति चेत्, व्यावृत्ताना-मनुवृत्तव्यञ्जकत्वे सर्वत्र तद्व्यक्तिः किं न स्यात् ? संबन्धासंबन्धाभ्यां नियमादिति चेन्न, संबन्धस्यापि समवायनाम्नः सार्वत्रिकत्वाभ्युपगमात् तत्राप्यभिव्यक्तिप्रतिनियमस्य मृग्यत्वात्, नानासमवायवादेऽपि व्यक्तिस्वभावनियमस्य दुस्त्यज-त्वात् । तथाऽपि दृष्टैकगोव्यक्तेर्व्यक्त्यन्तरे सोऽयमिति प्रत्यभिज्ञानं कथं स्यात् ? अयं गौरित्येकव्यक्तौ व्युत्पादितश्च कथं व्यक्त्यन्तरेऽपि तच्छब्दवाच्यतां प्रतीयादिति चेत्, तत्रापि वा कथम् ? एकधर्मसमवायादिति चेत्, तेनैव धर्मेण

स्वतो मिलितस्य समवायस्यैकस्यैव नित्यं सर्वत्र वृत्त्यभ्युपगमेन सर्वत्र सर्वव्यवहारसङ्करप्रसङ्गात् । कासांचिदेव व्यक्तीनां तद्व्यञ्जकत्वस्वाभाव्यात् व्यवस्थोक्तिरिति चेत्, तर्हि तासामेव व्यक्तीनां प्रतिसन्धानव्यवहारयोर्विषयत्वमस्तु । तथा सति भ्रान्तत्वं तयोः स्यादिति चेन्न, तद्व्यक्तित्वेन प्रतिसन्धानादेरभावात्; अपि तर्हि तथात्वेन व्यक्तिस्वरूपातिरिक्तं तथात्वं नामान्तरेण जातिरेव स्यादिति चेत्, तज्जातिव्यञ्जकं तत्तदेकव्यक्तिस्वरूपातिरिक्तं किं न जात्यन्तरं स्यात्? उपाधिविशेष एवायं प्रतिनियताश्रय इति चेत्, एवं तर्हि प्रतिनियतप्रतियोगिकं स्वभावनियतं परस्परस्मारकत्वमुपजीव्य तज्जातीयतया प्रतिसन्धानव्यवहारोपपत्तौ किमन्यकल्पनेन? तत्स्मारकतदितरविभागः कुतस्त्य इति चेत्, तद्व्यञ्जकतदितरविभागस्ते कुतस्त्यः? दर्शनादर्शनायत्त इति चेत्, तुल्यम् । संबन्धसादृश्ययोरभावे कथं स्मारकत्वमिति चेत्, तयोर्वा कथम्? सदृशसहानुभूतदर्शनस्य संस्कारोद्बोधकत्वादिति चेत्, तदपि कुतः? कार्यदर्शनात् कल्प्यत इति चेत्, तुल्यम्; अन्यथा [संबन्धसादृश्ययोरेकमुपादाय] संबन्धं सादृश्यं वैकमुपादाय तदन्यस्य कथं स्मारकत्वमिति चोद्यस्य दुर्वारत्वात् । न चात्र सादृश्यं नाङ्गीकुर्मः, सौसादृश्यरूपत्वाभ्युपगमात्सामान्यस्य । नामान्तरेण पराभिमतजातिस्वीकार इति चेत्, व्यावृत्तानां संनिवेशादीनामेव प्रतिनियतप्रतियोगिस्मारकस्वभावतया सादृश्यरूपत्वात् । गवयादेरपि तर्हि गोजातीयत्वादिप्रसङ्ग इति चेन्न, सादृश्यसौसादृश्यविभागस्य सांप्रत्ययिकस्य सर्वसम्मतत्वादिति । एवं सामान्यादिषु **सूत्रकारा**दिभिर्निरस्तेषु परिशिष्टा द्रव्यगुणकर्मरूपास्त्रयः पदार्था इति केचिदाचार्याः ॥

कर्म ॥ अन्ये तु मन्यन्ते—यथा तत्प्रतीतेरन्यथासिद्धतया ते पदार्था **भाष्यकारादिभि**र्निरस्यन्ते, तथा कर्मापि, इति, ये तावदिह सर्वत्र सूर्यपरिस्पन्दादिवदप्रत्यक्षं कर्म फलानुमेयमिच्छन्ति । तत्र यया सामग्र्या कर्मणः सिद्धिरभिमता तयैव दृष्टं कर्मफलं साध्यताम्, किमन्तरा कल्पितेन कर्मणा? तथाऽपि चेत् क्लृप्तिः, अन्यत्रापि कालविप्रकर्षादर्शनेऽपि सामग्रीकार्ययोर्मध्ये अन्यस्य क्लृप्तिप्रसङ्गः; तथैव च तत्रापीत्यनवस्था स्यात् । येच प्रत्यक्षं कर्मेत्याहुः, तैरपि नूनं कर्मफलत्वेनाभ्युपगतसंयोगविभागातिरिक्तं निपुणनिरीक्षणेऽपि नोपलभ्यत इति मन्यामहे । चलतिप्रत्ययोऽपि हि तावतैव चरितार्थः । न च वाच्यं यावत्संयोगं चलतिप्रत्ययप्रसङ्ग इति, पूर्वदेशविभागपूर्वकदेशान्तरसंयोगप्रथमक्षणविषयत्वात् तत्प्रत्ययस्य । ततएव द्रुतरका[ल]ले संयोगे वर्तमानेऽप्यचलदिति भूतानुसन्धानमुपपन्नम् । ननु प्रवाहमध्यस्थिते स्थाणौ पूर्वसलिलस्कन्धवियोगः उत्तरसलिलस्कन्धयोगश्च दृश्यते, न च तत्र चलत्वमिच्छामः । व्योमादय एव स्थिरदेशत्वेन विवक्षिता इति चेन्न, प्रवाहस्य ततो विशेषादर्शनात्; लौल्यं विशेषः इति चेत्, तर्हि संयोगविभागातिरिक्तं लौल्यरूपं कर्म प्रत्यक्षमिति कथं तदपह्नवः? इति । तत्राऽहुः—या नाम कर्मसामग्री त्वयेष्यते सा तत्तत्कर्मफलतयाऽभिमतं संयोगविशेषमुत्पादयन्ती नियतस्वभावमेव तमुत्पादयति । अत एक एव संयोगोऽनेकनिष्ठोऽपि सन् क्वचिच्चलतिप्रत्ययं क्वचित् संयोगमात्रप्रत्ययं च जनयति, यथैक एव समवायो गुणगुणिभ्यामविशेषेण स्वतो मिलितोऽपि सन् क्वचिदाश्रयप्रत्ययं क्वचिदाश्रितप्रत्ययं च जनयति, न ह्याश्रयभाव आश्रितभावो वा समवायस्वरूपातिरिक्तः, तद्वदिहापीति । वयं तु ब्रूमः—अप्रत्यक्षकर्मवादस्तावत् प्रागुक्तदूषणादयुक्तः । प्रत्यक्षं तु कर्म स्वरूपतो दुरपह्नवम् । तत्र **भाष्या**दिष्वतिरेकविधिनिषेधादर्शनादर्थान्तरविरोधाभावाच्चोदासितव्यमिति । इदं तु मन्यामहे—अतिरेकेऽपि गुणवर्गान्न राश्यन्तरं कर्म, विभाजकाभावात्, स्वेच्छाकल्पितविभाजकस्य सर्वत्र सुलभत्वेन यथाभिमतमेकं गुणमु[द्धृत्य]भयं वाऽङ्गीकृत्य राश्यन्तरकल्पनप्रसङ्गात्, गुणावान्तरवैचित्र्यस्य गुणत्वविरोधाभावात् । अतो द्रव्यमद्रव्यमित्येव विभागः इति ॥

गुणाः ॥ तत्र चात्मगुणतयाऽभिमतेषु **सुखदुःखेच्छाद्वेषप्रयत्नाः** पञ्च तत्तदुत्पादकतयाऽभिमतबुद्धिविशेषानतिरिक्ता **वेदार्थसंग्रहे** समर्थिताः । धर्माधर्मौ विहितनिषिद्धक्रियासाध्यतयाऽभिमतावाज्ञावतो राज्ञ इव सर्वप्रशासितुरीश्वरस्यानुग्रहनिग्रहाख्यबुद्धिविशेषरूपौ **भाष्यादिषु** बहुषु प्रदेशेषु प्रपञ्चितौ । यः पुनः संस्कारः स तावद्बुद्धिविशेषात्म-[को युक्तः] नोक्तः, न च तत्प्रयुक्तः; ततश्चिरनष्टविप्रकृष्टाकारे व्याप्त्यदर्शनात्, वासनानुवृत्तेश्च वाचनिकत्वात् । यद्यपि *इन्द्रियस्येन्द्रियस्यार्थे इत्यादिगीताश्लोकेषु **भाष्यकारै**र्वासनाया इच्छाद्वारेणैव प्रवृत्तिहेतुत्ववचनाज्ज्ञानवासनाविशेषातिरिक्ता कर्मवासना नास्ति । तथाऽपि ज्ञानवासना दुरपह्नवा, ततश्च तदाश्रयमात्रं विचार्यम्, तत्र धर्मभूतज्ञानस्य द्रव्यत्वं **न्यायतत्त्वात्मसिद्धिभाष्यादि**सिद्धमनुसरतां तन्निष्ठस्मृत्याख्यविकारोत्पादकः संस्कारोऽपि तन्निष्ठः प्राप्तः; अन्तरङ्गत्वादबाधाच्च । ये तु परपरिभाषामनुसरन्तस्तदनुगुणं तस्य गुणत्वं गृह्णन्ति, तेषामात्मन्येव संस्कारः इति विशेषः । न च बुद्धेर्नित्यत्वं सङ्कोचविकासादिदशाभेदं चाभ्युपगच्छद्भिरद्रव्यत्वं तस्याः सुवचम्; अवस्थान्तरयोगित्वमेव ह्युपादानत्वम्; तदेव हि द्रव्यलक्षणम् । तथाऽपि न गुणत्वहानिः; अपृथक्सिद्धविशेषणत्वातिरिक्तगुणत्वादर्शनात्, कर्म[त्व, कर्तृ]-व्यतिरिक्तजातिमात्राश्रयत्वादिरूपगुणलक्षणसङ्केतस्यास्माभिरनादरणात् । न च द्रव्यस्याश्रितस्वभावत्वलक्षणमपृथक्सिद्धविशेषणत्वं विरुद्धम्, अवयविनि युष्माभिरपि स्वीकरणात् । यथा च द्रव्यत्वविशेषणत्वादिभिर्न विरोध इष्यते, एवमत्रापि, उपलम्भयुक्त्यादेः समानचर्चत्वात् । अतो ज्ञानं द्रव्यम्, तदवस्थाविशेषास्त्वद्रव्याणीति संस्काराख्यविकारस्थितिरपि तत्रैव युक्ता । वेगाख्यस्तु संस्कारस्तदुत्पादकत्वाभिमतकर्मविशेषातिरिक्तो न दृश्यते, नच युज्यते । स्थितस्थापके तु कर्मनिवृत्तावपि तदविनाभूतसंयोगविशेषत्वं वक्तुं युक्तम् ॥

षाड्गुण्यम् ॥ ये च भगवतोऽनन्ता मङ्गलगुणाः प्रकीर्त्यन्ते, ते सर्वेऽपि षाड्गुण्यविततिरूपा इति संमतम् । यथाऽऽहुः—*तवानन्तगुणस्यापि षडेव प्रथमे गुणाः । यैस्त्वयेव जगत्कुक्षावन्येऽप्यन्तर्निवेशिताः ॥ इति ।
षट्सु च गुणेषु **बलं** धारणसामर्थ्यम्; **ऐश्वर्यं** नियमनशक्तिः; विकारहेतुष्वप्यविकृतत्वं **वीर्यम्**; **तेजः** पराभिभवनसामर्थ्यम्, अन्यानपेक्षता वेति । लक्षितानां चतुर्णामतिमथने ज्ञानशक्तिविततिरूपत्वं व्यक्तम् । न च ज्ञानशक्त्योरप्येवं मिथोऽन्तर्भावः शक्यः, अज्ञेष्वपि द्रव्येषु शक्तिदर्शनात्, अशक्तेष्वपि ज्ञानदर्शनात् । अत एव ज्ञानविशेषः शक्तिरित्यपि निरस्तम् । शक्तिविशेषस्तु ज्ञानं स्यादिति चेत्, कोऽसौ शक्तिशब्दार्थः? विलक्षणो गुणविशेषः **प्राभाकरादिनयेन** पदार्थान्तरं वेति चेत्, न तर्हि ज्ञानस्य तद्विशेषता सिध्येत् । अथ कार्योपयुक्तविशेषणमात्रं शक्तिरिति सर्वप्रयोगानुगतं पश्यसि, तदा न केवलं ज्ञानस्य, अपि तु सर्वस्यैव शक्तित्वं प्राप्तम्, सर्वस्यापि प्रधानकारणतयाऽभिमते कस्मिंश्चिद्विशेषणत्वेनावस्थानात् । नन्वेव**मुदयनादीना**मिव स्वरूपसहकारिव्यतिरिक्तशक्त्यभावः प्रसक्तः इति चेत्, अनन्यथासिद्धयुक्तिवशादागमबलाद्वा तत्सिद्धेः । तच्छब्दस्तु विवक्षाविशेषात् स्यादिति ब्रूमः । शक्तिसमर्थनसंरम्भश्च**ाचार्याणां न्यायकुलिशे** निपुणमनुसन्धेयः । शक्तिमात्रकारणादिवादाश्च बाह्यानामुपलम्भयुक्त्याप्तागमादिविरहादनादरणीयाः । सा चेदुपादानं, सूक्ष्मं द्रव्यमेवासौ स्यादिति न विवादः ॥

अथ **अचिद्द्रव्यविशेषगुणान्** पश्यामः ॥ तत्र शब्दादयः पञ्च तत्तद्भूतवर्तिनः प्रत्यक्षादिबलादभ्युपगताः । **सत्त्वरजस्तमांसि** च शास्त्रानुसारेण । **संयोगश्च** प्रत्यक्षादिसिद्धः । नैरन्तर्यमात्रमेवायमिति चेत्, तत् किं द्रव्यस्वरूपम्? उतागन्तुरवस्थाविशेषः? नाद्यः, नित्यत्वप्रसङ्गात् । न द्वितीयः, नामान्तरेण तदभिधानात्, इति । **विभागपृथक्त्वे** तु

अभावोक्तन्यायेन दूषणीये । **परत्वापरत्वे** अपि सुखादिच्छायया ; न हि तत्तदुपाध्यवच्छिन्नदेशकालविशेषसंबन्धातिरिक्ते परत्वापरत्वे पश्यामः । तत्कल्पने च प्राक्त्वप्रत्यक्त्वादयोऽपि हि बहवो गुणास्तुल्यन्यायाः कल्प्याः स्युः । एवं सदसद्गुणप्रदर्शनप्रक्रियया **संख्यापरिमाणगुरुत्वद्रवत्वस्नेहानां** तत्त्वमवसातव्यम्, इत्यद्रव्येष्वेषा दिक् ॥

अथ **द्रव्याणि** विमृश्यन्ते ॥ तत्र तावत् **कौमारिला**भिमतविभुशब्दाख्यद्रव्यवादः शब्दस्याचिदवस्थाविशेषत्वेन श्रुत्यादिसिद्धत्वान्निराकार्यः । **आत्मसिद्धौ** तु शब्दस्य धर्म्यतिवर्तित्वगतिमत्त्ववादस्तदाश्रयभूतावयवद्वारेणेति नेतव्यः । यत्तु—* तमः खलु चलं नीलं परापरविभागवत् । प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति ॥

इत्याहुः, तदेतत् द्रव्यं तावदभ्युपगच्छामः ; तथा ह्युक्तं **वरदगुरुभिस्तत्त्वसारे**—

* तमो नाम द्रव्यं बहुलविरलं मेचकचलं प्रतीमः केनापि क्वचिदपि न बाधश्च ददृशे ।

अतः कल्प्यो हेतुः प्रमितिरपि शाब्दी विजयते निरालोकं चक्षुः प्रथयति हि तद्दर्शनवशात् ॥ इति ।

एतेन वियति विततानां सूक्ष्माणां पृथिव्यवयवानां कृष्णो गुणस्तम इति पक्षोऽपि प्रतिक्षिप्तः ; साश्रयस्यैव तस्य ग्रहणविरोधाभावात्, गुणमात्रतया च कस्याप्यनुपलम्भात् । स्पर्शरूपरसानां च शब्दगन्धवद्भ्रान्तौ प्रमितौ वा निराधारग्रहणादर्शनाच्च इति । एवं द्रव्यत्वे सिद्धे कृष्णवर्णस्य द्रव्यस्य पृथिवीत्वमेवाभ्युपगन्तुमुचितम्, *यत् कृष्णं तदन्नस्य इति श्रुतेः । यद्यपि पृथिव्यां पाकविशेषवशात् शुक्लादिरूपं भवति ; तथाऽपि कृष्णरूपं नान्यत्र पाकादपि भवति ; आकाशादिषु नैल्योपलम्भोऽपि हि पञ्चीकरणमूलपृथिवीसंसर्गात् । * आकाशे चाविशेषात् इति सूत्रे भाषितम्—* अण्डान्तर्वर्तिनश्चाकाशस्य त्रिवृत्करणोपदेशप्रदर्शितपञ्चीकरणेन रूपवत्त्वाच्चाक्षुषत्वेऽप्यविरोध इति । नन्वेवमाकाशमेव द्रव्यान्तरसंसर्गान्नीलं तम इत्युपलभ्यत इति स्यादितिचेत्, न स्यात्, आकाशे तम इति पृथगुपलम्भस्वारस्यात्, द्रव्यान्तरत्वे तु कल्पनागौरवात्, अन्ततोऽत्रापि पञ्चीकरणेन द्रव्यान्तरसंसर्गस्याभ्युपगतत्वाच्च इति । स्पर्शानुपलम्भस्तु इन्द्रनीलालोकदुर्दिनातपादेरिवानुद्भवादेरपि स्यात् । न च पार्थिवरूपस्य सर्वस्यालोकसापेक्षचक्षुर्ग्राह्यत्वनियमः कल्प्यः, करणवैचित्र्यादिव विषयवैचित्र्यादपि व्यवस्थोपपत्तेः । दिवाभीतानां विशिष्टाञ्जनरञ्जिताक्षाणां चालोकनिरपेक्षमेव चक्षुषैव पदार्था गृह्यन्ते । आलोकाभावमात्रे च तमसि तमोज्योतिषोर्निवृत्तिवचनं च व्याहन्येत ; प्रतिनियतनैल्यारोपकल्पनाप्रयासश्च । अतः पृथिवीविशेषत्वं तमसो युक्तम् । **पृथिव्यादीनि पञ्च भूतानि मनश्च** त्रिगुणद्रव्यपरिणतिविशेषतया श्रुत्यादिसिद्धत्वान्न पृथग्द्रव्याणि । तत्र चावयव्याख्यं भौतिकद्रव्यम् * तदनन्यत्वमारम्भणशब्दादिभ्यः इत्यादिभिः षड्भिः सूत्रैर्बुद्धिशब्दान्तरादेरन्यथासिद्ध्याद्युपपादनेन निरस्तम् । * महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् इत्यादिभिश्च पराभिमतः परमाणुः । अतः परिणामविशेषादुपलम्भयोग्यत्वायोग्यत्वादिदशाविशेषयोगि प्रकृत्यादिसंज्ञं द्रव्यं विचित्रव्यवस्थितक्रमसमष्टिव्यष्टिरूपमवतिष्ठते । **दिक्तत्त्व**मपि तत्तदुपाध्यवच्छिन्नास्त तद्देशविशेषा एव, अतिरिक्तकल्पकानां परापरप्रत्ययविशेषादीनामन्यथासिद्धेः । दिगुत्पत्तिश्रुतिश्च तदुपाधिकतन्निर्वाहकसृष्ट्योपपन्ना ; अन्यथा द्युपृथिव्यन्तरिक्षादिवत् त्रिगुणपरिणतिविशेषतैव स्यात्, न पृथग्द्रव्यता । न चैवं कालेऽपि प्रसङ्गः, नित्यस्य कालस्य भगवत्पराशरादिभिः पृथक्प्रसंख्यानात् । तस्य प्रकृतिपरिणतिविशेषत्वादिपक्षास्तत्पूर्वापरकालावश्यंभावात् श्रुत्यादिबलाच्च प्रत्युक्ताः । अतस्त्रिगुणकालात्मा चेति त्रीणि सिद्धानि । **ईश्वरस्य** तु पृथक्संख्याने चत्वारि । तस्य हि चेतनत्वादिभिः संग्रहसंभवेऽप्य [नन्तप्रकारात्यन्त] वान्तर-

वैलक्षण्यज्ञापनाय पृथक्संख्यानं प्राचामनादिवाचां च, अन्यथा प्रक्रियान्तरेणाचेतनेष्वपि संग्रहप्रसंगात् । विविक्तं च भगवता **पराशरेण**—

* परमात्मात्मनोर्योगः परमार्थ इतीष्यते । मिथ्यैतदन्यद्रव्यं हि नैति तद्द्रव्यतां यतः ॥ इति ।

एवं **धर्मभूतज्ञाना**ख्यमपि द्रव्यमजडत्वाविशेषेऽपि स्फुटतरवैधर्म्यान्तरबलात्पृथग्गणयन्ति । तस्याद्रव्यत्ववादः केषांचि-न्नाथमुनियामुनमुनिभाष्यकारादिप्रबन्धविरोधात्प्रायः परचित्तरञ्जनार्थः । **शुद्धसत्त्वा**ख्यस्य च द्रव्यान्तरस्य पर-विग्रहादियाथार्थ्योपदेशप्रवृत्तनिरुक्ताद्याप्तागमसिद्धत्वात् सूक्ष्मत्रिगुणावस्थाविशेषादिपक्षा बहिष्कार्याः । अतः षडेतानि द्रव्याणि । भोक्तृभोग्यनियन्तॄणां सदात्मनैकद्रव्यत्वादिपक्षा अपि निर्विशेषसन्मात्रपक्षवत् व्याघातश्रुतिविरोधादिभिर्बहुशो भाष्यादिषु निरस्ताः । तत्र त्रिगुणशुद्धसत्त्वे स्वनिरुक्त्यैव लक्ष्ये । क्षणलवाद्यात्मा **कालः** । अणुर्ज्ञाता **जीवः** । विभु-स्त्वीश्वरः । जानातिव्यवहारासाधारणकारणं व्यवहार्यविशेषो **मतिः** । एवं त्रिगुणकालजीवेश्वरशुद्धसत्त्वमतिरूपेण षोढा द्रव्यविभागः । एवं प्रमाणसार्थघण्टापथेन द्रव्याद्रव्यरूपप्रमेयग्राममधिजिगमिषतां न कुदृष्टिबाह्यकल्पितकूट-युक्तिगर्तनिपात इति ॥

॥ इति न्यायपरिशुद्धौ प्रमेयाध्याये प्रथममाह्निकम् ॥

॥ अथ द्वितीयमाह्निकम् ॥

प्रमेयम् ॥ अत्र यद्यपि प्रमाविषयः प्रमेयमिति व्युत्पत्त्या आरोपिताकारव्यवच्छेदार्थया अनारोपितरूपं सर्वं प्रमेयम्, तथाऽपि निःश्रेयसान्तरङ्गतया तदर्थिभिः प्रकर्षेण मेयं प्रमेयमिह विवक्षितम् । यद्विषयेण भ्रमेण संसरामः, यद्विषयेण च तत्त्वज्ञानेनापवर्ज्येमहि, तदिह नः प्रकर्षेण मेयं प्रमेयम् । तच्च द्वादशविधमुक्त**माक्षपादे**—* आत्मशरीरे-न्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति । तत्र चेतन आत्मा । स द्विधा—ईश्वरोऽनीश्वर इति । जगत्कर्ता ईश्वरः । जगद्व्यापाररहितश्चेतनोऽनीश्वरः । यच्चैतन्यसमानाधिकरणं यदपृथक्सिद्धं यद्द्रव्यं, तत् तस्य शरीरम् । तत् द्विविधं—कर्मजम्, अकर्मजं चेति । आद्यमस्मदादीनाम् । द्वितीयमीश्वरादीनाम् । सात्त्विकाहङ्कारोपादानकं द्रव्य-मिन्द्रियम् । तदेकादशविधम्—पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि मनश्चेति । इन्द्रियगोचरा इहार्थाः ; ते च शब्दादयो गुणाः तद्विशिष्टानि च । अर्थप्रकाशो बुद्धिः । स्मृत्यादिकरणमिन्द्रियं मनः । मनोवाक्कायानां पुण्यापुण्यरूपो व्यापार इह प्रवृत्तिः । तथाविधप्रवृत्तिहेतवो दोषाः । ते च संग्रहाद्रागद्वेषमोहाः । पूर्वदेहं विहायोत्तरदेहप्राप्तिः प्रेत्य-भावः । प्रवृत्तिसाध्यं फलम् ; तदेव पुरुषेण प्रवृत्तिफलतयोद्दिष्टं प्रयोजनम् । प्रतिकूलवेदनीयं दुःखम् । तत्र सुख-तत्साधनादिकमपि विषसंपृक्तमधुवत् प्रभूतानर्थानुषङ्गित्वात् दुःखमेव मुमुक्षुणा भाव्यमिति तस्यापि प्रतिकूलवेदनीयत्वम् । दुःखान्तरकारणासमानाधिकरणा दुःखनिवृत्तिरपवर्गः । स च स्वाभाविकात्मस्वरूपाविर्भावपूर्वकसमस्तविभूतिगुणविशिष्ट-निरतिशयानन्दब्रह्मानुभवगर्भ इति परमः पुरुषार्थः । तत्पूर्वको वा तादृशब्रह्मानुभवोऽपवर्ग इति । एतदेव च प्रमेयं सं-ग्रहाच्चतुर्धा विभज्य केचिदनुसंदधते—हेयम्, तस्य निवर्तकम्, हानम्, तस्योपायः इति । ये तु कणचरणादयः षट्-सप्तादिरूपेण सर्वान् पदार्थान् विभज्य परीक्षन्ते, ते सामान्यविशेषसमवायादीनां पदार्थान्तरत्वप्रतिक्षेपेण निरस्ताः । ततश्च द्रव्यगुणकर्माणि त्रीण्येवावशिष्यन्ते । तत्रापि कर्मणः संप्रतिपन्नगुणातिरिक्तत्वपक्षेऽपि संस्कारादिगुणावान्तर-

विशेषवत् गुणपक्षकक्षीकारात् द्वौ पदार्थौ । तत्र च गुणशब्दस्यापृथक्सिद्धविशेषणमात्रव्युत्पन्नस्य तथाविधेषु केषुचिद्द्रव्येष्वपि वृत्तेर्द्रव्यगुणरूपेण विभागानौचित्यात् द्रव्यमद्रव्यमित्येव पदार्थविभागमाद्रियामहे, ईदृशस्य तु विचारस्यापवर्गे परम्परयोपयोगः । मुमुक्षूणां प्रधानतमं तु प्रमेयं विशिष्टं ब्रह्मैकमेवेति मन्वानो भगवान् **बादरायणः**—* अथातो ब्रह्मजिज्ञासा इत्युपक्रम्य तदेव सप्रकारं निरूपितवान्; तत्प्रकारतयैवान्यत् प्रमेयम् । केचित्तु देहात्मविवेकक्रमानुसारेण * भोक्ता भोग्यं प्रेरितारं च मत्वा इति श्रुतिप्रक्रियया च त्रिधा तत्त्वं विभज्य चिन्तयन्ति, तत्रापि सप्रकारद्रव्यचिन्तनादद्रव्यचिन्ताऽप्यन्तर्भवति । तत्तुल्यन्यायतया कालचिन्ता च । तदभिप्रायेण कालस्य पदार्थविशेषणतयैव समस्तवस्तुप्रतीत्यन्तर्भावान्न पृथगस्तित्वादयो वक्तव्याः, न च परिहर्तव्याः । * कालोऽस्ति नास्तीति व्यवहारो व्यवहर्तॄणां जात्याद्यस्तित्वनास्तित्वव्यवहारतुल्यः—इति जैननिराकरणसमये **भाष्यकारै**रुक्तम् । ततश्च ब्रह्मैकमेव तत्त्वमिति वा चिदचिदीश्वरभेदेन त्रीणि तत्त्वानीति वा पश्यतां न कश्चिद्विशेषः, स्वरूपभेदस्य विशिष्टैक्यस्य चोभयेषामभिमतत्वात् । अत एव—

* प्रधानपुरुषव्यक्तकालास्तु प्रविभागशः । रूपाणि स्थितिसर्गान्तव्यक्तिसद्भावहेतवः ॥

इत्याद्यनुसारेण चतुर्धा पञ्चधा वा विभज्य चिन्तयतां कार्यविशेषैः सह पञ्चषट्सप्तविंशत्यादिसंख्यां निवेशयतां च पूर्वाविशेष एव । श्रूयते च—

* तं षड्विंशकमित्याहुः सप्तविंशमथापरे । पुरुषं निर्गुणं सांख्यमथर्वशिरसो विदुः ॥ इति ।

प्राप्यं, प्राप्ता, प्राप्त्युपायः, निवर्त्यं, फलं चेति केचित्पञ्चधा प्रमेयं परिसंचक्षते । संबन्धविशेषेण सहान्ये षोढेति ॥

अथायमपरः प्रवृत्त्यर्थः संग्रहोऽनुष्ठानपरिहारान्तरङ्गः; तथा हि—हितमहितं च प्रकर्षेण मेयम् । तत्र लौकिकहिताहितयोरन्वयव्यतिरेकायुर्वेदनीतिशास्त्रादिकं प्रमाणम्; तदपि योगसाधनभूतशरीररक्षणार्थं मुमुक्षुणाऽपि श्रुतिस्मृत्याद्यविरोधेनानुसरणीयम् । अलौकिकहिताहितयोस्तु वेदाः प्रमाणम् । तदुपबृंहणतया स्मृतीतिहासपुराणानि च । यच्च श्रुतिविहितम्, तदखिलमपि यथाधिकारं हितम् । यच्च तन्निषिद्धम्, तदखिलमप्यहितम् । नन्वभिचारादिकर्मणामनर्थहेतूनां क्षुद्रपुरुषार्थसाधनानां च काम्यानां कर्मणां कथं हितत्वम्? उच्यते; अधिकारिविशेषमपेक्ष्य हि सर्वो विधिर्निषेधश्च; यथोक्तम्—* त्रैगुण्यविषया वेदाः इति । यो हि सुखं दुःखनिवृत्तिं चेच्छति तस्य तत्साधनमपेक्षमाणस्य लौकिकेषु साधनेषु प्रवृत्तस्य तेषां निरयादिहेतुभूतानर्थहेतुत्वेन तत्परिहारायानर्थहेतुत्वरहिताः सुखाद्युपायाः प्रतिपाद्यन्ते। एवं काम्यकर्माणि पारलौकिकानि दृष्टसजातीयतदधिकफलार्थतया दृष्टानर्थावहसुखप्रवृत्तिप्रतिबन्धौपयिकत्वात् हितान्येव रागिणाम्। तथा ऐहलौकिकान्यपि चित्रादीनि। कारीर्यादीनि तु जगद्धितान्यपि। अभिचारकर्मणोऽपि हिंसादियुक्तस्यापि स्वरूपतो नानर्थहेतुत्वम्, तदङ्गपशुहिंसादेरग्नीषोमीयादिवद्विधिप्राप्तत्वात्; अपि तु स्वसाध्येनाप्राप्तविषयवधादिना । तदपेक्षया चाभिचारो निषिध्यते । सोऽपि हि क्वचिदवश्यकर्तव्य एव, * षट्स्वनभिचरन् पतेत् इत्यादिदर्शनात्। अतश्च मुमुक्षोरपि रक्षकक्षत्रियाद्यभावे राक्षसाद्यभिभवे चात्मरक्षणार्थमभिचारः कर्तव्य एव, * सर्वत एवात्मानं गोपायेत् इति शास्त्रात्; अन्यथा अहरहरनुष्ठेयस्याप्रयाणादनुवर्तनीयस्य कर्मादेरुच्छेदप्रसङ्गेनोपायानिष्पत्तेर्मोक्षासिद्धिप्रसङ्गात् । वृष्ट्यन्नादिदृष्टार्थानि च सर्वाण्युपासननिष्पत्त्यौपयिकतया तत्तदपेक्षायामनुष्ठेयानि । पारलौकिकानि तु तत्फलाभिसंधिविरहेण कर्मयोगानुष्ठानदशायां नित्यनैमित्तिकैरेकीकृत्य कर्तव्यानि । नैमित्तिकानि हि सर्वाणि प्रसक्तानर्थपरिहारार्थतया सर्वहितान्येव । एवं नित्यानि, उत्तरकर्माधिकारार्थत्वादकरणनिमित्तप्रत्यवायपरिहारार्थत्वाच्च । अतः श्रुतिविहितं स्ववर्णाश्रमोचितं

सर्वं हितमेव । अत एव हि स्मरन्ति—* शास्त्रं हि वत्सलतरं मातापितृसहस्रतः इति । एवं स्थिते प्रवाहानादिसामग्रीचक्रवशादनियतसमयसमागतसकलसैद्धान्तिकसमालम्बनीयसुचरितपरिपाकनिवृत्तप्रतिबन्धपरमपुरुषकटाक्षविशेषसमुन्मिषितसत्त्वसामर्थ्येन करतलामलकवदालोकितहेयोपादेयविभागस्यानाद्यनन्तबहुविधदुर्विषहदुःखानुषङ्गदूषितात्पास्थिरसांसारिकसुखमयविषमधुविरक्तस्य समस्तदुरितवर्गापवर्गायमाणनित्यनिरतिशयानन्दमुकुन्दचरणारविन्दसेवामकरन्दलम्पटस्य यथाशक्ति वर्णाश्रमोचितनित्यनैमित्तिकनिषिद्धपरिहारसहकृतं दर्शनसमानाकारध्रुवानुस्मृतिरूपं भगवदुपासनं हिततमं विहितम्। तच्च सदक्षरन्यासवैश्वानरमधुभूमदहारादिभेदेन बहुविधं त्रैवर्णिकसर्वाश्रमसाध्यम् । तस्य च महनीयविषयनिरतिशयप्रीतिरूपत्वेन भक्तिशब्दवाच्यत्वम् । अयमेव च परमो योगस्त्रय्यन्तानुविधायिषु सर्वेषु मोक्षशास्त्रेषु प्रतिपाद्यते । यथाऽऽह भगवान् **पराशरः**—

* आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः । तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥ इति ।

स्मरति च भगवान् **शाण्डिल्यः**—

* ईदृशः परमात्माऽयं प्रत्यगात्मा तथेदृशः । तत्संबन्धानुसन्धानमिति योगः प्रकीर्तितः ॥ इति ।

तत्र चिदचिद्विवेकादिमात्रे **सांख्य**मुपकुरुते । यमनियमादिसमाधिपरिकरशोधने **योगः** । इतिकर्तव्यताविशेषे **कर्मकाण्डादयः** । सर्वत्रैव **पञ्चरात्रम्** ।

निषिद्धकाम्यवर्गेषु व्यर्थानावश्यकेषु च । शमादिविधिरन्यत्र प्रवृत्त्या न विरुध्यते ॥

सोऽयमेवंविधः परमयोगाख्यो धर्मः * मय्येव मन आधत्स्व इति गीयते । तदशक्तस्य,

* अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् । अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ॥ इत्यादिना प्रीतिपूर्वककर्माणि विधीयन्ते । यः प्रीतिपूर्वभगवदसाधारणकर्मण्यपि न समर्थः, तस्य विषयरसवैमुख्यजननाय समस्तवैषयिकसुखशेषित्वेन चिरतरमनुसंहितस्यापि स्वात्मनः सांसारिकसमस्तसुखसमधिकानन्दस्वरूपमालोकयितुमान्तरचक्षुर्विरोधितिमिरपटलपाटनाय ज्ञानकर्मयोगाख्ये द्वे भेषजे । तत्रात्मचिन्तनरूपो ज्ञानयोगस्तदालोकनेऽन्तरङ्गभूतः । तत्राप्यसमर्थस्य तदधिकारसिद्ध्यर्थं कर्मयोगः । तेन तत्र सिद्धाधिकारस्यापि शिष्टतया व्यपदेश्यस्यान्तर्गतात्मज्ञानः कर्मयोग एव कार्यः । अन्यथा कृत्स्नविदोऽप्यस्य ज्ञानयोगाशक्ताकृत्स्नवेदिपुरुषबुद्धिभेदजननमूलमहत्तरदुरितवशेन ज्ञानयोगोऽपि प्रतिबध्येत । तादृशेनैव च कर्मयोगेन सुकरत्वादिगुणवता चिरतरमनुष्ठितेन ज्ञानयोगव्यवधानमन्तरेणाप्यात्मावलोकनं सिध्यति । कर्मयोगेऽप्यसमर्थस्तु विकलमपि कर्मयोगमारभेत ;

* नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥

इत्यादिभिर्वैकल्यविच्छेदादिसंभवेऽपि फलाविनाभावादिप्रतिपादनात् । प्रक्रममात्रेणापि प्रसन्नो भगवान् पौष्कल्यमापादयति । सर्वेषु चामीषु पर्वसु तत्तत्सामग्रीचक्रघटनाय तत्तत्फलप्रदानाय च स एव हि शरणमनुसरणीयः । तथा चामनन्ति—* सा काष्ठा सा परा गतिः इति । स एव परमपुरुषो वशीकार्यकाष्ठा परमप्राप्यश्चेत्यर्थः । * तस्य च वशीकरणं तच्छरणागतिरेव इति **भाष्यम्** । एवं हिततमस्योपासनस्य दिङ्मात्रं दर्शितम् । फलं चापवर्गरूपं प्रागेव लक्षितम् । अन्येषां तु देहविच्छेदमात्रसहस्रयुवतिसंभोगसमस्तालीकविषयविज्ञानसंतानोच्छेदवासनात्यन्तविरामविषयोपरागवैधुर्यनित्योर्ध्वगमनसकललोकमस्तकोपरिनिविष्टसाधारणदेहविशेषानुप्रवेशनिरावरणत्वस्वानन्दानुभवस्वातन्त्र्यलाभशिवसारूप्यशिवापत्ति-

चिच्छक्तिपरिशेषाविद्यानिवृत्त्युपाधिनिवृत्तिसकलवैशेषिकगुणोच्छेदप्रभृतयो निःश्रेयसविकल्पा देहाद्यतिरिक्तात्मसद्भाव-बाह्यार्थपारमार्थिकत्वतत्तदागमप्रामाण्यब्रह्मनिर्विकारत्वनिर्दोषत्वतज्ज्ञानानन्दनित्यत्वादिसमर्थकैः **शारीरकपर्यन्तैः** शास्त्रैः प्रतिक्षेप्या इति तत्रतत्र विस्तरो द्रष्टव्यः । इह तु प्रमाणचिन्तायाः परमप्रयोजनं दर्शयितुं प्रमेयस्य संग्रहोक्तिः, सपरिकरप्रमाणमर्यादाप्रतिपादनपरत्वान्न्यायविस्तरशास्त्रस्य, इति ॥

स्वातन्त्र्येण मितं सुखेतरतया यद्भाति जन्तोरिदं सर्वं यस्य विभूतिरित्यवसितं स्वादं व्यनक्ति स्वकम् ।
अन्तःस्वान्तमनन्तनन्दथुनिधिर्मेदोदृशां मादृशामाविर्भावयतु स्वयं स भगवानात्मानमात्मेश्वरः ॥

यत्रोदासत जैमिनिप्रभृतयः श्रुत्यर्थचिन्तापराः यस्यां कन्दलयन्ति मन्दमतयः पारिप्लवान् विप्लवान् ।
विश्वेषामिह वेङ्कटेशविदुषा विश्रान्तये वादिनां प्राची नीतिषु पर्यशोधि सरणिः प्रच्छायनिष्कण्टका ॥

शुद्धिं बिभ्रति मादृशां भणितयश्चूडान्वये केवलं प्रान्ते मिश्रमभाणि नीतिनिपुणैः किं तेष्वमन्तव्यता ।
युक्तं वर्गयुगे विमृश्य सरघापुष्पक्रमं यौक्तिकैरङ्गीकर्तुमशक्यनिह्नवगुणग्रन्थो निबन्धो मम ॥

निरूढनिगमत्रये निखिललोकचिन्तामणौ प्रसत्तिमुपसेदुषि प्रणिदधानभावास्पदे ।
रतिं भजति भावना लयमिवोपयाति द्रुतं रमावसुमतीसहाचरितधर्मिणि ब्रह्मणि ॥

॥ इति न्यायपरिशुद्धौ प्रमेयाध्याये द्वितीयमाह्निकम् ॥

॥ समाप्तश्च पञ्चमः प्रमेयाध्यायः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु

॥ न्यायपरिशुद्धिः समाप्ता ॥

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेदान्तदेशिकविरचितम्

॥ न्यायसिद्धाञ्जनम् ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

॥ जडद्रव्यपरिच्छेदः ॥

श्रीमद्वेङ्कटनायकः श्रुतिशिरस्तात्पर्यपर्याप्तधीः लब्धार्थो वरदार्यपादरसिकाद्रामानुजाचार्यतः ।
बालानामतिवेलमोहपटलावष्टम्भसीदद्दृशां सम्यक्तत्त्वनिरीक्षणाय तनुते सत्तर्कसिद्धाञ्जनम् ॥ १ ॥

सदसद्भूमिकाभेदैस्तत्तत्सिद्धान्तनाटकैः । उपप्लुतस्य तत्त्वस्य शुद्ध्यर्थोऽयमुपक्रमः ॥ २ ॥

यन्न्यायपरिशुद्ध्यन्ते संग्रहेण प्रदर्शितम् । पुनस्तद्विस्तरेणात्र प्रमेयमभिदध्महे ॥ ३ ॥

प्रमेयम् ॥ अशेषचिदचित्प्रकारं ब्रह्मैकमेव तत्त्वम् । तत्र प्रकारप्रकारिणोः प्रकाराणांच मिथोऽत्यन्तभेदेऽपि विशिष्टैक्यादिविवक्षयैकत्वव्यपदेशः, तदितरनिषेधश्च । अन्यथा समस्तप्रमाणसंक्षोभप्रसङ्गात् । इदमेव चेत्थंभूतं सामान्यतः प्रमाविषयतया विशेषतः प्रकर्षेण मेयतया च प्रमेयमुक्तम् ।

द्रव्याद्रव्यविभागः ॥ तदन्तर्गतं च सर्वं द्रव्याद्रव्यात्मना विभक्तम् । उपादानं द्रव्यम् । अवस्थाश्रय उपादानम् । अतथाभूतमद्रव्यम् । प्रत्यक्षादिसिद्धोऽयं द्रव्याद्रव्यविभागः । न सौगतादिनयेनान्यतरनिह्नवः शक्यः । रूपरूपिप्रभृतीनामबाधितानन्यथासिद्धभेदव्यवहारात् । रूपस्पर्शनियताभ्यां दर्शनस्पर्शनाभ्यां तदाश्रयैकार्थप्रतिसन्धानात् । ग्राह्यसङ्घातभावेऽपि ग्राहकयोर्विषयनियमानतिलङ्घनात् । सङ्घातोपाधेश्चैकस्यान्यस्यासिद्धेः । देशकालयोस्तथाभूतयोस्त्वयाऽनभ्युपगमात् । अभ्युपगमेऽपि तदैक्येन संहतावतिप्रसङ्गात् । एककार्यकारणकत्वादेश्चासिद्धेः । सिद्धावतिप्रसङ्गस्य दुर्वारत्वात् । एकस्मिन्नेव सन्निकर्षविप्रकर्षादिना पटुपटुप्रत्ययात् वेद्यधर्माधिक्यन्यूनतोल्लेखमन्तरेण तयोरसंभवात् । तत्रैवोदयविलयभाजामवस्थानामध्यक्षसिद्धत्वात् । एकक्षणेऽप्येकस्मिन्श्यामत्वयुवत्वाद्यनेकधर्मदर्शनात् । पीतशङ्खभ्रमादौ श्वैत्याद्यनुपलम्भेऽपि शङ्खादिप्रतिसन्धानात् । तस्यैव च तदैव शुक्लतयाऽन्यैरुपलम्भात् । क्षणभङ्गस्य निराकरिष्यमाणत्वात् ।

सर्वेष्वपि भ्रमेष्वधिष्ठानभूतस्वरूपग्रहेऽपि विशेषाग्रहावश्यंभावात् । तद्ग्रहेण च भ्रमोपमर्दाङ्गीकारात् । एतेन निर्विशेषैक-ब्रह्माधिष्ठानविश्वभ्रमवादोऽपि निर्मूलः । नच सहोपलम्भनियमान्नीलतदाधारादेरभेदः; एकसामग्रीवेद्यत्वनियमात्तदुपपत्तेः । सहत्वतन्नियमाभ्यां भेदस्यैव स्थिरीकरणेन व्याघातात् । समस्य च सहोपलम्भनियमस्य शङ्खश्वैत्यादावसिद्धेः । असमस्यापि गन्धादौ । भास्वराध्वान्ताभास्वररूपाभ्यामनेकान्तत्वाच्च । नच ग्राहकभेदाद् ग्राह्यभेद इव; अन्योन्याश्रयणात् । चक्षुः-श्रोत्रादिभेदस्य रूपादिग्राह्यभेदोपाधित्वात् । ग्राहकभेदेऽपि च ग्राह्यैक्यप्रतीतेरुदाहृतत्वात्; ग्राहकैक्येऽपि नीलपीतादि-ग्राह्यभेददर्शनात्, अन्यत्र च तदविशेषात् । अत एव स्पर्शाद्येकद्वित्रिचतुःस्वभाववाय्वाद्यणुचतुष्कवादो निरस्तः । एवं च वैशिष्ट्यमपि तात्त्विकम्, विकल्पश्चाबाधितः प्रमाणमिति सिद्धम् । सम्बन्धानुपपत्त्यादिप्रलापस्तु तर्काङ्गपञ्चकान्य-तमहान्यादिविध्वस्तः ।

किञ्च— परश्शतपरिक्षोदात्परस्तादपि वादिभिः । उपलम्भबले स्थेयं तदादौ किं न गृह्यते ॥
इदमित्थन्त्वयोः किञ्चिद्यदि केनापि भज्यते । इदं नास्तीति वाचोऽपि भङ्गोऽन्यतरभङ्गतः ॥
विसंवादादिसाध्येषु विकल्पत्वादिहेतवः । व्याकुलाः पक्षहेत्वादिबाधाबाधविकल्पतः ॥

अतः सिद्धोऽयं तात्त्विकद्रव्याद्रव्यविभागः ॥

द्रव्यस्थिरत्वनिरूपणम् ॥ तानि च द्रव्याणि स्थिराण्येव । क्षणभङ्गे प्रमाणाभावात् । स हि प्रत्यक्षतः? अनुमानतो वा? नाद्यः, प्रत्यक्षस्य विपरीतरूपत्वात् । प्रत्यभिज्ञाप्रत्यक्षेण स्थिरत्वस्यैव सिद्धेः । भ्रान्तिरियमिति चेन्न, कारणदोषबाधकप्रत्ययाभावे तत्त्वायोगात् । यौक्तिकबाधेन दोषोऽप्युन्नीयत इति चेत्, केयं युक्तिः? करणाकरणाभ्यां सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मेणाध्यासप्रसङ्गात्मिका, समर्थश्चेत्कुर्यादित्यकुर्वद्दशायामपि करणप्रसङ्गात्मिका वा इति चेन्न; सहकारिसन्निधौ कुर्वत्स्वभावत्वस्य, सहकार्यभावप्रयुक्तकार्याभाववत्त्वादेर्वा सामर्थ्यपदार्थत्वात् । ततश्च समर्थस्यैव करणा-करणयोः सहकारिसन्निध्यसन्निधिप्रयुक्तत्वादेकत्र समावेशः । ननु तावप्येकस्य कथमुपपद्येते इति चेन्न, तत्तत्सामग्री-सन्तानप्रतिनियतकालतया तदुपपत्तेः । तत्सामग्रीविशेषसंबन्धासंबन्धयोरपि चोद्यमपरिहार्यमिति चेन्न; भिन्नकालभावि-सामग्रीविशेषादेव परिहृतत्वात् । तज्जातीयस्यैव बीजक्षणस्य समर्थबीजारम्भे त्वयाऽप्येतदपरिहार्यम् । तत्पूर्वक्षणस्व-भावादित्यपि तत एव दत्तोत्तरम् । अन्यथा अनुपलभ्यमानानन्तक्षणतत्स्वभावकल्पनागौरवप्रसङ्गात् । अन्वयव्यतिरेक-वतामपि सहकारिणामकारणत्वे दुर्निर्वहमुपादानस्यापि कारणत्वम् । यदि च कालभेदभिन्नयोरेव करणाकरणयोः सह-कारिसन्निध्यसन्निध्योर्वा वस्तुभेदकत्वम्; देशभेदभिन्नयोरपि करणाकरणयोः सामर्थ्यासामर्थ्ययोः सहकारिसन्निध्य-सन्निध्योर्वा तयोर्भेदकत्वप्रसङ्गेन क्षणेऽपि क्षुद्यमानेऽनवधिकभेदप्रसङ्गेन क्वचिदेकं न सिध्येदिति शून्यवादप्रसङ्गः । देश-भेदे स्वसन्निध्यसन्निधिभ्यामेव तदुपपत्तिरिति चेन्न; तयोरपि तद्वदेव विरुद्धयोर्भेदकत्वप्रसङ्गात् । परस्परविरुद्धपूर्वापर-कालसंबन्ध एव एकस्य कथमिति चेन्न; स्वापेक्षया पूर्वापरत्वस्यासिद्धेः । न हि स्वप्रागभावप्रध्वंसावच्छिन्नकाल-संबन्धित्वं वस्तुनो ब्रूमः । अन्यापेक्षया पूर्वापरयोरपि कालयोरेतदपेक्षया स्वकालत्वे विरोधाभावः क्षणेऽपि स्वीकार्यः । यथा परमाणुद्वयापेक्षया पूर्वाप[र]रीभूतस्यापि तन्मध्यदेशस्य परमाण्वन्तरं प्रति स्वदेशतया न तस्य तत्संबन्धविरोधः । अन्यथा पूर्ववत्क्षणोऽपि क्षुण्णः । तथाऽपि पूर्वापरकालयोस्तदुपाध्योर्वा विरुद्धयोस्तेजस्तमसोरिव कथमेकत्र समावेशः? अविरोधे तु यौगपद्यप्रसङ्ग इति चेन्न । यौगपद्ये हि तयोर्विरोधः न त्वेकवस्तुसंब[न्धादावपि]न्धे । अन्यथा एक-

ज्ञानसंबन्धेऽपि विरोधप्रसङ्गेन प्रत्यभिज्ञास्वरूपस्यानुत्पत्तिप्रसङ्गात् । यदि पुनः कालयोः स्वरूपभेदेन तादात्म्यविरोधो विवक्षितः ; तर्हि रूपरसयोरिव नैकवस्तुसंबन्धं प्रतिभन्त्स्यति । न चैकस्यानेकसंबन्धः क्वचिदपि नास्तीति वाच्यम् । क्षणिकनिर्धर्मकपरमाणावपि पुञ्जदशायामनेकनैरन्तर्यादेरभ्युपेतत्वादिति । एतेन वर्तमानत्वप्रत्ययात्क्षणभङ्गसिद्धिरिति वदन्तोऽपि निरस्ताः । न हि तेन पूर्वापरकालसंबन्धाभावो गृह्यते । न चाक्षिप्यते । तद्विरोध्यवर्तमानत्वमात्रनिषेधात् । तस्य च तदानीं प्रागभावप्रध्वंसाभावनिषेधात्मकत्वेन पूर्वापरकालसंबन्धाविरोधित्वात् । प्रत्यक्षेणेन्द्रियसंबन्धक्षणो गृहीतः ; क्षणान्तरं तु तस्य कुतः सिद्धमिति चेन्न ; प्रत्यभिज्ञानस्य तदबाधस्य चोक्तत्वात् । प्रत्यभिज्ञात्वादेव दीपप्रत्यभिज्ञावत् सर्वाऽपि प्रत्यभिज्ञा भ्रान्तिरिति चेत् पूर्वोक्तेनैव सोपाधिकत्वात् । एतदनुमानमात्रबाध्यत्वे प्रत्ययत्वादेव सर्वः प्रत्ययो भ्रान्तिरिति **माध्यमिकमत**समुत्थानस्य दुष्परिहरत्वात् । क्षणभङ्गपक्षे भ्रान्तिरूपाऽपि प्रत्यभिज्ञा स्मृतिमात्रमपि नोपपद्यत इत्यात्मनि वक्ष्यामः । ततश्च व्याप्तिप्रतिसन्धानाद्यनुपपत्तेः अनुमानमात्रमेव निर्मूलमिति कुतः क्षणभङ्गानुमानम् ? यत्सत् तत्क्षणिकम् , यथा घटः, सन्तश्चामी भावा इत्यपि न । भावशब्देन विश्वपक्षीकारे पक्षहेतुदृष्टान्तभेदासिद्धिः । घटव्यतिरिक्तपक्षीकारेऽपि घटस्य क्षणिकत्वासंप्रतिपत्तेर्दृष्टान्तत्वायोगः, विरुद्धधर्माध्यासस्य च परिहृतत्वात् । अत एव प्रदीपादिदृष्टान्तोऽपि प्रत्युक्तः । तेषामपि त्रिचतुरक्षणस्थायित्वाभ्युपगमात् । अस्तु तर्हि क्षणोपाधिर्दृष्टान्तः । स हि न स्थिरः, तथात्वे क्षणावच्छेदकत्वायोगादिति चेन्न, स्थिरैरेव परस्परावच्छिन्नारम्भावसानैस्तदवच्छेदोपपत्तेः । परस्परावच्छेदश्च युगपद्विशिष्टबुद्धिविषयतया सिद्धः । यथा दीर्घयोरेव मानदण्डयोर्विरुद्धदिक्प्रसृतयोर्मध्ये किञ्चित्संयुक्तयोः परस्परसंयोगावच्छिन्नांशेन अल्पतरदेशावच्छेदः [कर्तुं] शक्यः । एवं कालेऽपीति न कश्चिद्दोषः । मा भूदन्वयः । यदक्षणिकं तदसत्; यथा शशविषाणमिति व्यतिरेकः स्यात् । न स्यात् । त्वदभिमतक्षणिकत्वासिद्धेरेव तन्निरूपिताक्षणिकत्वासिद्धेस्तस्य व्याप्यत्वग्रहणायोगात् । चिरकालस्थायित्वविवक्षायां तु निःस्वभावे शशशृङ्गे तदयोगः । अथ शशशृङ्गाभावो दृष्टान्तः ; स तर्हि सन्नेव ; प्रामाणिकत्वात् । भावेतरत्वलक्षणमसत्त्वमस्तीति चेन्न; भावान्तराभाववादे तस्याप्यसिद्धेः । अन्यत्राप्यभावस्येव भावस्यापि सुवचत्वात् । प्रत्यक्षत्वादिविरोधपरिहारकुसृष्टेश्चाविशिष्टत्वादिति ॥

केचित्तु नित्यमपि किञ्चित्तत्वं बुद्धोपदिष्टमिति सत्त्वाख्यसाधनमागमबाधितं कृत्वा ध्रुवभावित्वमेव हेतुमभिमन्यन्ते । तथा हि—यद्ध्रुवभावि न तत् हेतुसापेक्षम् । अन्यथा ध्रुवभावित्वविरोधात् । अतः कार्याणां ध्रुवभाविनः प्रध्वंसस्याहेतुकत्वसिद्धेर्विलम्बायोगादुदीयमानमेव वस्तु तेन ग्रस्यत इति । तत्र ध्रुवभावित्वशब्देन तत्समकालभावित्वतदनन्तरभावित्वनियमतन्मात्रजन्यत्वतदेकसामग्रीजन्यत्वाहेतुकत्वाद्यर्थविवक्षायां यथायथमसिद्धिव्याघातसाध्याविशेषादिदोषादेष्यत्त्वनियममात्रमवशिष्यते । तच्च भवतामपि विसभागसन्तानारम्भककपालक्षणतदविनाभूतप्रतिसङ्ख्यानिरोधादिनाऽनैकान्तिकमिति । अन्यथा सर्वेषामप्युत्तरक्षणानामेष्यत्त्वाविशेषात्प्रथमक्षण एव सर्वक्षणोत्पत्तौ विश्वविनिवृत्तिप्रसङ्गः । आस्थानिवृत्त्यर्थं क्षणिकत्वमुपदेष्टव्यमिति चेत्, अहो ! महाधार्मिकस्यानलीकवादिनो महानयमधर्मः प्रसज्येत । सूक्ष्मधियस्तत्रैवास्थानिवृत्तिप्रसङ्गाच्च । विश्वानित्यतामात्रोपदेशादपि च तत्सिद्धेः । अन्यथा शून्योपदेशस्यैव अवश्यकर्तव्यत्वप्रसङ्गादिति । प्रत्यनुमानानि च—विगीता प्रत्यभिज्ञा स्वविषये प्रमा, अबाधितबुद्धित्वात्, स्वलक्षणबुद्धिवत् । सा हि स्वविषये प्रमैवास्माकम्, वैभाषिकस्यापि । यत्सत् न तत्क्षणिकम् ; यथा संप्रतिपन्नं नित्यम् । सन्तश्चामी भावा इति । यत्प्रतीयते तदक्षणिकम्, यथा शशशृङ्गमिति भवद्व्यवहारेणापि प्रसज्यते । प्रध्वंसः सहेतुकः पूर्वावधिमत्त्वात् पटवदित्यादीनि च स्वयमुन्नेयानि । एवं द्रव्यस्य स्थिरत्वं सिद्धम् ॥

द्रव्यविभागप्रकारः ॥ तच्च—

द्वेधा जडाजडतया प्रत्यक्तदितरतयाऽपि वा द्रव्यम् । षोढा त्रिगुणानेहोजीवेश्वरभोगभूतिमतिभेदात् ॥
धीकालभोगभूतीरविवक्षित्वा गुणादिरूपत्वात् । देहात्मेशभिदार्थं त्रेधा तत्त्वं विविञ्चते केचित् ॥

परत एव भासमानं **जडम्** । तदन्य**दजडम्** । स्वस्मै भासमानं **प्रत्यक्** । परस्मै भासमानं **परागि**ति व्यवहरन्ति । तेनाजडाया अपि मतेः पराक्त्वं सिद्धम् । यत्तु **नीतिमालायां नारायणार्यै**रुक्तम्—*ज्ञानस्य तु पराक्त्वाभावमात्रमेव, न तु प्रत्यक्त्वमिति ; एतदपि पूर्वपक्षप्रोक्तदृग्विषयत्वमात्राधीनसिद्धि [क] त्वरूपेदन्त्वाभावाभ्युपगमादिति मन्तव्यम् । एवं हि तत्र पूर्वपक्षितम्—* तस्य नीलादिवदिदमित्यनवभासात्पराक्त्वाभावेन प्रत्यक्त्वं च विद्यते इति । तत्र रजोगुणकत्वतमोगुणकत्वमहदाद्यवस्थार्हत्वानि त्रिगुणलक्षणानि । अध्यक्षादिभिर्यथासंभवं नानावस्थस्य तस्य सिद्धेः । तच्च अधःप्रभृतिदेशेष्वनन्तम् । ऊर्ध्वं हि भोगविभूत्यवच्छिन्नम् । नित्यविभूतेस्तमःपरत्वश्रुतेः ; त्रिगुणस्य च * तदनन्तमसङ्ख्यातप्रमाणं चेति वचनात् । तच्च विचित्रसृष्ट्युपकरणत्वान्**माया** । विकारान्प्रकरोतीति **प्रकृतिः** । विद्याविरोधादिभिरविद्यादिश्चोच्यते । समविषमविकारसन्तानांश्च कालभागभेदाभ्यामारभते । इदं च परिस्पन्दादियोग्यभूतेन्द्रियपरिणामदशायामपि निश्छिद्रमेव । तत एव हि स्वकार्यव्यापकत्वम् । द्वयोरन्यतरस्य वा स्पर्शशून्यतया न सप्रतिघत्वविरोधः । वाय्वादिभूतचतुष्टयं हि स्पर्शवदस्पर्शेनाकाशेन व्याप्तम् । इदमेव त्रिगुणं पूर्वावस्थोपमर्दकावस्थाभेदात् **चतुर्विंशतितत्त्वानि**—मूलप्रकृतिर्महानहङ्कार इन्द्रियाण्येकादश पञ्चतन्मात्राणि पञ्चभूतानि चेति ।

नन्वेकस्य कथं बहुधावस्थितविश्वात्मना परिणामः? एकस्यैव मृत्पिण्डस्य घटशरावादिरूपेणेवेति चेन्न ; निरवयवे तथाऽनुपपत्तेः । सावयवत्वे वा बहूनामेव बहुधा परिणामप्रसङ्गात् । तथा च गतमेकोपादानवादेन । एकमेव सदनेकभागात्मकमव्यक्ताख्यमुपादानमिति चेन्न ; विकल्पासहत्वात् । तथाहि—किमेकत्वमनेकत्वं च एकाश्रयमिति मन्यसे? उत एकत्वमंशिनि अंशेषु चानेकत्वमिति? यद्वा परिषद्वनसेनादिष्विव अनेकेषामेव सतामेकत्वमेकोपाधिसंबन्धायत्तमिति? न प्रथमः ; व्याघातात् । अन्यथा भेदाभेदवादाय कथं कुप्येत्? न द्वितीयः ; अवयव्यङ्गीकारप्रसङ्गात् । तदभ्युपगमेऽपि तस्मादेकस्माज्जगदुत्पत्त्यभावात् । तदंशा एव हि ततो भिन्ना बहुधा परिणमन्ति । ततो वरमनारूढनिरर्थकैकद्रव्यैः परमाणुभिरेव जगद्व्यारम्भः । अत एव न तृतीयः ; पृथक्पृथगारम्भकत्वे समुदायनिर्देशस्य निरर्थकत्वात् । वास्तविकस्य च एकत्वस्य वनादिष्वप्यसंभवात् । औपाधिकैक्यव्यपदेशस्य च वैशेषिकाद्यभिमतानन्तपरमाणूपादानवादेऽप्यविशेषात् । अतः एकमनेकधा परिणमतीति कल्पना विवर्तवादस्य प्राग्रूपमिति । अत्र ब्रूमः—

प्रदेशवर्तिसंयोगाद्याधाराणुविभुक्रमात् । निरंशस्यापि घटते प्रादेशिकविकारिता ॥

न तावत्सर्वमद्रव्यं स्वाश्रयव्यापि ; संयोगादेरन्यथोपलम्भात् । नापि सर्वमाश्रयैकदेशवर्ति ; स्वाभावसामानाधिकरण्यरहितधर्मोपलब्धेः ।

अतो विभुष्वणुषु च ग्राह्याः प्रादेशिका गुणाः । तथा चाभ्युपगम्यन्ते सर्वैर्वैशेषिकादिभिः ॥

अत्र यद्यपि विभुषु निमित्तभूतमूर्तद्रव्यसंयोगावच्छिन्ने प्रदेशे गुणान्तरोत्पत्तिरिष्यते ; तथाऽपि मूर्तद्रव्यसंयोगस्यैव प्रादेशिकत्वं कुतः सिद्धम्? न हि विभुषु स्वतः प्रदेश[भेद]मिच्छथ। न च संयोगोपाधिके प्रदेशे संयोगस्योत्पत्तिः ; परस्पराश्रयप्रसङ्गात् । संयोगविशेषात्प्रदेशभेदसिद्धिः ; सिद्धे च तस्मिन्प्रादेशिकसंयोगोत्पत्तिरिति। अतएव मूर्तैर्घटादिभिर्विभुषु

स्वपरिमाणानुरूपप्रदेशावच्छेद इत्यपि वार्तम्। अणुद्वयसंयोगे तदनुपपत्तेश्च। अतः सामग्रीविशेषादुत्पद्यमान एव संयोगो निरवयवेऽपि परमाणौ परममहति वा वस्तुनि स्वाभावसामानाधिकरण्यमनुभवन् स्वाभावाभावात्मकस्वानुबन्धेन यथोपलम्भप्रतिनियतप्रदेशभेदधियमुपदधातीति प्रमाणबलादभ्युपगन्तव्यम्। एवमिहापि निरवयवेऽपि त्रिगुणे परमेश्वर-सङ्कल्पविशेषपर्यवसितैः सामग्रीभेदैः स्वाभाविकसंविभक्ताश्रयाः प्रतिनियतप्रदेशाः परिणतिभेदाः प्रादुष्षन्तीति। तत्र स्पर्शादिलक्षणप्रादेशिकपरिणतिदशायां छेदनभेदनपरिस्पन्दनादीनामपि सिद्धिरिति किं नोपपद्यते? स्पन्दस्पर्शादि-भेदाश्रयांशानामपि भेदाः त एव विलक्षणधर्माः। यथा निर्भिदाकाशवादे प्रदेशानां संयोगविशेषास्तीव्रतरशब्दादिधर्मा एव वा भेदाः; तद्वदत्रापि। नन्वेवमप्यनतिलङ्घनीयैव भेदाभेदवागुरेति चेन्न; ईदृशभेदाभेदप्रसङ्गस्य **वैनाशिक**मतेऽपि अविवादात्; अविरोधाच्च। तस्य च अतत्त्ववादे हि विरोधं ब्रूमः; न पुनस्तथाभूतस्यातथापरिणामे। अवस्थारूपयो-रेकत्वबहुत्वयोः कालभेदेन परिहारात्। तथा च **भाष्यम्**—* कपालत्वचूर्णत्वपिण्डत्वावस्थाप्रहाणेन घटत्वावस्थावदे-कत्वावस्थाप्रहाणेन बहुत्वावस्था; तत्प्रहाणेन एकत्वावस्थेति न कश्चिद्विरोधः इति। भवतु अवस्थारूपस्यैकत्वस्य पूर्वापर-भाविना बहुत्वेनाविरोधः। तद्द्रव्यस्वरूपैक्येन तु विरोधः स्यात्। न स्यात्; तद्द्रव्यस्य हि अतद्द्रव्यत्वं विरुद्धम्। न तु तस्यैव सतोऽनेकधर्मयोगोपाधिकं बहुत्वम्। स्मरति च भगवान्**पराशरः**—

* परमात्मात्मनोर्योगः परमार्थ इतीष्यते। मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः॥ इति॥

अस्तु वा स्वतः सांशत्वं पिण्डवदव्यक्तस्य। तथाऽपि पिण्डवदेव न भेदाभेदावयविवादप्रसङ्गः। नन्वेवं यथांशं स्वकार्यारम्भकत्वे किमेकीभावावस्थाकल्पनेन इति चेन्न; यदि वयं **कापिल**वत्कल्पयेमहि; तदैवमुपालभ्येमहि। कारण-श्रुतिसमधिगता तु एकत्वावस्था न कल्पनागौरवानुयोगविषयः। नच नैरर्थक्यम्; श्रुतिबाधपरिहाराय प्रयोजनकल्पनोप-पत्तेः। न चैकत्वमौपाधिकत्वादवास्तविकम्; संपिण्डितानामेकारम्भादेकत्वारम्भस्यैव लघुत्वात्। अवयविभङ्गे चैतत् स्थाप-यिष्यामः। न चैवमपि पराभिमतपरमाणुपुञ्जमात्रत्वमाशङ्कनीयम्; गन्धरसरूपस्पर्शादिरहितपरस्पराप्रतिघातकसत्त्वरज-स्तमोरूपगुणत्रयाश्रयपरस्परसुश्लिष्टपञ्चभूतसूक्ष्मद्रव्यरूपत्वेन श्रुत्यादिसिद्धे पराभिमतपरमाणुस्वभावगन्धाभावेनार्थान्तरत्व-सिद्धेः। यत्तु औपाधिकभेदाभेदवादिनं प्रति **भाष्ये** ब्रह्मण उपाधिसंसर्गादपि छेदनाद्यनुपपत्तिकथनम्, तद्ब्रह्मस्वरूपस्य निष्कलत्वाच्छेद्यत्वादिवचनबलमवलम्ब्य। अन्यथा ब्रह्मस्वरूप एव सविकारत्वापत्तौ निर्विकारत्वश्रुतेरनवकाशत्वप्रसङ्गात्। तत्र [च] सर्वज्ञत्वात्सर्वांशगतसुखदुःखादिप्रतिसन्धानप्रसङ्गो दुष्परिहरः। इह तु अंशभेदप्रतिनियतविकारेषु न स्वभाव-सङ्कर इति। एतेन परमाणुकारणवादो निरस्तः। जालालोकविलोकनीयत्रसरेणुशब्दवाच्यद्रव्यातिरिक्ताप्रत्यक्षाणुकल्पने प्रमाणाभावात्। तेष्वेव मात्रया भेदमवलम्ब्य परमाणुद्व्यणुकत्र्यणुकादिव्यपदेशः प्रमाणग्रन्थेषु। तेषामेव रूपाद्यनुद्भव-दशायां गृह्यमाणगन्धाश्रयगन्धवाहानीतसूक्ष्मद्रव्यवदचाक्षुषत्वादिसंभवात्परमाणोरप्रत्यक्षत्वव्यवहारः क्वचित्कृतोऽपि न वि-रुध्यते। न च पवनानीतगन्धाश्रयद्रव्येषु परमाणुत्वं भवतामपीष्टम्; परमाणूनां प्रत्यक्षगुणाश्रयत्वानभ्युपगमात्। अतः प्रत्यक्षादागमाद्वा न भवदभिमतपरमाणुसिद्धिः। अनुमानानि तु पश्यामः। अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तम्; परि-माणतारतम्यरूपत्वात् महत्परिमाणतारतम्यवदिति चेन्न; तारतम्यरूपत्वादित्येतावताऽपि व्यभिचाराभावेन परिमाणविशे-षणस्य व्यर्थत्वात्। पारिमाण्डल्यविवक्षया अणुशब्दप्रयोगे अन्योन्याश्रयणात्। महत्त्वापकर्षतारतम्यस्य त्रसरेणावेव पर्यवसितत्वाभ्युपगमात्। सामान्यतः परिमाणापकर्षतारतम्यविवक्षया प्रयोगेऽपि तद्विश्रान्तेरपि दृश्यमान एवोपपत्तेः।

एवमवयवापकर्षतारतम्यविश्रान्तेरपि। अस्तु वा तस्याविश्रान्तिः; तथाऽपि आधिक्यन्यूनताभ्यां प्रमाणसिद्धाभ्यां सर्षपमहीधरादिपरिमाणाविशेषप्रसङ्गः परिहृतः। अनन्तत्वाविशेषेऽपि परापरजातीयेषु क्षणदिवसपक्षमाससंवत्सरचतुर्युगकल्पादिषु च आधिक्यन्यूनतयोर्भवद्भिरप्यभ्युपगतत्वात्। विप्रतिपन्नं कार्यद्रव्यारब्धम्; महत्त्वे सति चाक्षुषत्वात्, चाक्षुषद्रव्यत्वात् इत्यादीनां विपक्षे बाधकाभावादप्रयोजकत्वम्। द्रव्यचाक्षुषताप्रकर्षो महत्त्वावयवसङ्ख्याप्रकर्षानुविधायी दृष्टस्तद्धेतुक एव अतस्तदभावे चाक्षुषत्वं न स्यादिति चेन्न; यथोपलम्भं योग्यतास्वीकारात्, अन्यथा महावयवारब्धत्वस्यापि व्याप्तावनुप्रवेशप्रसङ्गात्। लाघवं चास्मन्मते। वायवीयतैजसाप्यपार्थिवत्रसरेण्वादेरपि पूर्वपूर्वभूतात्मककार्यद्रव्यारब्धत्वादस्मन्मतेन सिद्धसाधनत्वं च। कार्यावयवित्वसाधनेऽपि चाक्षुषतया अस्मदुपगतेन कालेनानैकान्त्यं दुष्परिहरम्। परिदृश्यमानमेव परमाणुमिच्छतां महत्त्वविशेषणमसिद्धं च। चाक्षुषद्रव्यत्वादेव महत्त्वसाधनमपि पूर्ववद्दूष्यम्। पृथिवीत्वं नित्यसमवेतवृत्ति; [पटवृत्ति] घटपटजातित्वात् सत्तावत् इत्यादिकुटिलानुमानान्यपि पूर्ववद्विपक्षे बाधकाभावात्, विषयनियमराहित्येनातिप्रसञ्जकत्वात्, पृथिवीत्वं नित्यवृत्ति न भवति; पृथिवीमात्रजातित्वाद्घटत्ववदित्यादिभिस्तादृशैरनुमानैः प्रतिपक्षयितुं शक्यत्वात्, अभिमतविशेषपर्यवसानासिद्धेश्च निरूपका नानुमानेषु गणयन्ति। घटादीनां सर्वेषां नित्येश्वराश्रितत्वाभ्युपगमादतिरिक्तसमवायानभ्युपगमाच्च सिद्धसाधनत्वं च। नित्यवृत्तीतिसाधनेऽपि घटादिरूपेण परिणतस्यापि त्रिगुणद्रव्यस्य स्वरूपतो नित्यत्वाभ्युपगमात् स एव दोषः॥

एवमारम्भकाणामणूनां कृत्स्नैकदेशसंयोगविकल्पेन अधिकपरिमाणद्रव्यानारम्भकत्वसभागत्वादिचोद्यं परमाणुदूषकैः सर्वैरपि क्रियते। **भाष्यकारैश्च** * महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् इत्यस्मिन्नधिकरणे तदेव चोद्यं कृतम्। तदेतन्**माध्यमिकाना**मेवोपपद्यते; न त्वन्येषाम्। तथाहि—**सौत्रान्तिका**द्यैरपि पुञ्जदशायां परमाणूनां संयोगानभ्युपगमेऽपि परस्परमावृतत्वानावृतत्वादिकं दिगवच्छेदभेदेन स्वीकार्यम्। ज्ञानमात्रवादिनोऽपि ज्ञानस्यैकस्यानेकज्ञेयाकारसंबन्धे कृत्स्नैकदेशविकल्पस्तदवस्थ एव। ज्ञेयमिथ्यात्वं तु न तत्परिहारः; मिथ्याभूतेऽपि उल्लेखावश्यंभावात्। यस्तु प्रत्यक्षाण्येव सूक्ष्मद्रव्याणि निर्भागाण्यभ्युपगच्छति; तस्यापि विभूनां निरवयवानां संयोगे तदेव चोद्यं स्थितम्। यस्तु विभुद्रव्यमपि नैच्छत्, तस्यापि सामान्ये स्यात्। तस्याप्यनभ्युपगमे संयोगसमवायादावनेकनिष्ठे स्यात्। न हि द्रव्य एवेदं चोद्यमिति नियमोऽस्ति। द्रव्याणामेव भागवत्त्वयोग्यतेति चेत्; तर्हि अणुविभुव्यतिरिक्तद्रव्याणामित्यपि ग्राह्यम्। सत्यम्; कथं तर्हि **भाष्यम्**? दृश्यमानातिरिक्तकल्पना[निरासा]भिप्रायम्। निर्भागतया उपलभ्यमानस्यापि यः सावयवतां कल्पयति, तस्य सर्वं द्रव्यं द्रव्यारम्भकमवयवतः संयुज्यैवारभते; दिगवच्छेदभेदोऽप्यवयवत एवेति व्याप्तिः स्यात्, ततः पराभिमतप्रतिष्ठिता[ण्व]सिद्धिरिति प्रत्यक्षागमसिद्धाण्वीश्वरादिषु यथाप्रमाणमङ्गीकार्यम्। अत एव * कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा इति सूत्रे * श्रुतेस्तु शब्दमूलत्वात् इत्यादि च परिहारसूत्रम्। अस्तु तर्हि प्रत्यक्षसिद्धैरेव सूक्ष्मद्रव्यैर्जगदारम्भः। मैवम्; स्वतन्त्रारम्भे शास्त्रविरोधात्। परतन्त्रारम्भाभ्युपगमे च यथागमं प्रकृतेरपि स्वीकार्यत्वात्। भूतचतुष्टयपूर्वभाविनश्च प्रपञ्चस्य तदारम्भणीयत्वविरोधात्। महाभूतचतुष्टयावयवानामाकाशशब्देनाभिधानमिति हास्यम्। भूतानामन्योन्योपादानोपादेयत्वविशिष्टसृष्टिक्रमप्रक्रियाविरोधश्च। भूतचतुष्टयातिरिक्तं नास्तीति चेन्न; आगमविरोधात्। तथा त्रसरेणूनामेव गन्धादिरहितावस्थाऽस्त्विति स्वीकारे तद्वदविभागापत्तिः स्वीकार्येति सैव मूलप्रकृतिरिति सिद्धम्। सा च समत्रैगुण्या मूलप्रकृतिः। तस्यामपि मात्रया भेदमवलम्ब्य अव्यक्ताक्षरविभक्ताविभक्त-

तमोरूपावस्थाचतुष्टयमामनन्ति । उक्तं च **न्यायसुदर्शने वरदनारायणभट्टारकैः**—* द्विविधाः स्मृतिकाराः—केचिदव्यक्तकारणवादिनः, केचित् तमःकारणवादिनः । अव्यक्तस्यैव सूक्ष्मावस्थाभेदोऽक्षरं तमश्च नातीव भेदः इत्यव्यक्ते पर्यवस्यतामभिप्रायः । तमपि भेदमुररीकृत्य तमसि पर्यवस्यताम् । तस्मादुभयेषामविरोधः इति । यत्तु **भाष्यादिषु** अव्यक्तसहपठिताक्षरशब्दस्य चेतनविषयतया बहुश उपादानम्; तत् परव्याख्यानप्रकारमनुरुध्य वा, स्वरूपतो निर्विकारे जावे सृज्यत्ववचनाच्चिद्रूपविकारवत्त्वेऽपि यथाऽक्षरशब्दप्रवृत्तिः, तथा परब्रह्मेतरविषयस्याक्षरशब्दस्याचिदवस्थाविशेषेऽपि शक्तिकल्पनोपपद्यत इति प्रतिपादयितुं वा, क्वचित्क्षरे प्रकृतिविशेषे अक्षरशब्दप्रयोगस्य मुख्यत्वायोगात् परब्रह्मरूपाक्षरसंबन्धेन लक्षणायां प्रयोजनाभावात्, जीवसंबन्धेनाजहल्लक्षणायां लयविशेषादिप्रतिपादनौचित्यात्, * उभावेतौ लीयेते परमात्मनि इत्यादिना द्वयोरपि लयाभिधानाच्च अत्राजहल्लक्षणैव युक्तेत्यभिप्रायेण वेति न कश्चिद्विरोधः इति ॥

महदहङ्कारौ ॥ अव्यक्ताहङ्कारावस्थाव्यवहितोत्तरपूर्वावस्थाविशिष्टं त्रिगुणं महान् । तच्छब्दवाच्यत्वमेव वा तल्लक्षणम् । एवमहङ्कारादिष्वपि भाव्यम् । अध्यवसायरूपवृत्तिर्महानिति साङ्ख्याः । यथाऽऽहुः * अध्यवसायो बुद्धिः इति । तदसत्; अध्यवसायस्यात्मधर्मत्वात् । यदि परं तन्निमित्तत्वमात्रं महतः; तावतैव बुद्ध्यध्यवसायादिप्रयोगविषयत्वम्; न च तन्निमित्तत्वमात्रं लक्षणम्; अतिव्याप्तेः, अवान्तरविशेषस्याप्यनवधारणात् । अवधारयतां तु तदपि लक्षणम् । एवं धर्माधर्मादिकारणत्वादिकमपि लक्षणं निरसनीयम् । स त्रिधा सात्त्विको राजसस्तामसश्चेति । तत्र तत्तद्गुणोन्मेषवशादंशभेदात्तत्तद्व्यपदेशः । इन्द्रियाव्यवहितपूर्वावस्थाविशिष्टं त्रिगुणमहङ्कारः । अत्रापि पूर्ववत् * अभिमानोऽहङ्कार इति साङ्ख्यलक्षणं दूषणीयम् । स च अनात्मनि देहे अहंभावकरणहेतुत्वमात्रादहङ्कारशब्दवाच्यः । न त्वहमर्थत्वात् । प्रतीच आत्मन एव तत्त्वात् । न चैवं त्याज्यत्ववचनविरोधः ; अहङ्कार[कार्य]स्य उत्कृष्टजनावमानहेतोर्गर्वापरपर्यायस्याभिमानस्य तथोक्तेः । सोऽपि पूर्ववत् त्रिविधः । तत्र सात्त्विकादिन्द्रियाणि । तामसात् शब्दतन्मात्रम् । राजसः उभयानुग्राहकः । राजसतामसयोरपीन्द्रियाव्यवहितपूर्वभावित्वमात्रं सिद्धमिति नाव्याप्तिः । त्रयाणां प्रत्येकप्रत्येकलक्षणमपि यथास्वं कार्यकारणप्रकाराः । यत्तूक्तं **भोजराजेन**—

* स्यात्त्रिविधोऽहङ्कारो जीवनसंरम्भगर्वरूपोऽयम् । संभेदादस्य सतो विषयो व्यवहार्यतामेति ॥
सात्त्विकराजसतामसभेदात्संजायते पुनस्त्रेधा । स च तैजसवैकारिकभूतादिकनामभिः समुच्छ्वसिति ॥
तैजसतस्तत्र मनो वैकारिकतो भवन्ति चाक्षाणि । भूतादेस्तन्मात्राण्येषां सर्गोऽयमेतस्मात् ॥ इति ।

तत्र विरुद्धांशो बाह्यशैवागममूलत्वेनानादरणीयः । एवं **भगवत्पराशरा**द्युक्तप्रमाणतमपुराणाद्यानुगुण्येन पुराणान्तरादिवचनादीनि निर्वाह्याणि । अत्यन्तविरुद्धानि त्वनादेयानि ॥

इन्द्रियाणि तद्विभागाश्च ॥ प्राणाद्यन्यत्वे सति हृत्कर्णचक्षुरादिशरीरप्रदेशविशेषावच्छिन्नव्यापारतया तत्तत्कार्यविशेषशक्तमिन्द्रियम् । * अशरीरं प्राणधार्यमेव यद्द्रव्यं पुरुषोपकारकं तदिन्द्रियम् इति **वरदविष्णुमिश्रै**रुक्तम् । * सात्त्विकाहङ्कारोपादानकमिन्द्रियम् इति **सांख्यादि**लक्षणमप्राकृतेन्द्रियाव्याप्तेरयुक्तम् । * शरीरसंयोगे सत्येव साक्षात्प्रमितिसाधनमप्रत्यक्षम्, साक्षात्कारसाधनम् इत्यादि **वैशेषिका**द्युक्तं तु कर्मेन्द्रियाव्याप्त्यादेरनुपपन्नम् । वक्ष्यते च वागादीनामिन्द्रियत्वम् । द्विधेन्द्रियं प्राकृतमप्राकृतमिति । शुद्धाशुद्धसत्त्वयोगादेस्तद्भेदः । अव्यक्तमहदहङ्कारेष्वपि प्राकृताप्राकृतविभागोऽस्तीति केचिदाचार्याः । शब्दतन्मात्रसहभवत्वसात्त्विकाहङ्कारोपादानद्रव्यत्वादि प्राकृतेन्द्रियलक्षणम् । पुनश्च

इन्द्रियं द्विविधं ज्ञानेन्द्रियं कर्मेन्द्रियमिति । ज्ञानप्रसरणशक्तमिन्द्रियं ज्ञानेन्द्रियम् । तत् षोढा—मनःश्रोत्रादिभेदात् । उक्तश्चैवंविभागस्तत्त्वरत्नाकरे **भट्टपराशरपादैः**—* तच्च षोढा इत्युपक्रम्य, *आन्तरं मनः इत्यन्तेन । मनःपूर्वकत्वात्सर्वप्रवृत्तीनां मनः कर्मेन्द्रियमिति **साङ्ख्यादयः** । यदाहुः—

*बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनात्वगाख्यानि । वाक्पाणिपादपायूपस्थं कर्मेन्द्रियं ह्याहुः ॥

उभयात्मकमत्र मन इति, तदसत्; तस्य च ज्ञानद्वारैव कर्महेतुत्वात् । तावता च तथात्वे चक्षुरादावपि प्रसङ्गात् । क्वचित्कर्मेन्द्रियत्वव्यवहारस्तु औपचारिकः । मानसवाचिककायिककर्मविभागस्तु कर्मशब्दस्य शुभाशुभसङ्कल्पादिरूपज्ञानेऽपि प्रयोगात् । अतः षडपि ज्ञानेन्द्रियाणि । तत्र प्राकृतविभागं प्रत्युच्यते ॥

प्राकृतमनश्श्रोत्रे ॥ अशुद्धसत्त्वे सति पञ्चविषयसाधारणेन्द्रियत्वम्, स्मृतिकरणेन्द्रियत्वम् इत्यादि प्राकृतमनोलक्षणम् । तच्च हृत्प्रदेशमात्राधिष्ठानम् । इन्द्रियान्तराणामपि हृत्प्रदेश एव कन्दस्थानम् । स्थानान्तरेष्वपि यथासंभवं वृत्तिः । आत्मनोऽपि त[त्र]त्रैव भूयसा वृत्तिः । तथा च **भाष्यम्**—* सर्वेन्द्रियकन्दभूतस्थानविशेषे वृत्तिरिति चक्षुषि नावस्थानम् इति । मन एकमेव अन्तःकरणम्, सङ्कल्पाध्यवसायादयस्तद्व्यापारभेदादेव जायन्ते इति नान्तःकरणवैविध्यम् । तथा च **भाष्यम्**—* अध्यवसायाभिमानचिन्तावृत्तिभेदात् मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यते इति । उदाहृतं चैतत् **प्राणे** सूत्रकारैः * पञ्चवृत्तिर्मनोवद्व्यपदिश्यते इति । अतः अन्तःकरणं त्रिविधम् इत्यादिवादिनः **साङ्ख्यादयो** निरस्ताः । शब्दादिपञ्चके शब्दमात्रग्रहणशक्तमिन्द्रियं प्राकृतश्रोत्रम् । तन्मनुष्यादीनां कर्णशष्कुल्यवच्छिन्नवृत्ति । द्विजिह्वानां नयनवृत्ति । तदुक्तं **न्यायतत्त्वे करणपादाष्टमाधिकरणे**—* चक्षुषा श्रवणं सर्पाणामेवेति नियम्यते इत्यादि । यत्तूक्तं **तत्त्वरत्नाकरे**—* कर्णशष्कुलीशरीरनयनगोलकरसनानासिकाधिष्ठानानि च तानि इति, तत्प्रायिकं मन्तव्यम् । एतस्य नाभसत्वदिगुपादानत्ववादानामनन्यथासिद्धाहङ्कारिकत्ववचनबलादाप्यायितत्वादिभिर्निर्वाहः । यत्तु **करणपादपञ्चमाधिकरणे** नेत्रश्रोत्रादिशक्तीनामालोकशब्दाद्यात्मकत्वमुक्तम्, यच्च तत्रैव **सप्तमाधिकरणे** * अन्नस्य अतिसूक्ष्मपरिणाममिन्द्रियम् इत्यादिना, * कर्मेन्द्रियाणामप्यन्नपरिणामत्वात् इत्यादिना च इन्द्रियाणां भौतिकत्वं प्र[तिपादि]तोतम्; तदप्यखिलमाप्यायनाभिप्रायेण निर्वाह्यम् । तथैव हि स्मृतिवचनमपि **वेदार्थसंग्रहे** निर्व्यूढम् । यथा—*वैकारिकाहङ्कारादेकादशेन्द्रियाणि जायन्ते इति हि वैदिकाः इत्युपक्रम्य, * एवमाहङ्कारिकाणामिन्द्रियाणां भूतैश्चाप्यायनं **महाभारत** उच्यते इति । श्रोत्रं भौतिकं बाह्येन्द्रियत्वात्, आकाशः इन्द्रियारम्भको भूतत्वात्, शब्दः स्वसमानजातीयगुणवता इन्द्रियेण गृह्यते बहिरिन्द्रियव्यवस्थाहेतुगुणत्वात्, श्रोत्रं स्वग्राह्यगुणसजातीयगुणवत् बहिरिन्द्रियत्वात् इत्यादीनां चक्षुराद्यभौतिकत्वस्य वक्ष्यमाणत्वात् साध्यविकलत्वश्रुतिबाधादिदूषणानि वाच्यानि ।

शब्दस्य भूतधर्मत्वात् श्रुतेर्वैकारिकत्वतः । संयुक्तनिलयो योग्यः स तया संप्रतीयते ॥

शब्दस्य द्रव्याद्रव्यत्वश्रोत्रगमनशब्दागमनादिविवादमद्रव्ये शमयिष्यामः ॥

त्वगादीन्द्रियाणि ॥ त्वगादीनामपीन्द्रियाणां पूर्वोक्तश्रोत्रलक्षणे शब्दमात्रपदस्थाने क्रमात् स्पर्शमात्रादिपदन्यासेन लक्षणमूह्यम् । तत्र त्वगाश्रयः कृत्स्नं वपुः । प्रदेशभेदेन स्पर्शोपलम्भतारतम्यम् । नखदन्तकेशादिषु स्पर्शानुपलम्भश्च प्राणमान्द्यतारतम्यादिति **करणपादाष्टमाधिकरणे** प्रोक्तम् । यथायोग्यं वाय्वादिचतुष्टयं संयोगेन तया गृह्यते । स्पर्शादयस्तु संयुक्तनिष्ठतया । चक्षुरादीनामाश्रयाः नयनगोलकतालुनासाः । तत्र गजानां नासा हस्त इति पाणिघ्राणयो-

रेकमेवाधिष्ठानमुच्यते । [तदपि] तत्रोक्तम् *हस्तेन गन्धोपलब्धिः गजानामेव इत्यादि । जङ्गमशरीरेष्वेव प्रायशोऽयमिन्द्रियप्रदेशानियमः । चक्षुषा वायुव्यतिरिक्तभूतचतुष्टयं तथैव गृह्यते । रूपादयोऽपि स्पर्शादिवत् । दूरस्थग्रहणे तु चाक्षुषमहःप्रसरणात् संबन्धसिद्धिः । तच्च **करणपादद्वितीयाधिकरणे** प्रपञ्चितम् । प्रतिबिम्बग्रहणे तु स्वच्छद्रव्यप्रतिहतस्य नयनमहसः प्रतिस्रोतःप्रसरादिमूलकत्वं **भ्रान्त्यधिकरण**पूर्वपक्षे अभिहितम् । स्फटिकादौ दर्शनवशात् नयनादिप्रभामात्रप्रवेशयोग्यं संस्थानमिति सर्वेषां तद्व्यवहितोपलम्भः । अञ्जनादिसंस्कृतनयनप्रभायाः पृथिव्यादावनुप्रवेशात् तदक्तचक्षुषां निधिप्रभृतेरुपलम्भः । जिह्वाघ्राणाभ्यां तु रसगन्धौ क्रमात्संयुक्तनिष्ठतया गृह्येते । उक्तं चेदं संबन्धद्वैविध्यं **तत्त्वरत्नाकरे**—*तत्र वृद्धा विदामासुः संयोगं संनिकर्षणम् । संयुक्ताश्रयणं चेति यथासंभवमूह्यताम् ॥ इति । तदेवं मनःस्पर्शनलोचनानि द्रव्याद्रव्यग्राहकाणि । श्रोत्रजिह्वाघ्राणानि अद्रव्यग्राहकाणि । सर्वेषामपि इन्द्रियाणां तत्तत्कालादिविशिष्टवस्तुग्राहकत्वात् द्रव्याद्रव्यग्राहकत्वमेव वा । उक्तं च **प्रमेयसंग्रहे श्रीविष्णुचित्तार्यैः** सन्मात्रप्रत्यक्षनिराकरणप्रसङ्गेन *कालस्य वस्तुधर्मतया सर्वप्रतीत्यन्तर्भावात् न पृथग्रूपत्वम् इति ॥

यत्तु **वैशेषिकादि**भिरुच्यते—त्वगादीनीन्द्रियाणि क्रमाद्वाय्वाद्यात्मकानि स्पर्शादिषु मध्ये स्पर्शरूपरसगन्धमात्राभिव्यञ्जकत्वात्, स्वेदशैत्याद्यभिव्यञ्जकपवनवत्, दीपप्रभावत्, दन्तान्तर्गततोयवत्, कुङ्कुमगन्धाभिव्यञ्जकघृतवत् इति । तत्र व्यञ्जकत्वं नाम व्यक्तिं प्रति करणत्वम्? तदनुग्राहकत्वं वा? सामान्येन हेतुत्वमात्रं वा? इन्द्रियत्वं वा? न प्रथमद्वितीयौ; स्वेतरहेतुवर्गप्रतियोगिकस्य साधकतमत्वादेर्वैवक्षिकत्वेन साधनवैकल्यासिद्धिप्रसङ्गात् । न तृतीयः; इन्द्रियाधिष्ठानतत्संस्कारादिभिरनैकान्तिकत्वात् । न तुरीयः; साधनवैकल्यात् । सर्वेषां च आगमबाधः । स एव धर्मिग्राहकबाधोऽपि । आगममन्तरेण गोलकातिरिक्तेन्द्रियासिद्धेः । किञ्चित्करणपूर्वकेत्येतावताऽपि करणमात्रं हि सिध्येत्, नातिरिक्तम् । गोलकादेरवैकल्येऽपि कार्यवैकल्यादतिरिक्तं कल्प्यते इति चेन्न; सूक्ष्मस्य वैकल्यस्य मूषिकाघ्रातबीजवत् दुर्दर्शत्वात्, परिमलादिप्रसर इव पार्थिवगोलकावयवविशेषप्रसरवशादेव विषयसंबन्धसिद्धेः; प्राप्यकारित्वाविरोधाच्च । अतोऽन्वयव्यतिरेकसिद्धस्य आगमसिद्धस्य वा पक्षीकारे ग्राहकप्रमाणबाधोऽवर्जनीयः । यत्तु आलोकाभावे जायमानो रूपसाक्षात्कारः तेजःकरणकः, रूपसाक्षात्कारत्वात्, सत्यालोके जायमानरूपसाक्षात्कारवदिति चक्षुषस्तैजसत्वमिति; तदपि न; आप्यायकतेजसा सिद्धसाधनत्वात् । तेजसस्तत्र कारणत्वेऽपि तत् चक्षुरेवेति नियामकाभावात् । इन्द्रियवदेवानुद्भूतरूपस्पर्शस्य कस्यचिद्ग्राह्यतेजसोऽपि ग्रीष्मोष्मवत् संभवात् । उद्भूतरूपस्यापि साधने भवदभिमतेन्द्रियस्यापि तथात्वप्रसङ्गेन तमस एव असिद्धिप्रसङ्गात् । ईश्वरज्ञानेन चानैकान्त्यात् । अनित्यत्वेन विशेषणेऽपि स्वाप्नयोगिसाक्षात्कारैरनैकान्त्यात् । सर्वव्यभिचारस्थलव्यतिरिक्तत्वे सतीति विशेषणे तर्ककौशलम् । एवमनुमानान्तरेऽपि यथासंभवं दूषणमूह्यम् । अप्राकृतश्रोत्रादिषु तु मुक्तेश्वरादीनां करणाधीनज्ञानप्रसराभावेऽपि स्वेच्छया परिग्रहवशात् विषयसहकारिनियमे न निर्बन्धः । तत्तदधिष्ठानविशेषादिभिः तल्लक्षणम् । **बौद्धास्तु** बुद्धश्चक्षुषैव सर्वं जानातीति वदन्ति । तदयुक्तम्; तादृशभवदभिमतसार्वज्ञ्ये प्रमाणाभावात् । चक्षुःप्रकर्षतारतम्यं क्वचिद्विश्रान्तं प्रकर्षतारतम्यत्वादित्यादेरपि चक्षुर्ग्राह्यवर्ग एव सर्वातिशायित्वसंभावनया तदतिलङ्घनेन रसादिविषयविश्रान्त्ययोगादिति ॥

प्राकृतकर्मेन्द्रियाणि ॥ अथ कर्मेन्द्रियम् । उच्चारणादिषु अन्यतमक्रियाहेतुत्वं तल्लक्षणम् । तत्पञ्चधा वागादिभेदात् । वर्णोच्चारणकरणमिन्द्रियं वाक् । तच्च हृत्कण्ठजिह्वामूलतालुदन्तोष्ठनासामूर्धरूपस्थानाष्टकवृत्ति । शुकादिव्यति-

रिक्तविहङ्गादीनां तत्तददृष्टसंस्थानादिसहकारिविरहात् वर्णोच्चारणाशक्तिः । शुकादीनामपि किञ्चित्तद्वैषम्यादुच्चारणवैषम्यम् । शिल्पकरणमिन्द्रियं **पाणिः** । स च मनुष्यादीनामङ्गुल्यादिवृत्तिः । वारणादीनां नासावृत्तिः । ननु तालुपादादिभिरपि अभ्यासपाटवात् मौक्तिकग्रथनलिपिकरणादिशिल्पदर्शनात् तत्रापि तद्वृत्तिरास्थेया ; सत्यम् । मात्रया तद्वृत्तिरस्त्येव । विरोधाभावाद्देशभेदेन । इन्द्रियान्तरव्याप्ते देशे अवस्थानादेश्चक्षुःस्पर्शनादौ दर्शनादिति । सञ्चरणकरणमिन्द्रियं पादः । स च मनुष्यादीनां चरणादिवृत्तिः । भुजगपतगादीनां तु उरःपक्षादिवृत्तिः । तदुक्तं **करणपादाष्टमाधिकरणे**—* सर्पाः पादात् कर्मेन्द्रियादृते वक्षसा गच्छन्ति । तेषां गतिशक्तिरुरसि । तस्मादुरगास्ते पन्नगाश्च इति । * पादात् कर्मेन्द्रियात् इत्यवयवविशेषलक्षणा । सर्वेषामपि जन्तूनामेकादशेन्द्रियवत्त्वेन साक्षादिन्द्रियनिषेधायोगात् । तस्य च तत्तत्संस्थानादिसहकारेण स्थलजलगगनादिसञ्चारहेतुता । विहगादिपरकायप्रवेशे अन्वयव्यतिरेकदर्शनात् । मलादित्यागकरणमिन्द्रियं **पायुः** । स च तत्तदवयववृत्तिः । विहङ्गविशेषादीनां तु मुखादिवृत्तिः । तच्चोक्तं **तत्रैवाष्टमाधिकरणे** * यथा वा मान्धालादीनामास्येन विण्मूत्रविसर्ग इति । आनन्दविशेषकरणमिन्द्रियम**ुपस्थः** । स च मेहनादिवृत्तिः । ये तु कर्मेन्द्रियाणि नाभ्युपगच्छन्ति ; तैर्ज्ञानेन्द्रियाणि नाभ्युपेयानि । तर्कागमयोरुभयत्राविशेषात् । चक्षुर्गोलकादाविव दृष्टवैकल्येऽपि पादादौ सञ्चारादेः क्वचित् सूक्ष्मदोषविशेषेण प्रतिबन्धादिति । एतेषां सङ्ख्यानिर्णयाधिकरणोपसंहारे **भाष्यम्**—* इत्यादिश्रुतिस्मृतिसिद्धेन्द्रियसङ्ख्या स्थिता । अधिकसङ्ख्यावादा मनोवृत्तिभेदाभिप्रायाः । न्यूनव्यपदेशास्तु तत्रतत्र विवक्षितगमनादिकार्यविशेषप्रयुक्ता इति । अणुत्वं चैषामुपलब्ध्ययोग्यपरिच्छिन्नपरिमाणत्वमात्रमेव * अणवश्च इति सूत्रोक्तमिति **भाष्ये** व्यक्तम् । * एते सर्व एव समाः सर्व एवानन्ता इति श्रुतिस्तु उपकरणत्व[मात्र] साम्यम्, * अथ यो ह्येताननन्तानुपास्ते इत्युपास्यतया विहितप्राणविशेषणभूतकार्यबाहुल्यं चाभिप्रैति । अत एव तेषां परिच्छिन्नविचित्रपरिमाणत्वं स्थितम् । विकारशीलत्वाच्च मशकमातङ्गादिनानादेहेषु विचित्रपरिमाणत्वम् । कालभेदेन परिमाणभेदाविरोधं ज्ञाने समर्थयिष्यामः । सर्वेषां चैषां स्वाधिष्ठानदोषादिरेव दोषः । सुषुप्त्याद्यवस्थास्विव स्थावराद्यवस्थासु अदृष्टादिवशात् तत्तद्वृत्तिनिरोधतारतम्यम् । प्रबलादृष्टसहकारात् [गृध्र] गन्धर्वयोगिप्रभृतीन्द्रियाणामतिसूक्ष्मव्यवहितविषयता । उत्पत्तेरारभ्य अदृष्टवशात् प्रतिपुरुषनियतानामपि तेषां जीववत्परकायप्रवेशे विशिष्टाददृष्टान्तरवशात् कायवदेव परोपकारकत्वम् । स्वेन्द्रियैः सह सर्वत्र प्रवेशात् तेषामेव वा तत्राप्युपकारकत्वम् । मृतकायप्रवेशे हि स्वेन्द्रियैरेव तथा । जीववत्कायप्रवेशेऽपि स एव समाधिरुचितः । **स्मृतिश्च**—

* शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः । गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ इति ।

मृतकायस्य च परकायव्यवहार उपचारात् परकायारम्भकशरीरैकदेशैः अस्थ्यादिभिः प्रविष्टस्य कायलक्षणसङ्घात आरभ्यते । तदा च स्वशरीरं मृतमेव । मृतपरकायप्रवेशवत् पुनः प्रवेशः । अनेकशरीराधिष्ठानशक्तानां तु यथेष्टम् । शरीरविनाशे च इन्द्रियाणि आप्यायकैर्मात्रया हीयन्ते । शरीरान्तरे पुनरापूर्यन्ते । मुक्तपरित्यक्तानि अन्यपरिगृहीतानि अपरिगृहीतानि वा यावत्प्रलयमवतिष्ठन्ते इत्यादिकं द्रष्टव्यम् । ननु कर्मेन्द्रियाणां शरीरेण सहोत्पत्तिविनाशौ ; न पुनः शरीरान्तरगमनमस्ति । तथा हि **सारे** अभिहितम्—* हस्तादयोऽपि इन्द्रियाणि ; जीवे देहान्तरवस्थिते उपकारकत्वाविशेषादिति । एवं **भाष्ये**ऽप्युक्तम् * न सप्तैवेन्द्रियाणि ; अपि त्वेकादश । हस्तादीनामपि शरीरे स्थिते जीवे तस्य भोगोपकरणत्वात्कार्यभेदाच्च । दृश्यते हि श्रोत्रादीनामिव हस्तादीनामपि कार्यभेद आदानादिः इति, *न्यूनव्यपदेशास्तु

तत्रतत्र विवक्षितगमनादिकार्यविशेषप्रयुक्ताः इति च । **दीपे** तु व्यक्तमेवोक्तम्—* तत्र श्रोत्रादीनि जीवेन सह शरीरान्तरगमनेऽपि गच्छन्ति; वाग्घस्तादीनि कर्मेन्द्रियाणि तु स्थिते शरीरे तेनैव सह उत्पत्तिविनाशयोगीनि उपकारकाणि इत्यादि । अतो **यादवप्रकाश**वत् कर्मेन्द्रियाणां प्रतिशरीरमुत्पत्तिविनाशौ **भाष्यकारा**भिमतौ । नैतदेवम्; * प्राणगतेश्च इति सूत्रे * तमुत्क्रामन्तं प्राणोऽनूत्क्रामति, प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति इत्यादिश्रुतेरुदाहृतत्वात्, सप्तगतेः इत्यधिकरणे यानि त्वितराणि, विषयाणां ग्राहकत्वेन तेषामौपचारिकः प्राणव्यपदेशः इति पूर्वपक्षं कृत्वा, * हस्तादयस्तु स्थितेऽतो नैवम् इति तेषामपि प्राणत्वसमर्थनाच्च । * प्राणगतेश्च इत्यस्यैव समनन्तरे * अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् इति सूत्रे **भाष्यम्**—* यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वायुं प्राणश्चक्षुरादित्यम् इत्यादिना प्राणानां जीवमरणकाले अग्न्यादिष्वप्ययश्रवणात् न तेषां जीवेन सह गमनमिति गतिश्रुतिरन्यथा नेयेति चेन्न; भाक्तत्वात् अग्न्यादिष्वप्ययश्रवणस्य इत्यादिकम् । अतः कर्मेन्द्रियस्य वाचोऽत्र गतिरभ्युपेतेत्युपलभ्यते । तदन्येषामपि सममेव । **सारे**ऽप्युक्तम्—* सप्तानां गतिश्रवणं विशेषणं च तेषां प्राधान्यात् इति । **दीपे**ऽपि * सप्तानामेव गतिश्रवणं योगकाले विशेषणं च ज्ञानेन्द्रियाणां मनसः तत्प्रवृत्तिरूपबुद्धेश्च प्राधान्यात् इत्यादि । न च आहङ्कारिकेन्द्रियवादिनः प्रतिशरीरमिन्द्रियोत्पत्तिविनाशाभ्युपगम उपपद्यते । पाण्याद्यधिष्ठानानि तु नेन्द्रियाणीति तदुत्पत्तिलयोपपत्तिः । कथं तर्हि श्रोत्रादीनीत्यादेर्निर्वाहः? इत्थम्—परमतवत् प्रतिशरीरमुत्पत्तिविनाशाभ्युपगमेऽपि तेषामिन्द्रियत्वं सिध्यतीति कृत्वा * हस्तादयस्तु स्थितोऽतो नैवम् इति सूत्रस्य योजनान्तराभिप्रायेणैवमुक्तम् । अत एकादशेन्द्रियाण्यपि शरीरान्तरेष्वप्यनुवर्तन्त इति **भाष्यकारा**भिप्रेतमिति प्रतीमः । एवमेषामेव, एतावतामेव, एवंस्वभावानामेव, आगमेनैव सिद्धत्वात् **सौगतवैशेषिकचार्वाक**प्रभृतीनां स्त्रीन्द्रियपुरुषेन्द्रियादिकल्पनम्, कर्मेन्द्रियपरित्यागः, एकेन्द्रियवादः, तत्रापि त्वगिन्द्रियैकस्वीकारः, शरीरस्यैवेन्द्रियत्वम्, कर्मेन्द्रियाणां शरीरोत्पत्तिविनाशयोरुत्पत्तिविनाशौ, मनोविभुत्वनित्यत्वतैजसत्वनिर्मनस्कत्वादीनि, राजसाहङ्कारजन्यत्वभौतिकत्वादीनि, अन्यान्यपि प्रलपितान्यनादरणीयानि । युक्तिबाधादयश्च यथासंभवमुन्नेया इति ॥

तन्मात्राणि ॥ भूतानामव्यवहितसूक्ष्मावस्थाविशिष्टं द्रव्यं तन्मात्रम् । दधिरूपेण परिणममानस्य पयसो मध्यमावस्थावत् भूतरूपेण परिणममानस्य द्रव्यस्य ततः पूर्वा काचिदवस्था तन्मात्रा । तद्विशिष्टमपि द्रव्यं तन्मात्रमित्युच्यते । तदेव च भूतोपादानमिति न शब्दादिगुणमात्रात् भूतसृष्टिः । विशिष्टशब्दादिविषयाधिकरणं भूतम् । अत्रापि प्राकृताप्राकृतविवेकः पूर्ववत् । तन्मात्राणि च भूतानि च प्रत्येकं पञ्चधा शब्दतन्मात्राकाशादिभेदात् । तत्र तामसाहङ्काराकाशयोर्मध्यमावस्थाविशिष्टं द्रव्यं शब्दतन्मात्रम् । एवमुत्तरोत्तरतन्मात्रेष्वपि तत्तद्भूतद्वयमध्यमावस्थाविशिष्टत्वम्, अविशिष्टतत्तद्गुणाश्रयत्वम्, तत्तद्भूतोपादानत्वं च लक्षणमूह्यम् । साङ्ख्यास्तु * पञ्चापि तन्मात्राणि साक्षात् तामसाहङ्कारोत्पन्नानि । तत्र शब्दतन्मात्रमाकाशारम्भकम् । इतराणि तु तन्मात्राणि पूर्वपूर्वतन्मात्रसहकृतानि उत्तरोत्तरभूतारम्भकाणि इत्याहुः । तदसत्; * आकाशाद्वायुः इत्याद्यनन्यथासिद्धोपादानक्रमविशेषाभिधानदर्शनात् । भगवत्**पराशरादिभिश्च** प्रपञ्चितत्वात् * तन्मात्राणि भूतादौ इति श्रुतिस्तु न साक्षाद्यौगपद्येन अप्ययपरा; * पृथिव्यप्सु प्रलीयते इत्यादिपूर्ववाक्यविरोधात्, * आकाशाद्वायुः इत्यादिश्रुत्यन्तरविरोधाच्च । तथात्वे हि * पृथिवीगन्धतन्मात्रे लीयते, आपो रसतन्मात्रे लीयन्ते इत्यादिक्रममुक्त्वा, तन्मात्राणि भूतादाविति वक्तव्यम् । नचेयं श्रुतिरत्यन्तक्रमनिबन्धनपरा, आकाश

इन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु इति भवतामपि अनभिमतक्रमविशेषापातप्रतीतेः । एवम् * अष्टौ प्रकृतयः षोडश विकारा इतिश्रुतिरपि यथाकथञ्चिन्नेया । अत उक्तस्य शब्दतन्मात्रलक्षणस्य नातिव्याप्तिः । सहोत्पत्तावपि समानकालीनत्वमेव; न त्वाकाशाहङ्कारापेक्षया स्पर्शतन्मात्रत्वादीनां मध्यमावस्थात्मकत्वमिति नातिव्याप्तिः ॥

आकाशस्य द्रव्यत्वप्रत्यक्षत्वे ॥ अस्पर्शत्वे सति विशिष्टशब्दाधारत्वं श्रोत्राप्यायकत्वं च आकाशलक्षणम् । अयं च अवकाशदानादिना उपकरोतीति शास्त्रसिद्धत्वादभ्युपेत्यम् । आकाशरूपपरिणामरहितप्रकृत्यादिप्रदेशेष्वपि अवकाशोऽस्त्येव । अन्यथा तत्र स्पर्शवत् गत्यादिनिरोधप्रसङ्गात् । आकाशादेर्नित्यत्वादिसाधनानि निरवयवद्रव्यत्वादीनि आगमबाधान्यतरानैकान्तिकत्वादिभिर्दूषणीयानि । किंच इदं नित्यत्वं किमवस्थापत्तिराहित्यम्? किं वा द्रव्यस्य सर्वदा सत्त्वम्? इति । न प्रथमः; पार्थिवपरमाण्वादिभिरनैकान्तिकत्वात् । पक्षे च शब्दवत्त्वतदभावाद्यवस्थाभेदस्वीकारेण बाधापसिद्धान्तप्रसङ्गात् । न द्वितीयः; सिद्धसाधनत्वात् । अवयवविश्लेषलक्षणो विनाशो निषिध्यत इति चेन्न; अहङ्कारादिदशाप्राप्तस्य सिद्धसाधनत्वादेव । वायुत्वपञ्चीकरणादिप्राप्तावस्थाभेदे सर्वोपपत्तिः प्रागेवोक्ता । प्रत्यक्षश्चायमाकाशः । यदा उन्मीलनं चक्षुषः, तदैव आकाशोऽयमिति प्रतीतेः । नच नीरूपस्य कथं चाक्षुषमिति वाच्यम्; रूपवतो वा कथं चाक्षुषमिति प्रसङ्गात् । उपलम्भसिद्धया योग्यतयेति चेत्; तुल्यम् । अन्यथा रूपरूपिरूपैकार्थसमवायाद्यवान्तरभेदकल्पनानुपपत्तेश्च । पञ्चीकरणेन वा व्यष्टिरूपसिद्धिर्भाष्योक्ता । **प्रमेयसंग्रहे** चोक्तं यथा—* कालस्य वस्तुधर्मतया सर्वप्रतीत्यन्तर्भावात् न पृथग्रूपवत्त्वम् । गगनस्य दिशां च त्रिवृत्करणेन रूपवत्त्वम् इत्यादि । यत्तूक्तं **भाष्ये**—* नच चक्षुषा सन्मात्रं गृह्यते; तस्य रूपरूपिरूपैकार्थसमवेतपदार्थग्राहित्वात् इति; तत् प्रत्यक्षस्य विशिष्टविषयत्वपरम्; न तु रूपवन्मिश्रितत्वाख्यसंबन्धवर्जनपरम् । अत एव हि *रूपरूपिरूपैकार्थसन्निवेशाद्यालिप्तमेव चाक्षुषमिति स्थितम् इति **प्रमेयसंग्रहोक्तिः** । अतः संयुक्तसमवेतस्यापि रूपस्य कार्यकरत्वमुपलम्भबलात् ग्राह्यम् । न च ईश्वरादावतिप्रसङ्गः; गुरुत्वादितुल्यत्वात् । वाय्वादीनां तु पञ्चीकरणेन रूपवत्त्वेऽपि रूपानुद्भवादचाक्षुषत्वम् ॥ यत्तु **प्रमेयसंग्रहे**—* अद्यजातस्य चक्षुरपि न ह्यरूपं वायुं गृह्णाति इति, तदपि उद्भूतरूपाभावपरमेव । अत एवंप्रकारेण रूपित्वात् नभसः आकाशमस्ति श्याममिति प्रतीतिः । अत एव चेयं प्रतीतिर्नावरणाभावावलम्बना; विधिरूपत्वात् । भावान्तराभाववादिनस्तु अदोषत्वात् । अतिरिक्तवादिनां तु प्रागभावादिविकल्पदुःस्थत्वात् । कृत्स्नप्रतियोगिकनिषेधस्य असिद्धेः । आवरणेष्वपि तादात्म्याभावस्य सामानाधिकरण्यनिषेधात्मकत्वात् । संसर्गाभावस्य च यत्किञ्चित्संसर्गिप्रत्ययमन्तरेणानुपपत्तेः । तथा च स एव आकाश इति स्यात् । नच काल्पनिकाधिकरणनिषेधः; अबाधितत्वायोगात् । नाप्यालोकतिमिरावलम्बनः; तेष्वाकाशप्रतीतिव्यवहारयोरयोगात् । आरोपस्यापि प्रतीतिपूर्वकत्वात्, अप्रत्यक्षत्वे च तस्याङ्गुल्या निर्देशपूर्वकपामरव्यवहारगोचरता निर्मूला स्यात् । **शब्दाधिकरण**परिशेषानुमानादेरपामरविषयत्वादशक्यत्वाच्च । न हि शब्दस्य गन्धवत् भेर्याद्यवयवधर्मत्वे कारकतया व्यञ्जकतया चाभ्युपगतवायुधर्मत्वे वा कश्चिद्दोषः । न च स्पर्शनादिग्राह्यत्वप्रसङ्गः; एकभूतगुणस्यैव गन्धरसरूपादेर्भिन्नाक्षग्राह्यत्वस्य दृष्टत्वात् । एवं बाधकान्तरमपि दूष्यम् । गौरवं च भवतो बाधकं स्यात् । आगमवशात्तु वयमाकाशे शब्दमिच्छामः ।

वायुः ॥ आकाशात् स्पर्शतन्मात्रम् । ततो वायुः । तस्य विशिष्टस्पर्शवत्त्वे सति रूपशून्यत्वम्, असदादिस्पर्शैकेन्द्रियग्राह्यद्रव्यत्वम्, अनुष्णाशीतस्पर्शविशिष्टत्वे सति गन्धशून्यत्वम् इत्यादि लक्षणम् । अस्य त्वगिन्द्रियायोग्यत्वा-

प्रत्यक्षत्वादिसाधनानि अरूपिद्रव्यत्वादीनि उपलम्भ[बाध]विरोधानैकान्त्यादिभिर्निरसनीयानि । स्पर्शवत्त्वमेव हि स्पर्शनेन्द्रियग्राह्यत्वौपयिकम्; न रूपवत्त्वम् । तथा च **भाष्यं** च तदनुसारि**विवरणकार**वचनञ्च—*स्पर्शनमपि न सन्मात्रविषयम्; स्पर्शतद्वद्वस्तुविषयत्वात् इति । **प्रमेयसंग्रहश्च** *त्वगिन्द्रियस्यापि स्पर्शवद्वस्तुविषये शक्तिः इति । यदि च स्पर्शानुमेयो वायुः स्यात्; क्षितिसलिलतेजसामपि स्पर्शनग्राह्यत्वं न स्यात् । तत्रापि ततस्तदनुमानस्य सुवचत्वात् । उपलम्भस्य समत्वात् । तस्य च वायोः स्वभावाद्वा अदृष्टात्मकेश्वरसङ्कल्पाद्वा स्वारसिकं तिर्यक्प्रसरणम् । पार्थिवादिद्रव्येण वा वाय्वन्तरेण वा अभिघातवशात् भ्रमणोर्ध्वगमनादयः । ते च दूरस्थेन तृणर[ज्जु]जःप्रभृतीनां भ्रमणोर्ध्वगमनादिभिरनुमेयाः । तत्रत्येन तु स्पर्शनग्राह्याः । एतेन वायोर्नानात्वमपि सिद्धम् । अस्य च सर्वतः पार्थिवाप्योपरोधे सति स्तम्भः । सलिलातपकुसुमादियोगात् शीतोष्णसौरभारोपः । तथा चान्वयव्यतिरेकौ । एतेन *वृद्धिः समानैः सर्वेषां विपरीतैर्विपर्यय इति न्यायात् *वायुः शीत इत्यायुर्वेदानुसारिणां वादिनां मतं निरस्तम् । शीतसंवर्ध्यत्वोष्णापचेयत्वादिभिः साम्यात्तु शीततया उपदेशः । न तु सजातीयविजातीयाभ्यामेव उपचयापचयाविति नियमः; पार्थिवादिभिर्दोषाणामनियमेन उपचयापचयदर्शनात् । तत्रापि तत्तत्पदार्थसांसिद्धिकसलिलाद्यंशशक्त्या तदुपपत्तिरिति चेत् अत्रापि तथात्वे को विरोधः? व्यष्टिव्यवस्थस्य मारुतस्य तदुपचयापचयहेतूनां च पाञ्चभौतिकत्वात् *आपोमयः प्राणः इति श्रुत्या प्राणस्य सलिलाप्यायितत्वसिद्धेश्च शीतसंवर्ध्यत्वाद्युपपत्तेः । दुरूहां वस्तुशक्तिमवलम्ब्यैव स्वभावः प्रभावश्च तैरेव क्वचित्क्वचित् वर्ण्यते; यथा दुन्दुभिस्वनादौ । सा चात्रापि अनिवार्येति न सङ्कटं किञ्चित् । स च त्वगिन्द्रियाप्यायनेन प्राणशरीरविषयात्मतया च उपकरोति । तत्र शरीरधारणादिहेतुर्वायुविशेष एव प्राणसंज्ञः । न [वा] वायुमात्रम्, नापि वायुक्रिया; सूत्रितं च *न वायुक्रिये पृथगुपदेशात् इति । स एव व्यापारभेदात् पञ्चधा दशधा चोच्यते । सूत्रितं च *पञ्चवृत्तिर्मनोवद्व्यपदिश्यते इति । प्राणापानव्यानोदानसमानभेदात् पञ्चधा । नागकूर्मकृकरदेवदत्तधनञ्जयाख्यैर्भेदैः स दशधा । प्राणशब्दस्तु वादशब्दवत् सामान्यतो विशेषतश्च [निष्प] व्युत्पन्नः । अस्य शरीरेन्द्रियधारकत्वं *यस्मिन्नुत्क्रान्ते इदं शरीरं पापिष्ठतरमिव दृश्यते, एतस्यैव सर्वे रूपमभवन् इत्यादिश्रुतिसिद्धम् । **भाष्यं** च *प्राणस्य तु शरीरेन्द्रियधारणम् इत्यादि । प्रपञ्चितश्चायमर्थः **प्राणवियायाम्** । एवं जङ्गमशरीरेष्विव स्थावरशरीरेष्वपि असावस्त्येव । मूलनिषिक्तसलिलदोह[ल]दपार्थिवधातूनामभ्यादानात् । अत्रापि **भाष्यम्** *स्थावरेषु हि प्राणसंभवेऽपि तस्य पञ्चधा अवस्थाय शरीरस्य धारणार्थत्वेनावस्थानं नास्ति इति । *अत एव प्राण इतिसूत्रे **दीपश्च** *शिलाकाष्ठादिषु प्राणायत्तस्थित्यभावात् इति । नखदन्तरोमकिणादीनामपि मन्दप्राणाश्रयत्वं **न्यायतत्त्वे करणपादाष्टमाधिकरणे** प्रपञ्चितम् । अस्यैव रेचकपूरककुम्भकरूपं नियमनमष्टाङ्गयोगे चतुर्थमङ्गम् । आयुर्वेदेषु योगानुशासने चास्य प्रपञ्चो ग्राह्यः । प्राणाख्यात् वायोरन्य एव शरीरोपादानभूतो वायुः । तदुपादानत्वं वायुप्रचुरेषु मारुतादिशरीरेषु व्यक्तम् । विषयत्वं चण्डवाततालवृन्तपवनादिषु ॥

तेजः ॥ वायोः रूपतन्मात्रम् । ततस्तेजः । *वायोरग्निः इत्यग्निशब्दस्तेजोमात्रपरः । ननु *वायोरग्निः इत्युपादानत्वविवक्षायां प्रत्यक्षविरोधः । पर्णतृणकाष्ठादीनामेव भस्मधूमधूमध्वजादिरूपेण परिणामदर्शनात् । पर्णादीनां च पार्थिवत्वात् । अप्रत्यक्षैस्तदानीमपि अदृष्टाद्युपनीतैः तेजोवयवैर्ज्वालारम्भ इति कल्पनस्य गुरुत्वात् । विचित्रारम्भस्य च भस्मधूमाङ्गारादिषु दृष्टत्वेन अवर्जनीयत्वात् । स्पर्शविशेषस्य धूमादिगतगन्धविशेषवत् दुरालभास्पर्शादिवदुपपत्तेः ।

अतः सलिलस्य सहकारिभेदात् फेनतरङ्गबुद्बुदवत् पृथिव्या एव अंशतो हुतवहादिपरिणाम इति सिद्धे *वायोरग्निः इत्यादि निमित्तकारणत्वमात्रेणाप्युपपद्यते इति; तदसत्; अनन्यथासिद्धोपादानप्रकरणपठितसृष्टिप्रलयक्रमप्रक्रियाविरोधात्। पर्णतृणादीनामपि पाञ्चभौतिकत्वस्य वक्ष्यमाणत्वात्। ततएव तदंशतो निर्वृत्तेरपीष्टत्वात्। ज्वालानिर्वापणानन्तरमेव तदवयवानुपलम्भवत् तदुत्पत्तेः प्रागपि तथैवोपपत्तौ गौरवस्याप्यभावात्। अबिन्धने च जातवेदसि पार्थिवपरिणामात्मकत्वकल्पनायोगात्। अनियतोपादानक्लृप्तेर्गुरुत्वात्। तदेवं तत्रतत्र लीन एवाग्निः सहकारिविशेषादट्टष्टाद्युपनीतसजातीयावयवयोगाच्च उद्भूत उपलभ्यते। व्यवहरन्ति च महर्षयोऽपि; *काष्ठेऽग्निरिव शेरते। *दारुण्यग्निर्यथा तैलं तिले तद्वदसौ पुमान् इत्यादि। अतः समष्टिसृष्टिदशायां वायोरेवोपादानात् अग्नेरुत्पत्तिरुपपन्ना। व्यष्टिदशायां तु तेजस एव सूक्ष्मात्स्थूलतेजसः समुद्भव इति। उष्णस्पर्शत्वभास्वररूपवत्त्वादिकं च तेजसो लक्षणम्। तच्च वाक्चक्षुषोराप्यायकम्। *तेजोमयी वाक् *आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत्, *रश्मिभिरेषोऽस्मिन् प्रतिष्ठितः इत्यादिश्रुतेः। दिवाभीतादिव्यतिरिक्तलोचनानाम् अञ्जनविशेषादिशून्यानां तिमिराद्यतिरिक्तविषयप्रत्ययोत्पादने प्रभूतरूपमाप्यायकातिरिक्तं तदवश्यापेक्षितम्। वैश्वानराद्यात्मना च तदुपकारः। वैश्वानरो नाम शरीरान्तर्वर्ती प्राणादिसंयोगात् अशितपीतपाकादिहेतुस्तेजोविशेषः। शरीरत्वं तेजसस्तेजःप्रचुरेषु दहनतपनादिशरीरेषु व्यक्तम्। विषयत्वं चन्द्रिकातपशतह्रदाहुतवहादिषु। तत्र हुतवहस्य ज्वालात्मकस्य दाह्यनाशे नाशदर्शनात्, पुष्कलकारणक्रमोपनिपातात्, एकदा अनेकदीपादर्शनाच्च आशुतरविनाशित्वरूपं क्षणिकत्वं सिद्धम्। प्रत्यभिज्ञा तु निष्क्रान्तप्रविष्टवदसंभवात्, निर्वापितारोपितदीपादिष्विव अन्यथासिद्धा। प्रत्यक्षत्वं ज्वालाभेदस्योक्तं **तत्त्वरत्नाकरे**—*निपुणनिरीक्षणे च जलवेणिकावत् ज्वालासञ्चरणं दृश्यते इति। *अहेतुक एव ज्वालाविनाश इति **बौद्धगन्धिनः** केचिदाहुः। तदयुक्तम्; क्षणभङ्गप्रसङ्गात्। अदृष्टेश्वरादेश्च हेतोरवर्जनीयत्वात्। वेगादेश्च अविनाभूतस्यावस्थान्तरापादकत्वोपपत्तेः। एवमन्त्यशब्दचरमसंस्कारादिष्वपि स्वतोविनाशवादिनो निरस्ताः। तदखिलमभिप्रेत्योक्तं **वेदार्थसंग्रहे**—*दावाग्न्यादीनामपि पूर्वावस्थाविरोधिपरिणामपरम्परा अवर्जनीयैवेति। तत्र भौमदिव्यादिभेदस्तत्रतत्र सामग्रीकार्याणि क्षणिकत्वस्थिरत्वादीनि यथायोगमुन्नेयानि॥

तेजोविभागः॥ तेजः पुनः सामान्यतो द्विविधम् **प्रभा प्रभावच्चे**ति। आवरणसदसद्भावाधीनसङ्कोचविकासो यथावेगशक्त्यधिष्ठानदेशाधिकदेशप्रसारी तेजोविशेषः **प्रभा**। सा च प्रभावद्भिः सहोत्पद्यते, सह च विनश्यति। न चासौ विशीर्णदीपाद्यवयवः; ऊर्ध्वगमनस्वभावानां वाताद्यभिघातादर्शने युगपद्दिक्ष्वग्विशरणादिकल्पनस्य गुरुत्वात्। प्रभायास्तु यथोपलम्भं तथाऽभ्युपगमात्। स्थिरतरेषु मणिद्युमणिप्रभृतिषु च विशरणप्रसङ्गात्। [तदभ्युपगमे च तेषां दीपादिवत् विनाशप्रसङ्गात्।] तत्रापि प्रतिक्षणोत्पत्त्यादिकल्पनस्य अतिगुरुत्वात्। तैलदशादिवत् सामग्रीविशेषादर्शनात्। न च मण्यादीनां प्रत्यभिज्ञा भ्रान्तिः; विशरणे सिद्धे तद्भ्रान्तित्वसिद्धिः, तत्सिद्धौ विशरणसिद्धिरिति परस्पराश्रयणात्। विशीर्णगन्धाश्रयचम्पककुसुमादिवदंशतो विशरणेऽपि प्रत्यभिज्ञानमिति चेन्न; भ्रान्तेर्दत्तोत्तरत्वात्। यथोपलम्भं द्रव्यान्तराभ्युपगमे भ्रान्तित्वकल्पनानवकाशात्। गन्धोपलम्भे तु वायुगतिविशेषानुविधाननियमात्, आश्रयभूतचम्पकादिनाशेऽपि गन्धावस्थानदर्शनाच्च प्रभातुल्यत्वपरित्यागः। ग्रीष्मनिशादिषु औष्ण्योपलम्भेऽपि प्रभात्मकं स्वरूपं नास्त्येव। अस्याश्च मूलाग्रयोर्घनविरलत्वादयो यथादर्शनं ग्राह्याः। यत्तु **वरदविष्णुमिश्रै**र्निरवयवात्मज्ञानसङ्कोचविकासदृष्टान्ततया प्रभामुपन्यस्योक्तम् *प्रभाया निरवयवत्वमवयवानुपलम्भात् इति; तत् छेदनभेदनयोग्यावयवविरहाभिप्रायेणेति मन्त-

व्यम् । न चैषा स्वतन्त्रा; दीपाद्यपृथक्सिद्धतयैव प्रतीतेः । तद्विशिष्टं तेजः प्रभावत् । तच्च मणिद्युमणिदीपादि बहुप्रकारम् । सामग्रीविशेषाधीनस्वभावभेदात् तेजसः शोकहर्षशोषणवृद्धिपाकप्रकाशादिजनकत्वतारतम्यम् । ऊर्ध्वज्वलनमपि तत एव वा, अदृष्टादेव वा । तस्य रोहितभास्वरैकस्वभावस्यापि सलिलादिसंसर्गभेदात् वर्णवैचित्र्योपलम्भः । एतच्च * यदग्ने रोहितं रूपम् इत्यादिश्रुतिसिद्धम् । वैशेषिकादीनां शुक्लत्वसाधकान्वयव्यतिरेकौ श्रुतिबाधितावन्यथासिद्धौ च । मध्याह्नमार्ताण्डमण्डलश्वैत्योपलम्भस्यापि मण्डलोपष्टम्भकानुद्भूतस्पर्शोद्भूतरूपसलिलांशनिबन्धनत्वोपपत्तेः । उद्भवानुद्भवयोश्च गुणानामन्यत्राप्यनियमाभ्युपगमात् ॥

आपः ॥ तेजसो रसतन्मात्रम् । तस्मादापः । शीतस्पर्शवत्त्वम्, निर्गन्धत्वे सति विशिष्टरसवत्त्वम्, इत्यादि तल्लक्षणम् । तासां शुक्लमधुरशीतैकस्वभावानामाश्रयादिसंसर्गभेदात् रूपरसस्पर्शवैचित्र्यारोपः । अद्रव्यनिरूपणे तु तेजोबन्नगुणव्यवस्था समर्थयिष्यते । स्वाभाविकमासां द्रवत्वम् । आप्येष्वपि करकादिषु उपष्टम्भवशात् काठिन्यम् । प्राणरसनाप्यायनादिनोपकुर्वते । शरीरत्वमासामप्प्रचुरेषु वरुणलोकशरीरेषु स्पष्टम् । विषयत्वं सरित्समुद्रेषु ॥

पृथिवी ॥ अद्भ्यो गन्धतन्मात्रम् । ततः पृथिवी । विशिष्टगन्धवत्त्वम्, रसवत्त्वे सति विशिष्टस्पर्शवत्त्वम्, इत्यादि तल्लक्षणम् । सा प्रथमं सुरभिमधुरकृष्णानुष्णाशीतस्पर्शा जाता । ततोऽनुष्णाशीतत्वं सर्वदा अनुवृत्तम् । तेजःसलिलस्पर्शोपाध्यन्वयव्यतिरेकात्तदुपाधिक एव औष्ण्यशैत्योपलम्भः । कार्ष्ण्यं स्वतःसिद्धमिति श्रुतिसिद्धम् । पाकभेदात्तु विचित्रवर्णता जायते । सुरभिस्वभावत्वमप्यौत्सर्गिकन्यायसिद्धम् । कारणस्य पयसो माधुर्यानुविधानं च बाधकाभावे ग्राह्यम् । तस्याः काठिन्येऽपि सलिलातपादियोगात् क्वचित् द्रवत्वोपलम्भः । मनोघ्राणाप्यायनादिना च तस्या उपकारः । शरीरत्वमस्या मनुष्यतिर्यक्स्थावरादिषु व्यक्तम् । विषयत्वं मृत्पाषा[णान्नौ]षधितिमिरादिषु । यद्यपि विषयादिरूपेण निर्दिष्टानां सर्वेषामपि ईश्वरापेक्षया तत्तद्विशिष्टजीवापेक्षयाऽपि शरीरत्वं वक्ष्यते; तथाऽपि लोकव्यवहारोपकारतारतम्यालोकनेन विभज्य व्यवहारः । शरीरतयाऽभ्युपगतमपि विषयतया वैशेषिकैरप्युक्तम्—* विषयो मृत्पाषाणस्थावरलक्षणः इति । स्थावरस्य हि शरीरत्वं तैरेव प्रपञ्चितम् ॥

तमसः पार्थिवत्वम् ॥ तमो द्रव्यं पार्थिवं च, अबाधितनीलादिप्रत्ययविषयत्वात् । आलोकाभावे चाक्षु[षं]षत्वं नास्तीति बाधकमिति चेन्न; तेजसि व्यभिचारात् । तद्व्यतिरिक्तत्वे सतीति चेत्; तथाऽपि भवदभिमते तमसि एतदभावेऽपि चाक्षुषत्वात् । इतरसामग्रीसाकल्यलक्षणयोग्यतासिद्ध्यर्थमविरोधार्थं च तथाऽङ्गीकार इति चेत्; अत्रापि प्रतीयमानाकारभङ्गपरिहाराय बुध्यस्व । न हि यत् क्वचित् यदपेक्षम्, तत् सर्वत्र तदपेक्षमिति नियमः; स्वेदादिशैत्यग्रहे वायुसापेक्षस्य स्पर्शनस्य औष्ण्यग्रहे तदभावसापेक्षत्वात् । आलोकाभावप्रत्ययविशेषाभावनैल्यमात्रप्रतीतिपक्षाः विधिरूपेण प्रत्ययात्, लोकप्रतीतिविरोधप्रसङ्गात्, नीलमिति धर्मितया स्फुरणाच्च निरस्ताः । प्रलयविनाशावसानादयस्तु [शब्दाः] विधिरूपेण वर्तमाना अपि स्फुटवस्त्वन्तरानुपलम्भात् कस्यचिदित्येव सर्वसंवित्तिसिद्धेश्चाभावपक्षे निक्षेपं सहन्ते । स्पर्शानुपलम्भादिचोद्यं त्विन्द्रनीलालोकादिष्विव निर्वाह्यम् । आगमसिद्धं च तमसो द्रव्यत्वादिकम् । * तमः ससर्ज भगवान् इति तत्त्वान्तरवत् सृष्टिश्रवणात् । * नासीत्तमो ज्योतिरभून्न चान्यत् इति कार्यान्तरैर्ज्योतिषा च सह लयाभिधानात् । आलोकाभावपक्षे तमोज्योतिषोर्द्वयोरपि लयाभिधानविरोधात् । अन्तर्यामिब्राह्मणे च * यस्य तमः शरीरम् इति तेजसा

सह तमसः शरीरत्वेनाभिधानात् । तत्र च **भाष्यम्** * एवमब्वग्न्यन्तरिक्षवाय्वादित्यदिक्चन्द्रतारकाकाशतमस्तेजस्सु इत्यादि । यत्तु **षडर्थसंक्षेपे** भावरूपाज्ञानानुमानदूषणे प्रोक्तम्—*निमीलनेऽपि भातीति न तमो द्रव्यम् । अन्धस्तु नाक्षिस्थग्रहेऽलम् । व्याहरति च, इति, तत् श्रुतिस्मृतिभाष्यादिविरोधात् मतान्तरेणैकदेशिमतेन वोक्तम् । निमीलनेऽपि भानस्य पित्तोपहतचक्षुषः किञ्चित्पित्तोपलम्भेऽपि तुल्यत्वात्, जात्यन्धस्य तु तद्व्याव्यवहारात् । अजात्यन्धस्यापि इन्द्रियाधिष्ठानक्षोभेऽपि मात्रया इन्द्रियशक्तेरनपगमनादक्षिस्थग्रहस्याविरोधात् । तमो न द्रव्यम्; आलोकाभावे गृह्यमाणत्वात् आलोकाभाववदिति चेन्न; **प्राभाकराणां** हेतुदृष्टान्तयोरभावात् । **उदयनादीनां** पक्षदृष्टान्त[योरभेदात्]भेदाभावात् । रूपमात्रतमोवादिनोऽपि दिवाभीतादिदृश्यमानैर्द्रव्यैर्व्यभिचारात् । मानुषचक्षुषेति विशेषणेऽपि योगिदृश्यमानैः, अयोगीतिविशेषणेऽपि अञ्जनाक्तचक्षुषा गृह्यमाणैः, प्रकृष्टादृष्टाञ्जनादिरहितमानुषचक्षुषेतिविशेषणेऽपि तमो नीलिमातिरिक्तं नैल्याश्रयत्वेनाबाधितप्रतीतिविषयत्वात्, इत्यादिभिर्बाधः प्रतिरोधो वा दुष्परिहरः । उक्तं **वरदगुरुभिस्तत्त्वसारे**—

* तमो नाम द्रव्यं बहलविरलं मेचकचलं प्रतीमः केनापि क्वचिदपि न बाधश्च ददृशे ।
अतः कल्प्यो हेतुः प्रमितिरपि शाब्दी विजयते निरालोकं चक्षुः प्रथयति हि तद्दर्शनवशात् ॥ इति ।

नन्वेवमस्तु तमसो द्रव्यत्वं सिद्धान्तः । पार्थिवत्वं तु **भाष्यकारा**दिवचनात् न ज्ञातमिति चेन्न; प्राकृतत्वनीलत्ववचनाभ्यां परिशेषात्सिद्धेः । न हि वायुपर्यन्तेषु प्राकृतेषु रूपगुणोऽस्ति । न वा तोयतेजसोः कृष्णरूपमस्ति । तथा च श्रुतिः * यदग्ने रोहितम् इत्यादिका । ननु **तत्त्वरत्नाकरे** मूलप्रकृतिरेवेदं तम इत्युक्तम् । तथा हि—

* बध्नाति यदभिद्रोहात् यत्प्रपत्त्या च मुञ्चति । जन्तूँस्तमस्तमाश्रित्य हरिं तत्प्रविविच्यते ॥
अतो न काकदन्तानामिव तस्य परीक्षणम् । उपेक्ष्यं बन्धकत्वस्य ज्ञाने हानप्रयोजनात् ॥
तत्स्वरूपतदुत्पत्तिग्राहकादिषु सूरयः । विवदन्ते ततो जातः सन्देहश्चिन्त्यतेऽधुना ॥

अत्र आलोकाभावस्तम इति **काश्यपीयाः** । नास्त्येव तमः, नीलभावरूपस्मृतिप्रमोष एव तमोव्यवहारहेतुरिति **प्राभाकराः** । द्रव्यान्तरमेवेदं कल्प्यमिति **कौमारिलाः** । प्रधानतत्त्वमेव तम इति **तत्त्वविदः**—इत्युपक्रम्य प्राथमिकमतयुगलमथनपूर्वकं तृतीयमुपन्यस्य—

* अत्र तत्त्वविदः प्राहुः स्थूलसूक्ष्मात्मना स्थिता । दैवी गुणमयी माया बाह्यान्तरतमो मता ॥ इत्युक्तम् ।

अतो न पार्थिवत्वपरिशेषो युक्त इति । तन्न; तत्र मूलप्रकृतित्वं तावन्न संभवति; विकारैः सह सृष्टिसंहारवचनात् । **अन्तर्यामिब्राह्मणे** च कार्यवर्गानुप्रवेशेन प्राथमिकतमोव्यतिरिक्तस्य तेजोविरोधितमसः पृथक्शरीरत्वाभिधानात् । प्रधानतमसश्च प्रत्यक्षग्राह्यत्वासिद्धेः ॥

* नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यत् ।
श्रोत्रादिबुद्ध्याऽनुपलभ्यमेकं प्राधानिकं ब्रह्म पुमांस्तदासीत् ॥ इति [प्रधानप्रतिपादक] श्लोकस्मृतेः ।

अवस्थान्तराश्रयणेन सर्वमिदमुपपद्यत इति चेत्; सत्यम् । तदेवास्माभिरुच्यते । पृथिव्यवस्थातिरिक्तमवस्थान्तरमिति चेन्न; पूर्वोक्तपरिशेषात् । पृथिवीतः पृथगेव सृष्ट्यादिवचनं कथमुपपद्यत इति चेत्; स्वर्गान्तरिक्षादिसृष्टिवदिति भाव्यम् । तमश्शब्दप्रयोगानुवृत्तिः कथमिति चेत्; अनेकार्थत्वेनानुवृत्त्यन्यथासिद्धेः । ज्ञानालोकयोः प्रकाशशब्दवत् । यद्वा उद्भूततमोगुणमेवावलम्ब्य द्वयोरपि व्यवहारोपपत्तिः । कथं तर्हि **तत्त्वरत्नाकरो**क्तिः? वस्तुतस्तु वयमपि संशो-

महे । नहि तत्र प्रतिज्ञानिर्वाहपर्यन्तं ग्रन्थो निबद्धः ; येनाभिप्रायमध्यवस्येम । स हि प्रबन्धः * अत्र तत्त्वविदः प्राहुः इति श्लोकमात्र एव विघ्नितः । निबद्धमात्रं चास्मदुक्ताविरुद्धम् । पार्थिवत्वेऽपि प्रधानतत्त्वानतिरेकात् । नहि वयमसत्कार्यवादिनः । समस्तप्रकृतिप्राकृतपरीक्षोपक्रमविवक्षया च * बध्नाति यदभिद्रोहात् इत्यादेरुपपत्तिः । * अत्र तत्त्वविदः इति श्लोकेऽपि * स्थूलसूक्ष्मात्मना स्थिता, इति विभागादेवमेव तात्पर्यमिति विभावयामः । अस्तु वा किञ्चिदभिनवघनघनावलीमलीमसमनाघ्रातस्पर्शरसगन्धमन्धकाराभिधानमवस्थान्तरं प्रकृतेः । तथाऽपि न पृथग्द्रव्यत्वसिद्धिः । तदेवं **चतुर्विंशतितत्त्वानि** चिन्तितानि । *आत्मन आकाशः संभूतः * तत्तेजोऽसृजत इत्यादिन्यूनसृष्टिव्यपदेशा न तत्त्वान्तरसृष्टिप्रतिक्षेपपराः ; प्रामाणिकत्वाविशेषेण तत्परित्यागायोगात् । वदन्ति च—

* क्षीरादिदं तत इदञ्च ततो दधीति क्षीराद्दधीति वदतां किल को विशेषः ? इति ।

अत एव **षट्त्रिंशत्तत्त्ववादो**ऽपि निराकृतः । ते ह्येवमाहुः—

* शैवागमेषु मुख्यं पतिपशुपाशा इति क्रमात् त्रितयम् । तत्र पतिः शिव उक्तः पशवो ह्यणवोऽर्थपञ्चकं पाशः ॥

इति तत्त्वसंग्रहः । मलं कर्म च माया च मायोत्थमखिलं जगत् । तिरोधानकरी शक्तिरर्थपञ्चकमिष्यते ॥

इति पाशविभागः ।

माया पुरुषः शिव इत्येतत् त्रितयं महार्थसंहारे । अवशिष्यते पुनस्तत् प्रवर्तते पूर्ववत्सृष्टौ ॥

इति सृष्टिप्रलयाश्रयनित्यतत्त्वनिष्कर्षः ।

शुद्धानि पञ्च तत्त्वान्याद्यन्तेषु स्मरन्ति शिवतत्त्वम् । शक्तिसदाशिवतत्त्वे ईश्वरविद्याख्यतत्त्वे च ॥

पुंसो ज्ञकर्तृतार्थं मायातस्तत्त्वपञ्चकं भवति । कालो नियतिश्च तथा कला च विद्या च रागश्च ॥

अव्यक्तं मायातो गुणतत्त्वं तदनु बुद्ध्यहङ्कारौ । चेतोधीकर्मेन्द्रियतन्मात्राणीति तत्त्वानि ॥ इति तत्त्वगणना ।

तत्र चिदचिदीश्वरविभागतन्नित्यत्ववादौ न विवादः । ईश्वरस्तु प्रसिद्धशिवाद्विलक्षणः शाश्वतशिवादिशब्देन निर्दिष्टो नारायणः । स च चिदचितोस्सर्वावस्थावस्थितयोश्शरीरीत्येवमादिरौपनिषदानां विशेष ईश्व[रपरिच्छेदे]रे समर्थयिष्यते । तत्त्वगणनायां तु शुद्धतत्त्वपञ्चकस्य परमार्थत एकतत्त्वात्मकतया तैरेवोक्तत्वात् तत्र नातीव विवादः । तथाहि तैरेवोक्तम्—

* पञ्चानामप्येषां न हि क्रमोऽस्तीह कालरहितत्वात् । व्यापारवशादेषां विहिता खलु कल्पना शास्त्रे ॥

तत्त्वं वस्तुत एकं शिवसंज्ञं चित्रशक्तिखचितं तत् । शक्तिव्याप्रुतिभेदात् तस्यैते कल्पिता भेदाः ॥ इति ।

* रागोऽभिष्वङ्गात्मा इति तैर्लक्षितस्य रागस्य पुरुषगुणभूतस्य न प्राकृततत्त्वान्तरत्वम् । प्रकृतिसंसर्गवशात् पुरुषस्य रागो जायते इत्येतावदिष्यते । रागाख्यकार्येण तत्कारणभूततत्त्वान्तरक्लृप्तिरिति चेन्न ; सुखहेतुत्वज्ञानादिभिरेव तदुत्पत्त्युपपत्तेः । अन्यथा द्वेषादिकार्येष्वपि तत्त्वान्तरकल्पनाप्रसङ्गात् । विद्याऽपि—

* उद्बुद्धकर्तृशक्तेः पुंसो विषयप्रदर्शननिमित्तम् । विद्यातत्त्वं सूते प्रकाशरूपंच करणवैशिष्ट्यात् ॥

इत्यभिहिता । तत्रापि पुनर्मनःप्रभृतिप्रमितिकरणग्राम एव विषयप्रदर्शने पर्याप्त इति न करणान्तरमनुमन्यामहे ।

* मायातस्तदनु कला मलं नृणामेकतस्तिरस्कृत्य । व्यञ्जयति कर्तृशक्तिं कलेति तेनेह कथितेयम् ॥

कालेन नियत्या चाप्युपसर्जनतामुपेतया सततम् । विदधाति व्यापारं निजमेवा ह्यवनिपर्यन्तम् ॥

इति च कलाऽभिहिता । तत्रापि अव्यक्तावस्थाकारणभूताक्षरशब्दाभिलप्यप्रकृत्यवस्थामिच्छामः । तत्र कलाशब्दः

शब्दान्तरं वा प्रयुज्यताम् । कर्तृशक्तिव्यञ्जकत्वं तु तस्या नेष्यते । ज्ञानेच्छापुण्यपापादिभिरेव तदभिव्यक्तेः । ज्ञानादेश्चेन्द्रियाद्यधीनत्वात् ।

* नियतिर्नियमनरूपा मायातः साऽप्यनन्तरं भवति । नियमयति येन निखिलं तेनेयं नियति[रुद्दिष्टा]रित्युक्ता ॥

इति परिभाषिता । तत्र नियमनशब्देन नियन्तृशक्तिविवक्षायामीश्वरसङ्कल्पाद्यतिरिक्तनियतिर्नास्ति । प्रतिनियतफलावश्यंभावित्वादिविवक्षायां तु पुण्यपापादिरूपैव नियतिः । तत्तत्स्वकार्यकरणादिविवक्षायां प्रतिनियततत्तद्वस्तुशक्तिरेव नियतिरिति न प्राकृततत्त्वान्तरमस्ति । यदि पुनः प्रमाणभूतेषु पञ्चरात्रादिषु क्वचिन्नियत्यादिसृष्टिरुच्यते, तदाऽपि तत्रतत्र तात्पर्यभेदेन संप्रतिपन्नतत्त्वविशेषतच्छक्त्यादीनामेव पृथग्गणनमिति मन्तव्यम् । युक्तिश्च निर्बन्धतो दूष्यते; न त्वागमः ॥

कालः ॥ कालस्य मायासृज्यत्वादिकम् * अनादिर्भगवान्कालो नान्तोऽस्य द्विज विद्यते इत्यादिभिर्बाधितम् । तर्कश्च—

यतः कुतश्चित्कालांशात् परतः पूर्वतोऽपि वा । कालो न चेत्त्वदुक्तिरथं पौर्वापर्यं न सिध्यति ॥

कालाधीनभवद्भव्यभूतादिव्यवहारवान् । देशोऽन्योऽपि ततः सोऽपि तदभावे न सिध्यति ॥

नित्यविभूतावपि कालस्याहेतुत्वमात्रम्; नत्वभावः । * कालं स पचते तत्र न कालस्तत्र वै प्रभुः । * कला मुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः इत्यादिवचनात् । अन्यथा * सदा पश्यन्ति इत्यादिभिर्विरोधात् । अस्य च अन्वयव्यतिरेकाभ्यामागमाच्च यथायोगं तत्तत्कार्यनिमित्तत्वसिद्धिः । तच्चोपाध्यवच्छेदात् । सविकारत्वपक्षे स्वविकारान्प्रति कालस्योपादानत्वमेव; निमित्तभूताकारान्तराभावात् ॥

एकेनैव क्षणेनास्य विश्वस्यापि विशेषणात् । कालवत्तत्क्षणानां च व्यापित्वमवगम्यते ॥

अस्य विकारित्वम् * सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः ॥ इत्यादिश्रुतिः, * कालं सः * कला मुहूर्तादिमयः इत्यादिस्मृतिश्चाह । अत्र स्वारसिकार्थे बाधकाभावादधिदेवतोपाध्याद्युत्पत्त्या निर्वाहो न शङ्क्यः । विभोर्विकारित्वानुपपत्तिर्बाधिकेति चेन्न; अवयवोच्छूनतादिलक्षणस्य विकारस्यानभ्युपगमात् । अवस्थान्तरापत्तिमात्रस्याविरोधात् । अन्यथा विभोरेवासिद्धिप्रसङ्गात् । सर्वमूर्तसंयोगित्वं हि विभुत्वम् । तस्मादन्ततः संयोगलक्षणमङ्गीकार्यम् । अथ विकारित्वानुपपत्त्या विभुत्वमेव कस्यचिन्नास्तीति मतम्, तथाऽपि कालस्य विकारित्वाद्विभुत्वमेव भज्येत; न पुनर्विभुत्वाद्विकारित्वम् । कथं च विकारित्वं विभुत्वस्य बाधकम्? कारणत्वे प्रमाणाभावादिति चेत्; न तावदिदं सामान्यतः । तथा हि—

न हेतुकार्यतेत्येतत् बोधाय फणितं न वा । द्विधाऽपि भङ्गः स्वोक्त्यादेः फलवत्त्वाफलत्वयोः ॥

सावधेरवधिर्योऽसौ पूर्वो हेतुः परो रिपुः । कार्यं नित्यमसद्वा स्यात् अवधेरनपेक्षणात् ॥

अन्वये सत्यपि नित्यविभोर्देशकालव्यतिरेकाभावेन कारणत्वं दुर्ग्रहमिति चेन्न; तावन्तरेणापि धर्मिग्राहकेणैव तत्सिद्धेः । सामान्यतश्चान्वयव्यतिरेकयोरपि सुशकत्वात् । सामान्यतस्सिद्धस्य पारिशेष्यादिभिर्विभुत्वादिसिद्धेः । विकारित्वमविभुत्वेन व्याप्तमिति चेन्न; ईश्वरतज्ज्ञानाभ्यामनैकान्त्यात् । तयोरपि पक्षीकरणे श्रुतिबाधादिप्रसङ्गात् । निर्विकार एवेश्वर इति न दोष इति चेन्न; संयोगसिसृक्षादिलक्षणविकारस्य अवश्यंभावितयाऽभ्युपगन्तव्यत्वात् । तत्र कृत्स्नैकदेशविकल्पाद्यनुपपत्तयस्तु विभुद्रव्य इवाविभुद्रव्येष्वपि तुल्यत्वात् शून्यवादं प्रसञ्जयेयुः । ताश्च सूत्रकारैरेव ईश्वरे प्रसज्य परिहृताः * कृत्स्नप्रसक्तिः, *श्रुतेस्तु शब्दमूलत्वात् इत्यादिभिः । उक्तं च कालादीनां विकारस्वरूपत्वं **वेदार्थसंग्रहे**—

* निमेषकाष्ठाकलामुहूर्तादिपरार्द्धपर्यन्तापरिमितव्यवच्छेदस्वरूपसर्वोत्पत्तिस्थितिविनाशादिसर्वपरिणामनिमित्तभूतकालकृत - परिणामास्पृष्टानन्तमहाविभूतिः इति । उक्तं च **नीतिमालायां नारायणार्यैः** * कालोऽनाद्यनन्तोऽजस्रक्षणपरिणामि-मुहूर्ताहोरात्रादिविभागवान् परिणामपरिस्पन्दहेतुः इति ।

कालस्य प्रत्यक्षत्वम् ॥ प्रत्यक्षश्चायम् । तथा हि—

वर्तमानतयाऽध्यक्षे वस्तु सर्वं प्रकाशते । न सा स्वरूपं धीभेदान्नोपाधिरनवस्थितेः ॥
तत्र स्वपरनिर्वाहे पूर्वत्रैव तथा न किम्.। तथा चास्त्विति धीरान्प्रत्यनन्तस्त्वागमो बलम् ॥
तत्सिद्धस्योपलम्भेन प्रत्यक्षत्वं प्रसाध्यते । लाघवात्तद्विषयता वर्तमानधियो वरम् ॥
नचैषा लैङ्गिकी बुद्धिर्लिङ्गादेरविमर्शतः । विमर्शेऽप्यन्यथासिद्धेस्तर्कानुग्रहवर्जनात् ॥
मिथःकरम्बितैरेव मूर्तैर्वा विश्ववर्तिभिः । तद्युक्तैर्गगनाद्यैर्वा पक्षद्वितयसंमतैः ॥
रविस्पन्दादिभूयस्त्वफल्गुत्वाद्युपनायकैः । परावरत्वादिसिद्धेरन्यथागौरवोदयात् ॥
तावन्मात्रोपनेतृत्वे सिद्धस्यार्थस्य कल्पिते । जगतो मिश्ररूपत्वं न भवेदधिके यथा ॥
कालसंबन्धरूपोऽयं परत्वादिरिति स्थिते । लिङ्गसिद्धयैव कालस्य प्रत्यक्षत्वमुपागतम् ॥
अतोऽनुमानमात्रेण कालोऽन्यो नैव सिध्यति । केवलागमसिद्धे च न लोकव्यवहार्यता ॥

तदेवं केवलैस्तर्कैः कालस्य दुरुपपादतामालम्ब्य हि **न्यायतत्त्वे संयोगाधिकरणे** * संयोगविभागसंख्या कालः इत्यादि चोक्तम् । **प्रमातृपादे** च प्रसङ्गात् कालमपलप्य *तस्मादेकाश्रयक्रियासंख्या कालः इति सूक्तमुपसंहृतम् । प्रपञ्चितं चास्य प्रत्यक्षत्वं तत्रैव—*यथा सर्वे प्रत्ययाः कालोपश्लिष्टा एव हि दृश्यन्ते; तदिति देशकालविशिष्टतयैव स्मृतिरपि जायमाना प्रागपि कालानुभवं साधयतीति । जैननिराकरणे **भाष्यं** च * कालस्य पदार्थविशेषणतयैव प्रतीतेस्तस्य पृथगस्तित्व-नास्तित्वादयो न वक्तव्याः, नच परिहर्तव्याः । कालोऽस्ति नास्तीतिव्यवहारो व्यवहर्तॄणां जात्याद्यस्तित्वनास्तित्वव्यव-हारतुल्यः इति । अत एव च कालस्य पृथग्गणनभावः । तदेवमव्यक्तोपक्रममहदहङ्कारेन्द्रियतन्मात्रभूतसृष्टिप्रकरणेषु जीवपरौ पञ्चविंशषड्विंशकौ । अक्षरतमसोरन्यतरोपक्रमे कालस्य पृथग्गणने च षड्विंशकसप्तविंशकाष्टाविंशकत्वादिकं यथासंभवं भाव्यम् । श्रुतिश्च * तं षड्विंशकमित्याहुः सप्तविंशमथापरे इति । सत्त्वरजस्तमसां पृथग्गणनया अधिकसंख्यां निर्वहन्तस्तेषां द्रव्यत्वदूषणेन वक्ष्यमाणेन निरस्ताः । पञ्चविंशातिरिक्तनिषेधपराणां निर्वाहस्तु भगवता **व्यासेन मोक्ष-धर्मे**ऽभिहितः—* अन्यश्च राजन् स परस्तथाऽन्यः पञ्चविंशकः । तत्स्थत्वादनुपश्यन्ति ह्येक एवेति साधवः ॥

इति । सूत्रितं च * अवस्थितेरिति काशकृत्स्नः इति । प्रपञ्चितश्चायमर्थो **भाष्यादिषु** सामानाधिकरण्यनिर्वाहे । नन्वे-वमपि तत्तद्भूतेषु सवितृकान्तहिमकरकवैद्युतवैश्वानराद्युत्तरोत्तरावस्थादर्शनात् तत्त्वसङ्ख्यानियमोऽनुपपन्नः ; मैवम् । सम-[ष्टिसृ] ष्टयवस्थापेक्षया तन्नियमात् । पञ्चीकरणपश्चाद्भाविव्यष्टयवस्थाविशेषाणां त्वानन्त्यादपरिसङ्ख्यानम् । एतेषु च तत्त्वेषु भागत एवोत्तरोत्तरसृष्टिः । पूर्वपूर्वैरुत्तरोत्तरावरणस्य तत्तदाकारेण च कार्यवृत्तेः श्रुतत्वात् । अन्यथा पृथिव्येक-शेषप्रसङ्गात्, पूर्वपूर्वभूतानामुपलम्भादिसिद्धत्वाच्च । तन्मात्राणां त्वावारकत्वाद्यनाश्रयणात् निश्शेषपरिणाम इत्येके । शरीरादेश्चतुर्विंशतितत्त्वमयत्ववचनात् तेषामप्येकदेशतः परिणाम इत्यपरे । पूर्वस्मिन्पक्षे तन्मात्रकार्यभूतगुणपञ्चकेन सह शरीरादेश्चतुर्विंशतितत्त्वमयत्वोक्तिरिति वा सर्वाचित्तत्त्वमयत्वमात्रप्रतिपादनपरतया वा निर्वाहः । अपरस्मिन्पक्षे क्वचित्

केषाञ्चित् सृष्ट्यनुक्तिवदविवक्षया आवरणाद्यनुक्तिरिति गतिः। एतानि तत्त्वानि प्रथममीश्वरः स्वसङ्कल्पादेव तत्तदव्यवहितपूर्वपूर्वतत्त्वशरीरकः सृष्ट्वा व्यष्टिनामरूपव्याकरणं सङ्कल्प्य तेषां तत्त्वानां पृथग्भूतानां व्यष्टिसृष्ट्यशक्तेः परस्परसंमिश्रणं च संकल्प्य * व्योम्नोऽर्धभागश्चत्वारो वायुतेजःपयोभुवाम् इत्यादिक्रमेण एकैकभूतेषु भूतान्तराणामष्टमांशचतुष्कैः पञ्चीकरणं कृत्वा तेषु स्वानुप्रविष्टजीववर्गमनुप्रवेश्य तैरेव तत्त्वैर्दशगुणितोत्तरसप्तावरणवेष्टितं हेमाख्यपरिणामगतभूतमयं ब्रह्माण्डमारभ्य तदन्तरे च स्वनाभिपङ्कजप्रभृतिसप्तस्थानेष्वन्यतमेन सकलतदण्डान्तर्वर्तिचेतनभरित[गर्भित]-विग्रहं चतुर्मुखं प्रसादात् सृजति; क्रोधाच्च रुद्रम्। अत्र श्रुतिः * एको ह वै नारायण आसीन्न ब्रह्मा नेशानः इत्यारभ्य * तत्र ब्रह्मा चतुर्मुखोऽजायत। त्र्यक्षः शूलपाणिः पुरुषोऽजायत इत्यादिका। * नारायणाद्ब्रह्मा जायते। नारायणाद्रुद्रो जायते इत्यादयश्च। उक्तं च **महाभारते**—

* ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः। प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम्॥
एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ। तदादर्शितपन्थानौ सृष्टिसंहारकारकौ॥ इति॥

स च भगवाननन्तरं स्वविहितब्रह्मान्तर्यामिरूपेणावस्थितः स्वप्रहितवेदोपज्ञविज्ञानेन स्वार्पिताभ्यां विचित्रसृष्टिविषयबुद्धिशक्तिभ्यामुपबृंहितेन स्वनिर्धूतमधुकैटभादिविविधापदा ब्रह्मणा ब्रह्माण्डान्तश्चतुर्दशभुवनसंस्थानतदधिकरणकदेवतिर्यङ्मनुष्यस्थावरादिदिग्विशेषादिविविधविचित्रव्यष्टिसंज्ञामूर्तिसृष्टिं कारयति, करोति च तच्छरीरकः। तथा च सूत्रम्—* संज्ञामूर्त्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् इति। संहारयति संहरति च हरशरीरकः॥

दिक्॥ ननु नित्यविभोर्दिशः कार्यत्वं कथम्? न; नित्यविभुदिग्द्रव्यस्यासिद्धेः। प्राक्प्रत्यग्दूरासन्नादिव्यपदेशानां तूभयसंमतैस्तत्तदुपाध्युपहितैस्तैस्तैराकाशादिद्रव्यैरेव मूर्तान्तरसंयोगपरम्परास्यूतैस्तत्तत्प्राक्त्वादिभेदनिर्वाहकत्वाभिमतोपाधि-विशेषैरेव वा यथायोगं निर्वाहात्। सम्प्रतिपन्नाकाशादिपरित्यागेन सर्वत्र सर्वगुणघटनरूपातिप्रसङ्गपरिहाराय अधिकदिग्धर्मिकल्पनं पापक्षयवत् पुण्यपरिक्षयोऽपि भवतीति भयात् मन्दाकिनीमपहाय मरीचिकानुधावनम्।

तावन्मात्रोपनेतृत्वस्वभावान्यप्रकल्पनात्। सिद्धस्य धर्मिणः कल्प्या तावन्मात्रोपनेतृता॥

अस्तु तर्हि आकाशातिरिक्तं दिक्त्वम् * पद्भ्यां भूमिर्दिशः श्रोत्रात्, * दिशँ श्रोत्रम् इत्यादिपृथक्सृष्टिप्रलयश्रवणादिति चेन्न; अभिमानिदेवतोपाधिसृष्ट्या निर्वाहात्। तत्तदेकप्रकरणस्थान्तरिक्षस्वर्गलोकाद्यवच्छेदसृष्ट्यादिवत्। अन्यथा तत्रापि तत्त्वान्तरस्वीकारप्रसङ्गात्। सूत्रकारादिभिश्च * न वायुक्रिये पृथगुपदेशात् इत्यधिकरणे पृथक्सृष्ट्याद्युपदेशवतोऽपि प्राणस्य वायुविशेषत्वमेवोक्तम्। तत् दिगादीनामपि प्रदर्शनार्थं मन्तव्यम्। यदि च कार्यं किमपि दिक्तत्त्वम्, तदा तत्सृष्टेः पूर्वं संहारात् परतश्च प्रकृतिमहदादितत्त्वानामावरणत्वावार्यत्वदूरत्वासन्नत्वव्यवस्था न स्यात्। व्यष्टिदशायां हि दिक्सृष्टिः श्रूयते। प्रकृतिकार्यतया प्रादेशिकत्वे वा शुद्धसत्त्वत्रिगुणादेरूर्ध्वाधःप्रभृतिव्यवस्था न स्यात्। यदि तत्रोपाधिभिरुपहितैर्वा तैस्तैर्निर्वाहः, तदत्रापि सममिति सिद्धं न दिक् तत्त्वान्तरम् इति। यत्तु **प्रमेयसंग्रहे** प्रोक्तम् * गगनस्य दिशां च त्रिवृत्करणेन रूपवत्त्वम्, अतश्चाक्षुषं सर्वं सविशेषमेव गृह्यत इति; तेनापि पञ्चीकृतभूतारब्धत्वमात्रं प्रतीयते। नपुनः स्थिरपरिगणितचतुर्विंशत्यतिरिक्ततत्त्वान्तरत्वम्। **वरदविष्णुमिश्रैस्तु** * द्रव्यं च षड्विंशतिविधं सत्त्वरजस्तमांसि इत्यादिना दिग्द्रव्यं पृथगेव संख्यातम्। * आकाशकालदिशश्चक्षुरिन्द्रियेण इति तस्य चाक्षुषत्वमप्युक्तम्। * दिक्कालौ चाक्षुषौ प्रत्यक्षपरत्वापरत्वकारणसंयोगाश्रयत्वाद्घटवदित्यनुमानेनावगम्यते इतिच तत् साधितं च।

अत्र पृथक्त्वं भाष्यविरुद्धसत्त्वादिद्रव्यपरिगणनवदन्यपरतया निर्वाह्यमिति। तदेतत् ब्रह्माण्डप्रभृति स्तम्बपर्यन्तं सर्वमपि पञ्चभूतात्मकम्; पञ्चीकरणादिवचनात्। *तासां त्रिवृतं त्रिवृतमेकैकां करवाणि इत्युपलक्षणम्; समानप्रकरणैरुपबृंहणैश्च तथाऽध्यवसायात्। भूयसा तु लौकिकपरीक्षकागमव्यवहाराः। तथा च सूत्रम् *वैशेष्यात्तु तद्वादस्तद्वादः इति, *त्र्यात्मकत्वात्तु भूयस्त्वात् इति च। एवं पञ्चीकरणमप्युपलक्षणमेव॥

*नानावीर्याः पृथग्भूताः ततस्ते संहतिं विना। नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः। एकसङ्घातलक्षास्तु संप्राप्यैक्यमशेषतः॥
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते।

इति भगवत्पराशरवचनात्। तथा **श्रीमद्गीताभाष्ये** *महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव चेति क्षेत्रारम्भकद्रव्याणि इत्यादिकमुक्त्वा *प्रकृत्यादिपृथिव्यन्तद्रव्यारब्धमिन्द्रियाश्रयभूतमिच्छाद्वेषसुखदुःखविकारिभूतसङ्घातरूपं चेतनसुखदुःखोपभोगाधारत्वप्रयोजनं क्षेत्रमित्युक्तं भवति इत्युक्तम्। तदेवमष्टद्रव्योपादानानि शरीराणि। इन्द्रियाणि तु शरीराश्रितानि द्रव्यान्तराणि। *इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः इति क्षेत्राश्रितानि तत्त्वानि इति विभजनात् *इन्द्रियाश्रयभूतम् इत्युपसंहाराच्च। एतेन तन्मात्राणां पूर्वोक्तो निश्शेषपरिणामपक्षः परिगृहीत इव सूच्यते॥

नन्वेकस्यानेकद्रव्योपादानकत्वे जातिसङ्करस्स्यात्; न स्यात्। अवयविनोऽस्माभिरनभ्युपगमात्। बुद्धिशब्दसङ्ख्यापरिमाणदेशकालकार्यादिभेदस्य अवयव्यारम्भकतया भवदभिमतावस्थान्तरमात्रेण निर्वाहात्। अन्यथा राश्यादिष्वपि द्रव्यान्तरकल्पनाप्रसङ्गात्। गुरुत्वादिकार्यादर्शनादिनिर्वाहपरिक्लेशात्। पृथग्दशापतनदर्शनेन अवयवगुरुत्वस्य अप्रतिबन्धात्। अवयविगुरुत्वप्रतिबन्धे तु द्व्यणुकप्रभृतेः सर्वस्यापतनप्रसङ्गात्; परमाणुगुरुत्वैरेव सर्वत्र पतने घटादेः साक्षात् परमाण्वारब्धत्वाभावेन तत्पतने तद्गुरुत्वस्यासमवायित्वायोगात्। संयोगाभावाच्च दीर्घैकतन्तुसंवर्तनजनितेषु तन्त्वतिरिक्त[द्रव्य]व्यवहारभङ्गप्रसङ्गात्। द्वितीयतन्तुप्रभृत्युपान्त्यतन्तुपर्यन्तपटधियो विभज्यमानतन्तुव्यतिरिक्ततन्तुगतपटधि[योऽप्य]यश्चाविशेषात्। आरम्भारम्भवादेऽपि प्रथमद्वितीयतन्त्वपगमे द्वितन्तुकादिद्रव्यावस्थानभ्युपगमात्। घटादिषु चारम्भकभाग[विशेष]ानुपलम्भेन यथेष्टभागानर्हत्वादुपलम्भश्रुतिभ्यां बाधितत्वाच्च। अतोऽवयव्यनभ्युपगमान्न जातिसङ्करः। अभ्युपगच्छतामपि प्रतिनियतकनकरजताद्यंशनिर्मितबिम्बादिवत् हेरम्बादिवच्च निर्वोढुं शक्यत्वात्। अस्मन्मते तु सङ्घातविशेषरूपेषु तत्तद्भूतांशानां प्रतिनियतत्वात्। अवयविवादिनामपि यथास्वं निमित्ततयोपादानतया चानेकभूतानामेकसङ्घातानुप्रवेशोऽवर्जनीयः। न च तत्र मिथो जातिसङ्करः तादात्म्यं वा जायते इति नास्माकं कश्चिद्विशेषः। नच जातिसङ्करो दोषः; उपाधिसङ्करवत्। न हि मिथो धर्मिपरिहारेण वर्तमानयोरुपाध्योः कार्यत्वमूर्तत्वादिरूपयोरेकत्र समावेशो नातिप्रसङ्गावहः, जात्योस्तु तथेति नियामकमस्त्यन्यत्राभिमानात्। परावरभावरहितयोर्जात्योरसमावेशनियमोपलम्भो नियामक इति चेन्न; उपाध्योरपि नीलत्वपीतत्वादिरूपयोस्तत्संभवात्। केषुचित् दर्शनस्य जातावपि समत्वात्। कनकत्वकुण्डलत्वयोः काञ्चनकटककलधौतकुण्डलादिषु पृथगेव वर्तमानयोः काञ्चनकुण्डले समावेशदर्शनात्, गत्वतीव्रत्वादीनां च तीव्रगकारादौ। तेषां च जातित्वाभ्युपगमात्। तत्रान्यतरजातिभङ्गो वा, सदृशसंस्थानाभिव्यङ्ग्यजातिद्वयकल्पना वा इत्यादि तु स्वसिद्धान्तस्तनन्धयविषयवात्सल्यम्। तच्च स्वापत्यं मार्जारादिवत् जिघत्सति। अत्यन्तसजातीयेष्वपि एकजातीयत्वेनाबाधितप्रत्यभिज्ञाने जातेरेव भङ्गप्रसङ्गात्। तदेवं सिद्धमनेकतत्त्वात्मकं ब्रह्माण्डादिव्यष्टिविश्वमिति।

एवंविधब्रह्माण्डानन्त्यतदन्तर्वर्तिलोकविशेषसंस्थानतत्परिमाणलोकपालनिवासादिभेदतत्तदवस्थानकालादयो ज्यौतिषपुराणादिषु प्रपञ्चिता द्रष्टव्याः । क्वचित्क्वचिद्विरोधिनोऽपि तात्पर्यभेदादिनिर्वाह्याः । एषा च प्रतिनियतदेशकालस्वरूपफलभोगतारतम्यनिम्नोन्नतब्रह्मादिस्तम्बपर्यन्ता विषमसृष्टिः स्वरूपानादेर्जीववर्गस्य प्रवाहानादिकर्मतारतम्यनिबन्धनेति नाकृताभ्यागमकृत [वि] प्रणाशवैषम्यनैर्घृण्यादिप्रसङ्गः । जीवानामाप्रलयावस्थायित्वादिपक्षे त्वेते दोषाः स्फुटाः । तदेवं पुण्यपापतारतम्यात् केचित् द्युप्रभृतिलोकेषु उत्कृष्टशरीरेन्द्रियज्ञानशक्त्यादिमन्तः । केचिच्च नरकादिषु घोरदुःखकारणात् निकृष्टशरीरादिमन्तः । केचिच्च मिश्रकर्माणः पृथिव्यादिषु मिश्रमध्यमसुखादिमन्तः ॥

शरीरलक्षणम् ॥ इह प्रसङ्गात् सामान्यतः शरीरलक्षणमुच्यते । * यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं तच्छेषतैकस्वरूपं च तत्तस्य शरीरम् इति **भाष्यम्** । गोघटादिशब्दवत् संस्थानादिभिरनियतवृत्तेः शरीरशब्दस्य क्वचिद्विशेषे नियामकाभावात् सर्वप्रयोगानुगुणमिदमेव श्रुतिसिद्धं व्यापकं लक्षणमिति **भाष्यकारा**भिप्रायः । एतच्च एकलक्षणमिति केचिद्व्याचख्युः । लक्षणत्रयमित्यपरे । एकत्वपक्षे व्यवच्छेद्यपरिक्लेशः । अन्ये तु एकलक्षणत्वेऽपि जन्मादित्रयस्य ब्रह्मलक्षणत्व इवात्रापि न व्यवच्छेद्यं सिद्धमस्ति ; शङ्कितं तु सममित्याहुः । यौक्तिकग्रन्थेषु तथानिर्वाहस्यानुचितत्वात् त्रित्वपक्ष एव मुख्यः । **भट्टपराशरपादैरपि अध्यात्मखण्डद्वयविवरणे** स एव पक्षः सूचितः, * चेतनाचेतनयोरविशिष्टं तं प्रति शरीरत्वम् ; स्वेच्छया नियच्छता भगवता व्याप्यत्वाविशेषात् । इदमेव [जीवं प्रति] भौतिकस्य शरीरस्यापि शरीरत्वम् इत्येकस्य लक्षणतया उपपादनात् । तत्रैवं लक्षणत्रयनिष्कर्षः—यस्य चेतनस्य यदवस्थं द्रव्यं यावत्सत्तमसंबन्धानर्हं स्वशक्ये नियन्तव्यस्वभावम्, तदवस्थं तस्य शरीरमित्येकं लक्षणम् । चेतनस्य—चैतन्यविशिष्टस्येत्यर्थः । तेन चैतन्यस्य तत्तदाश्रयं प्रति शरीरत्वव्यवच्छेदः । यदवस्थमित्यव्याप्तिपरिहारः, तस्यैव द्रव्यस्यावस्थान्तरे वियोगात् । द्रव्यमिति क्रियादिव्यवच्छेदः । यावत्सत्तमित्यादिना जीवं प्रति परकायप्राणेन्द्रियकुठारादिव्यवच्छेदः ; प्राणादीनां हि पृथगेव सृष्टानां शरीरनिर्माणात् पूर्वंभावात्, तथा मोक्षात्पश्चादपि तेषामाप्रलयावस्थानात् । स्वशक्ये इत्यसंभवपरिहारः । न हि विहङ्गमशरीरसाध्यं विहायोगमनं मानुषमृगसरीसृपादिशरीरस्य शक्यम् । न च तावता तेषामशरीरत्वमिति भावः । स्वशक्यं चान्वयव्यतिरेकादिसमधिगतं यथासंभवं भाव्यम् । अतः शिलाकाष्ठघटपटादिषु जीवशरीरेष्वपि तदधीनत्वाभावेनाव्याप्तिचोद्यं परिहृतं भवति ; स्थावरादिवदतिसूक्ष्मस्य नियमनविशेषस्यास्मदादिभिर्दुर्ग्रहत्वात् । यद्यपि क्वचित् स्थावरेषून्मेषनिमेषादिकं दृश्यते, तथाऽपि न तत् सार्वत्रिकम् । स्मरन्ति च शिलाकाष्ठादिष्वपि स्वल्पतरं चैतन्यम् । * अप्राणिमत्सु स्वल्पा सा स्थावरेषु ततोऽधिका इत्यादि । वक्ष्यमाणचतुर्थलक्षणपक्षे तु नास्य चोद्यस्यावकाशोऽपि । न चात्र शक्ये सर्वत्र नियमनं विवक्षितम् ; अनिच्छादिवशेन तस्यापि क्वचिदसंभवात्, सहकार्यनागमनमात्रेण कार्यानुत्पत्तिसिद्धेः । न ह्यङ्कुरमनुत्पाद्य विनष्टस्य बीजवर्गस्याङ्कुरोत्पादनसामर्थ्यं नास्तीति शक्यते वक्तुम् । नियन्तव्येत्यनियन्तव्यव्याध्यादिव्यवच्छेदः । व्याध्यादीनां द्रव्यात्म[कानां]कत्वात् तदीयत्वात् स्वशक्ये प्रवर्तमानत्वाच्च । एवं पुत्रशरीरादीनामपि । स्वभावशब्देनाव्याप्तिपरिहारः । व्याध्यादिदशायां स्वशक्येऽप्यशक्यनियमनानां मानुषशरीरादीनामपि शरीरत्वात् तदानीमेतस्याशक्यनियमनत्वस्यौपाधिकत्वादिति ध्येयम् । यस्य चेतनस्य यदवस्थं द्रव्यं यावत्सत्तं धार्यं तदवस्थं तस्य शरीरमिति द्वितीयं लक्षणम् । पुत्रशरीरादिकं न यावत्सत्तं धार्यमिति व्यवच्छिद्यते । शेषं प्राग्वत् । तथा यस्य चेतनस्य यदवस्थं द्रव्यं यावत्सत्तमशेषतानर्हं तदवस्थं तस्य शरीरमिति तृतीयं लक्षणम् । अशेषतानर्हमिति

पूर्ववदेव पुत्रादिव्यवच्छेदः। दानादिना तेषां स्वशेषत्वनिवर्तनस्य शक्यत्वात्। शरीरस्य तु दासत्वाद्यापादनेन परशेषत्वेऽपि स्वस्वशेषत्वस्य सांसिद्धिकस्य निवर्तयितुमशक्यत्वादिति। अत्रेदं चतुर्थमपि लक्षणत्रयफलितं **श्रीभाष्यकारा**भिप्रेतं लक्षणमुच्यते—यस्य चेतनस्य यदवस्थमपृथक्सिद्धविशेषणं द्रव्य तत्तस्य शरीरमिति। यावत्सत्तमसंबन्धानर्हत्वमपृथक्सिद्धत्वम्। आधेयत्वविधेयत्वशेषत्वान्यपृथक्सिद्धेरवान्तरभेदा इह विवक्षिताः। व्यवच्छेद्यं तु स्पष्टमेव। एतेन एतदपि परिहृतम्, यदुत, शरीरशब्दस्य अन्यतमं वा? त्रीण्यपि वा? त्रिकं वा प्रवृत्तिनिमित्तम्? न प्रथमः; *आधेयत्वविधेयत्वशेषत्वानि शरीरशब्दप्रवृत्तिनिमित्तानि इति **भाष्य**विरोधात्। न द्वितीयः; गौरवादनेकार्थत्वप्रसङ्गाच्च। न तृतीयः; गौरवात्, भिन्नलक्षणपक्षे चास्वारस्यादिति। त्रिभिरुपलक्षितस्यैव चेतनापृथक्सिद्धत्वस्य प्रवृत्तिनिमित्तत्वान्न कश्चित् दोषः। ईश्वरतज्ज्ञानव्यतिरिक्तं द्रव्यं शरीरमिति वा तटस्थलक्षणम्। **भाष्ये** शरीरत्वस्य पितृत्वादिवत् सप्रतियोगिकत्वसूचनाय देवत्वमनुष्यत्वद्विपात्त्वाद्यवान्तरभेदानामप्रयोजकत्वसूचनाय च *यस्य चेतनस्य यद्द्रव्यम् इत्यादिनिर्देशः। प्रतियोगिनिर्देशरहिते लक्षणे यथाप्रमाणं प्रतियोगिविशेषव्यवस्था। यथा वैशेषिकादीनां लक्षणेषु सप्रतिसंबन्धिकगुणसामान्यविशेषसमवायाभावादीनां प्रतिसंबन्धिनिर्देशरहितेषु च लक्षणेषु कर्मान्यत्वे सति जातिमात्राश्रयो गुणः, नित्यमेकमनेकसमवायि सामान्यम्, अजातिरेकवृत्तिर्विशेषः, नित्यसंबन्धः समवाय इत्यादिषु॥

अन्यैस्तु *चेष्टेन्द्रियार्थाश्रयः शरीरम् इति सूत्रितम्। तत्र अन्त्यावयवित्वे सति चेष्टाश्रयत्वमेकं लक्षणम्। तद्विशेषितेन्द्रियाश्रयत्वभोगायतनत्वे द्वे। तत्र चेष्टाशब्देन क्रियामात्रविवक्षायामतिव्याप्तिर्व्यक्ता। प्रयत्नवदात्मसंयोगासमवायिकारणकक्रियाविवक्षायां प्रयत्नवदीश्वरसंयोगासमवायिकारणकक्रियाश्रयेषु तच्छरीरतया तैरनभ्युपगतेषु भूभूधरादिष्वतिव्याप्तिः। प्रयत्नवज्जीवेतिविशेषणे प्राणादिष्वतिव्याप्तिः। बुद्धिपूर्वकप्रयत्नेतिविशेषणेऽपि बुद्धिपूर्वकाकुञ्चनप्रसारणादिदशायां तेष्वेवातिव्याप्तिः। वाय्वादेरन्त्यावयवित्वं नास्तीति चेत्; कस्य तर्ह्यस्ति? घटादेरिति चेन्न; तत्राप्यनेकघटपटादिभिर्भित्तिकन्थादिनिर्माणे तदसिद्धेः। तत्र तदारम्भो नास्तीति चेत्; अन्यत्रापि तथैव नास्तीत्येव तु सत्यम्। अस्तु तर्हि घटादयो मध्यावयविन इति चेन्न; सर्वत्रापि तथाप्रसङ्गादन्त्यावयवित्वमाकाशकोरकायितमिति साधु तद्विशेषितं लक्षणम्। इन्द्रियाश्रयत्वम्, तत्समवायित्वम्, तत्संयोगित्वं वा स्यात्। न प्रथमः; अनभ्युपगमात्, इन्द्रियावयवानां तन्मते शरीरत्वप्रसङ्गाच्च। न द्वितीयः; घटादिष्वपि तत्संभवात्। यावत्सत्तमिन्द्रियसंयोगो विवक्षित इति चेत्; तदपि न। अनिमेषचक्षुषि प्रेक्षमाणे पुरुषे तदातनोत्पन्नविनष्टबुद्बुदप्रभृतिष्वतिव्याप्तेः। नित्यमनःपक्षे च आत्मादिषु। तैः शरीरतया मृतशरीरस्याभ्युपगमाच्च। इन्द्रियसंयुक्तकृत्स्नप्रदेशं शरीरमिति चेन्न; मूर्तयोः शरीरेन्द्रिययोः सप्रतिघत्वविरोधेन कृत्स्नप्रदेशसंयोगाभावस्य युष्माभिरेवाभ्युपगन्तव्यत्वात्, निरिन्द्रियशरीरान्तःप्रदेशविशेषस्य प्रामाणिकत्वाच्च। युगपदनेकेन्द्रियावस्थितिदेशः शरीरमिति चेन्न; अवस्थितिरिति संयोगमात्रविवक्षायामाकाशादीनाम्, ईश्वरस्य चास्मदादीन् प्रति शरीरत्वप्रसङ्गात्। अपृथक्सिद्धिविवक्षायामसिद्धेः, ईश्वरस्यास्मत्पक्षेण शरीरत्वप्रसङ्गाच्च। उपष्टम्भकत्वादिविवक्षायां प्राणेऽतिव्याप्तिः। यावत्सत्तमिन्द्रियासंयोगायोग्यं शरीरमित्यपि दत्तोत्तरम्; ईश्वरादिष्वतिव्याप्तेर्दुष्परिहरत्वात्। इन्द्रियव्यतिरिक्तं प्राणव्यापाराधीनप्रवृत्तिनिवृत्त्यादिकं शरीरमिति चेन्न; आत्मनि मलादिषु च प्रसङ्गात्। सर्वप्रवृत्तिषु तादधीन्यं विवक्षितमिति चेन्न; असंभवात्। न हि वाय्वाद्याकृष्यमाणशरीरादिप्रवृत्तिः प्राणाधीना। भोगायतनत्वमपि यदि भोगस्थानत्वमात्रम्, तदा गृहादिष्वतिव्याप्तिः। यदाश्रित्यैवात्मा भोगवान् भवति, तद्भोगायतनमिति विवक्षितमिति

चेन्न; अस्मन्मतेन लक्षणासंभवात्। अशरीरस्यापि मुक्तस्य भोगविशेषाभ्युपगमात्। दुःखात्मकभोगो विवक्षित इति चेत्; तथाऽपीन्द्रियेष्वतिव्याप्तिः। ईश्वरमुक्तादिभिरिच्छागृहीतशरीरेष्वव्याप्तिश्च। स्वभ्रमवशेन भोगाश्रय इत्यपि न; तत्तद्वादिभेदैरात्मतया बुध्यमानेषु इन्द्रियमनःप्राणेष्वतिव्याप्तेः। ईश्वरमुक्तादिशरीरेषु अव्याप्तेश्च। शिरःपाणिपादादिमयं शरीरमिति चेत्; शिलापुत्रकादिष्वपि तत्संभवात्। प्राणादिमत्त्वे सतीति चेन्न; मृतशरीराद्यव्याप्तेः। यदाकदाचित् प्राणादिसंबन्धमात्रं विवक्षितमिति चेत्; तथाऽपि स्थावरादिशरीरेष्वव्याप्तिः। तेषु प्राणादिसत्त्वेऽपि पाणिपादादिसंस्थानाभावात्। एवं लक्षणान्तराण्यपि दूष्याणि। तत्र श्रुत्याद्यनुरोधेन पूर्वोक्तमेव लक्षणम्॥

शरीरविभागः॥ तदेतत् शरीरं द्विविधम्—नित्यमनित्यं चेति। तत्र नित्यं त्रिगुणद्रव्यकालजीवशुभाश्रयात्मकमीश्वरशरीरम्; नित्यानां च स्वाभाविकगरुडभुजगादिरूपम्। अनित्यं च द्विविधम्—अकर्मकृतं कर्मकृतं चेति। प्रथममीश्वरस्य महदादिरूपम्। तथा अनन्तगरुडादीनां मुक्तानां चेच्छाकृततत्तद्रूपम्। कर्मकृतमपि द्विविधम्—स्वसङ्कल्पसहकृतकर्मकृतं केवलकर्मकृतं चेति। पूर्वं महतां सौभरिप्रभृतीनाम्। उत्तरं चान्येषां क्षुद्राणाम्। पुनः शरीरं सामान्यतो द्विधा जङ्गममजङ्गमं चेति। काष्ठादीनां शिलादीनां चाजङ्गमत्वमेव। यथा वृक्षगुल्मलतावीरुत्तृणानां तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञानाम्। शिलादिशरीरिणोऽपि जीवा विद्यन्ते इत्यहल्यादिवृत्तान्तश्रवणात् सिद्धम्। तथा च **वेदार्थसंग्रहे** प्रोक्तम् * अतो देवो मनुष्यो यक्षो राक्षसः पक्षी वृक्षो लता काष्ठं शिला तृणं घटः पट इत्यादयः सर्वे प्रकृतिप्रत्यययोगेन अभिधायकतया प्रसिद्धाः शब्दा लोके तत्तद्वाच्यतया प्रतीयमानतत्तत्संस्थानवस्तुमुखेन तदभिमानिजीवतदन्तर्यामिपरमात्मपर्यन्तस्यैव वाचकाः इति। इदं च व्यष्टिनामरूपाणां सर्वेषां जीवानुप्रवेशश्रुतिबलावलम्बनेनोक्तम्। उक्तं च **श्रीमद्गीताभाष्ये** * जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसा इति; * अथ तामसास्तु जघन्यगुणवृत्तिस्थाः—उत्तरोत्तरनिकृष्टतमोवृत्तिषु स्थिताः। अधो गच्छन्ति—अन्त्यत्वम्, ततस्तिर्यक्त्वम्, ततः क्रिमिकीटादिजन्म, ततः स्थावरत्वम्, ततोऽपि गुल्मलतात्वम्, ततश्च शिलाकाष्ठलोष्टादित्वं गच्छन्तीत्यर्थः इति। अत्र स्थावरशब्दो गोबलीवर्दनयात् वृक्षादिस्थावराख्यविशेषविषयो ज्ञेयः। जङ्गमं चतुर्धा देवमनुष्यतिर्यङ्नारकिसंस्थानभेदात्। असुरयक्षराक्षसादयोऽपि देवयोनयः। भूलोकवर्तिब्रह्मक्षत्रियविट्छूद्रादयो मनुष्ययोनयः। तेषां तु श्रुतिस्मृत्युक्तविधिनिषेधविषयता। देवादीनामपि साऽस्त्येव। प्रायश्चित्ताध्वरतपश्चर्याब्रह्मविद्यादिश्रवणात्। मृगपक्षिसरीसृपादयस्तिर्यग्योनयः। नारकिणस्तु रौरवादिषु दुःखैकाश्रयदुस्त्यजविग्रहाः। जङ्गमं पुनर्द्विविधम्—योनिजमयोनिजं चेति। इदं देवादिषु त्रिष्वपि संभवति। प्रजापतिमधुकैटभधृष्टद्युम्नैरावतस्वेदजादिदर्शनात्। तत्र योनिजेष्वेव पञ्चमाहुत्यपेक्षा। योनिप्राप्तेः पूर्वमाकाशवायुधूमाभ्रमेघवृष्टिव्रीह्यादिरेतःसिक्षु अन्यशरीरेषु संसर्गमात्रम्। तत्र व्रीह्यादिप्राप्तेः पूर्वं शीघ्रमेव निष्क्रमणम्। ततःपरं दुर्निष्प्रपतरम्। द्युपर्जन्यपृथिवीपुरुषानन्तरं पञ्चमे योषिदग्नौ हुतस्य तत्तत्कालप्रतिनियतपरिणामविशेषादयः आयुर्वेदयोगादिशास्त्रेषु विशदमवसेयाः। सप्तधातूनां शुक्लशोणितसंभवत्वप्रकारः, प्रकृतिविकृतिभावनियतवातपित्तकफादिप्रपञ्चः, नाड्यादिविशेषतत्परिमाणादयश्च तेष्वेवावसेयाः। एवं जरायुजाण्डजोद्भिज्जस्वेदजभेदोऽपि भाव्यः॥

एषां च व्यष्टिजीवशरीराणामीश्वरं प्रति शरीरत्वं सद्वारकमद्वारकं चेति एकः संप्रदायः। सद्वारकमेवेत्यन्यः। प्रथमस्तु पक्षः प्राचुर्येण **भाष्यकारव्यवहारैः** सूच्यते। **तत्त्वरत्नाकरेऽपि** स एवोक्तः—* चेतनाचेतनयोरविशिष्टं तं प्रति शरीरत्वम् इत्यादिवचनात्। द्वितीयस्तु पक्षो **विवरणकाराङ्गीकृतः**। **षडर्थसंक्षेपे** ह्यचितो जीवेश्वरयो-

देहत्वात् तद्वाचिशब्दजनितधियामुभयत्र पर्यवसानम्, उभयोरपि स्वयमेव भानात् द्विर्भानं चाशङ्क्योक्तम्—* नाचितो जीवद्वारा ब्रह्मशरीरत्वात् इति। विवरणेऽपि अयमेवार्थः प्रपञ्चितः। अयं च विवादो देवमनुष्यादिव्यष्टिदेहविषयः; दिव्यमङ्गलविग्रहाद्यचित्सु सद्वारकत्वायोगात्। विवरणेऽपि हि तमःप्रभृतीनामपि शरीरत्वनिर्देशविरोधपरिहाराय * आदिसृष्टौ तु इत्यादिना समष्टितत्त्वानां साक्षात् परशरीरत्वमुक्तम्। तेजोबन्नसृष्टिसमनन्तरभाविदेवमनुष्यादिनामरूपव्याकरणमात्र एव * अनेन जीवेन इत्यादिश्रुत्यनुरोधेन सद्वारकत्वम्। तत्रापि अद्वारकं सद्वारकं च शरीरत्वे न कश्चित् दोषः। उभयपर्यवसानमपि विशेषमूलप्रयोगभेदप्रतिनियमात् परिहृतम्। अत एव न द्विर्भानमपि। नचैकस्य युगपदनेकं प्रति शरीरत्वमनुपपन्नम्; तल्लक्षणयोगेन तदुपपत्तेः, अनेकं प्रति शेषत्वादिवत्। नच स्वतो जीववत् शरीरभूतस्य त्रिगुणद्रव्यस्य जीवानुप्रविष्टसङ्घातविशेषदशामात्रेण ईश्वरं प्रति शरीरत्वमपसरति। नच तदन्यद्द्रव्यम्, द्रव्याभेदात्। व्याकृतभूतत्वगादीन्प्रति चेश्वरस्यान्तर्यामित्वात्। तत एव च तेषां तच्छरीरत्वं श्रूयते। सुषुप्तिमूर्च्छाद्यवस्थासु च स्वाभाविकमीश्वरनियाम्यत्वमेव देहदेहिनोर्दृश्यते। अत इदमद्वारकनियमनं तत्पक्षे न स्यात्। जीवसत्तामात्रं च न देहनियमनौपयिकम्; तदानीं ज्ञानेच्छारहिततया तस्य गगनादिसत्तातुल्यत्वात्। अतः सर्वावस्थानां सर्वद्रव्याणामीश्वरं प्रत्येव स्वतश्शरीरत्वम्। जीवं प्रति तु तत्कर्मकृतमिति समीचीनोऽयं पन्थाः॥

एनामात्मतिरस्क्रियायवनिकामिच्छाविहारस्थलीं निर्व्यापारविभावरीसहचरीं निद्रामनिद्रात्मनः।
ब्रह्मस्तम्बमहेन्द्रजालरचनापिञ्छावलीं श्रीमतो विष्णोर्लोहितशुक्लकृष्णशबलां विद्यामविद्यातनुम्॥

इति श्रीन्यायसिद्धाञ्जने जडद्रव्यपरिच्छेदः प्रथमः॥ १॥

अथ जीवपरिच्छेदः॥ २॥

जीवस्य देहव्यतिरिक्तत्वम्॥ अथ जीवः। अल्पपरिमाणत्वे सति ज्ञातृत्वम्, शेषत्वे सति ज्ञातृत्वम् इत्यादि तल्लक्षणम्। स तावन्न देहः; प्रत्येकसमुदायचैतन्यादिविकल्पानुपपत्तेः, शरीरभेद इवाभिप्रायभेदप्रसङ्गात्, ममेति व्यतिरेकप्रत्ययात् सङ्घातत्वादिहेतुभिश्च। अवयविनश्च दूषितत्वात्। सिद्धावपि तद्गुणस्य कारणगुणपूर्वकत्वप्रसङ्गात्। पाकजगुणवत् परिणामविशेषाभ्युपगमेऽपि प्रत्यवयवं चैतन्यप्रसङ्गो दुष्परिहरः। अत एव * तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवत् इति प्रलापो निरस्तः। सङ्घातदशायां प्रत्यवयवं मदशक्तेः, रसविशेषादिवत्। अस्तु तर्हि भूतावयवविशेषः शीघ्रसञ्चारी स्थायी वा ज्ञातेति चेत्; प्रकारान्तरेणायमभ्युपगतो वैदिकः पक्षः। देहाख्यपिण्डातिरेके सिद्धे अनित्यत्वादिवादस्यायत्नवार्यत्वात्। आगमेनैवास्य देहव्यतिरेकसिद्धिरित्येके; यथोक्तमात्मसिद्धौ—* आनुमानिकीमप्यात्मसिद्धिमश्रद्दधानाः श्रौतीमेव तां श्रोत्रियाः सङ्गिरन्ते इति॥

जीवस्य बाह्येन्द्रियमनःप्राणधीव्यतिरिक्तत्वम्॥ न चासौ बाह्येन्द्रियाणि; तेषां बहुत्वात् प्रतिनियतविषयत्वाच्च, परस्परानुभूतार्थप्रतिसन्धानपरस्पराविवादनियमाद्यनुपपत्तेः। न च तेष्वन्यतमः; नियामकाभावात्। न च तत्समुदायः; समुदायोऽहमिति प्रत्ययाभावात्, अन्ततः समुदायिषु पर्यवसानाच्च। यच्च स्वप्नदशायामुपरतबाह्येन्द्रियस्य च व्याघ्रादिरूपात्मदर्शनम्, तदपि बाह्येन्द्रियवर्गात् देहाच्च आत्मनो भेदं व्यनक्ति। अत इन्द्रियेषु शरीरे च सकले विकले च सकलोऽहं विकलोऽहमित्यादिबोधो भ्रमात्, तद्वैशिष्ट्यविवक्षया वा। नापि मनः; कर्तुरात्मनः करणतयैव

श्रुतेरनुमानतो वा तत्सिद्धेः, आहङ्कारिकत्वश्रवणाच्च। नापि प्राणाः; तेष्वपि देहोक्तयुक्तिसाम्यात्। नापि धीः; ज्ञातृधर्मतया नश्वरतया च स्फुरणात् स एवाहमिति प्रतिसन्धानानुपपत्तेः। नचेदं प्रतिसन्धानं भ्रान्तिः; अबाधात्। क्षणभङ्गहेतूनां प्रागेव निरस्तत्वात्। भ्रान्तिरूपं वा आत्मप्रतिसन्धानम्, विषयप्रत्यभिज्ञानम्, स्मृतिमात्रं च संस्काराधारं स्थिरमात्मानमन्तरेण कथंचिदपि न घटते। ततश्च उपायानुष्ठानतत्फलानुभवादयोऽपि दुरुपपादाः॥ यत्पुनराहुः—

* यस्मिन्नेव हि सन्ताने आहिता कर्मवासना। फलं तत्रैव बध्नाति कार्पासे रक्तता यथा॥

इति; तदप्यसत्। तत्र वासनाधारस्थिरावयवानुवृत्तेः। निरन्वयविनाशिषु जगति सर्वक्षणेषु सन्तानैक्यभेदादयोऽपि दुर्वचाः। नष्टं सर्वं क्षणं प्रति जायमानस्य सर्वस्यापि क्षणस्य उत्तरत्वाविशेषात्। देशविशेषस्यापि क्षणिकत्वेन तदैक्यासिद्धेः। अत एव चित्तविज्ञानालयविज्ञानसन्तानभेदोऽपि निरस्तः। ज्ञानमात्रात्मवादे च प्रागुक्तप्रतिसन्धानाद्यनुपपत्तिभिः सन्तानैक्यग्रहीतुरभावाच्च न सन्तानसिद्धिः। अतो यच्चाहुः—

अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥ इति;

तच्च तेषामेव विपर्यासितदर्शनत्वफलम्। एतेन बौद्धगन्धिवेदान्तिनामपि सिद्धान्तोऽपक्रान्तः। केवलज्ञप्तेरहंप्रत्ययाविषयत्वात्, स्थिरत्वाभ्युपगमेऽपि अनुभवितृसापेक्षत्वात् भ्रान्तिरूपस्यापि प्रतिसन्धानादेः ज्ञातृत्वस्यापि भ्रान्त्यन्तरसिद्धत्वेऽनवस्थानात्। न चासौ कारणानवस्थितिरिति न दोषः। दोषाधिष्ठानयोरपि तथाभूतयोरेव सर्वत्र संभवेन अविद्यानादित्वाधिष्ठानसत्यत्वयोरपि परित्यागप्रसङ्गात्॥

जीवस्य ज्ञातृत्वाहंप्रत्ययविषयत्वकर्तृत्वनित्यत्वानि॥ यत्तु त एव साङ्ख्यैः संभूयाहुः—दर्पणमुखवत्, अयःपिण्डौष्ण्यवत्, करतलरविकरवच्च, चिच्छायापत्तितत्संपर्कतद्व्यञ्जकत्वाधीनतदाश्रयत्वभ्रमादन्तःकरणस्य ज्ञातृत्वमिति। तत्र यथाश्रुतविवक्षायां कथमचाक्षुषयोर्बिम्बाधिकरणयोश्छायापत्तिः? अध्यासमात्रे तदुपचार इति चेत्; कुत्र? कस्य? अन्तःकरणे चैतन्यस्येति चेत्; तर्हि चैतन्यमेव मिथ्या स्यात्; अध्यस्तत्वात् तदनधिकरणचैतन्यस्य खपुष्पपरिमलायमानत्वात्। चैतन्ये अन्तःकरणस्येति चेत्; तर्हि ज्ञानस्य अन्तःकरणाश्रयताभ्रमः स्यात्; न त्वन्तःकरणस्य ज्ञातृत्वभ्रमः। न चैतादृशः कश्चित् भ्रमो दृश्यते। कथं च सम्पर्के सत्यपि द्वयोर्ज्ञातृत्वमौष्ण्यवत् तात्त्विकमनभ्युपगच्छतस्तदध्यासः? धर्मधर्मिभावस्य लोके दृष्टत्वात्, इह तदध्यासात् ज्ञातृत्वभ्रम इति चेत्; कुत्र धर्मत्वाध्यासः? कुत्र वा धर्मित्वाध्यासः? इति नियामकाभावात् वैपरीत्यमपि स्यात्। क्वचित् धर्मिभेदाग्रहः, क्वचित् धर्मभेदाग्रह इति तौ नियामकाविति चेन्न; ज्ञप्तेः स्वयंप्रकाशायाः स्वरूपातिरिक्ताग्रहीतभेदानभ्युपगमात्। अभ्युपगमे वा सधर्मत्वापातात्। भेदाग्रहायोगादेव अहङ्काराभिव्यङ्ग्यत्वमपि निरस्तम्। यथाऽऽहुर्भगवद्यामुनमुनयः—

* शान्ताङ्गार इवादित्यमहङ्कारो जडात्मकः। स्वयंज्योतिषमात्मानं व्यनक्तीति न युक्तिमत्॥

व्यङ्क्तृव्यङ्ग्यत्वमन्योऽन्यं न च स्यात् प्रातिकूल्यतः। व्यङ्ग्यत्वेऽननुभूतित्वमात्मनि स्याद्यथा घटे॥ इति।

अतः सिद्धमात्मैव ज्ञाता अहंप्रत्ययविषय इति।

किञ्च— प्रत्यक्त्वादुपलम्भतो मम सुखं भावीति मोक्षेच्छया मुक्तब्रह्ममुमुक्षुवेदवचसा सुप्तोऽहमित्युक्तितः।
मां नाज्ञासिषमित्यपि स्ववपुराद्यज्ञानमात्राश्रयात् स्वापप्राच्यनिजक्रियास्मरणतोऽप्यात्माऽहमर्थः स्थिरः॥

आत्मनोऽहंप्रत्ययगोचरत्वप्रतिक्षेपकाणि आत्मत्वाजडत्व [प्रत्यक्त्व] निर्विकारत्वादीनि प्रत्यक्षागमबाधात् असाधारणानैकान्तिकत्वाच्च निरस्तानि। एवं ज्ञातृत्वकर्तृत्वप्रतिक्षेपकेष्वपि भाव्यम्। एवं कर्तृत्वज्ञातृत्वादिकं नात्मधर्मो धर्मत्वात् दृश्यत्वात् इत्यादिकमपि बाधकबलात्, विपक्षे बाधकाभावाच्च दुःस्थम्। नाहङ्कारधर्म इति प्रयुज्यमाने का गतिर्देवानांप्रियस्य? अविद्येति चेत्; सत्यमविद्यैव अनाविद्यककर्तृत्वस्य कचिदप्यनभ्युपगमात्। आविद्यस्यापि निषेधे तद्विधानविरोधात्। ज्ञातृत्वं चास्य स्वाभाविकाकार इति * ज्ञोऽत एवेत्यधिकरणे श्रुतिभिरुपपादितम्। भोक्तृत्वहेतुभूतं कर्तृत्वं भोक्तुर्जीवस्यैव। तच्च सामान्यतः परमपुरुषहेतुकमिति * कर्ता शास्त्रार्थवत्त्वात्, * परात्तु तच्छ्रुतेः इत्यधिकरणे प्रपञ्चितम्। अस्य स्वयंप्रकाशत्वनित्यत्वनानात्वाणुत्वादीनि श्रुत्युपपत्तिभ्यां सिद्धानि। स्वस्य चास्य स्वयंप्रकाशत्वम्। परस्य तु तज्ज्ञानविषयतयैव प्रकाशते। स्वस्यापि प्रमाणान्तरावसेयाणुत्वशेषत्वनियाम्यत्वनित्यत्वादिविशिष्टरूपेण ज्ञानविषयत्वमस्त्येव। अहमिति प्रत्यक्त्वैकत्वविशिष्टतया तु स्वप्रकाशता सर्वदा। योगदशायां तु यथावस्थितापूर्वाकारविशिष्टतया यौगिकप्रत्यक्षेण साक्षात्क्रियते। तदिदमुक्तम् **आत्मसिद्धौ**—

* एवमात्मा स्वतःसिध्यन्नागमेनानुमानतः। योगाभ्यासभुवा स्पष्टं प्रत्यक्षेण प्रकाशते॥ इति।

तदेवं ज्ञातृत्वादिरूपभेदात् मातृमेयमानरूपोऽयमात्मा। उक्तं **प्रज्ञापरित्राणे वरदनारायणभट्टारकैः**—

* प्रमाता च प्रमेयं च प्रमाणं च भवेत्पुमान्। प्रमा मेया च धीरेव मेया एव घटादयः॥ इति।

स्वयंप्रकाशत्वादौ श्रुतिः सुप्रसिद्धा। यद्यपि * सत्यं ज्ञानमित्यत्र अन्तोदात्तत्वबलात् ज्ञानकर्तृत्वार्थकत्वमङ्गीकार्यम्, यद्यपि * विज्ञानघनः इत्यत्र रसघनदृष्टान्तस्वारस्यात् ज्ञानव्याप्तत्वं विवक्षितम्, यद्यपि * विज्ञानं यज्ञं तनुते इत्यादिषु * तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्, तथाऽपि * एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः इत्यत्र विज्ञानात्मशब्दस्वारस्यात् विशेषतस्सामान्यतश्च प्रपञ्चितस्य ज्ञातृत्वस्य पुनर्वचने प्रयोजनाभावाच्च ज्ञानस्वरूपत्वं सिद्धम्। तथा च * अत्रायं पुरुषः स्वयंज्योतिर्भवति, कतम आत्मा योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः इत्यादिभिश्च स्वयंप्रकाशत्वं स्वरससिद्धमङ्गीकार्यम्। अनुमितिस्तु—आत्मा स्वयंप्रकाशः; ज्ञानत्वात् धर्मभूतज्ञानवत् इति **श्रीविष्णुचित्तैरुक्तम्**। अधीकर्मतया प्रकाशमानत्वज्ञानात्मसंबन्धप्रतिसंबन्धित्वादीनि परमबाधितानि **वरदविष्णुमिश्रोक्तानि**॥

स्वस्यैव भासको दीपः स्वात्मनोऽन्यस्य च प्रभा। एवं भेदोऽस्ति साम्येऽपि ज्ञानयोर्धर्मधर्मिणोः॥
प्रत्यक्स्वयंप्रभसुखे नित्यं पुंसि व्यवस्थिते। अस्वाप्सं सुखमित्यादौ कालांशेऽनुमास्थितिः॥
अगायं मधुरं मन्दमगामित्येवमादिषु। माधुर्यादिवदत्रापि सुखं भाति तदातनम्॥

ज्ञानस्य संबन्धिशब्दतया व्युत्पत्तिमात्रम्। प्रवृत्तिनिमित्तं तु कस्यचित् व्यवहारानुगुण्ये निरपेक्षहेतुत्वम्। तदेव स्वस्येति निरूपितं स्वयंप्रकाशत्वमिति न साध्याविशेषोऽपि विषयाश्रयवैशिष्ट्यनिर्बन्धो धर्मभूतज्ञाने। धर्मिज्ञानस्यापि विशिष्टत्वात् परमतादतिरेकः। अस्य त्वविनाशित्वे युक्तयः * अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् इत्यादिना **भगवद्गीतायामुक्ताः**; व्यञ्जिताश्च **तद्भाष्ये**। अनित्यत्वेऽस्य अकृताभ्यागमकृतविप्रणाशादिप्रसङ्गश्च॥

जीवस्याणुत्वम्॥ अणुश्चासौ; श्रुतेः, स्वयंप्रकाशस्य हृत्प्रदेशावच्छिन्नोपलम्भस्वारस्याच्च। युगपदखिलभुवनेषु अदृष्टद्वारा तत्कार्यसिद्धये विभुत्वकल्पनमयुक्तम्; ईश्वरप्रीतिकोपयोरेवादृष्टत्वात्, तदाधारस्य चेश्वरस्य विभुत्वात्,

जीवस्याविभुत्वे बाधकाभावात्, विभुत्वे चोपलम्भाद्यस्वारस्याच्च । इन्द्रियवत् शरीरप्रत्युप्तात्मगमनेनैव तत्रतत्र ज्ञानसुखाद्युपपत्तेः । आत्मगमनं तूपलम्भश्रुत्याद्यनुकूलम्, विभुत्वकल्पनं तु न तथेति लाघवमिच्छतां तदेव फलितम् । उक्तं चात्मसिद्धौ प्राणात्मवादनिराकरणे *अविभोरात्मनः स्पर्शविरहिणोऽपि प्रयत्नादृष्टप्रेरणानुगुण्येन मनस इव उत्क्रान्तिगत्यागतयो युज्यन्ते इति । तथा तत्रैव चैतन्यप्रसरणचोद्यपरिहारयोरपि *गुणिनमपहाय इत्यादिना अणुत्वं व्यक्तम् । श्रुतिस्मृत्यादिषु सर्वगतत्वादिव्यपदेशास्तु समुदायापेक्षया धर्मभूतज्ञानद्वारा सूक्ष्मानुप्रवेशक्षमतया वा तत्रतत्र यथोचितं निर्वाह्याः । *नित्यो व्यापी इत्यात्मसिद्धिवचने व्यापिपदमपि *अतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशस्वभावः इति भाष्ये व्याख्यातम् । *उत्क्रान्तिगत्यागतीनाम् इत्यादिभिश्च सूत्रकारैरेवाणुत्वं समर्थितम् । हृत्प्रदेशस्थितस्यैव जीवस्य ज्ञानद्वारा नानाधिष्ठानोपपत्तिः । एवमेव योगिप्रभृतीनां नानादेहाधिष्ठानं घटते । न ततो विभुत्वक्लृप्तिः । तदेतदखिलमभिप्रेत्य सूत्रितम् *गुणाद्वाऽऽलोकवत् इति, मुक्तनिरूपणे च *प्रदीपवदावेशस्तथा हि दर्शयति इति । एतेन देहात्माभिमानमनुसरतामार्हतानां देहानुरूपविविधपरिमाणत्वकल्पनमपि भग्नम् । *एवं चात्मा कार्त्स्न्यम्, *न च पर्यायादप्यविरोधो विकारादिभ्यः, *अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः इति सूत्रैश्च तन्निरस्तम् । वरदविष्णुमिश्रैस्तु *संसारदशायां स्वरूपज्ञानयोः सङ्कोचादणुपरिमाणमात्मस्वरूपम् । मोक्षदशायां तु सर्वगतं सर्वव्यापि, ज्ञानं च विस्तीर्णतया प्रकाशते । अयमर्थः—*वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥
इति श्रुत्याऽवगम्यते । तदाह भगवान्पराशरः *विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा इति, इत्यादिना जीवस्यापि सङ्कोचविकासयोगित्वमुक्तम् ॥

अयमेवार्थः *नित्यो व्यापी इत्यात्मसिद्धिवचनमुपादाय मानयाथात्म्यनिर्णये प्रपञ्चितः । तदेतत् सूत्रादिविरोधात् वैभववचनम् । यत्तु श्रीमद्गीताभाष्ये *अनादिमत्परं ब्रह्म इति व्याख्याने *ब्रह्म बृहत्त्वगुणयोगि शरीरादर्थान्तरभूतं स्वतश्शरीरादिभिः परिच्छेदरहितं क्षेत्रज्ञतत्त्वमित्यर्थः; *स चानन्त्याय कल्पते इति श्रुतेः । शरीरपरिच्छिन्नत्वं चास्य कर्मकृतम् । कर्मबन्धान्मुक्तस्यानन्त्यम् इत्युक्तम्, यच्च *लोके सर्वमावृत्य तिष्ठति इत्यत्र लोके यद्वस्तु जातं तत्सर्वमावृत्य व्याप्य तिष्ठति परिशुद्धस्वरूपं देहादिपरिच्छेदरहिततया सर्वगमित्यर्थः, इत्युक्तम्, यच्च *अचरं चरमेव च इत्यत्र स्वभावतोऽचरं चरं च देहित्वे, इत्युक्तम्, एवं प्रकरणान्तरेष्वपि *अनवच्छिन्नं ज्ञानैकाकारम्, इत्युक्तम्, तदखिलं ज्ञानव्याप्त्यादितत्परमेवेति मन्तव्यम् । सारभाष्यादिषु *स चानन्त्याय कल्पते इत्यादेस्तथैव व्याख्यानात् । दीपे तु *प्रदीपवदावेशस्तथा हि दर्शयति इति सूत्रे वालाग्रश्रुतिमुपादाय प्रत्यगात्मनोऽणुत्वमेव स्वरूपमिति सूत्रकारमतम्; *नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् इति, साभिसन्धिकमुक्तत्वाच्च । अतः सदा अणुरेव जीव इति सूत्रभाष्यकारादीनां सिद्धान्तः ॥

जीवभेदः, जीवेश्वरभेदश्च ॥ स चायमात्मा सौभर्यादिक्षेत्रज्ञव्यतिरिक्तेषु प्रतिक्षेत्रं भिन्नः; स्मृत्यनुभवसुखदुःखकरणप्रयत्नादिप्रतिनियमात् । उक्तं हि [वैशेषिक]न्यायसूत्रे *नानात्मानो व्यवस्थातः इति । सांख्यैरप्युक्तम्—

*जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ इति ।

जीवाद्वैतवचनानि तु प्रकारैक्यविषयाणि । प्रकारैक्येऽपि ह्येकादिशब्दाः प्रयुज्यन्ते—यथा अयमपि चैको व्रीहिरिति । *रामसुग्रीवयोरैक्यम् इत्यादि च भाव्यम् । ततश्चायं संग्रहः—

अविरोधान्तरङ्गत्वजातिभोगाद्यभेदतः । एकोक्तिरपृथक्सिद्धेर्देशकालदशादिभिः ॥

साम्यं च सर्वजीवानां स्वरूपतः, मुक्त्यवस्थायां गुणतोऽपि चेति श्रुतिस्मृत्यादिसिद्धम् । तत्र जीवभेदनिषेधवचनान्यपि प्रामाणिकस्वरूपभेदव्यतिरिक्तदेहात्माभिमाननिबन्धनदेवत्वादिभेदनिषेधपराणि । कण्ठोक्तेन च देवत्वादिनिषेधेन तेषामैकार्थ्यमुचितम् । किंच निर्विशेषात्मैक्यवादिनोऽपि बन्धमोक्षयोरविशेषः प्रसज्यते । तत्त्वत इदानीमपि निरस्ताविद्यत्वात्, अतत्त्वतस्तदानीमपि तद्व्यवहारोपपत्तेः । व्यपदिश्यते हि शुकादिषु मुक्तेष्वपि हि जगति संसारः । किंच—

भ्रान्त्या सर्व [समु] भ्रमोच्छेदे नोच्छेदस्तत्त्वतो भवेत् । प्रमया त्वपसिद्धान्ता [द्वै] द्वैतभङ्गा [द्य] दिसंभवः ॥

विस्तरेण च परस्तात् दूषयिष्यामः । **भास्करमते** तु नित्यसर्वज्ञस्य उपाधियोग एव परिहास्यः । उपाधिभिश्छेदनाद्ययोगेन ब्रह्मण एव संसारित्वानपायः । उपाधिसञ्चारे प्रतिक्षणं बन्धमोक्षप्रसङ्गः । सौभर्यादिवदुपाधिभेदेऽपि प्रतिसन्धानस्य दुस्त्यजत्वात् । छेदाभ्युपगमे चाच्छेद्यवादविरोधः । एवं सकलपदार्थभिन्नाभिन्नसच्चिद्ब्रह्मवादोऽपि दूष्यः । बद्धस्यापि प्रलये मुक्ताविशेषसदापत्त्यभिधानात् । मुक्तस्यापि सर्वज्ञस्य सृष्टौ सर्वहेयतादात्म्यानुसन्धानेन अनन्तसंसारयोगात् । अतो बन्धमोक्षाविशेष एव । अस्माकमविद्यानिवृत्तिर्नाम भावान्तरं भविष्यत्येव । तच्च धीविशेषविकासादिरूपम् । प्रीयमाणपरमपुरुषपरिग्रहविशेषादिश्च । परेषां तु निखिलमिदमाविलमिति । * ब्रह्म वेद ब्रह्मैव भवति इत्यादिकमित्थमेव ब्रह्मतादात्म्यापरोक्ष्यकृतम् । मुक्तब्रह्मणोस्तादात्म्यं शरीरशरीरिभावात् । तदापरोक्ष्यं च शाश्वतमेव ; तदपरोक्षधियो यावदात्मभावित्वात् । **न्यायसुदर्शने** तूक्तम्—* एवशब्दः साम्यवाची, * साम्ये चैव क्वचिच्छब्द इति निघण्टूक्तेः । * वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमान् लोकानभिजयति इति साम्ये श्रौतप्रयोगदर्शनाच्च । विष्णुरेव—विष्णुरिवेत्यर्थः । न ह्यत्र विष्णुरेव भवतीति विवक्षितम् । स्पर्धमानस्य पशुयागेन तदयोगात् । ऐहिकफलं हि शत्रुजयादि इत्यादि । **भाष्यं** च गौणतामेवाह—* प्रकारैक्ये च तत्त्वव्यवहारो मुख्य एव ; यथा सेयं गौः इति । मुख्य एव—मुख्यप्राय इत्यर्थः । सेयं गौरिति तु व्यक्तिद्वयैकरूप्यव्यपदेशः । अतः सिद्धमीश्वरात् परस्परं च भिन्ना जीवा इति ॥

जीवविभागः ॥ स्वतस्सुखी चायमात्मा । उपाधिवशात् संसरति । स द्विधा—संसारी असंसारी चेति । पुण्यपापादिमान् पूर्वः । तच्छून्य इतरः । पूर्वोऽपि द्विधा—नित्यसंसारी भाविसंसारविरहश्चेति । तत्र इतःपूर्वमनन्तकल्पेष्विव परस्तादपि हेत्वनागमनान् संसाराविच्छेदसंभवात् पूर्वः । मानं तु लीलाविभूतिनित्यत्वोक्तिः । * क्षिपाम्यजस्रम्, * न क्षमामि कदाचन इत्यादिकमपि तदुत्तम्भकम् । केचित्तु विलम्बातिरेकपराणि तानि ; नतु कस्यचिदपि नित्यः संसारः । अविरुद्धयोरसंसर्गस्य कालविप्रकर्षनियमेन व्याप्तेः । अन्यथा मोक्षसाधने स किमहम् ? इति सन्देहादप्रवृत्तिप्रसङ्गात्—इति वर्णयन्ति । इतःपूर्वमनागतैतच्छरीराद्युपनिपातवत्, तद्धेतूपनिपातात् भाविसंसारविरहोपपत्तिः । प्रमाणं च ब्रह्मविदो मोक्षवचनानि । एते च संसारिणः कर्मपाशप्रग्रथिता ब्रह्माण्डकुहरपरिवर्तमानकालघटीयन्त्रकुण्डिकायमानाः तस्मिन् क्षीयमाणाः पूर्यमाणाश्च सन्तः परिभ्रमन्ति । तत्र पुण्यकृतो धूमरात्र्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशचन्द्रक्रमेण स्वर्गलोकमधिरोहन्ति । अवरोहन्ति च चन्द्रमसस्स्थानात् आकाशवायुधूमाभ्रमेघादिक्रमेण । तत्र श्रद्धासोमवर्षान्नरेतोमयीनामाहुतीनां विद्युत्पर्जन्यपृथिवीपुरुषयोषितः स्थानानि । प्रायिकी च पञ्चमाहुत्यपेक्षा ; द्रौपदीधृष्टद्युम्नप्रभृतिष्वदर्शनात् । एवमपुण्यकृतामपि स्वेदजादिशरीरेषु पञ्चमाहुत्यभावात् चन्द्रप्राप्त्यभावाच्च । तेषामतिघोरा निरयसरणिः, निरयदुःखानु-

भूतिश्च पुराणादिषु प्रपञ्चिता स्मर्यमाणाऽपि कलेबरं कदम्बगोलाययति । द्वितीयोऽपि द्विधा–संसारात्यन्ताभाववान् प्रध्वस्तसंसारश्चेति । तत्र कदाचिदपि संसारहेत्वभावात्, पूर्वस्य ईश्वरवत् नित्यसूरेस्तदत्यन्ताभावः । उत्तरस्तु उपपादितो मुक्त एव । अनादावपि काले प्रतिदिवसं सहस्रपुरुषमोक्षेऽपि न संसारात्यन्तविलयः । अस्यानन्तस्य एवंस्वभावत्वात् । उक्तं च **वेदार्थसंग्रहे** *ब्रह्माज्ञानपक्षादपि पापीयानयं भेदाभेदपक्षः । अपरिमितदुःखस्य पारमार्थिकत्वात् संसारिणामनन्तत्वेन दुस्तरत्वाच्च इति । अनन्तपयोनिधौ पयोबिन्दुसन्निपातवत् संसारिवर्गे पूर्वमुक्तेषु पश्चान्मुक्तानामनुप्रवेशः । अनन्तेष्वपि संसार्यसंसारिषु एकपादत्वत्रिपादत्वतारतम्यमापेक्षिकम् । तथा च मुहूर्तयामाहोरात्रकल्पादिषु द्रव्यपार्थिवघटादिषु च दृष्टमेव । अत एव नित्यानां समस्तबद्धमुक्तापेक्षयाऽप्यनन्तत्वमुपपन्नम् । केचित्तु नित्यसूरिवर्गं नेच्छन्ति ; तन्न, *सदा पश्यन्ति सूरयः इत्यादिभिः सदापश्यदनेकद्रष्टृविशिष्टस्थानविधानात् । अत एव न मुक्तप्रवाहेण वा ईश्वरेण वा अन्यथासिद्धिः । सर्वेषां जीवानां संसारात्यन्तायोगव्यवच्छेदसाधनानि जीवत्वादिलिङ्गानि यथासंभवं सिद्धसाधनबाधादिभिर्दूष्याणि । तेषां नित्यसूरीणामानन्त्यावान्तरभेदादिकं **श्रीपाञ्चरात्रसंहितासु** विशदमनुसन्धेयम् ।

अनन्तविष्वक्सेनाद्यैर्नियताधिक्रियैरपि । ज्ञानानन्दादिभिर्मुक्ता नित्यैरानन्दसोदराः ॥

एवं सदादर्शनादिबलादेव नित्यमुक्तेश्वराणां प्रतिसर्गावस्थायां सुषुप्तकल्पतयाऽवस्थानं वदन्तः प्रत्युक्ताः । सङ्कोचककर्माद्यभावाच्च साऽवस्था दुरुपपादा ॥

मोक्षहेतुः ॥ अथ को मोक्षहेतुः? भक्तिरूपापन्नोपासनवेदनध्यानादिशब्दवाच्योऽसकृदावृत्त आप्रयाणादन्वहमनुवर्तमानो ज्ञानविशेषः । तथा च सूत्रम्–*आवृत्तिरसकृदुपदेशात् इति, *आप्रयाणात्तत्रापि हि दृष्टम् इति च । न पुनः केवलं तत्त्वज्ञानम् ; तस्य अध्ययनविधिसिद्धसाङ्गसशिरस्काध्ययनगृहीताक्षरराशिविशेषापातप्रतीतनिरतिशयपुरुषार्थसाधनार्थनिर्णयरागप्राप्तश्रवणमात्रेण निष्पन्नस्याविधेयत्वात्, तावति सिद्धेऽपि मोक्षादर्शनाच्च । तदुक्तं भगवता **आपस्तम्बेन**–बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धम्, बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत इति । नापि श्रवणमननोपासननिर्धूतभेदवासनस्य वाक्यमात्रजन्यः साक्षात्कार इति वाच्यम्; तस्यान्योन्याश्रयविरोधादिदुष्टत्वात् । अविद्यास्वरूपसंबन्धनिवर्तकज्ञानतज्ज्ञातृतदैक्योपदेशादीनां विकल्पासहत्वं **भाष्यादिषु** ग्राह्यम् । असत्यात् सत्यप्रतिपत्तिश्च सर्वथाऽनुपपन्ना । तथा हि—

सत्यधीर्मम सत्येन तवासत्यादसत्यधीः । सत्यादसत्यधीर्वेति [क्व]नासत्यात्सत्यधीर्भवेत् ॥

कर्मापि न केवलं ज्ञानसमुच्चितं वा मुक्तिहेतुः ; वेदनमेव विधाय उपायान्तरनिषेधात् । तदङ्गतया कर्मानुप्रवेशे तु न विरोधः, तथा सति तस्योपायान्तरत्वाभावात् । परमात्मसाक्षात्कारोदयविरोधिरजस्तमोमूलभूतसांसारिकपुण्यपापरूपप्राचीनकर्मनिर्मथनकृतचित्तशुद्धिद्वारेण हि तदा तदुपयोगः । एतेन विशिष्टदेशवासव्रतविशेषवैष्णवसंश्रयादेर्ज्ञानयोगकर्मयोगयोश्च परम्परया मोक्षहेतुत्वमित्यपि सिद्धम्, वैष्णवसंश्रयादेरुपासनशेषतयोपादानात् । यजमानेन सह पश्वादीनां स्वर्गादिगमनवद्वा मोक्षसिद्धिः । *यजमानेन सहिताः स्वर्गं यान्ति नराधिप ! इति हि **महाभारतोक्तिः** । ज्ञानकर्मयोगयोश्च वक्तव्यमखिलं **श्रीमद्गीताभाष्ये** व्यक्तमुक्तम् । तत्र हि कर्मयोगप्रसङ्गेषु *कर्मयोगस्य सुशकत्वात् अप्रमादत्वाच्च अन्तर्गतात्मज्ञानतया निरपेक्षत्वात् इत्यादिप्रकारेण कर्मयोगमात्रेण आत्मावलोकनसिद्धिरुपपादिता । तथा *निराशीर्यतचित्तात्मा इति श्लोके *ज्ञाननिष्ठाव्यवधानरहितकेवलकर्मयोगेन एवंरूपेण आत्मानं पश्यतीत्यर्थः इत्युक्तम् ।

तथा * ब्रह्मार्पणम् इति श्लोकेऽपि * मुमुक्षुणा क्रियमाणं कर्म परब्रह्मात्मकमेवेत्यनुसन्धानयुक्ततया ज्ञानाकारं साक्षादवलोकनसाधनम्। न ज्ञाननिष्ठाव्यवधानेन इत्युक्तम्। तथा **पञ्चमाध्याये**—

* सन्न्यासः कर्मयोगश्च निःश्रेयसकरावुभौ। तयोस्तु कर्मसन्न्यासात् कर्मयोगो विशिष्यते॥
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्। यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते॥

इत्येतैर्व्यक्तमेव नैरपेक्ष्यमुक्तम्।

* सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः। योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति॥

इति ज्ञानयोगादपि कर्मयोगस्य शीघ्रकारित्वं कर्मयोगादृते ज्ञानयोगस्य दुष्प्रापत्वं च प्रतिपादितम्। द्वयोरपि च भक्त्यङ्गत्वं बहुषु प्रदेशेष्वभिहितम्। तथाहि; *अथैतदप्यशक्तोऽसि इत्यस्य व्याख्याने *ततोऽक्षरयोगमात्मस्वभावानुसन्धानरूपं परभक्तिजननं पूर्वषट्कोदितमाश्रित्य तदुपायतया सर्वकर्मफलत्यागं कुरु इत्युक्तम्। तथा * श्रेयो हि ज्ञानमभ्यासात् इत्यत्र * शान्ते मनस्यात्मध्यानं संपत्स्यते। आत्मध्यानाच्च तदापरोक्ष्यम्, तदापरोक्ष्यात् परा भक्तिरिति भक्तियोगाभ्यासाशक्तस्य आत्मनिष्ठैव श्रेयसी। आत्मनिष्ठस्यापि अशान्तमनसो निष्ठावाप्तये अन्तर्गतात्मज्ञानानभिसंहितफलकर्मनिष्ठैव श्रेयसीत्यर्थः—इत्युक्तम्। तथा **तृतीयषट्कारम्भे** * पूर्वस्मिन् षट्के परमप्राप्यस्य ब्रह्मणो भगवतो वासुदेवस्य प्राप्त्युपायभूतभक्तिरूपभगवदुपासनाङ्गभूतं प्रत्यगात्मनो याथात्म्यदर्शनं ज्ञानयोगकर्मयोगलक्षणनिष्ठाद्वयसाध्यमुक्तम्—इत्युक्तम्। * उभयपरिकर्मितस्वान्तस्य ऐकान्तिकात्यन्तिकभक्तियोगलभ्यः इति। अत्रेदं तत्त्वम्—भक्तियोगः परमात्मप्राप्त्युपायभूतः। तदशक्तस्य तद्भक्तियोगसिद्ध्यर्थमात्मावलोकनमपेक्षितम्। तस्य च ज्ञानयोगकर्मयोगौ द्वौ पृथगुपायौ। तत्र ज्ञानयोगः स्वात्मावलोकनेऽन्तरङ्गः; तथाऽपि प्रथमं स दुष्करः। तदनधिकारिणस्तुल्यफलः कर्मयोग एव कार्यः। तदधिकारिणोऽपि व्यपदेश्यस्य लोकसंग्रहार्थं कर्मयोग एव कार्यः। अशक्तस्य ज्ञानयोगशक्तिं कर्मयोग एव उत्पादयति। तदा कर्मयोगं परित्यज्य ज्ञानयोगमनुतिष्ठतोऽपि न दोषः। इमौ च योगौ कामनाभेदेन कस्यचित् कैवल्यमात्रसाधकौ। यथा भगवदुपासनमेव कस्यचित् ऐश्वर्यादिकं साधयति। प्रवाहानादिपुण्यपापरूपकर्मतारतम्येन शक्त्यशक्तिकामनादितारतम्यमिति न कश्चिद्दोष इति। तत्सिद्धं भक्तिरेव मोक्षोपाय इति॥

भक्तिः ॥ महनीयविषये प्रीतिर्भक्तिः। सैवावस्थाभेदात् परभक्त्यादिभेदं भजते। स्तुतिनमस्कारादिषु तत्संबन्धात् भक्तिशब्द उपचारतः। सा च भक्तिः सदक्षरमधुदहरभूमवैश्वानरादिविद्याभेदात् बहुधा **गुणोपसंहारपादे** निपुणमनुसन्धेया। एवं चातुरात्म्योपासनरूपा अपि भक्तयः सद्विद्यादिभेदवदङ्गीकार्याः। प्रमाणसिद्धत्वनैरपेक्ष्याद्यविशेषात्। एताः सर्वास्तत्तच्छास्त्रप्रतिपादिततत्तद्वर्णाश्रमधर्मनिष्ठत्रैवर्णिकमनुष्यदेवासुरादिसाध्याः। स्त्रीविधुराणामपि जपोपवासाद्यङ्गाधिकृतानां ब्रह्मविद्याधिकारोऽस्त्येव। अनाश्रमित्वादाश्रमित्वमेव ज्याय इति विशेषः। नैष्ठिकादिपरिभ्रष्टानां त्वनधिकार एव; तथा स्मृतेः शिष्टबहिष्कारादेश्च। कृतप्रायश्चित्तानामपि तेषां ब्रह्मविद्याधिकारो नास्त्येवेति * बहिस्तूभयथाऽपि स्मृतेराचाराच्च इति सूत्रेऽभिहितम्। ननु गोपिकादेरपि मोक्षः श्रूयते, तत्कथं त्रैवर्णिकत्वनियमः? इत्थम्—न हि तेषां तत्तच्छरीरेष्वेव उपायानुष्ठानम्, किं तु प्राचीनेष्वेव ब्राह्मणादिजन्मसु। प्रागेव प्राप्तोपायानामपि तेषां प्रारब्धकर्मविशेषादिना निकृष्टशरीरप्रवेशः। अन्तिमशरीरं तु यत्किमपीति न दोषः। प्रारब्धावधिकत्वाद्बन्धस्य। एवं विदुरादयश्च भवान्तरीयसंस्कारोद्बोधजनितज्ञानेनेति **नापशूद्राधिकरण**विरोधः। स्मरन्ति च—

* धर्मव्याधादयोऽप्यन्ये पूर्वाभ्यासाज्जुगुप्सिते । वर्णावरत्वे संप्राप्ताः संसिद्धिं श्रमणी यथा ॥ इत्यादि । शुश्रूषोर्जानश्रुतेः शूद्रेत्यामन्त्रणं शोचनादिति सूत्र एव व्यक्तम् ॥

न्यासविद्या ॥ अध्यवसायादिविशेषविशिष्टा न्यासविद्या । तस्या अपि बुद्धिविशेषत्वात् * नान्यः पन्थाः इत्यादिभिर्न विरोधः ; भक्तिविशेषत्वाच्च * भक्त्या त्वनन्यया इत्यादिभिः । यथाऽऽहुः—

* साधनं भगवत्प्राप्तौ स एवेति स्थिरा मतिः । साध्यभक्तिस्तथा सैव प्रपत्तिरिति गीयते ॥

उपायो भक्तिरेवेति तत्प्राप्तौ या तु सा मतिः । उपायभक्तिरेतस्याः पूर्वोक्तैव गरीयसी ॥

उपायभक्तिः प्रारब्धव्यतिरिक्ताघनाशिनी । साध्यभक्तिस्तु सा हन्त्री प्रारब्धस्यापि भूयसी ॥ इति ।

तस्या अपि हि शब्दान्तरादिभिः सद्विद्यादिभेदवत् भेदे सिद्धे सर्ववेदान्तप्रत्ययन्यायात् सर्वप्रपत्तिप्रकरणपठितगुणोपसंहारेण पौष्कल्ये च सिद्धे * विकल्पोऽविशिष्टफलत्वात् इति न्यायेन विद्यान्तरसमुच्चयप्रसङ्गाभावः, त्याज्यसमुच्चये विरोधाच्च । भक्त्यङ्गभूता सा चान्यैव; अभिसन्धिभेदात् । यथा ऐश्वर्यसाधिका भक्तिरपवर्गोपायभक्तिभ्यो भिद्यते, यथा च कर्मस्वरूपाविशेषेऽपि नित्यकाम्यज्योतिष्टोमभेदः । भक्तिविशेषभूतायास्तस्याः पृथगुपायत्वपरिगणनं कथमिति चेत् सकृदसकृत्त्वनिरपेक्षसापेक्षत्वादिभेदमाश्रित्येति मन्वीथाः । फलवैषम्याभावे लघूपाये सति गुरूपायविधानमनर्थकमिति चेन्न; तादृशाध्यवसायादेर्दुष्करत्वेन गौरवाविशेषात् । तथोक्तं प्रपत्तिप्रकरणे * उपायः सुकरः सोऽयं दुष्करश्च मतो मम इति । यथा च कश्चित् महता प्रयासेन महीपतेरर्थमासादयति, स्खलने च यथोचितं दण्ड्यते । अपरस्त्वन्तरङ्गसेवाक्षमः क्षोदीयसैवायासेन तावन्तं तदधिकं चार्थमासादयति, क्षुद्रेषु स्खलितेषु सह्यते, महत्स्वप्यल्पदण्डो भवति । तत्राप्यन्तरङ्गसेवा मन्दभाग्यानां दुर्लभेति चेत्; अत्रापि तथैव । यथा उपायभक्तिष्वेव तत्तच्छाखाभेदेन वर्णाश्रमभेदेन चाङ्गभूतानां कर्मणां गुरुलघुतारतम्येऽपि फलमविशिष्टम्; तथेहापि। कथं तर्हि * अतस्त्वितरज्ज्यायो लिङ्गाच्च इति सूत्रे * भूयोधर्मकाल्पधर्मकयोरतुल्यकार्यत्वात् इति **भाष्यम्?** इत्थम्; एकाधिकारिगोचरमुख्यगौणविषयं हि तत् । अन्यथा अधिकधर्मकाश्रमान्तरसूत्रान्तरादिष्वपि फलवैषम्यप्रसङ्गेन तदनुप्रवेशस्य ज्यायस्त्वप्रसङ्गात्। उपायभक्तौ नित्यनैमित्तिककर्मणां फलाभिसन्धिरहितकाम्यकर्मणां च अङ्गत्वेनानुष्ठानम्, न पुनः स्वातन्त्र्येण। निषिद्धवर्जनं द्वयोरपि भक्त्योः समम् । साध्यभक्तौ तु काम्यानां स्वरूपतोऽपि त्यागः ; न तु नित्यानाम् । अङ्गिनः प्रहाणात् तेषामपि तदङ्गानां परित्याग एवेति चेन्न; स्वतन्त्राधिकारानपायात् । तदेतदखिलम् * उपायापायसंत्यागी मध्यमां वृत्तिमास्थितः इत्यादिभिर्विशदमवगन्तव्यम् ॥

यत्तु—केचित् परित्यक्तसकलवर्णाश्रमधर्माः **संवर्तभरतविदुरादयो** ब्रह्मविदः संचरन्तीति यथेष्टकरणकौतुकिनां प्रलपितम्; तदसत्। तत्तत्प्रकरणेष्वेव जडवदाचरणज्ञानाभिसन्ध्यादिमात्रप्रतिपादनपरत्वनिर्णयात्, * बाल्येन तिष्ठासेत्, *जडवल्लोकमाचरेत्, *सतां मार्गमदूषयन् इत्यादीनां पर्यालोचनात् । बाल्यं च शक्तिविद्याभिजनाद्युत्कर्षाणां सतामनाविष्करणमेव; न तु कामचारवादभक्षत्वादि । तथा च सूत्राणि—* अनाविष्कुर्वन्नन्वयात्, *सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्, * शब्दश्चातोऽकामकारे इत्यादीनि । अन्यथा * स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते, *नाविरतो दुश्चरितात्, *वर्णाश्रमाचारवता इत्यादिश्रुतिस्मृतिशतप्रकोपप्रसङ्गः । कथं तर्हि *उत्तरपूर्वाघयोरश्लेषविनाशौ वाच्यौ? इत्थम्; समधिगतविद्यानां भुक्तफलकृतप्रायश्चित्तप्रारब्धकर्मव्यतिरिक्तं प्राचीनं कर्म उपायप्रभावादेव अग्निप्रोते-

षीकतूलवत् प्रदूयते । उत्तरं चाबुद्धिपूर्वकं पुष्करपलाश आप इव न श्लिष्यति । पुण्येऽपि विद्यानुकूलव्यतिरिक्तांशस्य सुखहेतुत्वेऽपि मोक्षविरोधित्वाविशेषात् अनिष्टफलतया पापशब्दाभिलप्यस्य अश्लेषविनाशावेव । * नाभुक्तं क्षीयते कर्म इत्यादिकं तु विद्याभिन्नविषयम् । प्रारब्धं तु भोगेनैव क्षपणीयम् । सूत्रं च * भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते इति । प्रारब्धकर्मणां च न तद्देहपातावधिकत्वनियमः ; कर्मणां विचित्रफलत्वात् । एतद्देहावसान एवेति न्यस्तभरस्य तु तस्य तद्देहपातावधिकत्वमेव ; * यावन्न विमोक्ष्येऽथ संपत्स्ये इत्यस्यापि प्रारब्धतत्तत्कर्मफलपर्यवसानविषयत्वात् । *अस्माच्छरीरात्समुत्थाय इत्यादेरप्यन्तिमशरीरविषयत्वात् । अत एव *यावदधिकारमवस्थितिराधिकारिकाणाम् इति सूत्रम् । एतेन अन्तिमशरीरनिवृत्तौ देशकालनियमाभावोऽपि सिद्धः । सूत्राणि *निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च, *अतश्चायनेऽपि दक्षिणे इत्यादीनि । एवं बुद्धिपूर्वमुत्तरमपि भोगेन प्रायश्चित्तेन वा क्षपणीयम् । न चैष प्रायशो विद्याननुकूलं पुण्यं पापं च बुद्धिपूर्वकं करोति; फलाभिसन्धियुक्तपुण्यस्य च विद्याविरोधित्वात्, फलान्तरेषु च विरक्तत्वात्, पापे च ईश्वराज्ञातिलङ्घनभयात् । यदि च कदाचिद्बुद्धिपूर्वकं करोति, तदा भीतः स्वयमेव तत्तदुचितं प्रायश्चित्तं करोति । अथ प्रमादात्तदपि न करोति ; तदाऽपि प्रारब्धकर्मपर्यवसानात्प्रागेव तत्तत्कर्म यथाकथञ्चित् फलति, न तु स्वयमेव जन्मादिप्रयोजकं भवति । अथ च जन्मादिहेतुरेव कर्मविशेषः शापादिर्वोपनिपतितः; तदा तेन तत्प्रसज्यत एव । तथाऽपि निष्पन्नस्योपायस्य न शैथिल्यम् । स तु प्रारब्धकर्मण इवैतस्यापि पर्यवसाने संसारं निवर्तयति । नच पुनरुत्तरोत्तरकर्मकरणात्संसाराविच्छेद इति वाच्यम्; शास्त्रविरोधात्, निष्पन्नस्योपासनस्य निष्फलत्वप्रसङ्गात् । सूत्राभिप्रेतं चैतत्—*एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः इति । इदं च सूत्रं विद्याङ्गकर्मविषयमपि विद्यायां तुल्यन्यायतयाऽनुसन्धेयम् ॥

नन्वेवं समस्तकर्मप्रलये साधुपापकृत्ययोर्हानं सुहृद्द्विषदुपायनं च कथं घटते? तथा हि; न तावत् पूर्वकृतयोः; तत्र केषांचित् कर्मणां दत्तफलत्वात् केषांचित् प्रायश्चित्तविद्याभ्यां विनष्टत्वात्, फलवत् तयोरपि कर्मस्वरूपनिवर्तकत्वात्। केषांचित् प्रारब्धफलानां भोगेनैव क्षपितत्वात्, एवमुत्तरकृतानामबुद्धिपूर्वकाणां चाश्लिष्टत्वात्, विद्यानुकूलानां च विद्ययैव फलभूतया निवृत्तत्वात्, तत्र च साधुकृत्यांशाभावात् । न च सुहृदादिकृतस्यैव कर्मणोऽनेन हानादिकमुपपद्यते; स्वकीयत्वाभावात्, दायसमोपायननिर्देशानुपपत्तेः । उपायनवाचोयुक्तिस्तत्सौहार्दशात्रवाभ्यां जनितत्वादौपचारिकीति चेन्न; * हानौ तूपायनशब्दशेषत्वात् इत्यादिसूत्रभाष्यादिविरोधादचिन्तनीयत्वप्रसङ्गाच्च प्रागेव सौहार्दादिकृतस्य दायसमकालप्राप्त्यभिधानविरोधाच्चेति । अत्रोच्यते ; दत्तफलम्, अदत्तफलं चेति पूर्वाघं द्विविधम् । अदत्तफलमपि प्रायश्चित्तविनष्टम्, अविनष्टं चेति । अविनष्टमपि प्रारब्धफलम्, अप्रारब्धफलं चेति । तत्रान्तिमं विद्यया विनाश्यम् । एवमुत्तरमपि विद्यानुकूलम्, अननुकूलं चेति द्विविधम् । अननुकूलमपि बुद्धिपूर्वम् अबुद्धिपूर्वं चेति । तत्र अबुद्धिपूर्वस्य विद्याबलादश्लेषः । एवं ययोः कर्मराश्योः प्रबलकर्मान्तरप्रतिरोधाददत्तफलयोरश्लेषविनाशौ तयोर्हानं सुहृदाद्युपायनं चोच्यते । तथा च * सुहृदः साधुकृत्याम् इत्यस्य विषयविभागपरे * अतोऽन्याऽपि ह्येकेषामुभयोः इति सूत्रे भाष्यम्—* विद्यया अश्लेषविनाशश्रुतिश्च तद्विषया इति । अश्लेषविनाशौ च कर्मशक्तिप्रतिबन्धतन्नाशावेव । सा च शक्तिर्भगवत्कोपप्रीतिविशेषात्मिका । तादृशौ च प्रीतिकोपौ सुहृद्द्विषद्गोचरौ भवत इति तावतैव उपायनवाचोयुक्तिः । पाते तु इति सूत्रांशे * शरीरपातादूर्ध्वं तु विद्यानुगुणदृष्टफलानि सुकृतानि नश्यन्तीत्यर्थः इति भाष्यम् । विद्यानुगुणानामदत्तफलानां कर्मणां शरीरपातादूर्ध्वं विनाश उपायनं च । इतरेषां तु विद्याधिगमदशायामेवाश्लेषविनाशौ, उत्क्रमणदशायां च हानमुपायनं

चेति विभाग इति । न्यासविद्या तु प्रारब्धमपि निश्शेषं विनाशयितुं शक्ता, तथाऽपि रागविषयमंशं तदनुबन्धि दुःखं च स्थापयति । निश्शेषवैराग्ये तु निश्शेषं निवर्तयति । अत एवार्तदृप्तभेदः । रागविषयश्चांशो दृप्ते नैतावदिति परिच्छेत्तुं शक्यः ; विचित्रत्वात्पुंसामभिप्रायपद्धतेः । अस्यां च विद्यायामन्तिमप्रत्ययापेक्षाऽपि न विद्यते ॥

इयं केवललक्ष्मीशोपायत्वप्रत्ययात्मिका । स्वहेतुत्वधियं रुन्धे किं पुनः सहकारिणाम् ॥
प्रारब्धकर्मावधिको मोक्ष इत्थमुपासितुः । दृप्तस्य देहावधिक आर्तस्यार्त्यवधिर्मतः ॥

उत्क्रान्तिः ॥ उच्चिक्रमिषतः सर्वस्य पूर्वं वागिन्द्रियं तदनु च शेषाणि नवेन्द्रियाणि मनसा सहाविभागं गच्छन्ति । तच्च सर्वेन्द्रियसंयुक्तं मनः प्राणेन । स चैकादशेन्द्रियसंयुक्तो जीवेन । स चेन्द्रियप्राणसंयुक्तः पञ्चभूतैः । तानि चेन्द्रियप्राणजीवसंयुक्तानि परमात्मना । एतावच्च विद्वदविदुषोः साधारणम् । अविदुषस्तु विशेषः प्रागेवोक्तः । विद्वांस्तु सर्वोऽपि मूर्धन्यया ब्रह्मनाड्या सुखेन शरीरात् निष्क्रामन् अर्चिरहस्सितपक्षोदगयनाब्दमरुदर्केन्दुवैद्युतवरुणेन्द्रप्रजापतिसंज्ञैरातिवाहिकैः पुरुषैः क्रमाद्यथास्वं देशमतिवाह्यमानो वैद्युतेनामानवनाम्ना तेनैव क्रमात् वरुणादिसमीपं नीतस्तेन ब्रह्मसमीपमुपनीयते । एषैवार्चिरादिगतिः कर्मणामन्यसंक्रान्तिश्च—

* संभूतिं च विनाशं च यस्तद्वेदोभयं सह । विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते ॥

इति संभूतिविनाशशब्दाभ्यामुच्यते । कर्मणां विनाशेन हि संसारतरणम् । अर्चिरादिसंभूत्या च ब्रह्मप्राप्तिः । * संभूतिमुपासते इत्यत्रोपासनं चिन्तनमात्रमेव । संभूतिशब्दश्च प्राप्तौ बहुशः प्रयुक्तः, * तेऽर्चिषमभिसंभवन्ति, *एतमितः प्रेत्याभिसंभवितास्मि, *ब्रह्मलोकमभिसंभवानि इत्यादिषु । **नारायणार्यै**स्तु संभूतिविनाशशब्दौ फलद्वारा लक्षणया विद्याकर्मविषयावुक्तौ * विदुषो विद्यासाध्यस्यापवर्गस्य सम्यगभिवृद्धिरूपत्वात् इत्यादिना । एवं च * विद्यां चाविद्यां च यस्तद्वेदोभयं सह इत्यादिश्रुत्यैकार्थ्यं स्यात् । उत्क्रम्य गच्छतश्चास्य सर्वकर्मक्षयेऽपि च विद्यामाहात्म्यादेव सूक्ष्मशरीरशब्दाभिलप्यं किंचित् त्रिगुणद्रव्यमुपष्टम्भकमनुवर्तते । उक्तं च **सारे** * शरीरादुत्क्रान्तस्यापि सूक्ष्मशरीरमनुवर्तते इत्यादि । अत एवच प्राथमिकसाक्षात्कारः प्रत्यूषकल्प इति गतिसाफल्यम् । निश्शेषाविद्याविनाशश्च विशिष्टदेशगतिसापेक्ष इति गतिशास्त्रादेवाध्यवसीयते । तथा च * परं जैमिनिर्मुख्यत्वात् इति सूत्रे **भाष्यम्**—*यथा हि विद्योत्पत्तेर्वर्णाश्रमकर्मशौचाचारदेशकालाद्यपेक्षा * तमेतं वेदानुवचनेन इत्यादिशास्त्रादवगम्यते, तथा निश्शेषाविद्यानिवर्तनरूपविद्यानिष्पत्तिरपि विशिष्टदेशगतिसापेक्षेति गतिशास्त्रादवगम्यते—इति । उत्क्रमणप्रभृति चोत्तरोत्तरमतिशयितज्ञानानन्दशाली जायते । प्राणेन्द्रियादिमत्त्वाच्च मध्ये भोगविहारसंवादाद्युपपत्तिः । अमानवकरस्पर्शादारभ्य चासौ मुक्तः । ततः पूर्वः सर्वोऽप्युपायव्यापारः ॥

मोक्षः ॥ फलं परमपदपर्यङ्कारोहणादिकम् । तथा चायमीश्वर इवापहतपाप्मत्वसत्यसङ्कल्पत्वादिविशिष्टो भवति । तच्चास्य समस्तप्रतिबन्धकात्यन्तिकलयादाविर्भूतं स्वाभाविकं रूपम् । ततःपरमस्य कदाचिदपि न संसारात्मिका पुनरावृत्तिः । प्रथमं तावदकालकाल्यत्वाजरत्वाक्षरत्वादिवचनेन देशलयाभावात्, * स यदि पितृलोककामो भवति इत्यादिना अनायासस्वसङ्कल्पमात्रसृष्टपरमपुरुषभोगनिर्मग्नाप्राकृतभोगरूपत्वेन संसारत्वाभावात् । सृष्ट्यादिजगद्व्यापारमोक्षप्रदत्वमुमुक्षूपास्यत्वशेषित्वादिरूपभगवदसाधारणधर्मव्यतिरिक्तज्ञानानन्दसत्यसङ्कल्पत्वादिगुणात्यन्तसाम्यातिरेकेण सायुज्यं तु गगनारविन्दमकरन्दवार्तामनुसरति । न तावत्सायुज्यं ब्रह्मणि लयः ; अग्निवाय्वादित्यादिसायुज्येऽपि लयप्रसङ्गात् । नापि साधारणशरीरवत्त्वम् ; जीवशरीरापेक्षया संसारेऽपि समत्वात् । ईश्वरशरीरापेक्षया मोक्षेऽप्ययोगात् । एवमन्यदपि ।

किं तर्हीदम्? समानात्मगुणयोगित्वम्। तत्रैव चास्य स्वारस्यम्। सयुग्भावो हि सायुज्यम्। सयुक्छब्दश्च भिन्नयोरेकत्र साधारणयोगं दर्शयति। *परमं साम्यमुपैति, *मम साधर्म्यमागताः इत्यादिबलाच्च *ब्रह्मैव भवतीत्यादीनामपि साम्य एव तात्पर्यमिति प्रागेवोपपादितम्। अग्न्यादिप्राप्तिषु सालोक्यादितारतम्यमस्ति। ब्रह्मप्राप्तौ तु सायुज्यरूपायां पूर्वं त्रयमप्यविनाभूतम्।

यत्तु— *मोक्षं सालोक्यसारूप्यं प्रार्थये न कदाचन। इच्छाम्यहं महाबाहो सायुज्यं तव सुव्रत॥

लोकेषु विष्णोर्निवसन्ति केचित्समीपमृच्छन्ति च केचिदन्ये।
अन्ये तु रूपं सदृशं भजन्ते सायुज्यमन्ये स तु मोक्ष उक्तः॥

इत्यादि; तदपि श्रीविष्णुलोकादिविचित्रावान्तरपदप्राप्त्यपेक्षयेति न दोषः॥

न च सेवा दुःखहेतुः सेवात्वादिति वाच्यम्; अनीश्वरसेवापक्षीकारे सिद्धसाधनात्। ईश्वरसेवापक्षीकारे बाधात्। सुखरूपेषु वदान्यसेवादिषु चानैकान्त्यात्। एतद्व्यतिरिक्तसेवा दुःखहेतुः सेवात्वात् एतत्सेवावदित्यत्रापि व्यतिरेकोपलक्षितव्यक्तिद्वयेंऽशतःसिद्धसाधनबाधयोरन्यतरानतिपातात्। एवं सेवामात्रपक्षीकारे दृष्टान्ताभावश्चाधिकः। केवलव्यतिरेकित्वविवक्षयां दुःखहेत्वन्तरसद्भावेन सपक्षवतस्तत्रावर्तमानस्य सेवात्वस्यासाधारणत्वप्रसङ्गात्। केवलव्यतिरेकी च निरसिष्यते। तर्कोऽपि निराश्रयो न साधकः। केवला व्याप्तिरप्रयोजिका। व्यभिचारश्चोक्तः। दुःखहेतुत्वे च पापावष्टब्धत्वमुपाधिः। निवृत्तस्वातन्त्र्याभिमानस्य दासभूतस्य ईश्वरसेवायाः स्वरूपानुरूपत्वेन सुखरूपत्वमेवोपपन्नम्। तदेवं विषयकारणस्वरूपविशेषविशिष्टज्ञानविशेषसाध्यो मोक्षः, स च निर्दुःखनिरतिशयान्दरूपभगवदनुभवात्मक इति सिद्धम्। अन्येषां तु देहविच्छेदमात्रसहस्रयुवतिसंभोगज्ञानालीकलयवासनात्यन्तविरामविषयोपरागवैधुर्यनित्योर्ध्वगमनार्हच्छरीरानुप्रवेशविशिष्टनिरावरणत्ववियातानुभवस्वातन्त्र्यशिवसारूप्यशिवसाम्यापत्तिचिच्छक्तिपरिशेषाविद्यानिवृत्त्युपाधिनिवृत्तिसकलवैशेषिकगुणोच्छेदकेवलात्मानन्दानुभवप्रभृतयो निःश्रेयसविकल्पा देहातिरिक्तात्मसद्भावबाह्यार्थपारमार्थिकत्वतत्तदागमाप्रामाण्यब्रह्मनिर्विकारत्वनिर्दोषत्वज्ञानानन्दादिनित्यत्वप्रतिपादनादिभिर्दूषणीयाः। यदिह दृषदविशेषनिःश्रेयसवादिनां दृषन्मतीनामिदमनुमानम्, आत्मा कदाचिदखिलविशेषगुणशून्यः अनित्यवैशेषिकगुणाश्रयत्वात् उत्पद्यमानघटप्रलयाकाशादिवदिति; तत्रागमबाधस्तावद्व्यक्तः। ज्ञानसंस्कारपक्षे हेतोरन्यतरासिद्धिश्च। ज्ञानादीनां भवदभिमतगुणत्वानभ्युपगमात् सिद्धसाधनं स्वरूपासिद्धिश्च। प्रलयाकाशादेरनभ्युपगमादुत्पद्यमानघटादेरपि सगुणत्वाभ्युपगमादुदाहरणस्याश्रयहीनत्वसाध्यविकलत्वे। प्रलयकालगतप्रकृत्यादेरपि सत्त्वादिगुणयोगात् परैरनभ्युपगमाच्च न तद्दृष्टान्तोपन्यासः। एवमस्मदीये ज्ञानसंस्कारपक्षे मुक्तावस्थायां ज्ञानस्याखिलविशेषगुणशून्यत्वमस्तु वा, मा वा, तथाऽपि परानभ्युपगमात् नैष दृष्टान्तः। ज्ञानद्रव्यत्वतद्गतसंस्कारयोस्तैरनभ्युपगमादिति॥

कैवल्यम्॥ ननु स्वात्मानन्दानुसन्धानरूपकैवल्याख्योऽपि मोक्षो भगवद्यामुनमुनिभिरुक्तः;

*ऐश्वर्याक्षरयाथात्म्यभगवच्चरणार्थिनाम्। वेद्योपादेयभावानामष्टमे भेद उच्यते॥

इति, *संसृत्यक्षरवैष्णवाध्वसु नृणां संभाव्यते कर्हिचित् इति च। अनुसृतश्चायमर्थो **भाष्यकारै**रपि। तथा हि— *चतुर्विधा भजन्ते माम् इत्यादौ *जिज्ञासुः प्रकृतिवियुक्तात्मस्वरूपावाप्तीच्छुः इत्याद्युक्तेः। **अष्टमाध्यायार**म्भेऽपि सप्तमार्थानुक्रमणे *सुकृततारतम्येन च प्रतिपत्तिवैशिष्ट्यादैश्वर्याक्षरयाथात्म्यभगवत्प्राप्तीच्छयोपासकभेदम् इत्याद्युक्तेश्च।

तथा * कैवल्यार्थिनां स्मरणप्रकारमाह—इत्युक्त्वा * यदक्षरं वेद इति श्लोकमवतार्य * सर्वद्वाराणि इत्यादेर्व्याख्याने * ओमित्येकाक्षरं ब्रह्म मद्वाचकं व्याहरन् वाच्यं मामनुस्मरन्नात्मनः प्राणं मूर्धन्याधाय देहं त्यजन् यः प्रयाति स याति परमां गतिम्—प्रकृतिवियुक्तं मत्समानाकारमपुनरावृत्तिमात्मानं प्राप्नोतीत्यर्थः इति चोक्तेः । अनन्तरं च * एवमैश्वर्यार्थिनः कैवल्यार्थिनश्च स्वप्राप्त्यनुगुणं भगवदुपासनप्रकार उक्तः । अथ ज्ञानिनो भगवदुपासनप्रकारं प्राप्तिप्रकारं चाह इत्युक्त्वा * अनन्यचेताः इत्येतद्व्याख्यातम्—* अतः परमध्यायशेषेण ज्ञानिनः कैवल्यार्थिनश्चापुनरावृत्तिम्, ऐश्वर्यार्थिनः पुनरावृत्तिं चाह इत्युक्त्वा * मामुपेत्य इत्यादिकं * प्रभवत्यहरागमे इत्येतदन्तं व्याख्याय * कैवल्यं प्राप्तानामपि पुनरावृत्तिर्न विद्यते इत्याह इत्युक्त्वा, * परस्तस्मात्तु इत्यादिकमपि * तद्धाम परमं मम इत्येतदन्तं व्याख्यातम् । अनन्तरं च * ज्ञानिनः प्राप्यं तु तस्मादत्यन्तविभक्तमित्याह इत्युक्त्वा, * पुरुषः स परः इतिश्लोको व्याख्यातः । अनन्तरं च * आत्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणीमर्चिरादिकां गतिमाह इत्युक्तम् । अथ तत्र भाष्यग्रन्थ एवेह लिख्यते । तथा हि । * द्वयोरप्यर्चिरादिका गतिः श्रुता श्रुतौ । सा चापुनरावृत्तिलक्षणा । यथा पञ्चाग्निविद्यायां *तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहः इत्यादौ । अर्चिरादिना गतस्य परब्रह्मप्राप्तिरपुनरावृत्तिश्चाम्नाता * स एनान् ब्रह्म गमयति एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते इति । न च प्रजापतिवाक्यादौ श्रुतपरविद्याङ्गभूतात्मप्राप्तिविषयेयं * तद्य इत्थं विदुः इति गतिश्रुतिः ; * ये चेमेऽरण्ये श्रद्धा तप-इत्युपासते इति परविद्यायाः पृथक्छ्रुतिवैयर्थ्यात् । पञ्चाग्निविद्यायां च * इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति इति * रमणीयचरणाः कपूयचरणाः इति पुण्यपापहेतुको मनुष्यादिभावोऽपामेव भूतान्तरसंसृष्टानाम्, आत्मनस्तु तत्परिष्वङ्गमात्रमिति चिदचितोर्विवेकमभिधाय *तद्य इत्थं विदुः....तेऽर्चिषमभिसंभवन्ति, * इमं मानवमावर्तं नावर्तन्ते इति विविक्ते चिदचिद्वस्तुनी त्याज्यतया प्राप्यतया च य इत्थं विदुस्तेऽर्चिरादिना गच्छन्ति नच पुनरावर्तन्ते इत्युक्तमिति गम्यते । आत्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च * स एनान्ब्रह्म गमयति इति ब्रह्मप्राप्तिवचनादचिद्वियुक्तमात्मवस्तु ब्रह्मात्मकतया ब्रह्मशेषतैकरसमित्यनुसन्धेयम् । तत्क्रतुन्यायाच्च । परशेषतैकरसत्वं च * य आत्मनि तिष्ठन्यस्यात्मा शरीरमित्यादिश्रुतिसिद्धम् इति । अतोऽक्षरनिष्ठस्याप्यर्चिरादिगतिः सिद्धा । यत्तु * यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति इत्यस्याक्षरविषयस्य व्याख्याने * सर्वेषु वियदादिभूतेषु सकारणेषु सकार्येषु विनश्यत्सु तत्रतत्र स्थितोऽपि न विनश्यतीत्युक्तम्; तदप्यचित्संसृष्टावस्थाविषयम् । अन्यथा पूर्वोक्तगतिविरोधात् । द्वादशाध्याये च * ये त्वक्षरम् इत्यत्र * तेऽपि मां प्राप्नुवन्त्येव—मत्समानाकारमसंसारिणमात्मानं प्राप्नुवन्त्येवेत्यर्थः इत्युक्तम् । अतः साम्प्रदायिक एवायं कैवल्याख्यो मोक्ष इति केचित् ॥

अस्य मोक्षत्वे श्रीभाष्यकारानभिमतिः ॥ अत्रोच्यते । न तावदयं मोक्षो भाष्यकाराभिमतः ; **शारीरकभाष्ये** व्यक्तमुक्तत्वात् । तथा हि * वाक्यान्वयात् इत्यधिकरणे तावत् * अमृतत्वस्य परमपुरुषवेदनैकोपायतया प्रतिपादनात् इत्युक्त्वा * परमपुरुषविभूतिभूतस्य प्राप्तुरात्मनः स्वरूपयाथात्म्यवेदनमपवर्गसाधनभूतपरमपुरुषवेदनोपयोगितयाऽऽवश्यकम् ; न स्वत एवोपायत्वेन इत्युक्तम् । तथा * येयं प्रेते विचिकित्सा मनुष्ये इत्यादिव्याख्याने तत्तद्वाद्यभिमतमोक्षविकल्पानुपन्यस्य * त्र्यन्तनिष्णातास्तु इत्यादिना जीवपरयोः स्वरूपस्वभावानप्यभिधाय * जीवस्यानादिकर्मरूपाविद्यातिरोहितस्य अविद्योच्छेदपूर्वकस्वाभाविकपरमात्मानुभवमेव मोक्षमाचक्षते इत्युक्तम् । * सर्वकर्मविनिर्मुक्तात्मस्वरूपा-

वाप्तिर्हि भगवत्प्राप्तिगर्भा । *त इमे सत्याःकामा अनृतापिधानाः इति भगवतो गुणगणस्य तिरोधायकत्वेनानृतशब्देन स्वकर्मणः प्रतिपादनात् इति **वेदार्थसंग्रहे**ऽभिहितम् । एवं **वरदविष्णुमिश्रै**रपि *नन्वेवं निश्शेषकर्मक्षयाभावात्कैवल्यप्राप्तौ न मुक्तः स्यात् इत्याशङ्क्योक्तम्—*सत्यम ; अमुक्त एव सः । मोक्षस्य परमात्मानन्दानुभवरूपत्वात्, तस्य ब्रह्मानन्दानुभवाभावात् स्वानन्दमात्रानुभवात् । स्वानन्दमात्रानुभवश्च *योगिनाममृतं स्थानं स्वात्मसन्तोषिणश्च ये इति भगवत्**पराशर**वचनात् । मुक्तिव्यतिरिक्तमनपायि योगसाध्यमैश्वर्यम् इति । **भट्टपराशरपादैरध्यात्मखण्डद्वयव्याख्यायाम्** ऐश्वर्याक्षरयोः अपवर्गव्यतिरिक्ततया तुल्यत्वं दर्शितम् । *अन्येष्वैश्वर्याक्षरभोगेषु अनपेक्षया जुगुप्सया साधिष्ठानम् इत्यादिना । यदा चासौ मोक्षः ; तदा स्वाभाविकरूपप्राप्तिमन्तरेण न पर्यवसानम् । यदि पर्यवसानम् ; तदा नित्यसंसारविशेष एवायमिति मन्तव्यम् । अशरीरस्य कथं संसारित्वमिति चेत् ; कथं वा प्रलयदशापन्नस्य ? तदानीमप्युत्तरशरीराद्यारम्भयोग्यसूक्ष्माचित्संसर्गादिति चेत्, अस्याप्यचित्संसर्गोऽभ्युपगन्तव्य एव । अतः शरीरारम्भो भविष्यति न वेत्येष एव विशेषः । किमस्याचित्संसर्गे प्रमाणमिति चेत् ; स्वपरयाथात्म्यानुभवाभावः । मायायवनिकान्तर्हितो हि जीवो यथावस्थितं स्वरूपं न जानाति । किं कारणमिति चेत् ; कर्मविशेषः । उक्तं च **वेदार्थसंग्रहे**—*सर्वकर्मविनिर्मुक्तात्मस्वरूपावाप्तिर्हि भगवत्प्राप्तिगर्भा । *त इमे सत्याः कामा अनृतापिधानाः इति भगवतो गुणगणस्य तिरोधायकत्वेनानृतशब्देन स्वकर्मणः प्रतिपादनादिति । यद्यस्य निश्शेषाविद्याविलयेऽपि परमात्मयाथात्म्यानुभवो न स्यात्, अन्येषामपि तथा स्यात् ; अविशेषात् । तावदेवास्य स्वाभाविकरूपं स्यात् । अचित्संसर्गेऽपि कथमसौ पुनर्न संसरतीति चेत् ; कैवल्यहेतुकर्मजनितभगवत्संकल्पस्य तथाविधत्वादिति भाव्यम् । ननु तापत्रयाभिहतोऽयमीश्वरज्ञानादेव विशुद्धिं गतः ; तत्कथं विशदस्वात्मानुभवदशायामीश्वरं विस्मरेदिति चेत् ; सम्यगुक्तम् । तथाऽपि कैवल्यसद्भावे निर्बन्धश्चेत् पूर्वोक्त एव हेतुः । उक्तं च **सङ्गतिमालायां श्रीविष्णुचित्तैः**—*ननु ब्रह्मप्राप्तीच्छयोपक्रान्तस्योपासनस्य कथं [कैवल्य] केवलप्रापकत्वम् ? उच्यते ; यथा स्वर्गकामस्यैव यागे प्रक्रान्तस्य यथावदननुष्ठाने ब्रह्मराक्षसत्वादि भवति इति । ननु कस्यैवंविधे स्वाभाविकभगवदनुभवयोग्यतागन्धविधुरतया दग्धबीजपर्याये स्वात्मन्यभिलाषः स्यादिति चेत् ; हन्त ! अनेवंविधेष्वपि स्वर्गपशुपुत्रभिक्षोदनादिष्वभिलाषिणो दृश्यन्ते, किं पुनरतिशयानन्दशालिन्येवंविधे । प्रसिद्धं च प्रियास्पदत्वं स्वात्मनः । आगमश्च *आश्चर्यवत्पश्यति कश्चिदेनम् इत्यादि । सुप्तोत्थितप्रत्यभिज्ञानं सुखमहमस्वाप्समित्येवंरूपं प्रागेवोक्तम् । प्रपञ्चितं च **भाष्यादिषु । श्रीविष्णुचित्तैश्चोक्तम्**—

*स्वापे सुखत्वाभिज्ञानात् तद्विच्छेदे च रोषतः । तदर्थमन्यत्यागाच्च श्रुतिस्मृतिशतैरपि ॥ इति ।

कथमिह मोक्षव्यपदेश इत्ति चेत् ; दुःखहेतुभूतदेहेन्द्रियात्यन्तविलयात् । केन मार्गेण केवलो गच्छति ? कुत्र तिष्ठति ? इति चेत् ; येनकेनापि, यत्रकुत्रापि । न तावदर्चिरादिगतिः प्रकृतेः परस्तात् वासश्चास्य युज्यते । परमात्मोपासनप्रकरणेष्वेव तयोः श्रवणात् । *तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते इति विभागस्यापि परमात्मात्मकस्वात्मानुसन्धानस्वात्मशरीरकपरमात्मानुसन्धानभेदमूलत्वात् । यदि चास्यार्चिरादिमार्गेण गतिस्स्यात्, तदा विशिष्टदेशप्राप्त्या निश्शेषाविद्यानिवृत्तिर्ब्रह्मप्राप्तिश्च स्यादेव ; *स एनान् ब्रह्म गमयति इति श्रवणात् । सूत्रं च *दर्शनाच्च इति । एवं च सति ज्ञानसङ्कोचहेतुभूताविद्यात्यन्तविलयात् सर्वज्ञत्वादिप्रसङ्गो दुष्परिहरः । भगवद्**यामुनमुनि**भिरपि *संसृत्यक्षरवैष्णवाध्वसु इति वैष्णवाध्वा पृथगुपदिष्टः । अक्षिपुरुषस्य परमात्मत्वनिर्णयायोक्ते *श्रुतोपनिष-

त्कगत्यभिधानाच्च इति सूत्रे **भाष्यं च** *अधिगतपरमपुरुषयाथात्म्यस्यानुसन्धेयतया श्रुत्यन्तरप्रतिपाद्यमानार्चिरादिका गतिर्या तामपुनरावृत्तिलक्षणपरमपुरुषप्राप्तिकरीमुपकोसलायाक्षिपुरुषं श्रुतवते इत्यादि। अतोऽपि केवलात्मानुसन्धायिनोऽर्चिरादिगतिर्नास्ति। अन्यथा तया परमात्मनिर्णयायोगात्। *अप्रतीकालम्बनान्नयतीति बादरायणः इति सूत्रे चात्र वक्तव्यं सर्वं प्रपञ्चितं **भाष्ये**। पञ्चाग्निविद्यानिष्ठस्यापि प्रकृतिविनिर्मुक्तब्रह्मात्मकस्वात्मानुसन्धायित्वं तत्रैव तत्क्रतुन्यायादिना निर्णीतम्। भूमविद्यागतप्राणशब्दवाच्यकेवलजीवोपासकस्य च अर्चिरादिगतिः कण्ठोक्त्या प्रतिषिद्धा; *नामादिप्राणपर्यन्तप्रतीकालम्बनानां तूभयविधश्रुतिसिद्धोपासनाभावात् तत्क्रतुन्यायाच्चार्चिरादिगतिर्ब्रह्मप्राप्तिश्च न विद्यते--इत्यादिना। नामादिप्राणपर्यन्तोपासकानां *विशेषं च दर्शयति इति सूत्रेण फलान्तरं च प्रदर्शितम्। तदधिकरणोपसंहारे चोक्तम् *तस्मादचिन्मिश्रं केवलं वा चिद्वस्तु ब्रह्मदृष्ट्या तद्वियोगेन च य उपासते; न तान् नयति। अपितु परं ब्रह्मोपासीनानात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनानातिवाहिको गणो नयतीति सिद्धम् इति। **सारे** चोक्तम् *पञ्चाग्निविदस्तु प्रकृतिवियुक्तात्मस्वरूपं *य आत्मनि तिष्ठन्नित्यादिना ब्रह्मात्मकमुपासत इति ह्यप्रतीकालम्बनत्वम्। तत्क्रतुन्यायाविरोधश्च। उभयेऽपि परिपूर्णं ब्रह्मोपासते—सुखभेदेन स्वात्मशरीरं ब्रह्म केचन; ब्रह्मात्मकस्वात्मानमितरे इत्यादि। एवं **दीपे**ऽपि प्रपञ्चितं द्रष्टव्यम्। एवं स्थिते **श्रीमद्गीताभाष्य**वाक्यान्यपि तदनुरोधेन वर्णनीयानि। पञ्चाग्निविदोऽर्चिरादिगतिस्तावत् सर्वग्रन्थेषु अविगीता। तस्य च परमात्मात्मकस्वात्मानुसन्धातृत्वं सिद्धम्। तस्य किं कैवल्यमेव पुरुषार्थः? उत परमात्मानुभवोऽपि? इत्यत्र विशयः। तत्र च **शारीरकभाष्याद्य**नुसारे तस्य परमात्मानुभवः, **श्रीमद्गीताभाष्य**स्वारस्यानुसारे कैवल्यम्, इतीच्छन्ति। उभयाविरुद्धतया ग्रन्थनिर्वहणं तु श्रीमद्गीताभाष्यटीकायां **तात्पर्यचन्द्रिका**यामुक्तमस्माभिः।

अत्र किंचिदुच्यते। *यस्त्वयमात्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणीमर्चिरादिकां गतिमाह इत्यादिग्रन्थस्तु प्रस्तुतत्वमात्रेण कैवल्यनिष्ठपरमपुरुषनिष्ठविषय इति न मन्तव्यम्; किंतु परमात्मात्मकस्वात्मानुसन्धातृस्वात्मशरीरकपरमात्मानुसन्धातृभेदभिन्नब्रह्मविद्विषय एव। तथा सति आत्मयाथात्म्यविच्छब्दोऽप्यत्यन्तानुगुणः। एकग्रन्थशकलास्वारस्यं बहुग्रन्थस्वारस्याय ग्राह्यम्। न चात्र कश्चिद्भगव**द्यामुनमुनि**वचनविरोगधन्धोऽपीति। **श्रीमद्गीताभाष्ये**ऽपि पञ्चाग्निविद्यानिष्ठस्य ब्रह्मात्मकस्वात्मानुसन्धानम्, तत्क्रतुन्यायात् ब्रह्मप्राप्तिश्च स्फुटतरं प्रत्यपादि। केचित्तु ब्रह्मभूतस्वात्मा कैवल्यभोग्यः, ब्रह्मणस्तु स्वात्मविशेषणतया भानमात्रमस्तीत्याहुः। तर्हि न तत्कैवल्यं भवेत्। साधनतो गतितः प्रमाणतः प्रकारतश्च दुर्निरूपं च तदित्यात्मयाथात्म्यविदः।

कान्तां प्राप्य विचित्रकर्मरचितां पर्यायतो भूमिकां केनाप्यद्भुतनाटकेन कमपि श्रीमन्तमानन्दयन्।
कृत्वा शास्त्रमुखे मनः प्रतिमुखं गर्भावमर्शात्परं विद्यानिर्वहणेन लब्धविभवो ह्येष विद्योतते॥

॥ इति श्रीन्यायसिद्धाञ्जने जीवपरिच्छेदो द्वितीयः॥ २॥

———

अथ ईश्वरपरिच्छेदः ॥ ३ ॥

ईश्वरस्य लक्षणम् ॥ अथेश्वरश्चिन्त्यते । सर्वेश्वरत्वम्, व्यापकत्वे सति चेतनत्वम्, सर्वशेषित्वम्, सर्वकर्मसमाराध्यत्वम्, सर्वफलप्रदत्वम्, सर्वाधारत्वम्, सर्वकार्योत्पादकत्वम्, स्वज्ञानस्वेतरसमस्तद्रव्यशरीरकत्वम्, स्वतस्सत्यसङ्कल्पत्वादिकं चेश्वरलक्षणम् । यत्तु **जन्मादिसूत्रे** जन्मादित्रितयसमाहारो लक्षणमुक्तम्; तत्र एकैकस्य लक्षणत्वे संभवत्यपि त्रयाणां त्रयः कर्तार इति कुमतिशङ्काव्यावर्तनाय तदिति मन्तव्यम् । सत्यादिवाक्येऽपि अनन्तपदेनैव सर्वव्यवच्छेदसिद्धौ शङ्कितक्रमेण व्यवच्छेदात् पूर्वविशेषणद्वयम् । एवमन्यत्रापि भाव्यम् ॥

तस्यैव ब्रह्मत्वं न प्रधानादेः ॥ अद्वितीयसमाभ्यधिकदरिद्रत्वश्रवणादसावेकः[1]। स एव ब्रह्म । तस्यैव त्रिविधपरिच्छेदरहितस्य सर्वात्मकत्वेन निरतिशयबृहत्त्वबृंहणत्वश्रवणात् । *अग्निः सर्वा देवताः *आपो वा इदँ सर्वम् * ब्राह्मणो वै सर्वा देवताः * नकिरिन्द्र त्वदुत्तरः इत्यादेर्व्याघातकर्मविधिशेषत्वाभ्यामन्यपरत्वनिर्णयात् न तेषामानन्त्यब्रह्मत्वादिसिद्धिः । स एव सदसदव्याकृतव्याकृतब्रह्मात्माकाशप्राणशिवनारायणादिशब्दैः कारणप्रकरणगतैः सामान्यतो विशेषतश्च व्यपदिश्यते । न च वृश्चिकोत्पत्तौ गोमयवृश्चिकादिवत् जगदुत्पत्तौ देशकालभेदात् कारणानियमः किं न स्यादिति वाच्यम्; प्रमाणान्तरेण भेदासिद्धेः । शब्देन तु समानप्रकरणत्वप्रत्यभिज्ञानात् सर्वशाखाप्रत्ययन्यायसामान्यविशेषन्यायाभ्यामेकत्वादिकण्ठोक्त्याऽभिन्नार्थोपपत्तौ भेदकल्पनायोगात् । अतो न प्रधानादेर्ब्रह्मत्वम् । नापि ब्रह्मरुद्रादेः; तेषां सृज्यत्वसंहार्यत्वकर्मवश्यत्वादिश्रवणेन जीवत्वसिद्धेः ॥

कण्ठोक्तकर्मवश्यत्वकार्यत्वेषु न हेतुता । कार्यता लीलया युक्ता कारणस्य हतैनसः ॥

कारणादिप्रकरणेषु च तत्तद्वाचकशब्दानां शरीरिपर्यन्ततया निर्वचनान्तरेण वा आकाशप्राणादिशब्दवत् परमात्मन्येव पर्यवसानसिद्धेः । तदयं संग्रहः—

परविद्यासु जीवोक्तिर्निरुक्त्यादेः पराश्रया । तल्लिङ्गानन्यथासिद्धौ तद्विशिष्टावलम्बिनी ॥

स्वोपासनोपदेशस्वसर्वैश्वर्यप्रपञ्चनादेश्च प्रह्लादवामदेवादिवत् शास्त्रावगतस्वात्मशरीरकपरमात्मानुसन्धानमूलत्वात् तस्य च सर्वशरीरस्य यथाविधि चेतनाचेतनविशिष्टतयाऽप्युपास्यत्वोपपत्तेः । अथर्वशिरश्श्वेताश्वतरादीनां निर्वाहः **पुरुषनिर्णये** प्रपञ्चितः; **श्रीभाष्यकारैश्च वेदार्थसंग्रहभाष्यादिषु** । तदखिलानुसन्धायिभिर्वात्स्यवरदगुरुभिस्तत्त्वनिर्णयाख्ये प्रकरणे सर्वो निष्कर्षः संगृहीतः । **तत्त्वसारे** च—

*कस्त्वं तत्त्वविदस्मि वस्तु परमं किं तर्हि विष्णुः कथं तत्त्वेदंपरतैत्तिरीयकमुखत्रय्यन्तसंदर्शनात् ।
अन्यास्तर्हि गिरः कथं गुणवशादत्राह रुद्रः कथं तद्दृष्ट्या कथमुद्भवत्यवतरत्यन्यत्कथं नीयताम् ॥

इत्यादिभिः श्लोकैः संगृहीतः । एवं च नारायणस्यैव परमकारणत्वमुमुक्षूपास्यत्वसर्वान्तर्यामित्वादिसिद्धेस्त्रिमूर्तिसाम्यैक्योत्तीर्णव्यक्त्यन्तरपरत्वपक्षाश्चत्वारोऽपि निर्मूला वेदितव्याः ।

भगवतः सर्वत्र पूर्णत्वम् ॥ तिसृषु च मूर्तिषु परिपूर्ण एवेश्वरः । प्रजापतिपशुपतिमूर्त्योस्तु प्रमाणबलात् जीवव्यवहित इति विशेषः । एवमेव सर्वत्रापि पूर्ण एव । अन्यत्र विद्यमानस्यान्यत्र पूर्णत्वं न स्यादिति चेत्; किमिदं पूर्णत्वं निषिध्यते? किमत्रैव विद्यमानत्वम्? किमत्र पूर्णोपलब्धिविषयत्वम्? किं वाऽत्र पूर्णकार्यजननसामर्थ्यम्? किं

वाऽत्र समस्तगुणविशिष्टत्वम्? नाद्यः; तस्यास्माभिरनभ्युपगमात्। न द्वितीयः; तन्निषेधोऽपीह स्वरूपोपलब्धिनिषेधमात्रं वा? कृत्स्नभागोपलब्धिनिषेधो वा? अंशत्वानुपलब्धिनिषेधो वा? आद्ये त्वप्रयोजकत्वम्; अनुपलम्भस्य सामग्र्यभावप्रयुक्तत्वात्। तस्याश्चात्र सत्त्वे तदुपलम्भोपपत्तेः। द्वितीये सभागत्वसिद्ध्यसिद्ध्योरिष्टप्रसङ्गः। तृतीयेऽशत्वाभावादेवांशत्वानुपलब्धिर्युक्तेति न तन्निषेधः। बहुसंबन्धादेव तत्तत्संबन्धावच्छेदेनांशत्वं स्यादिति चेन्न; बहुगुणव्यक्तिप्रतियोग्यादिविशिष्टेषु द्रव्यजातिनिषेधादिषु तैस्तैस्तदनभ्युपगमात्। यथोपलम्भं तद्वदेव संयोगादिष्वपि। निरंशेष्वपि भावाभावसामानाधिकरण्यस्य युगपद्भाविनोऽपि व्यवस्थाप्यत्वात्। अन्यथा समस्तसंबन्धतत्त्वस्यैव लोपे तन्मूलभूतसमस्तकार्यकारणभावादिलोपात् शून्यताप्रसङ्गात्। न च तृतीयः; अवच्छिन्नदेशे सर्वोत्पत्तिनिषेधस्येष्टत्वात्। सर्वानुकूलशक्तिमतस्तत्रापि वृत्तौ विरोधाभावात्। यत्रयत्र यद्यत्कार्यं दृष्टम्, तत्रतत्र तदनुकूलत्वेन तच्छक्तेः स्वीकारे क्वचित्सर्वोत्पत्तिप्रसङ्गाभावात्। अन्यथा शक्तस्यापि सर्वदा कार्यकरणप्रसङ्गे तद्विपर्ययात् क्षणभङ्गावतारात्। तदभ्युपगमेन प्रत्यवस्थाने तद्भङ्गेन भङ्गात्। यदि च कालक्रमेण क्वचित् सर्वोत्पादकत्वप्रसङ्ग इष्टः; तदा सर्वदेशभाविकृत्स्नव्यक्तिविवक्षायां व्याघातः। भूतानामन्यत्र भवन्तीनां व्यक्तीनामत्र भवननैरपेक्ष्यात्। नष्टानां कदाचिदप्यत्र जन्मागमयोरयोगात्। स्वसजातीयमात्रविवक्षायामिष्टप्रसङ्गात्। विभूतिद्वयस्यापि अंशतः संभेदोऽवतारदशायां दृश्यते। नापि चतुर्थः; रूपरसगन्धादीनां स्वाश्रयव्यापिनां कृत्स्नप्रदेशव्याप्तित्वस्यावयविपरमाण्वादिषु तैस्तैरभ्युपगमात्। एतत्सर्वं *कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा इति परिचोद्य *श्रुतेस्तु इत्यादिभिः परिहरन् **सूत्रकार** एव प्रदर्शितवान्। अतो यथागमं सर्वत्र पूर्ण एव भगवान्॥

निर्गुणवादनिरासः॥ अत एव निर्गुणवादोऽपि निरस्तः। विरुद्धौ गुणविधिनिषेधौ कथमिति चेत्, विचारयामः। न तावदत्र समुच्चयो युक्तः; विरोधात्। अत एव नोभयत्यागः। न च विकल्पः; सिद्धे तदयोगात्। न चान्यतरत्यागः; किं त्याज्यमिति नियामकाभावात्। अपच्छेदनयात् पूर्वं त्याज्यमिति चेत्; तस्यानियतविरोधपौर्वापर्यविषयत्वात्। नियमे हि विरोधनयात् परानुत्पत्तिरेव। न च विषयव्यवस्थया विरोधपरिहारे सति अन्यतरात्यन्तबाधकापच्छेदन्यायावतारो युक्तः; गुणनिषेधवचसामुत्सर्गापवादन्यायेन विहितमङ्गलगुणव्यतिरिक्तविषयत्वात्, श्रूयमाणे हेयगुणनिषेधे पर्यवसानात्। उक्तं च **तत्त्वसारे**—

*यद्ब्रह्मणो गुणशरीरविकारजन्मकर्मादिगोचरविधिप्रतिषेधवाचः।
अन्योन्यभिन्नविषया न विरोधगन्धमर्हन्ति तन्न विधयः प्रतिषेधबाध्याः॥ इत्यादि।

एवं स्थितेऽपि निषेधार्थस्वभावप्रयुक्तपरत्वमात्रेण यदि निर्विशेषवचसा पूर्वबाधः; तदा शून्यवचसा तस्यापि बाधात् माध्यमिकमतस्यैव विजयित्वम्। द्वयोरपि वचसोः पारमार्थिकस्य प्रामाण्यस्यानभ्युपगमात्। अपारमार्थिकस्य चाविशिष्टत्वात्। तदेवमुभयलिङ्ग एवेश्वरः॥

ब्रह्मणि प्रपञ्चाध्यासनिरासः॥ एतेन निर्विशेषस्यापि ब्रह्मण आच्छादिकयाऽविद्यया तिरोहितस्य विक्षेपिकया तया प्रपञ्चाध्यास एव सृष्टिरित्यपि निरस्तम्। तस्य अविद्यादिदोषगन्धायोग्यत्वात्। सर्वज्ञत्वादिगुणगणविशिष्टत्वस्य नित्यचेतनबहुत्वस्य च समर्थितत्वात्। *सदेव इत्यादिवाक्येऽप्युपादानत्वविधानबुद्धिस्थकारणान्तरनिषेधमात्रे तत्परत्वस्य पौर्वापर्यादिपर्यालोचनसिद्धत्वात्॥

किंच— अधिष्ठानस्य कार्त्स्न्येन भानेऽभाने च न भ्रमः । भाताभाताकृतिभिदा सविशेषत्वसाधिका ॥
अतो निर्विशेषस्य तिरोधेयधर्मविशेषायोगात्, स्वरूपमात्रतिरोधाने स्वस्यैव हानिप्रसङ्गात्, स्वयंप्रकाशतयाऽत्यन्तविशद-स्वरूपे च वस्तुनि बाधकप्रत्ययावसेयविशेषाभावेन [नित्यमोक्ष]अनिर्मोक्षासंसारयोरन्यतरप्रसङ्गात् । अभिज्ञाप्रत्यभिज्ञयो-रपि हि देशकालादिविशेषादस्त्येव मात्रया वैषम्यम् ॥

अभिज्ञायाः प्रत्यभिज्ञा विशिष्टविषया सती । तदशक्यभिदाबाधप्रगल्भा न तथाऽत्र ते ॥
अतो यदि स्वरूपं निवर्तकम्; नित्यनिवृत्तिः स्यात् । यदा तु तदतिरिक्तं मानम्; तदा सविशेषत्वमेष्टव्यम् । अमा-नस्य निवर्तकत्वादर्शनात् मानत्वमेव निवर्तकत्वौपयिकमिति चेत्, तद्वदेवामेयस्याधिष्ठानत्वादर्शनात् मेयत्वमेव तदौपयिक-मिति किं न स्वीक्रियते? जडाजडवैषम्यादिति चेत्; तुल्यम् । मानस्यापि स्वरूपातिरिक्तस्य जडत्वात् । स्वरूपानु-प्रवेशिनस्तु तदंशस्य प्रागपि सत्त्वात् ॥ किंच—

ब्रह्मणो निर्विशेषत्वमिति धर्मोऽस्ति वा न वा । द्विधाऽपि सविशेषत्वं तद्योगतदयोगजम् ॥
त्वद्वाक्याद्भ्रान्तिसिद्धं तल्लक्षणावृत्त्यनूदितम् । निषेधामोऽभिधाशक्तिर्नास्तीति हि निषिध्यते ॥
निर्विशेषा पुरीत्युक्तिर्यथैकत्र न तिष्ठति । तथा सर्वप्रयोगश्च विशेषे पर्यवस्यति ॥
विशेषो निर्विशेषश्चेत् सोऽपि कस्यापि वा न वा । पूर्वत्र सविशेषत्वमन्यत्र न विशेषता ॥

ब्रह्म निर्विशेषमित्यभिलापमात्रमिति चेत्; तर्हि सिद्धं नः समीहितम् । वस्तुतो विशेषप्रतिक्षेपाभावात्, अन्तत-श्चाभिलापगोचरत्वस्य विधानात् । वस्तुमात्रस्य तदपि नास्तीति चेन्न;

अवाच्यं वाच्यमिति वा वस्तुनि प्रतिपादिते । वाच्यमेव भवेद्वस्तु वाच्यावाच्यवचोऽन्वयात् ॥
किंच— दृढाध्यक्षादिमानेन जगत्सत्यत्वनिर्णये । निर्विशेषवचोऽन्यार्थं यूपादित्यैक्यवाक्यवत् ॥

प्रत्यक्षादिप्रत्ययो निरालम्बनः प्रत्ययत्वात्स्वाप्नप्रत्ययवत्, प्रपञ्चो मिथ्या दृश्यत्वाद्व्यावर्तमानत्वात् शुक्तिरूप्यव-दित्यादिभिरागममन्तरेणापि जगद्बाध इति चेन्न; निर्विषयासदन्यथाख्यातिसाधने विरोधापसिद्धान्तादिदोषात् । अनि-र्वाच्यत्वसाधने अप्रसिद्धविशेषणत्वस्ववचनविरोधादिदोषात् । विरुद्धयोः समुच्चयवत् तत्प्रतिक्षेपयोरपि परस्पराभावात्मनोः समुच्चयस्य विरुद्धत्वात् । तथा—

सदसद्व्यतिरेकेण [साधना]विधानात्तन्निषेधनात् । सदसद्व्यतिरिक्तस्य सिद्धा सदसदात्मता ॥
एकविज्ञानेन सर्वविज्ञानं च न ते भवेत् । सद्विज्ञानेन सदसदन्यविज्ञत्यसंभवात् ॥
ऐक्यसाधर्म्यवैधर्म्यभावैः स्यादेकतोऽन्यधीः । बाधासिद्ध्यध्याहृतयो लक्षणा च स्युरत्र ते ॥
किंच— तत्त्वे द्वित्रिचतुष्कोटिव्युदासेन यथायथम् । निरुच्यमाने निर्लज्जैरनिर्वाच्यत्वमुच्यते ॥
तथा बाधतद्योग्यत्वादिसाधने चानुपलम्भादिदोषात् । नश्वरत्वादिसाधनं त्विष्टमेव ।
किंच— तत्तत्पक्षादिबुद्धीनां प्रमाणत्व[भ्रम]प्रमात्वयोः । बाधासिद्ध्यादयो दोषा विजृंभन्ते यथायथम् ॥
तदभ्युपगमे चानुमानस्य निष्प्रयोजनत्वस्ववचनविरोधानुत्थानानि स्युः । किंच समस्तप्रत्यक्षाद्यप्रमाणत्वसिद्धावेतदनुमानो-त्थानम्, ततश्च तत्सिद्धिरित्यन्योन्याश्रयणम् । भेदवासनादोषमूलत्वात् प्रत्यक्षमप्रमाणमिति चेन्न; दोषत्वाप्रमाणत्वयो-रन्योन्याश्रयणात् । शास्त्रतोऽन्यतरसिद्धौ तत्प्राबल्यापेक्षया चक्रकापातः, श्रुतिप्राबल्याप्रामाण्यदुष्टकारणत्वनिश्चयानुमान-

प्रवृत्तीनाम् । तत्तत्पदार्थस्वरूपं प्रत्यक्षादिविषयः, धर्मस्तु मिथ्यात्वादिनामकस्तदविरुद्धानुमानविषय इत्यविरोध इति चेन्न ; स्वरूपसिद्धेरेव मिथ्यात्वविरोधात्स्वरूपाविरोधिमिथ्याशब्दपरिभाषितधर्मसाधने चास्माकमनिष्टाभावः ॥

किंच— मिथ्यावादिप्रतिज्ञार्थः स्वप्रतिज्ञां स्पृशेन्न वा । आद्ये स्वस्यैव विध्वंसो द्वितीये व्यभिचारिता ॥
मिथ्यात्वस्य तु मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् । सत्यत्वस्य तु सत्यत्वे सत्यत्वं स्थापितं भवेत् ॥
यदि प्रपञ्चमिथ्यात्वं सद्ब्रह्मैवेति सद्भवेत् । प्रपञ्चश्च तथैवेति स सत्यो न कथं भवेत् ॥
जडत्वात्स न तच्चेत्तन्मिथ्यात्वं च न तद्भवेत् । तत्त्वेनैव तदन्यत्वान्न तत्सत्यं च ते भवेत् ॥
सदसद्भिन्नता चापि विरोधात्सदसत्त्ववत् । परस्परमतिस्तस्य बाधिकेति निरूप्यताम् ॥

किंच, प्रपञ्चतद्बाधकप्रत्ययाभ्यामुपहितानुपहितादिवेषेण ब्रह्मणोऽपि दृश्यत्वादनैकान्त्यम्, ब्रह्ममिथ्यात्वं वा स्यात् । अनुभूतिरवेद्या, अनुभूतित्वादिति चेन्न ;

अनुभूतिरवेद्येति वचनं बोधकं न वा । आद्ये तेनैव वेद्यत्वं नो चेत्किं क विधीयते ॥

ब्रह्मणश्चात्यन्तावेद्यत्वे *अथातो ब्रह्मजिज्ञासा, *ब्रह्मविदाप्नोति परम्, *आत्मा वा अरे द्रष्टव्यः इत्यादिव्याकोपश्च । उपदेशश्च निष्प्रयोजनः, उपदेष्टुश्चाद्वैतनिश्चयानिश्चययोः कस्मै किमुपदेश्यम्? न ह्यनुन्मत्ता मिथ्यात्वेन निर्णीतिभ्यः प्रतिबिम्बादिभ्य उपदिशन्ति । व्यावृत्त्यनुवृत्तिमात्रं तु न मिथ्यात्वादिप्रयोजकम् । तथा हि—

व्यावृत्तेऽपि च सत्यत्वं रज्जुवंशादिके स्फुटम् । तत्रैव चानुवृत्तस्य मिथ्यात्वमपि भोगिनः ॥
व्यावृत्तिमात्राद्यदि तत् सतोऽप्येतत्प्रसज्यते । सत्त्वं घटस्येहेदानीं नास्तीत्यादिनिरूपणात् ॥
तच्चेत्तद्देशकालादौ नापोढं तत्समं घटे । सदेव घटदेशश्चेन्नान्यथैवोपलम्भनात् ॥
सत्सदित्यनुवृत्त्या चेत् सतः सत्यत्वमिष्यते । भिन्ननास्त्यनुवृत्त्यादेर्भेदनास्त्योश्च सत्यता ॥
देशकालादिभेदेन नास्तिता सर्वगामिनी । भिन्नता च मिथोऽपेक्षा न कचिद्विनिवर्तते ॥
शब्दमात्रानुवृत्तिश्चेत् तत्रापि च तथैव नः । तत्तत्प्रमाणयोग्यत्वमात्रं सत्तेति मन्महे ॥
अनावृत्तधिया सत्ता सर्वभावानुयायिनी । यद्यपीष्टा तथाऽप्येषा तद्धर्मत्वेन सिध्यति ॥

अतः प्रतिपन्नदेशकालादौ निवृत्तं मिथ्या ; नान्यत् । अन्यत्सदिति तत्त्वम् । प्रत्यनुमानं च—

भानासद्व्यतिरेकाद्यैर्विमतं सत्यमात्मवत् । विमतः प्रत्ययः सम्यग्ज्ञानाबाधात्स्वतन्त्रवत् ॥ इत्यादि ॥

अत्रान्तिमयुगवेदान्तिनामभिजन्मरहस्यं प्रकाशयामः ।

सांख्यसौगतचार्वाकसङ्कराच्छाङ्करोदयः । दूषणान्यपि तान्यत्र भूयस्तदधिकानि च ॥

तदेवं सिद्धं न च ब्रह्म बम्भ्रमीतीति ॥

शङ्करादिपक्षे ब्रह्मोपादानत्वानुपपत्तिः ॥ न च तत् स्वरूपेण जगदुपादानम् ; निर्विकारत्वनिर्दोषत्वादिविरोधात् । नापि शक्त्युपधानेन; शक्तेरभिन्नत्वे स्वरूपानतिरेकात् । भिन्नत्वेऽसन्मतापातात् । भिन्नाभिन्नत्वेऽभिन्नत्वाकारेण विकारादिदोषप्रसङ्गात् । एतेन स्वतस्सर्वेषां भिन्नाभिन्नत्वमपि निरस्तम् । व्यावृत्तमेव [सन्मात्रस्यांशिनो ब्रह्मत्वमपि निर्विकारत्वनिर्दोषत्वादिविरोधात् पूर्वमेव] दूषितम् । शङ्करादिपक्षत्रयेऽपि चिदचित्प्रपञ्चब्रह्मणां बहुविधसामानाधिकरण्यवैरूप्येण लक्षणादिभिश्च महान् क्लेशः ।

निर्भेदे सति दौष्कर्याद्विधाय जगदात्मताम् । तत्रैव तद्विषेधोऽयमिति बालिशजल्पितम् ॥
सामानाधिकरण्यं हि न शुक्तिकलधौतयोः । न च द्विचन्द्रयोर्नापि बिम्बतत्प्रतिबिम्बयोः ॥
न घटाकाशयोर्नापि घटद्वितयरन्ध्रयोः । तथैव न घटाकाशमहाकाशादिकेष्वपि ॥
एवं न पिण्डघटयोर्न वा घटशरावयोः । न च पिण्डांशयोर्नापि घटयोश्च परस्परम् ॥
मृदाद्याकारतो या तु सामानधिकरण्यधीः । व्यक्तिभेदेऽपि जात्यादिनिमित्तैक्यनिबन्धना ॥

अक्लिष्टत्वेऽपि पक्षाणां नैयायिकादिमतमेव साधीयः । तथा हि—

वाचां परिगृहीतानां यूपादित्यादिवाक्यवत् । व्याहतार्थाभिधायित्वाद्दूरं क्लिष्टार्थकल्पना ॥

भिन्नाभिन्नत्वं भवदभिमतं विरुद्धमिति वक्तुमपि लज्जामहे । तथाऽपि ब्रूमः । अभेदो हि भेदाभावः । अतस्तं च तदभावं च कथमेकत्रैकदैवाध्यवस्येम ? भेदाभावातिरिक्तस्त्वभेदो नास्त्येव । जात्याकारेणाभेद इति चेत् ; तर्हि जात्यादावभेदो व्यक्त्यादिषु भेद इति नैकस्य भिन्नाभिन्नत्वम् । जातिव्यक्त्यादिकमपि मिथो भिन्नाभिन्नमिति चेत्; इदं स्वरूपेणैव वा ? आकारान्तरेण वा ? पूर्वत्र विरोधः । उत्तरत्र अनवस्थादिदोषः ।

सप्तभङ्गीनिरासः ॥ सप्तभङ्गीभक्तान् प्रति चोद्यते—

यदि सत्त्वादनैकान्त्यं विमतस्यान्यवन्मतम् । तस्यैकान्त्ये त्वनैकान्त्यमनैकान्त्ये न नः क्षतिः ॥
विशेषणविशेष्यत्वप्रतीतेर्नैकधीः क्वचित् । एकोऽयं घट इत्यादिरेको दण्डीति बुद्धिवत् ॥
परतन्त्रस्वभावत्वान्मत्वर्थीयानपेक्षता । सहधीनियमोऽप्येवं स हि भेदैकसाधकः ॥
असिद्धिश्च विना द्रव्यं गन्धादेरुपलम्भनात् । आलोकाध्वान्तरूपादावनैकान्त्यं च दृश्यताम् ॥

तदयं संग्रहः—नाभेदधीः प्राग्वैशिष्ट्याद्धर्मैक्यादेकता मतिः । मत्वर्थीयः पृथक्सिद्धे सहभावोऽपि भेद[त]कः ॥

ब्रह्मणः त्रिविधपरिच्छेदराहित्यम् ॥ जगद्ब्रह्मणोरत्यन्तभेदे कथं त्रिविधपरिच्छेदराहित्यम् ? इत्थम्—तत्र देशकालपरिच्छेदाभावस्तु सर्वदेशकालव्याप्तत्वात्सिद्धः । वस्तुपरिच्छेदराहित्यं तु न सर्वतादात्म्यम्, सर्वाध्यासाश्रयत्वम्, स्वेतरसमस्तमिथ्यात्वादिकं वा ; प्रागुक्तदूषणशतोन्मेषात् । अतोऽन्यथैतन्निर्वाह्यम् । तत्रैवमुक्तं जन्माद्यधिकरणे **विवरणकारैः**—* वस्तुपरिच्छेदो वस्तुपरिमाणम् । देशपरिच्छेदस्तद्धेतुकः इति । अयमेवार्थो **वेदार्थसंग्रहविवरणे**ऽप्युक्तः । **वरदनारायणभट्टारकै**स्त्वेवमुक्तं **न्यायसुदर्शने**—* वस्तुपरिच्छेदो नाम इयद्गुणक इयद्विभूतिमानित्येवंविधः । तद्रहितं ब्रह्म । वस्त्वन्तरभावो वा वस्तुपरिच्छेदः । तद्रहितं च ब्रह्म । ब्रह्मव्यावृत्तस्य सर्वस्य ब्रह्मशरीरत्वात् तद्व्यतिरिक्तं किंचिदपि नास्ति इति । अयमसौ न भवतीति व्यवहारो न तस्यामवस्थायां प्रवर्तत इत्यर्थः । तथा च **भाष्यकारः**—*ब्रह्मव्यतिरिक्तवस्त्वन्तराभावात् इति । अयमेवार्थो **नारायणार्यै**रप्युक्तः—*गुणैरियत्ताराहित्याद्वस्तुनाऽपरिच्छिन्नत्वं चावगम्यते इति । अत्र * इयद्गुणक इत्यादिपक्ष एव प्रायः श्लाघ्यः । एतदुक्तं भवति ; स्वरूपतो गुणतो विभूतितो वा केनचिदाकारेण कुतश्चिदपकर्षो वस्तुपरिच्छेदः । वस्तुपरिमाणमिति पक्षोऽप्येतदन्तर्गतः । तथा वस्त्वन्तराभावपक्षोऽपि । स हि सर्ववस्तुसामानाधिकरण्यनिबन्धनं सर्वशरीरत्वेन सर्वात्मकत्वमिति नियमनादिगुणकाष्ठैवेति । तदेवमत्यन्तभिन्नानन्तवस्तुसत्यत्वेऽपि ब्रह्मणस्त्रिविधपरिच्छेदराहित्यमुपपन्नम् ॥

तस्य निमित्तमात्रत्वानुमानिकत्वनिरासः ॥ एतेन पातञ्जलशैवकाणादादीनां निमित्त[त्व]मात्रवादोऽपि निरस्तः। कारणावस्थसूक्ष्मचिदचिद्वस्तुविशिष्टस्य तस्यैवोपादानत्वश्रुतेः। न च तावता निर्विकारत्वश्रुतिविरोधः, तस्याः सर्वान्तर्यामिशरीरांशव्यवस्थितत्वात्। विशिष्टवेषेण विकाराश्रयत्वं त्विष्टमेव, मनुष्यादिशरीरविशिष्टे स्वरूपतो निर्विकारे पुंसि बाल्ययुवस्थविरत्वस्थूलत्वादिवत्। ईश्वरो न जगदुपादानं जगन्निमित्तत्वात्, यो यन्निमित्तं न स तस्योपादानम्, यथा घटस्य कुलाल इति चेन्न; धर्मिग्राहकविरोधात्। निमित्ततयैवानुमानसिद्धः पक्षीकृत इति [न विरोध] इति चेन्न; तस्यानुमातुमशक्यत्वात्। क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवदिति चेन्न; यथादृष्टोपसंहारे बाधात्। अन्यथा ज्ञानेच्छयोरपि त्यागप्रसङ्गात्। नित्यज्ञानस्य शरीरादिनेव नित्यप्रयत्नस्यापि ज्ञानादिना निरपेक्षत्ववचनोपपत्तेः। स्वतो विषयप्रावण्ये ज्ञानत्वप्रसङ्ग इति चेन्न; जीवनपूर्वकप्रयत्नवदुपपत्तेः। अदृष्टात् तत्र नियम इति चेत्; अत्रापि तथास्तु। त्वयाऽप्येतदेष्टव्यम्। अन्यथा नित्यज्ञानचिकीर्षाप्रयत्नानां सर्वदा सर्वगोचरत्वेन विषयनियमाभावे युगपत्सर्वकार्योत्पत्तौ युगपदनायाससर्वमोक्षक्षणभङ्गानन्तरक्षणकार्याभावादिप्रसङ्गात्। सहकारिक्रमात् कार्यक्रम इत्यविलक्षवचनम्; सहकारिणामपि कार्यत्वात् युगपदेव निवृत्तिप्रसङ्गात्। प्रयत्नस्य समस्तवस्तुगोचरज्ञानसमानविषयत्वे नित्यवस्तूनामपि तत्प्रयत्नविषयत्वप्रसङ्गः, ततश्च तेषामपि सृष्टिसंहारादिप्रसङ्गः, अशक्यविषयप्रयत्नत्वादीश्वरस्यैवानीश्वरत्वं वा। अस्तु तर्हि अदृष्टैकनियतप्रयत्नमात्रवानीश्वर इति चेत्; जीवस्यैवानित्यप्रयत्नस्यैव तथाविधनियमोपपत्तेः। अङ्कुरादिगोचरप्रयत्नो न केनापि ह्युपलभ्यते इति चेन्न; जीवनपूर्वकप्रयत्नेऽपि समत्वात्। कार्यादेव हि तत्कल्पनम्। तदत्रापि समम्। अदृष्टस्य च सर्वकार्यनिमित्तस्य नियामकत्वे किमदृष्टप्रयत्नकल्पनप्रयत्नेन? अत्रैवं संग्रहः—

सर्वगत्वादनियमो नित्यगत्वादुपद्रवः। अदृष्टान्नियमे नित्ययत्नोऽत्राजागलस्तनः॥
स्वादृष्टपरतन्त्रः स्यादवरात्मा क्वचित्क्वचित्। परादृष्टपराधीनः सर्वत्रैव भवेत्परः॥

प्रयत्नस्य च ज्ञानादतिरेकं पराभिमतमनुरुध्यैतदुक्तमिति मन्तव्यम्।

किंच— सिद्ध्यसिद्ध्योर्विरोधो नेत्येवं प्रलपतस्तव। विरोधसिद्ध्यसिद्ध्योश्च तन्निषेधो निषिध्यते॥
त्वत्सिद्धान्तत्वदुक्तिभ्यां हेत्वाभासेन वा पुनः। ज्ञातो व्याप्तिविरोधेन विशेषः प्रतिषिध्यते॥
तृणादिमर्मरीभावहेतुत्वादग्निमद्धिमम्। इति कृत्वा पक्षबलात् शीताग्निर्न हि कल्प्यते॥
व्यापकत्वेन दृष्टस्य पक्षसंबन्धमात्रतः। अधिकांशग्रहे हेतुः पक्षधर्मोऽपि न क्षमः॥
सिद्धे तु पक्षसंबन्धे पारिशेष्यादिना पुनः। अधिकांशग्रहश्चेन्न पारिशेष्यानिरूपणात्॥
दृष्टजातीयनिश्शेषभङ्गे साध्यं न सिध्यति। अभङ्गेनाधिकं सिध्येत् न च सामान्यतःस्थितिः॥
परिशेषानुमानस्याप्यन्वयित्वे समा गतिः। केवलव्यतिरेकी तु परस्तान्निरसिष्यते॥

किंच सकर्तृकमित्यत्र उपादानादिसमस्तकारणविषयज्ञानादिमान् कर्तृतया विवक्षितः? कतिपयविषयज्ञानादिमान् वा? सामान्यतो वा? पूर्वत्र व्याप्त्यसिद्धिः। न हि कुलालादयो घटादिहेतुभूतमदृष्टेश्वरादिकं जानन्ति। उत्तरयोः पक्षयोरीश्वरासिद्धिः। यागाद्युपकरणमृदाद्युपादानवेदिभिर्जीवैरेव सिद्धसाधनात्। एतेन द्व्यणुकादिकर्तृत्वमपि जीवस्यैवादृष्टद्वारा घटत इति सिद्धम्। शरीराजन्यत्वेन च कार्यत्वहेतोर्बाधः। सोपाधिकत्वं वा दुष्परिहरम्, न च व्यर्थं विशेषणम्; असिद्धिपरिहारेण तस्य सार्थकत्वात्। न च हेतुविशेषणं सर्वमनैकान्त्यपरिहारायेति मन्त्रपाठोऽयम्। व्यर्थ-

विशेषणं तर्हि सर्वत्रादूषणं स्यादिति चेन्न; यत्किञ्चिद्दोषपरिहारानुपयुक्तत्वस्य वैयर्थ्येऽनुरूपत्वात्। तथा च प्रकृतानुपयोगिनस्तस्यार्थान्तराख्यनिग्रहस्था[नत्वं]नं वाऽस्तु। न च विशिष्टस्य व्याप्त्यभावादेकामसिद्धिं परिहरतो द्वितीयापत्तिरिति वाच्यम्; तस्य तदभावासिद्धेः। यत्र शरीराजन्यत्वं तत्र सर्वत्राजन्यत्वमात्रमप्यस्तीति तस्य व्याप्तौ अस्यापि व्याप्तिर्दुर्निवारैव। अन्यथा कलमाङ्कुरात् कलमबीजानुमानमुच्छिद्येत। बीजव्यतिरेकमात्रेण कलमाङ्कुरस्यापि व्यतिरेकसिद्धेर्व्यतिरेकव्याप्तौ व्यर्थविशेषणत्वात्। बीजमन्तरेणापि केचिदङ्कुरा जायन्त इति चेत्; कलमबीजमपि नानुमीयेत, तदन्तरेणापि तदुपपत्तेः। एवं मैत्रीतनयस्य श्यामत्वे शाकाद्याहारपरिणामश्च नोपाधिः स्यात्; आहारपरिणामव्यतिरेकमात्रेण श्यामत्वव्यतिरेकात् शाकादीतिविशेषणवैयर्थ्यात्। तन्निवृत्तावपि तमालेन्द्रनीलश्यामत्वं दृश्यत इति चेन्न; विशिष्टस्यापि तत्र व्यतिरेकात्। न च शरीरश्यामत्वस्यैव तत् प्रयोजकम्; स्थावरायोनिजश्यामशरीरेषु शाकाद्याहारपरिणामाभावात्। आहारपरिणतिजशरीरश्यामत्वं शाकाद्याहारपरिणतिपूर्वकमिति चेन्न; अत्र साध्यद्वाराऽपि समव्याप्तेर्वैयर्थ्यकबलितत्वात्। यत् श्यामं न भवति तत् शाकाद्याहारपरिणतिपूर्वकं न भवतीत्येतावता तत्सिद्धेः। श्यामत्वजातिविशेषोऽनुपात्तविशेषणः साध्यः, तेन न व्यर्थतेति चेन्न; विशेषणमन्तरेण तस्य दुर्वचत्वात्। विशेषशब्दमात्राभिधानेऽपि तस्यैव व्यर्थत्वात्। किंच कार्यत्वात् सकर्तृकमित्यत्रापि व्यर्थविशेषणत्वं सुवचम्; हेतुमत्त्वमात्रव्यतिरेकेण कार्यत्वव्यतिरेकस्य सुवचत्वात्। हेतुशब्दोऽत्रानुपात्त इति चेन्न; तस्य फलितत्वात्। अन्यथा अशरीरत्वशब्दप्रयोगे भवतोऽपि पर्यनुयोगानवकाशात्। विग्रहेण शरीराजन्यत्वं फलितमिति चेत्; तर्हि कर्तृशब्दनिर्वचनेनापि हेतुविशेषत्वं फलितम्, सकर्तृकमिति हेतुतयैव संबन्धो वाच्यः। एवं सावयवत्वादनित्यत्वाभिधानेऽप्यवयवजन्यत्वं फलितमिति तत्रापि व्यर्थविशेषणता स्यात्। नह्यवयवैः संबन्धमात्रं, तेषु समवायमात्रं वा हेतुः; नित्येष्वपि जातिगुणादिषु तत्संभवात्। विपक्षे बाधकतयोक्ताकारणकार्योत्पत्तिप्रसङ्गोऽपि कर्तुः कारणविशेषत्वनिश्चयादेव परिहृतः। अचेतनं चेतनाधिष्ठितमेव प्रवर्तत इति नियमात् कारणमात्रत्वं सिद्धमिति चेन्न; नियमासिद्धेः। दृश्यते हि अयस्कान्तादिभिरप्ययःप्रभृतेः प्रवर्तनम्। अयोगव्यवच्छेदः सिषाधयिषितः, न त्वन्ययोगव्यवच्छेद इति चेन्न; अन्वयव्यतिरेकवतस्तस्यैवान्यस्य विशेषहेतुत्वोपपत्तौ ततोऽतिरिक्तस्यादृष्टस्य कल्पनायोगात्। विपक्षे बाधकाभावस्य चोक्तत्वात्॥

किंच, इदमधिष्ठानं किंरूपम्? प्रेरणमिति चेन्न; अमूर्तेषु तदयोगात्। हेतुत्वेन ज्ञानमात्रमिति चेन्न; प्रयत्नस्याकिंचित्करत्वप्रसङ्गात्। ज्ञानादित्रयवतः सन्निधानमात्रमिति चेन्न; तस्य नित्यत्वेन कार्यस्यापि सदातनत्वप्रसङ्गात्। अदृष्टविशेषान्नियम इति चेन्न; न तर्हि अदृष्टस्य एतदधीना प्रवृत्तिः, तस्यैव तन्नियामकत्वात्। अन्यथा तस्यापि यावत्सत्त्वं प्रवृत्तिप्रसङ्गात्। किंच स्वयमचेतनस्येश्वरज्ञानस्य न चेतनाधिष्ठानमस्ति; ज्ञानान्तराभावात्। वस्तुतश्चेतन एव ईश्वरात्मा तदाश्रयतया स्थित इति चेन्न; जीवेन सिद्धसाधनात्। सामान्यतः स्वयमेव तदपि ज्ञानं प्रतीयते इति तावता तदधिष्ठानमिति चेन्न; विशेषाकारस्याहेतुत्वप्रसङ्गात्। अन्यथा यथाकथंचित् सर्वगोचरज्ञानवत्त्वे सर्वस्रष्टृत्वाविरोधात्। ज्ञानान्तरेण तदधिष्ठानमिति चेन्न; अनवस्थानात्। एतेनैव तदधिष्ठानमिति चेन्न; अन्योन्यप्रवर्तनेऽन्योन्याश्रयणात्। उत्तरस्य ज्ञानस्य जगत्कारणत्वाभावान्नान्योन्याश्रयणमिति चेन्न; अत्यन्ताकारणत्वेऽसत्त्वप्रसङ्गात्। कारणाधिष्ठानौपयिकस्यास्य चाकारणत्वे प्रथमस्यापि कारणस्याकारणत्वप्रसङ्गात्। एवं चिकीर्षाप्रयत्नयोरप्यकारणत्वे गतमीश्वरकर्तृत्वेन। किंच यदकर्तृकं तत् कार्यं न भवतीति व्यतिरेकव्याप्तावहेतुकत्वमुपाधिः। अहेतुकत्वमकर्तृकत्वव्यापकमिति चेन्न; पक्षे

सन्दिग्धत्वेनोपाधित्वानपायात् । अन्यथा शाकाद्याहारपरिणतेरप्यनुपाधित्वेन मैत्रीतनयस्य श्यामत्वमनुमीयेत । न च सामान्याभावस्य विशेषाभावव्यापकत्वम् । अन्यथा पृथिवीत्वाभावेन घटत्वाभावव्याप्तौ करकादेरपार्थिवत्वादिप्रसङ्गः । ननु कर्तुर्हेतुविशेषत्वं नाम हेतुष्वन्यतमत्वं, सर्वकार्याननुवृत्तत्वं वाऽभिप्रेत्येदमुच्यते ; तत्राद्दृष्टादावपि प्रसङ्गादाद्यो निरस्तः ; द्वितीयस्तु कल्पोऽसिद्ध इति चेन्न; पूर्वोक्ताधिष्ठाननियमनिरासेन दत्तोत्तरत्वात् । किंच क्षित्यादिकमितीश्वरघटादि-संयोगः पक्षीकृतः ? नवा ? पूर्वत्र भागासिद्धिः, एतदनुमानसिद्धपक्षीकारेऽन्योन्याश्रयणम्, उत्तरत्र सन्दिग्धानैकान्तिकता । घटेश्वरसंयोगस्य सकर्तृकत्वसन्देहेऽपि ईश्वरसिद्धिरविरुद्धेति चेन्न ; तत्संयोगवदेव केषांचिदन्येषामप्यकर्तृकत्वं भवेदिति शङ्कामात्रस्य दुर्वारत्वात् । तावताऽपि क्षित्यादिसकर्तृकत्वनिश्चयभङ्गात् । विप्रतिपन्नं कार्यं सकर्तृकमिति सामान्यतः पक्षीकारात् न कश्चिद्दोष इति चेन्न; सामान्यस्य प्रयोगस्यापि समस्तविशेषकबलीकारार्थत्वात् । ततश्च समस्तविशेषाणां सामान्यतः सिद्धिसाकाङ्क्षत्वात् । अन्यत इत एव वा तत्सिद्धावनुमानवैयर्थ्यान्योन्याश्रयौ दुष्परिहरौ ॥

ईश्वरानुमाननिरासप्रयोजनम् ।। नन्वस्माकमीश्वरानुमाननिरासेन किं प्रयोजनम् ? न च प्रयोजनाभावमात्रम्, अनुमानत एवेश्वरं प्रतिपद्य तं भजमानान्प्रति नास्तिक्यशङ्काऽप्यापादिता स्यादिति महत्तेषामस्माकं च पापमिति । अहो ! महाकारुणिकोऽसि । तादृशेभ्य एतन्नोपदिश्यताम् । प्रयोजनं च शृणु । प्रथमं तावत् यथावस्थिततत्त्वावबोधः श्रोत्रेण गन्धग्रहणनिरासवत्, अनुमानस्याभासतां पश्यतस्तीव्रबुद्धेरीश्वराविश्वासपरिहारश्च । ततश्च मन्दानां मतेस्तीव्रबुद्धिना प्र-क्षोभो न स्यात् । एवमपि क्रियतां कारुण्यम् ; अप्राप्तप्रापकस्य आगमस्यानुवाद[ता]प्रसङ्गोऽपि परिहृतः स्यात् । अनु-वादत्वेऽपि ईश्वरः सिध्यत्येवेति न कश्चिद्दोष इति चेन्न ; निमित्तोपादानभूतेश्वरासिद्धेः । निमित्ततयाऽनुमानसिद्ध-मीश्वरमनूद्य उपादानत्वादि विधीयताम्, प्रत्यक्षसिद्धं पृथिव्यादिकमनूद्येश्वरशेषत्वशरीरत्वादिविधानवदिति चेत् ; तथै-वानूद्य उपादानत्वनिषेधकानुमानोदये धर्मिग्राहकबाधस्य दुर्वचत्वप्रसङ्गात् । विशिष्टतया त्वागमेनैव सिद्धौ तस्य सुवच-त्वात् । पृथिव्यादेरीश्वरशेषत्वादिनिषेधानुमानवत् तदपीष्यतामिति चेन्न ; तस्य निषेध्यग्राहकसिद्ध्यसिद्धिभ्यां व्याघा-तस्य सुवचत्वात् । अत्र ईश्वरो न पृथिव्याद्युपादानम् ; चेतनत्वात् कर्तृत्वाद्वा कुलालवदित्यादिप्रयोगे कथञ्चिदपि स दुर्वचः । तदा त्वागमस्यान्यपरत्वोपपत्तौ ईश्वरस्यानुपादानत्वमेव स्यादिति * जन्माद्यस्य यतः इति निखिलजगदेक-कारणत्वसंवित् विलीयेतेति भयादनन्तरमेव **सूत्रकारैः** * शास्त्रयोनित्वात् इति प्रमाणान्तरगोचरत्वं निरस्तम् । ननु तर्हि * रचनानुपपत्तेश्च इत्यादिसूत्रं तद्भाष्यादिकं च कथं संघटेत ? **न्यायतत्त्वे** च **प्रमातृपादे** चेतनस्यैव कर्तृत्वप्रति-पादनप्रकरणे * ननु वायुर्भूरेणूनां सङ्घातं करोति इत्यादिना परिचोद्य दत्तमुत्तरम् * उच्यते । कर्तृकरणकर्माणीति त्रीणि कारणानि क्रियाविशिष्टानि । तेषामन्यतमाभावे क्रिया न युज्येत इत्यादि, अत्रापि ईश्वमानुमानानुमतिर्दृष्टा । अतः * शास्त्रयोनित्वात् इत्यस्यान्यथाऽर्थो वाच्य इति चेन्न ; * रचनानुपपत्तेः इत्यादेरन्यभावत्वात् । तत्र हि चेतना-नधिष्ठितप्रकृत्याद्युपादानत्वमात्रप्रतिपादकान् प्रति विशेषविरोधादिप्रदर्शने तात्पर्यम् । स्वपक्षे तु तेषां संभावनातर्कत्व-मेव, तदनुगृहीतस्त्वागम एव प्रमाणम् । अत एव न्यायतत्त्ववचनमपि निर्व्यूढम् । तदेवमुपादानमनूद्य निमित्तत्व-निषेधकान् निमित्तमनूद्योपादानत्वनिषेधकांश्च प्रति धर्मिग्राहकबाधं वक्तुं केवलजगदुपादाननिमित्तानुमानयोर्दूषणमिति मन्तव्यम् । आगमेश्वरादिपक्षीकारे त्वाश्रयासिद्धिरिति संग्रहः ॥

ईश्वरस्य अभिन्ननिमित्तोपादानत्वसामञ्जस्यम् ॥ निमित्तोपादानैक्यवाक्यं यूपादित्यैक्यवाक्यवदिति चेत्; कथम्? लक्षणविरोधादिति चेत्; मैवम्। नहि उपादानासमवायिव्यतिरिक्तं निमित्तमिति निमित्तलक्षणम्, नापि निमित्तासमवायिव्यतिरिक्तकारणमुपादानमित्युपादानलक्षणम्, येनात्र विरोधः स्यात्। किं तर्हि? * उपादानकारणत्वं च परिणामास्पदत्वमेव इति **वेदार्थसंग्रहानु**सारादवस्थाश्रय उपादानम्। आगन्तुकोऽपृथक्सिद्धो धर्मोऽवस्था। विशेषतस्तूत्तरोत्तरावस्थाविशिष्टस्वरूपापेक्षया तदनुगुणनियतपूर्वभाव्यवस्थाविशिष्टं तदेव वस्तूपादानम्, यथा घटत्वावस्थाविशिष्टमृद्द्रव्यापेक्षया पिण्डत्वावस्थाविशिष्टं तदेव द्रव्यम्। तदनुगुणशब्देन प्रतिसर्गावस्थाव्यवच्छेदः। परिणामौन्मुख्यातिरिक्तेन आकारेणापेक्षितं कारणं निमित्तम्। असमवायीत्यवान्तरविभागस्तु नास्मदीयैरभ्युपगतः पारिभाषिकत्वात्। अन्यथा निमित्तकारणप्रत्यासन्नं कारणमनिमित्तमित्यादिविभागान्तरस्यापि परिभाषितुं शक्यत्वात्। पटाद्यसमवायितया तन्तुसंयोगादयस्तु असिद्धा एव; अवयविभङ्गात्, तावत एव तत्त्वात्। संयोगादिकारणतया नोदनादयस्तु सिद्धा अपि निमित्तकोटेर्न व्यतिरिच्यन्ते। ततश्च लक्षणद्वयमपि ईश्वरे सिद्धम्; अविभक्तनामरूपचिदचिच्छरीरकस्य विभक्तनामरूपचिदचिच्छरीरकत्वापेक्षयोपादानत्वसिद्धेः, अविभक्तचिदचिच्छरीरकत्वातिरिक्तेन कुलालादिसाधारणसङ्कल्पविशेषवत्त्वाद्याकारेण निमित्तत्वसिद्धेश्च। ईश्वरस्यैव क्वचिद्विषये कर्तृत्वमुपादानत्वं च परैरपि स्वीकार्यम्। सन्ति हि संयोगादयो घटादिभिरीश्वरस्य। ततश्च ईश्वरस्तेषां समवायित्वात् सर्वकार्यकर्तृत्वाच्च उपादानम्, निमित्तं च। त[त्त]त्कर्तृत्वानभ्युपगमे कार्यत्वात्सकर्तृकमित्यनुमानं दशमदशापन्नम्। एवमनीश्वरेष्वपि बुद्धिपूर्वस्वज्ञानसुखाद्युत्पादने निमित्तोपादानत्वसमुच्चयः सिद्धः। ततः सिद्धं सूक्ष्मचिदचिद्वस्तुशरीरकं ब्रह्मैव स्थूलचिदचिद्वस्तुशरीरतया परिणमतीति वेदान्ताः प्रतिपादयन्तीति। तेन च तद्व्यतिरिक्तस्य निखिलस्य आधाराधेयभावेश्वरेशितव्यत्वशेषशेषित्वशरीरशरीरिभावकार्यकारणभावादयो यथाग्रहणं संबन्धाः ॥

श्रीश्रीशयोः साम्यादिवाक्यानां निर्वाहः ॥

श्रिया सह तु दाम्पत्यं शाश्वतं तत एव तु। तयोः साम्यैक्यशक्तित्वतद्वत्त्वादिगिरां गतिः ॥

ज्ञानानन्दाद्यत्यन्तसाम्यात् जगज्जनकत्वशेषित्वशरण्यत्वप्राप्यत्वादिसाम्याच्च साम्यगिरां निर्वाहो व्यक्तः। एकत्ववादा अप्येवं द्वन्द्वरूपेणात्यन्तसमतया प्रकारैक्येन, समस्तप्रपञ्चप्रतियोगिकैकशेषित्वाश्रयत्वेन, महेन्द्राग्नीषोमादिवत् यथाविनियोगं श्रिया तद्वल्लभस्य वैशिष्ट्यात्, समस्तात्महविः प्रति उद्देश्यैकदेवतात्वादिवेषेण वा निर्वाह्याः। शक्तित्ववादास्तु पत्नीत्वादिरूपेण विशेषणत्वाभिप्रायाः, सृष्ट्यादिव्यापारेषु समानलीलतया प्रेरकत्वेन सहकारित्वाभिप्राया वा। प्रयुज्यते च सर्वत्र स्त्रीपुंसात्मकेषु द्वन्द्वान्तरेष्वपि स्त्र्यंशे शक्तित्ववादः। व्यूहवदवस्थाभेदवादास्तु अवतार[ादि]विषयाः। सर्वस्य भगवदात्मकत्वेन तस्य स्वेच्छया परेच्छया वा कार्यदशापन्नस्यापि भगवदवस्थाभेदत्वात्। एवमिच्छासंविदहन्तादिव्यपदेशा अपि प्रणयानुविधेयत्वस्वयंप्रकाशत्वस्वरूपनिरूपकत्वविशेषरूपादिपरा द्रष्टव्याः। अत्र वक्तव्यमखिलं **षडर्थसंक्षेपे** दिव्यस्थाननिरूपणानन्तरं **श्रीराममिश्रै**रुक्तम्। अथ तत्रत्योऽयं ग्रन्थः—* समाननयान्महिष्यादिसिद्धश्च। ननु शेषित्वविशिष्टविधिरशक्यः; अन्यशेषस्य तदन्यशेषत्वायोगात्। नचानुवादः, अत एव। किंच महिष्यादिकं परस्य शरीरम्। अन्यथा एकमेवेति विरुध्यते। आनन्दादिवदपृथग्भावाभावात्। अतः समत्वान्न मिथःशेषशेषिता। मैवम्; पत्युः पत्न्या अपीति लोकसिद्धम्। उभयाधिष्ठानं चैकं शेषित्वम्, अविभागस्मृतेः। तदुक्तं नीतिविद्भिः * अन्यतरा-

निच्छायां त्याग एव न संवर्तेत इति । न ह्यनिर्वृत्तिः पृथक्त्वे । एतन्न्यायसहकृतवाक्येन च शेषित्वविशिष्टपत्नी-[सिद्धिः] विधिः । अनूद्य वा । न च लोके शरीरस्यापत्नीत्वं नाम मानान्तरागोचरे विरोधः । अचित्त्वाच्च अपत्नीत्वं लोके । स च स्वस्मिन्नात्माश्रयदोषः । शेषत्वमन्यत्रापि, अविरोधात् इति ।

जगच्छेषत्वम् ॥ अनेन च श्रीराममिश्रवचसा द्वन्द्वं प्रति जगतः शेषतैकरसत्वमुपपादितम् । श्रुतिश्च—

*अकारेणोच्यते विष्णुः सर्वलोकेश्वरो हरिः । उद्धृता विष्णुना लक्ष्मीरुकारेणोच्यते तथा ॥
मकारस्तु तयोर्दास इति प्रणवलक्षणम् ॥ इति ।

मन्त्रान्तरेष्विव प्रणवेऽपि बहवोऽर्था बहुषु प्रदेशेषु प्रतिपाद्यन्त एव । न चार्थविरोधः, येनान्यपरता स्यात् । *अस्येशाना जगतो विष्णुपत्नी, *ईश्वरीं सर्वभूतानाम् इत्यादिका च । अदित्यादिशब्दसामानाधिकरण्यात् आद्या श्रुतिर्भूविषयेति केचित्; दिग्विषयेति तु कुदृष्टिः, श्रुतिलिङ्गादिविरोधात् । आह च भगवान् **पराशरः** *त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरम्, *यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम, *नानयोर्विद्यते परम् इत्यादि । तथा च **भगवच्छास्त्रवचनम्** *एकतत्त्वमिवोदितौ,

*लक्ष्म्याः समस्तश्चिदचित्प्रपञ्चो व्याप्यस्तदीशस्य तु साऽपि सर्वम् ।
तथाऽपि साधारणमीशितृत्वं श्रीश्रीशयोर्द्वौ च सदैकशेषी ॥ इत्यादि ।

अहिर्बुध्न्यसंहितालक्ष्मीतन्त्रादिषु च विस्तरेणायमर्थोऽवधार्यः । एतेन भूम्यादेरपि तदंशत्ववचनं निर्व्यूढम् । अनुप्रवेशादेव हि अनन्तविष्वक्सेनादेरपि सङ्कर्षणाद्यात्मकत्वमुच्यते । यथाविनियोगमुपासनावान्तरभेदात् ब्रह्मणः पत्नीपरिजनादिसाहित्यराहित्यविकल्पः, न पुनर्भ्रान्तत्वशुद्धत्वकार्यकारणावस्थादिविषयत्वात्; प्रागेव तत्र दूषणाभिधानात् । व्यूहविभवादिषु हेतुकार्यभावं सर्वं विग्रहविषयं वक्ष्यामः । तत्तद्व्यूहाद्यनुरूपाश्च लक्ष्म्यादिव्यूहादयः शास्त्रसिद्धाः । व्यूहादिषु मिथोऽङ्गाङ्गिभावादिकं स्वसंकल्पमात्रायत्तम्, ईश्वरस्य सर्वत्रैकत्वात् । यत्तु यन्त्रविशेषादिषु लक्ष्मीसुदर्शनादीन्प्रति वासुदेवादेरङ्गत्वं कचित्कचित् प्रतिपाद्यते, तत्र यथावस्थितब्रह्मात्मकत्वानुसन्धाने स्वात्मानं प्रत्येव स्वस्यैच्छमङ्गत्वमिति न कश्चिद्विरोधः । ब्रह्मदृष्ट्याऽनुसन्धाने तु तत्तत्फलविशेषार्थं तदङ्गकत्वेन प्राधान्यदृष्टिरिति त्रय्यन्तोदितदृष्टिविध्यन्तरेष्विव न तत्त्वव्यवस्थाभङ्गः । न चैवमागमान्तरप्रतिपाद्यतत्त्वेष्वपि प्रसङ्गः; तेषामागमानामप्रामाण्यस्य वक्ष्यमाणत्वात् । पञ्चरात्रप्रामाण्यस्य **आगमप्रामाण्ये भाष्ये** च **श्रीपञ्चरात्राधिकरणे** प्रपञ्चितत्वात्, अस्माभिश्च न्यायपरिशुद्धावुक्तत्वात् । न च यन्त्रादय एव सामान्यतो निर्मूला इति वाच्यम्; **तापनीयोपनिष**दादिषु तद्दर्शनात्, प्रत्यक्षतः फलोपलम्भाच्च । अतस्तत्त्ववैपरीत्यम्, तदुक्तिमूलशास्त्राप्रामाण्यं वा न शङ्कनीयम् । अतः सिद्धमशेषचिदचित्प्रकारं ब्रह्म एकः श्रीमन्नारायण इति ॥

स्फारास्तीर्णभुजङ्गपुङ्गववपुःपर्यङ्कवर्यं गतौ सर्गस्थित्यवसानकेलिरसिकौ तौ दम्पती नः पती ।
नाभीपङ्कजशायिनः श्रुतिसुखैरन्योन्यबद्धस्मितौ डिम्भस्याम्बुजसंभवस्य वचनैरोन्तत्सदित्यादिभिः ॥

॥ इति न्यायसिद्धाञ्जने ईश्वरपरिच्छेदः तृतीयः ॥

अथ नित्यविभूतिपरिच्छेदः ॥

नित्यविभूतिलक्षणम् ॥ अथास्य नित्यविभूतिरुच्यते। त्रिगुणद्रव्यव्यतिरिक्तत्वे सति सत्त्ववत्त्वम्, स्वयंप्रकाशत्वे सति सत्त्ववत्त्वम्, तमोरहितत्वे सति सत्त्ववत्त्वम्, निश्शेषाविद्यानिवृत्तिदेशविजातीयान्यत्वम्, इत्यादि तल्लक्षणम्। * आदित्यवर्णं तमसः परस्तात्, * तेह नाकम् * क्षयन्तमस्य रजसः पराके * यो अस्याध्यक्षः परमे व्योमन्, * तदक्षरे परमे व्योमन् * सहस्रस्थूणे विमिते दृढ उग्रे इत्यादिभिस्तत्सिद्धिः। एवं च सति * तद्विष्णोः परमं पदँ सदा पश्यन्ति सूरयः इत्यत्रापि व्यतिरेकनिर्देशबलात् स्वरूपाद्भेदे सिद्धे पदशब्दस्वारस्यात्, सदादृश्यत्वबलाच्च सदापश्यदनेकद्रष्टृविशिष्टस्थानविशेषसिद्धिः। अगत्या च विशिष्टविधिः * यदाग्नेयोऽष्टाकपालः इतिवत्। प्रपञ्चितश्चायं स्थानविशेषो मोक्षधर्मे * एते वै निरयास्तात! स्थानस्य परमात्मनः इत्यादिभिः। सा च विभूतिः केनचित्प्रदेशेनानन्ता, केनचित्त्ववच्छिन्ना। आनन्त्यतमःपरत्वयोः श्रुतयोरवर्जनीयत्वात्। आनन्त्यमात्रसाम्येऽप्यनन्तत्रिगुणादपीयमधिकतरा; न्यूनाधिकभाववचनात्, अन[न्तत्वेऽपि]न्तेष्वेव मिथस्तारतम्यस्य सिद्धत्वात्। देशेऽपि निदर्शयामः। आदित्यादूर्ध्वमपि गगनदेशोऽनन्तः, भूमण्डलादनन्ततरः, पातालादनन्ततम इति। पादत्रिपादव्यपदेशश्च तदविषयोऽपि तद्देशतारतम्यस्यानुग्राहको भवति। अयं च विभागो न समचतुर्भागाभिप्रायः; * बुद्ध्यर्थः पादवत् इत्युक्तत्वात्। अचेतना चेयम्; जीवेश्वरकोटिविलक्षणत्वात्। स्वयंप्रकाशा च। * तत्रानन्दमया लोका भोगाश्चानन्दलक्षणाः, * आनन्दं नाम तं लोकं परमानन्दलक्षणम्, * तयोर्नौ परमव्योम निर्द्वन्द्वं सुखमुत्तमम्, * षाड्गुण्यप्रसरो नित्यस्वाच्छन्द्याद्देशतां गतः इत्यादिसामर्थ्यात्। तथा * किमात्मिकैषा भगवतो व्यक्तिः इति प्रश्ने * यदात्मको भगवान् इति च सामान्यत उत्तरे कृते, पुनः * किमात्मको भगवान् इति प्रश्ने * ज्ञानात्मकः इत्याद्युत्तरमुक्तम्। अतो दिव्यमङ्गलविग्रहस्य ज्ञानात्मकत्वात्तद्व्यात्मिकायाः सर्वस्या नित्यविभूतेर्ज्ञानात्मकत्वमुचितम्। ज्ञानात्मकत्वं चात्र स्वयंप्रकाशत्वमेव। ज्ञानत्वेऽप्यात्मवदस्यानिर्विषयत्वाकर्तृत्वे युक्ते। परस्मै भासमानत्वाच्च धर्मभूतज्ञानवत् पराक्त्वमुपपन्नम्। सुषुप्त्यादिकाले धर्मभूतज्ञानवद्बन्धकाले सा न प्रकाशते। तदा तु तद्वदेव ज्ञानविषयतयैव तत्सिद्धिः। बन्धरहितानां मतिवैभवे सत्यपि सा तन्निरपेक्षा; आत्मस्वरूपवत्। ज्ञानविषयत्वेऽपि स्वयंप्रकाशत्वमप्यन्यत्राप्यभ्युपगतम्। एके तु निरतिशयदीप्तियोगात् ज्ञानावारकत्वाभावादेश्च स्वयंप्रकाशत्वज्ञानत्वादिव्यपदेशः; अत्यन्तानुकूलरूपरसगन्धादियोगाच्चानन्दसुखादिव्यपदेश इत्याहुः ॥

इयं च पञ्चोपनिषत्प्रतिपाद्यपञ्चभूतेन्द्रियमयी नित्यमुक्तेश्वराणामिच्छानुरूपशरीरेन्द्रियप्राणविषयरूपेणावतिष्ठते। त्रिगुणवदियमपि चतुर्विंशतितत्त्वात्मिकेति केचित्। तथाऽपि न तत्त्वानां प्रकृतिविकृतिभावः। दिव्यमङ्गलविग्रहादेर्नित्यत्वश्रवणात्। अप्राकृतानामपि महदादीनां सद्भाव आकाशादिवत्। न हि आकाशाद्युपात्तास्तत्र वाय्वादयः। तत्र च शरीरादीनां संस्थानादीनि प्रायशः प्राकृततुल्यानि। शरीराणां शुभाश्रयादीनां पाण्यादिमत्त्वश्रवणात् तत्रेन्द्रियसद्भावसिद्धिः। चक्षुरादिशब्दानां च प्रयुक्तानां गोलकादावमुख्यत्वात्। * इन्द्रियच्छिद्रविधुरा द्योतमानाश्च सर्वशः इत्यादिवचनमुत्सर्गापवादनयेन कर्मकृतेन्द्रियप्रतिक्षेपपरम्; * अशरीरं वाव सन्तम् इत्यादिषु कर्मकृतशरीरादिप्रतिषेधवत्। * अभावं बादरिः इत्यधिकरणे * किं मुक्तस्य देहेन्द्रियाणि सन्ति इति चिन्तितत्वाद्भूतेन्द्रियरूपषोडशतत्फलसद्भावो भाष्यकारैरेव सूचितः। भट्टपराशरपादैश्च ईश्वरादीनां मनस्सद्भावो दर्शितः। यथा * यद्यप्येवं तर्कः स्वातन्त्र्येण

स्वान्तसमर्थनासमर्थः, तथाऽप्यागमानुग्रहेण प्रभवति। सन्ति **चागमाः** * मनसैतान् कामान् पश्यन् रमते, * मनोऽस्य दिव्यं चक्षुः, * सोऽन्यं कामं मनसा ध्यायीत, * मनसैव जगत् सृष्टम्, * एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च इत्येवमादयः परावरप्रकरणेषु इति स्वयमुक्तत्वात्। * बुद्धिरेवेदं मन इति मतान्तरमाचार्याणाम्; बुद्धिमान् मनस्वी इत्यविशेषनिर्देशात्, क्षुभितं मे मनः, प्रशस्तं मे मन इति तदवस्थापरोक्ष्याच्च इति मतान्तरमुक्तम्। विषयाश्चात्र भूषणायुधासनपरिवारायतनोद्यानवापिकाक्रीडापर्वतादयोऽतिविचित्रा नित्याः। केचित्तु कृतका अनित्याश्च। सन्ति हि तत्रापि तरुषु पल्लवकुसुमफलादयः परिणामाः, नदीषु फेनतरङ्गबुद्बुदादयः, विग्रहे च व्यूहविभवादयः। कालकृतकर्माधीनपरिणाममात्रं हि तेषु निषेध्यम्, न तु भगवत्सङ्कल्पमात्रकृतमपि। तदेवं शरीराण्यपि कानिचित् नित्यानामीश्वरस्य च नित्येच्छापरिग्रहात् नित्यानि। कानिचिदनित्येच्छापरिग्रहादनित्यानि। मुक्तानां तु कृतकान्येवानित्यान्यपि। ते हि कदाचिदशरीराः कदाचिच्च सशरीरा इति **भाष्यादिषु** प्रदर्शितम्। इन्द्रियाणि तु तत्रत्यानि सर्वाण्यपि नित्यानि, तत्रत्यव्योमादिवदेवोपादाननिरपेक्षत्वात्। तत्र कानिचित् नित्यैः, ईश्वरेण, च नित्यपरिगृहीतानि, कानिचित् कदाचित् परिगृहीतानि। मुक्तैस्तु तत्परिग्रहः शरीरवत् कादाचित्क एव। नित्यमुक्तानां शरीरादिपरिग्रहो भगवदभिमततत्कैङ्कर्यरूपभोगाय। भगवतोऽपि स्वभोगाय, स्वशेषभूतनित्यमुक्तानन्दनाय, मुमुक्षूपास्यत्वसिद्धये च। स च भगवतः स्वसंकल्पादेव। मुक्तनित्यानां तु कदाचित्परमपुरुषमात्रसंकल्पात्, कदाचित्परमपुरुषसंकल्पानुविधायिस्वसङ्कल्पाच्च। तथा च सूत्रम् * तन्वभावे सन्ध्यवदुपपत्तेः, * भावे जाग्रद्वत् इति॥

ईश्वरादेः नित्यानित्यशरीरादिमत्त्वम्॥ ननु नित्यस्यैकस्यैव ज्ञानस्य संसारदशायां कर्मणा संकोचविकासभेदात् सुखदुःखेच्छाद्वेषादिरूपावस्थाभेद उपपन्नः, ईश्वरस्य विपाकदशापन्नजीवकर्माख्यसहकारितारतम्यात् विषमत्रिगुणपरिणामहेतवः सन्तु नाम संकल्पाः, अप्राकृतविचित्रदेहादिपरिणामेषु कर्मकालाद्युपाधिविधुराणां संकोचविकासरहितसमस्तवस्तुगोचरधियां मुक्तनित्येश्वराणां कथं कादाचित्केच्छासङ्कल्पतत्कृतानन्दादिज्ञानावस्थाविशेषा घटन्ते? उच्यते—

उल्लेखभेदाः क्रमशः सन्ति सर्वज्ञसंविदि। न चेत्कार्येषु भूतैष्यद्वर्तमानादिधीः कथम्॥
कर्माद्युपाध्यभावेऽपि मुक्तादीनां प्रवर्तते। इच्छासंकल्पदेहादिरीश्वरेच्छाविशेषतः॥
ईशेच्छायास्तु वैषम्यं व्यष्टौ कर्मविशेषतः। समष्टौ गुणवैषम्यात्तन्मूलात्कालतोऽपि वा॥
कालस्य तादृशावस्था क्षणादीनां प्रवाहतः। सोऽप्युपाधिप्रवाहाद्वा यद्वा पूर्वक्षणादितः॥
उपाधिभिः क्षणाद्यैर्वा पूर्वैरुपहितत्वतः। तेषूत्तरेषु हेतुः स्यादिच्छासन्ततिरैश्वरी॥
अप्राकृतविचित्रार्थसिसृक्षा विषमा तु या। साऽपि प्रवाहानादित्वान्नोपाध्यन्तरमीक्षते॥
इच्छासंकल्पसृष्टीनां चक्रवद्वा प्रवर्तनात्। स्यादीशबुद्ध्यवस्थानां तत्र बीजाङ्कुरक्रमः॥
आगमैरैश्वरीं शक्तिमतर्क्यामुपगच्छताम्। ईशस्य तत्तत्सृष्ट्यादौ सहकार्यन्तरेण किम्॥
अनित्यमपि विज्ञानमीशस्यास्तीति केचन। तदा त्वप्राकृताक्षादेस्तद्विकासोपयोगिता॥

यथोक्तं **वरदविष्णुमिश्रैः**—* ईश्वरज्ञानस्य अनित्यस्य सर्वविषयनित्यज्ञानगृहीतग्राहित्वात् इति। अतः सिद्धं नित्यानित्येच्छाभेदात् ईश्वरादेर्नित्यानित्यशरीरादिमत्त्वम्। ईश्वरशरीरे च सूक्ष्मव्यूहविभवादिभेदाः **श्रीमत्पञ्चरात्रादिभिः** प्रपञ्चिता अवगन्तव्याः। संग्रहस्तु—सूक्ष्मं केवलषाड्गुण्यविग्रहं वासुदेवाख्यं परं ब्रह्म पूर्वोक्तम्। परस्मिन्नेव शान्तो-

दितनित्योदितविभागोऽपि विभाव्यः। वासुदेवसंकर्षणप्रद्युम्नानिरुद्धरूपो व्यूहः। उत्तरोत्तरः पूर्वपूर्वकारणकः। तत्र वासुदेवे ज्ञानादिगुणाः षडप्याविर्भूताः। संकर्षणादिषु त्रिषु शास्त्रप्रवर्तनसंहाराद्यौपयिकगुणद्वन्द्वत्रयोन्मेषेण चतुष्कमनाविर्भूतम्। सर्वे ते सर्वत्र सन्त्येव। एषां च प्रत्येकमवान्तरावतारा अनन्ताः। पद्मनाभमत्स्यादिदशकादयो विभवभेदाः। स्वयंव्यक्तदैवार्षादयस्तु अर्चावतारभेदाः। दैवादिष्वपि विशिष्टप्रतिष्ठानन्तरं प्रसादोन्मुखेश्वरसंकल्पाधीनमप्राकृतत्वमनुसन्धेयम्। प्राकृताप्राकृतसंसर्गोऽपि नानुपपन्नः। अन्यथा प्राकृतलोकेषु भगवदवताराः, परमपदेऽप्यर्चिरादिमार्गेण सूक्ष्मशरीरस्य, वैदिकपुत्रादेर्वा गमनं कथं घटेत? हृत्पद्मकर्णिकामध्यगतस्यान्तर्यामिणः परस्य विशेषतः सूक्ष्मान्तर्याम्यवतारः। विचित्रा च भगवत इव विग्रहस्यापि व्याप्त्यादिशक्तिः। तयैव धर्मिग्राहकसिद्धया विपरीततर्काणां प्रतिक्षेपः। **श्रीमद्गीतैकादशाध्याये** च विग्रहस्य व्यापकत्वकारणत्वादिकं व्यक्तमेव **भाष्यकारैः** प्रतिपादितम्—

* इहैकस्थं जगत् कृत्स्नं पश्याद्य सचराचरम्। मम देहे गुडाकेश! यच्चान्यद्द्रष्टुमिच्छसि॥ इति

* इह—ममैकस्मिन् देहे तत्राप्येकस्थम्—एकदेशस्थम्, सचराचरं कृत्स्नं जगत्पश्य। यच्चान्यद्द्रष्टुमिच्छसि, तदप्येकदेहैकदेश एव पश्य इत्युक्तम्। तथा—

* तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा। अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा॥

इति *........देवदेवस्य दिव्ये शरीरेऽनेकधा प्रविभक्तं ब्रह्मादिविविधविचित्रदेवतिर्यङ्मनुष्यस्थावरादिभोक्तृवर्गपृथिव्यन्तरिक्षस्वर्गपातालातलवितलसुतलादिभोगस्थानभोग्यभोगोपकरणभेदभिन्नं प्रकृतिपुरुषात्मकं कृत्स्नं जगत् इत्युक्तम्। तथा

* सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम। देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः॥

इति, * ममेदं सर्वस्य प्रशासनेऽवस्थितं सर्वाश्रयं सर्वकारणभूतं रूपं यद्दृष्टवानसि, तत् सुदुर्दर्शं—न केनापि द्रष्टुं शक्यम् इत्याद्युक्तम्। अस्त्रभूषणाध्यायोक्तश्च सर्वाश्रयत्वप्रकारोऽनुसन्धेयः। अन्यत्र चोक्तं भगवता **पराशरेण**—

* समस्ताः शक्तयश्चैता नृप! यत्र प्रतिष्ठिताः। तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत्॥

समस्तशक्तिरूपाणि तत्करोति जनेश्वर!। देवातिर्यङ्मनुष्याख्याचेष्टावन्ति स्वलीलया॥ इत्यादि।

एषु सर्वेषु भगवतो विग्रहेषु सांसारिकफलप्रदान एव मात्रया तारतम्यम्। निःश्रेयसं तु व्यापकानुसन्धायिनां सर्वत्र हस्तापचेयम्। यच्च * विभवार्चनाद्व्यूहं प्राप्य इत्यादि, तत् व्यापकानुसन्धानविधुराधिकारिविशेषापेक्षयेति मन्तव्यमिति॥

संविद्या निरवद्यनन्दथुमयी निष्कृष्टसत्त्वाकृतिः स्वाच्छन्द्यात्कमलापतेर्भगवतो भोगाय लोकायते।
चिन्तादूरतरा चिरन्तनतमोनिश्शेषमोक्षस्थली चित्ते सन्निदधातु मे शुभतरस्वैरावतारात्मिका॥

॥ इति श्रीन्यायसिद्धाञ्जने नित्यविभूतिपरिच्छेदश्चतुर्थः॥ ४॥

॥ अथ बुद्धिपरिच्छेदः॥ ५॥

बुद्धिः॥ अथ मतिर्निरूप्यते। सकर्मकावभासत्वम्, सकर्तृकावभासत्वम्, इत्यादि तल्लक्षणम्। न्यायतत्त्वे तु प्रथमाधिकरणे लक्षणान्तराणि बहूनि दूषयित्वा,

* अत्यन्तवेगिताऽत्यन्तसौक्ष्म्यं निर्भरता तथा। स्वसत्ताकालभाव्याप्तिर्ज्ञाने लक्ष्मचतुष्टयम्॥

इति स्वोक्तलक्षणोपसंहारः कृतः। अत्र यावदपेक्षितं विशेषणमूह्यम्। सा च विषयप्रकाशवेलायां स्वाश्रयस्यैवात्मनः

स्वयंप्रभा। अन्यकालान्यपुरुषगता तु स्मृत्यनुमानादिविषयः संसारिणाम्। इतरेषां तु सर्वज्ञतया अन्यकालान्यपुरुषनिष्ठाऽपि स्वकीयेन प्रत्यक्षेण विषयीक्रियते। तथा च **भाष्यम्**—*यत्त्वनुभूतेः स्वयंप्रकाशत्वमुक्तम्; तद्विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैव, नतु सर्वेषां सर्वदा तथैवेति नियमोऽस्ति इति।

धियः स्वयंप्रकाशत्वे वेद्मीत्याद्युपलम्भनम्। मानसाध्यक्षभङ्गादिरपि मानमितीष्यताम्॥

किञ्च— स्वधीविशेषं सर्वज्ञोऽप्यध्यक्षयति वा न वा। आद्ये सिद्धा स्वतस्सिद्धिरन्यत्रासर्ववेदिता॥

ज्ञानमस्तीति विज्ञानं स्वात्मानं साधयेन्न वा। पूर्वत्र स्वप्रकाशत्वं सर्वासिद्धिरतोऽन्यथा॥

बुद्धेः प्राकट्यानुमेयत्वनिरासः, स्वतस्सिद्धत्वं च॥ प्राकट्यानुमेयत्ववादिनं प्रत्युच्यते—

कल्प्यैव धीश्चेत्कल्प्येत तत्सामग्र्येव लाघवात्। प्रत्यक्षायास्ततोऽन्यत्वक्लृप्तौ नैवं प्रसज्यते॥

ज्ञानयोगः प्रकाशोऽत्र तदसिद्धौ न सिध्यति। कर्मकर्तृक्रियातन्त्रं ज्ञानं प्रत्ययभेदतः॥

प्रकाशते ज्ञायत इत्येतद्धातुविभेदतः। भिनत्तिपातयत्यादौ यथा करणकर्मणोः॥

व्यवहारार्थनियतिप्रकाश्यत्वानि बुद्धितः। स्वभावनियमो ह्येष प्राकट्येऽपि न लङ्घ्यते॥

तत्रैवैतत्करणवत्तस्यैवास्तु प्रकाशकम्। प्राकट्यजन्म भूतेष्यदभावज्ञातताद्यु किम्॥

आत्मसिद्धौ प्रकाशपदार्थनिर्णयार्थे *कस्तर्हि प्रकाशते पदार्थः? इति प्रश्ने *अनुभवादूरत्वं स्मृतिनिमित्तम् इति **न्यायतत्त्वग्रन्थसारणपूर्वकं** *संविददूरत्वं प्रकाशः इत्यभिधाय, अदूरविकल्पं प्रति चाभिहितम्—

*भवत्वनुभवादूरं दूरादन्यद्विरोधि वा। तद्भावश्च प्रकाशत्वं किमत्र बहु जल्प्यते॥ इति।

भाष्यं च *प्रकाशश्च चिदचिदशेषपदार्थसाधारणं व्यवहारानुगुण्यम् इति। तदेवं न बुद्धिः प्रकाशानुमेया। किं तु स्वतस्सिद्धैव। प्रपञ्चितञ्चैतत् सर्वं **तत्त्वरत्नाकरे भट्टपराशरपादैः**। यथा—

*धियः प्रत्यक्षभावत्वात् परतस्तदसम्भवात्। पारिशेष्यात्स्वतोभानं प्रमाणाच्च ततस्ततः॥

प्रतीतेर्व्याहरणतः सन्देहपरिवर्जनात्। सत्तायां सिद्धवत्कारात् ज्ञानं भातीति भावितम्॥

परस्यादर्शनाद्व्याप्तादन्वयिव्यतिरेकितः। अर्थापत्तेश्च युक्तेश्च वचनाच्च स्वदृग्मतिः॥ इति संग्रहः।

*व्याप्तादन्वयिव्यतिरेकितः इत्यस्य विवरणदशायां चैवमुक्तम्, *विप्रतिपन्ना संवित् स्वगतव्यवहारं प्रति स्वाधीनकिञ्चित्कारे सजातीयसंबन्धानपेक्षा व्यवहारहेतुत्वात् अर्थेन्द्रियदीपादिवत्। न च चक्षुषः सजातीयतेजोपेक्षयाऽनैकान्त्यम्; तस्येन्द्रियत्वेन, आहङ्कारिकत्वेन वा, आलोकाद्भिन्नजातीयत्वात्। अन्यच्च, ज्ञानसंस्कारः स्वैकार्थसमवायिज्ञानानुभवानपेक्षः संस्कारत्वादन्यसंस्कारवत्, विषयसंस्कारो ज्ञानसंस्कारेण सहोत्पद्यते विषयसंस्कारत्वादिदमहं जानामीतिज्ञानप्रभवसंस्कारवत्। न चोभयविषयज्ञानपूर्वकत्वं प्रयोजकम्; ज्ञानपूर्वत्वेन व्याप्तिसिद्धेर्व्यर्थविशेषणत्वात् इत्यस्यानन्तरं *पुनश्च इत्युक्त्वा *संविदनन्याधीनस्वधर्मव्यवहारा इत्यादिभाष्योपात्तमेवानुमानमुक्तम्। अत्र प्रयोगनिष्कर्षः स्वयमेव भाव्यः। *व्यतिरेकि चास्ति लिङ्गम् इत्यभिधायाजडत्वज्ञानत्वादीनि प्रयुज्य समर्थितानि। प्रत्यक्षत्वानुपपत्तिः, व्यवहारविशेषकरत्वानुपपत्तिश्च अर्थापत्ती समर्थिते। ज्ञानं न परप्रकाश्यम्, घटादिवदर्थाप्रकाशकत्वप्रसङ्गादित्यादितर्काश्च प्रतिपादिताः। *वचनानि च इत्युक्त्वा *अत्रायं पुरुषः स्वयंज्योतिर्भवति, *आत्मैवास्य ज्योतिः, *स्वेन ज्योतिषाऽऽस्ते, *आत्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् इत्यादीनि ज्ञानपदवाच्यजीवस्य स्वयंज्योतिष्ट्वपराणि ज्ञानपदाभि-

धेयायां संविद्यपि संभवलाघवाभ्यां स्वप्रकाशत्वं संभावयन्तीति, मणितरणिदीपतत्प्रभासाधर्म्येण जीवतज्ज्ञानसमर्थनानि च,

* यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥

इत्येवंविधानि ज्ञानात्मनोः स्वयम्प्रभावत्त्वेन सजातीयत्वं ज्ञापयन्ति, न च किञ्चिदनिष्टं प्रसज्यते इत्युक्तम् । वेद्यत्वादि-साधकानि व्यवहार्यत्ववस्तुत्वप्रमेयत्वक्रियात्वाद्यनुमानानि योग्यानुपलम्भसिद्धसाधनासिद्ध्यादिभिर्दूषितानि । अधीकर्मणः सिद्धिरप्यज्ञातघटादिसद्भाववत्, कदाचिद्धीकर्मत्वस्य ज्ञानेऽपि विद्यमानत्वात्, अङ्गुल्यग्रचोद्यस्य कर्मत्वाद्यनभ्युपगमेन परिहृतत्वाच्च समर्थिता । स्वयंप्रकाशत्वे सहोपलम्भनियमादभेदभयमपि विरुद्धप्रत्यक्षावरुद्धसाध्यत्वविरुद्धत्वाप्रयोजकत्व-प्रभृतिभिरनुमानदूषणान्निरशेषितम् । **मानसप्रत्यक्षभङ्गसंग्रहे** चैवमुक्तम्—

* योग्यानवग्रहात्स्वेन सम्भवादनवस्थितेः । इति बाधकहेतुभ्यः साधनद्वितयस्य च ॥
असिद्धिव्यभिचाराभ्यां वैकल्यात्साध्यसाधने । इत्यसाधनबाधाभ्यां न धीर्मानसगोचरः ॥
इति स्वतस्सिद्धिरेव संवित्सिद्धौ च पद्धतिः । इति ।

अखण्डवाक्यार्थखण्डनानन्तरं च प्राकव्यमानसप्रत्यक्षभङ्गपूर्वकमेता एव युक्तयः पुनः प्रतिपादिताः । तत्र क्षणिकात्म-विशेषगुणत्वादि साधनद्वितयम् । तत्र क्षणिकत्वादेरसिद्धिः, प्रायश्चित्तधर्मैरनैकान्तिकत्वमप्युक्तम् । एवं पराभिमतजी-वनपूर्वकप्रयत्नेनापि द्रष्टव्यम् ॥

यत्तु **वरदविष्णुमिश्रैः** *सुखदुःखे ज्ञानरूपे एव इत्युक्त्वा अनन्तरमुक्तम् *इच्छाद्वेषप्रयत्ना मानसप्रत्यक्षाः इति ; तत् नूनमिच्छादिगुणान्तरसद्भावाभिमानमूलं वा परमतमूलं वा । सुखदुःखयोर्ज्ञानरूपत्वे च इच्छादिषु को विशेषः ?

मिथस्संश्रयधीबाधमध्यावस्थोपलम्भनैः । न स्यात्परस्पराभावमात्रता सुखदुःखयोः ॥

बुद्धेः संकोचविकासौ ॥ इयं च प्रतिपुरुषनियता सर्वगोचरस्वभावाऽपि संसारावस्थायां कर्मणा संकुचिता तत्तत्कर्मानुगुणतारतम्यवती इन्द्रियाधीनप्रसरणा । तत एव तत्तत्प्रतिनियतविषया प्रसरणभेदाधीनप्रलयोदयभेदव्यपदेश-वती च । तथा चोक्तं **भाष्ये** *तमिममिन्द्रियद्वारा ज्ञानप्रसरमपेक्ष्योदयास्तमयव्यपदेशः प्रवर्तते इति । एतेन नित्यत्वेन कथमिन्द्रियाद्यपेक्षेति चोद्यं दत्तोत्तरम् ॥

धारावाहिकविज्ञानस्यैकत्वम् ॥ अत्र धारावाहिकविज्ञानं नीरन्ध्रनिर्यातद्युमणिमयूखवदेकरूपं वा, स्नेहदशा-दिसमवायसन्तन्यमानदीपवत् सन्ततिरूपं वा इति चिन्तनीयम् । तत्र **वरदनारायणभट्टारकैः** प्रथमः पक्ष उक्तः । तथा हि **प्रज्ञापरित्राणे** स्मृत्यप्रामाण्यप्रसंगेनोक्तम्—

* धारावाहिकधीपङ्क्तिः स्वकालीनार्थभासिका । मेधातिरेकसद्भावात् नैरपेक्ष्यादपि प्रमा ॥
स्तम्भः स्तम्भः स्तम्भ इति धीर्धारावाहिका मता । धारावाहिकविज्ञानमेकं ज्ञानं मतं हि नः ॥
प्रतिबन्धांशमोक्षाद्यैर्नित्यं ज्ञानं हि जायते । चिरमप्रतिबन्धेन चिरं तिष्ठति भासकम् ॥
चिरस्थितार्थधीरेव न धारावाहिका तु सा । नहीश्वरादिविज्ञानमागमादिकमिष्यते ॥
नित्यं हि तदतो नित्यं सर्वेषां ज्ञानमागमात् । इत्यादि ॥

उक्तं हि सन्मात्रग्राहिप्रत्यक्षभङ्गे **भट्टपराशरपादैः** *संकोचेऽपि करणसंप्रयोगावधिकस्थैर्याभ्युपगमात् इति । अस्मिन्नपि पक्षे यदा त्विन्द्रियसंयोगाः क्षणिकाः, तदा ज्ञानस्यापि क्षणिकत्वमेष्टव्यमेव । अन्ये तु ज्ञानस्य क्षणिकत्वे ध्यानस्य सन्ततिरूपत्वे च स्मृतिभाष्यादिदर्शनात् द्वितीयः पक्ष इति ॥

बुद्धेः प्रत्यक्षादिविभागस्योपाधिमूलत्वम् ॥ अस्याः स्वतः प्रत्यक्षस्वभावाया एव प्रत्यक्षानुमित्यादि[दृष्टिश्रुतिमत्यादि]विभागोऽपि करणभेदोपाधिकः । सर्वप्रसरणेष्वपि स्वात्मनि प्रत्यक्षप्रकाशात्मिकैव । निरतिशयवेगित्वात् निरतिशयसूक्ष्मत्वाच्च सहसैव विप्रकृष्टसंबन्धः, अप्रतिघातश्च । संयोगलक्षणश्चास्याः संबन्धः । तथोक्तं **भाष्यादिषु** *संबन्धश्च संयोगलक्षणः, ज्ञानं च द्रव्यमेव इत्यादिकण्ठोक्त्या ॥

बुद्धिविषये चोद्याः परिहाराश्च ॥ १. ननु बुद्धेर्नित्यत्वे किं प्रमाणम्? २. तथात्वे कथं जागरसुषुप्त्यादिभेदसिद्धिः? ३. किं च प्रमाणं प्रसरणे? ४. कथं चात्मगुणभूताया बुद्धेर्द्रव्यत्वम्? ५. किं च द्रव्यत्वे प्रमाणम्? ६. कथं चात्मधर्मभूतायास्तस्यास्स्वाश्रयादन्यत्र गमनम्? ७. कथं चोपचयविरलभावाभावे परिमाणान्तरयोगः? ८. कथं चातीतानागतैस्संबन्धः संयोगः? ९. कथं च गुणादिभिः? १०. कथं वा मध्यस्थितानां संबद्धानामप्रकाशत्वम्? ११. कथं च मुक्तबुद्धेर्युगपत्क्रमेण वाऽनन्तदेशसंयोगः? १२. कथं च व्याप्तायां स्वबुद्धिचन्द्रिकायां प्लवमानस्य स्वलालातन्तुविताने लगन्त्या लूतिकाया इव सञ्चाराधीनतत्तद्बुद्धिप्रदेशसंयोगस्य स्वबुद्ध्या सह बुद्ध्यन्तरव्यावृत्तः स्वाभाविकस्संबन्धः? इति । तत्र पूर्वस्मिन्नागम उत्तरम् । यथा *न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते, *न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते, *अविनाशित्वात् इत्यादि । व्याख्यातं चैत**दात्मसिद्धौ** *ज्ञातुरविनाशित्वादेव ज्ञानस्याप्यविनाशित्वमुपपादयन्ती श्रुतिरियं ज्ञातृस्वरूपप्रयुक्तं ज्ञानमिति दर्शयति इति । अत्र स्मृतिरपि—

*यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः । दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥
यथोदपानकरणात् क्रियते न जलाम्बरम् । सदेव नीयते व्यक्तिमसतः संभवः कुतः ॥
तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥ इत्यादि ।

सूत्रं च *ज्ञोऽत एव इति, *यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् इति च । द्वितीये तु प्रतिबन्धकं तमः । यथा दाहकस्य वह्नेर्मण्यादिसन्निधावदाहकत्वम्, तदपगमे च हेत्वन्तरनिरपेक्षदाहकत्वम्, तद्वत् तमोविशेषसन्निधानासन्निधानाभ्यां स्वापादिसिद्धिः । उक्तं च *पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् इति । अतो जागरादिदशानियतप्रसरणा विषयप्रकाशवेलायामेव बुद्धिः प्रकाशते, नान्यदेति सुस्थम् । यत्तु **षडर्थसंक्षेपे श्रीराममिश्रै**रुक्तम्—*सत्यं स्वतःसिद्धिः । सा सुषुप्तावपि नास्फूर्तिः । स्वाश्रयायैव हि सा भाति । स एव विशेष इति स्वावसरे वक्ष्यामः । अव्यवहारनियमस्तु करणोपरतिनियमात् इति । एवंप्रकारमेव **विवरणे**ऽप्युक्तम् । तदेतत् वैभववाद इति मन्तव्यम् । अन्यथा *पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् इति सूत्रेण तद्भाष्येण च विरोधात् । सर्वविषयप्रकाशनशीलायाः संविदो यथा समस्तबाह्यविषयवैमुख्यं तथान्तरविषयविमुखत्वमपि भवतीति किमत्र चित्रम्? यत्तु **भाष्ये**—*एवं हि सुप्तोत्थितस्य परामर्शः, सुखमहमस्वाप्समिति । अनेन प्रत्यवमर्शेन तदानीमेवाहमर्थस्यैवात्मनः सुखित्वं ज्ञातृत्वं च ज्ञायते इत्युक्तम्, तत् स्वरूपानुकूल्यविवक्षया प्रत्यक्त्वविवक्षया चेति न विरोधः । तृतीये तु भगव**द्यामुनमुनिभि**रेवमेवोक्तम्; यथा *अत इन्द्रियेण सह चैतन्यमपि निस्सृत्य तेनतेनार्थेन सन्निकृष्यते हस्तादिनेव त्वगिन्द्रियम् इत्याद्यभिधाय *व्योमवदमूर्तस्य न क्रियावत्त्वमिति चेत् इत्याशङ्क्य *केयं मूर्तिर्नाम? यद्विरहिणः क्रियायोगः इत्यादिना परिहृत्य व्यवहितविप्रकृष्टसंबन्धप्रकारं च प्रसाध्य *यथाऽऽह **भगवान्**—*तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि इति । **मनुश्च**—

*इन्द्रियाणां हि चरतां यद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ॥ इति ।

अस्ति चात्र श्रुतिः *प्रज्ञा च तस्मात्प्रसृता पुराणी इति । अन्यपरत्वं श्रुतिस्मृत्योरिति चेत् स्वरसप्रतीतेर्बाधकाभावात् । बाधितांशे हि तत् । चतुर्थे निदर्शनं प्रभादि । यथोक्तं **भाष्ये** *प्रभाद्रव्यस्य दीपगुणभूतस्येव ज्ञानस्याप्यात्मगुणभूतस्य द्रव्यत्वमविरुद्धम् इति । प्रभायां च वक्तव्यं प्रागेवोक्तम्, प्रपञ्चितं चैव **भाष्ये** । क्वचिदाश्रितस्यैव द्रव्यस्य अन्याश्रयित्वमवयविवादिनां त्ववर्जनीयम् । किंच न तावदस्माकमद्रव्यमेव गुण इति वैशेषिकादिवन्निर्बन्धः; विशेषणादिवत्, यो यदाश्रितस्वभावः स तस्य गुण इति हि गुणलक्षणम्; न तु पारिभाषिकम्, सर्वव्यवहारविरोधात् । एवं च गुणेषु कश्चिद्विशेषः, द्रव्यात्मकगुणाः केवलगुणाश्चेति । पूर्वे ज्ञानादयः, उत्तरे सत्त्वरजस्तमःप्रभृतयो वक्ष्यन्ते । तत्र गुणैकरूपत्वमात्रादेव सत्त्वादिषु गुणशब्दस्य मुख्यत्वम्, ज्ञानादिषु गौणत्वम् । *अस्याश्च इति **भाष्यस्य** विवरणेऽप्युक्तम्—*नित्यपारतन्त्र्याद्गौणो गुणव्यपदेशः इति । तस्मिंस्तु पक्षे गुणत्वानभ्युपगमान्न चोद्यावकाशः । अन्ये तु तस्यैव प्रवृत्तिनिमित्तत्वेन मुख्यत्वोपपत्तेः, गौणत्वकल्पनं नानुमन्यन्ते । *अस्याश्च इत्यादिभाष्यं तु साधारणम् । *प्रभाद्रव्यस्य इत्यादिभाष्यम्, *यद्यपि प्रभा प्रभावद्द्रव्यगुणभूता, तथाऽपि शौक्ल्यादिवन्न गुणः इत्यादिभाष्यं च मुख्यपक्षस्वरसम् । यत्तु सत्त्वादीनां द्रव्यत्वप्रतिक्षेपेण *गुणा इत्येव च सत्त्वादीनां प्रसिद्धिः इति भाष्यम्, तदपि, अवधारणस्वारस्यात् द्रव्यत्वाप्रसिद्धेः । एवं **वरदनारायणभट्टारक**पक्षेऽपि न चोद्यावकाशः, ज्ञाने द्रव्यशब्दस्यौपचारिकत्वात् । अयमेव गुणः केषांचिद्विवक्षान्तरेण जातिगुणक्रियाद्रव्यरूपेणापि हि विकल्प्यते । यथा—अनेकेषां धर्मिणामन्तरङ्गो धर्मविशेषो जातिः । यन्निरूपिते वस्तुनि प्रायशो विशेषाकाङ्क्षाशान्तिस्सोऽन्तरङ्गः । तदनुप्राणितस्य तस्य विशेषकः सिद्धो गुणः । तथाविधं साध्यं क्रिया । एतैर्विशिष्टं द्रव्यमिति । एवमेव हि जातिगुणक्रियाद्रव्यवाचित्वं शब्दानाम् । अत्रावान्तरगुणशब्दः कथासामान्यविशेषयोर्वादशब्दवत् । अत्र चैकमेव वस्तु द्विधा, त्रिधा, चतुर्धा वा विकल्पयितुं शक्यम् । यथा ज्ञानमेव च संयोगादिमत्तया द्रव्यम्, तदेवात्मनः प्रत्यक्तया निरूपितस्वरूपस्य विशेषकतया गुणः, जानात्यादिनिर्देशे क्रिया । एवमन्यत्रापि चिन्त्यम् । सत्त्वं द्रव्यम्, असत्त्वमद्रव्यम् इति वदतां तु सर्वेषां गुणानां द्रव्यत्वं विवक्षितमित्यलं प्रसक्तानुप्रसक्त्या ॥

पञ्चमे तु ब्रूमः—बुद्धिर्द्रव्यं प्रसरणादिमत्त्वात् संप्रतिपन्नवत्, अत्रैव साध्ये ज्ञानत्वादात्मवत् इत्यादि । **वरदविष्णुमिश्रै**स्त्वेवमुक्तम्—*ज्ञानं द्रव्यं संयोगाद्दृष्टान्यत्वे सति भावनाकारणत्वादात्मवत् इति । षष्ठस्य चतुर्थ एव दत्तमुत्तरम् । यदि तु स्वाश्रयत्यागोऽभिमतः; स नेष्यते । उक्तं ह्यत्रैव चोद्ये भगव**द्यामुनमुनिभिः**—*आत्मप्रहाणानभ्युपगमादविहायैवात्मानमितस्ततश्चेतना इन्द्रियादिद्वारा निस्सरति, विच्छिन्नायाश्च तस्याः सन्धानासंभवः शास्त्र एवोक्तः इति । सप्तमस्य अहिकुण्डलदृष्टान्तेन निरासः । नच तावता बहलविरलत्वादिप्रसङ्गः; भिदुरभागवत्स्वेव तथा व्याप्तेः । अस्तु वा बहलत्वादि, तथाऽपि न तथा द्रष्टुम्, स्प्रष्टुं वा शक्यम्; अतीन्द्रियत्वात् स्पर्शादिरहितत्वाच्च । न च विरलत्वे सरन्ध्रत्वनियमः; सर्वदेशनिरन्तरसंयोगयोग्यस्वरूपत्वात् । कथं तदल्पदेशे पूर्णम्? इति चेत् स्पर्शशून्यत्वेनाप्रतिघातात् । उक्तं हि निरतिशयसूक्ष्मत्वं **न्यायतत्त्वे** । एतेन एकस्य द्रव्यस्य कालभेदेऽपि नानापरिमाणत्वं नास्तीति वदन्तः प्रत्युक्ताः । कालभेदस्यैव विरोधशामकत्वात्, अवयव्यभावाच्च । एवं तर्हि आत्मनस्तत्तद्देहानुरूपविविधपरिमाणवादिनो दिगम्बरान् प्रति *अन्त्यावस्थितेश्चोभयनित्यत्वादविशेष इति सौत्रं चोद्यमत्रापि स्यादिति चेन्न; तत्र केवलयुक्त्यादिमूलार्थप्रतिक्षेपे तात्पर्यात् । अष्टमस्योत्तर**मात्मसिद्धौ** । तथाहि—*कथमतीतानागतयोरसतोश्चैतन्येन संप्रयोगः

इत्याशङ्क्य विषयविषयिभावप्रकाशमानत्वसंख्यादियोगदवीयोदेशवर्तिज्ञानशीघ्रसंयोगप्रतिबन्दीभिः परिहृतम् । तथा *अतीतानागततया तावप्यद्यापि विद्येते इति तेन रूपेण बोधसंनिकर्षे नानुपपत्तिः इति च तद्द्रव्यसत्तया संयोगोपपत्तिरुपपादिता । तत्रैवमाशयः—यथा कैश्चिदसतोरेव भूतभविष्यतोस्सामान्यात्मनाऽद्यापि वृत्तेः प्राकट्याश्रयत्वमुपपदितम्, तथा तद्द्रव्यात्मनाऽपि वृत्तेः संयोगोऽप्युपपन्न एव । विशिष्टेनासंयोगश्चेद्विशेषाकारेण न प्राकट्यमिति तुल्यमिति । नत्वमस्य त्वनभ्युपगम उत्तरम् । नहि गुणादिभिरपि संबन्धस्संयोग एव, किंतु संयोगिनिष्ठता । यथा परेषां संयुक्तसमवायादि । *संबन्धश्च संयोगलक्षणः इत्यादिवचनानां संयोगावश्यंभावे तात्पर्यम् । उक्तं च **षडर्थसंग्रहे श्रीराममिश्रैः**—*संयोगस्तदर्हेषु विषयत्वाकारः, अनर्हेषु ततस्तदन्वयिषु इति । अस्यार्थः—संयोगार्हवस्तुनि वर्तमानत्वादिविशिष्टद्रव्यप्रकाशनं संयोगः । संयोगानर्हाणां तु रूपादीनां प्रकाशनं तदन्वयिष्वाश्रयेषु कारणेषु कार्येषु च यथासंभवं संयोग इति । यत्तु *नैरन्तर्यापरपर्यायमत्यन्तसामीप्यमात्रं च संयोगः । स एव परतन्त्राश्रितः समवायपदपरिभाषाभूमिर्वैशेषिकाणामपीति नार्थान्तरत्वमुररीकृत्य विकल्पः संभवति इत्यात्म**सिद्धा**वुक्तम्, तदपि पराभ्युपगतसमवायानभ्युपगमात् स्वमते समवायस्य स्वरूपविशेषानतिरेकादतिरिक्तसंबन्धाभावपरम्, न तु गुणगुणिनोः संयोगलक्षणसंबन्धपरम् । गुणगुणिनौ संयुक्ताविति यदि केचित् प्रयुञ्जीरन्, तदानीमौपचारिकोऽयं व्यवहार इति ज्ञापयितुं *नैरन्तर्यापरपर्यायम् इत्युक्तम् । निरन्तरत्वमात्रात् संयुक्तत्वव्यवहारः । तावति वैशेषिका युक्त्याभासैरर्थान्तरत्वं पर्यभाषन्तेत्युक्तं भवति । अन्यथा गुणस्य संयोगवत्त्वे तस्यापि द्रव्यत्वं स्यात्, द्रव्यलक्षणत्वात्तस्य । अवस्थायोगित्वं द्रव्यलक्षणमस्त्विति वचनेऽपि गुणानां ज्ञानसंयोगलक्षणावस्थायोगित्वात् द्रव्यत्वं दुष्परिहरम् । न च द्रव्याद्रव्यविभागो माभूदिति वाच्यम्; **भाष्यकारै**रेव सत्त्वरजस्तमसामद्रव्यत्वसमर्थनात् । अतो यथोक्त एवार्थः । यद्वा नैरन्तर्यमात्रमङ्गीकृत्य संयोगमपि केचिन्नेच्छन्ति, तन्मतेनोक्तमिति मन्तव्यम् ।

दशमस्य नायनं तेजो निदर्शनम् । योग्यताऽत्र नियामिकेति चेन्न; अत्रापि तुल्यत्वात् । ज्ञानसंयोगे सति काऽपरा योग्यता ? इति चेत्—इन्द्रियसंयोगे सति काऽपरा ? इत्यपि सुवचत्वात् । ज्ञानायोग्यत्वे तस्य वस्तुनः केनचिदपि ज्ञानेनाप्रकाश्यत्वं स्यादिति चेन्न; ज्ञापकायोग्यत्वेऽपि तुल्यत्वात् । स्वभावादेव किंचित् ज्ञापकं क्वचिदेव शक्तमिति चेत्; तर्हि तत्रैव ज्ञानमिति । अस्तु तर्हि सामग्रीस्वभावादेव ज्ञानस्य प्रतिविषयं प्रतिनियमः, किं संबन्धेनाधिकेन ? इति चेन्न; ईश्वरज्ञानस्य नित्यस्य तदभावात्, निर्विषयत्वेनाज्ञानत्वप्रसङ्गादीश्वराभावप्रसङ्गात् । अनित्येषु ज्ञानेष्वयं नियम इति चेत्; सत्यम्, तथाऽपि संयुक्तसमवायाद्यविशेषेऽपि रसादिपरिहारेण रूपादौ वर्तमानस्य चक्षुरादेः स्वभावनियमे सत्यपि संयुक्तसमवायादिपरिग्रहवत् क्षन्तव्यम् । उक्तं च **न्यायकुलिशे**—*संयोगस्तु प्रसरणवैभवादिप्रतिपादकशास्त्रबलादाश्रितः इति । योग्यतामात्रेण रूपान्तरादीनामपि ग्रहणप्रसङ्गात् तत्परिहाराय संबन्धविशेषाङ्गीकार इति चेत्; तर्ह्यत्रापि योग्यतामात्रेण सर्वदा प्रकाशः स्यादिति तत्परिहाराय संबन्धपरिग्रहः । सामग्र्येवात्रातिप्रसङ्गं निवारयेदिति चेन्न; तत्रापि तुल्यत्वात् । संबन्धोऽपि तत्र सामग्रीनिविष्ट इति चेत्; तत्रापि तस्य निवेशः किं न स्यात् ? तत्संबन्धसामग्र्यैव तन्नियमस्याप्युपपत्तेः । तत्रैव संबन्ध इत्यपि हि सामग्रीस्वभावादेव । एकादशे वेगातिशयः, शक्तिविशेषः, ईश्वरसंकल्पो वा प्रतिवक्तारः । इष्टं च विचित्रवेगित्वं नायनतापनादिमहसाम् । तच्च काष्ठाप्रासं युगपत्, त्रिचतुरक्षणेन वा विश्वमास्कन्दते इति विश्वसिहि । द्वादशे तु स्वाभाविकं तदीयत्वं तदाश्रितत्वं चेति सञ्चारेऽपि न

दोषः। यथा व्यापकात्मवादिनः शरीरेन्द्रियादीनाम्, यथैव ईश्वरमनुमन्यमानस्य तदीशितव्यानाम्, यथा वा लोके दासभृत्यादिद्वन्द्वानाम्, यथा च प्रभाप्रभावदादेः, यथा च वैशेषिकादीनां चलाचलत्वेऽप्ययुतसिद्धयोरवयवावयविनोः; यथा चास्मत्पक्षे शरीरिणः पुरीतदादिसञ्चारेऽपि शरीराणाम्, इति व्यपगतघनदुर्दिनो बोधभानुरौपनिषदानाम् ॥

सुखादीनां बुद्धिविशेषत्वम् ॥ बुद्धिरेवोपाधिभेदात् सुखदुःखेच्छाद्वेषप्रयत्नरूपा; सुखादिजनकतयाऽभ्युपगतज्ञानातिरेके प्रमाणाभावात्। इच्छामि द्वेष्मीत्यादिव्यवहारस्य स्मरामीत्यादिवज्ज्ञानविशेषेणैवोपपत्तेः। वैषयिकसुखदुःखरूपत्वं ज्ञानस्य विषयाधीनमित्यनुकूलत्वप्रतिकूलत्वाविशेषात् विषयस्यापि सुखदुःखशब्दवाच्यत्वमस्त्येव। प्रपञ्चितमिदं **भूमाधिकरणे**। तथा **वेदार्थसंग्रहे**—*विषयायत्तत्वात् ज्ञानस्य सुखरूपतया ब्रह्मैव सुखम् इत्युक्तम्। सुषुप्त्याद्यवस्थासु प्रयत्नो नास्त्येव; अनुपलम्भात्। अदृष्टादिवशाच्च निश्वसितादिसिद्धिः। परैरपि तत्रैव प्रयत्नकारणतयाऽदृष्टादिकमभ्युपगतम्। तन्निश्वासाद्यर्थमेव भवतु। अतो मध्ये प्रयत्नकल्पकप्रमाणं स्पन्दत्वादिहेतुरन्यथासिद्धः। उक्तं च * अन्तराभूतग्रामवत् इत्याद्यधिकरणे **भाष्ये**—* प्रत्यगात्मनः सुषुप्तौ प्राणनं प्रति कर्तृत्वाभावात् इत्यादि, * तस्य सुषुप्तिमूर्च्छादौ प्राणनादेरकर्तृत्वात् इत्यादि च। कर्तृत्वाभावेऽपि कृतिविजातीयकल्पनं प्रयत्नकृतिशब्दपर्यायत्वप्रसिद्धिगौरवाभ्यां प्रतिहतम्। नन्वात्मगुणाः सुखादयो मा भूवन्, मनोवृत्तिभेदास्तु भविष्यन्ति। तथा **चात्मसिद्धावुक्तम्**—* यत्तु सुखादिनिदर्शनेनात्मविशेषगुणतया चितेरागन्तुकत्वमुपपादितम्, तदपि गुणवृत्तापरिज्ञानेन इत्युपक्रम्य * सुखदुःखे च नात्मधर्माविन्द्रियसौष्ठवनाशयोरेव तद्भावोपपादनात्। व्याकरिष्यते चैतदन्तिमपादार्थसमर्थनावसर इति साधनविकलता च निदर्शनस्य। रागद्वेषादयोऽपि मनोवस्थाविशेषाः, न साक्षादात्मगुणाः। विज्ञायते हि * कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरेतत्सर्वं मन एव इति। गीयते च—* इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतनाधृतिः [इति क्षेत्रलक्षणम्]। एतत्क्षेत्रं समासेन इति **गीतां** चोदाहृत्य तदर्थं शरीरलक्षणं चोपपाद्य, पुनः * किमिदं धीः इति धीशब्दसहपाठमाशङ्क्य *उत्प्रेक्षाभिप्रायं तत्, न ज्ञप्तिविषयम्; तस्याः स्वाभाविकत्वस्य तस्यामेव श्रुतौ श्रूयमाणत्वात्। श्रूयते हि—* न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते इति—इत्याद्युक्तम्। तथा * पञ्चवृत्तिर्मनोवद्व्यपदिश्यते इति सूत्रे *यथा न कामादिकं मनसस्तत्त्वान्तरम् *कामस्सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरेतत्सर्वं मन एव इति वचनात्, एवं * प्राणो व्यानोऽपानोदानस्समान इत्येतत्सर्वं प्राण एवेति वचनादपानादयोऽपि प्राणस्यैव वृत्तिविशेषाः, न तत्त्वान्तरमित्यवगम्यते इति **भाष्यम्**। तत्कथं सुखादीनामात्मगुणत्वम्?

अत्रोच्यते—अश्रुतसिद्धान्तस्यपुस्तकनिरीक्षणादयं दोषः। तथाहि—**आत्मसिद्धौ** तावत्—यत्तु सुखादिनिदर्शनेन इत्यस्यानन्तरम्,

* स्वरूपोपाधयो धर्मा यावदाश्रयभाविनः। नैवं सुखादिबोधस्तु स्वरूपोपाधिरात्मनः ॥

यथा च बोधोपाधिरात्मभावस्तथोपपादितम् इति स्वाभाविकत्वास्वाभाविकत्वाभ्यां बोधमात्रस्य सुखादेश्च भेदमभिधाय *सुखदुःखे च नात्मधर्मौ इत्यादि तु वैभववादेन, मतान्तरेण वाऽभिहितम्। अन्यथा कथमेवमुपसंहारारम्भे ब्रूयात्—* तदेवमात्मस्वभावभूतस्य चैतन्यस्य विषयसंश्लेषविशेषगोचर एव निश्चयसंशयादिव्यवहारभेदः, तद्विशेषभाजि चैतन्ये वा इति। आगन्तुकत्वे इन्द्रियोपाधिकत्वाद्यविशेषात्। न च तथोक्तम्, अन्यथा चोक्तम्। नन्वश्रुतसिद्धन्तास्येति भवत एव दोषः; न स्यात्—न्यायतत्त्वशास्त्रप्रकरणं ह्यात्मसिद्धिः। तत्र च शास्त्रे **ज्ञाननिरूपणा**त्मकप्रथम-

पादषष्ठाधिकरणे सर्वं स्पष्टम् । **सूत्रभाष्ययोश्च** अयं भावः—तत्तदवस्थज्ञानजनकत्वावस्थाभेदभिन्नं मनः, तैस्तैर्व्यपदिश्यते इति । निर्व्यूढं च तुल्यन्यायमन्यत् * सप्त गतेः इत्यधिकरणे—* अध्यवसायाभिमानचिन्तावृत्तिभेदात् मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यत इति । उक्तं च **वेदार्थसंग्रहे**—* दुःखाज्ञानमला धर्माः प्रकृतेस्ते न चात्मनः इत्यत्र प्रकृतिसंसर्गकृतकर्ममूलत्वान्नात्मस्वरूपप्रयुक्तधर्मा इत्यर्थः । प्राप्ताप्राप्तविवेकेन प्रकृतेरेव धर्मा इत्युक्तम् इति । तथा तत्रैव—* भक्तिशब्दश्च प्रीतिविशेषे वर्तते । प्रीतिश्च ज्ञानविशेष एव इत्युक्त्वा * ननु च सुखं प्रीतिरिति नार्थान्तरम् । सुखं च ज्ञानविशेषसाध्यं पदार्थान्तरमिति हि लौकिकाः इति चोद्यं कृत्वा * नैवम्; येन ज्ञानविशेषेण तत् साध्यमित्युच्यते, स एव ज्ञानविशेषः सुखम् । एतदुक्तं भवति—विषयज्ञानानि सुखदुःखमध्यस्थसाधारणानि । तानि च विषयाधीनविशेषाणि तथा भवन्ति, येन विषयविशेषेण विशेषितं ज्ञानं सुखस्य जनकमित्यभिमतम्, तद्विषयज्ञानमेव सुखम् । तदतिरेकिपदार्थान्तरं नोपलभ्यते । तेनैव सुखित्वव्यवहारोपपत्तेश्च इत्याद्युक्तम् । *इच्छा द्वेष इत्यादि**भगवद्गीता**वचनं तु तत्रैव **भाष्यकारै**र्निर्व्यूढम्—*इच्छा द्वेषः सुखं दुःखमिति क्षेत्रकार्याणि क्षेत्रविकारा उच्यन्ते । यद्यपि इच्छाद्वेषसुखदुःखान्यात्मधर्मभूतानि, तथाऽप्यात्मनः क्षेत्रसंबन्धप्रयुक्तानीति क्षेत्रकार्यतया क्षेत्रविकारा उच्यन्ते । तेषां पुरुषधर्मत्वम्—* पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते इति वक्ष्यते इति । उक्तं च **श्रीराममिश्रैः षडर्थसंक्षेपे**—* वेद्यभेदधीभेदः सुखम्, अन्यादृष्टेः इत्यादि । उक्तं च **श्रीवरदविष्णुमिश्रै**रपि—* सुखदुःखे तावदनुकूलप्रतिकूलविषये ज्ञाने एवेति गुणेष्वन्तर्भाव एव—इत्यादि । उक्तं च **सङ्गतिमालायां श्रीविष्णुचित्तैः**—* एवं परमात्मनः पावकप्रकाशौष्ण्यादिस्थानीयं जीवस्वरूपमपि सुषुप्तिसंहारयोः परमात्मनो भेदकसंशयनिर्णयविपर्ययायथाज्ञानप्रत्यक्षानुमानागमरागद्वेषलोभमोहमदमात्सर्यधैर्यविचिकित्साश्रद्धालज्जाभयाद्यनन्तज्ञानप्रसरणरूपविकारभेदशून्यम् इत्यादि । तत्सिद्धं सुखादयो बुद्धिविशेषा इति ॥

ईश्वरज्ञानस्येच्छाद्याकारत्वम् ॥ तर्हि नित्यसर्वविषयस्य ईश्वरज्ञानस्य कथमिच्छाद्याकारत्वम्? इति चेत्; उपाधिविशेषाद्वा, अनित्यज्ञानान्तरसद्भावाद्वा, यथातथा वा भवतु । अभ्युपगतं हीन्द्रियजन्म अनित्यमपि ज्ञानमीश्वरस्यास्तीति **वरदविष्णुमिश्रादिभिः**; यदुक्तम्—* ईश्वरज्ञानस्यानित्यस्य सर्वविषयनित्यज्ञानगृहीतग्राहित्वात् इति, * अस्यापीन्द्रियजत्वात् इति च । **प्रज्ञापरित्राणे स्वयंसिद्धिप्रकरण** एवमुक्तम्—

* सुखदुःखे च विज्ञानविशेषाविति केचन । तन्न साधु शरीरस्य पादादिषु हि ते अमू ॥
तत्रतत्रात्मनस्तस्यासन्निधानादणुत्वतः । तद्धर्मभूतविज्ञानस्यापि नैवास्ति सन्निधिः ॥

इत्युक्त्वा, अनन्तरं जीवस्य बन्धमोक्षावस्थयोर्द्वयोरप्यणुत्वमुपपाद्य, * यावदाश्रयवर्त्येव विगीतं ज्ञानमुच्यते ॥
धर्मत्वे सति धीत्वेन ब्रह्मविज्ञानवत्ततः । गुणत्वमेव ज्ञानस्य न तु द्रव्यत्वसंभवः ॥
अतीतानागता अर्था अपि भान्ति च धीबलात् । संयोगमनपेक्ष्यैव सर्वत्राप्यर्थकृत्यकृत् ॥
तस्माद्विषयविषयिभावः संबन्ध एव हि । ज्ञानार्थयोस्तु संबन्धः सोऽखिलैरपि संविदः ॥
स्वतस्सर्वार्थसंबन्धिन्येषा धीः सर्वगोच्यते । अगत्वा सर्वसंबन्धि सर्वग्राहि प्रचक्षते ॥
स्वाश्रयायुक्तवस्तुष्वप्यस्याः कार्यकरत्वतः । गुणवैरूप्यसद्भावाद्द्रव्यता भाष्यभाषिता ॥
स्वाश्रयश्लिष्ट एवार्थे स्पर्शाद्याः कार्यकारिणः । दाहस्फोटादिकार्यं ते कुर्वते नेदृशी हि धीः ॥
गुणवैरूप्यमेवास्या द्रव्यशब्देन लक्ष्यते । भावान्तरं तदा प्राप्तं शक्तिवज्ज्ञानमप्यतः ॥

द्रव्यत्वपक्षे ज्ञानस्य परिणामानिरूपणात् । वैयर्थ्याच्च गुणो वा तद्भावान्तरमथापि वा ॥
देहदेशोत्थमप्येतत् सुखं दुःखं च देहिनः । आत्मनो धीमहिम्नैव भासेते ते तथातथा ॥
अनात्मकशरीरे तददृष्टेरात्मनो गुणौ । इति चेन्नाशरीरस्यासंभवान्नात्मनो गुणौ ॥
सकर्मकात्तु देहस्य गुणौ ते आत्मनो गुणात् । ज्ञानाद्भात इति प्राज्ञैः परिकल्प्यमिति स्थितिः ॥
कर्मिणश्चेतनस्यानुभाव्यत्वेनैव संभवः । तयोरिति प्रकाशेनाव्यभिचारोऽन्यथा वृथा ॥
इच्छादयो न देहैकदेशवर्तिन इत्यतः । आत्मनः स्युर्गुणा ज्ञानविशेषाश्च प्रकीर्तिताः ॥
जलाधारेष्वनेकेषु भास्करस्योपलब्धिवत् । अणोरप्यात्मनोऽनेकदेहेष्वस्तूपलम्भनम् ॥
योगिनां शक्तिवैचित्र्यादीश्वरानुग्रहेण वा । बहुदेहाः प्रवर्तन्त एकदेहवदञ्जसा ॥
अन्तरालाग्रहात्तेषां स्वात्मनश्च स्वयेच्छया । सन्निधानोपलब्धिः स्यात् तत्रतत्राहमित्यपि ॥
प्रतिदेहं विविक्तानि मनःप्रभृतिकान्यपि । इन्द्रियाणीश्वरेच्छाद्यैः प्रवर्तन्ते तु योगिनः ॥
मुक्तश्चानेकदेहान्संगृह्णाति स्वेच्छयैव तु । सर्वज्ञ एव कामान्नी कामरूप्यनुसञ्चरेत् ॥
प्रदीपः प्रभयेवात्मा ज्ञानेनाखिलमाविशेत् । इत्यादिव्यवहारश्च प्रकाश्यत्वनिबन्धनः ॥
अतीतानागता नार्थाः प्रभया भान्ति जातुचित् । ते च ज्ञानेन भान्त्यातो न साम्यं सर्वथा मतम् ॥
स्वरूपेणाणुरात्माऽयं गुणद्वारेण सर्वगः । उभयव्यवहारोऽपि युज्यते प्रत्यगात्मनः ॥
परमात्मा स्वरूपेणाप्यशेषव्यापकः श्रुतेः । सर्वान्तर्याम्यनन्तश्च तथाऽतः सर्वगो मतः ॥
अक्षव्याप्त्यभावेन सुषुप्तौ नार्थभासनम् । धियो धीमात्रमात्मा च तदा स्वैरं प्रकाशते ॥
अस्वाप्सं सुखमेतावत्कालमित्युत्थितः पुमान् । परामृशंस्तदाऽप्यात्मभासनं विविनक्ति हि ॥
मामन्यं च न जानामीत्येवमादिनिषेधधीः । मानुष्यादिविशिष्टात्मपरागर्थैकगोचरा ॥
अहंशब्दानुविद्धा धीः सुषुप्तौ नास्ति तत्र तु । प्रत्यगर्थस्वरूपं तु भात्यर्थाग्राहिधीगुणम् ॥

इत्यस्यानन्तरमहमर्थत्वमात्मानः प्रतिपाद्य, ज्ञानस्यानुमेयत्वपक्षं च निरस्य, पुनरपि सुखदुःखे प्रयुज्य—

*प्रतिकूलानुकूले तु दुःखमन्यच्च कर्मिणः । भोक्तुर्भातोऽनयोस्तेन प्रकाशाव्यभिचारिता ॥
प्रकाशव्यभिचारे तु तत्सत्त्वैव वृथा भवेत् । भोगार्थं तु तदुत्पत्तिर्भोगो न स्यादभासने ॥
इच्छाद्वेषप्रयत्नादिशब्दैर्धीरभिधीयते । अर्थभेदानुविद्धास्ते धीविशेषाः प्रकीर्तिताः ॥
न च देहैकदेशेषु प्रकाशन्ते सुखादिवत् । किंत्वात्मस्था न हीच्छा मे पाद इत्यस्ति धीर्नृणाम् ॥
पादे दुःखं हस्तयोर्मे सुखमित्यादिकाऽस्ति धीः । धीभेदास्तत इच्छाद्याः सुखदुःखे तनोर्गुणौ ॥

इत्युपसंहृतम् । पाणिपादादिदेहैकदेशवर्तितयोपलम्भेन सुखदुःखयोर्देहैकधर्मत्वम्, इच्छादेस्तु तथाऽनुपलम्भेन ज्ञानविशेषत्वोपपत्तिः, ज्ञानस्य स्वाश्रयादन्यत्रावर्तमानत्वम्, संयोगमनपेक्ष्य विषयविषयिभावेन प्रकाशकत्वम्, अद्रव्यत्वम् इत्याद्यर्था भाष्यादिविरुद्धाः परतन्त्रदन्तिदन्तादन्तितन्द्रालुतया परिगृहीताः । **न्यायसुदर्शने** तु तैरेव सुखदुःखयोरात्मधर्मत्वं चोक्तम्; तथा हि *भाष्ये मनुष्यादिपिण्डविशिष्टस्यात्मनः सुखित्ववचनं न विशेषणभूतशरीरस्यापि, आत्ममात्रस्यैव सुखाश्रयत्वात् । किंतु शरीरे वर्तमानस्यैवात्मनो वैषयिकसुखादिमत्त्वमिति तद्विशिष्टात्मनस्तद्वत्त्वमयमात्मा सुखीत्यनेनापि प्रतीयत इत्यर्थः ॥

अदृष्टमीश्वरप्रीतिकोपौ ॥ एवमदृष्टमपीश्वरप्रीतिकोपात्मकमेव। तद्विषयत्वप्रतिनियमादेव च क्षेत्रज्ञानां कर्मफलनियमोपपत्तिः। शास्त्रगम्यत्वाच्चास्य तथात्वमवसीयते। तथा च **द्रमिडाचार्यभाष्यम्**—*फलसंविभित्सया कर्मभिरात्मानं पिप्रीषन्ति इत्यादि। **भाष्य**मपि—*शास्त्रैकसमधिगम्य एव इत्यादि। **सूत्रकारै**रेव एतद्विशदमुपपादितम्—*फलमत उपपत्तेः इत्यादिभिः। यत्तु शरीरादिकं भोक्तृविशेषगुणप्रेरितभूतपूर्वकम् तद्भोगसाधनत्वात् स्रगादिवदिति सिद्धे ज्ञानाद्यनुपपत्तेः परिशेषाज्जीवसमवेतादृष्टसिद्धिरिति वैशेषिकादिभिः स्वीक्रियते, तदसत्; असदुक्तादृष्टादेव नियमोपपत्तौ विपक्षे बाधकाभावात्। न चान्यत्र भोगप्रसङ्गः; नियामकस्येच्छादेरध्यक्षत्वात्। एवं च सति अग्नीन्द्रादिदेवताप्रीत्यादेरपि श्रुतिसिद्धत्वेनैवादृष्टतया स्वीकारे न दोषः। तेषामपि फलप्रदातृत्वमीश्वराधीनम्। सर्वत्र साधारणमीश्वरप्रीत्यात्मकमदृष्टम्। तथा च स्वयमेवाह—*अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च इति। ईश्वरज्ञानस्य कोपाद्यात्मकत्वं विविधकर्मोपाधिकम्। न चैष दोषः; स्वाज्ञापरिपालनानुरूपगुणत्वात्। एवं सौशील्यवात्सल्यसौहार्दप्रभृतयोऽपि बुद्धिविशेषाः ॥

स्थायिभावादीनां बुद्धिपरिणामत्वम् ॥ भरतादिपठिताश्च रत्यादयः स्थायिभावास्तत्परिणामरूपाः। सञ्चारिभावेषु च निर्वेदादयः स्वावमाननादिरूपबुद्धिविशेषा एव। ग्लान्यादयस्तु शरीराद्यवस्थाविशेषाः। स्वप्नशब्दस्यापि स्वप्नदर्शनाभिप्रायत्वे बुद्धिविशेषविषयत्वं व्यक्तम्। सुषुप्त्यभिप्रायत्वेऽप्यमूर्छितस्य जीवतः समस्तज्ञानप्रसररहितावस्थाविषयत्वम्। एवं जाड्यादिष्वपि चिन्त्यम्। निद्रा तर्हि कस्यावस्था? चिन्तालस्यक्लमादिभिः संमीलतो मनसः, ज्ञानस्यैव वा। सैव सुषुप्त्यादिकारणम्। कथं तर्हि *अभावप्रत्ययालम्बना वृत्तिर्निद्रा इति पारमर्षं सूत्रम्? इत्थम्—समाधिमधिगच्छतो वृत्त्यन्तरवन्निरोद्धव्यत्वाभिप्रायम्, निरोधपरत्वात् प्रकरणस्येत्ययमर्थ **आत्मसिद्धा**वुक्तः। बुद्धेश्च निर्विषयत्वनिराश्रयत्वनिर्धर्मकत्वादिगोचरा दुरूहाः शून्यवादवदुपलम्भविरोधादिभिर्दूषणीयाः। असत्ख्यात्यात्मख्यात्यनिर्वचनीयख्यात्यादयश्च न्यायपरिशुद्धावस्माभिर्दूषिताः। तथा प्रमाणप्रमेयादिकं व्यवहारौपयिकमखिलमपि तत्रैव प्रपञ्चितमिति नेह प्रस्तूयते। वैशेषिकशैलीमनुसृत्य यथावस्थितपदार्थस्वरूपं ह्यत्र विशोध्यत इति ॥

माहाभाग्यवशंवदीकृतयतिक्षोणीशवाणीशता भूयाद्भोगसमेधकश्रुतिशिरःप्रासादमासेदुषी।
नित्यानन्दविभूतिसन्निधिसदासामोददामोदरस्वैरालिङ्गनदौर्ललित्यललितोन्मेषा मनीषा मम ॥

॥ इति श्रीन्यायसिद्धाञ्जने बुद्धिपरिच्छेदः पञ्चमः ॥

अथ अद्रव्यपरिच्छेदः ॥ ६ ॥

अद्रव्याणि दश ॥ अथाद्रव्यम्। संयोगरहितमद्रव्यम्। तत्र च त्रिगुणे सदृशविसदृशरूपोऽवस्थासन्तानः, कालेऽपि क्षणलवनिमेषत्वादिपरार्धपर्यन्तः, बुद्धौ प्रत्यक्षत्वानुमितित्वश्रौतत्वादिरूपः, शुद्धसत्त्वेऽपि केचित् त्रिगुणसमा इत्यनन्तप्रकारो यथाप्रमाणमनुसन्धेयः। एतदपेक्षया च **वरदविष्णुमिश्रै**रुक्तम्—*गुणाश्चानन्ताः इति। तेषां चानन्तवैषम्यस्य विविच्य निर्देष्टुमशक्यत्वात् शक्यांशस्य च द्रव्यनिरूपणेनैव निरूपितप्रायत्वात् तथाऽतिरिक्तनिरूपणस्य च लोकव्यवहारादृष्टाद्युपयोगाभावादन्यानि स्फुटपरिगणनीयान्यद्रव्याणि निरूप्यन्ते। तानि—सत्त्वरजस्तमांसि, शब्दादयः पञ्च, संयोगः, शक्तिः—इति दशैव। एवंविधेष्वेवाद्रव्येषु गुरुत्वद्रवत्वस्नेहसंस्कारसङ्ख्यापरिमाणपृथक्त्वविभागपरत्वा-

परत्वकर्मसामान्यसादृश्यविशेषसमवायाभाववैशिष्ट्यादीनां यथासंभवमन्तर्भावः । एष्वपि केषाञ्चिदनन्तर्भावः सयूथ्यसम्मतस्तत्रतत्र वक्ष्यते । सयूथ्याङ्गीकृतैः कैश्चित्सहैकत्वादयस्तत्त्वमुक्ताकलापे अद्रव्यभेदा अस्माभिरुक्ताः ॥

गुणानामद्रव्यत्वम् ॥ तत्र प्रकाशसुखलाघवादिनिदानमतीन्द्रियं शक्त्यतिरिक्तमद्रव्यं सत्त्वम् । तत् द्विधा—शुद्धमशुद्धं चेति । रजस्तमश्शून्यद्रव्यवृत्ति सत्त्वं शुद्धसत्त्वम्, तत् नित्यविभूतौ । रजस्तमस्सहवृत्ति सत्त्वमशुद्धसत्त्वम्, तत् त्रिगुणे । सत्त्वलक्षण एव लोभप्रवृत्त्यादिनिदानम्, प्रमादमोहादिनिदानम् इति विशेषणविनिमयेन रजस्तमसोर्लक्षणे । त्रीण्यप्येतानि यावत्प्रकृतिव्याप्तान्यनित्यानि नित्यसन्तानानि । तानि प्रलयदशायामत्यन्तसमानि, सृष्ट्यादौ विषमाणि, क्रमात्सृष्टिस्थितिसंहारोपयुक्तानि । ईश्वरसङ्कल्पादिसहकारिभेदात् परस्पराभिभवोद्भवसहकारित्वादिमन्त्येतानि । तत्तदृष्टोपष्टब्धपुरुषभेदादुद्भवसमत्वादिभावात् । यथोक्तं भगवता **पराशरेण**—* वस्त्वेकमेव इत्यादि, * तदेव प्रीतये भूत्वा इत्यादि च । **भगवद्गीतायां तद्भाष्ये** च एतद्विशदमनुसन्धेयम् । सात्त्विकराजसतामसकार्यगतिकर्माहारदानादिविभागोऽपि तत्रैव प्रपञ्चेन द्रष्टव्यः । एषां चाद्रव्यत्वं **शारीरकभाष्ये** व्यक्तम्—* रचनानुपपत्तेश्च इत्यादिसूत्रे * चकारादन्वयस्यानैकान्त्यं समुच्चिनोति इत्युपक्रम्य * यतसत्त्वादयो द्रव्यधर्माः, न तु द्रव्यस्वरूपम् । सत्त्वादयो हि पृथिव्यादिगतलघुत्वप्रकाशादिहेतुभूतास्तत्स्वभावविशेषा एव । न तु मृद्धिरण्यादिवद्द्रव्यतया कार्यान्विता उपलभ्यन्ते । गुणा इत्येव च सत्त्वादीनां प्रसिद्धिः इति । तथा **दीपे** च—* चकारात् सत्त्वादीनां द्रव्यगुणत्वेन शौक्ल्यादेरिवोपादानकारणत्वासम्भवं समुच्चिनोति । सत्त्वादयो हि कार्यगतलाघवादिहेतवः कारणभूतपृथिव्यादिगतास्तत्स्वभावविशेषाः इति । यत्तु * द्रव्यं षड्विंशतिविधं—सत्त्वरजस्तमांसि इत्यादिना सत्त्वरजस्तमसां द्रव्यत्वमुक्तं **वरदविष्णुमिश्रैः**, तत्सांख्याधिकरणसूत्रभाष्यादिविरोधाच्चासङ्गतम् ॥

शब्दस्याद्रव्यत्वम् ॥ शब्दोऽस्मदादिश्रोत्रग्राह्यः पञ्चभूतवर्ती । स द्विधा—वर्णात्मकोऽवर्णात्मकश्चेति । अकचटतपयादिप्रकाराभावसमुदायशून्यो वर्णात्मकः । स एव देवमनुष्यादिताल्वादिव्यङ्ग्यः । तस्यैव पूर्वोक्तवाचकत्वादिविचारः । स च क्षकारेण सह एकपञ्चाशत्प्रकारः । मातृकापाठे ळळयोरभेदात् पञ्चाशत्प्रकारतैवोच्यते । यरलादेरेव भेदभिन्नः क्यक्रादिः । सन्ध्यक्षराणां ह्रस्वाः सन्तीत्येव । प्रयुज्यन्ते प्राकृतादिभाषासु, निबध्नन्ति च मातृकायां द्रमिडादयः । संस्कृते वाचकत्वाभावात् मातृकाबहिष्कारः । एवमेषामेव यथाकथंचित् त्रिषष्टिवर्णता **मोक्षधर्मा**दौ गीयते । परमव्योम्नि च सहस्राक्षरत्वाम्नानं तु तत्रैव वर्णान्तरसद्भावेन वा, तेषामेव वर्णानां सन्दर्भसंयोगादिविशेषेण सहस्राक्षरत्वायुताक्षरत्वादिभेदेनोपपत्तेर्वा । अकचटतपयादिसमस्तप्रकाराभावसमुदायवानवर्णात्मकः । स च वादित्रवारिधरमारुतविभागादिव्यङ्ग्यः । द्विविधोऽपि श्रोत्रदेशसन्निहित एव मारुतव्यङ्ग्य इति पक्षे नभोनिष्ठस्यैव तस्य ग्राह्यत्वम् । वादित्रादिस्थित एव गृह्यत इति पक्षे पञ्चभूतवर्तिनोऽपि ग्राह्यत्वमुपपद्यते । तत्र दूरस्थशब्दग्रहणे श्रोत्रव्याप्तिरेव **वरदनारायणभट्टारकैरुक्ता**—

* दूरे शब्दः समीपे च प्राच्यां चेत्यादिदर्शनात् । गत्वा श्रोत्रेन्द्रियं तत्रतत्र शब्दग्रहक्षमम् ॥
आगता दूरतः शब्दमाला श्रोत्रेण गृह्यते । समवायाद्यदि तदैवं न गृह्येत दूरजा ॥
शब्दमान्द्यादिभिर्दूरोत्थत्वादिग्रहसंभवे । अपि प्राच्यां प्रतीच्यां चेत्येवं न ग्रहसम्भवः ॥ इति ।

स चायं शब्द आकाशेन सहोत्पद्यते, तद्विलये च विलीयते । वाय्वादीनामप्याकाशभागत्वान्न भूतान्तरोत्पत्तिविनाश-

योरस्योत्पत्तिविनाशौ । यद्वा आकाशनिष्ठस्याकाशेन सहोत्पत्तिविनाशौ वाय्वादिनिष्ठस्यापि तत्तद्भूतैस्सहेति । अत्यन्ततीव्रताद्यापन्नेषु शब्देषु विरुद्धधर्मविरुद्धप्रत्यभिज्ञानात् स्थिरत्वम् ।

* वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः । अभेदव्यापिनो वायोस्तथाऽसौ परमात्मनः ॥

इत्यादिभिः षड्जादीनां तीव्रत्वादिभेदानां व्यञ्जकवायुधर्मत्वं श्रूयते । अत एवाकल्पवर्तिनां सर्वगकाराणामेकत्वम्, एवमन्येषामपि । यत्तु श्रीविष्णुचित्तैरुक्तम्—* श्रोत्रमपि इतरेन्द्रियविषयवत् शब्दत्वगत्वमृदुत्वपरुषत्वमन्दत्वमध्यमत्वाद्यनन्तविशेषात्मकवस्तुग्राहकम् इति, तदपि निर्विशेषवस्तुग्रहणनिराकरणाभिप्रायम् । **उपनिषद्व्याख्याने** * त्वमेव प्रत्यक्षं ब्रह्मासि इत्यत्र वायोर्व्यञ्जकत्वस्यैवाभिधानात् । * नमस्ते वायो, त्वमेव प्रत्यक्षं ब्रह्मासि, त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि इति श्रुतिवशात्, * वेणुरन्ध्र इत्युपबृंहणवशात्, कल्पनालाघवाच्च व्यञ्जकत्वेन परैरभिमतो वायुविशेष एव तत्तद्द्रव्यविशेषघट्टनसंस्कारवशोत्पन्नतत्तच्छब्दगुणविशिष्ट उपलभ्यत इति भावयन्ति । संग्रहस्तु—अव्यक्तपरिणामविशेषशरीरकपरमात्मोपदानकाः सर्वे शब्दाः । न पुनः पृथग्द्रव्यतया गुणतया वा **भट्टप्राभाकरमतवत्** नित्याः न चानुपादानकाः ॥

वर्णानां स्फोटाद्युपादानकत्वनिरासः ॥ वर्णानां स्फोटाद्युपादानकत्वं चागमाध्यक्षविरुद्धम् । स्फोटे च नास्मदाद्यध्यक्षं प्रमाणम् । योगिप्रत्यक्षं तु सन्दिग्धम् । न चागमः । कल्पकास्त्वन्यथासिद्धाः । प्रत्येकसमुदायादिविकल्पा वाचकत्व इव स्फोटाभिव्यक्तावपि समाः । कल्पनं तु भवतामधिकम् । एतेन वाक्यस्फोटोऽपि स्फुटितः । शब्दादर्थं प्रतीम इत्यपि न निरंशैक्यविषयकमेकवचनम् । विपरीतोपलम्भात् । ब्रह्मण एव स्फोटशब्दवाच्यत्वे न नो विरोधः । अध्यासादयस्त्वद्वैतमतवत् दूष्याः । शाब्दस्मृतिः स्फोटाभावेऽपि सिध्यति । न च तैः सर्वं समञ्जसं वाच्यम्, न च पाणिन्यादिभिस्तथोक्तम्, इतरे तु नीरन्ध्रकायासिनोऽनादरणीयाः । उक्तं च **भट्टपराशरपादैः**—

* प्राक्प्रयोगानुसारेण प्रकृतिप्रत्ययस्वरान् । प्रकल्प्य वैयाकरणैर्व्युत्पाद्या पदपद्धतिः ॥ इति ॥

सत्त्वादिगुणोक्तनयाच्च शब्दानामद्रव्यत्वसिद्धिः ॥

शब्दस्य द्रव्याद्रव्यत्वपक्षतारतम्यम् ॥ ननु शब्दस्याद्रव्यत्वव्यङ्ग्यत्वे सिद्धान्तयितुं न शक्यम्; द्रव्यत्वकार्यत्वादेः श्रुत्यादिसिद्धत्वात् । तथा हि * यद्वेदादौ स्वरः प्रोक्तः इत्यादिभिर्वर्णानां वर्णान्तरोपादानत्वमुच्यते । न चाद्रव्यस्योपादानत्वम्, निमित्तत्वमात्रविवक्षायामुपादानप्रकृतिलीनादिस्वारस्यभङ्गः, निमित्तस्य प्रकृतिलयस्थानत्वाभावात् । न चायमुपचारः; बाधाभावात्, भाष्यकारवचनविरोधाच्च । तथा च **वेदार्थसंग्रहे**—* वेदाद्यन्तरूपतया वेदबीजभूतप्रणवस्य इत्युपक्रम्य * सर्वस्य वेदजातस्य प्रकृतिः प्रणवः । प्रणवस्य च प्रकृतिरकारः । प्रणवविकारो वेदः स्वप्रकृतिभूते प्रणवे लीनः । प्रणवोऽप्यकारविकारः स्वप्रकृतावकारे लीनः । तस्य च प्रणवप्रकृतिभूताकारस्य यः परः—वाच्यः स एव महेश्वर इति । सर्ववाचकजातप्रकृतिभूताकारवाच्यः सर्ववाच्यजातप्रकृतिभूतो नारायणो यः स महेश्वर इत्यर्थः इत्युक्त्वा, * अकारो वै सर्वा वाक् इति चोपादाय * वाचकजातस्याकारप्रकृतित्वं वाच्यजातस्य ब्रह्मप्रकृतित्वं च सुस्पष्टम् इत्युक्तम् । तथा **श्रीमद्गीताभाष्ये**—* अक्षराणामकारोऽस्मि—अक्षराणां मध्ये * अकारो वै सर्वा वाक् इति श्रुतिप्रसिद्धः सर्ववर्णानां प्रकृतिः अकारोऽहम् इति । तथा परिणामित्वं च शब्दस्योक्तं **भाष्ये**—* प्राकृतप्रलये स्रष्टुः प्रजापतेर्भूताद्यहङ्कारपरिणामशब्दस्य च विनष्टत्वात् इति । तथा **दीपे**ऽपि—*अव्याकृतपरिणामशब्दमयेषु वेदेषु इत्यादि । तथा * यस्य वेदाः शरीरम् इत्यादिभिरपि द्रव्यत्वं सिद्धम् । द्रव्यस्यैव हि शरीरत्वं शरीरलक्षणसिद्धम् । **आत्मसिद्धा-**

वपि—* दृश्यन्ते गुणा अपि शब्दगन्धसूर्यालोकरत्नप्रभादयो गतिमन्तो धर्म्यतिवर्तिनश्च । अतिसूक्ष्मो दूरगमनधर्मा भौतिको हि शब्दः । स खलु शङ्खमुखादेर्दवीयसोऽपि दृशां नोदनविशेषेण लोष्टादिरिव यावद्वेगमभिप्रतिष्ठते, स्पर्शरहितोऽपि इत्यारभ्य * शब्दस्य नभोगुणत्वप्रतिक्षेपो वायवीयत्वमुच्चारणानन्तरभावित्वं व्यञ्जकपक्षदूषणानि च विशदमुपपादितानि इति । एवं स्थिते वर्णानामुपादानत्वादिर्यथार्थ एवेति वा, काल्पनिक इति वा, दृष्टिविधिरिति वा, औपचारिक इति वा निर्वाहः स्यात् । तत्र न प्रथमः, वर्णनित्यत्ववादिनां मते उपादानोपादेयभावाभावात् । **नैयायिकमते** तु असमवायित्वाद्यभ्युपगमात्, सदनारम्भाच्च । भगवद्यामुनमुनिपक्षेऽपि वायोरेव वर्णोपादानत्वात्, **भाष्यकारै**रप्यहङ्कारपरिणामत्वमात्राभिधानात्, अव्यक्तपरिणामवचनवदारम्भपर्यायाभ्युपगमज्ञापकाभावात्, वचनेषु च वर्णानामनियतोपादानत्वोपादेयत्वदर्शनात्, विरुद्धोपादानोपादेयभावदर्शनात्, सिद्धे च विकल्पायोगात् । गोमयवृश्चिकादिनये च गौरवात्, भेदादृष्टेश्च । उपादानावच्छेदकतया उपादानत्वमिति चेन्न ; तथात्वेऽपि मृत्पिण्डगतपिण्डत्वादिवदनुपादानत्वम्; विशिष्टस्योपादानत्वेऽपि विशेषणानां विशिष्टत्वाभावेन तदभावात् । रूपवत्त्वाभिधानं चात्यन्तदुस्स्थम् ; तेजःप्रभृतिष्वेव रूपोत्पत्तेः, घटादिवत् चाक्षुषत्वप्रसङ्गात्, स्पर्शवत्त्वादिप्रसङ्गाच्च, सर्वत्रोपलभ्यमानस्य स्थानविशेषानुपपत्तेश्च । नापि द्वितीयः ; स हि सर्वस्य वा ? प्रपञ्चस्य वा ? वर्णानामेव वा ? नाद्यौ, स्ववचनविरोधादिभिः शून्याद्वैतादिमतभङ्गात् । नेतरः, आगमिकत्वाविशेषेण प्रकृत्यादावपि प्रसङ्गात् । अनुपपत्तेश्च सर्वत्र सूहत्वात्, आगमिकस्योपपत्तिबाध्यत्वाभावात्, तत्प्रामाण्यस्य च स्थितत्वात्, अनुपलम्भस्य चायोग्ये बाधकत्वाभावात्, अन्यथाऽतिप्रसङ्गाच्च । अस्तु तर्हि तृतीयः पक्षः । तथा हि ; केषुचिद्ग्रन्थेषु प्रणवांशभूताकारोकारादिविकारत्वं वर्णानामुच्यते, केषुचित् हृल्लेखांशभूतहकारादिविकारत्वम् । तथा च प्रक्रियान्तरेण श्रुतिः—* भूरिति ऋग्वेदादजायत । भुव इति यजुर्वेदात् । सुवरिति सामवेदात् । तानि शुक्रियाण्यभ्यतपत् । तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्त । अकार उकार मकार इति । तानेकधा समभरत्तदेतदोमिति इति । स्मृतिश्च—

* अकारं चाप्युकारं च मकारं च प्रजापतिः । वेदत्रयान्निरदुहद्भूर्भुवस्स्वरितीति च ॥ इति ।

तथा सर्वमन्त्राणां प्रणवबीजत्वं साधारणमुक्त्वा प्रतिमन्त्रं बीजाक्षराणि च कल्पैरुच्यन्ते । तथा प्रलये * मन्त्रं सञ्छाद्य रक्षति इति । छन्दांसि च वर्ण्यन्ते, तथा ततदक्षराणां सितरक्तपीतकृष्णादयो रूपविशेषाश्चाभिधीयन्ते । एकस्यैवाक्षरस्य विनियोगभेदेन मन्त्रभेदेन रूपभेदः प्रकीर्त्यते । एवं नियतानियतस्थानविशेषादयोऽपि । न च परमार्थतो रूपस्थानादिभेदो वर्णानाम्, किं तु तादृशानुसन्धानेनादृष्टविशेषो भवतीत्येतदेवाभिप्रेतम्, यन्त्रवृत्तान्तवत् । अन्यथा व्याकुलोपादानोपादेयभावरूपस्थानाद्युपदेशेन तेषामप्रामाण्यप्रसङ्गः । अतो दृष्टिविधानमेवात्रोचितमिति । अयमपि पक्षो विलक्षितः, तथा हि—* ओमित्येतदक्षरमुद्गीथमुपासीत इत्यादिवत् प्रणवं सर्वाक्षरोपादानमुपासीतेत्येवमादिरूपेण विधिर्न दृश्यते । किंतु तत्त्वोपदेशवचनव्यक्तिः । तथाऽपि दृष्टिविधित्वे ब्रह्मणो जगत्कारणत्वादावपि प्रसङ्गात् तत्त्वतर्कप्रतिपादक**भाष्यकार**वचसि च दृष्टिविधित्वं दूरापेतम् । अकारावच्छिन्नाकाशांशे वर्णोत्पत्तिरित्यादिकुशकाशावलम्बेन प्रकृतिविकृतिभाव इति चेत्, तर्हि तद्विशिष्टस्य प्रकृतित्वं तस्मिन्नुपचरितं स्यात्, दृष्टिविधिश्च गतः । अस्त्वेवमेवात्रेति चेत्, तर्हि वाचकजातप्रकृतिभूताकारस्य वाच्यजातप्रकृतिभूतपरमात्मवाचकत्वाभिधानमयुक्तम् । अतः प्रशंसापरतया तत्तत्कार्यशक्त्यादियोगेन वा प्रकृतिविकृतिभावरूपविशेषादिव्यपदेश औपचारिको गुणत्रयादौ लोहितशुक्लकृष्णादिव्यपदेशवत् । इत्येवं

स्थिते पञ्चमः पक्ष उच्यते–क्वचिद्याथार्थ्यम्, क्वचिद्भ्रान्तिः, क्वचिद्दृष्टिविधिः, क्वचिदुपचारश्चेति। अबाधिते प्रथमः। बाधिते निर्मूले च द्वितीयः। ध्यानविधौ प्रायशस्तृतीयः। बाधिते समूले संबन्धशालिनि चतुर्थ इति।

नन्वेवमपि न कश्चित् सिद्धान्तः, तथा हि–शब्दो द्रव्यम् अद्रव्यं वा? द्रव्यत्वे च किं कस्योपादानम्? रूपादि-संबन्धश्च कीदृशः? अद्रव्यत्वे तु कथमुपादानत्वरूपसंबन्धादिः? इति। अत्रोच्यते–सयूथ्यमतभेदेन द्रव्यम्, अद्रव्यं च शब्दः। द्रव्यत्वपक्षेऽपि वायवीयोऽवायवीयश्चेति। अवायवीयत्वेऽपि दीपादिधर्मभूतप्रभावत् भेर्यादिधर्मभूतः प्रहार-प्रकाश्य इत्येकः पक्षः। व्यजनेन पवनवत् प्रहारेण जातः प्रसरतीत्यपरः। पक्षद्वये चायं स्पर्शरहितः–* स्पर्शरहितोऽपि इति वचनात्। वायवीयत्वेऽप्यनुपलम्भात् स्पर्शाभावः। भेरीशब्द इत्यादिव्यवहारस्वारस्यात् प्रथमः पक्षः। तरङ्ग-मारुतादिवत् तथा व्यवहारोपपत्तावन्वयव्यतिरेकात् तदानीमेवोत्पत्तिरित्यपरः। व्यञ्जकस्य कारकस्य वा वायोरागमनावश्यं-भावात् तद्व्यङ्ग्यस्य तदुत्पाद्यस्य वा शब्दान्तरस्याभ्युपगमे गौरवाद्वाय्वन्तरादृष्टव्यञ्जकत्वादिशक्तिकल्पनवत् शब्दत्वमेव श्रावणत्वनिबन्धनं वायोरस्त्विति वायवीयत्वमिच्छतामभिमानः। तत्र चोपादानादिवादा दृष्टिविध्यादय एव। अवायवीय-द्रव्यत्वे तु यथोपदेशं कल्पभेदेनाण्डभेदेन वोपादानानियमः। तत एव रूपस्थानाद्यनियमोऽपि। अनुपलम्भस्तु रूपा-दीनामयोग्यत्वात्। अनुपलम्भबाधितांशे वा दृष्टिविधित्वादिस्वीकारः॥

अथाद्रव्यत्वपक्ष उच्यते। तत्र तावत् सत्त्वरजस्तमसामद्रव्यत्वाय भाष्यकारोक्ता युक्तयः शब्दस्यापि समानाः। अव्याकृताहङ्कारपरिणामव्यपदेशोऽपि आगन्तुकधर्मत्वाभिप्रायेण घटते। **आत्मसिद्धि**वचनं तु परमतेन एकदेशिमतेन वा घटते। **भट्टपराशरपादैः** वाक्यनिरूपणे शब्दस्य गगनगुणत्वमेवाभिहितम्–* गगनगुणशब्दादिस्वरूपस्थितीः प्रवर्त-यता भगवतैव योग्यार्थैदमर्थ्येन वाक्यप्रवाहस्य पूर्वमेवोपात्तत्वात् इति। * यस्य वेदाः शरीरम् इत्यादि तु देवताविशेष-विषयत्वेनोपपन्नम्। एवमेवोपादानरूपस्थानादिव्यवहारोऽपि। एवं * तस्य प्रकृतिलीनस्य इत्याद्युपपन्नं भवति। तत्तद्देव-ताक्षरेषु तत्तदुपादानत्वादिव्यवहारः उपचारदृष्टिविध्यादिना तत्प्रयोगानुकूलमुपपाद्यः। अनियतोपादानत्वादिकं तु तत्त्वे-ष्वेवानियतोपादानत्ववदागमतदाभासयोः प्रामाण्याप्रामाण्याभ्यां निर्वाह्यम्। आगमेषु न्यायतो नेयम्। एतेन अकार-हकारविवादो निरस्तः। तत्र च न विरोध इत्येके। तथा हि–अकार एव पूर्वतया परतया वा स्थित्वा षोडशवर्णमुप-लक्षयति स एव उपादानम्। अत एव च अचां हलां च मध्ये द्व्यात्मकस्य तस्य पाठः। अनुभवसिद्धं च प्रथमषोडश-योर्विपर्यस्तसंहितायां ह्रस्वम्। यथेकारादीनां यत्वादिकमिति। उक्तं चैतल्लक्ष्मीतन्त्रे। अत एव * अ इति ब्रह्म इति षोडशकशिरस्क एव अकार आम्नायते। अन्ये त्वेवं मन्यन्ते–न तावत् प्रणवे तस्य श्रवणमस्ति। नापि अःकारो वै सर्वा वाक् इत्याम्नातम्। नापि ओकारादेशः सविभक्तिकतया घटते। विष्णुरेव सर्वकारणमिति प्रमाणनिर्णीतम्। तस्य प्रथम एव वाचकतया प्रसिद्धः। यद्यपि क्वचित् प्रमाणभूते तन्त्रे हकारपरिग्रहोऽप्यस्ति; तथाऽपि तस्य परमात्माक्षरत्व-मभ्युपगम्येति मन्तव्यम्। प्रणवात्सर्वोत्पत्तिप्रकारस्तदंशद्वारेति श्रुत्यादिभिरनुसन्धेयः। तत्र त्रिवेदीप्रसङ्गे मकारपर्यन्त-निरूपणम्। अथर्वादिविवक्षायां तु नादशिरस्त्वम्। तदेवमकारगार्हपत्यगायत्रीप्रथमपादऋग्वेदस्वर्लोकादिप्रकारेणावा-न्तरगर्भभेदोऽनुसन्धेयः। अकारात् प्रणवोत्पत्तिः कथम्? इति चेत्, अकारवाच्यात् परमात्मनः प्रणवाधिष्ठातृदेवताया वा तदंशदेवतादीनां वोत्पत्तेरिति सुस्थम्। तदेवमद्रव्यत्वपक्ष एव शब्दस्य श्लाघ्यः। एवं च सति श्रोत्रवृत्तिर्वा, व्यञ्जकवाय्वागमनं वा, शब्दवद्भेर्याद्यवयवागमनं वा, शब्दवद्वाय्वागमनमेव वा, यथाप्रतीति भाव्यमिति॥

स्पर्शस्य त्रिविधत्वम् ॥ अस्मदादिस्पर्शनेन्द्रियग्राह्यविजातीयव्यावृत्ताद्रव्यं स्पर्शः । स त्रिविधः—शीतोष्णानुभयात्मकभेदात् । अप्सु शीतः । तेजस्युष्णः । क्षितिपवनयोरनुष्णाशीतः । भूतान्तरसंसर्गात् सर्वत्र स्पर्शसङ्करावभासः, न तत्त्वतः; तथाऽन्वयव्यतिरेकात् । एवं क्वचित् स्पर्शानवभासोऽपि । ततएव च त्वचा रत्नालोकाद्यग्रहणम् । तदुक्तमन्वयाधिकरणे भेदाभेदविरोधनिदर्शने **विवरणकारैः**—*यथा शीतं न कदाचिदप्युष्णम्, वार्य्यौष्ण्यं तु तत्स्थाग्नेः, न तु तत्त्वाकारात् । पाकजो हि गुणः पाकादपैतीति हि तत्त्वविदः । वह्निरूपानुपलम्भस्तुल्यरूपाभिभवात्, तत्स्पर्शोपलम्भस्तु अन्यस्पर्शानभिभवादित्युपलब्धिव्यवस्थाप्यमिति । अनुष्णाशीतोऽपि स्पर्श एव न तु शीतोष्णविरहमात्रम्, आकाशादावपि तथोपलम्भप्रसङ्गात्, वायुपृथिव्योः स्पर्शवत्त्वस्य श्रुत्यादिसिद्धत्वाच्च । नच स्पर्शसामान्यं तदिति वाच्यम्; निर्विशेषसामान्याभावात् । अनुपलब्धशीतोष्णविशेषं तदेवेत्यपि न वाच्यम्; अत्यन्तानुपलब्धस्य विशेषस्य कल्पकाभावात्, आगमाभावाच्च । केचित्तु सजातीयवृद्धिहेतुत्वस्य सामान्यतो दर्शनाच्छीतस्य वातवृद्धिहेतुत्वाद्वातोऽपि शीत इति वर्णयन्ति । तदसत्; रसादिसाम्ये प्रभावादिवैषम्यवदत्रापि स्वभाववैचित्र्योपपत्तेः; विपक्षे बाधकाभावात् । नच वायोः शैत्यानुपलम्भप्रसङ्गो बाधकः; हिमाद्यनुपहितदशायामातपाद्युपहितदशायां च प्रसङ्गस्येष्टत्वात् । हिमाद्युपहितदशायां तु शीतोपलम्भस्यौपाधिकतयाऽन्यथासिद्धत्वात् । अन्यथोष्णानुपलम्भप्रसङ्गादुष्णस्य कल्प्यत्वात् । किं तत्रानुग्राह्यमिति चेत्—उष्णारम्भकत्वम् । न ह्यनुष्णमुष्णद्रव्योपादानमस्ति उष्णस्य च तेजसो वायुरुपादानमिति । तदेवमनुष्णशीतो वायुः पृथिवी च ॥

पुनर्द्विविधत्वम् ॥ स्पर्शः पुनर्द्विधा—पाकजोऽपाकजश्चेति । पृथिव्यां पूर्वः, उत्तरेषु त्रिषु परः । तत्र अमृतगरलकपिकच्छूतूलोपलगोब्राह्मणचण्डालादिस्पर्शविशेषाः अपाकजभेदाः । अनुष्णशीतस्पर्शवत्त्वमात्रेण प्रथममव्द्यः पृथिव्युत्पत्तिः । परस्तात्पाकभेदाद्भेदोऽन्वयव्यतिरेकादिसिद्धः । मृदुकठिनभावादयोऽपि स्पर्शविशेषा एव, स्पर्शनेनैव तदुपलब्धेः चक्षुषा तु तदविनाभूतरूपादिग्रहणद्वारा स्पर्शमात्रस्येव तेषामपि यथायथमनुमानमेव । करकादिकाठिन्यं पृथिवीयोगात् । मृदुपवनादिव्यवहारो वेगमान्द्यादिना । केचित्तु तेषां संयोगविशेषत्वमातिष्ठन्ते । गोब्राह्मणचण्डालादिषु कथं स्पर्शभेद इति चेत्, तदधीनशुद्ध्यशुद्ध्यादिभेदात् । जातिभेदादेव तदुपपत्तिरिति चेत्, जातिभेद एव कुतः? मातापितृसंबन्धप्रकारभेदादिति चेन्न; मानसब्राह्मणादिषु तदभावात् । यद्वा धर्माधर्मतारतम्याधीनसत्त्वरजस्तारतम्यात् शक्तितारतम्याद्वा शुद्ध्यादिसिद्धिरिति न स्पर्शभेदास्ते । अपाकजस्पर्शेषु तु तारतम्यं संसर्गादिभेदात् । पवनसलिलयोरपि पाकजस्पर्शः किं न स्यात्? इति चेत्, औष्ण्यशान्तौ स्पर्शान्तरस्य पाकजस्य पृथिवीवदननुवृत्तेः । औष्ण्यमेव हि तर्हि पाकजं तत्र स्यादिति चेन्न; वायुशैत्यवदौपचारिकत्वोपपत्तेरिति । एवं पृथिव्यामपि शीतोष्णस्पर्शोपलम्भ औपाधिकः, उपाधिसन्निधिमन्तरेण कदाचिदप्यनुपलम्भात् । पाकजत्वे तु पश्चादपि रूपादिवदनुवृत्तिः स्यात् । निर्मृष्टेऽपि सलिले निर्वाणेऽपि शिखिनि पार्थिवेषु शीतोष्णस्पर्शावुपलभ्येते इति चेत्; सूक्ष्मसंश्रयणात् क्षणान्तरे तु तावतोऽपि निवृत्तेरिति ॥

रूपरसगन्धाः ॥ अस्मदादिचक्षुरिन्द्रियैकग्राह्यविसजातीयव्यावृत्तमद्रव्यं रूपम् । तच्च सितरक्तकृष्णपीतभेदम् । सितादिप्रतिपत्तिव्यवहारास्तल्लक्षणानि । तत्र सलिलकलधौतशङ्खशुक्तिशशाङ्कादीनां रूपविशेषाः सितभेदाः । हुतवहजपादाडिमबन्धुजीवविद्रुमपद्मरागादीनां रक्तभेदाः । काञ्चनकाञ्चनारहरितालहरिद्रादीनां पीतभेदाः । मरतकमधुकरजलधरतिमिरतमालदूर्वादीनां कृष्णभेदाः । पीतरूपमपि रक्तावान्तरभेदं केचिदिच्छन्ति; रोहितशुक्लकृष्णानामेव तेजोबन्नेषु श्रवणात् । प्रकारान्तरेण रूपं द्विधा—भास्वरमभास्वरं चेति । तेजोगतं भास्वरम्, क्षितिसलिलगतमभा-

स्वरम् । तेजसि रूपं रक्तभास्वरम्, सलिले तु शुक्लमभास्वरम्, पृथिव्यां बहुविधमभास्वरम् । अत्रापि संसर्गादनियतभासादि । चित्रं नाम पञ्चमं रूपमिति **वैशेषिकादयः**, तदसत्; एषामेव एकसङ्घातवर्तिनां समुदायविशेषतस्तत्प्रतीतिव्यवहारयोरुपपत्तेः । नानावर्णचूर्णपुञ्जरञ्जितस्थलादिविलक्षणप्रतीत्यभावात् । अवयविरूपारम्भकतया भवद्भिस्तेषामेवाभ्युपगतत्वात् । अवयव्यभ्युपगमेऽपि नानारूपाश्रयत्वस्य प्रतीतिव्यवस्थाप्यत्वात् । संयोगतदभावादिवद्भागभेदस्य उपलभ्यमानस्य नियामकत्वात् । व्याप्यवृत्तिरूपान्तरजातीयरूपारम्भकतया बाधे तु गुणत्वादिमात्रेण संयोगादावपि प्रसज्यते । एवमेव चित्ररसगन्धानामपि निर्वाहः । अस्मदादिजिह्वैकग्राह्यविसजातीयेतरो रसः । स षोढा—मधुराम्ललवणतिक्तोष्णकषायभेदात् । एषां लक्षणं पूर्ववत् । तत्र इक्षुक्षीरगुडादिरसा मधुरभेदाः । चूतचिञ्चामलकादिरसा अम्लभेदाः । सैन्धवलवणाब्धिविकारादिरसा लवणभेदाः । किम्पाकनिम्बादिरसास्तिक्तभेदाः । शुण्ठीमरीचिसर्षपादिरसा उष्णभेदाः । हरीतकीविभीतकचूताङ्कुरादिरसाः कषायभेदाः । तिक्तावान्तरभेद एवोष्णादिरिति केषांचित्प्रतिभासः । **आयुर्वेद**-तश्चैते विशदमनुसन्धेयाः । अस्मदादिघ्राणग्राह्यविसजातीयेतरो गन्धः । स च द्विविधः—सुरभिः असुरभिश्चेति । तयोरपि लक्षणादिकं पूर्ववत् । पटीरमृगमदघुसृणचम्पकादिगन्धाः सुरभिभेदाः । पूतिविस्रादिगन्धा असुरभिभेदाः । अयं च गन्धः पृथिव्येकवृत्तिः । अयो दहतीतिवत् सलिलपवनादिषु चम्पकपाटलादिसंसर्गात् तदुपलम्भः । तत्तत्संसर्गाधीनत्वस्य अन्वयव्यतिरेकसिद्धत्वात् । स्यादेतत्, पञ्चीकरणादेव पञ्चभूतेषु स्पर्शादिसङ्करः प्रागेव सिद्धः । ततश्चेदानीं व्यञ्जकविशेषवशात् क्वचित्क्वचित् गुणो व्यक्तरूप उपलभ्यतां मृगजलादिवदिति चेत्, अस्त्वेवम् । किमेतावता भूतान्तरेषु गुणानां स्वाधारसंसर्गमन्तरेण वृत्तिरुपपादिता? संसर्गस्तु प्राक्तन इदानीन्तनो वा इति विचार्यम् । तत्र यथायथं द्वयमपि । पूर्वस्यागमसिद्धत्वात् पाटलादिसंसर्गस्य चेदानीमध्यक्षसिद्धत्वात् ॥

औपनिषदानां पाकजगुणप्रक्रिया ॥ अथौपनिषदानां पाकजगुणप्रक्रिया । उत्पत्तिदशायां कृष्णरूपा पृथिवी * यत्कृष्णं तदन्नस्य इति श्रुतिस्वारस्यात्, **भाष्यकारै**श्चाकाशनैल्यस्य पञ्चीकरणलभ्यपृथिव्यंशनिबन्धनत्वाभिधानात्, पञ्चीकरणात् प्राक्च पाकजत्वायोगात् । प्रथममेव विशेषयोगिनी कथं सा जातेतिचेत्, सलिलदहनरूपस्पर्शविशेषावालोक्य सन्तोष्टव्यम् । अस्त्वेवं प्रथमं कृष्णा पृथिवी, स्पर्शरसगन्धास्तदानीं तत्र किंप्रकाराः? उच्यते; स्पर्शस्तावत् वायाविवानुष्णाशीतमात्रः तद्वदेवापाकजश्च । विषामृतदुस्स्पर्शादिस्पर्शविशेषा एव पाकाधीनाः । अनुष्णाशीतमात्रं हि सर्वेष्वपि पार्थिवेषूपलभ्यते । अतस्तावन्मात्रस्य स्वाभाविकत्वमुचितम् । रसोऽपि मधुर एव प्राथमिकः, विशेषादर्शने कारणभूतजलगतमाधुर्यानुविधानस्योचितत्वात् । स्पर्शवदस्यापि प्राचुर्योपलम्भात् । महापृथिवी सर्वा प्रायशो मधुरैव ह्युपलभ्यते । आम्ललवणादयः काचित्का रसविशेषाः पाकाधीनाः । तथा मधुरविशेषा अप्यन्वयव्यतिरेकाविशेषात् । गन्धोऽपि सुरभिरेव प्राथमिकः । अस्यैव महापृथिव्यां पूर्ववत्प्राचुर्यात् । पूतिविस्रप्रभृतयोऽसुरभिविशेषाश्च पूर्ववत् पाकाधीनाः । एवमनुष्णाशीतकृष्णमधुरसुरभिस्वभावा प्रथमं पृथिव्युत्पन्ना । अतः पाकभेदेनानुष्णाशीतस्यैव भेदैर्दुष्परिमर्शादिस्पर्शैः, कृष्णभेदैश्च मरतकहरिततमालकुवलयादिरूपैः, अकृष्णैश्च सितरक्तादिभिः, मधुरभेदैश्च इक्षुक्षीरगुडादिरसैः, अमधुरैश्चाम्ललवणादिभिः, सुरभिभेदैश्च चम्पकमृगमदादिगन्धैः, असुरभिभिश्च पूतिविस्रादिभिः संबध्यते । अस्यां च गन्धरसरूपस्पर्शशब्दाः कचित् सहैव उत्पद्यन्ते, सहैव च विनश्यन्ति । कचिच्चान्यतमानुवृत्तिः, अन्यतमनिवृत्तिश्च । यथोपलम्भं पाकवैषम्यस्याङ्गीकर्तव्यत्वात् । अत्र चैकेनाग्नि [संयोगे] संयोगेन पूर्वसमुदायनिवृत्तिः,

अन्येनोत्तरसमुदायोत्पत्तिरित्येके । एकेनैव पूर्वनिवृत्तिरुत्तरोत्पत्तिरपीति वयं वदामः । यथा एकयैव सामग्र्या उत्पत्स्यमानप्रागभावमात्रभेदभिन्नयाऽनेककार्योत्पत्तिर्निर्व्यूढा, तद्वत् प्रध्वंसमानतत्तत्स्वरूपसहकारिभेदभिन्नयाऽनेकप्रध्वंसोऽप्युपपन्नः । उभयविधप्रागभावादिभेदभिन्नया च तथैव पूर्वसमुदायनिवृत्तिरुत्तरसमुदायोत्पत्तिश्चोपपन्ना । निवृत्तेश्च उत्तररूपमात्रतयाऽस्माभिरभ्युपगमात् परमार्थतो न कार्यद्वैविध्यमस्ति; प्रतियोगिभेदभेदतो व्यपदेशभेद एव केवलम् । यत्तु प्राकट्यनिरासप्रसङ्गेन **भट्टपराशरपादै**रुक्तम्—* न खलु पूर्वरूपविनाशिकैव व्यक्तिरुत्तरोत्पादिका, पाकलक्षणाग्निसंयोगानां भिन्नत्वात् इति, तत् परमतानुसारेणेति मन्यामहे; एकस्यैवानेककार्यहेतुत्वोपपादनादिति । पाकावान्तरभेदाच्च गन्धाद्यवान्तरभेदसिद्धिः । पाके च पीलुपिठरपाकभेदात् विप्रतिपद्यन्ते; तत्र नोभयमप्यस्माकम्, परमाण्ववयविनोरभावात् । अतः संहितावस्थायां पाको विभक्तावस्थायां वा इति चिन्ता परिशिष्यते; तत्र यथासंभवमुभयमपि । प्रथमं तावद्घटादीनामशिथिलानामेव पाकभेदेन रूपभेदोपलम्भादुपलम्भस्तावद्**वैशेषिकाणा**मपि समः । किंतु अवयविरूपादीनां यावदाधारभावित्वनियमाभ्युपगमादवयवविशेषगुणैरवयविविशेषगुणारम्भनियमाभ्युपगमाच्च पूर्वावयविनः परमाणुपर्यन्तो नाशः द्व्यणुकादिक्रमेण पुनरन्यस्यादृष्टवशादारम्भ इति कल्पितम् । द्वितीयमपि दहनसन्निकर्षमात्रेण विलयविशरणादीनामेव मधूच्छिष्टानां पाक उपलम्भादिति । एतेन एकदेशपाकोऽप्युपपन्न इत्युक्तं भवति ॥

संयोगः ॥ संयुक्तप्रत्ययनिमित्तं संयोगः । स च स्वरूपमात्रस्वरूपो नैरन्तर्यमात्रस्वरूपो वेति केचित् । तत्र न स्वरूपमात्रम्; स्वरूपयोः सतोरेव पूर्वोत्तरकालयोः संयुक्तप्रत्ययाभावात् । नापि द्वितीयः; भावान्तराभाववादिनं प्रत्यविवादादेव । सोऽपि ह्यासन्नदेशसंयोग एव ह्यस्मन्मते स्यात् । देशेनापि नैरन्तर्यमेव स्यादिति चेन्न; तत्राप्युक्तविकल्पानतिक्रमात् । तत्रापि हि स्वरूपातिरिक्तस्य नैरन्तर्यस्य भिन्नदेशविशेषसंयोगाभावरूपतया सिद्ध एव संयोगः । अस्य च स्वाभावसादेश्यमुपलभ्यमानमंशभेदप्रयुक्ततया न विरोधावहम् । निरवयवेष्वपि संयोगहेतुरौपाधिकोंऽशः । न चोपाधावप्येवमित्यनवस्था; ज्ञप्तावुपाधिसंश्लेषमात्रातिरिक्तानपेक्षणात् । उत्पत्तावन्येनावच्छेदेऽपि बीजाङ्कुरानवस्थावददोषात् । यद्वा निरवयवेष्वभिदुरतया पृथङ्निर्देशायोग्यत्वात् स्वाभाविकोंऽशभेदो भवतु । नचैवं सति एकत्वानेकत्वमवयवित्वं सङ्घातत्वं वा प्रसज्यत इति वाच्यम्; तादृशस्यांशस्य भेदव्यपदेशहेतुत्वाभावात् । एतावदेकानेकत्वं प्रमाणबलात् दुरपह्नवमभ्युपगतं वा भवतु । यद्वा यन्निरवयवं तत् नैयायिकाद्यभिमतजातिवत् सर्वत्र संयोगिनि संपूर्णं वर्तताम् । तदेतत् **सूत्रकारै**रेवाशङ्क्य परिहृतम्—* कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा इत्यादिना । तत्र च **दीपः**—* सकलेतरविसजातीयं श्रुत्येकसमधिगम्यं सर्वशक्तियुक्तं ब्रह्म निरवयवमपि कार्यं च भवत्यन्यच्च भवतीति परिमितशक्तिवस्तुचोद्यं न तत्र प्रसज्यते । यथा जातिवादिनो जातिरेव अमूर्ता खण्डमुण्डादिष्वत्यन्तविलक्षणेष्वनन्तेष्वपि परिसमाप्यैव वर्तते न तत्रेतरवस्तुचोद्यमिति जगत्कारणत्वं संभवति इति । तत्रैवाधिकरणे * स्वपक्षदोषाच्च इति सूत्रे—* प्रधानादिकारणपक्षे दोषाच्च ब्रह्मैव कारणम् । तत्रैव लौकिकवस्तुविसजातीयत्वेन प्रधानादेरुक्तदोषा नैव प्रसज्येरन् इत्युक्तम् । एतेन प्रधानपरमाणुवासनासंविद्ब्रह्मप्रभृतीनां निरंशानामेव यथाभागपरिणामावरणानावरणानेकविषययोगादिरुपपद्यत इत्युपरम्यते, तद्वदेव संयोगस्य संयोगिनो वा पूर्णस्य नानेकसंबन्धोऽनुपपन्नः । क्षणिकपरमाणुवादिनाऽपि पुञ्जदशायामेकस्य परमाणोरंशभेदमन्तरेणानेकनैरन्तर्यमभ्युपगतम् । विज्ञानवादिनामेकस्यानेकाकारत्वम् । माध्यमिकस्य तु संयोगे को विशेषप्रद्वेषः? इदमेव शून्यत्वद्वारं बस्त्विति चेन्न; शून्यस्यासदसतयोरुक्तौ विरोधात् । द्विष्टं न किञ्चित् दृष्टमिति चेन्न; अस्यैव दृष्ट-

त्वात्। न चान्यस्य तथात्वादर्शनादन्यस्यापि तथात्वाभावः; प्रत्येकं प्रतिनियतासाधारणस्वभावानां भङ्गप्रसङ्गादिति ॥

स चायं संयोगो द्विधा—कार्योऽकार्यश्चेति। पूर्वः परिमितानां परिमितापरिमितानां च। उभयप्रेरणादन्यतरप्रेरणाद्वा; यथा मेषयोः स्थाणुश्येनयोर्वा। संयोगजमपि संयोगं **वैशेषिका** वर्णयन्ति। तदसत्; अवयव्यभावात्। अवयवसंयोग एव हि सङ्घातस्य संयोगः। उपलम्भोऽपि इदानीमेकदेशेन संयुक्तमित्येव। अस्तु वाऽवयवि; तथाऽपि येन हेतुना यदैवावयवः संयुज्यते, तेनैव तदैवावयव्यपि संयुज्यताम्; नहि हस्तपुस्तकसंयोगानन्तर्यं देवदत्तपुस्तकसंयोगस्योपलभ्यते। हस्तस्पन्देनैव कारणकारणवर्तित्वादसमवायितामापन्नेन देवदत्तपुस्तकसंयोगस्याप्युत्पत्तिरुपपद्यते। हस्तस्पन्दे च तदवच्छिन्नशरीरस्यापि स्पन्दसिद्धेस्ततो वा तत्संयोगः; कर्मणोऽपि संयोगादिवद्यथोपलम्भं स्वाभावसादेश्यमङ्गीकर्तव्यम्। यदा चान्यानीतपुस्तकेन देवदत्तहस्तः संयुज्यते तदा देवदत्तेनापि कथं न युज्येत? हस्तस्य तस्य च निष्पन्दत्वाविशेषात्। आभिमुख्यस्याप्युभयोरविशेषात्। एतेन विभागजविभागोऽपि निराकृतः। विभागं चान्तर्भावयिष्यामः। अकार्यस्तु संयोगो निरन्तरयोर्निष्पन्दयोर्द्रव्ययोः। स नास्तीति **वैशेषिकादयः**। विभवो मिथस्संयुक्ता निरन्तरद्रव्यत्वात्संप्रतिपन्नवत्। असंयुक्तत्वे सान्तरत्वप्रसङ्गः। यश्च विभूनां नैरन्तर्यमात्रमिच्छेत् तेनापि तत्रायमपरिहार्यः। अस्मन्मते नैरन्तर्यस्य समासन्नदेशसंयोगरूपत्वात्, गुणादिषु तु निरन्तरत्वबुद्ध्यभावात्। नच हेत्वभावात्संयोगाभाव इति वाच्यम्; ज्ञापकस्योक्तत्वात्। कारणस्य निवृत्तौ कार्यमात्रस्य निवृत्तिरिति ईश्वरज्ञानचिकीर्षाप्रयत्नेषु भवद्भिरेव प्रतिपादनाद्विभूनामपि स्वकार्यजननादेरीश्वरानुप्रवेशनिबन्धनत्वात्। औपनिषदश्चायमर्थः। तथा च श्रुतयः—* सर्वव्यापी च भगवान्, * अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः इत्यादिकाः। न च * बहिश्च इति वचनात् ईश्वरज्ञानव्यतिरिक्तानां सर्वेषामप्यविभुत्वमिति वाच्यम्; बाह्यदेशवस्त्वेव बहिर्व्यपदेशेऽपि मुख्यान्वयत्वात्। अन्यथा ईश्वरधर्मभूतज्ञानस्याप्यविभुत्वप्रसङ्ग इति। अनुमानान्तराणि च—विगीतं विभुद्रव्यं विभुद्रव्यसंयोगवत् द्रव्यत्वाद्धटवत्। न च व्याप्तिबलात् स्वेन संयोगप्रसङ्गः; विभुद्रव्याणामनेकत्वात् स्वेतरविभुद्रव्यसंयोगेन साध्यसिद्ध्युपपत्तेः। तथा विगीतमीश्वरसंयुक्तम्, द्रव्यत्वाद्धटवत्, ईश्वरो वा कालादिसंयुक्तः द्रव्यत्वाद्धटवत्। नच कालसंयोगे कालविकार्यत्वप्रसङ्गः; तस्यापि तदधीनविकारत्वात्, * कालं स पचते तत्र न कालस्तत्र वै प्रभुः इत्यादिविशेषवचनाच्चेति। यत्तु **भट्टपराशरपादै**र्मनोणुत्वसमर्थनदशायामजसंयोगो निरस्तः, तदपि * युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्, * आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम् इत्य**क्षपादकणभक्ष**सूत्रोपादानप्रसङ्गेन तत्तत्सिद्धान्तसंस्कारोन्मेषवशादिति मन्यामहे। अत एव हि तत्र कालस्वरूपाप्रत्यक्षत्वमप्युक्तम्। यत्तु तत्र * न चाजसंयोगमन्तरेण किञ्चिदनुपपन्नम् इत्युक्तम्, यच्च स्तम्भादेर्विभुसंयोगे किं मानम्? न प्रत्यक्षम् प्रत्यक्षाप्रत्यक्षसंयोगत्वात्। न चानुमानम्—मूर्तद्रव्याश्रयनियमादिति चेन् इत्यत्र * परत्वापरत्वशरीरगतितद्विकारोर्ध्वज्वलनादीनां संभवार्थं विभुसंयोगावश्यम्भावात् इति—तत्र पूर्वमेव दत्तमुत्तरम्। यथा च मूर्तगतविकारविशेषसिद्ध्यर्थं विभुसंयोग उक्तः, तथैव कालादिगतविकारसिद्ध्यर्थमपि ईश्वरसंयोगोऽवश्याभ्युपेत्यः। अन्यथा ईश्वरशरीरत्वमपि कालादेर्न स्यादिति ॥

शक्तिः ॥ अथ शक्तिः। सर्वकारणानां कारणत्वनिर्वाहकः कश्चिदद्रव्यविशेषः शक्तिः। तर्कागमाभ्यां तत्सिद्धेः। प्रतिबन्धकमणिमन्त्रादिसन्निधौ स्वरूपसहकारिवैकल्याभावेऽपि यदुपरोधाद्दहनो न दहति सा ह्यतीन्द्रिय शक्तिः। अयस्कान्तदुन्दुभिस्वनादिवृत्तिः। तेषु चैवं विशदमवगम्यते। प्रतिबन्धकाभावपर्यवसायिनां शक्तितद्धर्मनाशा

तदुत्पत्त्यनुत्पत्त्यादिप्रसङ्गानामन्तत आगमेन प्रतिहतिरिति । नन्वस्तु तत्सिद्धिः, तथाऽपि सा प्रतिबन्धकेन नाश्यते वा, तद्धर्मो वा नाश्यते, विरोधिनोः शक्त्यन्तरधर्मान्तरयोर्वा उत्पत्तिः, अविशिष्टाऽपि वा कार्यं न करोतीति पञ्चसु पक्षेषु कोऽभ्युपगम्यते? इति सौहार्देन पृच्छाम इति चेत्, अस्त्वेषामन्यतमः । तर्हि पुनश्शक्त्युत्पादानियतकारणत्वप्रसङ्ग-परिहारः कथमिति चेत्; इत्थम्—प्रतिबन्धकाभावसहिताद्वह्निस्वरूपात्तदुत्पत्तिरप्रतिबद्धा शक्तिर्वा कार्यकरी इत्यादि-भवन्निर्वाहस्यैव शक्तौ सुवचत्वात् । सा तर्हि किमर्थं कल्प्यत इति न च वाच्यम्; दत्तोत्तरत्वात् । ननु शक्तिः शक्ता वा? नवा? पूर्वत्र शक्तियोगात् शक्तौ सा च शक्तिस्तथेत्यनवस्था, उत्तरत्र तस्याः कारणत्वं न स्यात्, अशक्तत्वात् । अन्यथा सिकताभ्योऽपि तैलमुत्पद्येत शिलाशकलादिभ्यश्चाङ्कुरादिकमिति चेन्न; शक्त्यन्तराभावेऽपि कारणानां कार्या-नुगुण्यरूपतया तस्याः सिद्धत्वात् । अन्यथा उष्णत्वमुष्णम्? नवा? पूर्वत्र अनवस्था, उत्तरत्र कार्यं न जनयेत् शीतव-दित्यादिप्रसङ्गस्यापि दुर्वारत्वात् । उक्तं चैतत् भगवता **पराशरेण**—

* शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः । यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥
भवन्ति तपतां श्रेष्ठ ! पावकस्य यथोष्णता इत्यादि ।

प्रमाणसिद्धस्वभावा न कथंचिदपि परित्यागमर्हन्तीत्यर्थः । एवम**हिर्बुध्न्यसंहिता**यामपि—* शक्तयः सर्वभावानामचिन्त्या अपृथक्स्थिताः इत्यादि । एवं सर्वत्रानुसन्धेयम् ।

इतरे त्वेवं वदन्ति—सर्वकारणानां सन्निधिमात्रोपकारिणी शक्तिः । तामन्तरेण निस्सारमखिलम्; अशक्तत्वात् तथाऽन्वयव्यतिरेकात् । अत एव सा विशेषणतया स्फुरन्त्यपि वस्तुतः प्रधानभूता । सर्वत्रैका; कल्पनालाघवात् । तदुक्तम्—* एकैव तु परा शक्तिर्ज्ञानानन्दक्रियामयी इति । निर्विकारा; तत्संबन्धिगतत्वात् विकाराणाम् । न शक्त्यन्तर-मपेक्षते; शक्तत्वादनवस्थानाच्च । अपर्यनुयोज्यवैभवा चेयम्; अघटितघटकतया धर्मिग्राहकसिद्धेः । एकत्वादेव देश-कालापरिच्छिन्ना । तदुक्तम्—* व्यापिका तु परा शक्तिर्व्याप्यं विश्वमिदं जगत् इति । सर्वाकारोल्लासिनीत्वात् वस्तु-परिच्छेदरहिता । अचिच्छक्तिरूपेण सकला । निष्कृष्टचिच्छक्तिरूपेण निष्कला । तां कार्यकारणरूपप्रपञ्चकञ्चुकितां प्रपञ्चप्रलयवतीमेव तत्परतो भावयेदिति । तदन्ये न मन्यन्ते । तथा हि—न तावत् प्रधानभूता; तद्विशिष्टस्यैव तत्त्वात् । अत एव नोपादानत्वादिकमप्यस्याः । प्रागुत्तरावधिव्यतिरिक्तपरिणामस्तु नेष्यत एव । नापि सर्वत्रैका; प्रतिवस्तुनियत-तयैव तत्सिद्धेः । नापि सर्वत्र नित्या; अनित्येषु नित्यत्वे प्रमाणाभावात् । नाप्यनादिः; कारणैः सहैव स्वरूपलाभात् । नाप्यपर्यनुयोज्यवैभवा; प्रतिनियतविषयत्वात् । एवं तु वस्तुपरिच्छेदवत्त्वमपि सिद्धम् । ननु ब्रह्मशक्तिरेव सर्वेषां शक्तिः, तद्विषयतया शक्तत्वं नियतविषयत्वं चान्येषामस्तु, किं सर्वत्र शक्तिभेदाभ्युपगमेन? इति चेन्न; प्रत्येकं शक्त्याश्रयत्वव्य-पदेशस्वारस्य[ा]बाधात् । यद्यपि ब्रह्मशक्तिस्तु न शक्त्यन्तरवत्, तथाऽपि तच्छक्तिरित्येव सिद्धेः तत्प्रधानत्वसमत्ववच-नान्यपि विवक्षया घटन्ते । अधिकत्ववचनानि तु न सन्त्येव । यामलादितन्त्रं तु पाशुपताधिकरणेनैव निराकृतम् । संविदद्वैतदूषणानि च सर्वाण्यत्राप्यनुसन्धेयानि । इयं च द्रव्येष्वेव वर्तते अद्रव्येष्वपि वा इति सयूथ्यवादः । **आत्म-सिद्धौ भगवद्यामुनमुनि**वचनम्—* सर्वद्रव्येषु तत्कार्यसमधिगम्यस्तत्प्रतियोगिशक्त्याख्यो गुणः साधारणः इति । अत्र सर्वद्रव्येष्वित्यस्य द्रव्येष्वेवेत्यवधारणं केचिदिच्छन्ति । सर्वेषु द्रव्येष्वस्त्येवेत्यन्ये । उक्तं च **वरदविष्णुमिश्रैः**—* शक्तेर्गुणत्वेऽपि गुणकर्मणोस्तत्संभवः इति । पूर्वस्मिन् पक्षे द्रव्यगतयैव शक्त्या समानाधिकरणया रूपरसादीनां

शक्तत्वम्, इतरस्मिंस्तु पक्षे रूपादिष्वपि शक्तिरस्ति। एवं द्रव्यमात्रे रूपादिष्वपीति वृत्तिस्तावत् यथाकथञ्चिदस्तु, शक्तिमात्रं सांप्रदायिकमिति स्थितम्। **भाष्यकारैरपि** शक्तिः शरीरनिरूपणेऽभिहिता—* अग्न्यादेः शक्तिप्रतिबन्धात् औष्ण्याद्यनुदयः इति। ननु * स्वशक्त्या वस्तु वस्तुताम् इत्यत्र शक्तिशब्दः सहकार्यर्थतया स्थापितो **भाष्यकारैः;** यथा—* स्वशक्त्या स्वकर्मणैव देवादिवस्तुताप्राप्तिः इति। तथा—* अघस्य विनाशकरणमुत्पन्नायास्तच्छक्तेर्विनाशकरणम्, शक्तिरपि परमपुरुषाप्रीतिरेव इत्युक्तम्। तथा भगवता **पराशरेणापि**—

* विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा। अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते॥
यया क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप! सर्वगा। समस्ताः शक्तयश्चैता नृप! यत्र प्रतिष्ठिताः॥
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत्। परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्॥

इत्यादिषु शक्तिशब्दो ह्यपृथक्सिद्धविशेषणमात्रे प्रयुक्तः। तथा **वेदार्थसंग्रहे** * शक्तयः सर्वभावानामचिन्त्य इत्यस्य व्याख्याने * अतो विचित्रानन्तशक्तियुक्तं ब्रह्मेत्यर्थः इत्युक्त्वा तदाह—

* जगदेतन्महाश्चर्यं रूपं यस्य महात्मनः। तेनाश्चर्यपरेणाहं भवता कृष्ण! सङ्गतः॥ इति।

इत्युदाहृतम्। तत्र च शक्तिशब्दार्थतया * जगदेतन्महाश्चर्यं रूपं यस्य इत्युक्त्या नातिरिक्ता शक्तिरिष्यते इत्यवगम्यते। स्यादेवम्, नैतावता शक्तिलक्षणधर्मविशेषस्यानभिमतत्वसिद्धिः; मणिमन्त्रादिप्रतिबन्धार्हतया दाहादिकार्यहेतुभूतायाः शक्तेः साक्षादुक्तत्वात्। गौण्या लक्षणया वा वृत्त्या तत्रतत्र शक्तिशब्दप्रयोगास्तु न तद्वस्तूनां शक्तिरूपत्वप्रतिपादनपराः। कर्मणां जीवशक्तित्वव्यपदेशः परमपुरुषप्रीत्यप्रीत्योः कर्मशक्तित्वव्यपदेशश्च तत्तदधीनोत्पत्तित्वेन तत्तत्पारतन्त्र्यमात्रात्। अत एव क्षेत्रज्ञाविद्यादीनां जगतश्च परब्रह्मशक्तित्वव्यपदेशोऽपि, निरतिशयशक्तिमूलत्वाद्वा। अत्र विष्णोः शक्तित्वव्यपदेशस्तु शक्तिशक्तिमतोरभेदोपचारात्। यत्तु * विचित्रानन्तशक्तियुक्तमित्यत्र * जगदेतन्महाश्चर्यमिति वचनोदाहरणं तत्र विचित्रजगत्स्रष्टृतया विचित्रशक्तियुक्ततोपपादनार्थम्। अतो न कश्चिद्विरोध इति। अतश्शक्तिर्नाम धर्मविशेषस्सिद्धः॥

गुरुत्वम्॥ स्वतःपतनहेतुस्वभावो गुरुत्वम्। तच्च सलिलपृथिवीगतम्। पतनकल्प्यम्। तोलनादिदशायां स्पार्शनप्रत्यक्षमपीति केचित्। तोलनादेश्च सहकारित्वात् पर्यन्तोर्ध्वभागस्पर्शे तदनुपलम्भो न दोषः। अन्यथा मातापितृसंबन्धग्रहणसापेक्षे ब्राह्मणत्वादावप्रत्यक्षत्वापातादिति। अन्ये त्वाहुः—नास्ति पृथिवीसलिलस्वरूपातिरिक्तं गुरुत्वम्। स्वरूपादेवाप्रतिबद्धात् तयोः पतनसिद्धिः। स्वभावादेव ह्यधिकगुरुत्वस्यापि पतनहेतुत्वम्। स च स्वभावः स्वरूपस्यैवास्तु लाघवात्। पतनतारतम्यपलादिनियमोऽप्यवयवाधिक्यन्यूनतानिबन्धनः। तदनुगुणतयैव हि पलादिनियमं स्मर्तारोऽपि निबध्नन्ति। उक्तं च **न्यायतत्त्वे प्रमेयपादसप्तमाधिकरणे**—* अधःपतनस्वभावात्म गुरुत्वम्, तदभावो लघुत्वम् इति। यदि च पतनात् किंचित् स्वरूपातिरिक्तं कल्प्यते तर्हि ऊर्ध्वज्वलनतिर्यक्पतनाभ्यां दहनपवनयोरपि द्वयमपि स्यात्। स्वभावाददृष्टादीश्वरसङ्कल्पात् शक्तिविशेषाद्वा तत्सिद्धिरिति चेत्; तर्ह्यत्रापि तथा स्यात्, अविशेषात्। एतदभिप्रायेण तत्रैवोक्तम्—* त्रिविधं गुरुत्वम्—ऊर्ध्वतिर्यगधोभेदेन। वाय्वग्निजलानि तिर्यगूर्ध्वाधोगुरूणि इति। भूतद्वयनिष्ठत्वं तेषामनुपपन्नमिति चेत्, भवदभिमतस्य वा कथमुपपद्यते? स्वभावादिति चेत्, तुल्यत्। यथा च ऊर्ध्वज्वलनस्य एकभूतावान्तरव्यक्तिषु बह्वीषु वृत्तिः, तथाऽत्रापीति भाव्यम्। सलिलमेव चास्माकमवस्थान्तरापन्नं पृथिवीत्यतोऽपि न दोषः। तोलनादावपि प्रत्यक्षत आक्रमणमुपलभ्यते, यथा वाय्वादिभिरभिघातादिः। तावतैव तत्रापि च

गुरुत्वव्यवहारः। उपलभ्यते चैतद्बलवता पुरुषेणाक्रम्यमाणेऽतिगुरुत्वप्रत्ययात्, तस्मिन्नेव च मन्दमाक्रामति मान्द्यव्यवहारात्। अतोऽनुमानतः प्रत्यक्षतो वा न भवदभिमतगुरुत्वसिद्धिः। अस्तु तर्हि सलिलपृथिवीसाधारण उपलभ्यमानो रसादिरेव पतनहेतुरिति चेन्न; तत्राननुविधानात् पतनतारतम्यस्य, वैपरीत्योपलम्भाच्च। किं तर्हि वस्तुतो गुरुत्वम्? श्रूयताम्। शक्त्यनभ्युपगमपक्षे विलक्षणं स्वरूपमेव। तदभ्युपगमपक्षे तद्विशेष एव; सर्वत्र हेतुत्वनिर्वाहकतयाऽभ्युपगतायास्तस्या एवात्रापि स्वीकर्तुमुचितत्वादिति। यत्तु सांख्यैस्तमःकार्यतया पृथिवीजलयोः पतनहेतुर्गुरुत्वलक्षणो गुणविशेषोऽभ्युपगम्यते, तैस्तेजःपवनयोरूर्ध्वतिर्यग्गमनहेतुतया सत्त्वकार्यो लघुत्वलक्षणो गुणविशेषोऽभ्युपगन्तव्यः। किंतु हेतुना येन पृथिव्यादिषु गुरुत्वलघुत्वयोर्नियमं वदन्ति, अनेनैव हेतुना पतनादिकार्यनियमोऽस्तु; मध्ये गुणान्तरकल्पनं गुरुतरम्। अतो गुरुत्वगुणकल्पनं गुरुत्वपराहतमिति॥

द्रवत्वम्॥ द्रवत्वप्रत्ययविषयो द्रवत्वम्। तच्च स्यन्दननिदानम्। न जलमात्रवृत्ति; पार्थिवतैजसेष्वपि क्षीरकाञ्चनादिद्रव्येषु तदुपलम्भात्। द्विधा चेदम्—सांसिद्धिकपाकजभेदात्। सलिले सांसिद्धिकम्। पृथिवीतेजसोः पाकजमिति। यद्वा सलिल एव द्रवत्वम्। काञ्चनादिद्रव्येषु सलिलनिष्ठमेव तदुपलभ्यते पञ्चभूतमयत्वात् सर्वेषां कदाचित्तदंशोद्भवसिद्धेः। तदिदं मृगसलिलवृत्तान्तो भगवता **भाष्यकारेण** दर्शितम्। तथाऽप्येतन्न जलत्वमात्रम्; तस्य करकाद्यवस्थायां काठिन्योपलम्भात्। अन्ये त्वाहुः—सलिलनिष्ठमेव द्रवत्वमिति यदुक्तं तत्साधूक्तम्। सलिलत्वमात्रातिरिक्तमिति कुतः सिद्धम्? स्यन्दनहेतुतया तत्कल्पनमिति चेत् तदपि तत एव किं न स्यात्? अग्निरुष्ण इत्यादिवत् द्रवं जलमिति विशेषणतया स्फुरणादतिरिक्तत्वमिति चेत्; अस्त्वेवमतिरेकः। तथाऽपि जलत्वपर्यवसितसंस्थानविशेषोऽयमिति यथोपलम्भमङ्गीक्रियतां यथा काठिन्यम्। स्पर्शविशेषः काठिन्यमिति चेत्; अत्रापि तथाऽस्तु—अविशेषात्। न च केवलं स्पर्शविशेषः काठिन्यम्, संयोगविशेषसापेक्षः पृथिवीत्वैकार्थसमवायी स्पर्शविशेषः। द्रवत्वं तु निम्नोन्नतिलेशरहितसंयोगविशेषः। उक्तं च **न्यायतत्त्वे प्रमेयपादसप्तमाधिकरणे**—* विरलसंयोगप्रयुक्तस्पर्शो मृदुः। निर्विरलसंयोगप्रयुक्तस्पर्शः कठिनः इति। निम्नोन्नतिलेशरहितसंयोग एव किन्निबन्धनः? इति चेत्, जलत्वनिबन्धन एवेति मन्वीथाः। जलत्वं नाम किमिति चेत्, हन्त किं द्रवत्वाभिलापेण जलत्वमपलपितुमिच्छसि? किं वा जलत्ववत् द्रवत्वसिद्धिरिति मन्यसे? न चोभयमपि युज्यते। तथाऽपि किमिदं जलत्वमितिचेत्; जातिविशेषः। किं तस्य व्यञ्जकमिति चेत्; तादृशसंयोगविशेषरूपविशेषादि। तर्हि तदभ्युपगमेन जलत्वमपि परित्यज्यतामिति चेत्, अस्तु; नैतावता द्रवत्वस्य बहिर्भावः। यदि द्रवत्वं न स्यात्, क्षितितल इव सलिलेऽपि दुष्प्रवेशत्वं स्यादिति चेन्न; आकाशादिभिर्व्यभिचारात्। स्पर्शवत्त्वे सतीति चेन्न; पवनातपादिभिर्व्यभिचारात्, तेषां प्रशिथिलस्वभावत्वात्। तदेव कथम्? सावकाशत्वात् तेषामिति चेन्न; अनुपलम्भात्। न हि मध्यन्दिनातपे मात्रयाऽप्यवकाशमुपलभामहे। तथाऽपि तदुपगमे अत्रापि तदभ्युपगम्यताम्—अविशेषात्। प्रवेशादियोग्यः समसंयोगविशेष एव किन्निबन्धन इति चेन्न; पवनतापादिभिस्समाधानात्। यत्तु करकाद्यवस्थायां काठिन्योपलम्भात् जलत्वातिरिक्तं द्रवत्वमित्युक्तम्, तदपि न; उपष्टम्भकभेदादेव तदानीं काठिन्योपलब्धेः; यथा काञ्चनादितेजसाम्। नहि तेजसः स्वतोऽन्यतो वा काठिन्यमस्ति। नच करकाद्यवस्थासु कस्यचिज्जलप्रतीतिः। नापि विद्रुतावस्थायां जलत्वद्रवत्वयोरन्यतराप्रतीतिः। येन व्यतिरेकोपलम्भः स्यात्। अपर्यायत्वं कथमिति चेत्; संयोगविशेषाद्युपाधिभेदादित्युक्तमेव। एतदेव वैशेषिकाद्यभिमतं द्रवत्वम्॥

स्नेहस्य अतिरिक्तत्वम् ॥ अथ स्नेहो निरूप्यते । स्नेहप्रत्ययविषयः स्नेहः । स जलैकवृत्तिः । घृतादिषु संसर्गात् दृश्यते । न चासौ द्रवत्वमात्रम्; शातकुम्भादिद्रवाणां पांसुसंग्राहकत्वाभावात् । तोयत्वमात्रम्; स्निग्धं तोयमिति पृथग्व्यवहारात्, जलप्रत्ययमन्तरेणापि मधूच्छिष्टादिषु स्निग्धमिति प्रत्ययदर्शनाच्च । तदेवं प्रत्यक्षसिद्धः सलिलैकवर्ती पांसुसंग्रहणहेतुः स्नेहाख्यो गुणोऽस्तीति वैशेषिकानुसारिणोऽस्मदीयाः । अन्ये त्वाहुः—स्निग्धमिति प्रत्ययस्तावदस्त्येव । स तु रूपस्पर्शविशेषादिष्वेव; न ह्यन्यो गुणो विविच्योपलभ्यते । मासृण्यमात्रेण सलिलेऽपि स्निग्धप्रत्ययः, स काञ्चनादिद्रव्येष्वपि समः । यद्वा न कश्चिदपि सलिलं स्निग्धमिति जानाति, मृदादिरेव हि तथोपलभ्यते । पांसुसंग्रहणमपि सलिलत्वप्रयुक्तं सलिलत्वैकार्थसमवायिशक्तिविशेषप्रयुक्तं वा । अतः काञ्चनादिद्रवाणामसंग्राहकत्वोपपत्तिः । किं च यदि संग्राहकत्वात् सलिले स्नेहाख्यो गुणः स्वीक्रियते, विश्लेषकत्वादग्नौ रौक्ष्याख्यं गुणान्तरमपि किं न कल्प्यते? यदि तत्र औष्ण्यादिभिरेव विश्लेषादिसिद्धिः, तर्ह्यत्रापि शैत्यादिभिरेव संग्रह इति किं न स्वीक्रियते? उक्तं च **न्यायतत्त्वे प्रमेयपादसप्तमाधिकरणे**—* दुष्करवियोगस्वभावसंयोगस्पर्शत्वं पिच्छिलत्वम्, सुकरवियोगस्वभावसंयोगस्पर्शत्वं विश्लिष्टत्वम् इति । यदि च संग्रहात् स्नेहसिद्धिः, तर्हि पनसनिर्यासादिष्वपि स कल्प्येत, संग्रहातिरेकात् तेषामेव वा तत्कल्पतिरुचिता । यद्वा चुम्बकशिलाया इव शक्तिविशेषात् संग्राहकत्वमस्तु । न च सलिलं संग्राहकमित्येव नियममुपलभामहे, शुष्कमृत्पिण्डादीनां सलिलसेकेन विलयस्यापि दर्शनात् । तस्मात् सलिलस्वरूपमेव सहकारिविशेषमासाद्य संग्राहकं विभेदकं चेति यथोपलम्भमङ्गीकार्यम् । चेतनानां तु स्नेहः प्रीतिरुपादित्सा वा, रौक्ष्यमपि दुःखं जिहासा, क्रोधो वा, अतो न गुणान्तरसिद्धिरिति ॥

वासना ॥ अनुभवजा स्मृतिहेतुर्वासना । सा कार्यकल्प्या । न तावदनुभवहेतुः स्मृतिः; तस्य चिरध्वस्तत्वात् । नापि तदुपलक्षित आत्मादिः; प्रध्वस्तस्याप्यज्ञायमानस्योपलक्षणतयाऽपि कारणत्वासंभवात् । नापि तद्ध्वंसः; संस्कारप्रमोषाभावप्रसङ्गात् । नापि सदृशदर्शनादि; केवलस्यातिप्रसङ्गित्वात्, विशिष्टस्यासिद्धेः । अनुभवजनितादृष्टविशेष इति चेत्; तर्हि सिद्धा वासना । सा पुण्यापुण्यरूपा वा ततोऽन्या वा इति विशेषः । तत्र न पूर्वा, विधिनिषेधागोचरेषु तदयोगात् । अतो द्वितीयैव परिशिष्यते । साऽप्याधेयशक्तिर्वा ततोऽन्या वा, कार्यकारणादिप्रक्रिया सर्वा समा । सा चात्मनिष्ठा ज्ञानद्रव्यनिष्ठा वेत्येकदेशिविवादः । तत्रानुभवस्मृत्यन्तरङ्गत्वात् ज्ञानद्रव्यनिष्ठत्वमेवोचितम् । यत्तु **वरदविष्णुमिश्रै**रुक्तम्—* भावनाकल्पकप्रमाणेनैव स्थिरात्माश्रयत्वकल्पनादस्थिरज्ञानाश्रयत्वस्य प्रमाणाभावात् इति, तन्नूनं परमताभिप्रायेणोक्तम्; स्वेनैव ज्ञानस्य द्रव्यत्वनित्यत्वयोः समर्थनात् । यदुक्तं **समन्वयाधिकरणे** भेदाभेदिमतदूषणप्रसङ्गेन **विवरणकारैः**—* नह्युपाधिः प्रतिसन्धाता, प्रदेशभेदस्तु तुल्यः, न ह्यन्यगतस्संस्कारोऽन्यत्र प्रतिसन्धिहेतुः, यदि स्यात्तर्ह्यनियमः, अनुभवसमानाधिकरणश्च संस्कारः इति; तन्नूनं धर्मभूतज्ञानस्य द्रव्यत्वमनभ्युपगच्छतां मतेनोक्तम् । अस्मन्मते त्वनुभवसंस्कारस्मृतीनां ज्ञानावस्थाविशेषरूपत्वान्न कश्चिद्दोषः । एतेन * वासनारेणुकुण्ठितः इत्याद्यपि गतार्थम् ॥

वेगो भावना स्थितस्थापक इति त्रिविधः संस्कार इति वैशेषिकाः । तदनुपपन्नम्; वेगस्य कर्मविशेषव्यतिरेके प्रमाणाभावात्, शीघ्रं गच्छतीत्याद्युपलम्भस्यापि कर्मातिशयमात्रेण चरितार्थत्वात्, कर्मातिशयस्य चोभयसिद्धत्वात् । उक्तं च **न्यायतत्त्वे प्रमेयपादे** कालनिरूपणप्रसङ्गे—* संयोगकालसामीप्यं हि वेगः इति । वेगेन गच्छतीत्यादौ प्रयत्नहेतु-

कर्मण्यपि वेगशब्दप्रयोगात्। वेगस्य शरादिधर्मत्वेन प्रतिभासस्य मान्यप्रतीतिनिरस्तत्वात्। संस्कारत्वं स्पन्दजनकवृत्ति संस्कारजातित्वादित्यादेरतिप्रसङ्गासिद्ध्यादिदुष्टत्वात्। **श्रीविष्णुचितार्यैः** क्रिया वेगा[वेका]र्थत्वेन पठि[तौ]ता। तथा हि। ईश्वरानुमाननिराकरणे—* सर्वा क्रिया कृतिपूर्विका क्रियात्वाद्गमनवदिति चेन्न; शरवेगजलस्यन्दनादः व्यभिचारात् तेषां स्वभावत्वकल्पने हेतुमत्त्वकल्पनाविरोधात् इत्युक्तम्। स्थितस्थापकोऽपि संस्थानविशेष एव। संस्थानविशेषतारतम्यानुरोधेन हि प्रतिगमनतारतम्यं दृश्यते। सर्वदा क्रियोत्पत्तिप्रसङ्गः कर्षणमोक्षणादिसहकारिसाहित्येन परिहारश्च समौ। अतिरिक्तस्यापि स्थितस्थापकस्य तादृशतारतम्यं संस्थानतारतम्याधीनमिति वक्तव्यम्, तद्वरमदृष्टगुणान्तरकल्पनात्। तेनैव संस्थानविशेषेण स्वस्थानगमनसिद्धिः। परिशुद्धिरतिरिक्तवदत्रापि चिन्त्या। ये पुनर्ज्ञानसंस्कारौ कर्मसंस्कार इति द्वैविध्यमाहुः, तेषां कोऽयं कर्मसंस्कार इष्टः? न तावद्वेगस्थितस्थापकरूपः; तस्य निराकृतत्वात्। नापि पुण्यापुण्यरूपक्रियाप्रवृत्तिहेतुः; तस्या अपि पूर्वपूर्वादृष्टस्वस्वातन्त्र्यादिभिरेव निर्वाहात्। नापि मृदङ्गवादनादपूर्वपूर्ववादनादिभिराहित उत्तरोत्तरक्रियासु हस्तलाघवादिहेतुः; तत्र हस्तलाघवादेः पूर्वपूर्ववादनाकृतकाठिन्यविशेषाभावादिप्रयुक्तत्वात्। हेस्तप्रेरणादिशैघ्र्यस्य पूर्वपूर्ववादनाधिकृतसंस्कारजनितप्रेरणस्मृतिशैघ्र्यप्रयुक्तत्वात्। यानि पुनः * अघस्याश्लेषकरणं वैदिककर्मायोग्यतावासनाप्रत्यवायहेतुशक्त्युत्पत्तिप्रतिबन्धकरणमेतदुभयकार्यकारणभूतानादिविपरीतवासनाब्रह्मोऽपि इत्यादि **भाष्यकार**वचनानि, तेषामप्यनुभववासनातिरिक्तसंस्कारकल्पननिर्बन्धाभावात्। * अघस्य इत्यादिवाक्यानन्तरं चैवमुक्तम्—* अघानि हि कृतानि पुरुषस्य वैदिककर्मायोग्यतां सजातीयकर्मान्तरारम्भरुचिं प्रत्यवायं च कुर्वन्ति। अघस्य विनाशकरणमुत्पन्नायास्तच्छक्तेर्विनाशकरणम्, शक्तिरपि परमपुरुषाप्रीतिरेव इति। एवं पापकर्मणः परमपुरुषाप्रीतिद्वारा सजातीयकर्मान्तरारम्भरुचिजनकत्वमिति सिद्धत्वान्न तत्र वासनान्तरमस्तीति गम्यते। * अनारब्धकार्ये एव तु इत्यधिकरणे च व्यक्तमभाषयत्; यथा—* न च पुण्यापुण्यजन्यभगवत्प्रीतिव्यतिरेकेण शरीरस्थितिहेतुभूतसंस्कारसद्भावे प्रमाणमस्ति इति, अन्यत्राप्येतत्तुल्यन्यायमिति बोद्धव्यम्। एवं **श्रीमद्गीताभाष्ये**ऽप्युक्तम्—

* त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा। सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥

इत्यस्य व्याख्याने * स्वभावः—स्वासाधारणो भावः प्राचीनवासनानिमित्तस्तत्तद्रुचिविशेषः, यत्र रुचिस्तत्र श्रद्धा जायते, श्रद्धा हि स्वाभिमतं साधयत्येतदिति विश्वासपूर्विका साधने त्वरा। वासना रुचिश्च श्रद्धा चात्मधर्मा गुणसंसर्गजाः, तेषामात्मधर्माणां वासनादीनां जनका देहेन्द्रियान्तःकरणविशेषगता धर्माः, कार्यैकनिरूपणीयाः सत्त्वादयो गुणाः—सत्त्वादिगुणयुक्तदेहाद्यनुभवजा इत्यर्थः इत्युक्तम्। यच्चा**त्मसिद्धौ**—* निर्धूतनिखिलकरणकलेबरज्ञानकर्मवासनानुबन्धस्यापवृक्तस्य न खलु स्वपरसंवेदनोदयनिबन्धनं किञ्चित् संभाव्यते इति भगव**द्यामुनमुनि**भिर्ज्ञानकर्मवासनयोर्भेदेनोपादानम्, तदपि **भाष्यकार**वचनवन्निर्वाह्यम्। यत्तु कैश्चित् कार्पासबीजे लाक्षारागरूषिते सति तद्रक्ततापगमेऽपि तत्कुसुमफलादौ रक्ततादर्शनात् वासनानुवृत्तिरङ्गीकार्येति—तत्र विचारणीयम्। किं तत्कार्येष्वङ्कुरादिषु वासनोदयः? क्रमेण पुष्पाद्यात्मना परिणममानेषु बीजावयवेषु वा? नाद्यः—वैयधिकरण्येनाश्रयाभावाच्च वासनोदयानुपपत्तेः, अन्यथाऽतिप्रसङ्गात्। बीजावयवेषु तु लाक्षावयवानुवृत्तिस्यूतिबलेनैव रक्ततोपपत्तौ वासना निष्प्रयोजना। यत्तु गारुडमन्त्राद्यभिमृष्टेषु जलादिषु विषनिर्हरणादिदर्शनात् कश्चित्संस्कारोऽङ्गीकार्य इति, तदनुपपन्नम्; मन्त्रबलाहितशक्तिविशेषेणैव तत्तत्कार्योपपत्तेः। नहि सजातीयकार्यनिष्पादकतया नियतस्य संस्कारस्य एतादृशकार्यहेतुत्वं युज्यते। यत्तु **मीमांसकैः**—* व्रीहीन्

प्रोक्षति इत्यादिविहितकर्मसु व्रीह्यादिद्रव्यनिष्ठः कश्चित् संस्कारोऽङ्गीक्रियते * संस्कारः कर्तुरेवेष्टः प्रोक्षणाभ्युक्षणादिषु इति, तस्य कर्तृसंस्कारत्वमभ्युपगम्यते **नैयायिकैः**। तत्र किमयं भावनाख्यः संस्कारः? उत अदृष्टरूप इति विवेचनीयम्, नाद्यः—तस्यानूभूतिजन्यत्वेन क्रियाजन्यत्वानुपपत्तेः। न द्वितीयः—द्रव्येषु किञ्चित्कारमनाधाय केवलात्मसमवेतादृष्टजनकत्वे प्रयाजादिवदारादुपकारकत्वप्रसङ्गात्। ततश्च नैवारादिचरुयुक्तायां विकृतौ व्रीहीणामेव प्रोक्षणं स्यात्, न तु नीवाराणाम्; तत्प्रोक्षणस्य प्रकृतावविहितत्वेन आत्मसमवेतादृष्टसिद्धेः। ततो व्रीह्यादिष्वेव संस्कारोऽभ्युपगन्तव्य इति। अत्रोच्यते—यद्यप्येवम्; अथाप्ययं संस्कारस्तत्तद्देवताभिमतिविषयत्वं वा सत्त्वादिगुणोद्बोधेन यागयोग्यत्वं वा; अनेन न ततोऽतिरिक्तगुणविशेषसिद्धिः॥

संख्या॥ अथ संख्या। एकद्वित्र्यादिप्रतिपत्तिव्यवहारविषयः संख्या। तां द्रव्यमात्रनिष्ठां केचिदाहुः। केचित्तु द्रव्यगुणादिसमस्तपदार्थवर्तिनीम्। द्रव्यमात्रनिष्ठावादिनश्च नित्यद्रव्येष्वेकत्वं नित्यम्, अनित्यद्रव्येष्ववयवगतैकत्वैर्जन्यम्, द्वित्वत्रित्वादयस्त्वपेक्षाबुद्धिसहकृतैः प्रत्येकवर्तिभिरेकत्वैर्जन्या इत्याहुः। तत्र तावद्द्वित्वादिव्यवहाराणां द्वित्वादिसामग्र्यैव निष्पत्तिः; तत्तदपेक्षाबुद्धिविषयतयैव तेषां स्फुरणात्। द्वित्वादीनां बाह्यनिष्ठानामपि व्यवहर्तृनियमस्तत एव वाच्यः। अन्यथा साधारणोपलम्भप्रसङ्गाद्रूपादिवत्। ततस्तेनैव व्यवहारस्तन्नियमश्चेत्यस्मिन् पक्षे तूपपन्नतरम्। तादृशबुद्धिनिवृत्तौ च द्वित्वादिनिवृत्तौ च द्वित्वादिनिवृत्तिरभ्युपगता। एवं च कारणनिवृत्तिमात्रात् कार्यनिवृत्तिकल्पनं गरीयः। तादृशबुद्धिनिवृत्तिमात्राद्व्यवहाराभाव इति तूपपन्नतरम्। ननु बुद्धिविशेष एव तात्त्विकमारोपितं वा द्वित्वादिकमनाश्रित्य कथंचिदपि न घटते इति चेत्; भवतो वा कथं घटते? शक्तिविशेषादिति चेन्न; द्वित्वापलापापातात्। द्वित्वादिप्रागभावः शक्तिरिति चेन्न; द्वित्वत्रित्वादिसर्वप्रागभावसन्निधौ कस्य शक्तित्वमिति नियमासिद्धेः। ईश्वरबुद्धिपरिग्रहविशेषाददृष्टाद्वा नियम इति चेत्; तुल्यम्। निर्विषयव्यवहारप्रसङ्गो वैषम्यमिति चेन्न; विषयाभिधानात्। किं च द्वित्वादिषु प्रमाणसिद्धेषु तत्प्रागभावानां सहकारित्वकल्पनम्, तेषु च प्रमितेषु तन्नियमेन द्वित्वाद्युत्पत्तिप्रतिनियतिरिति दुरुत्तरम्। अतः सिद्धं द्वित्वादि संख्याबुद्धिविशेषविषयत्वमिति॥

एकत्वं चिन्त्यते। तत्र तावत् कार्यमेकत्वं नास्त्येव। अवयविन एवानभ्युपगमात् कुतस्तदैक्यम्? समुदायैकत्वं राश्येकत्ववत्। तत्रापि हि भागप्रधानव्यवहारेऽनेकत्वं व्यवहरन्ति। संहतिदशायामेकत्वावस्था जायते विभक्तदशायामनेकत्वावस्था चेति चेन्न; भेदाभेदविरोधप्रसङ्गात्, प्रत्ययस्य च संहतिविभागाभ्यामेवान्यथासिद्धत्वात्, स्वरूपस्य च वस्तुतो भेदाभेदविरुद्धत्वप्रसङ्गात्, पटावस्थायामेकतन्तूपलम्भप्रसङ्गाच्च। प्रलयावस्थायां प्रपञ्चैक्यं कथमिति चेत्; न कथंचित्। श्रुतिविरोधस्तर्हीति चेन्न; भेदप्रहाणपरत्वात्। तदेवैक्यमिति चेन्न; प्रकृतित्वावस्थारूपत्वात्। यथा तृणोपलादिपरिणामकलायां पृथिवीतः पृथग्व्यवहारो जायते। तेषामेव परिणामान्तरमापन्नानां पुनः पृथिवीत्वव्यवहारः। न च तावता तृणोपलाद्यंशानां परस्परं तावदैक्यम्, अथ महापृथिव्या वा। किं तर्हि विजातीयावस्थाप्रहाणेन सजातीयावस्थापत्तिमात्रम्। एवं प्रकृत्यादावपीति। चिन्त्यं निरवयवगतमैक्यमप्येवम्। तथाऽप्येकक्रियान्वयेन समप्रधानतया समुच्चीयमानवस्त्वन्तरप्रतिपत्तिविधुरवस्तुमात्रप्रतिपत्तिविषयत्वमेकत्वम्। एतेन अयमेकः, अयमप्येक इति व्यवहारोऽपि निर्व्यूढः; समुच्चये सत्यपि एकक्रियान्वयित्वसमप्राधान्ययोरभावात्। न चात्रोपलम्भादिविरोधः, येन गौरवमपि सह्येत। तदेवं गुणादावपि तत्त्वान्तरमन्तरेणापि संख्या प्रतीयमाना समानाकारेण निर्व्यूढा। उपलम्भसाम्येऽपि

वैरूप्यकल्पनमत्रभवतामधिकम् । असंख्यातव्यवहारोऽपि एवंविधसंख्याप्रतिक्षेपकः, अन्यथा भवतोऽपि विरोधात् । ईश्वरादिबुद्ध्या सर्वसमुच्चयसद्भावेऽपि शतसहस्रायुतादिवदवच्छेदाभावादेवासंख्यातत्वमानन्त्यम् । अनन्तेष्वपि न्यूनाधिकभावो विद्यत एव, यथाऽतीतकल्पदिवसादिसमुदायादीनाम्, यथा च द्रव्यत्वपार्थिवत्वघटत्वादिव्यक्तीनाम् । यत्तु * एकत्वमेकावच्छेदः इति **भाष्यम्**, तदपि न संख्यायास्तत्त्वान्तरत्वाभिसन्धिपूर्वकम् । निर्विशेषवस्तुवादिनं प्रति विशेषप्रसङ्गमात्रपरत्वात्, अस्मदुक्तसंख्याया अपि विशेषत्वाविशेषात् । यत्तु भगव**द्यामुनमुनिभिरात्मसिद्धौ** द्वित्वादेरपि यावदाश्रयभावित्वमुक्तम्—तदपि वैशेषिकप्रक्रियाबीभत्सामात्रादिति मन्यामहे । उक्तं हि भगव**न्नाथमुनिभिः प्रमेयपादसप्तमाधिकरणे** * संयोगान्तर्भूता संख्या इति, समस्ततदात्मासंख्या इति च । अस्यार्थ उच्यते—बुद्धिविशेषसंबन्धो हि संख्यात्वेनोपपादितः, स च संयोग एव । यद्वा सङ्घातैकत्वाद्यभिप्रायं तदिदं मन्तव्यम् । **वरदविष्णुमिश्रादिभिस्तु आत्मसिद्धिवचनानुसारेणातिरिक्तसंख्याऽभ्युपगता** । यथोक्तम्—प्रत्यक्षाश्रयवर्तिसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसादृश्यानि प्रत्यक्षाणि इति । गुणेषु च संख्यादिसद्भाव उक्तः—* गुणाश्रितसंख्यादीनां संयुक्ताश्रितत्वेन ग्रहणम् इति । एतदपि परमताभिप्रायेणेति मन्तव्यम् । यत्तु **भट्टपराशरपादैः** प्राकट्यनिराकरणादिप्रसङ्गेषु *संख्या तु द्वितीयक्षण एव ज्ञायते सा संख्या समवायिनोऽस्तीत्यविरोधः इत्यादिषु प्रदेशेषु संख्याभ्युपगमनं व्यवहृतम्, तत् किंस्वित् स्वाभ्युपगमेन, अथवा पराभ्युपगमेनेति न संविद्मः, प्रमेयनिरूपणविच्छेदात् ॥

परिमाणम् ॥ परिणामप्रत्ययविषयः परिमाणम् । तच्चतुर्धा—अणुमहद्दीर्घह्रस्वभेदात् । चत्वार्यपि परिमाणानि प्रतियोगिनिरूपितवेषाण्येव—इदमितोऽणु इदमितो महदिदमितो ह्रस्वं दीर्घमित्येव प्रतीतेः । अत्र च विभुद्रव्येषु परिमाणं नास्तीत्येके ; अपरिमितप्रत्ययात् । उक्तं **श्रीवेदार्थसंग्रहव्याख्यानेऽनन्तपदव्याख्यानदशायां श्रीराममिश्रैः**—* वस्तुपरिच्छेदो वस्तुनः परिमाणम्, देशपरिच्छेदस्तु तत्कार्यः इत्युक्त्वा * अपरिच्छेदस्तु न गुणः इत्यादि । उक्तं च भगव**द्यामुनमुनिभिः आगमप्रामाण्ये** पूर्वपक्षे—* यदपि वियति परिमाणमिह निदर्शितम्, तदपि विमर्शनीयमिव ; परिमाणं हि नाम देशावच्छेदः—इयत्ता परितो भाववेष्टनमिति यावत् । न च नभसि तदस्तीति कथमिव तदिह निदर्शनतया निर्दिश्यते इति । अन्ये तु इत इदमधिकमित्येवंरूपस्य परिमाणस्य तत्राप्युपपत्तेरस्त्येव तत्रापि परिमाणम् । अपरिमितव्यवहारस्तु सङ्कुचितपरिमाणप्रतिक्षेपपर इत्याहुः । इदं च परिमाणाख्यं गुणान्तरं **विवरणकारा**दिभिः स्वीकृतम् । जन्माद्यधिकरणे **विवरणे**ऽपि ह्युक्तम्—* वस्तुपरिच्छेदो वस्तुपरिमाणम्, देशपरिच्छेदस्तु तद्धेतुकः इत्यादि । अथान्यत् मतम्—परिमाणमेव तत्त्वान्तरं नास्ति । तथा हि—देशव्याप्तिविशेष एव तत्तत्प्रतिसंबन्धिनिरूपितवेषेण तत्तत्परिमाणम् । तत्त्वान्तरवादिनोऽपि चैतत् परिमाणाविनाभूतमभ्युपगतम् । ततस्तदधिकस्वीकारे गौरवं भवेत् । ननु न तावत् देशसंयोगमात्रं परिमाणम्, अतिप्रसङ्गात् । ततोऽवच्छिन्नदेशविशेष इति वाच्यम् । न चावच्छेदो येनकेनापि, किंतु परिमाणविशेषविशिष्टेनेति वाच्यम् । अतस्तदुपजीविना देशावच्छेदेन तदपह्नवो न युज्यते । देशपरिमाणं च देशान्तराधीनमित्यनवस्था च स्यात् । तस्मात् स्थितं तत्त्वान्तरं परिमाणमिति, तन्न ; एवं ह्यवच्छेदनिरूपणम्—यत्संयुक्तं देशं देशान्तरं च यद्युगपदाक्रमितुं शक्तं तत्ततोऽधिकपरिमाणम्, यत्संयुक्तं देशमखिलमेकदैव यदाक्रमितुं न शक्तं तत्ततो न्यूनपरिमाणमिति । तथा एकदिगाजवावच्छेदेनाधिक्यं दैर्घ्यम्, तेनैव न्यूनभावो ह्रस्वत्वम्, बहुदिगवच्छेदेनाधिक्यं महत्त्वम्, तेनैव न्यूनभावोऽणुत्वम् । न चैतदविक्रमगुत्वमस्तीत्यगुनिराकरणादपि सिद्धम् । चतुर्विध-

मप्येतदेकस्मिन्नपि घटते । यथा स्तम्बविशेष एव स्तम्बान्तरापेक्षया स्थूलाणुत्वदीर्घह्रस्वत्वव्यवहार इति । एवं च सति नात्रावच्छेदके किञ्चित् परिमाणं निर्दिष्टम्—येनोपजीव्यविरोधानवस्थादिदोषः स्यात् । एतेन देशस्यापि न्यूनाधिकत्वे व्याख्याते । न्यूनाधिकदेशसंयोगभेद एव स्वरूपातिरिक्तं परिमाणविशेषमन्तरेण न घटते इति चेन्न ; राश्यादिषु दृष्टत्वात् । तत्र भागसंख्याधिक्यनिबन्धनः स इति चेन्न ; तर्हि सर्वत्र तत एवास्तु । प्रशिथिलसंयोगवति समभागवत्त्वेऽपि परिमाणभेदो दृष्ट इति चेत् ; सत्यम् । तथाऽपि प्रशिथिलसंयोगादेव परिमाणविशेषोत्पादकतयाऽभिमतात् तावद्देशव्याप्तिरेवास्तु । समूढप्रसारितचूर्णपुञ्जेऽपि हि तथा दृश्यते । एवं महत्त्वबहुत्वाभ्यामपि देशव्याप्तिविशेष एवारभ्यते—न ततोऽन्यदान्तरालिकमनुपलभ्यमानमिति । उक्तं च भगवद्यामुनमुनिभिः—* परिमाणं हि नाम देशावच्छेदः इति । भगवन्नाथमुनिभिरपि **प्रमेयपादसप्तमाधिकरणे**—* संख्यान्तर्भूतं परिमाणम् इत्याद्युक्त्वाऽनन्तरं चोक्तम्—* दूरत्वं दैर्ध्यम्, सामीप्यं ह्रस्वत्वम्, तिर्यग्दूरत्वं स्थौल्यम्, तिर्यक्सामीप्यं कार्श्यम्, स्वांशस्याग्रे स्वांशस्थितिरार्जवम्, स्वांशस्य स्वांशस्थितिर्विक्रता, एकदिक्स्थान्त्यावयवानां विरुद्धदिक्स्थान्त्यावयवदूरत्वसामीप्यसाम्यं वृत्तत्वम्, केवलविरुद्धदिगन्तांशेभ्यः कोणविरुद्धदिगन्तांशानां दूरत्वसामीप्यसाम्यं चतुरश्रत्वम् इति । किंचिदन्तरमतिक्रम्य चोक्तम्—* अनेकव्याप्तिर्महत्ता, तदभावो मन्दत्वम् इति । देशकालसंख्योन्मानादिसर्वसाधारणपरिमाणमात्रस्य च स्वरूपमुक्तम्—समस्तभावतदात्मा परिमाणम् इति । अत्रेदं तत्त्वम्—आयामविस्तारघनभेदेन त्रिविधं परिमाणम् । यथासंभवं प्राक्प्रत्यग्दक्षिणोत्तरोर्ध्वाधःपर्यवसितं चैतत् । तत्र त्रिष्वपि दिग्द्वन्द्वेषु यत्राधिक्यं स आयामः यत्र मध्यमत्वं स विस्तारो यत्र न्यूनत्वं तद्घनमिति । त्रयाणामप्येषां सङ्करतारतम्यभेदात् बहुविधो व्यवहारः । विभुद्रव्येषु कार्त्स्न्यापेक्षायां परिमाणं नास्ति । तत्तदवच्छेदापेक्षायां यथासंभवं व्यवहार इति ॥

पृथक्त्वम् ॥ पृथक्त्वं पृथग्व्यवहारकारणं पृथग्गुण इति **काणादादयः** । तदिदं भेदमात्रात् नातिरिच्यते ; प्रत्ययस्य तावन्मात्रेण विश्रान्तेः, कल्पकानां चान्यथासिद्धेः, भिन्नशब्देन च सहप्रयोगादर्शनात् । भेदावध्यवधिकतया द्रव्येष्विवाद्रव्येषु च पृथक्त्वधीव्यवहारदर्शनात् । सा भ्रान्तिरिति चेन्न; बाधकाभावात् । भेदशब्दार्थ एव पृथक्त्वाख्यगुणोऽस्त्विति चेन्न ; तस्य स्वरूपसंस्थाननीलपीतादिभिर्निर्वाहात् । अपर्यायबुद्ध्युपाधिना तेषु सर्वेषु भेदशब्दव्युत्पत्तेः, स्वरूपादिशब्दवत् । तस्यैव चान्योन्याभावत्वात् । इदमिदं न भवतीत्यत्र अवधिनिरूप्यत्वमन्योन्याभावस्य न दृष्टमिति चेन्न ; शब्दविशेषात् तथोपपत्तेः । पृथक्त्वाख्यगुणवाचकान्यशब्दपर्यायसंबन्धे पञ्चमी **पाणिनेः** विवक्षितेति चेत् ; कथम् ? अन्योन्याभावपर्यायविवक्षायां घटात् पटो न भवतीत्यपि प्रयोगप्रसङ्गादिति चेन्न ; धर्मिपर्यन्तेष्विति विशेषात् । पृथक्त्वमिति निर्देशे कथमिति चेन्न ; तस्यापि धर्मिणमुल्लिख्यैव धर्मबोधकत्वात् । अमानो नादयस्त्वसत्त्वे वर्तमाना नावध्याकाङ्क्षिणः । यद्वा तेषां समानाधिकरण एवावधिरिति सिद्धं भेदमात्रमेव पृथक्त्वमिति । उक्तं च भेदसमर्थनानन्तरं **भट्टपराशरपादैः**—* तदेवं क्लृप्तैरेव द्रव्यजातिगुणकर्मभिर्धर्मैरशेषाणामपुनरुक्तवित्तिव्याहारव्यवहाराणामुपपत्तेर्भेदो नाम न धर्मान्तरमपूर्वं कल्प्यम् । अत एव वैशेषिकपरिक्लृप्ताः पृथक्त्वविशेषादयोऽपि प्रोत्सारिताः इत्यादि । भेदस्य एकानेकगतत्वविकल्पपरिहारे चोक्तम्—

* नीलिमवेशतिमानावप्यनेकावेव धर्मिणम् । नीलं शुभ्रं च भिन्दानौ स्फुटं ह्युपलभामहे ॥
ये विशेषपृथक्त्वादिसापेक्षं कल्पयन्ति ते । बिभ्यत्वात्माश्रयादिभ्यो न वयं दृष्टवादिनः ॥ इति ।

तदेवं स्वरूपधर्मौ यथासंभवं पृथक्छब्देन भिन्नादिशब्देन च व्यपदिश्येते । उक्तं च **न्यायतत्त्वे प्रमेयपादसप्तमाधिकरणे**—* अतिरेकव्यतिरेकभेदेन द्विविधो भेदः इति । अत्रातिरेको धर्म्यन्तरेष्वसन् धर्मः । व्यतिरेकधर्मधर्म्यादेः स्वरूपम् । यत्तु तस्मिन्नेवाधिकरणे—* ऐक्यं साकल्येन संयोगः, तदभावो भेदः इत्युक्तम्, तत् विभागाभिप्रायम् ॥

विभागः ॥ संयोगविरोधी गुणो विभाग इति परे । तदयुक्तम् ; नोदनपाटनादीनामेव संयोगविध्वंसकत्वात्, विभागजनकतयाऽभ्युपगतानामेव तद्ध्वंसकत्वोपपत्तेः । न च संयोगजनकजातीयत्वादिनाऽनुकूलस्य कर्मादेस्तद्ध्वंसकत्वमनुपपन्नमिति वाच्यम् ; रूपादिजनकतयाऽभ्युपगताग्निसंयोगादिजातीयानां रूपादिनाशकत्वाभ्युपगमात् । स्वजन्यव्यक्तेरपि स्वनाश्यत्वमिष्टम्, किंपुनरन्यस्याः । उत्पाद्यमानघटादिषु शब्दोत्पादकतया कश्चिद्गुणः कल्प्यते इति चेन्न ; तत्रापि विभागजनकस्य पाटनादेरेव तज्जनकत्वोपपत्तेः, तस्य च संयोगविशेषरूपत्वात् । विभक्तप्रत्ययस्य च संयोगाभावविषयतयोपपत्तेः । तर्हि मेरुविन्ध्ययोरपि विभक्तप्रत्ययः किं न स्यादिति चेन्न ; विध्वंसात्मकत्वात् । संयोगाभावमात्रनिबन्धनश्च विभक्तप्रत्ययस्तत्रापि केषांचित् जायते, उपचाराच्च तन्निर्वाहो भवतामपि । एवं क्वचित् स्वरूपभेदनिबन्धनो विभक्तप्रत्ययो निर्वाह्यः । क्षणिकस्य विभागस्य स्थिरध्वंसात्मकत्वं कथमिति चेन्न ; तस्य परिभाषामन्तरेण क्षणिकत्वे प्रमाणाभावात्, प्रतियोगिस्मरणादौ तद्विभागवानयमिति प्रत्ययस्य यावत्पुनस्संयोगमुत्पत्तेः । प्रध्वंसात्मकत्वे पुनस्संयोगे सत्यपि विभक्तबुद्धिः स्यादिति चेन्न ; भवतामपि पूर्वसंयोगप्रध्वंसस्य विद्यमानत्वेनासंयुक्तप्रत्ययप्रसङ्गात् । यावदुत्पन्नसंयोगध्वंसे सति तदातदा तत्तत्प्रतियोगिकतया तथाप्रतीतिरिति चेत् ; तुल्यम् । द्रव्यद्वयनिष्ठतया प्रतीयमानस्य संयोगवत् गुणत्वमुचितमिति चेत् ; अहो ! महावैशेषिकोऽसि । यदभावस्य प्रतियोग्याधारिणः स्वतोऽमिलितत्वमभ्युपगच्छतामेवमभिमन्यसे । उभयनिरूप्यप्रतियोगिकतया हि संयोगप्रध्वंसस्योभयनिष्ठत्वप्रत्ययोऽभ्युपगत एव भवद्भिः । असंयुक्ताविति संयोगप्रागभावात् । ननु ध्वंसोऽपि भावान्तरमेव भवतामिति शब्दान्तरेण विभागः स्वीकृत इति चेन्न ; उत्तरसंयोगादिमात्रात्मकत्वात् । सजातीयस्यैव कथं विरोधित्वमिति चेत् ; अभावनिरूपणं यावदेतच्चोद्यं मा स्म विस्मरः । प्रत्ययस्तु वियुक्तो विघटितो विश्लिष्टो विनष्टसंयोगो विभक्तो विप्रकृष्टो देशान्तरगत इति तुल्यरूप एव जायते । एतदखिलमभिसन्धायोक्तं **न्यायतत्त्वे प्रमेयपादसप्तमाधिकरणे**—* वियोगो न वक्तव्यः इति । तत्रैव पश्चादप्युक्तम्—* अत्यन्तसामीप्यं संयोगः, दूरत्वं वियोगः इति । अनेन संयोगोऽप्यपलपितः स्यादिति चेत् ; सामीप्यस्य समीपदेशसंयोगात्मनैव निरूप्यत्वात् । तथा चादेशादेशिनोरविशेषेण द्वयोरपि संयोगसिद्धिः । दूरत्वमपि देशविशेषसंयोग एवेति न ततोऽतिरिक्तो विभाग इति ॥

परत्वापरत्वे ॥ दिक्कालापेक्षया परापरधीहेतुगुणौ परत्वापरत्वे इति परे । तेऽपि दिक्कालसंबन्धविशेषात् नातिरिक्ते, लाघवात् । अप्रत्यक्षपदार्थसंयोगः कथं प्रत्यक्षः इति चेन्न ; दिक्कालयोरपि प्रत्यक्षत्वस्य समर्थितत्वात् । यादृशोपाध्यवच्छिन्नदिक्कालसंबन्धः परत्वापरत्वोत्पादको भवताम्, तथाविध एव सोऽस्माकं व्यवहारविषय इति नातिप्रसङ्गगन्धोऽपि । यदि च व्यवहारनिर्वाहके सिद्धेऽपि परापरप्रत्ययमात्राद्गुणान्तरक्लृप्तिः, परापरजातिपरापरपरिमाणपरापरज्ञानशक्त्यादिष्वपि तादृशगुणकल्पनप्रसङ्गः—अविशेषात् । न्यूनाधिकव्यक्तिवृत्तिन्यूनाधिकदेशावच्छेदादिभिस्तत्र निर्वाह इति चेत् ; अत्रापि न्यूनाधिकदिक्कालसंबन्धात्तन्निर्वाह इत्युक्तमेव । भवद्भिरपि प्राक्त्वप्रत्यक्त्वादयः

पूर्वोत्तरत्वादयो दिक्कालसंयोगमात्ररूपा निर्वाह्याः, तदत्र को नाम विशेषो दृष्टः? येन गुणान्तरकल्पने कुतूहलमत्रभवताम्। परत्वापरत्वे विना संयुक्तसंयोगभूयस्त्वाल्पीयस्त्वयोरेव दुर्निरूपत्वमिति चेत् तर्ह्यन्योन्याश्रयः—व्यावृत्ततया निरूपितयोरेव तयोः परत्वापरत्वनिमित्तत्वम्, तदुत्पन्नाभ्यामेव परत्वापरत्वाभ्यां तन्निरूपणमिति। अनिरूपितयोरेव तयोरुत्पादकत्वमिति चेत्; तारानिशाकरादिष्वपि तथाप्रत्ययः स्यात्। दूरत्वेनान्तरालग्रहणात् नैवमिति चेत्: त्यज तर्हि सत्तया कारकत्वम्। तथा च सिद्धं नस्समीहितमिति। यत्तु **प्रमेयसंग्रहे श्रीविष्णुचित्तैरुक्तम्**—*दूरे कथमिति चेत्; तत्र कुशलमेव; द्युमणिगगनादीतरव्यावृत्तमेव हि रूपं परिमाणपृथक्त्वदेशकालकृतपरत्वापरत्वादि चेन्द्रिययोग्यं सर्वं सहैव ज्ञायते इति, तदपि न तत्त्वान्तरपरम्; विशिष्टप्रतिसंबन्धिमात्रपरमेव, वैशिष्ट्यस्य चास्मदुक्तप्रक्रिययाऽप्युपपत्तेः। उपादानमात्रस्य तत्त्वान्तरत्वप्रतिपादकत्वाभावात्। तथाहि; तत्रैवमुक्तम्—* अन्धकारे स्थाणुपिशाचस्त्रीपुंसादिसंशयास्तदवान्तरा एव। नक्तं हि द्युमणिदीपमहीगगनस्वात्मादिव्यावृत्तिरपि न ज्ञायत इति न शक्यं वक्तुम्। न हि देहात्मभ्रममन्तरेण कश्चित् द्रष्टृदृश्यसङ्करोऽप्यस्ति इति। किमत्र पृथगुपादानमात्रेण स्थाणुपिशाचादयः पदार्थान्तरं भवन्ति। अस्तु वा परमतेन एकदेशिभेदेन वा व्यवहारः, तथाऽपि विशिष्टोपलम्भनप्रतिपादनपरत्वान्न दोषः॥

कर्म॥ अथ कर्म। चलनप्रत्ययविषयः कर्म। तत् प्रत्यक्षमेव; करतलादिषु तथोपलम्भात्। न त्वनुमेयम्; तदसिद्धिप्रसङ्गात् कार्यस्योभयाभ्युपेतकर्मसामग्रीमात्रेणैवोपपत्तेः; अतिप्रसङ्गाच्च; कार्येण हि गिरिजलधरसंयोगेन गिरावपि कर्म कल्प्येत। अन्यतरकर्मजनितोऽयं संयोग इति चेत्; तत् केन सिद्धम्? तत्रापि जलधरकर्मजनितोऽयमिति नियमश्च कुतः सिद्धः? जलधरशिखरिणोश्चलाचलरूपेण प्रतीतेरिति चेत्; तर्हि सिद्धं नः समीहितम्। विभागपूर्वकेण संयोगेन कर्मानुमानमिति चेत्; तर्हि जलधरान्तरेण विभज्यमाने जलधरान्तरेण संयुज्यमाने कर्मानुमानं स्यात्। यदि च कार्येण जातेन प्रतीतेन व्याप्यतयाऽनुसंहितेन च कर्मानुमानम्—चलतीति वर्तमानबोधो न स्यात्, चिरनिर्वृत्तत्वात् तस्य। अस्माकं तु सत्ताक्षण एवेन्द्रियेण संबध्यते, तावतैव च पदार्थान्तरेष्विवात्रापि वर्तमानप्रत्ययोपपत्तिः। तदेवं प्रत्यक्षयोग्येषु प्रायशः प्रत्यक्षः चलतिधीविषयः। स च संप्रतिपन्नविभागपूर्वकसंयोगमात्ररूपो वा तत्कारणभूतोऽन्यो वेति सयूथ्यविवादः। तत्रैवमेकः पक्षः—कर्महेतुतयैवाभ्युपगतैः प्रयत्नादृष्टादिभिः कर्मजन्यतयाऽभ्युपगतविभागपूर्वकसंयोग एव जन्यताम्। न च मध्ये किमपि विशदमुपलब्धम्, येन गौरवपरिहारः स्यात्। चन्द्रतारकादीनां विभागपूर्वकसंयोगदृष्टावपि संयोगसन्ताननैरन्तर्याप्रतीतेः चलतीतिप्रत्ययाभावः। यथा भ्रमणे सत्यपि प्रत्येकं कर्मक्षणेषु न भ्रमतीति प्रत्ययः; किंतु निरन्तरतयाऽनुसन्धीयमानेष्विति भवद्भिरपि स्वीकार्यम्, तथाऽत्रापि सन्तोष्टव्यम्। न च कर्मणा संयुज्यत इति पृथग्व्यपदेशात् भेदसिद्धिः; कर्मशब्दनिर्दिष्टस्य पूर्वसंयोगविश्लेषस्यैवोत्तरसंयोगारम्भकत्वाद्भेदव्यपदेशोपपत्तेः। न चोत्तरसंयोगे स्थिरे वर्तमाने यावत्तद्विनाशकालं चलतीति प्रत्ययप्रसङ्गः; विभागपूर्वकसंयोगारम्भक्षणमात्रस्य क्षणिकनिरन्तरतत्सन्तानस्य वा कर्मत्वात्। उक्तं च **न्यायतत्त्वे प्रथमाधिकरणे**—*यदि गमनपचनादीनां क्षणिकत्वं ज्ञायेत, नहि ते क्षणिकाः—संयोगवियोगविशेषत्वात्तेषाम् इत्यादि। **द्वितीयाधिकरणे** चोक्तम्—गमनं नाम देशाद्देशान्तरप्राप्तिः इति। **प्रमातृपादे** प्रसङ्गेनोक्तम्—*वयं तु क्रियायाः प्रत्यक्षत्वं ब्रूमः इत्युपक्रम्य * तस्माद्देशाद्देशान्तरप्राप्तिर्लिङ्गमिति न मन्यामहे, अपि तु तदेव तदिति मन्यामहे; कल्पनालाघवात् इत्यादि।

यत्तु भट्टपराशरपादैरुक्तम्—

* इन्द्रियैरर्यमाणत्वात् ज्ञायमानोऽर्थ उच्यते । द्रव्यं जातिर्गुणः कर्मेत्यसावर्थश्चतुर्विधः ॥ इति ।

तथा * जातिगुणकर्मसु सामान्यसमाश्रयणे संयुक्तसमवेतसमवायसंभवात् इत्यादि; तत्तु एतैरेव अन्तर्भावितसामान्य-पृथग्गणनवत् । अत एव हि तैरेवोक्तम्—* द्रव्यस्य धर्मिणोऽन्तरङ्गो धर्मविशेषो जातिः । जात्यनुप्राणितस्य विशेषकः सिद्धौ धर्मविशेषो गुणः । तथाविधः साध्यः क्रिया । तद्धर्मकं द्रव्यमिति स्थविष्ठानि लक्षणानि । सौक्ष्म्येण तु विवेक्ष्यन्ते प्रमेयेषु इति । अथान्यः पक्षः—न विभागपूर्वकसंयोग एव कर्म ; एकेन जलधरेण विभज्यमाने जलधरान्तरेण तेन वा पुनस्संयुज्यमाने शिलोच्चये चलतीति प्रत्ययप्रसङ्गात् । देशविभागसंयोगौ कर्मेति चेन्न ; महाप्रवाहपतित-निष्कम्पमकरे चलतीतिप्रत्ययप्रसङ्गात् । न प्रवाहो देशः, किंत्वाकाशभूम्यादय इति चेत्; देशप्रतीतिव्यवहारयोः तत्रापि समत्वात् । स्थिरदेशसंयोगविभागौ कर्मेति चेत्; तर्हि स्थिरास्थिरविभागस्य संयोगाद्यतिरिक्तेन निर्वाह्यत्वात् सिद्धमतिरिक्तं कर्मेति । उक्तं च **मानयाथात्म्यनिर्णये** प्रत्यक्षलक्षणानन्तरं **वरदविष्णुमिश्रैः**—* तच्च द्रव्यगुणकर्मविषयम्—सकलपदार्थजातस्य त्रिष्वेवान्तर्भावात् । तत्र द्रव्यलक्षणं संयोगीति, अकर्मासंयोगी गुण इति गुणलक्षणम् इत्यादि । प्रत्यक्षत्वं च कर्मणोऽन्यत्रापि तैरुक्तम्—* कर्मणस्तु चाक्षुषद्रव्यवर्तिनश्चाक्षुषत्वम् इत्यादिना । तच्च संयोगाद्यतिरिक्तमनतिरिक्तं वाऽस्तु—तृतीयकोट्यनुप्रवेशो न युक्त इति वयं मन्यामहे—इष्टव्यतिरेकेण लक्षणकरणस्य सर्वत्र शक्यत्वात् । यत्र सामान्यवत्त्वे सति संयोगविभागकार्यद्वयाभावः स गुण इति चेन्न ; यत्र तदुभयाभावः स्वोत्पादकसजातीयोत्पादकत्व-तद्विजीयत्वद्वयस्य चाभावः स गुण इति लक्षणकरणेन संस्कारस्यापि पृथक्करणप्रसङ्गात् । एवमन्यदपि चिन्त्यम् । अतो द्रव्यमद्रव्यमित्येव विभागः ॥

सामान्यम् ॥ अथ सामान्यं चिन्त्यते । नित्यमेकमनेकसमवायि सामान्यमिति वैशेषिकादयः । तथा हि—अनेकेष्वेकप्रतीतिव्यवहारो न निमित्तमन्तरेणोपपद्यते । तच्च न ज्ञानाकारः, आत्मख्यातिभङ्गात्, अर्थे च प्रवृत्त्यनुपपत्तेः, भेदाग्रहस्य चायोगात् । नाप्यलीकम् ; असत्ख्यातिभङ्गात् । तथाप्रतीतौ च प्रवृत्त्यनुपपत्तेः, अतथाप्रतीतावन्यथाख्यातिप्रसङ्गात् । सदसदादिविकल्पितस्य भेदस्यानुपपत्त्या तदग्रहणस्यात्रायोगात् । नाप्यपोहात्मकम्, विधिरूपेणैव प्रतीतेः, पूर्ववत्प्रवृत्त्यनुपपत्तेश्च । एतदन्यतयाऽन्यस्मिन् तदन्यतया चास्मिन् निरूप्यमाणेऽन्योन्याश्रयणात् । निष्प्रतियोगिकापोहस्य चायोगात् । तदितरापोह इत्यत्र तच्छब्देन व्यक्त्युपादाने व्यक्त्यन्तरस्य वैजात्यप्रसङ्गेनाननुगतिप्रसङ्गात्, तज्जातीयत्वेनोपादाने जातिवधीकारात् । नापि संस्थानसादृश्यात्मकम्; तत्रानुवृत्तिव्यावृत्तिविकल्पायोगात् । अतोऽनुवृत्तमस्त्वेकं सामान्यमिति ; अत्रोच्यते—केयमेकप्रतीतिर्नाम ? एकव्यक्तित्वप्रतीतिर्वा ? एकजातित्वप्रतीतिर्वा ? एकजातीयत्वप्रतीतिर्वा ? एकाधारधर्मवत्त्वप्रतीतिर्वा ? एकशब्दानुविद्धप्रतीतिर्वा ? न प्रथमद्वितीयौ ; अन्यतरपरिशेषादिप्रसङ्गात् । न तृतीयः, असिद्धेः, एष्वनुवृत्तमिदमिति विकल्पानुदयात् । घटस्य घटत्वमित्यादिव्यवहारस्य कालस्य कालत्वमित्यादिवदुपपत्तेः । नापि तुरीयः ; गोत्वाद्यपलापप्रसङ्गात्, संस्थानमात्रस्यैवास्मदभिमतस्य तथात्वात् । मृण्मय-हिरण्मयघटादिषु भवद्भिरपि तथा निर्वाहात् । न हि तत्रानुगतं घटत्वमभ्युपगतम् ; जातिसङ्करभयात् । व्यावृत्तजातिद्वयाभ्युपगमेऽनभ्युपगमेऽप्यनुवृत्तप्रतीतिव्यवहारयोः संस्थानसादृश्यमेव निबन्धनम् । एवं सति तदेवास्तु सर्वत्रापि । नन्ववयवसामान्यानुवृत्त्याऽवयविन्यनुवृत्तप्रतीतिव्यवहारनिर्वाह इति चेन्न ; यतः कपालत्वादेरपि पूर्ववत् सङ्करादिदोषः

समानः। अस्तु तर्हि सङ्कराभ्युपगमेनानुवृत्तं सामान्यमिति चेन्न; अन्यथाप्रतीतिनिर्वाहे कल्पनायोगात्। व्यावृत्तसंस्थानादेरनुवृत्तधीहेतुत्वेऽतिप्रसङ्गादिति चेत्, व्यावृत्तानां संस्थानानामनुवृत्तव्यञ्जकत्वे कथं नातिप्रसङ्गः? तावतामेव तथाविधस्वभावत्वादिति चेत्, तुल्यम्, तावतामेव तथाविधप्रत्ययहेतुत्वादिति वक्तुं शक्यत्वात्। केवलमुपलम्भातिक्रमो गौरवं च भवन्मते। एवं पञ्चमोऽपि पञ्चतां गतः। तत्र ह्येक इति शब्देनानुविद्धप्रतीतिर्वा? एकेन गवादिशब्देनानुविद्धप्रतीतिर्वा विवक्षिता? आद्यो न कल्पते; एकव्यक्तिरिति विवक्षायामसिद्धेः, एकजातीयत्वमिति व्यवहारस्य तत्तदुपाधिविशेषणोपपत्तेः, राशिसैन्यपरिषदरण्यादिष्वैक्यव्यवहारादिवत्। उपाधिश्चायमनेकेषामेकस्मृतिसमारोहः। नापि द्वितीयः; तस्यानेकार्थेषु शब्देष्वपि समत्वात्। अनेकार्थव्यावृत्तः कश्चिद्विशेषोऽस्तीति चेन्न; तस्यापि स्वरूपविषयादिशब्दवदुपपत्तेः। स्वरूपविषयादिशब्दा हि नानारूपेष्वेवार्थेषु प्रवर्तमानाः केनचिदाकारेण साधारणाः केनचिदसाधारणाश्च दृश्यन्ते, तद्वद्गोशब्दोऽपि सलिलसरस्वतीकिरणकरमाल्यादिषु साधारणः प्रकरणादिवद्विशेषमापद्यत इति विलक्षणनिमित्तकल्पनानवकाशात्। ननु यदि संस्थानमेव सामान्यं तर्हि तद्रहितेषु रूपरसादिषु कथं निर्वाहः? तव वा कथमुपलक्षणरहितेषु? तेषु लक्षणमेवोपलक्षणमिति चेत्; किं तत्? प्रतीतिरिति चेन्न; आत्माश्रयप्रसङ्गात्। अस्माकं तु तदेवैकीकरणमिति नोपद्रवः। उपलक्षणनिर्बन्धो नास्तीति चेत्, अस्माकमपि मा भूत् संस्थाननिर्बन्धः। द्विविधं हि सादृश्यं प्रतीतिसिद्धम्—धर्मसादृश्यं स्वरूपसादृश्यं चेति। द्रव्येषु प्रायशो धर्मसादृश्यादेकरूपप्रतीतिव्यवहारौ। तावदपेक्षया च **श्रीविष्णुचित्तै**रुक्तम्—* भूयोवयवसामान्यमेव प्रतियोग्यपेक्षया सादृश्यशब्दवाच्यम् इति। धर्मान्तरशून्येषु स्वरूपसादृश्यादेव एतावदभिप्रेत्य भगवता **भाष्यकारे**णोक्तम्—संस्थानं नाम स्वासाधारणं रूपमिति यथावस्तु संस्थानमनुसन्धेयम् इति। अत्र यदुक्तं **विवरणे**—* तत्तद्वस्तु पश्यतां तत्तदवयवविन्यासविशेषलक्षणं संस्थानमवभासते। ननु प्रतिव्यक्तिभेदात् संस्थानस्य कथं व्युत्पत्तिः? अथैक्यम्; तर्हि नासाधारणता। नैतत्, उपाधितोऽपि व्युत्पत्तेः; यथा वालधितः पशुद्रव्यस्य। सादृश्यं चोपाधिः इत्यादि, तत्र * अवयवविन्यास इत्युदाहरणपरम्; अन्यथा रूपादिषु रूपत्वं जातिरित्यादिव्यवहारभङ्गप्रसङ्गात्। * सादृश्यं चोपाधिः इत्यादि त्वतिरेकपक्षस्वरसमप्यतिरेकपक्षानुपपत्तेः स्वरूपमात्रपरम्। ननु यदि स्वरूमेव सादृश्यम्, स्वरूपमात्रत्वाविशेषात् सर्वमपि सर्वेण सदृशं स्यात्; रूपं रूपान्तरेण सदृशमिति सहप्रयोगश्च न स्यादिति चेत्; तदिदमतिरिक्तपक्षेऽपि तुल्यम्। यदि तत्र सादृश्यं भवेत् सर्वेणापि तत् सदृशं भवेत्; अविशेषात्। यदि तु तावत्प्रतियोगिकत्वमेव सादृश्यं तत्रोपलम्भव्यवस्थाप्यम्; तर्हि तदेव स्वरूपं तावत्प्रतियोगिकं तत एव व्यवस्थाप्यताम्; अविशेषात्। न च सहप्रयोगानुपपत्तिः; प्रतियोगिनिरूपितवेषेण सदृशशब्दविषयत्वात्, अन्यथा विषयादिशब्दैरपि सहप्रयोगानुपपत्तेः। ननु यदि सादृश्यमेव सामान्यम्, तदा गोगवययोरविशेषेण गोशब्दवाच्यत्वं स्यात्; न स्यात्, सौसादृश्यस्य सामान्यत्वात्। यादृशसौसादृश्यं सामान्योपलक्षणं भवताम्, तदेव तदिति नियमनसिद्धेः। सादृश्यातिरिक्तं सौसादृश्यं नाम किमिति चेत्; आपाततः समानधर्मातिरेकः अन्ततः स्वरूपविशेषः। यत्तु **नारायणार्यै**रुक्तम्—संस्थानमेव जातिः। तत् प्रतिपिण्डं भिन्नत्वेऽपि द्वितीयादिपिण्डेषु सौसादृश्यात् प्रतिसन्धीयमानं स्वाश्रयेषु वस्तुष्वेकबुद्धिनिबन्धनं भवति। तदेव प्रतिसन्धीयमानं सौसादृश्यमनुवृत्तिरिति चोच्यते इत्यादि। यच्च **वरदविष्णुमिश्रै**रुक्तम्—* प्रत्यक्षाश्रयवर्तिसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसादृश्यानि। प्रत्यक्षाणि उपमानप्रमाणान्तरं चोक्तम्—* इदं च सादृश्यं गुणः; अनुमानेन गुणत्वावधारणात्। कार्यभूतसंख्याशक्तिसादृश्यानि गुणाः; द्रव्यकर्मान्वयत्वे सत्याश्रितकार्यत्वाद्धटगतशौक्ल्यवदिति, तत् तेषां तथाऽभिमतमित्येकदेशिमतं मन्तव्यम्॥

यत्तु **भट्टपराशरपादैरुक्तम्**—

* भूयोऽवयवसामान्यं सादृश्यं बहवो विदुः । पृथक्प्रमेयं तदिति प्रमेये दर्शयिष्यते ॥

इति, तत् किमभिप्रायमिति न जानीमः; उत्तरत्र प्रमेयनिरूपणस्य विच्छिन्नत्वात् । अस्तु वा सादृश्यमन्यत्तन्मतेनापि, अस्माकं त्वेषा रुचिः । तदत्र संस्थानमाकृतिरिति पर्यायः । तदेव परस्परनिरूपितवेषेण सौसादृश्यं जातिः सामान्यमिति च गीयते, नान्यदुपलब्धम् । यत्तु **भट्टपराशरपादैरुक्तम्**—* ननु द्रव्यत्वपृथिवीत्वशुक्लत्वपाकत्वादेः सामान्यस्यानाश्रयेण वाच्यानां स्वप्रवृत्तिनिमित्तानां च सन्तत्यवस्थादीनामनेकत्वादेकप्रयोजकाभावे कथमेकशब्द्यम्? वद तव वा कथम्? न ममैव एष भरः, सर्वो हि लोकः सर्वमित्यादिषु बहुष्वपि शब्दैक्यं मन्यते इत्युक्त्वा,

* वाच्यस्वरूपेऽथ तदीयरूपे दूरादुपाधिष्वथवैकभावात् ।
सादृश्यभेदाग्रहतोऽथवैषु वाच्येष्विहैकीकरणं मतं तत् ॥

इति, चन्द्रः सूर्य इत्यादौ वाच्यस्वरूपैक्यात्, घटः पट इत्यादौ तदाकारैक्यात् इत्यादि; तत्र न तावत् मुख्यमेवाकारैक्यं विवक्षितम्; जातिनिराकरणात् । अतः एकाकारविकल्पयोग्यसंस्थानविशेषवत्त्वमभिमतमिति मन्यामहे । तच्चेदं सामान्यमापाततः क्वचित् प्रत्यक्षीक्रियते यथा घटत्वादि । क्वचित् सहकारिविशेषापेक्षया यथा विलीनघृतादौ गन्धग्रहणापेक्षया घृतत्वादि । मातापितृसंबन्धस्मृत्याद्यपेक्षया ब्राह्मणत्वादि । तदुक्तं भगवद्यामुनमुनिभिः **आगमप्रामाण्ये**—

* ततश्च सन्ततिस्मृत्याऽनुगृहीतेन चक्षुषा । विज्ञायमानं ब्राह्मण्यं प्रत्यक्षत्वं न मुञ्चति ॥
तथा च दृश्यते नानासहकारिव्यपेक्षया । चक्षुषो जातिविज्ञानजनकत्वं यथोदितम् ॥ इत्यादि ।........

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु

॥ न्यायसिद्धाञ्जनम् समाप्तम् ॥

॥ एतावदेव उपलभ्यमानम् ॥

लिबर्टि प्रेस्, मदरास्.

श्रीमद्वेदान्तदेशिकग्रन्थमालायां

वेदान्तविभागे

॥ द्वितीयं सम्पुटं समाप्तम् ॥

॥ अस्या महाराजपोषका राजपोषकाश्चैते ॥

Patrons. Rs 100.

1. Sri M. Sudarsanam Iyengar & Sons., Timber Merchants, MADRAS.

2. Sri S. Varadacharyaswami, Federal Court Judge of Delhi,

3. Sri. V. Gopalacharyaswami M.A., B.L., Advocate, TRICHINOPOLY.

४. महामहोपाध्याय. पण्डितराज. रा. च. वि. कृष्णमाचार्याः [कुम्भघोणम्]

5. R. Srinivasacharyar swami, B.A., B.L., State Vakil and Public Prosecutor, PUDUKOTAH.

Donors. Rs 50.

1. Sri Ubhayavedanta Pravartana Sabha, Malleswaram, BANGALORE.

2. Sri K. Raghavacharyar, Retired Postal Inspector, MADRAS.

3. T. S. Ramaswami Iyengar, Advocate, MADURA.

4. Dewan Bahadur, C. V. Venkataramana Iyengar, COIMBATORE.

५. श्रीयुत. महन्त. गरुडध्वजाचार्यः उज्जयिनी ।

६. वेदान्तशिरोमणि श्रीस्वामी. रामानुजाचार्य शास्त्रीजी. हरिदेवजी का मंदिर. वृन्दावन ।

SRI BHAGAVATH RAMANUJA GRANTHAMALA

All the works of Sri Ramanuja have been printed in a similar manner, in Telugu characters, under the title of "Sri Bhagavad Ramanuja Granthamala." Price Rs. 6 net.

All communications to be addressed to

VIDWAN A. SAMPATHKUMARACHAR, M.A.,
Granthamala Office, 39, Sannidhi Street,
L. CONJEEVERAM, S. I. Ry.

November 1940.

Cover Page Printed at Sri Sudarsana Press, L.Conjeeveram.

187

120

246
266
512

187